
संस्कृतपरिषद्ग्रन्थमाला–३६

महामहोपाध्यायनागेशभट्टविरचितः

परिभाषेन्दुशेखरः

भागवतुल हरिशास्त्रिणा विरचितया

'वाक्यार्थचन्द्रिका'ख्यया व्याख्ययोपेतः



संस्कृतपरिषत्, उस्मानियाविश्वविद्यालयः
हैदराबाद् . (आ. प्र.) ५०० ००७.

क्री. १९८७. शक. १९०९.

संस्कृतपरिषद्ग्रन्थमाला–१६

महामहोपाध्यायनागेशभट्टविरचितः

परिभाषेन्दुशेखरः

भागवतुल हरिशास्त्रिणा
विरचितेन वाक्यार्थचन्द्रिकाख्यव्याख्यानेन समलङ्कृतः

सम्पादकौ
डा. पुल्ले श्रीरामचन्द्रः, एम्.ए., पि. एच्. डि.
सञ्चालकः

विठ्ठलदेवुनि सुन्दरशर्मा
परिशोधनसहायकः.



संस्कृतपरिषत्, उस्मानियाविश्वविद्यालयः
हैदराबाद्. (आ. प्र.) ५०० ००७

क्री.:१९८७. शक १९०९.


सर्वेऽधिकाराः स्वायत्तीकृताः

हैदराबादनगरे उस्मानियाविश्वविद्यालयस्थ-
संस्कृतपरिषदा प्रकाशितः

मूल्यम्-रू. ६९-००

प्रथमं संस्करणम् १९८७

प्रतयः ९००



उस्मानियाविश्वविद्यालयप्राङ्गणस्थ वाग्विलास मुद्रणालये मुद्रितः ।

Sanskrit Academy Series-36

Paribhāsendusekhara

by

Mahāmahōpādhyaya Nāgēśa Bhatta

with the commentary

Vākyārthacandrikā

by

Bhāgavatula Harisastry

Edited by


Dr. P. Sri Ramachandrudu M.A., Ph.D.

Director

and

V. Sundara Sarma

Research Assistant



SANSKRIT ACADEMY

Osmania University,

Hyderabad (Andhra Pradesh)

A.D. 1987. Saka 1909.

All rights reserved.

Published by
SANSKRIT ACADEMY
OSMANIA UNIVERSITY
HYDERABAD–500 007
INDIA



Price : Rs. 65-00

First Edition–1987

Copies 500

Printed at the Dairatul Ma'arif Press, Osmania University,
Hyderabad-500 007

PREFACE

As a great scholar, responsible for sowing the seeds for the new school in Vyākaraṇa, as opposed to the old school represented by Bhaṭṭojidīkṣita and others, Nāgeśa occupies a highly respectable place among the Vaiyākaraṇas, unrivalled till to-day. Paribhāṣenduśekhara, considered to be Nāgeśa's last work on Vyākaraṇa (written at the end of the first decade of the 18th century) had become very popular through out the lengeth and breadth of the country and threw into back ground, all the earlier works of its kind. Nāgeśa's mastry over the subject is discernable in every sentence of this work, where he appears to be playing with the whole of Aṣṭādhyāyl and Mahābhāṣya, keeping those two works, as it were, on his finger-tips. Each statement of Nāgeśa presupposes, on the part of the readers, a thorough knowledge of the portions of Mahābhāṣya, connected with the subject discussed. The peculiar style of Nāgeśa, who condenses the wealth of thought in small sentences, has naturally, become responsible for the appearance of more than thirty commentaries, written by scholars from all parts of the country.

The scholars of this part of the country, i.e. Āndhradeśa also had their own valuable share to contribute to this large body of commentaries, Paribhāṣenducandrikā of Kāśibhaṭla Viśvanātha Śāstri, Vākyārthacandrikā of Bhāgavatula Hari Śāstri, which is being published in this volume, and

Nāgeśagūḍhārthadīpikā of Peri Venkateśvara Śāstri, (completed and published in 1955) deserve special mention.

Bhāgavatula Hari Śāstri was the son of Bhāskara Sūri and was a student of Kāśinātha 'Vidvanmahopādhyāya'. He was an Āsthānapaṇḍita in the Court of the King Śri Vajayarama Gajapati (19th Century) of Vizayanagaram whose patronage was enjoyed even by the scholars beyond the boundaries of India (Max Muller received financial help for the publication of Ṛgveda from the King of Vizayanagaram).

The Commentary, Vakyārthacandrikā on Paribhāṣenduśekhara of Hari Śāstri is a scholarly work, as scholarly as the work of Nāgeśa. In this commentary, while explaining some of the subtle points in clear terms, Hari Śāstri, does not hesitate to criticise the views of even Nāgeśa on many occasions, under the heading 'Kecittu'. In many places his views deserve careful study, though Peri Venkateśvara Śāstri has tried, in his commentary, to vindicate Nāgeśa.

It was exactly one hundred years ago i.e. in 1887 that this work was first published at the instance of Sri Ananda Gajapati, the then Maharaja of Vizayanagaram, by Kolluru Kāma Śāstri, one of the students of Hari Śāstri. (His introduction in Sanskrit is included in this volume.) The Sanskrit Academy which has been publishing some of the rare Sanskrit works and the works in manuscript-form has undertaken to publish this commentary which has now become a rare work. It is hoped that

this will be welcome by the students of advanced works of Vyākaraṇa and by scholars.

I am grateful to Professor T. Navaneeth Rao, Vice-Chancellor of Osmania University and Vice-President of the Academy, for the keen interest he has been taking in the activities of the Academy, encouraging and giving every possible support at the times of need.

I am thankful to the Director of Dairatul-Ma-arif, Osmania University, but for whose sympathetic attitude towards the sister-institution in providing printing facilities without insisting on prompt payment, it would not have been possible for the Academy to carry on its publication activity, during the recent years.

Dr. P. Sri Ramachandrudu
Director

1-1-1987

Preface to the Earliest Edition of 1887

श्रीः

भूमिका

ओं नमः परदेवतायै श्रीदुर्गाम्बायै

इह किलाद्यत्वे शब्दशास्त्ररसप्रवगाहनमानिनां जनानां नास्ति खलु प्रचलितः कोऽपि प्राक्तनः संक्षिप्तोऽपि गुर्वर्थं ईदृशो ग्रन्थो यथा महां-महोपाध्यायनागेशभट्टविरचितः परिभाषेन्दुशेखरो नामेति सुप्रसिद्धमेव ।

तस्य चास्य निखिलदेशविपश्चिदाहृतस्यातिप्रौढस्य सत्स्वपि बहुलेषु व्याख्यानेषु तद्वैलक्षण्येन' प्राचीननवीनपथपरिष्कारैकरवकोल्लासपुरस्सरं व्युत्पित्सूनामवारीणानामपि वैदुषीसागरपारदर्शनमहोपकाराय, इयं 'वाक्यार्थचन्द्रिका'ख्या व्याख्या श्रीमद्विजयनगरसंस्थानपण्डितवरैर्बालशेयैः प्रकृतश्रीमहाराजानां 'संस्कृतविद्याध्यापकैर्भागवतोपनामकश्रीहरिशास्त्रिशर्माभिरस्मद्गुरुचरणैर्व्यरच्यत । प्रथते खल्वियं वाचोयुक्तौ राजसभासु । यथा—

संजीव्यन्ते यदपि च मृतास्तद्धि संजीवनी स्याद्-
वृत्तेर्ज्ञाप्या हृदयवसतेश्चेतना सा च वाचः ।
सा निर्दोषस्फुटदवयवा स्याद्यया व्याकृतिः सा
संजीवन्या अपि निगदिता काऽपि संजीवनीयम् ॥ इति ।

सा चेयं विना मुद्रणं न सकलविद्वज्जनगोचरीभविष्यतीति श्रीमन्महामहिमविजयनगरमहाराजशूरवरेत्यादिविरुदावलीविराजमानमानोन्न-तविद्वत्प्रियश्रीमदानन्दगजपतिमहाराजानां निदेशेन तत्सभास्तारेण मया संशोध्य यथोपयोगं मूलेन संयोज्य च मद्रयित्वा प्रकाशिता ।

प्रार्थये च विद्वारसिकान् महाशयवरान् गुणदृष्टयाऽत्र नयनार्पणा-नुग्रहद्वारा ग्रन्थकर्तुः, मम च परिश्रमसफलीकरणायेति शम् ॥

ईस्वी सन् १८८७. कोल्लूरु कामशास्त्री

-:0:-

श्रीः

वाक्यार्थचन्द्रिकाव्याख्या

समलङ्कृतः

परिभाषेन्दुशेखरः

नत्वा साम्बशिवं ब्रह्म नागेशः कुरुते सुधीः ।
बालानां सुखबोधाय परिभाषेन्दुशेखरम् ॥

ओं नमः पाणिनिकात्यायनपतञ्जलिभ्यो महद्भ्यो मुनिभ्यो गुरुभ्यः ।

जयन्ति जगतां मातुश्चरणारुणदीप्तयः ।
विजृम्भन्ते यतः पुंसां विद्याकमलिनीश्रियः ॥

काशीनाथपदाम्भोजं कलयन्मानसे हरिः ।
विवृणोति यथाबुद्धि परिभाषेन्दुशेखरम् ॥

यद्यप्यत्यन्तगम्भीरो नागेशवचनक्रमः ।
तथापि बुद्धिवैशद्यसाधनार्थोऽयमुद्यमः ॥

जयति श्रीमहाराजः कलिङ्गवसुधाधिपः ।
सूर्यवंशसुधासिन्धुस्फुरत्पूर्णक्षपाधिपः ॥

राजद्विजयरामाख्यो विख्यातामितविक्रमः ।
वनीपकमनोऽभीष्टविश्राणनसुरद्रुमः ॥

तदीयागण्यकारुण्यप्राप्ताभीष्टश्रिया मया ।
प्रणीयते निबन्धोऽयं प्राप्नुतात्तद्यशो दिशः ॥

अथ नागेशोपाध्यायः प्रारिप्सितप्रकरणपरिसमाप्तिप्रतिबन्धकीभूतप्रत्यूहपरिहाराद्यनेकफलसम्पादकतया कृतमिष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षार्थमुपनिबध्नन् प्रेक्षावदुपकाराय प्रतिजानीते—'नत्वा' इत्यादिना। स्वापकर्षबोधानुकूल्यापानरूपनिष्क्रियाकर्मत्वस्य गुणवत्ताव्याप्यस्य पारमार्थिके निर्गुणे ब्रह्मणि बाधितत्वादाह—'साम्बशिवम्' इति। अम्बा सकलचराचरजगन्मातृत्वेन श्रुतिप्रसिद्धा परा प्रकृतिस्तया परिक्रीडमानमनन्तकल्याणगुणपरिपूर्णं शिवात्मकं ब्रह्मेत्यर्थः। शिवात्मकत्वोक्तिरुपास्यदेवतास्वरूपनिरूपणाय। 'नागेशः' इति। नामनिर्देशः कीर्त्यनुवृत्त्यर्थः। स्यादेतत्। ''आत्मनाम गुरोर्नाम नामाऽसिद्धस्य च। श्रेयस्कामो न गृह्णीयात् ज्येष्ठापत्यकलत्रयोः।'' इति स्मृतिवचनेन श्रेयोनाशकत्वरूपप्रत्यवायप्रदर्शनपूर्वकं निषिद्धत्वात्स्वकीयनामनिर्देशो न युक्तः। न च निरुक्तस्मृतिघटकनामपदस्वारस्याल्लिषेधस्य पितृसङ्कीर्तनाद्यावृत्तिविषयत्वाद्दूरस्थ च नाग ईशः प्रवर्तको यस्येति व्युत्पत्तिवशेन योगजन्यकृत्तत्त्वाः पौरुषेयत्वाच्च न प्रामाण्यवचनबोधितनिषेधप्रवृत्तिरिति वाच्यम्। उपदर्शितरीत्या व्युत्पत्त्यङ्गीकारे जातिप्रवृत्तिनिमित्तकद्रव्यविशेषवाचकनागशब्दसमभिव्याहृतस्येशशब्दस्य तदितरप्रवर्तकत्वरूपक्रियाविशेषप्रवृत्तिनिमित्तकस्य 'विशेषणं विशेष्येण बहुलम्' (२.१.५७) इति सूत्रस्थभाष्यप्रामाण्येन विशेषणत्वाबाध्यम्भावात्पूर्वनिपातवैपरीत्ये निरुक्तानुपूर्व्या एव दौर्लभ्यापत्तेः। पितृसङ्कीर्तितानामपि युधिष्ठिरादिनाम्नां योगरूढानामुपलम्भात्तावन्मात्रेण पितृसङ्कीर्तनविषयत्वाभावकल्पनायां मानाभावाच्च। ''कैयटो जैयटात्मजः'' इत्यादावनिर्वाहेण दृढतरमानाभावेन च केवलरूढ्या योगरूढ्या वा स्वार्थोपस्थापकं यत्तत्परतया सकलसुप्रसिद्धस्य पितृसङ्कीर्तनसाधारणस्य नामशब्दस्य तत्सङ्कीर्तनविषयनाममात्रपरतया सङ्कोचस्य वक्तुमशक्यत्वाच्च। न च निषेधस्योच्चारणपरत्वेनैतादृशनामनिर्देशानां लेखनरूपत्वेऽप्युच्चारणाभावान्न दोष इति वाच्यम्। लेखनस्याप्यक्षरज्ञानवतां विना स्वीयसूक्ष्मोच्चारणमनुपपन्नतया दोषस्य दुर्वारत्वात्। लोकविश्वासाच्च स्फुटोच्चारणेन कृतासु 'रामो द्विर्नाभिभाषते' इत्यादिप्रतिज्ञासु तत्सङ्कीर्तनदोषस्य परिहारासम्भवाच्च। न च 'प्रत्यभिवादेऽशूद्रे' (८.२.८३) इति सूत्रे भाष्ये नामसङ्कीर्तनपूर्वकोऽ-

भिवादनाभावस्य प्रत्ययस्य स्पष्टमुपपादितत्वात् तदुल्लेन कर्तव्यार्थविषयकज्ञानजनकशब्दप्रयोगात्मकप्रतिज्ञावाक्यघटकतया स्वीयनामसङ्कीर्तने प्रत्यवायाभावस्सामान्यतो ज्ञाप्यते । असति बाधके प्रमाणानां सामान्ये पक्षपातात् । एवञ्चैतादृशनामनिर्देशानामपि तथाविधवाक्यघटकत्वाविशेषान्न दोष इति वाच्यम् । अभिवादवाक्यघटकतया नामसङ्कीर्तनस्य, "अभिवादारूपरं विप्रो ज्यायांसमभिवादयन् । असौ नामाऽहमस्मीति स्वं नाम परिकीर्तयेत्" इति मनुवचनसिद्धतया तदेकवाक्यत्वेनाभिवादवाक्यघटकनामसङ्कीर्तनमात्रजन्यप्रत्यवायाभावतात्पर्यकतयैव प्रकृतभाष्यसामञ्जस्ये निरुक्तकल्पनाया निर्मूलत्वात् । ततश्च प्रत्यभिवादव्यतिरेकेण पितृसङ्कीर्तितासङ्कीर्तितसाधारणतायां स्वकीयनामनिर्देशे प्रत्यवायो दुर्वार एवेति चेत्–अत्र मान्याः; 'गोनर्दीय आह' इति भाष्यकारोक्तिबलेन वक्तव्यार्थविषयकप्रतिज्ञावाक्यघटकतया नामसङ्कीर्तने प्रत्यवायाभावकल्पनादोषः । अत एव स्वयमुक्तेष्वपि वचनेषु मुनीनां "इति शातातपोऽब्रवीत्" इत्याद्युक्तिरुपपद्यत इत्याहुः । यत्तु ग्रन्थकर्तृत्वव्यवहारिकत्वरूपोपाधिकृतभेदमादायैकस्यापि नाम्नोऽस्य भिन्नतया न प्रकृते निरुक्तदोषावकाश इति वदन्ति; तदसत् । आहार्यारोपस्य धर्मज्ञास्त्रव्यवस्थापकत्वायोगात् । तथात्वे हि शास्त्रस्यैवाव्यवस्थापकत्वं स्यादिति दिक् ।

केचित्तु प्रकृति(त)निषेधवचनघटकेनात्मनशब्देन प्रयोक्तृप्रयुज्यमाननामप्रतिपाद्ययोस्साक्षात्तादात्म्यप्रतीतेर्निषेधनिमित्ततया तथा प्रतीयमानस्य तस्य विना प्रमाणं परित्यागायोगाच्च यच्च तादृशं तादात्म्यं प्रतीयते तत्रैवायं निषेधः । तत्प्रतीतिश्चास्मच्छब्दार्थसामानाधिकरण्य एव । यथा "देवदत्तोऽहं ब्रवीमि" इत्यादौ । 'गोनर्दीय आह' इति प्रयुञ्जानस्य भगवतो भाष्यकारस्याप्ययमेवाभिप्रायो न्याय्यः । एवं च प्रकृते तदर्थसामानाधिकरण्यप्रयुक्तस्य तथाविधतादात्म्यनिमित्तस्य तादृशनिषेधस्य अप्रसङ्ग एव । "कैयटो जैयटात्मजः" इत्यादावपि य; कैयट इति लोके व्यवहियते सोऽहं जैयटात्मज इति तदर्थाश्रयणात्परम्परया तादात्म्यप्रतीतावपि साक्षादप्रतीतिरेवेति न कुत्रापि दोष इत्याहुः । 'कुरुते' इति । यज्ञ;पुण्यादिरूपस्य क्रियाफलस्य कर्तृगामित्वादाहवनेनदम्प्रयोगः । अस्मत्प-

दशक्यतावच्छेदकपुरस्कारेणात्मदर्शस्य प्रकृतक्रियां प्रति कर्तृत्वभावान्नो-त्तमपुरुषप्रसङ्गः ।

नन्वात्मनेपदबोधितकर्तृगामियशःपुण्यादिरूपक्रियाफलस्य स्वग्रन्थे ग्रन्थान्तरविलक्षणलोकोपकारमन्तरेण न सम्भव इत्यत आह—'बालानाम्' इति । बालत्वञ्च प्रतिपिपादयिषितार्थविषयकप्रतिपत्तिशून्यत्वे सति तदपेक्षित्वम् । एतेन स्वग्रन्थस्य ग्रन्थान्तरैरगतार्थता सूचिता ।

'परिभाषेन्दुशेखरम्' इति । इन्दुरिव विधिशास्त्रीयवाक्यार्थं प्रतिपादयन्त्यो याः परिभाषास्ताश्शेखरं व्याख्येयत्वाच्छिरोभूषणं यस्य तमित्यर्थः । विध्यर्थप्रकाशकपरिभाषार्थनिर्णायकग्रन्थविशेषमिति यावत् । एतेन परिभाषार्थो विषयस्तज्ज्ञानं प्रयोजनम्, तज्ज्ञाशुरधिकारी इत्यादि सूचितम् । ननु लिङ्गवत्वे सति सन्दिग्धार्थनिश्चायकत्वं हि परिभाषाशास्त्रस्य लक्षणम् । तत्र "न धातुलोप" (१.१.४) इत्येतच्छास्त्रविषयकगुणवृद्धिनिषेधकत्वेकपरिभाषानिषेधकत्वोभयधर्मप्रकारकसंशयविषयीभूतगुणवृद्धिनिषेधकत्वरूपैकतरधर्मप्रकारकनिश्चयसम्पादकतया "दीर्घोवेवीटाम्" (१.१.६) इति निषेधशास्त्रेऽतिव्याप्तिरिति विशेषणदलम् । तथा प्रदेशघटकवृद्ध्यादिपदरूपस्योपस्थापकलिङ्गवत्तया संज्ञाशास्त्रेष्वतिव्याप्तिरिति विशेष्यदलम् । एवं च निरुक्तलक्षणानाक्रान्तानां यस्मिन्विधिस्तदादावल्ग्रहणे वर्णाश्रये नास्ति प्रत्ययलक्षणमित्यादीनां संज्ञानिषेधरूपाणामपि व्याख्यास्यमानत्वादुक्तलक्षणाक्रान्तानां पाणिनिप्रणीतपरिभाषाणामव्याख्यास्यमानत्वाच्च प्रतिज्ञाविरोध इत्यतस्तद्विषयीभूतपरिभाषास्वरूपनिरूपणायाह —

प्राचीनवैयाकरणतन्त्रे वाचनिकानि, अत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्त्तिकयोर्निबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते । ननु 'लण्' (मा.सू.६) 'अइउण्' (मा.सू.१) सूत्रापोर्णकारस्यैवोपादानेन अणिण्ग्रहणेषु संदेहादनिर्णयोऽत आह—

१. व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् ।

विशेषस्यान्यतराद्यर्थरूपस्य व्याख्यानात् शिष्टकृतात् प्रतिपत्तिः निर्णयः । हि यतः सन्देहात् शास्त्रमलक्षणमननुष्ठापकं, लक्षणं तथा न । शास्त्रस्य निर्णयजनकत्वौचित्यादित्यर्थः ।

"प्राचीन" इत्यादि । 'वाचनिकानि' इति । परिभाषापाठे वचनरूपेण पठितानीत्यर्थः । एवं च अन्यत्र प्राचीनवैयाकरणतन्त्रे पठितानां "ग्रन्थिग्रन्धि" इत्यादीनां पाणिनिपठितानां 'इको गुणवृद्धी' (१.१.३) इत्यादीनां च न प्रतिज्ञाविषयीभूतपरिभाषात्वमिति भावः । "ज्ञापकन्यायसिद्धानि" इति । अस्य प्रायेणेत्यादिः । एवं च पाणिनीयतन्त्रे कासाञ्चित् "यस्मिन् विधिः" (परि.३३) इत्यादीनां वाचकत्वेऽपि न क्षतिः । यद्वा 'मल्लग्रामः इतिवद्भूयसा व्ययदेशः । बहूनि ज्ञापकन्यायसिद्धानि; स्वल्पान्येव वाचनिकानीति तदर्थः । यत्तु सिद्धशब्देनैव वाचनिकसंग्रहमपेक्ष्य ज्ञापकन्यायसिद्धयोरेव आवश्यजन्तत्वकल्पनया तन्मूलकवचनलाभ इति व्याचख्युस्तत् क्लिष्टत्वादुपेक्ष्यम् । तत्र ज्ञापकमेतच्छास्त्रीयं प्रमाणम्, न्यायो लौकिकदृष्टान्तः । तत्र ज्ञापकसिद्धानि 'असिद्धं बहिरङ्गम्' (प.९०) इत्यादीनि । न्यायसिद्धानि "यदागमाः" (प.११) इत्यादीनि । 'यस्मिन् विधिः' (प.३३) इत्यादीनि तु वाचनिकानीति विवेकः । भाष्यवार्तिकयोर्निबद्धानीत्यस्य तत्सम्मतानीत्येवार्थ इति न ध्वनितानामसङ्ग्रहो नापि प्राचीनपठितानामपि तदसम्मतानामव्याख्यानं दोषः । ये तु भाष्यवार्तिकयोर्निबद्धानीत्यस्य तत्र वचनरूपेण पठितानीत्यर्थं इति वाचनिकलाभाय व्याचक्षते "तेषां 'आगमशास्त्रमनित्यम्" इत्यादीनामव्याख्यानं दोषः । तासामनूक्ष खण्डनेऽपि व्याख्यानाभावात् । तदेव व्याख्यानमित्याग्रहे तु 'मात्रा लाघवेन' (प.११२) इत्यादि ध्वनितवाचनिकपरिभाषासंग्रहो दोषः । ततश्च प्राचीनवैयाकरणतन्त्रे परिभाषापाठे पठितानि पाणिनीयतन्त्रे ज्ञापकसिद्धानि न्यायसिद्धानि वाचनिकानि च तत्र तत्र भाष्यवार्तिककारणाभ्यामभ्युपगतानि यानि परिभाषारूपाणि तानि व्याख्यायन्त इत्यखण्डार्थः ।

एवं परिभाषापाठानुरोधात्पाणिनिप्रणीतपरिभाषातिरिक्ता एवं भाष्यवार्तिकसम्मताः परिभाषा इह गौणमुख्यसाधारणतया व्यख्येयत्वेन प्रतिज्ञाता

इत्यन्यदेवेदं व्याख्यस्यमानपरिभाषालक्षणम् ; पूर्वोक्तं त्वष्टाध्यायीस्थपरिभाषाणामेवेति न प्रतिज्ञाविरोध इति परमार्थः । 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' (प.१) । तत्र सकलशास्त्रोपयोगित्वेन प्रकृतशास्त्रमूलभूतवर्णसमाम्नायस्थलिङ्गबोधितत्वेन च प्राधान्यात् ''व्याख्यानतः'' इत्येतस्याः परिभषयाः प्रथमतो निरूपणमुचितमिति सूचयन्नवक्तीत्यति—''ननु 'लण्' 'अइउण्' '' इत्यादि । एतेन वोपदेवादिसम्मतः 'अनिनस्मिन् ग्रहणानि' (प.१६) इत्यादिकः परिभाषापाठो न साम्प्रदायिकः, सन्दर्भविहीनत्वादित्युक्तप्रायम् । तत्र सन्दर्भः प्रायेणैवावतरणेन तत्र तत्र स्फुटीकरिष्यते ।

'सन्देहादनिर्णयः' इति । पाणिनितात्पर्यसन्देहप्रयुक्तात्सूत्रार्थसन्देहात्प्रयोगानिर्णय इत्यर्थः । अनुष्ठापकवाक्यार्थसन्देहाभावमन्तरेणानुष्ठाननिर्णयो दुर्लभः । तयोर्हेतुहेतुमद्भावादिति भावः । 'विशेषस्य' इत्यादि । यतश्शास्त्रस्य निर्णयजनकत्वौचित्यादनुष्ठापकं शास्त्रम्, बोध्यसन्देहप्रयुक्तानुष्ठापकत्वाभाववन्न भवति, ततश्शिष्टकृताद्व्याख्यानादुपदेशपारम्पर्यादन्यतरार्थविषयकनिश्चय आश्रयणीय इत्यर्थः । यद्वा यतोऽन्यतरार्थविषयकनिश्चयादानुष्ठापकं शास्त्रमनुष्ठापकत्वाभाववन्न भवति स निश्चयो व्याख्यानादुक्तलक्षणाद्भवति । कुत एतत् ? शास्त्रस्य निर्णजनकत्वौचित्यादिति तदर्थः ।

असन्दिग्धानुष्ठानसिद्ध्यर्थं अत्र शास्त्रे सन्दिग्धोच्चारणरूपाचार्यव्यवहारेण सन्देहनिवृत्तेर्व्याख्यानातिरिक्तनिमित्तानपेक्षत्वं बोध्यत इति यवत् ।

नन्वियं परिभाषा निर्मूला । न च वर्णसमाम्नायिकणकारूपानुबन्धद्वयोच्चारणं ह्यस्यां परिभाषायां ज्ञापकमिति वाच्यम्, तच्च न । ज्ञापनोत्तरमनुबन्धान्तरोच्चारणेनैव सिद्धेः स्वांशे चारितार्थ्याभावात् । न हि स्वांशे चारितार्थ्यमन्तराज्ञापनं सम्भवति । विपरीतार्थेस्यापि ज्ञापनापत्तेः । नापीयमन्यथासिद्धेन केनचित्प्रयोजनवती, ज्ञापकाश्रयणेनैव तत्र तत्र सन्देहनिवारणसम्भवात् । तस्मादियमनुपादेयैव परिभाषेत्यत आह—'असन्दिग्ध' इत्यादि ।

असन्दिग्धं सन्देहविषयभिन्नं यदनुष्ठानं शब्दप्रयोगस्तत्सिद्ध्यर्थ इति तदर्थः। सम्पूर्वस्य दिहेरकर्मकत्वेऽपि भावकान्तादर्शनाच्चि निरुक्तार्थलाभः। उत्तरत्र सन्दिग्धोच्चारणेत्यत्राप्येवमेव। परन्तु तत्र सन्देहजनकमित्यर्थः। कर्तृनिष्ठायामेवैतदर्थलाभ इति तु न युक्तम्। सविषयार्थवाचकधातुसमभिव्याहृतस्य कर्तृप्रत्ययस्याश्रयातिरिक्तबोधकताया अप्रसिद्धेः। अयं भावः – अनुष्ठानसन्देहनिवर्तनेन ह्यनुष्ठापकं शास्त्रमर्थवत्। यदि च स्वगतसन्देहेनानुष्ठानसन्देहनिवृत्तेरयोगस्तर्हि शास्त्रस्यानर्थक्यमेव स्यात्। तद्वैयर्थ्यं च वृद्धिसूत्रभाष्ये भगवता निराकृतमेव। ततश्च शास्त्रसार्थक्यान्यथानुपपत्त्या तत्सन्देहनिवर्तकोपायापेक्षायां ज्ञापनेन तन्निवर्तने क्लेशाच्छिष्टपारम्पर्यपरिप्राप्तमुपदेशलक्षणं व्याख्यानमेव तन्निवर्तकोपाय इति कल्प्यते। तत एषा परिभाषा तन्त्रान्तराभ्युपगता फलिता भवति। एतावतैव ज्ञापकसिद्धेयमित्युद्घोषः। नन्विदमनुबन्ध्यद्वयोच्चारणमस्यां परिभाषायां स्वातन्त्र्येण ज्ञापकम्। ज्ञापितयां स्वांशे चारितार्थ्याभावात्। न च परिभाषोपस्थापकलिङ्गबोधनेन तत्सार्थक्यमिति वाच्यम्। परिभाषाघटक 'न हि सन्देहादलक्षणम्' इत्यंशादेव तल्लाभसम्भवात्। भाष्ये च— "[1]किमिदं वर्णोत्सत्ताविवायं णकारो द्विरनुबध्यते? एतज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इत्युक्तम्। तत्र ज्ञापयतीत्यस्य मदुक्तरीत्या बोधयतीत्येवार्थ इति न तद्विरोध इति। तदेतद्ध्वनयन्नाह–'बोध्यते' इति। 'यावत्' इति। केचित्तु यत्रानन्यथासिद्धलक्ष्यनिर्वाहकतया ज्ञापकेन वचनकल्पना तत्रावश्यकं स्वांशे चारितार्थ्यानुसरणम्। अन्यथा विपरीतकल्पनाया अपि प्रसक्तेः। यत्र च प्रमाणान्तरेण लक्ष्यनिर्वाहेऽपि कथंचिच्छास्त्रवैयर्थ्यपरिहारायान्यथासिद्धप्रयोजनस्यैव वचनस्य ज्ञापनं लाघवादाश्रीयते, न तत्र स्वांशे चारितार्थ्यापेक्षा; प्रमाणान्तरविरोधादेव तत्र विपरीतकल्पनाया असम्भवात्। अत एव "अणुदित्" (१.१.६९) सूत्रस्थस्याप्रत्ययग्रहणस्य भाष्यमानपरिभाषाज्ञापकतापरभाष्यसङ्गतिः। अन्यथा ज्ञापितायां परिभाषायां स्वांशे चारितार्थ्याभावात्तदसङ्गतिः स्पष्टैव। ज्ञापयतीत्यस्य बोधयतीत्यर्थकत्वं तु न युक्तमक्षरस्वारस्यभङ्गापत्तेरिति स्पष्टमुद्योतशेखरयोः। किञ्च परिभाषावटक 'न हि सन्देहादलक्षणम्'

---

१. भा. सू. ६

इत्यंशादेव सन्देहात्मकपरिभाषोपस्थापकलिङ्गलाभेऽपि तदंशस्य प्रकृतानुबन्धद्वयोच्चारणरूपयत्नत एव सिद्धौ लाघवाच्चारितार्थ्यमपि सुस्थम्। तस्मान्निरुक्तानुबन्धद्वयोच्चारणं साक्षादेव परिभाषायां ज्ञापकं भवितुमर्हतीति वृथैवायं मूलकृत्प्रयास इत्याहुः।

तेन "अणुदित्सवर्णस्य" इत्येतत् परिहाय पूर्वेणाण्ग्रहणं परेणेण्ग्रहणमिति "लण्" सूत्रभाष्ये स्पष्टम्।

'तेन' इति। व्याख्यानेनेत्यर्थः। ज्ञापकयत्नेनेत्सन्देहनिवर्तने क्लेशो वर्णसमाम्नायिकणकारानुबन्धद्वयोच्चारणवैयर्थ्यपरिहारासम्भवश्चेति तदुच्चारणेन परिभाषाज्ञापनपूर्वकं व्याख्यानमेव तन्निवर्तकत्वेनादृतं भगवता सूत्रशेष इत्याशयः। भाष्ये स्पष्टम्' इति। तत्र हि 'अणुदित्सवर्णस्य (१.१.६९) इत्येतत्परिहाय पूर्वेणाण्ग्रहणं परेणेण्ग्रहणमिति व्याख्यास्याम इत्युक्तम्। एतेनस्याः परिभाषाया भाष्यनिबद्धत्वं स्पष्टमेव।

अत्रेदं बोध्यम् – मूलशास्त्रसन्देहेऽवनुष्ठाननिर्णायकतया व्याख्यातृमुनिवचनानां प्रामाण्यं बोधयन्ती परिभाषेयं यत्र मूलव्याख्यानयोः परस्परविरोधो, यथा "न बहुव्रीहौ" (१.१.२९) इत्यत्र सूत्रभाष्ययोः, तत्र उभयोरपि मुनिवचनतया प्रबलदुर्बलभावस्य वक्तुमशकयत्वात्साधुत्वास्यापौरुषेयतया तत्रान्तरे विरुद्धयोरिव विकल्पस्य वक्तुमशकयत्वाच्च शब्दप्रयोगात्मकानुष्ठाननिर्णायायान्यरधर्मकत्वे(र्मत्वे)नावश्याभ्युपेयस्य प्रामाण्यस्य सन्देहेऽपि व्याख्यानस्य प्रामाण्यमवगमयति। ततश्च 'यथोत्तरं मुनीनां प्रामाण्यम्' इत्यर्थोऽनयैव सङ्गृहीत इति नातिरिक्तस्सोऽर्थः। ध्वनितमिदमुपाध्यायेनापि व्याख्याने। "शिष्टकृतात्" इति विशेषणपरिपूर्णादिति सुधीभिराकलनीयमित्याहुः।

तत्र संज्ञापरिभाषाविषये पक्षद्वयामित्याह—

२. यथोद्देशं संज्ञापरिभाषाम्।
३. कार्यकालं संज्ञापरिभाषम्। इति।

उद्देशमनतिक्रम्य यथोद्देशम्। उद्देश उपदेशदेशः। अधिकरणसाधनश्चायम्। यत्र देशे उपदिश्यते तद्देश एव वाक्यार्थबोधेन गृहीतशक्त्या गृहीतपरिभाषार्थेन च सर्वत्र शास्त्रो व्यवहारः। देशश्च प्रथमोच्चारणकाल एवात्र शास्त्रे व्यवह्रियते।

उभे इमे परिभाषे। सम्प्रति सकलपरिभाषासाधारणविध्युपकारप्रकारनिरूपकयोरनयोः परिभाषयोः परिभाषान्तरमपेक्ष्य प्राक्तस्यादाकाङ्क्षितत्वाच्च प्रस्तावः। तदाह–'तत्र' इत्यादि। शास्त्रे संज्ञापरिभाषाप्रयोज्यविध्युपकारविषये पक्षद्वयमित्यर्थः। प्राथमिकीं तां व्याचष्टे–'उद्देशमनतिक्रम्य' इत्यादि। 'अधिकरणसाधनः' इति। साध्यते साधुत्वेन प्रतिपाद्यते प्रकृतिप्रत्ययादिरस्मिन्निति साधनोऽर्थः। अर्थविशेषावलम्बनेनैव तेषां साधुत्वनिर्णयात्। एवं च अधिकरणार्थक इति तदर्थः। एतेन 'अचः परस्मिन्' (१.१.५७) इति सूत्रभाष्यस्थं भावसाधन इति व्याख्यातम्। 'साधनं कृता' इत्यादौ चागत्या साधनशब्दः कारकपरोऽपीत्यन्यदेतत्।

ननु देशभेदेन गुणप्रधानशास्त्रयोर्वाक्यार्थे कथमुपकार्योपकारकभाव इत्यत आह–'यत्र' इत्यादि। 'गृहीतशक्त्या' इति। गृहीतशक्तिस्मरणेन संज्ञाभिर्गृहीतनियमस्मरणेन परिभाषाभिश्च प्रदीपवदेककदेशस्थिताभिरेव सर्वविधिशास्त्रोपकार इत्यर्थः। अत्र परिभाषाविषये त्रिपाद्यतिरिक्ते संज्ञाविषये तु सर्वत्रेति विवेकः। अत्र पक्षे परिभाषाणां त्रिपाद्यामप्रवृत्तेरेव परमार्थत्वात्। समुदायापेक्षया च सर्वत्रेत्युक्तमिति बोध्यम्। 'उच्चारणकालः' इति। यद्यप्याद्योच्चारणकाल इदानीं दुर्लभः; तथाप्यष्टाध्यायीस्थानुपूर्वीघटकपौर्वापर्यव्यवहारप्रयोजकसन्निवेशघटकावकाश एवेह तत्त्वेन विवक्षित इत्यदोषः।

ननु संज्ञापरिभाषाणां कार्यार्थत्वात्कार्यज्ञानस्य विधिशास्त्राधीनत्वाच्च तत्तद्विध्याकाङ्क्षाया जागरूकतया तदीयवाक्यार्थकाले विध्येकवाक्यतायां आवश्यकत्वेन गुणशास्त्रानुरोधात्तद्देशे प्रधानशास्त्राकर्षणापेक्षया प्रधानदेश एव तत्तल्लिङ्गानुसारेण शास्त्राकर्षणस्य न्याय्यतया तद्देश एव परस्परैकवाक्यतया वाक्यार्थे स्वीक्रियमाणे कार्यकालपक्ष एव सदा सम्भवतीत्यसम्भव-

दुक्तिक एवायं यथोद्देश इत्याशङ्क्य प्राचीनोक्तं परिहारमाह—'तत्तत्' इत्यादिना 'कैयटः' इत्यन्तेन ।

तत्तद्वाक्यार्थबोधे जाते भविष्यति किञ्चिदनेन प्रयोजनमिति ज्ञानमात्रेण सन्तुष्यद्यथाश्रुतग्राहिप्रतिपत्त्रपेक्षोऽयं पक्ष इति 'ईदूत्' (१.१.१११) सूत्रे कैयटः ।

अयं भावः – प्रकरणविशेषानुपक्रमेण पठितानां गुणशास्त्राणां सकलप्रकरणोपकारकत्वस्य प्रसिद्धतया प्रकृतशास्त्रेऽपि विध्यङ्गभूतानां संज्ञा-परिभाषाणां सर्वशास्त्रोपकारकत्वं तावन्निर्विवादम् । किञ्च वर्णनाट्यनयेन न भवितव्यम्, किं पुनरियता सूत्रेणेति वृद्धिसूत्रस्थभाष्यकारोक्तशास्त्र-वैयर्थ्यनिराकरणेनैव सिद्धं प्रयोजनमित्येतावता निवृत्तप्रयोजनाकाङ्क्षाः प्रयोजनविशेषमनाकाङ्क्षमाणा ये मन्दमध्यमाधिकारिणस्तदनुरोधी यथोद्देशपक्षः । तेषामुत्तरीया विशेषाकाङ्क्षाविरहेण विनैव विध्येकवाक्यतां स्वदेशे संज्ञापरिभाषाणां वाक्यार्थबोधे बाधकाभावात् ।

ये तु वृद्धिसूत्रस्थभाष्यबोधितप्रयोजनसामान्याकलनेन तद्विशेषमाकाङ्क्षमाणाः शाब्दी ह्याकाङ्क्षा शब्देनैव निवर्तत इति मन्वते, तेषामुत्तमाधिकारिणां तु तत्तद्विध्येकवाक्यतयैव वाक्यार्थबोधः । तं विना तेषां प्रयोजनविशेषपरिज्ञानासम्भवात् । तादृशबोधश्च प्रदेशप्रदेश एव प्राधान्यादिति तदनुरोधी कार्यकालपक्षः । एवं च प्रयोजनविषयकसामान्यविशेषाकाङ्क्षाभ्यामधिकारिभेदेन प्रवृत्ताविमौ पक्षौ लक्ष्यानुरोधादत्र शास्त्रे व्यवतिष्ठेते इति ।

अथास्मिन् मते यथोद्देशे स्वदेशावस्थितानामेव परिभाषाणां सप्तमी-निर्देशादिघटितशास्त्रेण विधीयमानं कार्यं पूर्वस्यैवाव्यवहितस्यैवेत्यादिरूपनियमेन सामान्यविधिसङ्कोचात्मकतया तदुपकारसम्पादकत्वेऽपि वृद्धग्रादिकया तदभावात्तत्तद्विधिशास्त्रघटकस्वस्वलिङ्गजन्यपरिभाषाबोधितनियमस्मरणेन जाग्रमानो विध्युपकारः सपादायां सप्ताध्याय्यामिव त्रिपाद्यामपि दुर्वारः ।

तथा च त्रिपाद्या असिद्धत्वात्तत्र सपादसप्ताध्यायीस्थपरिभाषाणामप्रवृत्तिमाशङ्क्य कार्यकालपक्षावलम्बेन त्रिपाद्यां तत्प्रवृत्तिप्रतिपादनपरपूर्वत्रासिद्धसूत्रस्थभाष्यकारीयसिद्धान्तव्याकोपः ।

न च "पूर्वत्रासिद्धम्' (८.२.१) इत्यनेन सामान्यतः परिभाषदृष्ट्या पूर्वमेव त्रैपादिकविधीनामसिद्धत्वातिदेशात्स्वदृष्ट्या विद्यमानतावीहीनस्य सामान्यतोऽपि नियमयितुमशक्यतया परिभाषाबोध्यनियम्यकोटावनन्तर्भावेण तदनुरोधान्न त्रैपादिकविध्युपकार इति वाच्यम् । असिद्धत्वस्य कार्यार्थतया तत्तद्विधिशास्त्रजन्यविशिष्टवाक्यार्थबोधप्रयुक्तकार्यज्ञानोत्तरमेव "पूर्वत्रासिद्धम्" (८.२.१) इत्यधिकरणैकवाक्यतया तत्तद्विधीनामसिद्धत्वातिदेशप्रतिपादनस्य न्याय्यत्वात्तथाविधकार्यज्ञानस्य च परिभाषाबोध्यविध्युपकारं विना दुर्लभत्वात्परिभाषावाक्यार्थकाले तदृष्ट्या विधीनामसिद्धत्वातिदेशस्य दुर्वचतया त्रैपादिकानामपि तत्तत्परिभाषाबोध्यनियम्यकोटावन्तर्भावे बाधकाभावात् । अन्यथा सामान्यगृहीतशक्तिस्मरणेन यथोद्देशे संज्ञाभिरपि त्रिपाद्यां पदार्थनिर्णयद्वारा विशिष्टवाक्यार्थसम्पादकत्वरूपस्य विध्युपकारस्य दौर्लभ्यापत्तेः । न हि कार्यकालपक्ष एव संज्ञाशास्त्राणां त्रिपाद्यां प्रवृत्तिर्न तु यथोद्देश इति वक्तुं शक्यते । यथोद्देशे परिभाषाणामेव त्रिपाद्यामप्रवृत्तिर्न तु संज्ञानामित्याशयक "पूर्वत्रासिद्धम्" (८.२.१) इत्येतत्सूत्रस्थभाष्यावज्ञत्यापत्तेः । तत्र हि यदि सपादायां सप्ताध्याय्यामयं पादोनोऽध्यायोऽसिद्ध इत्युच्यते । ये इह सप्तमीनिर्देशाः पञ्चमीनिर्देशाश्चोच्यन्ते तेऽप्यसिद्धाः स्युः । तत्र को दोषः ? । "झलो झलि" (८.२.२६) 'हस्वादङ्गात्' (८.२.२७) 'संयोगान्तस्य लोपः' (८.२.२३) इत्येषां निर्देशानामसिद्धत्वात् । "तस्मिन्निति निर्दिष्टे पूर्वस्य" (१.१.६६) 'तस्मादित्युत्तरस्य' (१.१.६७) "षष्ठी स्थानेयोगा' (१.१.४९) इत्येताः परिभाषा न प्रकल्पेरन्नित्येवोक्तमिति चेन्न; विशिष्य तत्तदुपकारं विना तत्तद्विधिशास्त्रीयलक्ष्यनिर्णयस्य दुर्लभत्वात्, तं विना प्रधानस्यालक्ष्येभ्यो वारयितुमशक्यत्वाच्च तत्तद्विधिशास्त्रघटकलिङ्गविशेषोपस्थापितपरिभाषाबोधितसामान्यनियमस्य विशेषपर्यवसानाय वाक्यान्तरोपष्लवेन यथोद्देशेऽपि विधिप्रदेशे विशिष्य विध्युपकारस्यावश्यकतया तादृशवाक्येन सह वाक्यैकवाक्यतया

तत्तद्विध्युपकारतः पूर्वमेव परत्वेन नित्यत्वेन च तत्तद्विध्येकवाक्यतापन्न-पूर्वत्रासिद्धशास्त्रेण परिभाषाबोध्यनियमसम्बन्धव्यतिरेकेण भिन्नवाक्यतया प्रथमतो जायमानेन विधिशास्त्रीयवाक्यजन्यबोधेन सिद्धं कार्यज्ञानमादायात्र पक्षे परिभाषादृष्ट्या विधीनामसिद्धत्वातिदेशे पश्चात्तदुपकारासम्भवेन फलाभावात्त्रैपादिकोपकारकतया सामान्यनियमसम्पादनानौचित्यात्तदनुरोधेन त्रैपादिकविध्युपकारस्य दुर्वचत्वात्।

न च संज्ञाविषयेऽपि तत्तत्प्रदेशघटकवृद्ध्यादिपदीयशक्तिनिर्णयद्वारा विध्युपकाराय कालिपतवाक्येन वाक्यैकवाक्यतया तदुपकारतः पूर्वमेव निरुक्तरीत्या पूर्वत्रासिद्धशास्त्रेण तत्तत्संज्ञादृष्ट्या त्रैपादिकविधीनामसिद्धत्वातिदेशस्य दुर्वारतया संज्ञाभिरपि यथोद्देशे त्रैपादिकविध्युपकारो दुर्लभ इति वाच्यम्। तत्तत्संज्ञाशास्त्रीयतादृशवाक्यानामुपजीव्यतया विधिशास्त्रीयवाक्यार्थप्रयुक्तकार्यज्ञानात्पूर्वमेव विध्युपकारकत्वावश्यम्भावेन तथाविधकार्यज्ञानोत्तरभाविना त्रैपादिकासिद्धत्वेन तत्कृतोपकारस्य निर्वक्तुमशक्यत्वात्। एवं चात्र पक्षे संज्ञापरिभाषाणां वाक्यैकवाक्यतया पदार्थनियामकत्वेन वाक्यार्थनियामकत्वेन च विध्युपकारकत्वम्। कार्यकालपक्षे तु वाक्यार्थबोधात्पूर्वमेव संज्ञापरिभाषाणां शब्दतत्सम्बन्धाभ्युपगमात्सति सम्भवे पदैकवाक्यतयैव तासां तदुपकारकत्वम्, 'तस्मिन्निति निर्दिष्टे' (१.१.६६) इत्यादीनां तु कार्यकालत्वमेव, पक्षयोर्लक्ष्यानुरोधेन व्यवस्थितत्वात्। न च 'अलोन्त्य' (१.१.५२) परिभाषाया 'इको गुणवृद्धी'' (१.१.३) इत्येतत्परिभाषाशेषत्वप्रसक्तिभीत्या पक्षद्वयेऽपि वाक्यैकवाक्यतया नियामकत्वेस्यैव वक्तव्यतया निरुक्तरीत्या त्रैपादिकासिद्धत्वेन पक्षयोरुभयोरपि तस्यास्त्रिपाद्यामप्रवृत्त्यापत्तौ ''ससजुषो रुः'' (८.२.६६) इत्यादिना सजुष् शब्दादेर्विधीयमानरुत्वादेः सर्वादेशत्वापत्तिरिति वाच्यम्। कार्यकालपक्षे संज्ञापरिभाषाणां तत्तद्विधिदेशीयत्वाभ्युपगमेनादोषात्। अत एवार्थादिभ्यः पर्व प्रगृह्यसंज्ञेति 'अदसो मात्' (१.१.१२) इति सूत्रस्थं, ङ्कितिं निषेधस्य – परिभाषासादृश्यमूलकपरिभाषात्वाङ्गीकारेण कार्यकालपक्षे 'सार्वधातुकार्धधातुकयोः'' (७.३.८४) इत्येतच्छास्त्रैकवाक्यत्वेनाङ्गाधिकारीयतया 'न लुमता' (१.१.६३) इत्येतन्निषेधविषयत्वमित्येवं प्रतिपादनपरं 'ङ्कितिं च'

इति सूत्रस्य च भाष्यं सङ्गच्छते। अत एव यथोद्देश एव परिभाषयोः पौर्वापर्यं न तु कार्यकालतायामिति 'इको गुण' (१.१.३) इति सूत्रे कैयटः। एतेन वाक्यैकवाक्यतया विध्युपकारिका बहिरङ्गपरिभाषा (प.९०) त्रैपादिकासिद्धत्वेन पक्षद्वयेऽपि त्रिपाद्यां न प्रवर्तत इत्यपास्तम्। "अलोन्त्य" (१.१.५२) परिभाषावत्कार्यकालपक्षे त्रिपाद्यां तत्प्रवृत्तौ बाधकाभावात्। अनयोः कार्यकालपक्षे त्रिपाद्यं प्रवृत्तये विधिशास्त्रेण सह समूहालम्बनात्मकैक्यबोधाभ्युपगमो वेति प्राचीनपथपरिष्कारः।

ननु परिभाषाणामुत्तराधिकारिपरतयापि यथोद्देशपक्षो योजयितुं शक्यते। तथा हि– गुणशास्त्रस्यैव प्रथममुपस्थितौ तदीयवाक्यार्थकाले प्रयोजनविशेषाकाङ्क्षावशात्तद्देशे विधीनामाकर्षणेन् तदेकवाक्यतया गुणभूतपरिभाषाशास्त्रेण तादृशविधिशास्त्राणामुपकारे यथोद्देशपक्षः। प्रधानस्यापि स्वकार्यार्थमप्रधानदेशगमने न बाधकम्। कदाचिदाक्षोऽपि स्वकार्यार्थममात्यसमीपगमनस्य प्रसिद्धत्वात्। यदि तु विधिशास्त्रस्यैव प्रथममुपस्थितौ तदीयवाक्यार्थकाले उपकारकाकाङ्क्षावशात्तदेश एव गुणभूतपरिभाषाशास्त्राणामाकर्षणेनैकवाक्यतया परिभाषाप्रयोज्यविध्युपकारो विधिशास्त्रेण सम्पाद्यते तर्हि कार्यकालपक्षः। एवं च गुणप्रधानाकांक्षाभेदेनोत्तमाधिकारिपरत्वेनैव परिभाषासु पक्षद्वयस्यापि योजयितुं युक्तत्वात्कार्यकालपक्षसमकक्षतया भाष्योक्तस्य यथोद्देशपक्षस्य मन्दमध्यमाधिकारिपरत्वप्रतिपादनमयुक्तमित्यरुचेराह—

केचित्तु परिभाषाविषये तस्मिन्नित्यादिवाक्यार्थबोधे सप्तमीनिर्देशादि क्वेति पर्यालोचनायां सकलतत्तद्विध्युपस्थितौ सकलतत्तत्संस्काराय गुणभेदं परिकल्प्य एकवाक्यतयैव नियमः। कार्यकालपक्षे तु त्रिपाद्यामप्युपस्थितिरिति विशेषः।

'केचित्तु' इति—'परिभाषाविषयः' इति। ननु वृद्धेयादिपदं क्वेति विशेषजिज्ञासायाः संज्ञाविषयेऽप्युत्तमाधिकारिणामवश्यम्भावित्वेन तत्तद्विध्याकर्षणेनैकवाक्यतायाः संज्ञाविषयेऽपि वक्तव्यतया परिभाषाविषयं इति

न्यूनम। न च विध्याकर्षणस्य प्रयोजनाकाङ्क्षामूलकत्वात् संज्ञानां लोकशास्त्रसाधारणतया तत्स्थलीयाकाङ्क्षायाः कोशधातुपाठादिव्विव प्रसिद्धव्यवहाररूपप्रयोजनानुसन्धानेनैव निवर्तयितुं शक्यत्वेन न तत्र विध्याक्षेपावश्यकता। परिभषाणां त्वेतच्छास्त्रीयविधिमात्रोपयोगितया प्रयोजनाकाङ्क्षानुसारेण तत्तन्निर्देशघटितविधिशास्त्राक्षेपस्यावश्यकतेत्याशय इति वाच्यम्। एतच्छास्त्रीयसंज्ञानां लोकसाधारण्ये नव्यमते कृत्रिमाकृत्रिमन्यायबीजस्य दुर्निरूपत्वापत्तेः। आम्रेडितादिसंज्ञानां लोकविरुद्धत्वेन तदंशे लोकसाधारण्यस्य सुतरामनुपपन्नत्वाच्चेति चेत्सत्यम्; संज्ञाशास्त्रेषु वृद्ध्यादिपदानामादैजादिषु शक्तिरिति ज्ञाते वृद्ध्यादिपदघटितविधिविषयकाकाङ्क्षाया उत्थाप्यतया न तया विध्याकर्षणेन तदेकवाक्यताया आवश्यकता। परिभाषाशास्त्रेषु तु सप्तमीनिर्देशादिघटितशास्त्रेण विधीयमानं कार्यं पूर्वस्यैवेत्यादिवाक्यार्थे ज्ञाते सप्तमीनिर्देशादिघटिततत्तद्विधिविषयकाकाङ्क्षाया उत्थिततया विध्याकर्षणेनैकवाक्यताया आवश्यकतेत्याशयो विभाव्यताम्। 'सकलतत्तद्विधि' इत्यादि। अस्य त्रैपादिकातिरिक्तेत्यादिः। अत्रापि मते यथोद्देशे परिभाषाभिस्त्रैपादिकविध्युपकारकस्यानिष्टत्वात्। 'गुणवाक्यतयैव' इति। पदैकवाक्यतयैवेत्यर्थः। तत्रैव वक्ष्यमाणाभिज्वलनदृष्टान्तसङ्गतेः। 'नियमः' इति। तस्यैवाध्याहृ(य)माणभवतिक्रियाया गुणभेदकल्पनायाश्च कर्तृत्वात्समानकर्तृकत्वनिबन्धनस्य ल्यबन्तस्योपपत्तिः। यद्वा 'क्रियते' इत्यध्याहारः।

ननु यथोद्देशपक्षेऽपि परिभाषाणां पदैकवाक्यतयैव विध्युपकारकत्वे कार्यकालयथोद्देशयोर्वैलक्षण्येन तदंशेऽन्यतरपक्षेवैयर्थ्यमित्याशङ्क्याह – 'कार्यकालपक्षे तु' इति। 'इति विशेषः' इति। एवं च परिभाषाविषयेऽपि पक्षद्वयमावश्यकमेवेति भावः। ननूक्तरीत्या परिभाषास्थलीयाकाङ्क्षावशात्तद्विधीनामुपस्थित्या परिभाषादेश एव पदैकावाक्यतया विध्युपकाराभ्युपगमे सापादिकवत्त्रैपादिकानामुपस्थितेः सुवचतया यथोद्देशेऽपि त्रैपादिकविध्युपकारकतया प्रवृत्तेर्दुर्वारतया न निरुक्तविशेषसम्भवः। त्रैपादिकविधीनां परिभाषादृष्ट्या विद्यमानताशून्यत्वेन तद्विधयकविशेषाकाङ्क्षाया एवानुपपत्त्या तदुपस्थितिप्रयुक्तस्य तदुपकारस्य दौर्लभ्यमिति तु न युक्तम्।' अत्र

पक्षे परिभाषादेशे विधीनामुपस्थितिमन्तरा विधिशास्त्रीयवाक्यार्थाभावेन तदीयबोधप्रयुक्तकार्यज्ञानोत्तरभाविनोऽसिद्धत्वस्य पूर्वं प्रवृत्त्ययोगात्। अन्यथा कार्यकालेऽपि त्रिपाद्यां तासामप्रवृत्त्यापत्तेरिति चेत्; अत्राहुः—पदपदार्थोपस्थितौ वाक्यार्थबोधे प्रतिबन्धकाभावेन सामान्यवाक्यार्थबोधमन्तरा सप्तमीनिर्देशादिकं क्वेति पर्यालोचनाया अनुपस्थानेन च परिभाषादेशे तादृशबोधानन्तरमेव विध्याक्षेप इति तावन्निर्विवादम्। तथा तदाकाङ्क्षानुरोधेन तत्तद्विधिशास्त्रोपस्थितिरपि स्वस्वसामान्यवाक्यार्थबोधोत्तरमेव तं विना औपश्लेषिकसप्तम्यन्तत्वादिनिश्चयासम्भवात्। तद्बोधे प्रतिबन्धकाभावतौल्याच्च। तावतैव सामान्यतः कार्यज्ञानस्य सुलभतया तत्पुरस्कृत्यैव यथोद्देशे तत्तत्त्रैपादिकशास्त्रैकवाक्यतापन्नपूर्वत्रासिद्धमित्यनेन तेषामुपस्थितेः पूर्वमेवासिद्धत्वादिदेशो बोध्यत इति न त्रैपादिकेष्वत्र पक्षे सापादिकपरिभाषाप्रवृत्तिः। कार्यकालपक्षे तु तादृशसामान्यबोधप्रयुक्तकार्यज्ञानमाश्रित्य न त्रैपादिकासिद्धत्वप्रवृत्तिः। किन्तु विशिष्टवाक्यार्थबोधप्रयुक्तविशेषकार्यज्ञानमाश्रित्य। अत एव पूर्वत्रासिद्धसूत्रस्थभाष्यसङ्गतिरिति दिक्।

ननु निरुत्तरीत्या प्राचीनवैलक्षण्येन यथोद्देशपक्षस्य परिभाषाविषये सम्भवेऽपि प्रमाणाभावात्प्राचीनोक्तमेव किं नाद्रियते, किं च परिभाषादेशे विधीनामाकर्षणेऽपि पदैकवाक्यतायां प्रमाणाभाव इत्यत आह—

एतदेवाभिप्रेत्य अधिकारो नाम त्रिप्रकारः। कश्चिदेकदेशस्थस्सर्वं शास्त्रमभिज्वलयति, यथा प्रदीपः सुप्रज्वलितःसर्वं वेश्माभिज्वलयतीति 'षष्ठी स्थाने' (१.१.४९) इति सूत्रे भाष्ये उक्तम्।

'एतदेव' इत्यादि। 'सुप्रज्वलितः' इति। एतेन पक्षद्वयेऽपि परिभाषाणां स्वीयसामान्यवाक्यार्थबोधोत्तरमेव विध्येकवाक्यतेति सूचितम्। नन्वधिकारपरिभाषयोः स्वतो भिन्नतया अधिकारविषयकत्वेन प्रवृत्तस्यास्य भाष्यस्य परिभाषाविषयकत्वकल्पनमनुचितमित्यत आह –

अधिकारशब्देन पारार्थ्यात्परिभाषाऽप्युच्यते कश्चित्परिभाषारूप इति कैयटः ।

'अधिकारशब्देन' इति 'परिभाषारूपः' इति । ननु पारार्थ्यस्य संज्ञाविषयेऽपि तुल्यतया संज्ञाशास्त्रस्यापि अधिकारशब्देन ग्रहीतुमौचित्येन संज्ञापरिभाषासाधारणतया स्वदेशे विध्युपकर्षणेन तदेकवाक्यतया विधीनामुपकार इत्यत्र प्रकृतभाष्यस्य प्रामाण्यसम्भवे परिभाषामात्रविषयकत्वकल्पनमयुक्तमिति चेन्न; प्रकृतभाष्यबोधिताभिज्वलनदृष्टान्तेन गुणप्रदेशे विधीनां पदैकवाक्यतायाः प्राप्ततया संज्ञाविषये प्रदेशघटकहृद्यादिपदानां प्रदेशस्थानां च तेषां सार्थक्यान्यथानुपपत्त्या पदैकवाक्यतायाः असम्भवेन संज्ञाविषयकत्वकल्पनाया अनौचित्यात् 'समर्थः' (२.१.१) सूत्रे भाष्ये परिभाषायामेवाभिज्वलनदृष्टान्तोक्तेश्च तत्र परिभाषाया एवाधिकारशब्देन व्यवहृतत्वाच्चेत्यास्ताम् । तदेतत्सूचयन्नाह--

दीपो यथा प्रभाद्वारा सर्वग्रहप्रकाशकः, एवमेतत्स्वबुद्धिजननद्वारा सर्वशास्त्रोपकारकमिति तत्त्वात्पर्यम् । एतच्च पक्षद्वयसाधारणं भाष्यम् । पक्षद्वयेऽपि प्रदेशैकवाक्यतायाः इतः प्रतीतेः । तत्रेतावान् विशेषः--यथोद्देशे परिभाषादेशे सर्वविधिसूत्रबुद्धावात्मभेदं परिकल्प्य तैरेकवाक्यता परिभाषाणाम् ।

'दीपो यथा' इत्यादि । 'स्वबुद्धिजननद्वारा' इति । स्वस्यात्मीयस्य अव्यवहितस्य पूर्वस्येत्यार्थशास्त्र या विशिष्टविध्यर्थघटकतया । बुद्धिस्तज्ज्ञानद्वारेत्यर्थः । पदैकवाक्यतया वाक्यार्थबोधसम्पादनद्वारेति यावत् । अत्र प्रभास्थानीयं विशिष्टवाक्यार्थसंवलनं प्राकाशस्थानीयो विशिष्टवाक्यार्थबोधः । नन्विदं कार्यकालक्षाभिप्रायकमेव भाष्यमिति न त्वदिष्टार्थसिद्धिरत आह--'एतच्च' इति 'पक्षद्वयसाधारणम्' इति । पक्षविशेषस्यानुपक्रमादिति भावः । 'प्रदेशैकवाक्यतायाः' इति । 'विधिदेश एव' इति । विशेषानादरेणेत्यर्थः ।

ननु विधिपरिभाषयोः पक्षद्वयेऽपि पदैकवाक्यताया एवाभ्युपगमे विध्युपकारविषये को विशेष इत्यतो न कोऽप्येकवाक्यताप्रयुक्तविशेष इत्याह--

'एतावान्विशेषः' इति । एतावानेव विशेष इत्यर्थः । कार्यकाले पदैकवाक्यता यथोद्देशे वाक्यैकवाक्यतेति विशेषस्याकिञ्चित्करत्वादिति भावः । अत्र यद्वक्तव्यं तत्प्रागुक्तम् ।

'परिभाषादेशे' इति । नन्वत्र पक्षे परिभाषादेश एव यथोद्देशे प्रधानीभूतविध्युपकाराङ्गीकारे उभयनिर्देशस्थले तत्तदुपस्थापकलिङ्गेन 'तस्मिन्' (१.१.६६) इति 'तस्मात्' (१.१.६७) इति परिभाषाद्वयेऽपि विधीनां पृथगुपस्थित्यापत्तौ उभयथापि कार्यप्रसङ्गः । न च परपरिभाषैकवाक्यतापन्नस्य विधेः परत्वमाश्रित्य पूर्वपरिभाषैकवाक्यतापन्नस्य विप्रतिषेधशास्त्रेण बाध इति वाच्यम् । गुणशास्त्रैकवाक्यतापन्नस्य प्रधानस्य गुणदेशीयताया वक्तुमशक्यत्वेन विप्रतिषेधशास्त्रप्रवृत्तिप्रयोजकनिरुक्तपौर्वापर्यव्यवस्थाया दुर्वचत्वादिति चेन्न; तत्तत्परिभाषाविषयभूतेषूभयनिर्देशेषु तत्तदाकाङ्क्षयोरुभयोरपि प्रत्येकं जायमानतया युगपदेकस्य विधेरुभयत्रोपस्थितेर्विरोधेन विप्रतिषेधशास्त्रमहकृतया परयैव परिभाषया तत्तद्विध्याकर्षणाभ्युपगमेनादोषात् ।

न चैवं "इको यणचि" (६.१.७७) इत्यादेरपि उक्तरीत्या "तस्मिन्निति निर्दिष्टे पूर्वस्य" (१.१.६६) इत्येतत्परिभाषयैवाकाङ्क्षानुसारादेकवाक्यता स्यात् । न तु "षष्ठी स्थाने" (१.१.४९) इत्येतत्परिभाषयेति तदंशे स्थानेयोगत्वानुपपत्तिरिति वाच्यम् । पुनःप्रसङ्गविज्ञाने तस्मिन्निति एतेदेकवाक्यतापन्नस्य विधेः "षष्ठी स्थाने" (१.१.४९) इत्यत्रापि प्रवृत्त्यङ्गीकारेणादोषात् । पूर्वत्र तु परपरिभाषैकवाक्यतापन्नस्य पूर्वपरिभाषैकवाक्यता न सम्भवत्येव, विरोधादित्याहुः ।

"आत्मभेदं परिकल्प्य" इति । सन्निहितानामिति शेषः । एवं च स्वरूपभेदं परिकल्प्य पृथक् सन्निहितानां परिभाषाणां विधिभिः पदैकवाक्यता भवतीत्यर्थः । एतेन ल्यप्प्रत्ययोऽनुपपन्न इत्यास्तम् । अथात्र पक्षे परिभाषादेशे विधिशास्त्राकर्षणैनैकवाक्यतायां "त्यदादीनामः" (७.२.१०२) इत्यादेः "तस्मिन्" (१.१.६६) इत्यनेनैकवाक्यतापन्नस्य "षष्ठी स्थाने" (१.१.४९) इत्यनेनैकवाक्यता, तदुभयवाक्यतापन्नस्य "अलोऽन्त्यस्य"

(१.१.९२) इत्यत्रैकवाक्यतेत्येवमनेकपरिभाषादेशेषु प्रत्येकमनेकवाक्यार्थकल्पनायां गौरवम्। प्राचीनमते तु स्वदेश एव वाक्यार्थबोधानन्तरं परिभाषाणां सकृदेव विधिप्रदेशे स्वबोध्यनियमस्मृत्या वाक्यार्थ इति लाघवम्। एवं च 'षष्ठी स्थाने'' (१.१.४९) इति सूत्रस्थस्य 'कञ्चिदेकदेशस्थ' इत्यादिभाष्यस्य कार्यकालपरतयैव लापयितुं युक्तत्वेन यथोद्देशे प्राचीनराद्धान्त एव युक्तः।

न च प्राचीनमतेऽपि विधिप्रदेशे परिभाषाबुद्ध्या नियामकत्वेन वाक्यैकवाक्यताया अङ्गीकृतत्वात्तत्तत्परिभाषाशास्त्रीयविधिनियामकानेकवाक्यकल्पनयाँ प्रत्येकं तत्तद्विधिसङ्कोचकल्पनया च तुल्यमेव गौरवमिति वाच्यम्। नव्यमते तत्तत्परिभाषैकवाक्यतापन्नविधीनां परिभाषान्तरैरेकवाक्यत्वाय पुनः पुनरुपस्थितिकल्पनायां विधिद्वारा परिभाषान्तरेषु परिभाषान्तरोपस्थितिपूर्वकैकवाक्यताप्रयुक्तगौरवस्याधिक्यादिति चेत्, मैवम्। प्राचीनमतेऽपि विधिप्रदेशेष्वनेकपरिभाषावाक्यानां तत्तदाकाङ्क्षावशाद्युगपदुपस्थितानामेकेन नियमितस्यैवापरेण नियमनमित्येवं सर्वेषामेव विधिद्वारा परस्परैकवाक्यताया आवश्यकत्वेन नव्यमते गौरवाधिक्यस्य दुर्वचत्वात्। तदेतत्सकलं प्रमाणयति—

तदुक्तं 'ङ्किति च' (१.१.५) इति सूत्रे कैयटे। यथोद्देशे प्राधानान्यात्मसंस्काराय सन्निधीयमानानि गुणभेदं प्रयुञ्जते इति। कार्यकालेतु तत्तद्विधिप्रदेशे परिभाषाबुद्ध्यैकवाक्यतेति। अत्रैकदेशस्थ इत्यनेन तत्र तत्र तद्बुद्धावपि तत्तद्देशस्थत्वं वारयति। यथा व्यवहर्तृणां कार्यार्थमनेकदेशगमनेऽपि न तद्देशीयत्वव्यवहारः, किं त्वभिजनदेशीयत्वव्यवहार एव, तद्वत्। निषेधवाक्यानामपि निषेध्यविशेषाकाङ्क्षित्वाद्विध्येकवाक्यतयैवान्वय इति परिभाषासादृश्यात्परिभाषात्वेन व्यवहारः 'ङ्किति च' (१.१.५) इत्यत्र भाष्ये।

"तदुक्तम्" इत्यादि। 'वारयति' इति। ननु "ङ्किति च"

(१.१.९) इति सूत्रे भाष्ये निषेधशास्त्रस्यापि परिभाषात्वाङ्गीकरेण कार्यकालपक्षे "सार्वधातुकार्धधातुकयोः" (७.३.८४) इत्येतच्छास्त्रैकवाक्यतापन्नस्य "किति" इत्यस्याङ्गाधिकारीयत्वेनाङ्गाधिकारप्रतिनिर्देशपक्षेऽपि "न लुमता" (१.१.६३) इत्येतन्निषेधविषयत्वमित्येवं प्रतिपादनात् कार्यकालपक्षे परिभाषाणां विधिदेशीयत्वस्यावश्यकतया पक्षद्वयसाधारण्येन तासां स्वदेशीयत्वकल्पनमनुचितमिति चेत्? न; तद्भाष्यबलात् 'न लुमता' (१.१.६३) इति सूत्रेऽङ्गपदेन अङ्गाधिकारस्थसूत्रवत्तदेकवाक्यतापन्नपरिभाषादीनामपि ग्रहणमित्येव सिद्धे तासामविशेषेण विधिदेशीयत्वाङ्गीकरे मानाभाव इत्याशयात्।

एवं च नव्यमते परिभाषाणां प्रायेण पदैकवाक्यता स्वदेशीयत्वञ्च यथोद्देशकार्यकालपक्षयोरुभयोरपि। बहिरङ्गपरिभाषा तु पक्षद्वयेऽपि न त्रैपादिकविधीनामुपकारिका। तस्य वाक्यभेदेनैव नियामकतया कार्यकालेऽपि तदुपकारतः पूर्वमेव "पूर्वत्रासिद्धम्" (८.२.१) इत्यनेन प्रत्यक्षसिद्धेन परेण च बाधात्। "अलोऽन्त्य" (१.१.५२) परिभाषायास्तु पक्षद्वयेऽपि भिन्नवाक्यतया विघ्नोपकारत्वेऽपि त्रिपाद्यां प्रवृत्तिः "हलोऽनन्तराः संयोगः" (१.१.७) इत्यादिज्ञापकादेव। अन्यदन्येषामिवेति निष्कर्षः।

ननु "[1]संज्ञा च परिभाषा च' इत्यादिना संज्ञापरिभाषाभ्यां भेदेन निषेधस्य प्रसिद्धेस्तदंशे संज्ञापरिभाषाविषययोर्यथोद्देशकार्यकालपक्षयोर्व्यवस्थापयितुमशक्यतया "ङ्किति" (१.१.५) इति सूत्रे भाष्ये निषेधस्य कार्यकालत्वाभ्युपगमो न युक्त इत्यत आह—'निषेधवाक्यानाम्' इत्यादि। एतद्भाष्यप्रामाण्येन निषेधशास्त्रेषु परिभाषात्वातिदेश इति तात्पर्यम्। ननु भिन्नवाक्यतया पठितानां [2]शास्त्राणामेकविधेयसमर्पकत्वे एकवाक्यता। तदुक्तं जैमिनीयैः—"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" (जै.सू.१३.२.१)। अस्ति हि गुणप्रधानंशास्त्रभ्यामेकस्यैव प्रधानीभूतस्य

१. संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥

२. 'शास्त्राणामेव विधेयं' इति मुद्रितः पाठः।

विधेयस्य समर्पणमिति युक्ता सा। तत्र पदार्थसम्बन्धयकाल एवाकाङ्क्षावशात्परस्परसम्बन्धेन प्रधानभूतायामेकस्यां क्रियायामन्वये सा पदैकवाक्यता। यथा—'सार्वधातुकार्धधातुकयोः' (७.३.८४) 'इको गुणवृद्धी' (१.१.३) इत्यनयोः। तत्र गुणशास्त्रेणेक्पदस्यैवोपस्थापनात्।

यत्र तु विभिन्नक्रियासम्बन्धेन निष्पन्नयोर्वाक्यार्थयोराकाङ्क्षावशात्पर(स्पर)सम्बन्धस्तत्र सा वाक्यैकवाक्यता। यथा – 'सार्वधातुकार्धधातुकयोः' (७.३.८४) 'अलोऽन्यस्य' (१.१.५२) इत्यनयोः। तत्र गुणशास्त्रस्य वाक्यभेदेन नियामकत्वात्। इह च विधिनिषेधयोरेकविधेयसमर्पकत्वायोगात्परस्परविरोधाच्च कथमेकवाक्यता ? इत्यत आह—

तत्रैकवाक्यता पर्युदासन्यायेन। प्रसज्यप्रतिषेधेऽपि तेन सह वाक्यार्थबोधमात्रेणैकवाक्यताव्यवहारः। संज्ञाशास्त्रस्य तु कार्यकालपक्षे न पृथग्वाक्यार्थबोधः। किन्तु प्रदेशवाक्येन सहैव। अत एव 'अणोऽप्रगृह्यस्य' (८.४.५७) इत्येतदेकवाक्यतापन्नात् 'अदसोऽमात्' (१.१.१२) इत्येतत्प्रति न मुत्वाद्यसिद्धम्।

'तत्रैकवाक्यता' इत्यादि। 'पर्युदासन्यायेन' इति। 'यजतिषु ये यजामहं करोति नानुयाजेषु' इत्यत्र निषेधवाक्यघटकस्य व्यस्तस्यापि नञस्तात्पर्यग्राहकत्वमनुयाजेष्वित्यस्य तदभिन्नपरत्वमित्येवं पर्युदासाश्रयणे यो न्यायो लाघवरूपा युक्तिर्जैमिनीयप्रसिद्धा तया या तत्रैकवाक्यता सेत्यर्थः। पदैकवाक्यतेति यावत्। अन्यथा विधिनिषेधयोरुभयोरपि शास्त्रत्वाविशेषात्प्रबलदुर्बलभावस्यायुक्ततया निषेधविषयेऽपि पाक्षिकी विधिप्रवृत्तिर्दुर्वारा स्यादिति जैमिनीयोक्त एव दोष आपतेदिति भावः।

नन्वत्र शास्त्रे 'द्वन्द्वे च' (१.१.३१) 'विभाषा जसि' (१.३.३२) इत्यारम्भान्निषेधाश्च बलीयांस इत्यर्थस्य ज्ञापनान्नोक्तदोषावकाशः। किं चोक्तरीत्या विधिनिषेधयोः पर्युदासाभ्युपगमे 'रोऽसुपि' (८.२.६९) इत्यत्र सुब्भिन्ने सुप्सदृशे प्रत्यय इत्यर्थे 'अहर्भाति' इत्यादौ रादेशो दुर्लभः। तथा 'अनचि च' (८.४.४७) इत्यत्र अजभिन्ने अच्सदृशे इलि इत्यर्थे

अवसाने द्वित्वानापत्तिरत आह--'प्रसज्यप्रतिषेधे अपि' इति। 'तेन सह' इति। अयं भावः--एकबोधीयविषयतासमर्पकत्वमेकवाक्यत्वम्, तच्च विधिनिषेधवाक्यार्थयोरुभयोरपि समूहालम्बनात्मकैकबोधाभ्युपगमे न भवितुमर्हतीति तत्र पर्युदासपक्षे तत्तच्छास्त्रघटकानां निषेध्यसमर्पकाणां विरुद्धलक्षणया तद्भिन्नपरत्वं नञस्तात्पर्यग्राहकत्वं च कल्प्यम्। प्रसज्यप्रतिषेधपक्षे तु नानाक्रियाध्याहारो गौणमेकवाक्यत्वं च कल्प्यमिति नानयोः पक्षयोर्विशेषः। लक्ष्यानुरोधादत्र शास्त्रे तयोरुभयोरपि पक्षयोराश्रयणं ध्वनितमिदं 'अनुपुंसकस्य' (१.१.४३) इत्यस्यासमर्थसमासघटकतामुपवर्णयता "सुडनपुंसकस्य" (१.१.४३) इति सूत्रस्थभाष्यकारेणेत्युपाध्यायगूढाशय इत्याहुः।

ननु संज्ञाविषयेऽपि व्यवहर्तृदृष्टान्तेन यथोद्देशकार्यकालयोरुभयोरपि स्वदेशीयत्वस्यैव वक्तुमौचित्याद्यथोद्देशपक्षेऽपि गृहीतशक्तिस्मरणेन त्रैपादिकविध्युपकारस्य सुवचत्वाच्च संज्ञास्वन्यतरपक्षावलम्बनेनैव निर्वाहे पक्षद्वयाश्रयणं व्यर्थमत आह-'संज्ञाशास्त्रस्य तु' इति। 'कार्यकालपक्षे' इति। अत्रैव पक्षे न पृथग्वाक्यार्थः, यथोद्देशे तु प्रदेशगमनमन्तरापि वर्तत एव पृथग्वाक्यार्थः। प्राचीनोक्तरीत्या जातशक्तिस्मरणेनैव तत्र निर्वाह इत्याशयः।

'सहैव' इति। वाक्यैकवाक्यतया प्रदेश एव वाक्यार्थबोधो न त्वसिद्धत्वोपयोगी स्वदेशे क्वचन वाक्यार्थ इत्यर्थः। नन्वयं विशेषो निष्फल इत्यत आह--'अत एवाणोऽप्रगृह्यस्य' इति। एवं च यथोद्देशे संज्ञानां स्वदेशीयत्वं कार्यकाले विधिदेशीयत्वमित्येतन्मूलकविशेषलाभेन पक्षद्वयमप्याश्रयणीयमिति भावः।

ननु "अणोऽप्रगृह्यस्य" (८.४.५७) इत्यत्र उपस्थितेः पूर्वमेव संज्ञाबुद्ध्या मुत्वस्यासिद्धत्वं दुर्वारमत आह—

असिद्धत्वस्य कार्यार्थतया कार्यज्ञानोत्तरमेव तत्प्रवृत्तेः। कार्यज्ञानं च प्रदेशदेश एवेति तद्देशस्थस्यासिद्धत्वात्पूर्वग्रहणेना-

ग्रहणात् एतदबोधोत्तरमेव विरोधप्रतिसन्धानं चेति तत्रात्यपरत्वमेव विप्रतिषेधसूत्रप्रवृत्तौ बीजम्। अत एव कार्यकालपक्षे अयादिभ्यः परैव प्रगृह्यसंज्ञा इति 'अदसो मात्' (१.१.१२) इति सूत्रे भाष्ये उक्तम्।

'असिद्धत्वस्य' इति। कार्यार्थतयेत्यस्य कार्यस्य प्रवर्तकतया निवर्तकतया वेत्यर्थः। 'कार्यज्ञानोत्तरमेव' इति। यद्यपि 'पूर्वत्रासिद्धम्' (८.२.१) इत्यनेन कार्यज्ञानोत्तरमसिद्धत्वातिदेशबोधने तथाविधकार्यज्ञानस्य विधिशास्त्रीयवाक्यार्थबोधप्रयुक्तत्या तदुत्तरमेवास्य वाक्यार्थ इत्येकवाक्यता न सम्भवति, तथापि तयोर्वाक्यार्थयोरानन्तर्यमात्रेण तथा व्यवहार इति ध्येयम्। नन्वेवमपि 'अणोऽप्रगृह्यस्य' (८.४.५७) इत्यत्र संज्ञाशास्त्रस्योपस्थित्यनन्तरं कार्य उपस्थाप्योपस्थाकयोरभेदादुपस्थापकदेशमादाय मुत्वस्यासिद्धत्वं दुर्वारमत आह – 'कार्यज्ञानञ्च' इति। उपस्थाप्यापदेनोपस्थापके कार्यज्ञानवत् मुत्वशास्त्रतदेकवाक्यतापन्न पूर्वत्रासिद्धशास्त्रैतदुभयदृष्ट्या असिद्धत्वासुवचतया मुत्वविध्येकवाक्यतापन्नपूर्वत्रासिद्धशास्त्रावदक्रपूर्वग्रहणे संज्ञाशास्त्रस्य ग्रहीतुमशक्यत्वात्तादृक्संज्ञादृष्ट्या मुत्वस्यासिद्धत्वे दुर्निरूपमिति भावः।

ननु मुत्वदृष्ट्या अणोऽप्रेत्येतदेकवाक्यतापन्नपूर्वत्रासिद्धशास्त्रेण संज्ञाया असिद्धत्वप्रवृत्तेः पूर्वमेव मुत्वविध्येकवाक्यतापन्नपूर्वत्रासिद्धशास्त्रेण संज्ञादृष्ट्या मुत्वस्यैवासिद्धत्वं कुतो नेति चेत् ? सत्यम्; उपस्थापकदेशानुरोधेन संज्ञादृष्ट्या मुत्वस्यासिद्धत्वे बोधितेऽपि मुत्वदृष्ट्या अणोऽप्रेत्येतदेकवाक्यतापन्नपूर्वत्रासिद्धशास्त्रेणोपस्थाप्यदेशानुरोधेन संज्ञाया असिद्धत्वं दुर्वारम्। अणोऽप्रेत्येतदेकवाक्यतापन्नपूर्वत्रासिद्धशास्त्रदृष्ट्या मुत्वस्यासिद्धत्वाभावात्। मुत्वदृष्ट्या संज्ञाया असिद्धत्वे बोधिते तु मुत्वविध्येकवाक्यतापन्नपूर्वत्रासिद्ध (८.२.१) शास्त्रेण संज्ञादृष्ट्या मुत्वस्यासिद्धत्वं दुर्लभम्। मुत्वविध्येकवाक्यतापन्नपूर्वत्रासिद्धशास्त्रदृष्ट्यापि संज्ञाया असिद्धत्वेन तत्रात्यपूर्वग्रहणेन ग्रहीतुमशक्यत्वात्। एवं च नित्यत्वादणोऽप्रगृह्यस्येत्येतदेकवाक्यतापन्नपूर्वत्रासिद्धशास्त्रेण मुत्वदृष्ट्या संज्ञाया एव पूर्वमसिद्धत्वप्रवृत्त्या न दोषः। किञ्च प्रत्यासत्त्या यदेशावच्छेदेन कार्यज्ञान

तदेशगतमेव पूर्वत्वं परत्वं वा अतिदेशप्रवृत्तौ निमित्तम् । प्रकृते त्र उपस्थापकदेशावच्छेदेन कार्यज्ञानाभावात् । तदेशगतपूर्वत्वस्य संज्ञादृष्ट्या मुत्वासिद्धत्वप्रवृत्तिप्रयोजकत्वे मानाभावान्न दोष इति दिक् ।

ननु पूर्वोक्तभाष्यादिसम्मतफलानुरोधेन संज्ञानां विधिदेशीयत्वाङ्गीकारेऽपि पाठकृतस्वदेशीयत्वानपायात् । अयादिभ्यः परैव प्रगृह्यसंज्ञेति "अदसो मात्" (१.१.१२) इति सूत्रस्थभाष्यासङ्गतिरत आह—"एतद्बोधोत्तरम्" इत्यादि । विधिप्रदेशे संज्ञाशास्त्राकर्षणेन यो वाक्यार्थबोधस्तदुत्तरमित्यर्थः । एवं च प्रगृह्यसंज्ञाकार्यज्ञानमनन्तरा विरोधपरिज्ञानासम्भवेन कार्यज्ञानस्य प्रदेशोपस्थित्यनन्तरभाविता प्रत्यासत्त्या यद्देशावच्छेदेन कार्यज्ञानपूर्वकं विरोधपरिज्ञानं तद्देशावच्छेदेन गृहीतपूर्वत्वपरत्वयोरेव विप्रतिषेधशास्त्रप्रवृत्तिप्रयोजकतया प्राठानुरोधेन संज्ञायाः पूर्वदेशीयत्वेऽपि तद्देशावच्छेदेन कार्यज्ञानाभावेन तादृशपूर्वत्वस्य विप्रतिषेधशास्त्रप्रवृत्तावनुपयोगात्पूर्वेति भावः ।

अत्राऽर्धे तदेव भाष्यं प्रमाणमित्याह—'अत एव' इति । ननु प्रगृह्यसंज्ञाया अन्तरङ्गत्वादेव अयादिवारणे तदर्थं 'विप्रतिषेधाद्वा' इति वार्त्तिकोपक्रमः कात्यायनस्य; तदुपपत्तये कार्यकालपक्षाश्रयणेन प्रकृतिभावशास्त्रैकवाक्यतापत्त्या 'संज्ञायाः परत्वम्' इत्येवं परिक्लेशो भगवतः पतञ्जलेश्च व्यर्थः इति चेत्? न; संज्ञाया विधिनिमित्तनिमित्तकत्वेनान्तरङ्गत्वाभाव इत्याशयात् । स्पष्टभेदं षट्संज्ञा सूत्रे (१.१.२४) शब्दरत्नादौ । अत एव त्यदाद्यत्वस्य गुणसंज्ञादृष्ट्या बहिरङ्गासिद्धत्वं न । अन्यथा गुणसंज्ञाया अनितानित्तनिमित्तकत्वेन अन्तरङ्गत्वात्यदाद्यत्वस्य विभक्त्यात्मकपरनिमित्तकत्वेन बहिरङ्गत्वाच्च तदसिद्धत्वं दुर्वारं स्यात् । गुणसंज्ञाया विधिनिमित्तनिमित्तकत्वे तु परारूपवत्त्वास्यापि परनिमित्तकत्वान्नाऽनन्तर्यं-(प.९१) परिभाषाबलाद्वा न दोषः ।

यत्तु प्रगृह्यसंज्ञायाः कार्यकालपक्षे प्रकृतिभावशास्त्रैकवाक्यतापन्नाया अनवकाशत्वाद्विप्रतिषेधोपपादनमयुक्तमेवेति? तन्न । "अणोऽप्रगृह्यस्य" (८.४.५७) अदसो नेति न्यासेनैव अनुनासिकादेशवारणात्मकफलसंपत्त्या यथोद्देशेऽपि निरवकाशत्वस्य सौलभ्येन साधारणतया तदनादरेणैव प्रकृत-

इत्यादौ स्वरूपग्रहणे व्याख्यानमेव शरणमित्याशयः। उक्तमर्थं भाष्यानुग्रहेण द्रढयति—'अत एव' इत्यादि। 'आहुः' इति। अत्र केचित्—अवध्यवधिमतोः साजात्यनियमेन पूर्वत्रासिद्धशास्त्रवटकपूर्वग्रहणेन संज्ञानानामग्रहणान्न तदृष्ट्या त्रैपादिकविधीनामसिद्धत्वम्। साजात्यं च भेदसंसर्गकविधेयसमर्पकत्वेन। संज्ञाशास्त्राणां 'त्वदैचो वृद्धिपदाभिन्ना' – इत्येवं वाक्यार्थ इति न तत्सम्भव इत्येवंविधकल्पनयैव प्रगृह्यसंज्ञादृष्ट्या मुत्वादेरसिद्धत्वाभावसिद्धया तासां विधिदेशीयत्वाङ्गीकारो निष्फलः। परैव प्रगृह्यसंज्ञेति 'अदसो मात्' (१.१.१२) इति सूत्रस्थभाष्यन्तु तत्संज्ञाप्रयुक्तः प्रकृतिभावः पर इत्यर्थकम्। अन्यथा संज्ञाया अन्तरङ्गत्वात्तदसङ्गतिरेव। संज्ञानां विधिनिमित्तनिमित्तकत्वं च प्रदेशैकवाक्यतयैव वाक्यार्थाभ्युपगमार्थात्कार्यकालपक्ष एवेति युक्तम्; न तु यथोद्देशे; मानाभावात्। पक्षयोर्व्यवस्थितत्वाच्च न लक्ष्यविरोधः। तदुत्तरं कथं 'कार्यकालं संज्ञापरिभाषम्' इत्यादि भाष्यं त्वेकदेशिनोरुक्तिप्रत्युक्तिरूपमिति न प्रागुक्तार्थबाधकम्। अनवकाशत्वं तु प्रगृह्यसंज्ञायामप्यविशिष्टमेवेति न कश्चिद्विशेषः।

किंच व्यवहृतदृष्टान्तमूलकस्य परिभाषास्वभ्युपगतस्य विधिदेशीयत्वाभावस्य संज्ञासु परित्यागो निर्बीजः। 'कश्चिदेकदेशस्य' इत्यादि भाष्यमपि संज्ञापरिभाषोभयसाधारणमिति वक्तुं शक्यम्। 'परिभाषारूप' इति कैयटस्तु उपलक्षणतया योज्यः। पाराश्र्यस्योभयसाधारणतया सङ्कोचे मानाभावात्।

यत्तु संज्ञासु पदैकवाक्यतायां असम्भवाद्दीपदृष्टान्तविरोध इति, न तदुक्तम्। तदृष्टान्तबलेन कथंचिद्विधिप्रकाशकत्वलाभेऽपि पदैकवाक्यतायाः शब्दमर्यादाया अलाभात्। समर्थसूत्रस्थभाष्यमपि तत्रत्यप्रकृताभिप्रायकमेवेति न तद्विरोधस्याप्यवकाशः। किन्तु लाघवात्परिभाषासु पदैकवाक्यता, संज्ञास्वगत्या वाक्यैकवाक्यता पक्षद्वयेऽपीत्यन्यदेतत्। एवं च आकडारीयसंज्ञासु कार्यकालपक्षोऽपि निर्बाधः। अत एव 'व्यङ्' (६.१.१६) इति सूत्रे भाष्ये असंज्ञाया कार्यकालत्वोपपादनं स्वरसतः सङ्गच्छते। पदैकवाक्यताप्रयुक्तेनांशान्तरीयाप्रामाण्येन सर्वस्याप्रामाण्ये मानाभाव इत्याहुः। द्वितीयां परिभाषां व्याचष्टे –

कार्यकालमित्यस्य च कार्येण काल्यते स्वसन्निधिं प्राप्यत इत्यर्थः । कार्येण स्वसंस्कार्य स्वद्वृत्तिलिङ्गचिह्नितसंज्ञापरिभाषाणामाक्षेप इति यावत् ।

'कार्यकालम्' इत्यादि । कार्यशब्देनात्र प्रधानशास्त्रमुच्यते । 'परिभाषाणामाक्षेपः' इति । शब्दकाङ्क्षया शब्दतः सम्बन्ध इति तदर्थः । स'च 'पदोपस्थापकंपरिभाषासु 'तस्मिन्निति निर्दिष्टे' (१.१.६६) इत्यादिषु परिभाषाप्रतिपाद्यस्याव्यवहितस्य पूर्वस्येत्यादिशस्य प्रदेशेषु तत्समानार्थकशब्दाध्याहारद्भवति । प्रदेशवटकस्यैव षष्ठ्यायन्तस्य अव्यवहितपूर्वत्वविशिष्टार्थलाक्षणिकत्वान्निमित्तेवप्रकारेण वा भवति । असिद्धत्वं तु न तत्सम्बन्धात्पूर्वं बिधिशास्त्रीयविशिष्टवाक्यार्थबोधप्रयुक्तकार्यज्ञानाभावात् । तथविधस्यैव कार्यज्ञानस्यात्र पक्षे त्रैपादिकासिद्धत्वप्रवृत्तिप्रयोजकमित्यादि प्रागुक्तमनुसन्धेयम् ।

अस्तु वा सामान्यबोधप्रयुक्तमेव कार्यज्ञानमात्रापि पक्षे त्रैपादिकासिद्धत्वप्रवृत्तिप्रयोजकं विनिगमनाविरहात् । उपस्थितेः पूर्वमेव परिभाषादृष्ट्या विधीनामसिद्धत्वेऽपि न क्षतिः । अत्र पक्षे गुणकर्तव्येष्वात्मोपकारेषु विधीनामेव स्वातन्त्र्यौन्मुख्यगमात् । यथा चक्षुष्मता नीयमानेऽन्धस्तत्समीपं गच्छति । यथा वा 'तं पुरस्कृत्य चक्षुष्मान्निजं कार्यं निवर्तयति । तद्वत्त्रैपादिकविधिशास्त्राकाङ्क्षिता परिभाषा त्रिपादीं गच्छति, त्रैपादिकं च शास्त्रमेनां पुरस्कृत्यः स्वीयं कार्यं साधयति । यथोद्देशे तु गुणशास्त्राणामेव स्वतन्त्र्याभ्युपगमाद्वैषम्यम् । ततश्च ''अलोऽन्त्यस्य'' (१.१.९२) परिभाषायास्त्रिपाद्यां प्रवृत्तिस्सौलभ्येन भवति । अत एव 'पूर्वत्रासिद्धम्' (८.२.१) इति सूत्रे भाष्ये यद्यपीदं तत्रासिद्धं तस्मिन्निति निर्दिष्टे पूर्वस्य' (१.१.६६) इत्यादीनां परिभाषाणां त्रिपाद्यां प्रवृत्तये कार्यकालपक्षात्मकंमुपायमुपाश्रित्य वाक्यैकवाक्यतया तदुपकारिकाणां 'अलोऽन्त्यस्य' (१.१.९२) इत्यादीनां तत्र प्रवृत्तये यत्नविशेषानुपपादनं सङ्गच्छते । परिभाषाणामत्र पक्षे विधिदेशीयत्वमिति स्वयुक्तमेव मानाभावात् ;फलाभावा-

दगौरवाच्च । बहिरङ्गपरिभाषायास्त्रिपाद्यामप्रवृत्तिस्तु, तदीयबुद्धिगोचरस्येव, अन्तरङ्गबहिरङ्गभावस्य तत्परिभाषाप्रवर्तकत्वं, न तु वस्तुभूतस्येत्यभ्युपगमादुपपद्यत इत्यग्रे निरूपयिष्यते ।

कार्यं कालयति स्वसन्निधिं प्रापयतीति व्युत्पत्तिनिरासायाह –

अत एव 'पूर्वत्रासिद्धम्' (८.२.१) इति सूत्रास्थभाष्ये त्रिपाद्या असिद्धत्वात्तत्र सपादसप्ताध्यायीस्थपरिभाषाणामप्रवृत्तिमाशङ्क्य 'यद्यपीदं तत्रासिद्धं तत्रेह सिद्धमित्युक्त्वा तावताऽप्यसिद्धिरित्यभिप्रायके कथमिति प्रश्ने कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यमित्युक्तम् । न च कार्यकालपक्षे 'ह्रस्वो ह्रस्वात्' (८.३.३२) इत्यादौ 'तस्मादित्युत्तरस्य' (१.१.६७) 'तस्मिन्निति निर्दिष्टे' (१.१.६६) इति परिभाषाद्वयोपस्थितौ परत्वात्, 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' (प.७१) इति 'तस्मिन्' (१.१.६६) इति सूत्रास्थ भाष्यासङ्गतिः । उभयोरेकदेशत्वेन परत्वादित्यस्यासङ्गते स्पष्टं चेदं 'इको गुण' (१.१.३) इत्यत्रा कैयट इति वाच्यम् । विप्रतिषेधसूत्रे (१.४.२) अष्टाध्यायीपाठकृतपरत्वाश्रयणेनादोषात् । न हि 'कार्यकालपक्षे' इत्येवता तदपैति, पक्षद्वयेऽपि प्रदेशेषु स्वबुद्धिजननेनाविशेषात् । न हि तत्पक्षेऽप्यचेतनस्य शास्त्रस्य स्वदेशं विहाय तद्देशगमने सम्भवति । नाप्यस्मदादिबुद्धिजननेन स्वदेशत्यागो भवति ।

'अत एव' इति । 'यद्यपीदम्' इत्यादिकं सपादायां सप्ताध्याय्यामसिद्धम् । सापादिकं तु त्रिपाद्यां सिद्धमिति तदर्थः । 'असिद्धिः' इति । परिभाषादृष्ट्या विधीनामसिद्धत्वात्तद्विषयाकाङ्क्षाया अनुत्पत्तेरसिद्धिरित्यर्थः ।

ननु विरोधप्रतिसन्धानं विप्रतिषेध (१.४.२) शास्त्रप्रवृत्तौ हेतुः । तच्चात्र पक्षे प्रदेशदेश एव । परिभाषाणां विरोधज्ञानजनकविशिष्टवाक्यार्थ-

बोधप्रयुक्तकार्यज्ञानस्य तत्रैवोत्पत्तेः। एवं च यद्देशावच्छेदेन कार्यज्ञानं विरोधज्ञानजनकं तद्देशकृतपौर्वापर्यस्यैव विप्रतिषेधशास्त्रप्रवृत्तिप्रयोजकतया आवश्यकत्वेनोभयनिर्देशेषु 'ङमो ह्रस्वात्' (८.३.३२) इत्यादिषूपस्थितयोः 'तस्मिन्' (१.१.६६) इति 'तस्मात्' (१.१.६७) इत्यनयोरुभयोरर्च्यैक-देशस्थत्वेन विप्रतिषेधशास्त्रप्रवृत्तेरयोगाद्भाष्यविरोधो लक्ष्यासिद्धिश्चेति शङ्कते – 'न च' इति।

"इको गुण' (१.१.३) इत्यत्र कैयटे" इति। यथोद्देश एव परि-भाषयोः पौर्वापर्यं न तु कार्यकालतायामिति तत्रत्यस्तदीयो ग्रन्थः। 'अष्टा-ध्यायीपाठकृतपरत्वाश्रयणेन' इति। अस्य संज्ञातिरिक्तविषय इति शेषः। एवं च संज्ञाविषय एव प्रगृह्यसंज्ञासूत्रस्थभाष्यप्रामाण्यात्प्रत्यासत्तिः, प्रकृतभाष्य-प्रामाण्याच्च परिभाषासु सा नाश्रियत इति भावः।

एतेन तद्बोधोत्तरमेव विरोधप्रतिसन्धानं चेति तत्रत्यपरत्वमेव विप्रति-षेधशास्त्रप्रवृत्तौ बीजमित्यादिभ्यः परैव प्रगृह्यसंज्ञेति "अदसो मात्" (१.१.१२) इति सूत्रस्थभाष्योपपादकेन स्वग्रन्थेन विरोध इत्यपास्तम्।

केचित्तु 'आकडार' (१.४.१) सूत्रेणात्र शास्त्रे कार्यज्ञानं विनापि संज्ञानां स्वतन्त्र्येण विरोधो बोध्यते। अत एव यथोद्देशे तासां बाध्यबाधक-भावोपपत्तिः। अन्यथा कार्यविशेषानुद्देशेनैव तत्पक्षे तासां प्रवृत्त्या तदनुप-पत्तिः स्पष्टैव। एवं च तादृशाधिकारीयपौर्वापर्यमेव संज्ञासु विप्रतिषेधशास्त्र-प्रवृत्तिप्रयोजकमिति युक्तम्। अयादिभ्यः परैव प्रगृह्यसंज्ञा इति 'अदसो मात्' (१.१.१२) इति सूत्रस्थभाष्यन्तु न संज्ञाविषयमित्युक्तमेव। 'तद्बोधोत्तरमेव' इत्यादि तदुपपादको मूलकृदग्रन्थश्चिन्त्य एव। मानाभावात्फलाभावाच्च।

एवं चापादानादिष्वाकडारीयसंज्ञासु कार्यकालेऽपि वाध्यबाधकभावो निर्बाध इत्युच्यते चेत्? तर्हि विनैव शेषपूरणं यथाश्रुतमेव साध्वित्याहुः। 'स्वदेशत्यागो भवति' इति। ननु मास्तु स्वदेशत्यागः, विधिदेशीयत्वं तु स्यादेव। कथमन्यथा संज्ञानां वा तत्स्यात्। अत आह—

अत एव भाष्ये एकदेशस्थस्यैव सर्वशास्त्राभिज्ञत्वाल्लक्ष्य-

मुक्तम्। अत एव 'तस्मिन्' (१.१.६६) इति सूत्रे कैयटः। सूत्रपाठापेक्षया परस्य व्यवस्थापकत्वमिति, 'इको गुण' (१.१.३) इति सूत्रास्थकैयटस्तु चिन्त्य एव। अन्यथा सर्वशास्त्राणां प्रयोगार्थत्वेन प्रयोगरूपैकदेशस्थत्वेन क्वापि परत्वं न स्यात्। किं च "क्ङिति च" (१.१.५) इति सूत्रस्थकैयटरीत्या विधीसूत्राणां यथोद्देशपक्षे परिभाषादेशे सन्निधानेन तेषां परत्वं व्याहन्येत। एवं च वृक्षेभ्य इयत्र 'सुपि च' (७.३.१०२) परत्वात् 'बहुवचने झलि' (७.३.१०३) इत्येत्वमित्याद्युच्छिद्येतेत्यलम्।

'अत एव' इति। 'परिभाषासु विधिदेशीयत्वाभावे कश्चिदेकदेशस्थः' इत्यादि भाष्यम्। 'संज्ञासु तत्सत्वे त्वयादिभ्यः परैव' इत्यादिभाष्यं च प्रमाणमित्याशयः। ननु "इको गुण" (१.१.३) इति सूत्रस्थकैयटविरोधो दुर्वार इयत आह--"इको गुण" इति। 'चिन्त्य एव' इति। न्यायप्रमाणसहकृतेन "तस्मिन्" (१.१ ६६) इति सूत्रस्थेन स्वग्रन्थेनैवास्य चिन्त्यत्वं बोधितमिति भावः। वस्तुतः सत्यपि विधिदेशीयत्वे तथाविधपरत्वं न विप्रतिषेधशास्त्रे ग्रहीतुं शक्यत इत्याह—'अन्यथा' इति। 'क्वापि परत्वं न स्यात्' इति।

ननु विप्रतिषेधशास्त्रवैयर्थ्यान्यथानुपपत्त्या प्रयोगातिरिक्तप्रदेशसम्बन्धकृतपरत्वस्यैव तत्सूत्रप्रवृत्तौ प्रयोजकमिति कल्पनया निर्वाहान्नायं परिभाषासु विधिदेशीयत्वप्रयुक्तपरत्वपरिग्रहप्रतिबन्धको हेतुरत आह – 'किञ्च' इति। 'उच्छिद्येत' इति। ततश्च लघ्वादष्टाध्यायीपाठकृतमेव परत्वं विप्रतिषेधशास्त्रप्रवृत्तियोजकमिति कल्प्यत इति तात्पर्यम्। किञ्च भाष्यसम्मतफलाभाव एव परिभाषाणां विधिदेशीयत्वाभावे तथाविधपरत्वस्य विप्रतिषेधशास्त्रविषयत्वाभावे च मूर्धाभिषिक्तो हेतुरिति तदर्थं हेत्वन्तरान्वेषणप्रयासो वृथेवेति सूचनायालमित्युपसंहार इति दिक्।

अत्रेदं बोध्यम् – संज्ञासु कार्यकालपक्षाश्रयणे फलाभावः। त्रिपाद्यां तासां प्रवृत्तिस्तु न फलम्। पदार्थोपस्थितिकाले प्रवर्तमानानां संज्ञाशास्त्राणां

वाक्यार्थबोधोत्तरं प्रवर्तमानेन त्रैपादिकासिद्धत्वेन बाधायोगात्। सामान्यबोधस्यापि पदार्थोपस्थितिमन्तरेण दुर्लभत्वात्। अन्यथा कार्यकालेऽपि त्रिपाद्यां तासामप्रवृत्त्यापत्तेः। न च शूरवीरादिभ्यः क्विपि शूः करोति इत्यादौ स्वाभाविकदीर्घव्यावर्तनेन कृतार्थस्य 'इदुदुपधस्य' (८.३.४१) इति सूत्रस्थतत्परकरणस्य 'गीः करोति' 'पूः करोति' इत्यादौ त्रैपादिकदीर्घव्यावृत्तिस्तत्फलमिति वाच्यम्। ''पूर्वत्रासिद्धम्'' (८.२.१) इत्यनेन त्रैपादिकविधिवैजात्यात्संज्ञाद्दष्ट्या त्रिपाद्या नासिद्धत्वमित्यभ्युपगमात्।

न च 'अतो रोः' (६.१.११३) इति सूत्रस्थादप्लुतादप्लुतेग्रहणादस्याः कल्पनाया असाङ्गत्यमिति वाच्यम्। तपरसूत्रदृष्ट्या प्लुतस्यासिद्धत्वाभावेऽपि उत्त्वदृष्ट्या तस्यासिद्धत्वेन तत्सार्थक्यात्। न चोपपदसंज्ञायाः 'स्वादुमि णमुल्' (३.४.२६) इत्यादेकवाक्यत्वाभ्युपगमात् 'अमैवाव्ययेन' (२.२.२०) इत्यस्य येनामैव विहितस्तेन यस्योपपदसंज्ञा तदेवाव्ययेन समस्यत इत्यर्थसम्पत्त्या 'अग्रेभोजम्' इत्यादौ समासाभावस्तत्फलमिति वाच्यम्। तत्रोपपदमित्यस्याधिकारतायां एवाकरसम्मत्त्वेनादोषात्।

अथ संज्ञानां कार्यकालत्वाभावे तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि काष्ठतक् गोरक् इत्यादौ संयोगान्तलोपैकवाक्यतयाराहित्येन पदसंज्ञायां प्रवर्तनीयां 'पूर्वत्रासिद्धीये न स्थानिवत्' (जैने.प.सू.४८) इत्यस्याप्रवृत्त्या स्थानिवद्भावेन तत्प्रतिबन्धे संयोगान्तलोपानापत्तिः। अत एव संज्ञानां विधिदेशीयत्वमप्यावश्यकमेवेति चेत्? सत्यम्; पूर्वत्रासिद्धीयप्रापके तस्मिंश्च कर्तव्ये स्थानिवन्नेत्यर्थकतया तद्वचनस्य वाचनिकत्वाभ्युपगमान्न दोषः। आवश्यकश्चायमर्थः। अन्यथा संज्ञाशास्त्रादिवत् सामान्यतस्त्रिपादीं प्रति 'अचः परस्मिन्' (१.१.५४) इत्यत्तदप्यतिदेशं बोधयेत्। अपभ्रंशानां साधुत्ववाराणाय शास्त्रान्तरबोधितसाधुत्ववत्येवान्यशास्त्रापवृत्तिरित्यङ्गीकारात्। यथा 'मोऽनुस्वारः' (८.३.२३) इत्येतच्छास्त्रं प्रति 'अमि पूर्वः' (६.१.१०७) इत्यनेन सामान्यतः साधुत्वं बोध्यते 'रामं वन्दे' इत्यादावनुस्वारसिद्धयर्थं, तद्वत्। अत एव द्विर्वचनादिग्रहणमारब्धं सूत्रकृता।

किञ्च 'पूर्वत्रासिद्धीये न स्थानिवत्' (जै. प. ४८) इत्यस्य यौक्तिकत्वे तदज्ञानात्पाणिनेर्भ्रान्तत्वापत्तिः। वाचनिकत्वे तु कात्यायनोक्तार्थस्य

सर्वत्रैवातिरिक्तत्वात् (न) तस्य दोषाधायकत्वम्। अत एव 'तस्य दोषः' इति चरितार्थम्। अन्यथा तेषु 'स्थानिवत्' इत्येव ब्रूयादिति विभाव्यताम्।

न च संज्ञानां कार्यकालत्वे यत्र वृद्धिपदं तत्र 'आदैच्' (६.१.९४) इत्युपतिष्ठत इत्येवं पदोपस्थापकत्वाभ्युपगमेन प्रदेशेषु वृद्धिपदाभिन्ना आदैचो भवन्तीत्येवं पदैकवाक्यतायाः सम्भवालंलाघवमिति वाच्यम्। विभिन्नविभक्तिकप्रदेशेषु वृद्धिसूत्रस्थभाष्यकारोक्तस्य समानविभक्तिकत्व-नियमरूपस्य कारणस्य वैकल्यात् संज्ञिभावावगमस्यैव दौर्लभ्यापत्तेः। प्रगृह्याः प्रकृत्येत्युपस्थितमिदं भवति 'ईदूदेद्द्विवचनं प्रगृह्यम्' (१.१.११) इत्यादिभाष्यस्वारस्यविरोधापत्तेश्च।

नन्वेवं संज्ञासु कार्यकालयथोद्देशपक्षयोर्वैलक्षण्यात् कार्यकाल एवास्तु, किं यथोद्देशेन? अपादानादिसंज्ञासु बाध्यबाधकभावोपपत्तिस्तु संज्ञानां विधिदेशीयत्वानभ्युपगमेन सिद्धा। "दत्तः" इत्यादौ भसंज्ञया पदसंज्ञाबाधनमपि पदसंज्ञोपमर्दनात्मकेऽप्यशास्त्रीये कार्ये भत्वप्रवृत्त्या निर्वहति। कथमन्यथा संज्ञानां कार्यार्थत्वाद्यथोद्देशे वा सा स्यात्। एवं 'शेवः' इत्यादौ भत्वोपमर्दनाय पदत्वप्रवृत्त्या निरवकाशत्वेनैव भसंज्ञया पदसंज्ञाया बाधात् 'राज्ञः' इत्यादौ नलोपोऽपि न भवतीति चेत्? मैवम्। 'वर्णाश्रमे-तराणाम्' इत्यादौ सुडादिवारणाय 'आमि सर्वनाम्नः' (७.१.५२) इत्यादेः सर्वनाम्नो विहितस्यामः सुडित्यार्थसम्पत्तये 'पञ्च' इत्यत्र भूतपूर्वषत्व-मादाय 'न षट्स्वस्रादिभ्यः' (४.१.१०) इत्यनेन ङाभिवृत्तये च संज्ञासु यथोद्देशपक्षस्यावश्यकत्वात्। एवं परिभाषासु यथोद्देशे फलाभावः।

ननु 'अनुदात्तं पदमेकवर्जम्' (६.१.१२८) इत्यस्यास्त्रिपाद्यामप्रवृत्ति-स्तत्फलम्। अन्यथा 'यज्ञास्त्यधोषत्' इत्यादौ 'उदात्तानुदात्तस्य' (८.४.६६) इति विधीयमाने स्वरितमादाय शेषनिघातापत्तेः। न च सन्निपातपरिभाषया निर्वाह इति वाच्यम्; तस्याः स्वरविधावप्रवृत्तेरिति चेत्? न। शेषनिघातार्थ-तया तद्वचनस्य विधित्वाभ्युपगमेनादोषात्।

अथ समर्थपरिभाषायाः (२.१.१) त्रिपाद्यामप्रवृत्तिस्तत्फलम्। अन्यथा 'नश्छव' (८.३.७) इत्यादिना विधीयमानानां पदाधिकारीयाणां

रुत्वादीनां वाक्येष्वप्रवृत्त्यापत्तेः। न च 'नश्छव' (८.३.७) इत्यादीनां पदाधिकारीयाणां संहिताधिकारे पाठबलात्तद्विषये प्रवृत्तपरिभाषाया अप्रवृत्ति-ज्ञापनादोषः। अन्यथा पदाधिकारीयाणां तेषां समास एव प्रवृत्या तत्र च संहिताया नित्यत्वात्तदैयर्थ्यं स्पष्टमेवेति वाच्यम्। यत्र 'द्वितीयाद्याः' (७.२.८७) इति णमुल् 'तृतीयाप्रभृतीन्यन्यतरस्याम्' (२.२.२१) इति विकल्पात्समासाभावः। यथा दारांस्त्याजं परिव्रजति इत्यादौ तत्र समा-साभावेऽपि कृद्वृत्तित्वा सामर्थ्यस्य सुवचत्वा प्रसक्तानां रुत्वादीनां वाक्यं-त्वेन संहिताया वैवक्षिकतया तदभावे वारयितुं तथापाठस्यावश्यकत्वेन उक्तकल्पनाया अयुक्तत्वात्।

एवं च परिभाषासु यथोद्देशपक्षो गुरुभूतोऽप्यावश्यक एवेति चेत्? न। 'ऋते च तृतीयासमासे' (वा. ६८१) इति वार्तिकस्थेन समासग्रहणेन प्रकृतपरिभाषाया अनित्यत्वेन वार्णकार्येष्वप्रवृत्त्यभ्युपगमेनादोषात्। 'ऋते च तृतीया' (वा. ६८१) इत्युक्तावपि प्रकृतपरिभाषया वाक्यव्यावृत्तेः समासग्रहणस्य तदनित्यत्वज्ञापकता युक्तैव। 'तिष्ठतु कुमारी च्छत्रं हर' इत्यादौ 'पदान्ताद्वा' (६.१.७६) इति वैकल्पिकस्य तुकः सिद्धिः। अन्त-ग्रहणसामर्थ्यादेव तत्रास्याः परिभाषाया अप्रवृत्तिरिति तु न युक्तम्। उक्त-रीत्या तादृशान्तग्रहणस्य प्रत्याख्यानसम्भवेन लाघवात्। अधिकमधिकार्थ-कमिति कल्पनाया आतिकगतित्वाच्च। कार्यकालपक्षस्तु 'तस्मिन्निति निर्दिष्टे' (१.१.६६) इत्यादीनां त्रिपाद्यां प्रवृत्त्यर्थमिति स्पष्टमेव भाष्यविदाम्। तस्मात्संज्ञासु कार्यकालपक्षोपपादकाः परिभाषासु यथोद्देशपक्षोपपादकाश्च भाष्यादिग्रन्थाः सम्भवमात्राभिप्रायका एव, न तु फलविशेषसद्भावमूलकाः, तदेतत्सुधियो विभावयन्तित्वाहुः।

इत्संज्ञका अनुबन्धास्तेष्वयवानवयववत्वसन्देहे आह—

४. अनेकान्ता अनुबन्धाः।

इति। अनेकान्ताः, अनवयवा इत्यर्थः। यो ह्यवयवः स

कदाचित्तत्रोपलभ्यत एव। अथे तु न तथा, तदर्थभूते विधेये कदाऽप्यदर्शनात्।

'इत्संज्ञका अनुबन्धाः' इति। अनुपूर्वाद्बध्नातेः कर्मणि घञ्। अनुरप्राधान्यवाची बध्नातिरुच्चारणार्थः। आचार्यकर्तृकाप्रधानीभूतोच्चारणविषया इत्संज्ञका इत्यक्षरार्थः। अप्राधान्यं च लक्ष्यसमवायातिरिक्तकार्यसमर्पकत्वम्। एवं चाचार्यकर्तृकलक्ष्यसमवायातिरिक्तकार्यसमर्पकोच्चारणविषयत्वमनुबन्धत्वमिति फलति। तच्चोच्चारणसौकर्यरूपकार्यसमर्पकेषु ख्यत्यादिष्वादावुच्चार्यमाणेऽवागन्तुकाकारादिष्वतिप्रसक्तमितीत्संज्ञकेषु रूढिराश्रीयते। अतो योगरूढोऽयमनुबन्धशब्दः। शुद्धरूढिस्तु नोचिता। 'जहत्स्वार्था तु तत्रैव रूढिर्यत्र विरोधिनी' इति सिद्धान्तादिति ध्येयम्।

न त्वत्र अनुबन्धपदव्याख्यानेतात्पर्यम्। किं तु सङ्गतिप्रदर्शने। अन्यथा व्याख्यास्यमानपरिभाषाया अनुल्लेख्यात्तद्घटकस्यानुबन्धपदस्य व्याख्यानमसम्बद्धं स्यादिति स्पष्टमेव। पूर्वमित्संज्ञकवर्णकृतसन्देहो व्याख्यानतः (प. १) इत्येतत्परिभाषावतरणबीजमस्यास्तु तादृशवर्णनिष्ठ एवावयवत्वानवयवत्वसन्देहस्तथेति सङ्गतिः।

यत्तूच्चारणार्थकेष्वतिप्रसङ्गवारणायेत्संज्ञाप्रयुक्तस्वनिवृत्तिर्व्ययतिरिक्त – लक्ष्यगतकार्यसमर्पकत्वमनुबन्धत्वमिति परिष्कुर्वन्ति, तदयुक्तम्। 'प्रत्याहारेऽनुबन्धानाम्' इत्यत्र वार्णसमाम्नायिकेष्वित्संज्ञकेषु भाष्यकृत्कृतस्यानुबन्धत्वव्यवहारस्यासाङ्गत्यापत्तेः।

न हि तेषां किञ्चिल्लक्ष्यगतं कार्यमस्ति। प्रत्याहारमात्रोपयोगित्वात्। तस्माद्विधेयघटकानामुच्चारणार्थकानामपि विनेत्संज्ञां निवृत्त्युपायाभावादित्संज्ञकतया तेषामनुबन्धत्वमिष्टमेव। यथा – 'दिव औत्' (७.१.८४) इत्यादेस्तकारादीनाम्। अनूद्यमानविषये तु तेषामुपदेशलक्षणाया इत्संज्ञाया अभावान्न तत्रानुबन्धत्वम्। परन्तु तत्रोच्चारणार्थवर्णविशिष्टस्य तद्रहिते लक्षणाभ्युपगमादेव तन्निवृत्तिः। विधेयविषये तु न लक्षणा। 'न विधौ परः शब्दार्थः' इति निषेधात्। अत्र विधेयघटकानामपि लडाद्यागमवर्णानामन्यत्र

विशिष्यैवार्थत्वेनापि प्रयोजनं नास्ति, किन्तु मुखसौकर्यमेव प्रयोजनं तथा-विधानां यांसुडाद्युकारादीनां नान्तरीयकतया वह्वानर्थनादौ विनैवोपदेशं सौकर्यार्थं परिगृहीतानां पात्रादीनामिवाकस्मादेव निवृत्तिरितीत्सेशमनिच्छंतां दीक्षितादीनां मते तु विधेयविषयाणामपि तेषामनुवैन्धत्वमनिष्टमेवेति मूल-काराशय इति दिक्।

'सन्देहे' इति। 'आटश्च' (६.१.९०) इत्यादौ विशिष्टाद्विभक्ति-दर्शनात्। 'तस्य लोपः' (१.३.९) इति शास्त्रात्। 'हलन्त्यम्' (१.३.३) इत्यादिसूत्रस्वरसाच्च, अनुबन्धानामुपस्थाप्यत्वेनाचार्यतात्पर्य-विषयीभूतो यः समुदायस्तस्यावयवत्वम्; उत 'उदीचां माङः' (३.४.१९) इतिनिर्देशात्, 'उपदेशेऽजनुनासिक इत्' (१.३.२) इति सूत्रस्थादुपदेश-ग्रहणात्, 'अनेकाल्' (१.१.५५) सूत्रस्थाच्छिदृग्रहणस्वरसाच्च तदनवयवत्वं वेति सन्देहोत्थितिः। एतेन उपस्थापकः प्रत्यक्षतो दर्शनादुपस्थाप्यं लक्ष्यगते चादर्शनान्नास्ति कुत्रापि सन्देहावकाश इत्यपास्तम्। 'अनेवंयेवाः' इति। उपस्थापकत्वेनाचार्यतात्पर्यविषयस्येत्यर्थः।

नन्वेवंयेवत्वानेवंयेवत्वयोरुभयोरपि प्रमाणसिद्धत्वात्कथमनेवंयेवत्वे-भेवेति निष्कर्षोऽत आह—'यो हि' इत्यादि। अत्र शास्त्रे उपस्थाप्यावयवैत्वे तदुपस्थापकावयवैत्वं हेतुः। 'स्वं रूपं (१.१.६८) इत्यनेन तथोः समाना-नुपूर्वीकत्वनियमात्। यथा – जरसादेः सकारस्य। यस्योपस्थाप्यावयवत्वेन-नुपलम्भस्तस्योपस्थापकावयवत्वाभावो न्यायसिद्धः। तस्माद्धात्वादिष्वनुबन्धे-पदादिकार्यार्थमनुबन्ध्यमानानां तेषां ककारादिवदागन्तुकत्वमेव युक्तम्। उपस्थापकसामीप्येन तेषामुच्चारणमहिम्नैव तत्प्रयुक्तं कार्यं निर्वहति। प्रमाणस्याप्यनुभवविरुद्धवस्तुसाधकत्वप्रसक्तौ प्रामाण्यस्यैव भङ्गादन्यथोपपत्ति-परिचिन्तनमेव न्याय्यमित्याशयः। 'कदाचित्' इति। अनङादीनां नकारो नलोपात्पूर्वमुपलभ्यत इति तात्पर्यम्। 'तेन' इत्यस्य विधेये इत्यर्थः। 'आटश्च' (६.१.९०) इत्यादावनुकरणबोधितानुबंधौ दर्शनादाह – 'विधेये' इति। 'कदाप्यदर्शनात्' इति।

ननु 'जसः शी' (७.१.१७) इत्यादौ प्रत्ययत्वप्रयुक्तायाः इत्संज्ञायाः अभावेन तत्संज्ञाप्रयुक्तस्यानुबन्धस्य दौर्लभ्यात्तन्निवृत्त्ययोगादुपस्थाप्ये संज्ञोत्तरं तदुपलम्भस्य दुर्वारतया अनुबन्धत्वेनानुबन्धस्य विधेये कदाप्यदर्शनात्मकस्य हेतोः स्वरूपासिद्धिः ।

न च यादृशयादृशोपस्थापकावयवत्वाभावस्य साध्यता तत्तदुपस्थाप्यभूते विधेये कदाप्यदर्शनस्यैव हेतुत्वेन विवक्षणान्न दोष इति वाच्यम् । एवं सति तादृशशकारस्यानवयवत्वाभावात् "तस्य लोपः" (१.३.९) इत्यस्यैतन्मतेऽर्थान्तरपरत्वात्तथाविधोपस्थाप्यस्योपस्थाप्यान्तराभावाच्च निवृत्त्युपायाभावेन लक्ष्यासिद्धेर्दुर्वारत्वात् ।

न च 'एति, गच्छति' इति व्युत्पत्तिबलात् संज्ञाप्रवृत्त्यैव तन्निवृत्तिर्न तु तदर्थमुपायान्तरान्वेषणमस्ति 'तस्य लोपः' (१.३.९) इति त्वन्वर्थसंज्ञालब्धतन्निवृत्त्यनुवादकमेवेति न दोष इति वाच्यम् । अन्वर्थसंज्ञात्वाभ्युपगमे तेनैवानुबन्धानामुपस्थापकानवयवत्वलाभादुपायान्तरेण तत्साधनप्रयासस्य वैफल्यापत्तेः । उपस्थापकेऽपि तेषामदर्शनप्रसङ्गाच्च । किं च 'गोदः' इत्यादौ विधीयमानकप्रत्ययविषये अणोऽप्यापत्तिः । तत्र विधानात्पूर्वं प्रत्ययत्वप्रयुक्तायाः इत्संज्ञाया अभावेन ककारे विधेयानवयवत्वस्य वक्तुमशक्यतया वासरूपन्यायस्य दुर्वारत्वादिति चेत् ? मैवम् 'लशक्वतद्धिते' (१.३.८) इत्यादिना प्रत्ययत्वयोग्यानामादिभूता ये लादयस्तेषां विधानात्पूर्वमेवेत्संज्ञेत्यभ्युपगमात् । अत एव 'ददातिदधात्योर्विभाषा' (३.१.१३९) इति णबाधकस्य शस्य विकल्पविधानं सार्थकम् । अन्यथा उक्तरीत्या वासरूपन्यायेनैव विकल्पसिद्धौ तद्वैयर्थ्यं स्पष्टमेव । तादृशं च प्रत्ययत्वमौपदेशिकमातिदेशिकं वेत्यन्यत् । 'जशः शी' (७.१.१७)) इत्यादौ तूपस्थापके एवेत्संज्ञाप्रवृत्त्या ईकारस्यैव लक्ष्ये प्रवृत्तिः शित्त्वादेव च सर्वादिशित्वमिति न कोऽपि दोष इत्याहुः ।

यत्तु इत्संज्ञायोग्यस्यैवानुबन्धत्वमिति ? तन्न । अनवयवत्वेन शकारनिवृत्तावीकारमात्रस्यैव लक्ष्ये प्रवर्तनीयतया तत्काले शकारस्येत्संज्ञाया अभावेन चानेकाल्त्वस्य शित्वस्य वा वक्तुमशक्यत्वेन सर्वादिशतायाः एव दौर्लभ्या-

पत्तेः। उपस्थापक एवानुबन्धानां निवर्तनीयतया प्रत्ययादित्वप्रत्युक्तायास्तस्याः कदाप्यसम्भवेन योग्यताया दुर्वचत्वाच्चेति दिक्।

नन्वनुबन्धानामनवयवत्वे सामीप्यस्य षष्ठ्यर्थत्वाभावात् 'शित्किति' इत्यादिबहुव्रीहिनिर्देशानुपपत्तिरत आह—

'शित्किति' इत्यादौ समीपे अवयवत्वारोपेण समासो बोध्यः। 'वृञ्छण्कठ' (४.२.८०) इत्यादौ णित्वप्रयुक्तं कार्यं पूर्वस्यैवेत्यादि तु व्याख्यानतो निर्णेयम्।

'शित्किति' इत्यादि। 'अवयवत्वारोपेण' इति। समीपवर्त्तित्वावयवत्वारोपे तन्निरूपितावयवित्वमन्यपदार्थे सुलभमिति भावः। ननु तथाविधस्यावयवावयविभावस्य गौणतया षष्ठ्यर्थत्वायोगात्कथं बहुव्रीहेरुपपत्तिः। न च मुख्यसम्बन्धिवाचिकायाः षष्ठ्या एवंविधेषु सम्बन्धेषु लक्षणेति वाच्यम्। 'चतुर्थ्यर्थे बहुलं छन्दसि' (२.३.६८) इति सूत्रबलात् 'षष्ठ्यर्थे चतुर्थी वक्तव्या' (वा. १४२) इति वार्तिकबलाच्च सुब्विभक्तौ लक्षणाया अयुक्तत्वादिति चेत्? मैवम्। 'सुत्रस्यैव व्याकरणत्वे 'व्याकरणस्य सूत्रम्' इत्यादौ व्यपदेशिवद्भावेन षष्ठीसमर्थेनपरपस्पशास्थभाष्यप्रामाण्याद्गौणमुख्यन्यायस्य पदकार्यविषयत्वाच्च गौणमुख्यसाधारणतया सम्बन्धमात्रस्य षष्ठ्यर्थत्वमित्यदोषात्। अत एव 'राहोः शिरः', 'ब्रह्मण आनन्दः' इत्यादौ षष्ठ्युपपत्तिः। 'ग्रामकूपः', 'गङ्गातीरम्' इत्यादौ समासोपपत्तिश्चेति दिक्।

नन्वेवमपि 'वृञ्छण्कठ' (४.२.८०) इत्यत्र णकारानुबन्धस्य छप्रत्ययकप्रत्ययोभयनिरूपितसामीप्यवत्त्वाद्विनिगमनाविरहेणोभयनिरूपित—स्याप्यवयवत्वस्य तत्रारोपयितुं शक्यतया कप्रत्यये 'ऋष्यक' इत्यादौ, तथा 'नन्दिग्रहि' (३.१.१३४) इति विहितल्युप्रत्यये 'तपन' इत्यादौ च णित्वप्रयुक्ता वृद्धिः स्यादत आह 'वृञ्छण्' इत्यादि। 'व्याख्यानतः' इति। दञ्चक्षकारेण तव्यत्तव्ययोरुभयोर्विधानेन च यादृशानुबन्धघटितं पदं पदद्वयाघटितं तदुबोध्य एव तादृशानुबन्धप्रयुक्तं कार्यमित्याश्रीयते। अयमनुबन्धः—पूर्वपदघटित एव, न तु परपदघटित इत्यत्र चावयवत्ववा-

दिनामयमनुबन्धः 'पूर्वावयव एव न परावयव' इत्यत्र यदुत्तरं तदेवेति न ततः कश्चिद्विशेषः ।

ननु समीपे अवयवत्वारोपेऽपि 'हलन्त्यम्' (१.३.३) इत्यादावयवत्वेन मुख्यावयवोपस्थापकान्त्यपदोपादानात् आरोपितावयवत्ववदुपस्थितिर्न स्यात् तीरे गङ्गात्वारोपेऽपि गङ्गापदस्य तत्र लक्षणावृत्तिमन्तरेण तदनुपस्थितेः । अत आह—

'हलन्त्यम्' (१.३.३) इत्यत्र 'अन्त्य' शब्दः परसमीपबोधकः ।

'हलन्त्यमित्यत्र' इति । 'परसमीपबोधकः' इति । लक्षणयेति शेषः । एवं च गङ्गात्वेन तीरवदवयवत्वेन समीपवर्तिनो बोध इति भावः । इदमुपलक्षणम्—'आदिर्ञिटुडवः' (१.३.५) इत्यत्रादिशब्दः पूर्वसमीपबोधक इत्यपि बोध्यम् ।

ननु 'हलन्त्यम्' (१.३.३) इत्यत्रोपदेशपदानुवृत्तेराद्योच्चारणविषयसमुदायान्त्यस्येत्यमित्यर्थलाभादनुबन्धानामाद्योच्चारणस्य निर्विवादतया तथाविधसमुदायान्त्यत्वमक्षतमेवेति लक्षणाया अनुपयोगः । नन्वेवं 'व्यवसितान्त्यग्रहणं कर्त्तव्यम्' (?) इति वार्त्तिकानुरोधाद्धातुत्वादिरूपोपाध्यवच्छिन्न आद्योच्चारणविषयो यः समुदायस्तदन्त्यस्येत्त्वमित्यर्थस्यावश्यकत्वेन विशिष्टस्य धातुत्वाद्यभावेन लक्षणाया आवश्यकत्वात् न निरुक्तदोषावकाश इति वाच्यम् । तस्यामवस्थायां सानुबन्धकेषु धातुत्वादेः क्रियावाचकत्वादिनिबन्धनस्य निर्वक्तुमशक्यत्वेन धातुत्वादियोग्यघटितसमुदायान्त्यस्येत्यर्थस्यावश्यकतया तादृशान्त्यत्वस्यानुबन्धेष्वनवयवत्ववादेऽपि सुवचत्वेन लक्षणायाः फलाभावादिति चेत् ? न; अज्ञातस्वस्वरूपकोपस्थापकत्वेनाचार्यतात्पर्यविषयत्वमेवाद्योबारणविषयत्वम् । वर्तिकमपि तत्प्रपञ्चभूतमेव, लाघवात् । अत एव 'भवतष्ठक्छसौ' इत्यादावित्वसिद्धिः ।

एवं च तथाविधसमुदायान्त्यत्वस्यानवयवत्वादीनामनुबन्धेषु दुर्लभतया लक्षणां विना निर्वाहाभावात् । यत्तु अनुबन्धत्वस्येत्संज्ञाघटितत्वेन

संज्ञाप्रवृत्तेः पूर्वमनुबन्धत्वप्रयुक्तावयवत्वाभावस्य वक्तुमशक्यत्वाल्लुक्षणाश्रयणं चिन्त्यमित्याहुः; तदसत्; 'हलन्त्यम्' (१.३.३) इत्यादिशास्त्रवाक्यार्थज्ञानपूर्वकमित्संज्ञाप्रवृत्त्युत्तरमेवास्मादादीनामनवयवत्वज्ञानेऽपि पाणिनेरुच्चारणकाल एव तत्सत्वात्। अन्यथा उपस्थापकावयवत्वतात्पर्येणैव तेषामुच्चारणे वक्तृतात्पर्यस्यैवार्थबोधनियामकतया 'स्वं रूपम्' (१.१.६८) इत्येतच्छास्त्रबलादुपस्थाप्यावयवत्वमपि दुर्वारं स्यात्। 'तस्य लोपः' (१.३.९) इत्यनेनानवयवत्वेन वा तेषामुपस्थाप्ये निवृत्तिरित्युक्तौ त्वनवयवत्ववाद एव दूरापास्तः।

तस्माबोद्धृभिरनुमास्यमानेनानवयवत्वेनैव पूर्वं प्राणिनेरुच्चारणमिति युक्तमतो लक्षणैव तेषामित्त्वप्रवृत्तौ शरणमिति सुष्ठु।

अनवयवत्वादेव 'उपदेशेऽजनुनासिक' (१.३.२) इति सूत्रस्थमुपदेशेग्रहणं सार्थकम्। तद्धि 'अभ्रञ्आंअटित' इत्यत्र 'आङोऽनुनासिकश्छन्दसि' (६.१.१२६) इति विधीयमानस्योदेशभूतस्यानुनासिकस्येत्संज्ञामादायाटघातोः 'आर्दितश्च' (७.२.१६) इति इट्प्रतिषेधाभावाय। अवयवत्वे तु अटघातोराकारानवयवकत्वात्प्रतिषेधाप्राप्त्या तद्वैयर्थ्यम्।

'अनवयवत्वे च आदितः' इत्यस्येत्संज्ञकाकारसमीपवर्त्तिनो धातोरित्यर्थात्तत्सार्थक्यं स्फुटमेव। अत एव "उदीचां माङः" (३.४.१९) इति निर्देशोपपत्तिः। अन्यथा ढौकतौ ढौशब्दस्यैवंजन्तत्वेनोपदिश्यमानत्वाभावादित्त्वाप्राप्त्या तदसङ्गतिः। 'गुप्तिज्किद्भ्यः' (३.१.५) इत्यादौ विधेयविषये सशब्दो भवतीत्यादिरर्थः। तत्रोपस्थापके विद्यमानमित्संज्ञकनकारसमीपवर्तित्वमुपस्थाप्योपस्थापकयोरभेदाङ्गीकारादुपस्थाप्ये लभ्यते। भेदपक्षे तु सामर्थ्यात्तदारोपः। 'सन्यतः' (७.४.७९) इत्यादावनुवादे त्विसंज्ञकनकारसमीपवर्त्तिनि सशब्दे इत्यादिरर्थः। उक्तार्थतात्पर्यग्राहक एव तत्र नकारादिप्रयोगः। यद्वा, विध्यनुवादसाधारण्येन तथाविधनकारसामीप्योपलक्षितः सशब्दो भवतीत्येवमेवार्थः। सर्वथा सानुबन्धकाद्विभक्तिः सौत्रत्वादेवेति न दोषाय भवति। 'तस्य लोपः' (१.३.९) इति त्वनवयवत्वसिद्धार्थानुवादः।

यद्वा इत्संज्ञकस्यानवयवत्वादुपस्थाप्ये अदर्शनं लोपवत् प्रसक्तादर्शनवत् यथा तत्र स्थानिवद्भावेन तद्घटितधर्मातिदेशस्तथा प्रकृतेऽपीत्यर्थकमिति न तद्विरोधः। किं च 'ध्वसोरेद्धौ' (६.४.११९) इत्यत्र द्विशकारको निर्देशः। द्वितीयः शकार इत्। शित्त्वाच्च लोपः सर्वादेश इति 'अलोऽन्त्यात्' (१.१.६९) सूत्रे भाष्ये उक्तम्। तच्चानुबन्धानामनवयवत्व एव युज्यते लोपशब्दे विद्यमानस्य इत्संज्ञकशकारसमीपवर्तित्वरूपस्य शित्त्वस्य तदुपस्थाप्ये आरोपेण निर्वाहात्।

अवयवत्वे तु प्रसक्तादर्शनरूपस्य लोपस्यात्र कथमपीत्संज्ञकशकारावयवकत्वाभावात्तदसङ्गतिर्दुर्वारा। यद्यप्यनवयवत्ववादेऽपि वुञ्छणादि (४.२.८०) विहितकप्रत्ययादौ णित्त्वादिप्रयुक्तकार्याभावाय यादृशानुबन्धघटितं पदं पदद्वयावटितमित्यादिनियमाभ्युपगमात्। शित्त्वप्रयुक्तसर्वादेशत्वं लोपस्य दुर्लभमेव। तथापि यत्रैकानुबन्धसामीप्यव्यवधानेकेषु कार्यप्रसङ्गस्तन्मात्रविषयकत्वमेव तादृशनियमस्येत्यभ्युपगमादोषः। अत एव 'उपदेशेऽजनुनासिक्' (१.३.२) इति सूत्रस्थोपदेशेग्रहणसार्थक्यसमर्थनपरभाष्यसङ्गतिः। तस्मात्फलाभावात्प्रमाणदाढर्याभावाच्चानवयवत्वमेव युक्तम्। न त्ववयवत्वमनुबन्धानामित्यनवयवत्ववादिनः।

नन्वनवयवत्वे न्यायसिद्धे तश्चाल्लक्षणादिपरिक्लेशेन प्रमाणानुकूल्येन च तत्समर्थनमुचितम्। तदेव नास्ति। तथा हि – अनुबन्धानामुपस्थापकानवयवत्वे तदुपस्थाप्ये कदाप्यदर्शनं खलु हेतुः। तत्रोपस्थाप्योपस्थापकयोरभेदे तेषामुपस्थापकत्वावस्थायामुपलम्भेन हेतोः स्वरूपासिद्धिः।

यदि तु आरोपितामेदवत्त्वेऽपि स्वतो भिन्नतया भेद एवेत्युच्यते, तर्हि तदुघटकानामपि भिन्नतया जरसाद्युपस्थापकघटकानां तदुपस्थाप्ये कदाप्यनुपलम्भस्य सुवचतया हेतोः साध्याभाववद्वृत्तित्वेन अनैकान्तिकत्वप्रसङ्गः। यदि तूपस्थाप्योपस्थापकयोर्भेदेऽतिसन्निवेशप्रयुक्तसादृश्यमूलको भेदाभाव इत्युच्यते, एवमपि घटादिपदोपस्थाप्ये तदुपस्थापकघटकानां घकारादीनां कदाप्यनुपलम्भेन हेतोर्व्यभिचार एव।

यदि च 'स्वं रूपं' (१.१.६८) इत्येतच्छास्त्रबलादुपस्थाप्यते तत्रा

कदाप्यनुपलम्भो हेतुरिति मन्यते, एवं तर्हि लोकदृष्टान्तविरोध एव दुर्वारो दोषः। लोके हि यो यस्यावयवः स तत्रैवोपलभ्यते, नान्यत्र। न हि वृक्षावयवभूता शाखा वृक्षादन्यत्रोपलभ्यते, अनवयव एव तु तथा उपलभ्यते। एतच्च हेतुविरहितत्वादयुक्तमेवानवयवत्वमनुबन्धानाम्। तदुक्तं 'तस्य लोपः' (१.३.९) इति सूत्रे भाष्ये।

एकान्ता इत्येव न्याय्यम्। कुत एतत्? तत्र हि हेतुर्न्यपदिष्टः। यच्च नाम सहेतुकं तन्न्याय्यमिति। तदेतदभिप्रेत्याह—

५. एकान्ताः।

वस्तुतस्तु एकान्ता इत्येव न्याय्यम्। शास्त्रे तत्रोपलम्भादन्यत्रानुपलम्भाच्च।

'वस्तुतः' इति। 'एकान्ता इत्येव न्याय्यम्' इति। अवयवत्वमेवानुबन्धानां युक्तं सहेतुकत्वादित्यर्थः। कोऽसौ हेतुरित्यत आह – 'शास्त्रे तत्रोपलम्भादन्यत्रानुपलम्भाच्च' इति। विशिष्ट एवायं हेतुः। न तु प्रत्येकमुभौ हेतू। चकारो हेतुत्वस्यैवं द्योतकः। यद्यपि भाष्ये एकान्तस्तत्रोपलब्धेरित्येवोक्तम्, तथापि सावधारणव्याख्यानेन कैयटे स्पष्टमेवायमर्थोऽभिहितः।

एवं च अनुबन्धा उपस्थापकावयवाः। तदवयवत्वप्रकारकोपलम्भविशिष्टान्यावयवत्वप्रकारकोपलम्भाभावादिति तदर्थः। ननूपस्थापकावयवत्वेनोपलम्भ एव हेतुरस्तु किं विशेष्योपादानेन, तथा सति यथाश्रुतमेव भाष्यमपि सङ्गच्छत इति चेत्? न; उपस्थापकावयवत्वस्य सन्दिग्धतया साधनीयत्वेन तद्विषयकोपलम्भस्य संशयात्मनो हेतुत्वायोगात्। विशेष्यांशपूरणे त्वयं पुरुषः, पुरुषत्वप्रकारकोपलम्भविशिष्टपरिस्पन्दवत्त्वप्रकारकोपलम्भादिति वक्तुमेव हेतुत्वमित्यदोषः।

न च पदद्वयाघटितमुपस्थापकघटितं यत्पदं तदवयवत्वेनोपलम्भस्य

हेतुतया 'विवक्षणादेव निर्वाहे व्यर्थ एवायं विशेष्यांश इति वाच्यम्; 'ऊर्यः' (७.१.१३) इत्यादौ यादेशावुपस्थापकावयवत्वाभावेऽपि विसजनीयेऽपि तादृशोपलम्भस्य सुवचतया व्यभिचारप्रसङ्गात्।

न च प्रातिपदिकान्तरार्घटितमुपस्थापकंघटितं यत्प्रातिपदिकं तैदूर्घटेकत्वेनोपलम्भो हेतुरिति न दोष इति वाच्यम्। अनुबन्धानामवयवत्वं विना तद्विशिष्टस्यार्थवत्त्वनिबन्धनस्य प्रातिपदिकत्वस्य दुर्निरूपत्वात्। न च समुदायात्समुत्पन्नेर्निर्वादतया प्रकृत्यन्तराघटितोपस्थापकघटितसुप्प्रत्ययप्रकृतिघटकत्वेनोपलम्भो हेतुरिति न दोष इति वाच्यम्। एवमपि 'अतो लोपः' (६.४.४८), 'आतो लोप इटि च' (६.४.६४) इत्यादौ तपरकरणस्योपस्थापकावयवत्वाभावत्तया प्रसिद्धेस्तत्र हेतोर्व्यभिचारस्य दुर्वारत्वात्। तस्माद्विशेष्यांश अवश्यक एवेत्याहुः। अन्यावयवत्वप्रकारकोपलम्भाभावात्मकस्य विशेष्यांशस्यैव तु न हेतुत्वम्। तस्य वृक्षाद्यनवयवीभूतवृक्षत्वादिसाधारणतया अवयवत्वसाधने हेतुत्वायोगात्।

अथ विशिष्टस्यैव हेतुत्वेऽपि 'गुप्तिज्किद्भ्यः' (३.१.९) इत्यादावुपस्थापकीभूतसनाद्यवयवनकारप्रभृतीनां धनवनादिधूपलम्भेन हेतोः पक्षतावच्छेदकव्यापकत्वाभावात्कथमवयवत्वसिद्धिरिति चेत्? न; तेषां सजातीयवर्णान्तरत्वेऽपि तत्त्वाभावात्। न हि तेषामनुबन्धत्वमस्ति। येन सादृश्यमूलकांशेनाध्यवसायेन वा तत्त्वं स्यात्। न च 'सन्यतः' (७.४.७९) इत्यादावनुबादे तद्भिन्ने तादृशोपस्थापकावयवनकारादीनामवयवत्वेनोपलम्भो दोष एवेति वाच्यम्। अनुकार्यानुकरणयोरभेदाभ्युपगमात्तस्य विधेयोपस्थापकादनतिरिक्तत्वेनादोषात्। एवं च युक्त एवायमनुबन्धानामवयवत्वे हेतुरिति दिक्।

यद्यप्यवयवत्वं समुदायभूतकार्यारम्भकत्वम्—यथा तन्तुकपालादिषु। तथा च शब्दानित्यत्वपक्षे उच्चरितप्रध्वंसिनां वर्णानां सहावस्थानासम्भवेन समुदायस्य दुर्लभत्वात्तेषामवयवत्वं दुर्वचम्। नित्यत्वपक्षेऽपि वर्णानां तत्समुदायभूतानां पदानां चानपायोपजननविकारित्वेन समुदायारम्भकत्वस्य

१: विशेषणादेव ?

वक्तुमशक्यत्वादवयवत्वं दुरुपपादमेव। तथाप्युपस्थापकतावच्छेदकानुपूर्वीघटकत्वमवयवत्वं तदघटकत्वं चानवयवत्वमिति विवक्षितत्वान्न दोष इति बोध्यम्। एवं स्वपक्षे हेतुं प्रदर्श्य विपक्षे लोकदृष्टान्तविरोधेन हेतुराहित्यं प्रकटयति—

अनवयवो हि काकादिरेकजातीयसम्बन्धेन गृहद्वक्षादिषूपलभ्यते। नैवमयम्। एवं हि बहुव्रीहिरपि न्यायत एवोपपन्नः। अन्त्यशब्दे लक्षणा चेन्न।

'अनवयवो हि' इत्यादि। 'एकजातीयसम्बन्धेन' इति। संयोगादिनेत्यर्थः। समवायस्यैकत्वेऽपि संयोगादेस्सम्बन्धिभेदेन भिन्नत्वादेकत्वमनुपन्नमिति 'एकजातीया' इत्युक्तम्। 'नैवमयम्' इति। अनवयवत्वे काकादिवदयमप्यन्योपलभ्येत। अनुपलम्भेन चानुवन्धो भवतां कथमनवयव इति तदर्थः।

ननु सति फले महतापि प्रयत्नेन कश्चन विशेषः कल्पनीयो नान्यथा, निष्फलकल्पनायां अयुक्तत्वात्। तस्मात्प्रकृते फलाभावेन हेतुना तेषामवयवत्वाभाव एव किं न कल्प्यत इत्यत आह—'एवं हि' इति। आरोपेण बहुव्रीहिसमर्थनमनवयवत्ववादे क्लेशः। अवयवत्वे तु स नेति लाघवमेवं फलमिति भावः।

ननूपस्थाप्ये शित्त्वकित्त्वादीनामवयवत्ववादेऽपि दुर्लभतया को विशेष इति चेत्? सत्यम्। अवयवत्ववादिनामुपस्थापके विद्यमानानामित्संज्ञकशकारादिवयर्थवकत्वादिरूपाणामेव शित्त्वकित्त्वादीनां "तस्य लोपः" (१.३.९) इत्यनेनानुबन्धलोपोत्तरमानुमानिकस्थानिवद्भावमाश्रित्य स्थानिवत्सूत्रेणोपस्थाप्ये अतिदेशः।

अनवयवत्वे तूपस्थाप्य एवं तादृशशित्त्वकित्त्वादेर्लाभायावयवत्वारोपः, तस्य च पुनरुपस्थाप्ये आरोप इति क्लेश इति विभाव्यताम्।

ननु एवमप्यत्र पक्षे उपस्थापके उच्चरितानां प्रसक्तादर्शनरूपस्य लोपस्य वक्तुमशक्यतया 'तस्य लोपः' (१.३.९) इत्येतच्छास्त्रसार्थक्या-

न्यथानुपपत्त्या 'स्वं रूपं' (१.१.६८) इत्येतच्छास्त्रबलादुपस्थाप्यतेया सानुबन्धकस्यैव प्रसक्तिः; तत्र चानुबन्धलोपे तन्निमित्तस्यैव लक्ष्ये प्रवृत्तिरित्यिवश्यमभ्युपेयम्। लक्ष्यगते च शित्वकित्त्वादिकं स्थानिवद्भावेनैव द्योरोपणीयम्। स्थानी तूपस्थाप्यस्तत्र चोपदिश्यमानत्वाभावादित्संज्ञाया एवाभावः।

ततश्च लोपोपपत्तये स्वीक्रियमाणेन सादृश्यमूलकेनोपस्थाप्योपस्थापकयोरभेदाध्यवसायेन लब्धस्य उपस्थाप्यगतस्य शित्त्वकित्त्वादेर्लक्ष्यगते स्थानिवत्सूत्रेण (१.१.५६) आरोप इत्यर्थस्य वक्तव्यतया द्विवारमारोपः प्राप्त एवेति तौल्यमनवयवत्ववादिनः। तत्रैकश्शास्त्रीय आरोऽपरोऽशास्त्रीय इति भेदस्तु न किञ्चित्करः।

किञ्च 'चक्षिङः ख्याञ्' (२.४.५४) इत्यादिषु स्थान्यादेशभावेऽप्यसानुबन्धकयोरेव प्राप्तत्वया सानुबन्धकानां क्रियावाचकत्वाभावान्न धातुलोपसूत्र(१.१.४)भाष्यविरोधाच्च तदादेशे लक्ष्यगते तत्सम्पादनाय प्रथमतः क्रियावाचकघटितत्वेन सानुबन्धके स्थानिनि धातुत्वमारोप्यणीयं, तच्च पश्चात्सानुबन्धके तदादेशे स्थानिवद्भावेन, तच्चैकदेशविकृत(प.३७)न्यायेनानुबन्धविनिर्मुक्ते लक्ष्यगते, इत्येवमारोपपरम्परायां महदेव गौरवमिति नास्त्यवयवत्ववादिनामारोपकृतं लाघवमित्यत आह—'अन्त्यशब्दे लक्षणा च न' इति। ईदृशलक्षणानाश्रयणप्रयुक्तं लाघवमवयवत्वाभ्युपगमे फलमिति भावः।

नन्वनवयवत्वस्वीकारे पश्चाल्लक्षणाश्रयणे गौरवसत्त्वेऽपि अवयवत्वानाश्रयणप्रयुक्तमेव लाघवमस्तीति निषादस्थपत्यधिकरणोक्तरीत्या (मी. द. ६.१.१८) फलमुखत्वान्नेदं गौरवं दोषावहम्। किञ्च लोके सति फले गुरुभूतोऽपि स्वीक्रियते, असति तस्मिन् लाघुतरोऽपि त्यज्यते; तस्माल्लाघवमात्रेण विना लक्ष्यसिद्ध्यात्मकं प्रयोजनमवयवत्वस्वीकारो न युक्त इत्यतो विपक्षे लक्ष्यासिद्धिमाह —

किञ्चानवयवत्वे णशकमत्ययादौ णादेरित्त्वानापत्तिः। प्रत्ययादित्वाभावात्। दृन्नचः चकारस्य व्यर्थत्वापत्तेश्च इदं च

'तस्य लोपः' (१.३.९) इत्यत्र भाष्ये स्पष्टम् । तत्र ह्युक्तम्- "एकान्ता अनुबन्धाः" इत्येव न्याय्यमिति दिक् ।

'किञ्च' इति । 'इत्त्वानापत्तिः' इति । एवं च तेषामित्संज्ञासिद्धयर्थमवयवत्वाश्रयणमनुबन्धानामिति भावः । ननु 'हलन्त्यम्' (१.३.३) इत्यत्र अन्त्यशब्दे इव 'चुटू' (१.३.७) इत्यादावादिशब्देऽपि पूर्वसमीपवर्तिनि लक्षणाश्रयणादित्संज्ञा तेषां सुलभैवावयवत्वाभावेऽपीत्यतः प्रमाणविरोधमाह- 'दञ्नंचः' इति । 'व्यर्थत्वापत्तेश्च' इति । अतः प्रामाणिकत्वादवश्याश्रयणीयत्वेनावयवत्वस्य फलपरीक्षायां लक्ष्यसिद्ध्यातमकं प्रयोजनमस्तु वा मा वा लक्षणाश्रयणाभावप्रयुक्तं लाघवं फलं भवत्येव, न हि सर्वेषां लक्ष्यसिद्धिरेव प्रयोजनम् । गुणशास्त्राणां लाघवार्थत्वात् । अतो न युक्तमनवयवत्वमिति भावः ।

ननु यादृशानुबन्धघटितं पदं पदद्वयाघटितमित्यादिनियमज्ञापनेन 'वुञ्छण्' (४.२.८०) इत्यादिविहितकप्रत्ययादौ णित्त्वादिप्रयुक्तकार्यवारणाय दञ्नचः चकारः सार्थक एवेति चेत् ? सत्यम् ; अनवयवत्वे सिद्धे पश्चाद्दोषविशेषनिवारकतया कथञ्चित्सार्थक्यं सम्भवेत् । तत्साधनकालिकतादृशचकारवैयर्थ्यं केन वार्यताम् । किञ्च अनवयवत्वे 'गुप्तिज्किद्भ्यः सन्' (३.१.५) 'सन्यतः' (७.४.७९) इत्यादौ समुदायाद्विभक्तेस्सौत्रत्वमेव शरणम् ।

अथाऽवयवत्वे 'उपदेशेऽजनुनासिक इत्' (१.३.२) इति सूत्रस्थमुपदेशग्रहणं व्यर्थम् । न चानवयवत्वे 'तस्य लोपः' (१.३.९) इति सूत्रस्यैव वैयर्थ्यम् ; अनवयवत्वादेवोपस्थाप्येऽनुबन्धानां निवृत्तिसम्भवादनुबन्धघटितधर्माणां चोपस्थापकगतानामुपस्थाप्ये सामर्थ्यादेवारोपसिद्धेश्च । तस्मादनवयवत्वाश्रयेण सम्पूर्णसूत्रस्याऽज्ञप्यकल्पनामपेक्ष्य अवयवत्वाश्रयणेन सूत्रैकदेशभूतस्योपदेशग्रहणस्य नैरर्थक्यकल्पने लाघवानुगृहीतत्वाद्युक्तमिति वाच्यम् । एवमपि तादृशोपदेशेग्रणस्य 'अभ्रञां अटित' इत्र 'आदितश्च' (७.२.१६) इतीट्प्रतिषेधनिवारकत्वेनावश्यकत्वप्रतिपादनपरभाष्यविरोधस्य दुर्वारत्वादिति चेत् ? मैवम् ; न्यायसहकृतेनानेकान्तत्वस्यायुक्त-

ताप्रतिपादनपर – 'तस्य लोपः' (१.३.९) इति सूत्रस्यभाष्येणोपदेशग्रहणसार्थक्यसमर्थनपरस्य तादृशभाष्यस्यैकदेशयुक्तित्वकल्पनेनादोषात् ।

यच्च द्विशकारकनिर्देशेन लोपस्य शित्त्वोपपादनपर 'अलोऽन्त्यात्' (१.१.६९) सूत्रस्थं भाष्यम्, तदप्येकदेशिन एव । 'हलन्त्यम्' (१.३.३) इति सूत्रस्थभाष्यविरोधादुक्तभाष्यविरोधाच्च । आद्ये समुदायानामुपदेशेनावयवानामप्युपदिश्यमानत्वमित्याशयेन व्यपदेशिवद्भावात्सर्वेषामपि हलामन्त्यत्वेनेत्संज्ञामुद्भाष्य व्यवसितान्त्यग्रहणं कर्तव्यमिति वार्तिककारेणोक्ते भाष्यकारेणान्त्यपदसामर्थ्यद्विवाद्यमर्थस्सिद्ध्यतीति वार्तिकमनावश्यकमित्युक्तम् । तस्य हि सामर्थ्याद्व्यपदेशिवद्भावाश्रयविषयमेव मुख्यमन्त्यत्वमुपदीयत इति खल्वाशयः ।

प्रकृते च व्यपदेशिवद्भावमन्तरेण शकारस्येत्संज्ञैव दुर्लभेति तद्विरोधः स्पष्ट एव । सर्वादेशत्वं तु 'लोपो यि' (६.४.१९८) इति 'अतो लोपः' (६.४.६४) इत्यनुवर्तमाने पुनर्लोपग्रहणादेवेति तत्रैव भाष्ये स्पष्टम् । तदेतत्सकलमभिप्रेत्याह – 'तस्य लोप इति सूत्रे भाष्ये' इति । 'न्याय्यमित्युक्तम्' इति । एतच्छेषः पूर्वमुक्तः । 'दिक्' इति । तदर्थस्तु अवयवत्वविद्वेषिभिरपि 'शित्कित्' इत्यादि बहुव्रीहिनिर्वाहायारोपितमवयवत्वमाश्रयणीयमेव । तस्मात्प्रथममेवावयवत्वाभ्युपगमो युक्तः । तदनभ्युपगमे लक्षणादिपरिक्लेश एव फलं, नान्यत्, 'तस्य लोपः' (१.३.९) इत्येतत्सूत्रविरोधश्च ।

यत्त्वनुबन्धानामवयवत्ववादेऽप्यस्त्येवायं विरोधः, उपस्थापके उच्चारितानां प्रसक्तादर्शनरूपस्य लोपस्य वक्तुमशक्यत्वादुपस्थाप्यस्य लोपदिश्यमानत्वाभावादित्संज्ञाया एवाभावेन तत्र लोपस्य सुतरामनुपपन्नत्वाच्चेति ? तदसत् ; 'स्वं रूपम्' (१.१.६८) इत्येतच्छास्त्रबलादुपस्थाप्यत्वेन सानुबन्धकस्यैव प्रसक्ततया तस्य च सादृश्यमूलकाभेदाध्यवसायेनोपस्थापकादनतिरिक्ततया तदगतानामित्संज्ञायास्सौलभ्याल्लोपप्रवृत्त्या तादृशानुबन्धविनिर्मुक्तस्य लक्ष्यप्रवृत्त्या सूत्रसार्थक्यस्य पूर्वमावेदितत्वात् ।

किञ्च "भिदेर्गुणः" (७.३.८२) इत्यादावेदिशि गुणाद्यभावाय द्वितीयस्य कर्मधारयाश्रयणेन 'यस्मिन्विधिः' (प. ३३) इति परिभाषावशा-

दिर्सञ्ज्ञकशकारादौ प्रत्यये इत्यर्थ आवश्यकः । अनवयवत्ववादे तु तादृशार्थस्य दुर्लभतया 'मिमिदे' इत्यादावनिष्टगुणाद्यापत्तिर्दुर्वारा । एवं 'इदितो नुम् धातोः' (७.१.५८) इत्यत्रेत्संज्ञकेकारान्तस्य नुमित्यर्थस्य दुर्लभतया 'चक्षिङो' नुम् दुर्वारः । तस्मादवयवत्वमेव युक्तमनुबन्धानामित्यवयवत्ववादिनां निष्कर्ष इति दिक् ।

अनुबन्धानामेकान्तत्वे न्यायबलात्स्वीक्रियमाणे प्रकारान्तरेणापरिहार्या ये दोषास्तानुद्धर्तुं भाष्यकृदुपन्यस्ताः परिभाषाः क्रमेणावतारयति—

नन्वेकान्तत्वे अनेकाल्त्वादौशादीनां सर्वादेशत्वसिद्ध्या 'अनेकाल्' (१.१.५५) सूत्रे शिदग्रहणं व्यर्थमत आह—

६. नानुबन्धकृतमनेकाल्त्वम् ।

'ननु' इत्यादि । 'शिदग्रहणं व्यर्थम्' इति । नन्ववयवत्ववादेऽपि सूत्रोपात्तैरौशादिभिः–'स्वं रूपम्' (१.१.६८) इत्येतच्छास्त्रबलादनुबन्धविशिष्टस्य उपस्थापनेऽपि विधेयत्वानुबन्धलोपयोः प्राप्तावन्तरङ्गत्वाल्लोपे तद्विनिर्मुक्तस्यैवादेशत्वेन विधानात्तस्य चानेकाल्त्वाभावेन सर्वादेशत्वाय शिदग्रहणमावश्यकम् । न चानेकाल्कपदबोधस्य सर्वादेशत्वमिति वक्तुं युज्यते, तासस्त्योर्लोपस्य सर्वादेशत्वप्रसङ्गात् ।

न च "ध्वसोरद्धौ" (६.४.११९) इत्यत्र लोपस्य सर्वादेत्वाय शकप्रश्लेषपरभाष्यप्रामाण्यादभावादेशस्यानेकाल्त्वप्रयुक्तसर्वादेशत्वाभावकल्पनया न दोष इति वाच्यम्; तदपेक्षया तत्तद्विपस्थाप्यगतानेकाल्त्वस्यैव सर्वादेशत्वप्रयोजकताकल्पनाया एव लघुत्वात् । तस्मात्कथं शिदग्रहणवैयर्थ्यापादनमिति चेत् ? मैवम् ; विधानात्पूर्वं प्रयोगे तेषामुच्चारणप्रसङ्गाभावेन लोपस्य वक्तुयशक्यतया सति विधाने लक्ष्ये प्रवृत्तिवेलायां लोपेऽप्यादेशानामनेकाल्त्वस्याव्याघातात् ।

किञ्च शब्दबोधीयविधेयतारूप्यविषयतायाः पदार्थोपस्थितिविषयतावच्छेदकावच्छिन्नत्वनियमादत्र शास्त्रे "स्वं रूपं (१.१.६८) इत्येतच्छा-

स्त्रबोधितशक्तिस्मरणेनौशादिभिरनुबन्धवटितानुपूर्व्यवच्छेदेनैव पदार्थोपस्थापनात्तादृशानुपूर्वीविशिष्ट एव विधेयतावच्छिन्नविधेयतायां अनतिरिक्तत्वेन च, ईदृशादेशानामनेकाल्त्वस्य सुस्थतया न शिद्ग्रहणवैयर्थ्यापादानानुपपत्तिरिति वदन्ति। स्यादेतत्; 'अणुदित्' (१.१.६९) सूत्रे भाष्ये "इदम इश्" (५.३.३) इत्यादौ सवर्णग्राहकत्वमापाद्य ज्ञापकादिना समाहितम्। अनुबन्धविशिष्टानामेव विधेयतया बोधविषयतायामिशादीनामणत्वाभावात्तदसाङ्कर्त्यमेव स्यात्। तस्मात् 'तस्य लोपः' (१.३.९) इत्यनेनानुबन्धानां विधेयतया या बोधविषयता तदवच्छेदकीभूतानुपूर्वीघटकत्वाभावो बोध्यत इत्यवश्यमभ्युपेयम्। एवञ्चौशादीनामनेकाल्त्वस्य दुर्लभतया न शिद्ग्रहणवैयर्थ्यापादनसम्भवः।

न चोपस्थापकगतानां शित्वकित्त्वादीनामिव अनेकाल्त्वस्यारोपनिर्वाह इति वाच्यम्। अलिखितत्वेन स्थानिवद्भावस्य विसदृशत्वेन सादृश्यमूलकाभेदाध्यवसायस्य च वक्तुमशक्यत्वात्। न चौशादिषु शवर्णोच्चारणसामर्थ्यादेव अनेकाल्त्वारोपेण सर्वादेशत्वसिद्धिरिति वाच्यम्। 'जसः शी' (७.१.१७) 'जश्शसोः शिः' (७.१.२०) इत्यादेः शवर्णस्य 'विभाषा ङिश्योः' (६.४.१३६) 'शि सर्वनामस्थानम्' (१.१.४२) इत्यादौ विशेषणार्थतया सामर्थ्योपक्षयादनेकाल्त्वारोपस्य दुर्वचतया तथाविधानां सर्वादेशत्वाय शिद्ग्रहणस्यावश्यकत्वादिति चेत्? मैवम्। प्रत्ययसंज्ञामन्तरेणेत्संज्ञाया अप्रवृत्त्या श्यादीनां सर्वादेशत्वात्प्राक् प्रत्ययत्वाभावाच्छवर्णस्येत्संज्ञकत्वाभावेन विधेयघटकतायां प्रतिबन्धकाभावाद्विनैवारोपमनेकाल्त्वस्य सुवचतया शिद्ग्रहणवैयर्थ्यं दुर्वारम्; स्पष्टञ्चेदं भाष्ये इत्याशयात्।

यत्त्वाहुः; शिद्ग्रहणाभावे शवर्णगतेत्संज्ञानुवादात्मकलिङ्गाभावात् 'एचोऽयवायावः' (६.१.७८) इत्यत्र यकारवकारयोरिव औशादीनां शकारस्य लोपमात्रफलाया इत्संज्ञाया अयोगाल्लक्ष्ये श्रवणापत्तिः। तस्मात्तन्निवृत्तिसाधनभूतेत्संज्ञासम्पादकतया शिद्ग्रहणस्य सार्थक्यात्कथं तद्वैयर्थ्यमिति? तच्चिन्त्यम्; अनेकाल्त्वारोपेण सर्वादेशत्वरूपफलसम्पादकतया तदुच्चारणसामर्थ्यस्योपक्षीणत्वेनेत्संज्ञया निवृत्तौ बाधकाभावात्।

कथमन्यथा 'दिव औत्' (७.१.८४) इत्यादौ वर्णान्तिरोच्चारणे सहायसम्पादनेन कृतार्थानां तकारादीनामित्संज्ञया निवृत्तिः स्यात्। कथं वा विशेषणार्थानां जसादिजकारादीनां निवृत्तिः; न हि तेषामित्संज्ञाप्रयुक्तं लोपातिरिक्तं किञ्चित्कार्यमस्तीति न किञ्चिदेतत्।

नन्वेवं 'पूर्वाधरावराणामसि पुरधवश्चैषाम्' (५.३.३९) इति विहितयोरधवोर्धकारवकारयोरप्युक्तरीत्या सर्वादेशत्वसम्पादनेन चारितार्थ्यस्य सुवचतया तयोरपीत्संज्ञानिवृत्तिप्रसङ्ग इति चेत्? न; 'परस्मैपदानाम्' (३.४.८२) इति सूत्रे मध्यमपुरुषबहुवचनादेशविषये भाष्यकारोक्तदिशा तत्राकारान्तरप्रश्लेषेणैव सर्वादेशत्वसिद्धया धकारवकारोच्चारणसामर्थ्यस्यानुपक्षीणतया लोपस्य वक्तुमशक्यत्वात्। एकजातीयवर्णोच्चारणेनाप्यनेकाल्त्वारोपमूलकसर्वादेशत्वसम्पत्तौ विजातीयवर्णद्वयोच्चारणमहिम्नैव तत्रेत्संज्ञालोपयोर्वारणसम्भवाच्च।

न चैवमपि "धातोस्तन्निमित्तस्यैव" (६.१.८०) इत्यत्र यकारादिपदकधात्ववयवस्यैव इत्यर्थे 'गव्यूतिः' इत्यादावेचो यादिप्रत्ययानिमित्तकत्वेन वान्तादेशानापत्त्या तादृशप्रत्ययपरकस्य धातोरवयवस्यैव इत्यर्थे 'गोप्यम्' इत्यादावपूर्वविधित्वापत्त्या च सामानाधिकरण्येनैजन्तस्य धातोरित्यर्थे 'लभ्यम्' इत्यादौ उत्तरीत्या विमतसर्वादेशत्वसम्पादकतया कृतार्थस्यावावोर्वकारस्य लोपो दुर्वार इति वक्तव्यम्।

वान्तशब्देन तयोर्बोधनेऽपि प्रत्यक्षाख्यानात्मकोपदेशाभावेनेत्संज्ञाया अप्रसक्तेः। वान्त इत्यत्र वकारप्रश्लेषेणैव लोपनिवारणसम्भवाच्च। 'द्रव्यं च भव्ये' (५.३.१०४) इत्यादिनिर्देशादेवकारवैयर्थ्याच्च अनुवर्तमानस्यैच्पदस्यावृत्त्या यकारादिप्रत्ययपरको य एजन्तो धातुस्तदवयवस्यैव इत्येवमुभयथा सम्बन्धेन सिद्धान्तेऽपि सर्वादेशताया वारणीयत्वाच्चेति दिक्।

यत्त्वाहुः—लक्ष्यार्थत्वाच्छास्त्राणामेकान्तत्वे 'अर्वणस्त्रसौ' (६.४.१२०) इत्यादेः सर्वादित्वापत्तिरिति लक्ष्यासिद्धेरेवापादनीयतया शिद्ग्रहणवैयर्थ्यापादनं न युक्तमिति। तस्मात् आचार्यवचनैरेवाचार्यतात्पर्यस्योन्नेतया शिद्ग्रहणेनावयवत्वाभावतात्पर्यस्य लाभात्कथमवयवत्वसिद्धिरित्याशयेन तद्वै-

यर्थ्यापादनात्। लक्ष्यासिद्धेरवयवत्वसिद्धयुत्तरभावितया ततः पूर्वमापादयितुमशक्यत्वात् लक्षणैकचक्षुष्काणामस्मदादीनां लक्ष्यविचारस्य लक्षणविचारपूर्वकत्वाच्चेत्यास्ताम्। अनुबन्धस्वातिरिक्तानेकाल्विरहितस्य स्वघटितस्यानेकाल्पदव्यवहार्यत्वं न करोतीति परिभाषार्थः। तेन "चक्षिङः ख्याञ्" (२.४.५४) इत्यादौ न दोषः।

शिदग्रहणमेवैतज्ज्ञापकम्। तेन 'अर्वणस्तृ' (६.४.१२०) इत्यादौ न सर्वादेशत्वम्। 'डाणल्' विषये तु सर्वादेशत्वं विना अनुबन्धत्वस्यैवाभावेन आनुपूर्व्यात्सिद्धम्।

'शिदग्रहणमेवैतज्ज्ञापकम्' इति। नन्विदं ज्ञापकमयुक्तम्। औशादीनां शवर्णोच्चारणवैयर्थ्यमूलकेनानेकाल्त्वारोपेणैव निर्वाहाच्छादीनां सर्वादेशतायाः प्रागित्संज्ञानिमित्तस्यानुबन्धत्वस्याभावेन प्रकृतपरिभाषाविषयत्वानुपपत्तेश्च स्वांशे चारितार्थ्यस्य दुर्निरूपत्वादिति चेत्? सत्यम्। ज्ञापितायां परिभाषायां 'यावता विनाऽनुपपत्तिस्तावत्सर्वं ज्ञाप्यते' इति न्यायेन इत्संज्ञायोग्यस्यैवानुबन्धत्वं शित्त्वमपि तथाविधमित्यर्थोऽपि ज्ञाप्यते। स्पष्टा चेयं रीतिरुद्योते। ततो नायं दोष इति विभाव्यताम्।

अत्र केचित्—भाविनीं प्रत्ययादिसंज्ञामादाय 'पूर्वमेवेत्संज्ञाप्रवृत्तिरित्यर्थो ज्ञापनीयः। अत एव "आदिर्ञिटुडवः" (१.३.५) इत्यादीनामुपपत्तिः। अन्यथा सानुबन्धकस्य क्रियावाचकत्वाद्यभावादनुपपत्तिः स्पष्टैव। तादृशी च प्रत्ययादिसंज्ञा उपदेशेन अतिदेशेन वेत्यन्यदेतत्। एवञ्च इयादीनां शवर्णस्य विधानात्पूर्वमेवानुबन्धत्वेन प्रकृतपरिभाषया सर्वादेशत्वाप्तौ तत्सम्पादनाय शिदग्रहणमावश्यकमेवेत्याहुः।

यत्तु अनुबन्धानामल्त्वव्यवहारो नेति ज्ञापनद्वारा प्रकृतपरिभाषाज्ञापने तात्पर्यान्न स्वांशे चारितार्थ्यानुपपत्तिः; एवञ्च अनुबन्धकार्येषु "अनल्विधौ" (१.१.५६) इति प्रतिषेधो नेत्यप्यनेनैव संगृह्यत इत्यपरमनुकूलम्। स्पष्टञ्चेदं "स्थानिवत्" (१.१.५६) सूत्रे शेखरे इत्याहुः।

अत्रेदं वक्तव्यम्—किमल्त्वव्यवहारो नेत्यस्य अल्त्वनिमित्तककार्यसमर्पकत्वाभाव इत्यर्थो वा ? उत ? अल्वृत्तिर्यो यो धर्मस्तन्निमित्तककार्यसमर्पकत्वाभाव इत्यर्थः। नाद्यः – पचादिगणे 'देवट्' 'चोरट्' इत्येवं पठिताभ्यां देवचोरशब्दाभ्यां सुप्रत्यये लुप्तानुबन्धमाश्रित्य हल्ङ्यादिलोपप्रसङ्गात्।

न च तत्र सूत्रे ङ्याब्ग्रहणेन आतिदेशिकहलन्तत्वमादय तादृशलोपाभावज्ञापनान्नेति दोष इति वाच्यम्। एवमपि 'धूञ्प्रीञादिभ्यो' 'गुरोश्च हलः' (३.३.१०३) इत्यप्रत्ययापत्त्या दोषधौव्यात्। एवं 'प्रदीव्या' इत्यादौ क्त्वाप्रत्ययगतककारमादय वलादिलक्षणस्येडागमस्य दुर्वारत्वाच्च। न द्वितीयः – अच्त्वहल्त्वयोरप्यल्वृत्तित्वाविशेषात् "उपदेशेऽजनुनासिक इत्" (१.३.२) 'हलन्त्यम्' (१.३.३) इत्याभ्यामित्संज्ञाया एव दौर्लभ्याच्च।

न च इत्संज्ञाविशिष्टस्यैवानुबन्धतया संज्ञाप्रवृत्तेः प्रागनुबन्धत्वस्यैवाभावात्तद्विधावुक्तनिषेधाप्रवृत्त्या न दोष इति वाच्यम्। एवमपि "उगदिताम्" (७.१.७०) इत्युक्तनिमित्तकस्य नुम्विधानस्यासङ्गत्यापत्तेः। 'वुञ्छण्कठजिल (४.२.८०) इत्यादिं निर्देशासङ्गतेश्च। पक्षद्वयेऽपि 'मिदेर्गुणः' (७.३.८२) इत्यादावेशि गुणाद्यभावाय शितीत्यस्य कर्मधारयाश्रयणेन 'यस्मिन् विधिः' (प.३३) इति परिभाषाबोध्यस्य तदादिविधेरभीष्टस्य दौर्लभ्यापत्तेश्च। एतेनाल्पदवाच्यत्वं नेति तदर्थ इत्यपि निरस्तम्।

यत्त्वेतत्पक्षसंरक्षणपक्षपातिभिः कैश्चिदुक्तम्–व्यवहारशब्देन अतिदेशतन्निषेधरूप एव विवक्षणीयः। एवं चानुबन्धवृत्त्यल्त्वनिमित्तकस्तद्घटितस्यानेकाल्त्वस्य योऽतिदेशो यश्च तादृशाल्त्वनिमित्तक एव अनल्विधाविति शित्त्वकित्त्वपित्त्वाद्यतिदेशनिषेधस्तयोरुभयोरप्यभाव इति तदर्थ इति।

तदप्ययुक्तम्—'प्रपठ्य' इत्यादौ स्थानिसम्बन्धिककारानुबन्धगतवल्त्वघटितवलादित्वारोपनिमित्तकस्येडागमस्य वारयितुमुपायाभावात्। यदि त्वेतदर्थमतिदेशकोटावल्त्वतद्घट्याप्यान्तरधर्मनिवेशस्तर्ह्यल्त्वव्यापकत्वादिघटितकित्त्वादीनामप्यतिदेशो दुर्लभ एवेति महती दुरवस्था। तस्मात् 'जसः शी' (७.१.१७) इति सूत्रस्थशेखरसूचिता पूर्वोक्तसरणिरेव ज्यायसीति वदन्ति।

परिभाषाफलमाह – 'तेन' इत्यादि । 'अर्वणस्तृ' (६.४.१२०) इति । ननूगित्त्वारोपसम्पादनद्वारेण नुमादिसिद्धयर्थतया ऋकारोच्चारणसामर्थ्यस्योपक्षयादनेकाल्त्वारोपस्य दुर्लभतया विनापि परिभाषामन्त्यादेशत्वं सोत्स्यतीति नेदमस्याः परिभाषायाः प्रयोजनम् ।

न च तृदन्तविषये सर्वादेशत्वेऽपि नुमः सम्भवाद्विनिगमनाविरहेणोगित्त्वानेकाल्त्वयोरुभयोरप्यारोपात्सर्वादेशत्वमापद्यतेत्याशय इति वाच्यम् । उगित्त्वारोपस्य 'उगिदचाम्' (७.१.७०) इत्यादिलिङ्गसिद्धत्वात्तदर्थोच्चारणसामर्थ्यमात्रोपजीवकत्वाभावेन प्रबलतया विनिगमनाविरहस्य वक्तुमशक्यत्वात् । न च 'सस्जुषो रुः' (८.२.६६) इत्येतत्सूत्रविहितस्य रोः सजुषशब्दांशे सर्वादेशत्ववारणमस्याः प्रयोजनमिति वाच्यम् । 'रोः सुपि' (८.३.१६) इत्यादौ इतरव्यावर्तनेन चरितार्थीकारतया सर्वादेशत्वसम्पादकानेकाल्त्वारोपस्य दुर्वचत्वादिति चेत् ? न; 'दिव औत्' (७.१.८४) 'ऊदनोर्देशे' (६.३.९८) 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' (९.४.१३९) इत्यादीनां सर्वादेशत्वाभावस्य तत्प्रयोजनत्वात् ।

तदाह—'आदेः' इति । 'डादिविषये तु' इति । इदं प्राचामनुरोधेन; स्वमते तु 'अनेकाल्' (१.१.५५) सूत्रस्थोद्योताद्युपदर्शितरीत्या सर्वादेशत्वात्प्रागप्यनुबन्धत्वसत्त्वादानुपूर्व्याप्तिसिद्धेरयुक्तत्वात् । तत्र सर्वादेशत्वन्तु डा आ इत्याकारं प्राश्लिष्य प्रश्लेषसामर्थ्याच्चानेकाल्त्वमाश्रित्य निर्वाह्यम् । स्पष्टत्वेदं 'लुटः प्रथमस्य' (२.४.८५) इति सूत्रे भाष्ये । इदमनेकान्तत्ववादिनामप्यावश्यकम् । काणोर्वासरूपन्यायेन पर्यायतावारणाय पूर्वमेवानुबन्धत्वस्य तैरप्यभ्युपगन्तव्यत्वात् । 'परस्मैपदानाम्' (३.४.८२) इति सूत्रे मध्युपुरुषबहुवचनादेशविषये सर्वैषामप्येषैव गतिः ।

यद्वा स्वमतेनैवायमव्याप्तिवारणार्थो डादिविषये त्वित्यादिग्रन्थः । डकारादीनामनुबन्धत्वस्याभावेन विनैव स्थितत्वादनुबन्धत्वादानुपूर्व्यादेव प्रश्लिष्टाकारात् मकारानुपूर्वीवशादेव सर्वादेशत्वं सिद्धमिति तदर्थं इत्याहुः ।

केचित्तु "जश्शसोः शिः" (७.१.२०) इत्यादेः शवर्णस्येव 'दिव औत्' (६.१.८४) इत्यादेस्तकारस्यापि वर्णान्तरोच्चारणे सहायसम्पानेन

चरितार्थतया सर्वादिशत्वसम्पादकानेकाल्त्वारोपनिमित्तत्वायोगात्, विनैव प्रयासमन्त्यादेशत्वसिद्धया निष्फलैवेषा परिभाषा।

शिद्ग्रहणं तु भाविनीं प्रत्ययसंज्ञामादाय पूर्वमेवेत्संज्ञेत्यर्थबोधनद्वारा इयादीनां सर्वादिशत्वबोधनाय। इत्संज्ञायोग्यस्यैवानुबन्धत्वमित्युक्तौ तु व्यर्थमेवैतन्मते शिद्ग्रहणम्। औशीदीनां तूच्चारणार्थतया परिक्लृप्ते तकारमपहाय, शवर्णोच्चारणमहिम्ना भूतपूर्वमनेकाल्त्वमादाय सर्वादिशत्वं सुलभम्।

यदि त्वौशादिष्वपि प्रश्लेषेणैव निर्वाहः। शवर्णस्तूच्चारणार्थ एवेत्युच्यते। तर्हि 'इदम इश' (५.३.३) इत्यत्रेवानेकाल्त्वारोपापेक्षा। 'दिव औत्' (७.१.८४) इत्यादौ तु न प्रश्लेषेण सर्वादिशता। योगविभागवत्त्वात्स्यापीष्टसिद्धिमात्रोपयोगित्वात्। अनेकान्तत्वमते तु 'इदम इश्' (५.३.३) 'जश्शसोः' (७.१.२०) इत्यनयोः सर्वादिशत्वाय शिद्ग्रहणमावश्यकमेव। तस्मात्प्रकृतपरिभाषाज्ञापनपर 'अनेकाल्' (१.१.५५) सूत्रस्थभाष्यकारभिः प्रायस्त्वनिर्वचनीय एव। स्पष्टश्चायमर्थः कौस्तुभे इत्याहुः।

इदानीमवयवत्ववादिनां 'उदीचां माङः' (३.४.१९) इति निर्देशोपपत्तिसमर्थनोपायतया परिभाषामवतारयति–

नन्वेवमपि 'अवदातं मुखम्' इत्यत्र पलोपोत्तरमात्वे कृते 'अदाप्' (१.१.२०) इति घुसंज्ञामप्रतिषेधो न स्यात्। दैपः पकारसत्त्वे अनेजन्तत्वादात्वाप्राप्त्या पलोपोत्तरं पकाराभावेन अस्य दाप्त्वाभावादत आह—

७. नानुबन्धकृतमनेजन्तत्वम्।

'ननु' इत्यादि। 'अवदातम्' इति। अवपूर्वस्य दैपो निष्ठान्तस्य रूपम्। तत्र दारूपत्वात्प्राप्तां घुसंज्ञामादाय 'दो दद्घोः' (७.४.४६) इत्यनेन दघ् इत्यादेशस्य प्रवृत्त्या 'अवदत्तम्' इति स्यात्। इष्यते तु 'अवदातम्' इति। तस्माद् घुसंज्ञाप्रतिषेध आश्रयणीयः। स च द्रव्रूपस्य भवति। शब्दानाञ्च रूपमौपदेशिकं प्रायोगिकं वा गृह्यते। प्रकृते च तयो-

रुभयोरप्यसम्भवान्न प्रतिषेधावकाश इत्याशयेन प्रतिषेध्यरूपासम्भवं क्रमेणोपपादयितुमादौ न्यायप्राप्तां प्रक्रियां प्रदर्शयति – 'पलोपोत्तरमात्वे' इति । यद्यात्वे कृते पलोपः स्यात्तर्हि आनुमानिकेन स्थानिवद्भावेन दाप्त्वं सुलभमेव । पलोपोत्तरमात्वे तु स्थानिभूते दैपि तद्दुपासम्भवाद्दुर्लभं दाप्त्वमिति भावः । स्यादेतत् ; 'आदेच उपदेश' (६.१.४५) इत्यत्र उपदेशशब्दो – विविभक्तिकत्वादादोश्चारणार्थो भावसाधनः; तादृशोच्चारणजन्यस्वरूपाभिव्यक्तिमन्तरेण च कार्यविशेषोदेश्यतायां अयोगात्तत्र सति 'श्रूयमाणस्य' इति योजनीयम् ।

एवञ्च सिद्धसाध्यसमभिव्याहारन्यायेन निमित्तनिमित्तिभावप्रतीत्या यद्यादोश्चारणजन्यश्रावणप्रत्यक्षविषयस्यैजन्तस्त्यात्वमित्यर्थः, तर्हि ढौकतो ढौशब्दस्याप्यात्वप्रसङ्ग इति तादृशोच्चारणजन्यश्रावणप्रत्यक्षविषयतापर्याप्त्यधिकरणीभूतस्यैजन्तस्यात्वेमित्यर्थोऽवश्यमभ्युपेयः । ततश्च पलोपोत्तरमेजन्ते तादृशप्रत्यक्षविषयतापर्याप्त्यधिकरणतारूपोपदिश्यमानतायां अभवात्कथमात्वप्रसक्तिरिति चेत् ? मैवम् ; तादृशोपदिश्यमानतायाः पान्ते विद्यमानायां आनुमानिकस्यानिवद्भावेन पलोपोत्तरमेजन्तेऽपि सुवचत्वात् ।

वस्तुतस्तु कर्मसाधन एवायमुपदेशशब्दः । उपपूर्वो दिशिरादोश्चारणक्रियाजन्यज्ञाने भाक्तः । तच्च ज्ञानं शब्दमेव विवक्ष्यते । विभक्तिविपरिणामादिना सामानाधिकरण्येनैव सम्बन्धः । एवं चादोश्चारणक्रियाजन्यशाब्दबोधविषयतापर्याप्त्यधिकरणस्यैजन्तस्यात्वमित्यर्थः । अनुबन्धनिर्मुक्तस्यैव बोधविषयतया दैवुपदेशप्रयुक्तबोधविषयतायां दैशब्दे निर्विवादत्वात् आत्वप्राप्तिरव्याहतैवेति दिक् ।

'पकारसत्त्वे' इति । ढौकतो ढौशब्दस्येव पकारसमभिव्याहृतस्य दैइत्यस्य कथमप्युपदिश्यमानतायां अभावादिति भावः । एवञ्चौपदेशिकं दाद्रूपत्वं दैपो दुर्लभमित्युक्तम् ।

'पलोपोत्तरम्' इति । अत्रत्यं तत्त्वं प्रागुक्तम् । एतेन प्रायोगिकं तदुदुर्लभमित्युपपादितम् । अस्य दाप्त्वाभावादिति । ननु 'स्थानिवत्' (१.१.५६) सूत्रे भाष्ये 'याडापः' (७.३.११३) इत्यत्राकारप्रश्लेषेऽपि

'अतिखट्वायं' इत्यत्र श्रुतमाकारं स्मृतमनुबन्धं चाश्रित्य याङागम आपादितः। तन्त्रीत्या प्रकृतेऽपि श्रुतं दाशब्दं स्मृतं पकारं चाश्रित्य दाप्त्वं सुलभमेवेति चेत्? सत्यम्; तत्र दीर्घनिष्पन्नो ह्याकारो, नोपस्थाप्यः, ह्रस्वादेशेन विच्छेदात्। अतो नोपस्थाप्यगतस्याप्त्वस्यानुसन्धानसम्भवः। किन्तु स्थानिवद्भावेनाप्त्वं स्वत आकारत्वमिति तद्भाष्याशयो वाच्यः। प्रकृते तु तद्दृष्टान्तसङ्गतिः।

न हि स्थानिनि तत्स्थानिनि वा दाप्त्वमस्ति। येन स्थानिवद्भावात्तद्रूपमनुसन्धीयेतेति विभाव्यताम्। परिभाषायामनुबन्धकृतमिति तृतीयातत्पुरुषः। अनेजन्तत्वमिति षष्ठीतत्पुरुषगर्भोऽव्ययीभावः। तथा चानुबन्धप्रयुक्त एजवृत्तिचरमावयवत्वाभावो नेति परिभाषार्थः। अनया परिभाषया अनुबन्धानामविद्यमानवद्भावबोधनद्वारेण एचि चरमावयवत्वारोपबोधनद्वारेण वा उपदिश्यमानेषु दैवादिषु एजन्तत्वबुद्धिप्रयोजकैजगतचरमावयवत्वप्रतिपत्तिप्रतिबन्धकीभूतेन पकारात्मनुबन्धेन विशेषणाभवप्रयुक्तविशिष्टाभावविधया प्रसक्तस्यैजत्वाभवस्याभावो बोध्यते। एवञ्च दैवादीनामनुकरणेष्वत्वस्य निर्बाधतया टाङसम्पत्तेर्घुसंज्ञाप्रतिषेधो दैपोऽपि सिद्ध्यति।

यत्तु बहुव्रीहिगर्भमव्ययीभावमाश्रित्य 'अनुबन्धप्रयुक्त एचवरमावयवकत्वाभावो नेत्यर्थेन अनुबन्धनामविद्यमानवद्भावो वा अनेजन्ते एजन्तत्वारोपो वा प्रकृतपरिभाषया बोध्यत इत्याहुः? तन्मन्दम्; अनुबन्धानामविद्यमानत्वारोपोऽनेजन्ते एजन्तत्वारोपेऽपि वा न हि रजतत्वप्रयुक्तभ्रमः शुक्तिं न गोचरयतीति न्यायेन वस्तुतः पान्त एवैजन्तत्वबुद्धौ 'अलोऽन्त्य' (१.१.५२) परिभाषया जायमानेनात्वेन पकारनिवृत्तिप्रसङ्गेनाभीष्टरूपानापत्तेरिति दिक्।

ननूक्तरीत्या 'प्रकृतेर्परिभाषया दैवादीनां पकारात्मनुबन्धप्रयुक्तस्यैजन्तत्वाभावस्य वारणेऽपि 'शबादावुपदिश्यमानादन्तत्वरूपादुपदेशत्वाभावस्य तदवस्थतया 'पचतः पचथ' इत्यादौ 'तास्यनुदात्तेन्ङिदुदुपदेशात्' (६.१.१८६) इति लसार्वधातुकानुदात्तत्वं दुरुपपादम्।

न च तत्रोपदिश्यमानत्वमुपदेशजन्यश्रावणप्रत्यक्षविषयत्वमेव। न तु

तादृशविषयतापर्याप्त्यधिकरणत्वमतो नोक्तदोष इति वाच्यम्। 'हतः, हथ' इत्यादौ हन्तेरनुनासिकलोपोत्तरं तादृशोपदिश्यमानादन्तात्परत्वस्य सुवचत्वेनानुदात्तस्वरापत्तेः। न च पर्याप्तिनिवेशेऽपि शबादौ पकाराद्यनुबन्धान्तनिष्ठायास्तादृशोपदेशजन्यश्रावणप्रत्यक्षविषयतापर्याप्त्यधिकरणतारूपोपदिश्यमानताया आनुमानिकस्थानिवद्भावेनानुबन्धलोपोत्तरमतिदेष्टुं शक्यत्वान्न दोष इति वाच्यम्। 'हतः, हथ' इत्यादावप्यनुनासिकलोपोत्तरमुक्तरीत्या तादृशोपदिश्यमानताया अतिदेशस्य तुल्यत्वात्। न च तत्रोपदिश्यमानत्वमुपदेशजन्यशाब्दविषयतापर्याप्त्यधिकरणत्वमिति विवक्ष्यते। शबादावनुबन्धविनिर्मुक्तस्यैव बोधविषयत्वात् 'पचतः पचथ' इत्यादौ स्वरसिद्धिः। 'हतः, हथः' इत्यादौ तु तादृशबोधविषयताया नान्ते एव पर्यवसित्वादन्ते च तदभावान्न दोष इति वाच्यम्। अनुनासिकलोपोत्तरं हशब्दे तादृशोपदिश्यमानतापर्याप्तिरप्यतिदेशेन सुवत्त्वादिति चेत्? अत्राहुः—उद्देश्यतावच्छेदकावाच्छेदेन विधेयान्वयस्यौत्सर्गिकतया तद्बलादुद्देश्यतावच्छेदके विधेयव्यापकतालाभेनादन्तत्वव्याप्यतादृशोपदिश्यमानतावि शिष्टादिति तदर्थः। शबाद्युपदेशबोध्याकारादिनिष्ठायां तादृशोपदिश्यमानतायामदन्तत्वंव्यप्यतायां अक्षतत्वात् 'पचतः, पचथ' इत्यादावभीष्टस्वरसिद्धिः। 'हतः, हथ' इत्यादौ च तादृशोपदिश्यमानताया नान्तादन्तोभयसाधारणत्वेनादन्तत्वव्याप्यतावि रहान्नातिव्याप्तिः।

यद्वा स्वरविधावत्रोपदेशग्रहणसामर्थ्यादनतिदिष्टैव तादृशोपदेशजन्यबोधविषयतापर्याप्तिराश्रीयते। 'हतः, हथ' इत्यादौ हशब्दे चातिदिष्टैव सा पर्याप्तिस्तो न कोऽपि दोष इत्युपाध्यायानुयायिनः।

'उदीचां माङः' इति निर्देशोऽस्या ज्ञापकः। 'आदेचः' (६.१.४५) इत्यत्र उपादिश्यमानस्यैजन्तस्यात्वं विधीयते। रूकारसत्वे एजन्तत्वाभावादप्राप्तेस्तस्याङ्गुतिः।

'माङः' इति निर्देशोऽस्या ज्ञापकः' इति। ननु माङ एवेदं ग्रहणं न तु मेङो विकृतस्य लाक्षणिकस्येति कथं ज्ञापकत्वम्। न च ज्ञापनपरभाष्यप्रामाण्येन माङो व्यतीहारार्थकत्वाभाववोधनात् तद्विशेषणासङ्गत्यप्रसङ्गादेव

मेङो ग्रहणमिति वाच्यम्। मेङो ग्रहणेऽपि तस्य व्यतीहारार्थकत्वाङ्व्यभिचारेण तद्विशेषणासाङ्गत्यस्य तदवस्थत्वादिति चेत्? न; एतद्भाष्यबलादेव मेङोऽर्थान्तरवाचकतांया अप्यनुमानेनादोषात्। अत एव 'तुभ्यं नावमये ब्रूहि दूतोऽसि परिपन्थिनाम्' इत्यादि प्रयोगोपपत्तिः। अपकारो हि तत्रार्थः। तदेतत्सूचयन्नाह – 'आदेचः' इति। 'असङ्गतिः' इति। ङकारसमभिव्याहृतस्यैजन्तस्योपदेशजन्यश्रावणज्ञानविषयतापर्याप्त्यधिकरणतारूपोपदिश्यमानतायां अभावादिति भावः। कर्मसाधनतायामप्युपदेशजन्यबोधविषयता दुर्लभेवोपस्थापकान्तर्गते तत्रेत्याशयः।

ननु तत्र सूत्रे एञिरेजादेरात्ववारणाय 'लिटि धातोः' (६.१.८) इत्यतो धातोरित्यस्यानुवृत्तेरावश्यकतया ज्ञापितायामपि परिभाषायामनुबन्धसमभिव्याहृतस्योपदिश्यमानत्वेऽपि क्रियावाचकत्वनिबन्धनस्यात्र धातुत्वस्याभावादात्वप्राप्तेर्दुर्लभतया चारितार्थ्यं दुर्निरूपमिति शङ्कते—

न चास्यामवस्थायां तस्य धातुत्वाभावात्कथमात्वमिति वाच्यम्। तत्र 'धातोः' (६.१.८) इत्यस्य निवृत्तेरित्यन्यत्र विस्तरः। स्पष्टञ्चेदं 'दाधाघ्व' (१.१.२०) इति सूत्रे भाष्ये।

'न च' इति। 'धातोः इत्यस्य निवृत्तेः' इति। 'अशितिः' (६.१.४९) इत्यस्य प्रसज्यप्रतिषेधपरत्वाभ्युपगमेऽपि शित्परत्वयोग्यतावत्येव तेनात्वप्रवृत्तेः एञिरेजादेः तादृशयोग्यताया अभावात्, ढोकतौ ढौशब्दस्योपदिश्यमानताविरहाच्च आत्वाप्राप्तेर्व्यर्था धातुग्रहणानुवृत्तिरित्याशयः।

ननु भावघञन्ततामाश्रित्य पर्याप्तिनिवेशमन्तरेणोपदेशजन्यश्रावणज्ञानविषयस्यैजन्तस्यात्वमित्येवार्थोऽस्तु। शित्परत्वयोग्यताया अभावादेव ढौकतावात्वाभावः सिद्धः। एवं च ङकारानुबन्धसत्त्वेऽपि 'मेङः' आत्वस्यासुवचतया 'माङः' इति निर्देश उपपद्यते। 'अदाप्' (१.१.२०) इति घुसंज्ञाप्रतिषेधो दैपोऽपि निर्बाधः।

किं ञकर्मसाधनतायामुपदेशजन्यबोधविषयतावच्छेदकाक्रान्तत्वेन सुब-

भमेवानुबन्धसमभिव्याहारेऽप्यात्मनिष्ठत्वं स्वनिर्वाह्यादृष्टयुक्त एवायं ज्ञापनप्रयास इत्यत आह—'स्पष्टबोधम्' इति। ईहृशविभक्तिविषये भावसाधनतायां प्रवौचित्यम्। तत्राप्युपदिश्यमानता पर्याप्तिघटितैव मुख्या औत्सर्गिकी। तदहिता तु गौणी यत्नलभ्या इत्यस्मादेव माष्यादवसीयत इति भावः।

नन्वेवं 'अचस्तास्वत्' (७.२.६१) इत्यत्र उपदेशशब्दस्य भावसाधनतायां प्रवौचित्यादुपदेशजन्यश्रावणविषयतापर्याप्तिः सानुबन्धकेष्वेव विश्रान्तत्वयाऽष्टुत्वादीनामजन्तत्वेन परिग्रहीतुमशक्यत्वादिणिनिषेधानापत्तिः। लिहादीनां च अजन्तत्वेन ग्रहणसम्भवात् 'लिलेहिष' इत्यादाविणिनिषेधानापत्तिः। तथा 'एकाच उपदेशे' (७.२.१०) इत्यनेन 'भेत्ता' इत्यादाविणिनिषेधानापत्तिः। उपदिश्यमानानां 'भिदिर्' इत्यादीनामेकाच्त्वाभावादिति चेत् ? न; 'स्य सिच्' (६.४.६२) सूत्रे हनादिग्रहणेन ईदशेषूपस्थाप्यगतायां अतिदिष्टायां एवोपदिश्यमानतायाः स्वीकारस्य ज्ञापनेनादोषात्।

ऋत एव 'ग्लिकोरोति' 'ग्रन्थिब्ण्योति' इत्यादौ 'शेषे विभाषा' (८.१.४१) इति णत्वविकल्पपर्युदासोऽपि सिद्ध्यति।

न च 'ग्लिणवष्टि' इत्यादौ 'ब्रश्च' (८.२.३६) इति षत्वोत्तमतिदेशेन तादृशोपदिश्यमानतायाः सुवचतया षान्तत्वप्रयुक्तणत्वपर्युदासापत्तिरिति वाच्यम्। उपदेशग्रहणसामर्थ्येन तत्र धातूपदेशविषयषकारादीनामेव णत्वपर्युदाससमर्पकत्वाभ्युपगमेनादोषात्। इत्संज्ञाविधौ तूपस्थापकगताऽनतिदिष्टैव सा गृह्यते, यमोरुकारकरणात्। अत एव ञिधृषादौ न षादेरित्त्वम्। करणसाधन एव तत्रोपदेशशब्दो 'हलन्त्यम्' (१.३.३) इत्यत्र च नैव तस्यानुवृत्तिरित्यन्यत्र विस्तरः। 'दाधाघ्व' (१.१.२०) इति सूत्रे भाष्ये दैर्घो घुत्त्वबाधाय 'द्वाधाघ्वपित्' इति न्यासात्मकमुपायान्तरमुपदर्शितम्। तदा त्विय्मनावश्यकी परिभाषा। 'माङः' इति तु मेङ प्रवानुबन्धलोपकृतात्त्वस्य उच्चारणार्थकेन ङकारेण निर्देशः। स च 'ब्यतीहारः' इत्येतद्विशेषेण लक्ष्यं ङकारानुबन्धविशिष्टस्य 'मेङः' एव ग्रहणमित्यर्थं स्फोरयितुमिति तदाशयमाहुः।

केचित्तु उपदेशो ह्यज्ञातस्वरूपप्रतिपत्तिजनकमुच्चारणम्। तदि-

हाचार्याणां लक्ष्यसमवायतात्पर्येण तदतिरिक्तकार्यसमर्पणतात्पर्येण च भवति। यथा 'डुमञ्च्' (धा.पा.१९६) इत्यादौ धकारानुबन्धविशिष्टसमुदायोच्चारणमित्संज्ञाप्रयुक्तकार्यप्रवृत्तितात्पर्यप्रयोज्यम्। तदन्तर्गतस्य मच् इत्यादेर्धातुसंज्ञाद्वारकलक्ष्यसमवायतात्पर्यप्रयोज्यम्।

ततश्च तात्पर्यभेदादुपदेशो भिद्यते समुदायावयवयोः। तत्रेत्संज्ञाविधौ समुदायोपदेश एव गृह्यते 'अनुदात्तङित' (१.३.१२) इत्यादिशास्त्रारम्भात्। अन्यत्र त्वन्यः। 'उदीचां माङः' (३.४.१९) इति निर्देशोऽप्यत्रैवार्थे ज्ञापकः। प्रकृतपरिभाषाज्ञापकताऽपि भाष्योक्ता तन्निर्देशस्योक्तार्थज्ञापनपूर्विकैव। ककारसमभिव्याहारेऽप्यवयवीभूतैजन्तसमुदायोपदेशमादायात्मप्रख्यया ज्ञापितायां परिभाषायां 'माङ' इति निर्देशोपपत्तिः। ज्ञापनापूर्वं तु द्वयोरप्युपदेशयोरित्संज्ञत्वेऽपि समुदायोपदेशस्य मुख्यतया तस्यैवात्वविधौ परिग्रहसम्भवान्निर्देशासाङ्गत्यस्य स्पष्टत्वेन ज्ञापनोपपत्तिश्च। स्पष्टश्चेदं 'आदेचः' (६.१.४५) इत्यत्र शेखरे। परिभाषायामनेकान्तत्वमिति त्ववयुत्याऽनुवादः।

एवं च 'पचते' इत्यादावदुपदेशात्परत्वेन स्वरोऽपि निर्बाधः। 'स्यसिच्' (६.४.६२) सूत्रे हनादिग्रहणं चात्रैवार्थे प्रमाणयितुं युक्तम्। तदुक्तं 'तास्यनुदात्तेत्' (६.१.१८६) सूत्रे कैयटे। 'उदीचां माङः' इति निर्देशात् ज्ञापकात् अनुबन्धानां कार्येष्वप्रतिबन्धकत्वमनुमीयत इति। एजन्तादीनामुपदिश्यमानत्वेन कार्येषु चिकीर्षितेषु विद्यमानानामनुबन्धानां यथा न प्रतिबन्धकत्वं तथा तद्विनिर्मुक्तस्यैवोपदेशस्यादेच (६.१.४५) इत्यादिषु ग्रहणमनुमीयत इति तदर्थः स्पष्ट एव। ग्रनितञ्चेदम् 'एकाच उपदेशे' (७.२.१०) इत्यत्र भाष्ये इत्यखिलमवदातमिति वदन्ति।

'ददातिदधात्योर्विभाषा' (३.१.१३९) इति शप्रत्ययविकल्पविधानासाङ्गत्यस्य उभयवादिसाधारणतया प्राप्तत्वेऽपि अनवयवत्ववादीनां प्रत्ययत्वादिगोग्यतासादाय शास्त्र एवैतत्संज्ञाप्रवृत्तिरित्यर्थकल्पनेन अनुबन्धविनिर्मुक्तस्यैवोपस्थापकतया णशयोर्वासरूपसूत्रविषयत्वाभावेन विकल्पविधानसङ्गतिः। 'गोदः' इत्यादौ च तेन न्यायेन काणोनं पर्यायता। अवयव-

त्ववादिनान्तु अनुबन्धविशिष्टस्यैवोपस्थापकतया न निरुक्तकल्पनया पूर्वोक्त-विकल्पविधानासाङ्गत्यपरिहारो नापि लक्ष्यसिद्धिः। वासरूपसूत्रे (३.१.९४) हि क्विबादावव्याप्तिवारणाय उपस्थापकगतमेवासारूप्यमाश्रीयते; न तु प्रायोगिकम्। अतो वचनमेवाश्रयणीयमित्याशयेनावतारयति —

नन्वेवमपि 'वासरूप' (३.१.९४) सूत्रेण कविषये अणोऽप्यापत्तिरत आह—

८. नानुबन्धकृतमसारूप्यम्।

'ददातिदधात्योर्विभाषा' (३.१.१३९) इति णवाधकशस्य विकल्पविधायकमस्या ज्ञापकम्। तेन 'गोदः' इत्यादौ णाणिति वासरूपसूत्रे भाष्ये स्पष्टम्।

'ननु वासरूप' इत्यादि। 'वासरूपोऽस्त्रियाम्' (३.१.९४) इति हि परिभाषा। तस्याश्चोत्सर्गप्रत्ययनिरूपितमपवादप्रत्ययगतमसारूप्यं लिङ्गम्। तच्च प्रत्ययज्ञानाधीनम्। न हि विधानात्पूर्वं प्रत्ययत्वं ज्ञातुं शक्यते। विधानोत्तरं विकल्पो नोपपद्यते, 'भुक्तवन्तं प्रति' इतिन्यायविरोधात्। तस्मात् 'वासरूप' (३.१.९४) सूत्रेण कथ विकल्पप्रतिपत्तिरिति चेत्? सत्यम्। 'इको गुणवृद्धी' (१.१.३) इत्यादिवत् पदोपस्थापिकेयं परिभाषा। यत्रासरूपोऽपवादप्रत्ययस्तत्र वेत्युपतिष्ठत इति तदर्थः।

ततश्च 'आतोऽनुपसर्गे कः' (३.२.३) इत्यादावपि नाप्राप्ते आरम्भात् प्रत्ययाधिकार्यत्वाच्च विधानात्पूर्वमपि अपवादप्रत्ययत्वस्य सुज्ञेयतया वाशब्दोपस्थित्या प्रत्ययत्वविशिष्टः को वा भवतीति पदैकवाक्यतया विकल्पविधानं सुलभम्। यद्वा 'वासरूप' (३.१.९४) सूत्रे अधिकारतः प्राप्तं प्रत्ययपदं प्रत्ययत्वयोग्यपरम्, अतो न पदोपस्थित्या पदैकवाक्यताया भङ्गः।

किञ्चासरूपोपवादप्रत्यय उत्सर्गस्य वा बाधक इति दीक्षितोक्तनियमकत्वपक्षेऽपि न क्षतिः। प्रत्ययत्वविशिष्टः को भवतीत्येवं सामान्यतो वाक्यार्थबोधे जाते पश्चात्प्रत्ययत्वज्ञानमादाय प्रवर्तमाना परिभाषा स च वा भवतीति विशेषतो नियमयति; 'अलोऽन्त्यस्य' (१.१.५२) इत्यादिवत्।

भक्तवन्तं प्रतीति न्यायस्तु नात्र शास्त्रे आश्रयितुं शक्यते। लुगादिनां ज्ञातनिवृत्तेरभ्युपगन्तव्यत्वात्। नियमशास्त्राणां वैयर्थ्यापत्तेश्च। तस्मात्कार्यादीनां विकल्पापत्तिर्दुर्वारेति विभावनीयम्। अपवादप्रत्ययस्योत्सर्गनिरूपितमनुबन्धप्रयुक्तमसारूप्यं नेति परिभाषार्थः।

[1]'विकल्पविधानं ज्ञापकम्' इति। ज्ञापितायां तु परिभाषायामित्संज्ञायोग्यस्यैवानुबन्धत्वं प्रत्ययत्वयोग्यघटितसमुदायावयवस्य वा पूर्वेमित्संज्ञेत्यभ्युपगमात्स्वांशे चारितार्थ्यस्य सुवचतया न ज्ञापनानुपपत्तिरित्याशयः।

परिभाषाफलत्वेन लक्ष्यसिद्धिं परिहरति – 'तेन गोदः' इति। स्यादेतत्। प्रकृतपरिभाषायां प्रायोगिकमसारूप्यं न परिग्रहीतुं शक्यम्। अस्याः परिभाषायाः पदोपस्थापकतायां नियामकतायां वा परिभाषासामान्यवाक्यार्थबोधोत्तरमेव लिङ्गज्ञानपूर्वकं विध्येकवाक्यतया आवश्यकत्वेन तथाविधवाक्यार्थकाले स्वीयविधिशास्त्रजन्यवाक्यार्थबोधविषयविधेयघटितप्रयोगपरिज्ञानस्य दुर्लभत्वात्।

'सत्सूद्विष' (३.२.६१) इति विहितस्य सर्वलोपिनः क्विपो ण्वुलादिविषये नित्यबाधकत्वापत्तौ 'ग्रामनायकः' इत्याद्यसिद्धयापत्तेश्च।

न हि तत्रासारूपत्वं सम्भवति। तस्योत्सर्गसम्बन्धिरूपप्रतियोगिकसादृश्यविशिष्टतया नञिवयुक्तन्यायेन (व्या.प.६५) रूपवत्ताव्याप्यत्वनियमात्। नाप्यौपदेशिकमसरूप्यम्। सर्वेषामेवोपदेशे असरूपतया व्यवर्त्यलाभेन विशेषणासाङ्गत्यापत्तेः। तस्मादिह तत्तच्छास्त्रजन्यवाक्यार्थबोधविषययोरेवोत्सर्गापवादयोरसारूप्यं विवक्षणीयम्। तादृशबोधविषयता चानुबन्धविनिर्मुक्तानामेवेति णशकप्रत्ययादीनामसारूप्यस्य दौर्लभ्यादुदूढ्यैवैषा परिभाषेति चेत्? सत्यम्। शब्दानां बाह्यसत्तासमाविष्टं प्रत्यक्षेणोपलभ्यमानमेव रूपं रूपनिर्देशेषूपादीयते। न तु कथंचित् ज्ञातं बौद्धसत्तामात्रोपहितम्। तस्य बाह्यकार्यविधने अनुपयोगात्। तादृशस्वरूपोपलब्धिश्च शब्दानां लौकिके औपदेशिके वा प्रयोगे भवति। तत्राद्ये तदुपलब्धिः सार्वजनीनतया मुख्या। औपदेशिके तु शास्त्रज्ञमात्रविषयतया गौण्यपि मुख्यासम्भवे उपयोक्ष्यते। तदुक्तम् – 'अत्वसन्तस्य' (६.४.१४) इति सूत्रे

१. 'विकल्पविधायकमस्या ज्ञापकम्' इति मूलम्

भाष्ये । सर्वत्रैव सानुबन्धकनिर्देशेषु रूपमाश्रीयते, रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम् । तत्र च सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते । कोऽसावुपदेशो नाम ? इति; तत्र सानुबन्धकेऽप्युपलक्षणं रूपनिर्देशमात्रस्येति स्पष्टमुद्योते । एवञ्च प्रकृतेऽपि तथाविधरूपघटितमेवासारूप्यमाश्रयणीयम् ।

न तु बोधविषयतापन्नबौद्धस्वरूपोपहितम् ; अकल्पत्वात् । किञ्च परिभाषासामान्यवाक्यार्थकाले तथाविधबोधविषयस्याप्यनुपस्थितिरेव प्रायोगिकवत् । असरूपग्रहणसामर्थ्याद्धि बोधविषयस्य रूपस्य निमित्तत्वेन परिग्रह इति चेत्तर्हि मुख्यतया प्रायोगिकस्यैव ग्रहणापत्तौ प्रागुक्तदोषः परिहर्तुमशक्यः । अपि च सामर्थ्यमपि दुर्निरूपम् । 'वाऽस्त्रियाम्' (३.१.९४) इत्येतन्मात्रोक्तौ हि उत्सर्गापवादयोरुभयोरप्येतत्परिभाषावशाद्विकल्पापत्तौ समासतद्धिताभ्यां मुक्तस्य वाक्यस्येव उत्सर्गापवादाभ्यामुभाभ्यां धातुप्रत्ययाभ्यां मुक्तस्य केवलस्यापि धातोः प्रयोगविषयत्वापत्तिः ।

'असरूप' इत्युक्तौ च स्वविषये सर्वत्र यत्प्राप्नोति तन्निरूपितमेवासारूप्यमौचित्यादांश्रीयत इति । अपवादप्रत्ययत्वं तादृशपरिभाषोपस्थितेर्लिङ्गमिति लभ्यते । तस्मात्तदीयसामान्यवाक्यार्थकाले प्रत्यक्षेण गृहीतं तत्तदपवादशास्त्रघटककादिप्रत्ययगतमुत्सर्गनिरूपितमौपदेशिकमेवासारूप्यं 'वाऽसरूप' (३.१.९४) शास्त्रप्रवृत्तौ बीजमिति कादीनामणादिविषये पर्याप्तया दुर्वारैव स्यादतस्तद्वारणायेयं परिभाषाप्यावश्यकीति सन्तोष्टव्यम् ।

तदेतत्सकलमभिप्रेत्य परिभाषां प्रमाणेन भूषयति—'वाऽसरूप' (३.१.९४) सूत्रे भाष्ये' इति । केचित्तु 'वाऽपवाद' इत्येव परिभाषोपस्थापकलिङ्गलाभादसरूपग्रहणमहिम्ना यस्य प्रयोगोपदेशयोरुभयोरप्यसरूपता न तु क्वचिदपि सारूप्यं तद्विषयकमेव 'वाऽसरूप' (३.१.९४) शास्त्रमित्यभ्युपगमादेव कादीनां प्रयोगावच्छेदेनाणादिनिरूपितसारूप्यवत्तया विकल्पापत्तिवारणसम्भवान्निष्फलैवेयं परिभाषा ।

न च 'प्रमणीः' इत्यादौ अपवादप्रत्ययस्य क्विपः सर्वापहारादुपवर्त्तान्त्यस्य ण्वुलादिनिरूपितस्यासरूपत्वस्य प्रयोगावच्छेदेन वक्तुमशक्यतया

'बाऽसरूप' (३.१.९४) न्यायाविषयत्वात् 'ग्रामनायकः' इत्याद्यसिद्धापत्तिरिति वाच्यम्। परिभाषायामुत्सर्गसम्बन्धिरूपप्रतियोगिकसादृश्यविशिष्टरूपाभाववदर्थकताया एवाभ्युपगमेन तादृशाभावात्मकस्यासारूप्यस्य विशेषणाभावप्रयुक्तविशिष्टाभावविधया ल्युप्रत्ययादिष्विव विशेष्याभावप्रयुक्तविशिष्टाभावविधया क्विबादिष्वप्यव्याघातात्।

'असरूप' इति च बहुव्रीहिगर्भस्तत्पुरुषो यदा, तदा तस्य रूपवद्भिन्नपरत्वेन नञिवयुक्तन्यायाा(ब्या.प.६९)त्तदशासरूपत्वस्य रूपवत्ताव्यप्त्यत्वमित्युक्तिः सम्भवः। प्रकृते तु तत्पुरुषगर्भो बहुव्रीहिरिति न कोऽपि दोष इति वदन्ति।

यद्यप्यनुबन्धानामवयवत्वमभ्युपगच्छतां 'नानुबन्धकृतमनेकाल्त्वम्' (प.९) इत्यादिपरिभाषान्निर्कर्षस्य परिकल्पनेनानुबन्धकार्येषु "अनल्विधौ" (१.१.५६) इत्यस्य प्रतिषेधकल्पनेन च गौरवात् क्लेशः। ज्ञापकसिद्धत्वादेतेषां वचनानां कल्पनेनापूर्ववचनकल्पनाप्रयुक्तं गौरवमिति चेत्? तर्हि तत्तज्ज्ञापकवशादेतेषां निष्पादने ज्ञानगौरवं केन वार्यते? न हि वर्णाभिव्यक्तिजनककण्ठताल्वोष्ठपुटव्यापारगौरवमेव दोषावहं, न तु ज्ञानजनकमनोव्यापारगौरवमित्यत्र किञ्चित्प्रमाणमुपलभ्यते, कथमन्यथा लक्षणादिपरिक्लेशोऽपि परेषां दोषाय भवेत्।

अथ सानुबन्धकानामुपस्थापकानां निरनुबन्धकेषु लक्षणाऽभ्युपगम्यते, तत्प्रपञ्चभूतान्येवैतानि वचनानि; 'तस्य लोपः' (१.३.९) इत्यप्यत्रैवार्थे तात्पर्यग्राहकम्, इत्संज्ञकस्य उपस्थापकजन्यबोधविषयतावच्छेदकीभूतानुपूर्वीघटकत्वाभाव इति तदर्थः।

न च सानुबन्धकानामुपस्थापकभूतानां सनादीनां निरनुबन्धकसञ्ज्ञादिबोधकत्वे सानुबन्धकस्वरूपोपस्थापकत्वाभावेनाज्ञातस्वस्वरूपज्ञापकत्वरूपोपदिश्यमानत्वाभावात् इत्संज्ञैव दुर्लभेति वाच्यम्। 'तस्य लोपः' (१.३.९) इत्येतच्छास्त्रबलादुन्नियमानेन तात्पर्येण लक्षणया तेषामनुबन्धविनिर्मुक्तबोधकत्वेऽपि 'स्वं रूपम्' (१.१.६८) इत्येतच्छास्त्रबोधितशक्ति-

स्मरणेन स्वरूपोपस्थितेर्दुर्वारतया स्वेस्वरूपज्ञापकत्वोक्तेः। लक्षणा तु न शक्यार्थोपस्थितेः प्रतिबन्धका। किन्तु तद्विषयकशाब्दबुद्धेरेव।

न हि शक्यार्थोपस्थितिव्यतिरेकेण तात्पर्यानुपपत्त्यादिरूपं लक्षणाबीजं परिस्फुरति। अत एव ङमुट्टकारस्येत्संज्ञासिद्धिः। अन्यथा तस्य 'आदिरन्त्येन' (१.१.७१) इत्येतत्सहकारेण तत्तद्वर्णबोधकत्वेऽपि स्वरूपबोधकत्वाभावेन तद्दौर्लभ्यं स्पष्टमेव। ङानुबन्धकनिष्ठाश्च शित्त्वमित्त्वादयो लक्ष्यार्थभूते निरनुबन्धके सामर्थ्यादारोप्यन्ते। अनन्वयवत्त्ववादिनां त्वौपदेशिकेऽन्वारोप इति विशेषः।

न चैवमनन्वयवत्त्ववादिभिरपीत्थं लक्षणा स्वीकियताम्, नास्त्यारोपकृतो विशेषः नाप्यान्यन्यपदयोर्लक्षणापरिक्लेश इति वाच्यम्। अनन्वयवत्त्ववादावलम्बभूतयोः 'उपदेशेऽजनुनासिक इत्' (१.३.२) 'अलोऽन्त्यात्' (१.१.५) सूत्रस्थयोर्भाष्ययोरसाङ्गत्यप्रसङ्गात्। उपस्थापकानन्वयवत्त्वमेवानुबन्धानामिति तदीयसिद्धान्तव्याघाताच्च। तस्मादस्तेयं लाघवमन्वयवत्त्वादीनामिति चेत्? मैवम्, अन्त्यादिशब्दयोर्द्वयोरेव लक्षणया त्रितयेऽतानन्वयवत्त्वादिनां मतमपेक्ष्य बहुषु प्रदेशेषु लक्षणाश्रयणे लाघवस्यदुर्वचत्वात्। विधेयबोधकेषु सत्यादिषु न विधौ 'परः शब्दार्थः' इति निषेधेन लक्षणाया अनौचित्याच्च।

शित्त्वकित्त्वादीनामिवोपस्थापकगतस्यानेकान्वयस्याप्यारोपसम्भवेन ङकारादयनुबन्धसमभिव्याहृतस्य उपस्थापकगतस्यैवान्त्यभागस्य उपदिश्यमानतया ग्रहीतुमशक्यत्वेन वासरूप (३.१.९४) सूत्रेऽपि उपस्थापकगस्यैवासारूप्यस्यावश्यमुपादेयत्वेन च परिभाषात्रयस्वीकारस्य तदवस्थत्वाच्चेति न किञ्चिदेतत्।

यत्तु 'लाश्रयमनुबन्धकार्यं नादेशानाम्' इति निषेधो 'वक्ष्यमाणा' इत्यादौ ङीब्वारणायाश्रीयते, तच्चोभयवादिसंम्मतमेवेति माऽस्त्ववयवत्त्वेवादिनां तत्प्रयुक्तं गौरवं दोषावहम्। तदतिरिक्तवचनकल्पनाप्रयुक्तगौरवमविक्लेमेव। तथापि अनुबन्धानामविद्यमानवद्भावकल्पनेनान्वयवत्त्ववादिनामभीष्टसिद्धौ विशिष्य पूर्वोक्तवचनानामनङ्गीकारेऽपि निर्वाहः। 'तस्य लोपः'

(१.३.९) इत्यस्यानुबन्धानामविद्यमानवद्भवनमित्येवार्थः। अत एव प्रत्याहारेष्विति ग्रहणाभावाय लोपश्च बलवत्तर इति तृतीयहेतूपन्यासः प्रत्याहाराह्निकान्तस्थो भाष्यकारीयः सङ्गच्छते। अन्यथा तत्राक्षरसमाम्नाये उच्चारितानां प्रसक्तादर्शनरूपस्य लोपस्य बाधितत्वात्तदसङ्गतिः स्पष्टैव।

न चेत्संज्ञायोग्यतारूपानुबन्धत्वमादाय पूर्वमेवानुबन्धानामविद्यमानवद्भावे पञ्चादित्संज्ञैव दुर्लभेति वाच्यम्। उपजीव्यत्वेनेत्संज्ञां प्रत्यविद्यमानवद्भावो नेति सुवचत्वात्। प्रत्ययत्वादियोग्यतामादाय पूर्वमेवेत्संज्ञाभ्युपगमाच्च। न चैवं शित्त्वकित्त्वादिकमप्युपस्थाप्ये आरोपयितुमशक्यम्। उपस्थापकेऽप्यविद्यमानवद्भावेन तेषां धर्माणामभावादिति वाच्यम्। 'अनेकाल्' (१.१.५५) सूत्रस्थशिद्ग्रहणादिरूपज्ञापकसाजात्येनानुबन्धत्वावरुद्धधर्मातिरिक्तधर्मपुरस्कारेणैव तेषामविद्यमानवद्भावस्वीकारेणादोषात्। परन्त्वत्रापि पक्षे 'आदेचः' (६.१.५४) इत्यादौ शितीत्यस्य कर्मधारयाश्रयणेनाभ्युपगन्तव्यस्य 'यस्मिन्विधिः' (प.३३) इत्येतत्परिभाषालभ्यस्य 'तदादि'विधेरनुपपत्तिरापतति। अल्त्वेन तेषामविद्यमानवद्भावेन शितीत्यस्य अल्बोधकसप्तम्यन्तत्वालाभात्। अतस्तदर्थं 'इको झलि' (१.२.९) इत्यत्रैव स्वतन्त्रा तदादिलक्षणा स्वीक्रियत इति न दोषः। अवयवत्वविद्वेषिभिरप्यत्र इत्संज्ञकशकारपरसमीपवर्तिनि लक्षणाऽभ्युपगन्तव्यैवेति नेदमतिरिक्तं गौरवम्। तस्मात् ज्ञापकविशेषावष्टम्भेन अविद्यमानवद्भावेनैव सकलेष्टसिद्धिरिति लाघवसम्भवोऽवयवत्ववादिनाम्। लोकदृष्टान्तसहायश्च। अनवयवत्ववादिनामाश्रन्यशब्दयोरित्संज्ञाविधौ लक्षणा। शित्किदित्यादावनुवादे बहुव्रीहिनिर्वाहायावयवत्वारोप इत्यादिरूपो बहुविधः परिक्लेश इति गौरवम्; लोकदृष्टान्तविरोधश्चेति बोध्यम्।

केचित्तु ग्रामादिसीमान्ते क्षेत्रम्, 'उदकान्ते गतः' इत्यादावनुपपत्तिप्रतिसन्धानमन्तरापि आद्यन्तशब्दयोः पूर्वपरसामीप्यवदर्थप्रत्यायकत्वस्यानुभविकत्वात् 'सर्वादीनि' (१.१.२७) 'हलन्ताच्च' (१.२.१०) इति सूत्रस्थभाष्यस्वरसाच्च तयोस्तत्र शक्तिरित्येव युक्तम्। अत एव 'तस्य लोपः' (१.३.९) इति सूत्रे भाष्येऽपि अनेकान्ते वृत्तिविशेष इत्यादिनाऽनवयवत्ववादे बहुव्रीहिनिर्देशानुपपत्तिरिव लक्षणाप्रयुक्तं गौरवमपि नोपदर्शितम्।

बहुव्रीहिनिर्वाहकावयवत्वारोपश्च अनुबन्धाविद्यमानवद्भावस्थानीय एव । विभक्तेः सौत्रत्वमपि न विशेषतो दोषः । लौकदृष्टान्तविरोधोऽप्यस्ति तन्निवर्तके शास्त्रे दोषः । तदुक्तम्—'स्थानिवत्' (१.१.५६) सूत्रे भाष्ये 'दृष्टान्तस्यापि पुरुषारम्भो निवर्तको भवति' इति । प्रकृते चोपदेशग्रहणादिकमेव तन्निवर्तकः पुरुषारम्भः ।

न च वुल्छणादि विहित (४.२.८०) कप्रत्ययादौ णित्वादिप्रयुक्तकार्यनिवृत्तये यादृशानुबन्धघटितं पदं पदद्वयाघटितं 'तत्प्रयुक्तं कार्यं तत्पदघटकस्यैव' इति प्रागुक्तनियमस्यानवयवत्ववादिभिरभ्युपगन्तव्यतया गौरवमिति वाच्यम् । 'पठिता विद्या' इत्यादौ इडागमगतठित्वप्रयुक्तङीब्वारणाय यदवयवत्वप्रयुक्तो यस्येत्संज्ञा 'तत्प्रयुक्तं कार्यं तस्यैव' इति नियमस्यावयवत्ववादिभिरप्यङ्गीकर्तव्यत्वेन तौल्यात् ।

न च मतुप्युकारसत्त्वे तेन व्यवधानात्पकारस्योपदेशसामीप्याभावेन इत्संज्ञाया अयोगात्, 'मतौ बह्वचः' (६.३.११९) इति निर्देशासङ्गतिरिति वाच्यम् । पकाराच्चारणसामर्थ्येनेत्संज्ञाप्रकरणे सामीप्यस्य व्यवहिताव्यवहितसाधारणस्यैव स्वीकारेणादोषात् । 'एकदेशविकृतन्यायेन' (प. ३७) परेषामिवैतन्मतेऽपि एकानुबन्धविशिष्टस्य पकारसत्त्वेऽप्यनुकरणे क्षत्यभावाच्च । उच्चारणार्थ एव वा निर्देशे उकार इति नायं दोषः ।

न च 'अग्रहीत्' इत्यादौ दीर्घोत्तरं इत्संज्ञकटकारसमीपवर्तित्वोपलक्षितस्येकारत्वस्य अलघुमतया स्थानिवत्त्वस्य दौर्लभ्यात् 'इट ईटि' (८.२.२८) इति लोपानापत्तिः, अवयवत्ववादिनान्तु इट्पदस्य ईट्त्वरूपसमुदायवृत्तिधर्मविशिष्टपरतया तस्यैव स्थानितावच्छेदकत्वान्न क्षतिरिति वाच्यम् । अनवयवत्ववादिनामपि इत्संज्ञकटकारविशिष्टपदबोध्यत्वेनैवेकारबोधकत्वेनादोषात् । तस्मादिह नास्ति लाघवगौरवकृतः कश्चिद्विशेषो नापि लक्ष्यसिद्ध्यसिद्धि प्रयुक्त इति तौल्येनानयोः पक्षयोर्द्वयोरपि लक्ष्यानुसारादत्र शास्त्रे आश्रयणं युक्तम् । 'तस्य लोपः' (१.३.९) इत्यत्र एकान्तत्वपक्षस्य न्याय्यतामुपपादयमानोऽपि तत्र तत्रानेकान्तत्वमपि लक्ष्यव्यवस्थापकत्वेन स्वीकुर्वाणो भगवान् भाष्यकार एवात्रार्थे प्रमाणम् ।

तथा हि 'तास्यनुदात्तेत्' (६.१.१८६) इति सूत्रे भाष्यम्। 'त्रिदृभिश्चोपसंख्यानम्'। त्रिदृभिश्च व्यवहितत्वादनुदात्तेत्वं न प्राप्नोति। 'पचतः', 'पचथः'। इतश्चानेकान्तत्वात्। 'अनेकान्ता अनुबन्धाः' (प.४) इत्येवोक्तम्। न त्वेकान्तत्वे किञ्चिदुक्तम्। तथा 'दादाघ्वदाप्' (१.१.२०) इति सूत्रेऽपि। दापप्रतिषेधे, न दैप्यनेजन्तत्वात्। दाप्रतिषेधे दैपि प्रतिषेधो न प्राप्नोति। 'अवदातं मुखम्'। ननु चत्वेकृते भविष्यति। तद्धयात्वं न प्राप्नोति। आवदातं मुखम्। ननु चात्वे कृते भविष्यति। तद्धयात्वं न प्राप्नोति। किं कारणम्? अनेजन्तत्वात्। सिद्धमनुबन्धस्यानेकान्तत्वात्। 'अनेकान्ता अनुबन्धाः' (प.४) इत्युक्तम्। तदेतत्सुधीभिराकलनीयमित्याहुः।

ननु संख्याग्रहणे बह्वादीनामेव ग्रहणं स्यात्। प्रकरणस्याभिधानियामकत्वसिद्धात् 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः' (व्या.प.६) इति न्यायात्। अस्ति च प्रकृते बह्वादीनां संख्यासंज्ञा कृतेति ज्ञानरूपं प्रकरणम्। न तु लोकप्रसिद्धैकद्व्यादीनामित्यत आह—

'ननु संख्याग्रहणे' इति। प्रस्तुतायामित्संज्ञायां सामान्यतया विद्यमानेन संज्ञात्वेनोपस्थितानां संख्यादिसंज्ञानां प्रदेशेषु विशेषणनिर्णायकत्वानिर्णायकत्वोपपादनादत्रास्याः परिभाषायास्सन्दर्भः। 'बह्वादीनामेव ग्रहणं स्यात्' इति।

ननु शास्त्रसङ्केतितार्थश्च प्रकरणानुसन्धानसापेक्षतया बिल्म्बोपस्थितकः इति झडिति परिस्फूर्तमेकद्व्यादिरूपं लोकप्रसिद्धमेवार्थमुपादाय प्रदेशेषु प्रथमं वाक्यार्थस्य दुर्वारत्वात् पश्चादुपस्थितं शास्त्रसङ्केतितमर्थमाश्रित्य सङ्केतवैयर्थ्यान्यथानुपपत्त्या पुनर्वाक्यार्थे स्वीक्रियमाणे पर्यायेणोभयेषां ग्रहणस्याव्याहतत्वात् कथं बह्वादीनामेवेति नियमोऽत आह—

'प्रकरणस्य' इत्यादि। अभिधानियामकत्वे तात्पर्यनिर्णायकत्वे शाब्दबोधे च तात्पर्यज्ञानं कारणम्, तत्र च 'सैन्धवमानय' इत्यादावनुरोधेन प्रकरणं-

ज्ञानस्य कारणता कल्प्यता, प्रकृते च शास्त्रे सङ्केतकरणरूपं यत्प्रकरणं तद्विषयकं ज्ञानं वह्वादीनां प्रदेशवाक्यार्थबोधविषयतात्पर्यग्रहजनकं, लोकप्रसिद्धानान्तु न तथा, बोधाविषयतायां किञ्चित्तात्पर्यग्राहकं विना वक्ष्यमाणपरिभाषामेतच्छास्त्रीयसङ्केतानान्तु न लोकव्यवहारेण कृतार्थता प्रकृतशास्त्रवैफल्यता तेषामारम्भस्य नैष्फल्यापत्तेः। आम्रेडितादिसंज्ञासु लोकविरुद्धत्वाच्चेति भावः। तदुक्तं संख्यासंज्ञासूत्रे भाष्ये।

अर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो (व्या. प. ६) भवति। अतश्च 'अर्थात्प्रकरणाद्वा'। 'अज्ञ हि भवान् ग्राम्यं पांसुलपादमप्रकरणज्ञ ब्रवीतु गोपालकमानय तुषजकमानय' इति। उभयगतिस्तस्य भवति। 'साधीयो यष्टिहस्तं गमयति'। एवमिहापि प्राप्नोति, जानाति त्वसौ 'वह्वादीनामियं संज्ञा कृता' इति। कृत्रिमं सङ्केताधीनम्। अकृत्रिमं ततोन्यत् ज्ञानरूपं प्रकरणमिति।

यद्यपि ज्ञायमानं प्रकरणं तात्पर्यग्रहनियामकमिति व्यवहारो, न तु ज्ञानमेव प्रकरणमिति, तथापि रूप्यते विषयीक्रियते इति व्युत्पत्त्या रूपशब्देन रूपशब्देन विषयस्येह विवक्षणादुक्तज्ञानगोचरीभूतं प्रकरणमित्यर्थाददोषः।

यद्वा प्रकरणस्यैव तात्पर्यनिर्णयजनकत्वम्; तच्च ज्ञानरूपमेव। लोके 'सैन्धवमानय' इत्यादौ भोजनादिविषयकं ज्ञानं, प्रकृतशास्त्रे तु सङ्केतविषयकं तत्। अत एवं भाष्ये प्रकरणोपपादने जानाति त्वसौ 'वह्वादीनां संख्यासंज्ञा कृतेति' इत्युक्तम्। अतो यथाश्रुतमेव साधु। 'परिभाषायमिह' इत्यनेन संख्यासंज्ञाविषये एवेति भ्रान्तिनिरासायाह—

९. उभयगतिरिह भवति।

इह शास्त्रे। 'संख्याया अतिशदन्तायाः'। (५.१.२२) इति निषेधोऽस्या ज्ञापकः। न हि कृत्रिमा संख्यात्यन्ताशदन्ता वाऽस्ति। तेन 'कर्तरि कर्मव्यतीहारे' (१.३.१४), 'कण्वमेघेभ्यः करणे', 'विप्रतिषिद्धं चानधिकरणे' (२.४.१३) इत्यादौ लौकिक-

क्रियाद्रव्यावगतिः। क्व कृतिमस्यैव क्वाकृत्रिमस्येवेत्यत्र लक्ष्यानुसारि व्याख्यानमेव शरणम्। अत एवाग्रेडितपदेन कृत्रिमस्यैव ग्रहणम्। न तु द्विस्त्रिर्घुष्टमात्रास्य स्पष्टश्चेदं 'संख्या'(६.२.३५)सूत्रे भाष्ये।

'शास्त्रे' इति। क्वचित्कृत्रिमस्यैव, क्वचिदकृत्रिमस्यैव क्वचिदुभयोरित्येवं सर्वथा तयोरुभयोरप्यत्र शास्त्रे बोधो भवतीति परिभाषार्थः। गच्छतिर्बुद्ध्यर्थः भाष्योक्तं ज्ञापकमुपपादयति--'निषेधोऽस्य ज्ञापकः' इति। 'त्यन्ता शदन्ता वाऽस्ति' इति। ननु त्यन्तः कृतिशब्दः कृत्रिमोऽस्तीति कथं तत्पर्युदासो ज्ञापकः स्यात्। न च 'अर्थवद्ग्रहण' (प. १४) परिभाषया कतिशब्दगतस्य ङतेस्तिशब्दस्यानर्थकस्य न ग्रहणमिति वाच्यम्। अर्थवदनर्थकसाधारण्येन यत्र ग्रहणप्रसङ्गस्तत्रैव – 'अर्थवद्ग्रहण' (प. १४) परिभाषायाः प्रवृत्त्यौचित्यात्। अत्राहुः – 'अतिशदन्तायाः' इत्यस्य कृत्रिमसंख्याविशेषणतया सति सम्बन्धे तादृशसंख्यायां अर्थवत्त्वन्तायां असम्भवान्नास्ति 'अर्थवद्ग्रहण'(प. १४)परिभाषायाः प्रवृत्तेः सम्भव इति वक्तुं शक्यम्। ततः पूर्वमेव विशेषणघटकतिशब्दजन्यपदार्थोपस्थितिके ले सार्थकतिशब्दस्याप्युपस्थितौ बाधकाभावेन तया परिभाषया सार्थकतिशब्दस्यैव ग्रहीतुमौचित्येन तद्घटितत्यन्तभेदस्य व्यावर्त्यालाभेन कृत्रिमसंख्याविशेषणत्वानुपपत्त्या ज्ञापकत्वोपपत्तिः। 'अर्थवद्ग्रहण'(प. १४)परिभाषा हि पदार्थोपस्थितेरेव प्रतिबन्धका, न तु बोधनियामिका, लाघवादिति स्पष्टं प्रदीपोद्योतयोः। तदुक्तं भाष्ये 'यश्चापि त्यन्तायाः' इति।

तस्मादुक्तमेव ज्ञापकत्वं त्यन्तपर्युदासस्यापीति परिभाषाफलमाह – 'तेन' इत्यादि। नन्वनया प्रदेशेष्वकृत्रिमस्यापि ग्रहणे तात्पर्यबोधनेऽप्यभीष्टाव्यवस्था दुर्लभेत्यत आह – 'तत्र' इति। 'व्याख्यानमेव' इति। एवञ्चाभीष्टायामुक्तव्यवस्थायां व्याख्यानस्यैव शरणीकर्तव्यत्वात् प्रदेशेष्वकृत्रिमग्रहणेऽपि तदेव शरणमस्तु माऽस्तु परिभाषेति गूढाशयः।

इदमेव युक्तयुक्तमित्याह – 'अत एव' इत्यादि ---

यत्तु संज्ञाशास्त्राणामेतच्छास्त्रे अनेन शब्देन 'एत एव'

इति नियमार्थत्वं कृत्रिमाकृत्रिमन्यायबीजमिति; तन्न। तेषाम-गृहीतशक्तिग्राहकत्वेन विधित्वे सम्भवति नियमत्वायोगात्। 'सर्वे-सर्वार्थवाचकाः' इत्यभ्युपगमोऽपि योगिदृष्ट्या न त्वस्मदृदृष्ट्या। विशिष्य सर्वशब्दार्थज्ञानस्याशक्यत्वात्। सामान्यज्ञानन्तु न बोधोपयोगीत्यन्यत्र निरूपितम्।

'यत्तु' इत्यादि। अयमत्र प्राचीनाभिप्रायः। 'सर्वे सर्वार्थवाचकाः' इति सिद्धान्तात् प्रत्येकं सर्वेषां शब्दानां सर्वेष्वप्यर्थेषु शक्तिः। तात्पर्या-भावेन च लोके तथा व्यवहाराभावः; यथा हर्यादीनां शब्दानामनेकार्थानां तात्पर्यानुरोधेन तत्तदर्थविषयकप्रतीतिजनकत्वं, तद्वत्। शक्तिश्च बोधजन-कतैव, न ततोऽन्या, सा च लाक्षणिकेष्वव्याहतैवेति मास्तु लक्षणारूपं वृत्त्यन्तरम्। शक्यो लक्ष्य इति प्रवादस्तु प्रचुरप्रतीत्यप्रतीतिनिबन्धन एव। तस्मात् संख्यादिशब्दानां ब्रह्मादिपदार्थशक्तेः शास्त्रैकसमधिगम्यत्वा-भावात् तात्पर्यनिर्णायकत्वमेव संज्ञाशास्त्राणां नियमरूपेणेति। विधिनियम-सम्भवे विधिरेव ज्यायानित्याशयेनाह – 'तन्न' इति।

अयं भावः—तत्तद्रूपेण सकलपदार्थज्ञानमस्मदादीनां दुर्वचम्। अन्यथा सर्वषामेव सर्वज्ञत्वापत्तेः; ततश्च 'सर्वे सर्वार्थवाचकाः' इत्याग्रामत्रेण कथं सकलपदार्थगोचरः शक्तिग्रहोऽस्मदादीनां सम्भवेत्। सामान्यरूपेण ज्ञातेष्वेव सकलपदार्थेषु समान्यधर्मप्रकारक एव शक्तिग्रह इति तु न युक्तम्। शक्तिग्रहपदार्थोपस्थितिशाब्दबोधानां सामानाकारकत्वनियमेन उपस्थिति-बोधयोरपि तथाविधत्वौचित्येनाप्रयोजकत्वात्। तस्माद्विशेषरूपेणागृहीतायाः शक्तेर्ज्ञापकत्वाद्विधायकान्येव संज्ञाशास्त्राणीति।

ननु 'सर्वे सर्वार्थवाचकाः' इति प्रवादस्य का गतिरत आह— 'सर्वे सर्वार्थवाचकाः' इति। 'योगिदृष्ट्या' इति। तेषां योगबलेन विशिष्य सकलपदार्थविषयकज्ञानसम्भवादिति भावः। 'न बोधोपयोगी' इति। प्रवृत्ति-निवृत्त्यन्यतरप्रयोजकविशेषबोधोपधायकं न भवति, शक्तिज्ञानशब्दयोरेका-कारकत्वनैयत्यादित्यर्थः।

'अन्यत्र' इति। मञ्जूषायामिदमशेषं विशेषेण परिशीलितम्।

यद्यपि संज्ञाशास्त्रेणामस्मच्छास्त्रे 'एते एव बोद्धव्याः' इति नियमद्वारेण प्रदेशगतबोधनिर्णायकत्वे लाघवं, विधायकत्वेन प्रकरणरूपत्वे तज्ज्ञानस्य तात्पर्यनिश्चायकत्वं, तन्निश्चयस्य प्रदेशबोधप्रयोजकत्वमिति गौरवम्। किञ्च यत्र शास्त्रीयलौकिकोभयविधप्रकरणोपस्थितिः तत्र तात्पर्यसंशयादबोधानापत्तिः। उभाभ्यां तत्पर्यान्यामुभयविषयको बोध इति तु न युक्तम्। सकृदुच्चरितन्यायात्। शास्त्रीयप्रकरणे नाऽस्य सामर्थ्यालौकिकस्य बाध इतीत्यपि न समञ्जसम्; लौकिकानुपस्थितौ सान्नकाशत्वात्।

अपि च सामान्यधर्मप्रकारकादपि शक्तिग्रहात्सति तात्पर्ये विशेषधर्मप्रकारको बोधो भवतु 'वटमानय', 'जलमाहरिष्यामि' इत्यादौ सच्छिद्रेतरघटबोधवत्। मास्तु शक्तिग्रहादीनां समानाकारकत्वनियमः। 'सर्वे सर्वार्थवाचकाः' इति सिद्धान्तस्यापि न सङ्कोचः।

अतो युक्त एव प्राचीनानां पन्थाः; तथापि संज्ञाशास्त्राणामादितो विधायकत्वे यल्लाघवं तत्पुरस्कृतस्य पूर्वोक्तगौरवस्य निषादस्थपत्यधिकरणोक्त(मी. द. ६.१.१३)दिशा दूषणाधायकत्वायोगः। प्रत्युत नियामकतायामेव गौरवम्। प्रदेशविषये प्रकरणद्वयोपस्थितावपि 'ष्णान्ताः षट्' (१.१.२४) इति षट्छब्दस्य षट्संज्ञाकरणवैयर्थ्यान्यथानुपपत्त्या तदीयप्रदेशेषु शास्त्रीयप्रकरणेनैव निर्णयस्याभ्युपेयतया सर्वत्रापि शास्त्रे तयैव रीत्या निर्णयस्यौचित्येन संशयासम्भवः।

शक्तिग्रहादीनां समानाकारकत्वनियमोऽपि वटपदात् पटत्वप्रकारकबोधवारणायावश्यमपेक्षणीयः। तादृशबोधो लक्षणया भवतामपि दुर्वार एवेति चेत्? अस्तु तस्य स्वारसिकत्वं केनेष्यते। प्राचुर्याभाव एव तत्र स्वारसिकत्वविघटको हेतुरिति चेत्? नानार्थकेषु हर्यादिपदेषु जायमानस्य शक्तिग्रहाधीनस्य मर्कटादिविषयबोधस्याप्यस्वारसिकत्वापत्तिः। तस्माद्विशेषधर्मप्रकारकबोधोपायतया तथाविधशक्तिग्रहस्यावश्यकत्वेन सकलपदार्थसाधारणस्य तस्य योगिमात्रगोचरत्वात् तादृशसिद्धान्तोऽपि योगिदृष्टश्चैव प्रयोजनविशेषतात्पर्येण प्रयुक्तात् 'घटमानय' इत्यादिवाक्याद्विशेषबोधो लक्षणाधीन एवेति नव्यानामुद्घोष इत्यलम्। प्रसक्तानुप्रसक्तिरेवात्र सङ्गतिरिति सूचयन्नाह—

परि. ९. उभयगतिरिह भवति,
१०. कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते ।

ननु 'अध्येता, शयिता' इत्यादौ इङ्शीङोर्डित्त्वाद्गुण-निषेधः स्यादत आह—

१०. कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते ।

'स्थाण्डिलाच्छयितरि व्रते' (४.२.१५) इति निर्देशश्चास्या ज्ञापकः । 'ऊर्णुनविषति' इत्यादिसिद्धये कार्यमनुभवन्निति ।

'नन्वध्येता' इति । कारकविभक्तेर्बलवत्त्वेऽपि 'क्षिति गुणः' इत्यादौ 'निषेधप्रवृत्तये तन्निमित्तग्रहणं कर्तव्यम्' इति वार्तिकानुरोधात् क्नोः कित्त्वाच्च निषेधशास्त्रे 'ङ्किति' (१.१.५) इति सतिसप्तमीति भावः । तत्र ज्ञाप्यज्ञापकभावस्य सप्तम्यर्थतया ङ्कित्सत्ताज्ञाप्यो गुणवृद्ध्यभाव इति वाच्यार्थे ज्ञाप्यत्वस्य ज्ञानजन्यज्ञानविषयतारूपत्वेन जनकज्ञानविषयस्य जन्यज्ञानविषयापेक्षया सिद्धताया निर्विवादत्वेन सिद्धसाध्यसमभिव्याहारन्यायात् (मी.द.२.१.२) 'राद्धपराग्रे स्नायात्' इत्यादौ स्नानादीनां राद्धपरागादिनिमित्तत्ववत् गुणवृद्ध्यभावस्य ङ्कित्निमित्तत्वं फलविधया भासत इति वस्तुस्थितिः । 'इङ्शीङोर्डित्वात्' इति । ननु गितः प्रत्ययस्यैव सम्भवेन तत्साहचर्यात् ङ्कितोरपि प्रत्यययोरेव ग्रहणान्नात्र गुणनिषेधप्रसङ्ग इति चेत् ? न; कृत्प्रत्ययत्वेन आर्धधातुकत्वेन वा विनिगमनाविरहेण तद्ग्रहणापत्तौ दोषसद्भावेन 'साहचर्य' (प.८९) परिभाषाया इहानाश्रयणमेव युक्तमित्याशयात् । 'कामयते' इत्यादौ तावताप्यनिर्वाहेण उपायान्तरस्यान्वेषणीयतया तत्परिभाषाप्रवृत्तेरप्रयोजकत्वेनोपेक्षितत्वाच्च ।

यद्यपि कार्यकालपक्षे नात्र दोषः । तत्पक्षे हि पर्युदासन्यायेन ङ्कित्भिन्नयोस्सार्वधातुकार्धधातुकयोरिगन्तात्तस्य गुणो भवतीत्येवं विधिशास्त्रीयो वाक्यार्थः । यदि वा प्रसज्यप्रतिषेधेन 'सार्वधातुकार्धधातुकयोः' (७.३.८४) गुणो भवति ङ्किति न भवतीति वाक्यैकवाक्यतया समुदितः समूहालम्बनात्मको वाक्यार्थः । एवमपि विशिष्टबोधीयविषयतापन्नयोः ङ्कितोः प्रत्यययोरेव ग्रहीतुमौचित्यान्नोक्तदोषावकाशः । तथापि यथोद्देशपक्षमाश्रित्य दोषोपन्यासः ।

अत्र पक्षे लघूपधांशे निषेधप्रवृत्तये क्ङिति सति गुणवृद्धी न भवत इत्यर्थे प्रागुक्तरीत्या स्वीक्रियमाणे दोषप्रसङ्ग इति बोध्यम्। प्रकृतकार्योद्देश्यकार्यानुभवे सति (कार्यमनुभवती) निमित्तत्वेन नाश्रीयत इति परिभाषार्थः।

'निर्देशोऽस्या ज्ञापकः' इति। ननु शीङः ईकारस्य गुणरूपकार्यानुभवसत्त्वेऽपि विशिष्टस्य तदभावात् ज्ञापनोत्तरमपि निर्देशानुपपत्तिरिहाऽसम्भवेन नोक्तज्ञापनसम्भवः। न चानुमानिकस्यान्यादृशभावेन शीत्यस्य शे इत्यादेश इत्यस्त्येव विशिष्टस्य कार्यानुभव 'इति' वाच्यम्। वैवधे विवक्षितत्वलाभाय प्रत्ययविशिष्टेऽपि तादृशस्यान्यादेशभावस्याभ्युपगन्तव्यत्वेन 'ऊर्णुनविषति' इत्यत्रापि सन्विशिष्टस्य कार्यानुभवमुपादाय वृक्षप्रवल्हन्यायेन सनोऽपि कार्यितया द्वित्वनिमित्तत्वायोगेन गुणनिषेधानापत्तेः।

न च यस्योद्देश्यत्वेन गृहीतस्यावयवद्वारा साक्षाद्वा कार्यानुभवस्तस्य (तदवयवस्य च) निमित्तत्वेनाश्रयणमिति परिभाषार्थः।

'ऊर्णुनविषति' इत्यादौ तु प्रतीषिषति, अरार्यते, इत्यादौ तयोर्द्वित्वसिद्धये 'सन्यङोः' (६.१.९) इत्यस्य षष्ठ्यन्ततया स्वावयवद्वारा कार्यानुभवमादाय निमित्तत्वायोगेऽपि सनो निमित्तत्वे प्रतिबन्धकाभावः। एवं शीङः ईकारद्वारा कार्यानुभवात् युक्तमेवेदं ज्ञापकत्वमिति चेत्? न; यस्य साक्षादवयवद्वारा वा कार्यानुभवस्तस्य प्रत्यासत्त्या तादृशतदवयवस्य च निमित्तत्वेन नाश्रयणमित्यर्थस्य विवक्षणादन्यस्य निमित्तत्वमस्त्येवेत्यदोषात्।

वस्तुतस्तु; 'निष्ठा शीङ्' (१.२.१९) इति शीङः परीमृंताया निष्ठाया अकित्त्वविधानात्, शीङो ङित्त्वस्य गुणनिषेधकत्वानौचित्येन नायं निर्देशो ज्ञापकतामर्हति। तस्मात् 'णेरध्ययने वृत्तम्' (७.२.२६) इति निर्देशोऽस्या ज्ञापक इति युक्तम्।

केचित्तु तादृशस्यैकित्त्वविधानस्यैव ज्ञापकतामाहुः। परिभाषाघटकं कार्यमेवानुभवन्निति विशेषणमेव निरुक्तप्रत्यासत्त्याश्रयणे बीजमिति सूचयन्नाह-'ऊर्णुनविषति' इत्यादि। 'तत्प्रवृत्तिर्न स्यात्' इति। यदि च कार्यसंदेशीयत्वमेव कार्यित्वं प्रशंसायां च मत्वर्थीय इत्युच्यते, तदा नेदमतिरिक्तं कार्यि-

मनुभवन्निति। यत्र न्यायत एवमीष्टार्थसिद्धिस्तत्र ज्ञापकानुसरणं व्यर्थमत आह—

अत्र हि 'द्विर्वचनेऽचि' (१.१.५९) इति नुशब्दस्य द्वित्वम्। अन्यथा 'सन्यङोः' (६.१.९) इत्यस्य षष्ठीत्वात्सन्नन्तस्य कार्यित्वेन इसो द्वित्वनिमित्तत्वाभात् तत्प्रवृत्तिर्न स्यात्। वस्तुतः समवायिकारणनिमित्तकारणयोर्भेदस्य सकललोकतन्त्रप्रसिद्धतया तस्य तत्त्वेनाश्रयणाभावेन नैषा ज्ञापकसाध्या। अत एव हिः प्रयुक्तः। स हि तत्त्वेनाश्रयणे हेतोः प्रसिद्धिं द्योतयतीति तत्त्वम्। 'द्विर्वचनेऽचि' (१.१.५९) इत्यत्र भाष्ये ध्वनितैषा।

'वस्तुतः' इति। 'समवायिकारणनिमित्तकारणयोः' इति। तत्र समवायेन यत्कार्यमुत्पादयति तत्समवायिकारणम्। यच्च तदतिरिक्तेन संयोगादिना तन्निमित्तकारणमिति विवेकः।

ननु तत्तत्समुदायभूतघटपटादिरूपकार्यारम्भकाणां कपालादीनां युक्तं समवायिकारणत्वम्। अवयवावयविनोः समवायाभ्युपगमात्। इह च स्यान्यादेशयोर्धर्मशरयोरिव निवर्त्यनिवर्तकभावो न तु समवाय इति कथं शीलादीनां समवायिकारणत्वं, कथञ्च तेन निमित्तकारणताबाधः।

न च शील्यादिरूपमेवेगन्तमङ्गं सुवर्णे कुण्डलमिव गुणविशिष्टं 'शे' इत्यादिरूपमारभतां किं निवर्त्यनिवर्तकभावाभ्युपगमेनेति वाच्यम्। शब्दानित्यत्वप्रसङ्गात्। अनित्यत्वेऽपि वा उच्चार्यतप्रध्वंसिनां वर्णानां युगपत्समवधानासम्भवेन समुदायरूपकार्यारम्भकत्वायोगाच्च।

ततो न युक्तमिदं परिभाषान्यायसिद्धत्वमिति चेत्? सत्यम्। तन्तुकपालादीनामिव गुणोत्तरमिगन्ताङ्गस्य व्यवहारतो निवृत्तिरित्येतावता समवायिकारणसाधर्म्येणारोपितमत्र समवायिकारणत्वं, तेन च तद्विरुद्धस्य निमित्तत्वस्य निवृत्तिरन्यत्र शास्त्रीयातिदेशेषु तथा दर्शनादित्याशयोऽत्र विभावनीयः।

केचित्तु अशास्त्रीयारोपस्य शास्त्रव्यवस्थापकत्वायोगात्तस्य शास्त्रीयत्वसम्पत्तये प्रमाणापेक्षाया जागरूकत्वाल्लाघवेन परिभाषाया इह ज्ञापकसिद्धत्वमेव युक्तमुक्तनिर्देशादेरित्याहुः। भाष्यानुक्तिप्रयुक्तस्याः परिभाषायाः अप्रामाण्यं परिहरति—'भाष्ये ध्वनिता' इति। 'द्विर्वचनेऽचि' (१.१.५९) इत्यत्र हि भाष्ये कार्यातिदेशपक्षे 'चक्रतुः' इत्यादावभ्यासरूपासिद्धिप्रयुक्तं दूषणमभिधाय रूपातिदेशपक्षः सिद्धान्तितः।

यदि चेयं परिभाषा न स्यात्तर्हि कार्यातिदेशे 'अरिरिषति' इत्यत्र रिशब्दस्य द्वित्वेनाभीक्ष्ण्यसिद्धावपि रूपातिदेशे इस एव द्वित्वप्रवृत्तेनेन प्रसक्तमनिष्टं स्वातन्त्र्येण परिहरणीयं स्यात्। तदा शङ्कासमाधानयोरनुपन्यासेन चैनां परिभाषां भाष्यकारः सूचयतीति भावः। न चैतत्परिभाष्यमुपगमे 'जेग्रीयते', 'देध्मीयते' इत्येतद्व्याकृत्तिपुरस्कारेणाज्ग्रहणस्य रूपातिदेशज्ञापकता भाष्यकृदुक्ता विरुध्येत। 'नटभार्यावद्वयञ्जनानि' इति षाष्ठभाष्यसिद्धान्तेन द्वितीयाजवधिकस्य यङवयवयकारपर्यन्तस्य द्वित्वेन भवितव्यमित्यवयवद्वारकं कार्यानुभवमादाय यङो निमित्तत्वायोगेन तदुपपत्तौ व्यावर्त्यालाभेन ज्ञापकत्वासम्भवादिति वाच्यम्।

प्रकृतकार्योद्देश्यतापर्याप्त्यधिकरणस्य यस्य साक्षादवयवद्वारा वा कार्यानुभवस्तस्य तदीयतादृशावयवस्य च निमित्तत्वं नेति परिभाषार्थाङ्गीकारेण प्रकृते यङन्तस्य तदवयवस्य वा कार्यानुभववतो निमित्तत्वासम्भवेऽपि यङो निमित्तत्वे बाधकाभावात्।

न च कृतेऽप्यज्ग्रहणे 'चक्रतुः' इत्यादिसिद्धये तद्भावभावितामात्रेणापि निमित्तताया अभ्युपगन्तव्यतया यङवयवयमकारमाश्रित्य दोषो दुर्वार इति वाच्यम्; द्विरुच्यते यस्मिन्निति व्युत्पत्त्या द्विर्वचनशब्देन प्रत्ययस्यैव ग्रहणादजादिर्द्वित्वनिमित्तभूतप्रत्ययनिमित्तकाजादेशः स्थानिरूपं लभते इत्यर्थाभ्युपगमेनादोषात्। अत एव सुस्यूषति इत्यादि सिद्धिः। अन्यथा तद्भावभावितामात्रेण ऊठोऽपि निमित्तत्वाद्यूपातिदेशे 'सिष्यूषति' इत्यापत्तिः।

केचित्तु तद्भावभवितामात्रेण निमित्तता न द्वित्वांशे किन्त्वजादेशांश

एवेति 'जेघ्रीयते' इत्यादीनामज्ग्रहणव्यावर्त्यता सुलभैवेति सुस्थमेव भाष्यकारोक्तं रूपातिदेशज्ञापकत्वमित्याहुः ।

अत्रेदं बोध्यम्–द्विरुच्यते यस्मिन् परतः स इह द्विर्वचनपदार्थः । ततश्च द्वित्वकार्यिणः परत्र श्रूयमाणं यदजादिप्रत्ययात्मकं द्वित्वनिमित्तं तन्निमित्तकाजादेशस्यैव स्थानिरूपातिदेश इत्यर्थस्य पर्यवसन्नतया 'अरिरिषति' इत्यत्र सनवयवभूतस्येकारस्य द्वित्वकार्यित्वेन ततः परत्र श्रूयमाणस्याजादिप्रत्ययस्याभावादेव रूपातिदेशाप्रवृत्तेर्नेतदस्याः परिभाषायाः प्रयोजनम् । 'जेघ्रीयते' इत्यादेरज्ग्रहणव्यावर्त्यता तु 'स्वरान्तरे व्यञ्जनान्युत्तरस्य' इति प्रातिशाख्यानुसारेणेति स्पष्टमुद्घोते ।

आदेशनिषेधपक्षे तु द्वित्वांशे निमित्तगतपरत्वानपेक्षणेऽपि द्वित्वभूताजादिप्रत्ययनिमित्तकादेशस्य द्वित्वे कर्तव्ये निषेधे इत्युक्ते द्वित्वकर्तृव्यत्वादेशनिषेधयोः सामानाधिकरण्यप्रतीत्या सनवयवस्थेकारस्य द्वित्वकर्तव्यता ऋकारस्य तु गुणनिषेध इति वैयधिकरण्यादेव निषेधाप्रवृत्तेः सिद्धं 'अरिरिषति' इति; व्यर्था परिभाषा भाष्याननुगृहीता च । कारकविभक्तेर्बलवत्त्वात् ङ्किति इति परसप्तम्येवेति सिद्धं 'अध्येता' 'शयिता' इति । 'भिन्नम्' इत्यादौ निषेधप्रवृत्तिस्तु क्नोः किंत्वेनैकव्यञ्जनव्यवधानेऽपि निषेधप्रवृत्त्यभ्यनुज्ञानेन सिद्धा ,तन्निमित्तमहणं कात्यायनश्चोदितं प्रत्यक्षाणेन भगवता भाष्यकारेणायमर्थस्सर्वथैवमेवाभिहित इति सर्वमुपपन्नमित्याहुः ।

घुसंज्ञाशास्त्रघटकनिषेधांशाव्यावृत्तिवारणार्थस्य 'नानुबन्धकृतमनेजन्तत्वम्' (प. ७.) इत्यस्य निरूपणानन्तरं प्रसक्तानुप्रसक्त्या मध्ये परिभाषान्तरनिरूपणेऽपि सिंहावलोकनन्यायेनेदानीं तच्छास्त्रघटकविध्यंशाव्यावृत्तिवारकस्य यदागमाः (प. ११) इत्यस्य निरूपणमुचितमाकाङ्क्षितत्वादिति सूचयन्नाह—

ननु 'प्रणिदापयति' इत्यादौ दारूपस्य विधीयमाना घुसंज्ञा दापेर्न स्यादत आह—

११. यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते।

'दारूपस्य' इत्यादि। 'न स्यात्' इति। अत्रेदं वक्तव्यम्। किमिदं यथोद्देशे? उत कार्यकाले वा? नाद्यः; प्रयोजनविशेषानुद्देशेन तत्पक्षे धातुसंज्ञासमनन्तरमेव प्रवृत्तायां घुसंज्ञायां संप्रति पुगागमे सत्यपि गृहीतघुसंज्ञास्मरणेन उपसर्गनकारस्य तत्समवधानेऽपि णत्वस्य सुवचत्वात्। न द्वितीयः; 'पूर्वं धातुरुपसर्गेण युज्यते' (जै.प.वृ.९४) इति सिद्धान्तात् णिच्पुगागमाभ्यां पूर्वमेवोपसर्गयोगे णत्वविध्येकवाक्यतया घुत्वे णत्वे चेष्टसिद्धेरिति चेत्? न; यथोद्देशे संप्यपि घुसंज्ञायामागमसन्निधाने तस्यानर्थक्येन 'यत्क्रियायुक्ताः प्रादयस्ते प्रत्येव गत्युपसर्गाः' (जै.प.वृ.९९) इति सिद्धान्तात् घुनिरूपितोपसर्गत्वाभावेन णत्वाप्रप्त्या दापो घुत्वमन्तरेण निर्वाहाभावात्।

न चागमसमवधाने विशिष्टस्यैवार्थवत्त्वं केवलस्यानर्थक्यमित्यंशद्वयस्यापि प्रकृतपरिभाषासाध्यत्वेनास्यामवस्थायां पुक्तसमवधानेऽपि केवलस्य दाशब्दस्यार्थवत्त्वे प्रतिबन्धकाभावेन तन्निरूपितोपसर्गसंज्ञा सुलभैवेति वाच्यम्। परिभाषाऽभावेऽपि शब्दानित्यत्ववारणायानागमकानां सागमका आदेशा इत्यस्यावश्यकतयाऽन्यत्र स्थान्यादेशभावविषये 'जराया जरस्' (७.२.१०१) इत्यादौ सकाराद्यवयवविरहितस्यैव प्रकृते पकारविरहितस्य दाशब्दमात्रस्यानर्थकताया गलेपतित्वात्। पारमार्थिकमर्थवत्त्वं पदे वाक्ये वा। तदवयवानान्तु शास्त्रप्रक्रियानिर्वाहाय शास्त्रकृतकल्पिताभ्यामन्वयव्यतिरेकाभ्यां कल्पितमेव तदित्यस्य परमसिद्धान्ततया आगमसन्निधाने विशिष्टस्यैव अर्थविशेषं प्रत्यन्वयव्यतिरेकसम्भवाच्च प्रागुक्तयोर्द्वयोरंशयोः परिभाषैकसाध्यत्वाभावात्। कार्यकालेऽपि 'पूर्वं धातुः साधनेन युज्यते' (सी.वृ.१२८) इत्यस्यैव ग्रन्थकृता सिद्धान्ततया णिजादिप्रवृत्तेः प्रागुपसर्गयोगानौचित्येन तत्प्रवृत्तौ केवलस्य दाशब्दमात्रस्य घुसंज्ञा दुर्लभैवेत्याशयात्।

न च सत्यपि पुगागमे बहिर्भूतणिज्निमित्तकतया बहिरङ्गत्वेनासिद्धत्वादाशब्दबुद्ध्या पान्तेऽपि घुत्वं सुलभमिति वाच्यम्; कार्यकालपक्षे संज्ञानां विधिदेशीयतया णत्वविध्येकवाक्यतापन्नघुसंज्ञायाः षष्ठीं बहिरङ्गपरिभाषां प्रत्यसिद्धतया अन्तरङ्गाभावेन परिभाषाय अप्रवृत्तेः।

प्रागुक्तरीत्या संज्ञानां विधिनिमित्तनिमित्तकतया धुसंज्ञाया अन्तरङ्गत्वाभावाच्च । 'प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम्' इति परिभाषायास्तु धर्मिग्राहकमानानुरोधेन 'स्थापयति' इत्यादौ तिष्ठाद्यादेशवारणाय कुत्वमात्रविषयकतायां आवश्यकतया न तयाऽपि प्रकृते निर्वाह इति दिक् ।

यमुद्दिश्यागमो विहितः सः तद्गुणीभूतः शास्त्रेण तदवयवत्वेन बोधितः, अतस्तद्ग्राहकेण तद्बोधकेन शब्देन गृह्यते, बोध्यत इत्यर्थः । तत्र तद्गुणीभूता इत्यंशो बीजकथनम् । लोकेऽपि देवदत्तस्याङ्काधिक्ये तद्विशिष्टस्यैव देवदत्तग्रहणेन ग्रहणं दृश्यते ।

'यमुद्दिश्यागमः' इति । सम्बन्धसामान्यषष्ठया समासे वैवक्षिकः पाश्चात्यबोधविषयोऽयमर्थः । त तूद्देश्यविधेयभावरूपसम्बन्धाभिधायिन्या तया समासः । तादृशसम्बन्धस्य संसर्गतयैव भानस्यानुभविकतया समासे तदयोगात् । 'नीलो घटः' इत्यादौ षष्ठीवारणाय तस्यागत्या षष्ठ्यर्थत्वाभावच्च । यत्तु समासस्थले उद्देश्यविधेयभाव एव न प्रतीयत इति ? तन्न, 'लोहितोष्णीषाः ऋत्विजः प्रचरन्ति' इत्यादौ प्राप्ताप्राप्तपर्यालोचनायामुष्णीषाद्युद्देश्यकलौहित्यादिविधेयकपाश्चात्यबोधस्याखिलानुभवसिद्धत्वादित्यन्यत्र विस्तरः ।

यद्वा यदुद्देश्यका आगमा यादागमा इति मध्यमपदलोपी समासः । अत्रोद्देश्यता यथाकथंचित्, न त्वतिदिदिक्षितधर्मावच्छेदेन तद्बाध्यधर्मावच्छेदेन वेत्यत्राग्रहः ।

अत एव 'अभ्रंलिहः' इत्यादौ मुम्विशिष्टस्य पदत्वादनुस्वारः सिद्ध्यति । अन्यथा मुम्विधावजन्तस्य पूर्वपदस्यैव गृहीततया पदत्वस्य तत्रानुपादानात् । 'वृषण्वसुः' इत्यादौ समासपूर्वावयवे भत्वदर्शनेन पूर्वं पदत्वस्यैव (पूर्वावयवस्यैव) तद्बाध्यत्वाभावाच्च तदसिद्धिः स्पष्टैव ।

यदि तु अजन्तपूर्वपदत्वमुद्देश्यतावच्छेदकं तच्च पदत्वव्यप्यमेवोत्युच्यते तर्हि 'प्रणिदापयति' इत्यादौ धुत्वसिद्धिरेव प्रयोजनम्, पुग्विधौ ह्रादन्तमुद्देश्यतावच्छेदकं न तु दात्वं नापि दात्वव्याप्यं तदिति बोध्यम् ।

'बोध्यते' इति। आगमरहिते दृष्टानामविशेषेण सर्वेषामेव धर्माणामागमविशिष्टे यथाकार्यमारोप इत्यत्रेतात्पर्यम्। परिभाषायां बहुवचनन्तु संग्राहकवाक्याभिप्रायेण।

ननूक्तव्याख्याने 'यदागमाः' (प.११) इत्येतन्मात्रस्यैव 'आद्यन्तौ टकितौ' (१.१.४६) इत्यादेकवाक्यतया तत्तच्छास्त्रेणावयवत्वेन बोधिता इत्यर्थकत्वसम्पत्त्या 'तद्गुणीभूताः' इत्यनर्थकमत आह—'तत्र' इत्यादि। 'बीजकथनम्' इति। वर्णस्य वर्णान्तरावयवत्वात्सम्भवेऽपि शास्त्रेणावयवत्वारोपः केवले दृष्टानां धर्माणामागमविशिष्टेऽप्यारोपेण लाभाय। अन्यथा निष्फल एवायमवयवत्वारोप इति भावः।

किञ्च नायपूर्वोऽर्थ इत्याह – 'लोकेऽपि' इत्यादि। लोके गड्वादिविशिष्टे तदुत्पत्तिप्राक्कलिकतद्वयवहारवच्छास्त्रेऽपि केवले यो व्यवहारः स आगमविशिष्टेऽपीति नेषा ज्ञापकसाध्या, नापि वाचनिकीत्याशयः। ननु किमर्थमयमुद्देश्यविधेयभावपर्यन्ततानुधावनपरिक्लेश इत्यत्राह—

यमुद्दिश्य विहित इत्युक्तेः 'प्रनिदारयति' इत्यादौ न दारित्यस्य घुत्वम्।

'यमुद्दिश्य' इत्यादि। 'न दारित्यस्य घुत्वम्' इति। अयं भावः—'यत्सम्बन्धिन आगमाः' इति सामान्यतः सम्बन्धनिर्देशे स्वावयवोद्देश्यकोऽपि रेफागमः, पुरम्परया दाशब्दसम्बन्धी भवत्येव करपादादयवयवानामङ्गुल्यादीनां पुरुषावयवत्वव्यवहारलब्धेन सकललोकप्रसिद्धेन 'अवयवावयवः समुदायावयवः' इति न्यायेन दाशब्दावयव इति तदन्ते दात्वव्यवहारो दुर्वारः। उद्देश्यविधेयभावघटितत्वे तु स्वपर्याप्तोद्देश्यताकत्वेन न दाशब्दसम्बन्धी रेफागमो भवतीति न तत्र दात्वव्यवहार इति। न चैवं 'गीः' 'पूः', इत्यादावपि रेफस्य समुदायोद्देश्यकत्वाभावात्तदन्ते धातुत्वालाभेन 'धीः' (८.२.७६) इति दीर्घानापत्तिरिति वाच्यम्। आनुमानिकस्थान्यादेशभावेन रेफान्ते धातुत्वातिदेशेन निर्वाहात्। 'प्रनिदारयति' इत्यादौ तु न तादृशस्थान्यादेशभावमादाय घुत्वापादनसम्भवः। तत्रानुमनिके स्थानिनि 'दृ' इत्यादौ तदनुलब्धेः।

न च 'शेरते' इत्यादौ झादेशस्यातो विधीयमानस्य रुतः सार्वधातुकावयवोद्देश्यकत्वेऽपि विशिष्टोद्देश्यकत्वाभावेन तत्सहिते सार्वधातुकत्वाभावात् 'शीङः सार्वधातुके' (७.४.२१) इति गुणनापत्तिरिति वाच्यम्। तत्र रुडपेक्षया परत्वात्पूर्वमेव गुणप्रवृत्त्या दोषाभावात्। शब्दान्तरात्प्राप्त्या रुटोऽप्यनित्यत्वात्। प्रकृतिप्रत्ययसापेक्षत्वस्योभयसाधारणत्वेनान्तरङ्गबहिरङ्गभावस्य वक्तुमशक्यत्वाच्च।

न च 'एधेत' 'भवेताम्' इत्यादौ तकारोद्देश्यकसुट्घटितस्य सार्वधातुकत्वाभावात् 'लिङः सलोपः' (७.२.७९) इति लोपानापत्तिरिति वाच्यम्। तन्मध्यपतितन्यायेन तदुपपत्तेः।

न च 'प्रजा असृजत' 'देवा अभवन्' इत्यादौ विकरणान्तभक्तेन अडागमने सहितस्य तिङन्तत्वाभावात्तद्घवहितस्य 'तिङ्ङतिङः' (८.१.२८) इति निघातानापत्तिरिति वाच्यम्। 'लाङस्यायामट्' इति भाष्यकारीयसिद्धान्तावलम्बादडागमसहितस्यैव तिङ्प्रकृतित्वेन विशिष्टे तिङन्तत्वाक्षतेः।

न च 'प्रच्छदः' 'परिच्छदः' इत्यादौ ह्रस्वोद्देश्यकतुंविशिष्टस्य पूर्वपदभूतगतित्वाभावात्, तद्घवहितस्य कृदुत्तरपदप्रकृतित्वान्नापत्तिरिति वाच्यम्। शब्दस्वरूपविशेष्याध्याहारेण ह्रस्वान्तस्यैव तुग्विधानेनादोषात्। अत एव 'ग्रामणि च्छत्रम्' इत्यत्र तुक्सिद्धिः। अन्यथा पूर्वोत्तरपदाश्रितस्य 'इको ह्रस्वः' (६.३.६१) इति विहितस्य ह्रस्वस्य बहिरङ्गतया वर्णमात्राश्रये तुक्यसिद्धत्वेन कृन्निमित्तक इव छनिमित्तकोऽपि दुर्लभ एव स्यात्। ह्रस्वान्तस्य तुग्विधाने तूभयोः साम्यादन्तरङ्गपरिभाषाया अप्रवृत्त्या तदुपपत्तिः। नाजानन्तर्यपरिभाषा (प.९१) तु नव्यानां नास्त्येव।

ध्वनिनञ्देदं 'कृन्मेजन्तः' (१.१.३९) इति सूत्रे भाष्ये। तत्र हि सन्निपातपरिभाषा (८९) प्रयोजनखण्डनावसरे ह्रस्वत्वं तुग्विधेरिति वार्तिककारोक्तप्रयोजनस्य 'ग्रामणिकुलम्' इत्युदाहृत्य कृति तुग्विधौ ह्रस्वस्य बहिरङ्गत्वेनान्तरङ्गपरिभाषयां गतार्थत्वान्नेदं प्रयोजनमित्युक्तम्।

एवञ्च लकारनिमित्तकतुग्विषये सन्निपातपरिभाषाप्रयोजनाभावात् तद्विषये सन्निपातपरिभाषा नाश्रयितुं शक्यते 'प्रामणिच्छत्रम्' इत्यादौ तुग्विधेरिष्टत्वात्। बहिरङ्गपरिभाषया (प.९७) तु न तत्र तुग्निवृत्तिः। ह्रस्वान्तस्य तुग्विधानेनान्तरङ्गत्वाभावादिति तद्ग्राह्याशयः प्रतीयते। संप्रदायमर्थः कैयटे। "चच्छौ" 'चच्छतुः' इत्यादौ हलादिः शेष(७.४.६०) स्तु परिभाषानित्यत्वेनैव वारणीय इति न कोऽपि दोषः।

यत्तु 'नयतीति नि कुल्म्, लुनातीति लु कुल्म्' इत्यादौ नपुंसकह्रस्वतुगागमयोः समानाश्रयत्वे बहिरङ्गपरिभाषायाः प्रवृत्त्यभावात्तस्य तुको वारणाय कृति तुग्विधौ प्रत्ययग्रहणपरिभाषामूलकस्य स्वतन्त्रस्य शब्दस्वरूपविशेष्याव्याहारमूलकस्य वा तदन्तविधेरनिष्टत्वेन 'अग्निचित्' 'सोमसुत्' इत्यादौ सुबुत्पत्तावनुपपत्तिरिति ? तदसत्; ह्रस्वमात्रोद्देश्यकत्वेन विधीयमानस्यापि कृन्निमित्तकतुकः प्रकृतिप्रत्ययोभयमध्यगतत्वबुद्धेः प्रकियाज्ञानवतां सुलभतया तन्मध्यपतितन्यायेन तद्विशिष्टस्यैव कृदन्ततया समासे तान्तस्य प्रातिपदिकत्वेनाश्रयणे:। 'ह्रस्वस्य कृति' (६.१.७१) इति सूत्रभाष्यात् क्विब्लोपापेक्षया पूर्वमेव तुक्प्रवृत्तिप्रतीतेश्च। 'षट्त्सन्ति' 'पशूनुत्सृजति' इत्यादौ च घुटस्त्वैपादिकासिद्धत्वेन तिङ्कतिङः' (८.१.२८) इति निर्बाध प्रवेत्स्यतीत्यास्तां तावत्।

अथ 'यो यदवयवः स तद्ग्रहणेन गृह्यते' इत्येव परिभाषार्थो न्याय्यः। करपादादीनामवयवाधिक्येऽपि लोके देवदत्तादिबोधकशब्देष्वेवव्यवहारदर्शनात्। मूलोक्तन्यायग्रहणाने तु समुदायावयवस्यैव 'समुदायग्रहणेन ग्रहणम्' इत्यर्थस्य पर्यवसानाल्लोकदृष्टान्तानुगुणत्वेनास्याः अरिभाषाया अपूर्ववचनत्वापत्तिः, तस्मादयुक्त एवायमुद्देश्यविधेयभावघटितो वाक्यार्थः।

'प्रनिद्वारयति' इत्यादौ घुत्वाभावाय न्यायानित्यत्वमेव शरणीकर्तुमुचितमिति चेत् ? अत्र केचित्; दृष्टान्तस्यापि पुरुषारम्भो निवर्तको, भवतीति 'स्थानिवत्' (१.१.५६) सूत्रभाष्यात् विनाऽपि प्रमाणं लोकसिद्धस्यान्यर्थस्य शास्त्रे आश्रयितुमशक्यत्वेन प्रकृते 'स्वं रूपं' (१.१.६८) इत्येतत्सूत्रात्मकस्य पुरुषारम्भस्य जाग्रूकत्वात्' 'नेटि' (७.२.४) 'णेरनिटि'

(६.४.९१) इत्यादिज्ञापकानुरोधेनैवास्याः परिभाषाया अश्रयणीयतया धर्मि-ग्राहकसाजात्येनोक्तरीत्या तत्तदवयवविशेषविषये 'स्वं रूपं (१.१.६८) इत्येतच्छास्त्रबाधकल्पनयैवोपपत्तौ सामान्येनावयवमात्रविषये तद्बाधकल्प-नायां मानाभावाद्युक्तमेव मूलोक्तमित्याहुः ।

'॰

यदि च 'अवयवावयवः समुदायावयवः' इति न्यायो नात्र शास्त्रे आश्रयितुं युज्यते 'दीधीवेवीटाम्' (१.१.६) इति सूत्रस्थस्येङ्ग्रहणस्य 'भविता' इत्यादौ तन्मध्यपतितन्यायलब्धमङ्गावयवत्वमुपादाय प्राप्तस्य लघूपधगुणस्य परिहाराय सार्थकतया प्रमाणवैकल्यात् ।

'ऊगिदाचाम्' (७.१.७०) इत्यत्र तृगिदन्तमुगिद्रूपं च यदङ्गमिति व्याख्यानादर्वन्तमित्यादावुगिदन्तत्वमादाय नुम्सिद्धया फलाभावाच्च । अत एव टचुञ्चुलोष्टित्वं चटितार्थम् । अन्यथा तुटष्टित्वेनैव समुदायस्यापि तत्प्रयुक्तकार्यनिर्वाहार्तिक तेन ?

एवञ्च 'पठिता विद्या' इत्यादौ ङीपः प्रसङ्ग एव नास्ति । 'स्तनन्धयी' इत्यत्र तु धातोष्टित्वसामर्थ्यादेव समुदायाष्टित्वकार्यमिति मन्यते, तदा व्यर्थ एवायमुद्देश्यविधेयभावपर्यन्तानुधावनपरिक्लेश इति बोध्यम् । केचित्तु यमुद्दिश्य विहित इत्युक्तिः साक्षादवयवद्वारा वा स्वोद्देश्यतया गृहीतः प्रत्यासत्या स्वप्रवृत्तिकाले सन्निहितो यस्तदगतानामेव धर्माणामागमविशिष्टे-ष्वतिदेशो नेतरवृत्तीनामित्यर्थलाभाय ।

ततश्च 'प्रनिदारयति' इत्यादाववयवद्वारेणोद्देश्यतया गृहीतस्यापि दाशब्दस्य रेफानुषङ्गेणैव वृद्धिविधानादागमप्रवृत्तिकाले सन्निहितत्वाभावेन दात्वस्य घुत्वस्य वा अतिदेष्टुमशक्यत्वेन न दोषः ।

एवञ्च 'दधिच्छादयति', 'मधु च्छादयति' इत्यादाविकारोकारात्मकस्य ह्रस्वस्यैव तुग्विधानेऽपि तत्प्रवृत्तिकाले सन्निहिते समुदाये दध्यादिशब्दे विद्यमानपदत्वादेः सागमकेष्वतिदेशान्निधातस्य निर्बाधतया न शब्दस्वरूप-विशेष्याध्याहारमूलकतदन्तविध्याश्रयणपरिक्लेशः । नापि लोकन्यायाद्वैष-म्यम् । 'ग्रामणि च्छत्रम्' इत्यत्र तुगागमो नेष्ट एव । 'कृन्मेजन्तः'

(१.१.३९) इति सूत्रस्थं पूर्वोक्तं भाष्यन्तु न चोदाहरणमादरणीयमिति न्यायादुपलक्षणविधया सर्वथा तुरवारणाभिप्रायकमेव। प्रकृते छनिमित्तक-तुगुपपादनपरः कैयटस्तु चिन्त्य एव। उत्तरीत्या, वर्णमात्राश्रयत्वेन तुकोऽन्तरङ्गत्वानपायात्। अत एव तत्र छनिमित्तकस्यापि तुकोऽनिष्टत्वमेव स्पष्टमुक्तमुद्योते इति वदन्ति।

नन्वेतत्परिभाषाभ्युपगमे 'जहार' इत्यादौ "आत औ णलः" (७.१.३४)., इत्यौकारापत्तिः। तथा 'हसिष्यति' इत्यादौ 'सस्सि' (७.४.४९) इति तादेशापत्तिरत आह –

'आने मुक्' (७.३.८२) इति मुग्विधानसामर्थ्यादेषा अनित्या। अन्यथा 'पचमानः' इत्यादावकारस्य मुक्यनया परिभाषया विशिष्टस्य सवर्णदीर्घे तद्वैयर्थ्यं स्पष्टमेव।

"आने मुक्" इत्यादि। 'सवर्णदीर्घः' इति। ननु मुगागमविशिष्टस्य कण्ठोष्ठस्थानिकत्वेनाकारेण सावर्ण्याभावात्सवर्णदीर्घापादनमनुचितम्। इन च केवलस्य कण्ठयत्वस्यानया परिभाषया विशिष्टे अतिदेशे स्वाश्रयस्य तस्य निवृत्त्या न दोष इति वाच्यम्। औष्ठयत्वकण्ठयत्वयोरोकारादौ समावेशदर्शनेन कण्ठयत्वातिदेशादोष्ठयत्वनिवृत्तिकल्पनानौचित्यादिति चेत्? न; अकारागतमाकारसावर्ण्यनिरूपकत्वमेवातिदिश्यत इत्याशयात्।

न चैवमप्यपवादत्वेन 'आतो ङितः' (७.२.८१) इतीयादेश एवापादयितुं युक्त इति वाच्यम्। इयादेशप्रवृत्त्युत्तरमपि आनुमानिकस्थानिवद्भावेन, मुगागमप्रवृत्तिसम्भवान्मुक इयादेशं प्रति तत्कौण्डिन्न्यायेनापवादतया तैत्तदानीन्तरं द्रधिदानस्येव पुनरुत्सर्गस्येयादेशस्याप्रवृत्तेः, सवर्णदीर्घस्य तु मुक्सर्वथा निरवकाशत्वेन बाधको 'माठरकौण्डिन्न्यायात्। एवञ्च तद्विषये परिवेषणोत्तरं भोजनस्येव प्रकृते मुक्प्रवृत्त्युत्तरं सवर्णदीर्घप्रवृत्तिरव्याहतैवेत्याशयात्।

'तद्वैयर्थ्यम्' इति। स्यादेतत्। मुगभावे सवर्णदीर्घं बाधित्वा

इत्यादेशः स्यात्। मुकि तूक्तन्यायेनेयादेशस्याप्रवृत्त्या सवर्णदीर्घ इति न तद्वैयर्थ्यम्।

न च मुकस्तन्मात्रफलकत्वे 'आतो ङितः' (७.२.८१) इत्युत्तरं तन्निषेधकतया नानरयेति न्यासेनैव सिद्धिरिति व्यर्थमेव मुग्विधानमिति वाच्यम्। मुगागमं विना सवर्णदीर्घे कण्ठस्थानिक एव दीर्घः स्यात्। मुगागमे तु कण्ठोष्ठस्थानिकः स इति तत्सार्थक्यात्।

न चार्धमात्रालाघवमनुसृत्य 'उदानस्य' इति न्यासेन 'आदेः परस्य' (१.१.५४) इत्यादेरुकारविधानेनैव कण्ठोष्ठस्थानिकदीर्घसिद्धौ व्यर्थमेव मुग्विधानमिति वाच्यम्। मुकि सत्यनुनासिकत्वगुणविशिष्टोकारः उकारादेशे तु शुद्ध एवेति फलभेदेन वैयर्थ्यासम्भवात्।

न च अनुनासिकस्यैवोदादेशस्य विधानेनानुनासिकत्वगुणविशिष्टौकारो भविष्यतीति वाच्यम्। उदादेशस्यानुनासिकत्वे इत्संज्ञालोपाभ्यामपहारप्रसङ्गात्। न च फलाभावादेव नेत्संज्ञा यत्र हि लोपातिरिक्तं किञ्चित्फलं तत्रेवेत्संज्ञाप्रवृत्तिरित्यभ्युपगमात्। अन्यथा प्रक्रियालाघवानूरोधेन 'न ङात्.स्य' इति सूत्रयित्वा सवर्दिशत्वेनानस्य तादेशमेव विदध्यादिति वाच्यम्।

'उगिदचाम्' (७.१.७०) इति नुमस्त्रियामुगितश्च इति ङीप्श्च संप्रदानेन चेत्संज्ञायाः साफल्यसम्भवात्।

न च स्थानिवद्भावलब्धोगित्त्वप्रयुक्तङीब्वारणाय उपाध्यायमते अजादिपाठस्यावश्यकतया 'त्यागिनौ' 'रागिणौ' इत्यादौ घिनुणन्ते नुम्वारणाय 'नपुंसकस्य झलचः' (७.१.७२) इत्यतो झल्ग्रहणमपकृष्य झलन्तानामेवो-' गिदन्तानां नुमित्यर्थस्याकारसम्मतत्वा च ङीब्नुमोरप्राप्त्या फलाभावादित्संज्ञालोपयोरप्राप्तेरुक्तप्रकारेणोकारादेशविधानेनैव सिद्धे मुग्विधानवैयर्थ्यं युक्त-' मेवेति वाच्यम्।

मुगागमे कण्ठोष्ठस्थानिकानुनासिकत्वगुणविशिष्ट ऑकारः, नारदीयशिक्षायामचोरोकारस्य च विवृततमत्वप्रतिपादनात्तत्साम्येन कदाचिदोकार इति पर्यायेण रूपद्वयम्।

ऋनुनासिकोकारादेशे तु 'आद्गुणः' (६.१.८७) इत्यनेन तथाविध ओकार एक एवेति फलभेदेन मुग्विधानवैयर्थ्यासम्भवात्। मुक्तपक्षे औकार एक एवानुनासिकत्वगुणविशिष्टो भवत्युभयसाम्यादिति तु न युक्तम्।

'अमोऽनुनासिका न द्वौ, इति शिक्षावचनमुपक्रम्य 'न द्वौ' इत्युपलक्षणमेवेः सर्वस्य प्लुतलृकारस्यैवेत्यनेन ग्रन्थकृतैव औकारस्यानुनासिकत्वाभावबोधनादिति चेत्? सत्यम्; 'दण्डाढकम्' इत्यादौ निरनुनासिकाकाररूपदीर्घनिष्ठान्तरतम्यनिरूपकत्वस्य दृष्टत्वा मुग्विशिष्टेऽपि तथाविधान्तरतम्यनिरूपकत्वस्यैवातिदेशः प्रकृतपरिभाषया बोध्यत इति स्यान्यन्तरसहायप्रयुक्तस्य स्वतःसिद्धस्य वा अनुनासिकत्वगुणवदोकारादिगन्तान्तरतम्यनिरूपकत्वस्य प्रकृतविषये दुर्वचत्वेन ओकारगतान्तस्तम्यनिरूपकत्वाभावविशिष्टस्यैव वा पूर्वोक्तधर्मस्यातिदेशेन तदप्रवृत्त्या मुक्तप्रवृत्त्यप्रवृत्तिसाधारण्येनैकविधस्य शुद्धस्य दीर्घाकारस्य प्रवृत्त्या मुग्विधानवैयर्थ्यं दुर्वारमेवेति विभाव्यताम्।

यत्तु 'ओदानः' इति न्यासेनैव सिद्धे मुग्विधानं व्यर्थमिति मूलकाराशयः। मात्रालाघवस्य दुर्वचत्वेऽपि ज्ञानलाघवस्य सुवचत्वात्।

न च मुग्विधाने मकारगतानुनासिकत्वसाम्यात् कदाचिदोकारः, आकारगतविवृततमत्वसाम्यात्कदाचिदौकार इत्यनयोः पर्यायता। तदभावे ओदादेशे च केवल औकार एवेति फलभेदात्कथं तदैयर्थ्यमिति वाच्यम्। 'मुग्विधानेऽपि विवृततमत्वानुनासिकत्वरूपधर्मद्वयसाम्येन तथाभूतस्यौकारस्यैव प्रवृत्तिरिति विशेषस्य दुर्निरूपत्वात्।

ऐचोर्नानुनासिकत्वमिति शेखरोक्तिस्तु प्रमाणानुपलम्भादेत्रामपि प्रत्येकं द्वादश भेदा इति प्राचीनप्रवादविरोधाच्चानुपादेयैवेत्याहुः। तदसत्। ओदादेशविधानेऽपि 'अतो गुणे' (६.१.९७) इत्यस्याप्रवृत्तये सामर्थ्यवर्णनस्यावश्यकत्वेन उच्चारणार्थस्यापि तत्कारस्य विवेत्सज्ञां निवृत्स्युपायाभावेन ज्ञानलाघवस्य दुर्वचत्वात्। अर्धमात्रागौरवाच्च। तकाररहितन्यासे च सन्ध्यभावस्य सौत्रत्वेन संक्षणे क्लेशाच्च। ऐचोरनुनासिक्याभावपरस्य शेखरग्रन्थस्य मात्राकालिकयोरेकारौकारयोरिव तद्धर्मविशिष्टस्यैवोऽप्रसिद्ध-

त्वमूलकत्वेन चिन्त्यत्वायोगाच्च। अप्रसिद्धस्यापादयितुमशक्यत्वाच्च। स्वोक्तिसंरक्षणाय विना प्रमाणं ग्रन्थयोः परस्परविरोधकल्पनाया अयुक्तत्वाच्चेत्यलम्।

यद्यपि 'चिकीर्षमाणः' इत्यादावाङ्गत्वान्मुक्त्यन्तरङ्गत्वात्परूपेणागमिनो नष्टत्वात्परिभाषाया अप्रवृत्त्या सवर्णदीर्घाप्रवृत्तेर्न मुग्विधानवैयर्थ्यसम्भवः, तथापि शपः पूर्वमेव परत्वेन मुक्प्रवृत्त्या समानस्थानिकत्व एव वार्णाङ्गयोर्वर्णपरिभाषायाः प्रवृत्तेः पररूपोत्तरमेव मुक्प्रवृत्त्या वा न दोष इत्याहुः।

तेन 'दिदीये' इत्यादौ यणादि न। 'जहार' इत्यादौ 'आत औ णलः' (७.१.३४) इति न। न चैकारादेर्वर्णस्य वर्णान्तरमवयवः कथमिति वाच्यम्। वचनेनावयवत्वबोधनात्। तस्य चावयवसादृश्ये पर्यवसानं बोध्यम्।

'यणादि न' इति। न च 'दिदीये' इत्यादौ युड्विधानसामर्थ्यादेव न यणिति वाच्यम्। युड्व्यतिरेकेण यणि द्वित्वे द्वियकारकं, युटि यणि तस्मिन् त्रियकारकमिति फलविशेषसम्भवात्। आदिना 'बभूवतुः' इत्यादावुवङ्।

ननु 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ' इति वार्तिकारम्भादेव 'दिदीये' इत्यादौ न यण्, नापि 'बभूवतुः' इत्यादावुवङ्, अत आह–'जहार' इत्यादि। एवं 'हारयति' इत्यादावादन्तत्वनिबन्धनः युक्, 'श्रीणाम्' इत्यादावियङ्, 'हसिष्यति' इत्यादौ 'सस्सि' (७.४.४९) इति तादेशश्च नेति बोध्यम्।

'वचनेन' इति। 'आद्यन्तौ टकितौ' (१.१.४६) इत्यनेन। 'अवयवसादृश्ये इति। तत्राद्यन्तशब्दयोस्तत्सदृशे लक्षणेति भावः। नृन्वादिसदृशो भवत्यन्तसदृशो भवतीत्यर्थे अन्यत्र जायमानस्यापि तत्सादृश्यबोधनसम्भवेन देशविशेषव्यवस्थानापत्तिरिति चेत्? न; आदिपदोपस्थाप्ययोः पूर्वत्वावयवत्वयोरन्तपदोपस्थाप्ययोः परत्वावयवत्वयोश्च विशिष्टविधानेऽपि आगमस्य

वर्णान्तरनिरूपितपूर्वत्वपरत्वयोरबाधितत्वेन अवयवत्वांशबाधमूलकतयैव लक्षणाप्रसक्त्या तल्लभ्यस्य सादृश्यस्य अवयवांश एव सम्बन्धस्य न्याय्यत्वात् पूर्वः सन्नवयवसदृशो भवति, परः सन्नवयवसदृशो भवतीत्यर्थस्य पर्यवसन्नत्वेनादोषात्। तदाह—'पर्यवसानं बोध्यम्' इति।

एवञ्च आगमविधिबोधितसादृश्यादेव प्रसिद्धावयवविशिष्टस्यावयविग्रहणेनेव आगमविशिष्टस्याप्यागमिग्रहणेन ग्रहणं युक्तमिति "सिद्धा परिभाषेति भावः।

ननूक्तज्ञापकबलाद्वर्णग्रहणे अस्याः परिभाषाया अप्रवृत्तिरिति प्राचीनोक्तमनुगमं परित्यज्य अननुगतानित्यत्वप्रतिपादनमयुक्तम्। 'नासूया कर्तव्या यत्रानुगमः क्रियते' इति पङ्क्तिर्विंशति (९.१.९९) सूत्रभाष्यात्। अत आह –

न चोक्तज्ञापकाद्वर्णग्रहणे अस्या अप्रवृत्तिरिति वाच्यम्। 'आने मुक्' (७.३.८२) इति सूत्रभाष्ये अकारस्याङ्गावयवस्य मुगित्यर्थे 'पचमानः' इत्यत्र 'तास्यनुदात्तेत्' (६.१.१८६) इति स्वरो न स्यादित्याशङ्क्य अदुपदेशमक्तस्तद्ग्रहणेन ग्राहिष्यते इत्युक्तेरसङ्गत्यापत्तेः।

किञ्च ङमन्तपदावयवस्य ह्रस्वात्परस्य 'ङमो ङमुट्' (८.३.३२) इत्यर्थे 'कुर्वन्नास्ते' इत्यादौ ङमुडागमे णत्वप्राप्तिमाशङ्क्य 'यदागमाः' (प.११) इति न्यायेनाद्यनस्यापि पदान्तग्रहणेन ग्रहणात् 'पदान्तस्य' (८.४.३१) इति निषेध इति, अनया परिभाषया आगमानामागमिधर्मवैशिष्ट्यमपि बोध्यत इत्याशयक 'ङमुट्' (८.३.३४) सूत्रस्थभाष्यासङ्गतेश्च।

'न चोक्तज्ञापक' इत्यादि। 'वर्णग्रहणे' इति। विशेषणतया विशेष्यतया वा 'वर्णत्वव्याप्यधर्मोऽनया परिभाषया नातिदिश्यत इति तदर्थः। तत्राद्यं दूषयति –'आने मुक्' (७.३.८२) इति सूत्रे भाष्ये इति।

'असङ्ख्यापत्तेः' इति । तत्र हि भाष्ये 'अदन्ताङ्गस्य मुक्' इति सामानाधिकरण्ये सम्बन्धे मुकः समुदायभक्तत्वेनादुपदेशग्रहणेनाग्रहणात्तस्य ञ्नित्वादाधायकतया स्वरानापत्तिरित्याशङ्क्य अङ्गावयवस्य मुगिति वैयधिकरण्यमाश्रित्य 'अदुपदेशभक्तस्तद्ग्रहणेन ग्राह्यिष्यते' इत्यभीष्टसिद्धिरित्युक्तम् । तत्रादन्तोपदिश्यमानत्वमुनया परिभाषया मुगविशिष्टे प्रतिपादयता भगवता वर्णव्याप्यधर्मस्यानया परिभाषया नातिदेश इत्यनुगमवादिनां विरोधः स्पष्ट एवेति भावः ।

ननु 'अदुपदेशात्' इत्यस्यादन्तत्वव्याप्योपदेशजन्यबोधविषयत्वोपलक्षितादिति वैवक्षिकोऽर्थोऽवश्यमभ्युपेयः । अन्यथा 'पचावः' 'पचामः' इत्यादौ दीर्घोत्तरमनुदात्तत्वानापत्तेः । एवञ्च मुक्प्रवृत्त्युत्तरं विनैवादन्तत्वातिदेशं स्वरो निर्बाधः ।

न च 'पचावः' 'पचामः' इत्यादौ अन्तरङ्गत्वाद्धीर्घात्पूर्वं स्वर इति वाच्यम् । मुकः समुदायभक्तत्वेऽपि तद्वीर्घात्या प्रकृते' मुक्प्रवृत्तेः पूर्वं स्वरसिद्धया वैयधिकरण्यान्वयस्य भाष्यकारभ्युपगतस्य वैफल्यापत्तेः । तस्मादिह तक्रकौण्डिन्न्यायवदन्तरङ्गपरिभाषाया अप्यनित्यत्वादप्रवृत्तिरित्येव भाष्याशयो न्याय्यः ।

निमित्तापायपरिभाषया वा पूर्वं स्वराप्रवृत्तेः । प्रकृतविषये 'यदागमाः' (प.११) इत्यस्योपक्रमस्तु भगवतः पतञ्जलेर्मुग्विशिष्टे तद्वृद्धिताभेदारोपाय धर्म्यभेदे हि कदाचिद्दृष्टो धर्मः इदानीमविद्यमानोऽपि व्यावर्तको भवन्नुपलक्षणं भवति । अभेदश्चाध्यस्तो वास्तवो वेत्यन्यदेतत् । ततश्च वर्णव्याप्यधर्मातिदेशस्यैतद्भाष्यानभिप्रेतत्वान्नेदं दुषणमिति चेत् ? अत्राहुः; 'पचावः' 'पचामः' इत्यादावपि ह्रस्वदीर्घयोरभेदस्यातिदेशमन्तरेण दुर्लभत्वात्सर्वथा तस्य गळेपतितत्वेन लावादिशिष्टधर्मातिदेशादेवोद्दशेषु निर्वाहादुपलक्षणतया व्याख्यानमयुक्तमेवेत्याशय इति ।

द्वितीयं दूषयति – 'ङमस्तपदावयवस्य' इति । इदन्तु फलितार्थकथनम् । ह्रस्वात्परस्य पदावयवस्य ङमो ङमुड्जादौ पदे इत्यनुरार्थः । एतेनावृत्तौ मानाभावादयमर्थो न युक्त इति केषाञ्चिदुक्तिः परास्ता ।

नन्वनया विशिष्टेष्वागमिधर्मातिदेशो लभ्यते न त्वागमेष्वेव तद्धर्मातिदेश इति कथं पदान्तागमस्य नकारस्य पदान्तत्वम् । तत्राह – 'आगमानामागमिधर्मवैशिष्ट्यम्' इति । अयं भावः--अनया परिभाषया विशिष्टतद्धर्मातिदेशे बोधिते समुदायधर्मैः 'पूर्वे पञ्चालाः' 'तैलं सुक्तम्' इत्यादावयवेऽपि लोकसिद्धस्य व्यपदेशस्य अन्यत्र भाष्यारूढतया प्रत्ययावयवे प्रत्ययत्वव्यवहारवत्पदान्तावयवे पदान्तत्वव्यवहारः सुलभ इति । अयञ्च लक्ष्यानुरोधी व्यपदेशः । तेन 'रामाणाम्' इत्यादौ नुटस्सुप्त्वमादाय पदान्तत्वप्रयुक्तो णत्वनिषेधो नेति बोध्यम् ।

नन्वन्तत्वं चरमावयवत्वम् । तच्च न वर्णत्वव्याप्यो धर्मः । अन्यथा 'अलोऽन्त्यस्य' (१.१.५२) इति सूत्रे अलग्रहणमनर्थकमेव स्यात् । किञ्चास्य भाष्यस्यागमानामागमिधर्मवैशिष्ट्यमित्यर्थे न निभरः । पदान्तत्वस्य चरमवर्णमात्रवृत्तित्वेऽपि पदान्तस्येत्यस्य साक्षादवयवद्वारा वा पदान्तनकारस्य णत्वं नेत्यर्थे तात्पर्यकल्पनायां लाघवात् । ततश्च नेदं दूषणमित्यरुचेराह—

किञ्च गुणादे रपरत्वे रेफविशिष्ट गुणत्वाद्येष्टव्यम् । अन्यथा ऋकारस्य 'गुणवृद्धी अरारावेव' इति नियमो न स्यात् । तच्च वर्णग्रहणे एतदभावृत्तौ न सङ्गच्छते । अत एव "रदाभ्याम्" (८.२.४२) इति सूत्रे भाष्यम् । गुणो भवति वृद्धिर्भवति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्तत इति । अत एव 'नेटि' (७.२.९) णेरनिटि' (६.४.५१) इत्यादि चरितार्थम् ।

अनागमकनां सागमका आदेशा इत्यस्य त्वयमर्थः । आर्धधातुकस्य इडागम इत्यर्थे ज्ञाते नित्येषु शब्देषु आगमविधानानुपपत्त्या अर्थापत्तिमूलकवाक्यान्तरकल्पने इङ्रहितबुद्धिप्रसङ्गे सेड्बुद्धिः कर्तव्येति । एवञ्च आदेशेष्विवात्रापि बुद्धिविपरिणाम इति न नित्यत्वहानिः ।

'किञ्च गुणादेः' इति । 'अन्यथा' इति । ऋवर्णस्यान्तरतमो गुणो

भवति वृद्धिर्भवतीत्यर्थे प्रसज्यमाने कस्याप्यन्तरतमस्याभावेन सामर्थ्यात्सर्वेषामेव प्रवृत्तेरौचित्यादकाराकारावेवेति नियमो दुर्लभः ।

'रदाभ्याम्' इति (८.२.४२) सूत्रे भाष्यम्' इति । 'थलि च सेटि' (६.४.१२१) इति सूत्रेऽपि भाष्ये स्फुटमेतत् । केचित्तु गुणत्ववृद्धित्वातिरिक्तवर्णत्वव्याप्यो धर्मः प्रकृतपरिभाषया नातिदिश्यत इत्येव पूर्वोक्तज्ञापकबलात्कल्प्यते । अनुगमसम्भवे तत्परित्यागस्यायुक्तत्वादित्याशयमुपवर्ण्य प्राचीनमतपरिपालनपक्षपातेन समुदायमक्तत्वेऽपि मुगागमस्य बहिरङ्गतया पूर्वमन्तरङ्गत्वात्स्वरप्रवृत्तेरव्याघातात् जघन्येन वैयधिकरण्येन तत्समर्थनपरं 'आने मुक्' (७.३.८२) इति सूत्रस्थं भाष्यमेकदेशिन एवेति न तद्विरोधो दोषायेत्याहुः ।

ननूक्तज्ञापकाल्लोकसिद्धाया अप्यस्याः परिभाषायाः शास्त्रेऽप्यनाश्रयणमेवास्तु, लाघवादत आह—'अत एव' इति । प्रकृतपरिभाषायाः शास्त्रे आश्रयणादेवेत्यर्थः । एवञ्च न केवलमियं लोकन्यायसिद्धा किन्तु शास्त्रीयप्रमाणासिद्धाऽपीति भावः ।

नन्वेवमप्यनागमकानां 'सागमका आदेशाः' इति भाष्यकारीयसिद्धान्तबलादागमविशिष्टेष्वगमिधर्माणां स्थानिवत्त्वेनैव सुलभतया 'नेटि' (७.२.४) इत्यादीनां न ज्ञापकतासम्भवो नाप्यस्याः परिभाषायाः फलमित्यत आह—'अनागमकानाम्' इत्यादि । 'आगमविधानानुपपत्त्या' इति । प्रकृत्यादित्वात्तृतीया । अभेदस्तदर्थः । तदभिन्नर्थापत्तीत्यादि तदर्थः । 'बुद्धिविपरिणामः' इति । तन्मात्रमित्यर्थः । 'न नित्यत्वहानिः' इति ।

अयं भावः – अनपायोपजनविकारिणो नित्याः । तत्रापायो नाशः । उपजनः – उत्पत्तिः । विकारोऽन्यथाभावः । यद्यागमविधानेनापूर्वावयवोत्पत्तिराश्रीयेत, तर्हि तद्वैशिष्ट्येन विलक्षणस्यावयविन उत्पत्तिरन्यथाभावो वा स्यात्, ततश्च 'एरुः' (३.४.४६) इत्यादावादेशविषये इकारान्तावयवकत्वबुद्धेरुकारान्तावयवकत्वबुद्धिरिति बुद्धिविपरिणाममात्राश्रयणाद्यथा विकारपरिहारस्तद्वदागमविषयेऽपि 'आर्धधातुकस्येड्वलादेः;' (७.२.३५) इत्यादौ

वलादित्वबुद्धेरिकारादित्वबुद्धिरिति बुद्धिविपरिणाम एवेति विकारस्योपजनस्य वा परिहार इति ।

वस्तुतः शब्दानां कार्यत्वेऽपि उच्चारितानां वर्णानां मध्ये पूर्वत्र वा वर्णान्तरस्योच्चारणात्मकोत्पत्तिविषयकमागमविधानमनुपपन्नमेवेति वलादेरुच्चारणप्रसक्ताविकारादिरुच्चारणीय इति वाक्यान्तरकल्पनमावश्यकमेवेति बोध्यम् ।

नन्वेतावतापि न स्थान्यदेशभावः परित्यक्त इति कुतो न स्थानिवत्त्वमत आह—

'स्थानिवत्' (१.१.५६) सूत्रे च नेदशादेशग्रहणं साक्षादृष्टाध्यायीबोधितस्थान्यादेशभावे चारितार्थ्यात् । किञ्चैवं सति स्थानिबुद्ध्यैव कार्यप्रवृत्त्या 'निर्दिश्यमानस्य' (प. १२) इति परिभाषाया अप्राप्त्या अडागमसहितस्य पिबाद्यादेशापत्त्या 'लावस्थायामट्' इति भाष्योक्तसिद्धान्तासङ्गतिः । स्थानिवद्भावविषये 'निर्दिश्यमानस्य' (प. १२) इति परिभाषामवृत्तौ' तिसृणाम्' इत्यत्र परत्वात्तिस्रादेशे स्थानिवद्भावेन त्रयादेशमाशङ्क्य सकृद्गतिन्यायेन (प. ४०) समाधानपरभाष्यासङ्गतिः । 'एरुः' (३.४.८६) इत्यादौ स्थानषष्ठीनिर्देशात्तदन्तपरतया पठितवाक्यस्यैव समुदायादेशपरत्वेन आदेशग्रहणसामर्थ्यात्तस्य स्थानिवत्सूत्रे ग्रहणेन न दोषः ।

'स्थानिव(१.३.९)त्सूत्रे च' इति । मुख्यासम्भवे हि गौणग्रहणमिति भावः । ननु 'नेटि' (७.२.४) इत्यादिज्ञापकबलादागमस्थलीयस्याप्यानुमानिकादेशस्य 'स्थानिवत्' (१.३.९) सूत्रे ग्रहणमित्येव कल्प्यतां लाघवात्किमतिरिक्तपरिभाषाश्रयणेनेत्यत आह—'किञ्च' इति । 'सिद्धान्तासङ्गतिः' इति । न च सिद्धान्तेऽप्यागमसमवधाने केवलस्य पादशब्दस्यानर्थकत्वात्कथं पिबादेश इति वाच्यम् । आगमविशिष्टस्य पाशब्दत्वबुद्धिविषयत्वात् अर्थ-

वत्पाशब्दान्ताङ्गावयवस्य निर्दिश्यमानस्य पिबादेश इत्यर्थेनादोषात् । 'अनेषः' इत्यादौ सत्वसमर्थनस्याप्येषैव सरणिरिति न कोऽपि दोषः ।

ननु 'लावस्थायामत्' इति भाष्यकारीयसिद्धान्तबलादेव स्थानिवद्भावबोधितस्य निर्दिश्यमानत्वाभावः कुतो न कल्प्यत इत्यत आह — 'स्थानिवद्भावविषये' इत्यादि । 'भाष्यासङ्गतिः' इति । एवञ्च 'स्थानिवत्' (१.१.५६) सूत्रबोधितस्यैव निर्दिश्यमानत्वं, न तु यदागमन्यायबोधितस्येति विषयव्यवस्थालाभार्थमेवेयं परिभाषेति भावः ।

ननु 'यदागम'न्यायबोधितस्य निर्दिश्यमानत्वाभावे 'शदेः शितः' (१.३.६०) इति सूत्रस्थभाष्यासङ्गतिः । तृन् हि षाट्कस्य ऋच्छिभावः प्राप्नोति, अस्तु शब्दान्तरस्याडिति पुनराट् भविष्यति । ननु च पुनश्च ऋच्छिभावः प्राप्नोति । पुनराडभविष्यतीति चक्रकमव्यवस्था प्राप्नोतीत्याशङ्क्य 'चक्रकेष्विष्टतो व्यवस्था' इति समाहितम् । तैतथ तद्रीत्यैव 'अपिबत्' इत्यादौ निर्वाहात्किमपलेवैषा परिभाषेति चेत् ? सत्यम् ; 'लक्ष्ये लक्षणस्य' इति न्यायेन कथं पुनः ऋच्छिभावः प्राप्तुयात्कथं वा लकारपरत्वासम्भवादाडागम इत्येकदेशिन एवेदं भाष्यमित्यदोषः ।

नन्वानुमानिकस्थान्यादेशभावस्य 'स्थानिवत्' (१.३.९) सूत्रे ग्रहणं नेति चेत् ? 'एरुः' (३.४.८६) इत्यादौ परिकल्प्यमानस्य 'तैः, तुः' इत्यादिरूपस्यापि सामुदायिकस्यान्यादेशभावस्य तत्र ग्रहीतुमशक्यतया 'पचतु' इत्यादौ तिङ्स्वनिबन्धनपदत्वाद्यनापत्तिरत आह — 'एरुः' इत्यादि । अयं भावः — स्थानिवदित्येव सप्तम्यन्धिकरणवादादेशस्याक्षेपसम्भवादतिरिच्यमानमादेशग्रहणं तत्रानुमानिकस्याप्यादेशस्य संग्रहार्थं स्पष्टश्चेदं 'स्थानिवत्' (१.३.९) सूत्रे भाष्ये ।

एवञ्च 'एरुः' (३.४.८६) इत्यादौ सूत्रोच्चारितस्थानषष्ठ्यन्तस्यैव वाक्यस्य लक्षणया तदन्तपरत्वादादेशविषये श्रौतोऽयं सामुदायिकोऽपि स्थान्यादेशभावः । आगमविषये तु सूत्रोच्चारितस्यावयवषष्ठ्यन्ततया तदुघटितवाक्यस्य तदादिलक्षणायामपि स्थान्यादेशभावस्य दुरुपपादत्वा-

द्वाक्यान्तरकल्पनेनानुसन्धेय इत्यनुमेय एव सः। अवयवषष्ठ्या एव तु लक्षणया स्थानसम्बन्धबोधकत्वमिति तु न युक्तम्, सुब्विभक्तौ नैं लक्षणेति सिद्धान्तात्। अथापि कथञ्चिल्लक्षणा स्वीक्रियताम्, एवमपि गौण एव सः। ततश्च श्रौतसामुदायिकस्थान्यादेशभावसङ्ग्राहकतया कृतार्थस्य 'स्थानिवत्' (१.३.९) सूत्रीयादेशग्रहणस्य आगमस्थलीयसमुदायगतानुमानिकस्थान्यादेशभावसङ्ग्राहकता दुर्वचा। इत्थञ्च 'तेः तुः' इत्यादावादेशविषये न दोषः, नाप्यागमविषये स्थानिवत्वप्रसक्तिरिति विशिष्टेष्वागमिधर्मलाभार्थमवश्याश्रयणीयैवेयं परिभाषा; दोषपरिहारस्त्वनित्यत्वेनैव निर्वहणीय इति सर्वमनवद्यमिति।

नन्वानुमानिकस्थान्यादेशभावपरिग्रहे सकृदुच्चरितन्यायेन वर्णस्थान्यादेशभावस्य दुरूपपादत्वात् 'हिनोति' इत्यादौ स्थानिवद्भावेन व्यवधानस्य वक्तुमशक्यतया लघूपधगुणो दुर्वार इत्यत आह—

आनुमानिकस्थान्यादेशभावकल्पनेऽपि श्रौतस्थान्यादेशभावस्य न त्याग इति 'अचः परस्मिन्' (१.१.५७) इत्यादेर्नासङ्गतिः। एतेन 'यदागम' (प.११) परिभाषा 'स्थानिवत्' (१.३.९) सूत्रेण गतार्थेत्यपास्तम्। एतत्सर्वं 'दाधाघ्व(१.१.२०) इति सूत्रे भाष्ये स्पष्टम्।

नन्वेवं 'उदस्थात्' इत्यादौ 'उदः स्थास्तम्भोः पूर्वस्य' (८.४.६१) इति पूर्त्रसवर्णापत्तिरत आह—

१२. निर्दिश्यमानस्यादेशा भवन्ति।

"षष्ठी स्थाने' (१.१.४९) इति सूत्रमावर्तते। तत्र द्वितीयस्यायमर्थः। षष्ठ्यन्तं निर्दिश्यमानमुच्चार्यमाणमुच्चार्यमाणसजातीयमेव निर्दिश्यमानावयवरूपमेव वा स्थानेन स्थाननिरूपितसम्बन्धेन युज्यते न प्रतीयमानमित्यर्थः।

'आनुमानिक' इत्यादि। 'न त्यागः' इति। आवृत्त्या वर्णमात्रपरत्वेन पठितवाक्यलब्धस्य न त्याग इति तदर्थः। यद्वा शक्तिजन्योपस्थितिविषयस्य प्राथमिकस्य न त्याग इत्यर्थः। एवञ्च स्थानिवत्सूत्रे द्वयोरपि स्थानिनोरादेशयोश्च सामान्यधर्मपुरस्कारेण ग्रहणमिति भावः। 'नासङ्गतिः' इति। यद्ययं वार्णस्थान्यादेशभावो न गृह्येत तर्ह्यज्मात्रस्थानिकादेशो दुर्लभ इति व्यर्थमेव 'अचः परस्मिन्' (१.१.५७) इति सूत्रमिति, तदेवात्रार्थे प्रमाणमिति भावः। आदेशग्रहणमप्यत्रार्थे प्रमाणमिति वक्तुं युक्तम्। उक्तमर्थं प्रमाणयति--'भाष्ये स्पष्टम्' इति। अत्रेदं बोध्यम् – 'नेटि' (७.२.४) 'णेरनिटि' (६.४.५१) इत्यादिज्ञापकवशात् 'स्थानिवत्' (१.३.९) सूत्रे साक्षादष्टाध्यायीबोधितस्तदितरश्च सामान्येन स्थान्यादेशभावो गृह्यत इत्येव कल्पना युक्ता।

अत एव 'तृज्वत्क्रोष्टुः' (७.१.९५) 'नाभिनभञ्च' (ग. सू. १०६) धातुरूपञ्च इत्यादावनुमितस्यापि तस्य 'स्थानिवत्' (१.१.५६) सूत्रे ग्रहणं सिद्ध्यति। 'अपिबत्' इत्यादावडागमसहितस्य पिबाद्यादेशवारणन्तु 'लावस्थायमट्' इति भाष्यकारीयसिद्धान्तबलादुपपद्यते। अत एव च उत्सर्गापवादस्थलीयबुद्धिविपरिणामप्रयुक्तस्य स्थान्यादेशभावस्य न 'स्थानिवत्' १.१.५६) सूत्रे ग्रहणं 'शबपवादभूतानां श्यन्नादीनां शित्करणात्' इति स्पष्टमाकरे 'स्थानिवत्' १.१.५६) सूत्रे प्रतिपादितम्। तस्मादिह भाष्यकृत्सिद्धान्तितागमस्थलीयसामुदायिकस्थान्यादेशभावलब्धार्थानुवादिकैवैषा गुणत्ववृद्धित्वयोरतिदेशार्था परिभाषा नातिरिक्तेति सकलेष्टसिद्धिरित्याहुः।

अपवादसङ्गतिं प्रदर्शयन्नवतारयति–'नन्वेवम्' इति। 'पूर्वसवर्णापत्तिः' इति। आगमसमवधाने विशिष्टे यदागमन्यायबलात् आगमितावच्छेदकधर्माणां तत्समानाधिकरणानां वा धर्माणामविशेषेणातिदेश इति स्थाशब्दबुद्धिविषयताया अङ्गिवशिष्ट एव विश्रान्तेः 'उत्थापयति' इत्यादाविव प्रवर्तमानः पूर्वसवर्ण आन्तरतम्यादिह दकारः स्यादिति भावः। सिद्धान्ते तु निमित्तं निर्दिश्यमानस्यैव विशेषणमित्यदोषः।

नन्वस्यां परिभाषायां किं प्रमाणमत आह – 'षष्ठी स्थाने' इति।

'आवर्तते' इति। यद्यपि 'इको यणचि' (६.१.७७) इत्यादावजुपस्थिष्टस्येको यणित्युक्त्वा उच्चारितेषु पूर्वत्र परत्र वा यण्विधानायोगादावश्यकत्वादन्तरङ्गत्वाच्चाभीष्टस्थानसम्बन्ध एवानिर्धारितसम्बन्धविशेषायाः षष्ठ्याः सम्पद्यत इति विनैवावृत्तिं सूत्रारम्भादेव प्रकृतपरिभाषा सिद्धयति, तथापि मन्दबुद्धिवैशद्यार्थमावृत्तिराश्रिता।

'षष्ठ्यन्तम्' इति। आदेशविधिगृहीतमुद्देश्यसमर्पकमिति तदर्थः। तेन जराशब्दादेः प्रयोगे 'नाभिनंभच' (ग. सू. १०६) इत्यादौ शास्त्रे नाभिशब्दादेश्च षष्ठ्यन्तत्वाभावेऽपि न क्षतिः। 'निर्दिश्यमानम्' इति। एतच्चाध्याहारलभ्यम्। 'उच्चार्यमाणमुच्चार्यमाणसजातीयमेव' इति। सौत्रप्रायोगिकयोस्साहश्यमूलकामेदाध्यवसायः सजातीयलक्षणा वेत्याशयेन द्वेधा तदर्थविवरणम्।

नन्वेवं 'तदोः सः सौ' (७.२.१०६) इत्यत्र तकारदकारयोरपि निर्दिश्यमानत्वात् 'अतिस्यः' इत्यादौ पूर्वपदघटकस्यापि तस्य सत्वापत्तिरत आह – 'निर्दिश्यमानावयवयरूपम्' इति। अध्याहृतस्य निर्दिश्यमानपदस्यावृत्तिवशादर्थद्वयलाभः। द्वितीये चावयवपर्यन्तमपि लक्षणेति विशेषः।

यद्वा शास्त्रे उद्देश्यसमर्पकत्वेन यन्निर्दिश्यते तत्सजातीयस्य प्रायोगिकस्य साक्षादवयवद्वारा वा स्थानप्रयुक्तनिवर्त्यत्वाख्यसम्बन्धेन योग इत्येव वाच्यार्थः। मूलन्तु फलितार्थाभिप्रायेणेति बोध्यम्। एवञ्च प्रदेशेषूपतिष्ठमानं निर्दिश्यमानपदं क्वचित् स्थानषष्ठ्यन्तं क्वचिदवयवषष्ठ्यन्तम्। पदैकवाक्यतया चैषा परिभाषा विध्युपकारिकेति भावः। अनिर्दिश्यमानस्य तदन्तादेरादेशव्यावृत्तिरस्याः फलम्।

'न प्रतीयमानम्' इति। अथादेशविधौ उद्देश्यसमर्पकत्वेन यदुच्चार्यते तत्समानानुपूर्वीकस्यैव निर्दिश्यमानत्वे बिन्दुद्वितयात्मकस्य सूत्रोच्चारितविसर्जनीयपदबोध्यस्य निर्दिश्यमानत्वोपपादनपरवक्ष्यमाण 'हयवरट्' (मा. सू. ९) सूत्रभाष्यविरोधः। 'तदोः सः सौ' (७.२.१०६) इत्यत्रानुवर्तमानस्य त्यदादिपदबोध्यतदादीनां निर्दिश्यमानत्वानुपपत्तिश्च।

तेनेदं सिद्धम्—न चास्य 'च्वौ' (७.४.२६) इत्यादौ दीर्घाणामादेशानापत्तिः, तेषामनिर्दिश्यमानत्वादिति वाच्यम्। जातिपक्षे दोषाभावात्।

न चोद्देश्यसमर्पकपदजन्योपस्थितिविषयत्वमेव निर्दिश्यमानत्वमिति वाच्यम्। ग्राहकशास्त्रगृहीतानां निर्दिश्यमानत्वाभावशङ्कापर 'न च' इत्यादिमूलग्रन्थासङ्गतेः। 'जरायो जरस्' (७.२.१०१) इत्यादौ अधिकारप्राप्ताङ्गरूपविशेष्यसम्बन्धमूलक 'येन विधि'शास्त्रबोधितजराशब्दादिजन्यप्रतीतिविषयतदन्तस्यापि निर्दिश्यमानत्वापत्तेश्च।

न च प्रकृतशास्त्रीयसङ्केतग्रहानधीनतादृशपदजन्योपस्थितिविषयत्वं निर्दिश्यमानत्वमिति वाच्यम्। 'स्वं रूपम्' (१.१.६८) इत्येतत्सङ्केतग्रहाधीनजरादिपदजन्योपस्थितिविषयाणां केवलानामपि निर्दिश्यमानत्वानुपपत्तेः। धात्वादीनामपि निर्दिष्टत्वादित्यादिवक्ष्यमाणमूलग्रन्थासङ्गतेश्च।

न च स्वरूपतदतिरिक्तैतदन्यतरमात्रोपस्थापकसङ्केतातिरिक्तप्रकृतशास्त्रसङ्केतग्रहासहकृतताद्दशपदजन्यप्रतीतिविषयत्वं निर्दिश्यमानत्वमिति वाच्यम्। परिभाषाणां सङ्केतान्तर्भावे लिङ्गविशिष्टपरिभाषाबोधितस्य निर्दिश्यमानत्वानुपपत्तेः। इष्यते हि तद्बोध्यस्यापि निर्दिश्यमानत्वम्। तथा च 'ङ्याप्' (४.१.१) सूत्रे भाष्ये तया परिभाषया 'महतीप्रियः' इत्यत्र 'आन्महतः' (६.३.४६) इत्यस्य प्रवृत्तिमाशङ्क्य, अनित्यत्वेन समाहितम्। तथा 'युवतीः पश्य' इत्यत्र विभक्तौ लिङ्गविशिष्टाग्रहणेन सम्प्रसारणाभाव उक्तः।

अत एव 'देवीमञ्चति' इत्यर्थे 'देवाघ्रङ्' सिद्ध्यति। तदनन्तर्भावे च 'यदागम' (प.१।) परिभाषाबोधितस्यापि निर्दिश्यमानत्वापत्तेश्च। तस्मादनिर्वचनीयमेव निर्दिश्यमानत्वमिति चेत्? अत्रोपाध्यायानुयायिनः—आदेशविधौ श्रुतमुद्देश्यसमर्पकं यत्पदं तत्पदीयोच्चारणव्यापकोपस्थितिविषयत्वं निर्दिश्यमानत्वम्। अस्ति हि 'जरायाः' (७.२.१०१) इत्यादौ श्रुतं यज्जरादिपदं तत्पदीयोच्चारणव्यापकोपस्थितिविषयत्वं जरा-

शब्दादौ । अधिकारप्राप्तङ्पदोच्चारणव्यापकोपस्थितिविषयस्यापि तदन्तस्य प्रकरणवशादनुमितपदार्थान्तत्वात् । श्रुतादेव जसादिशब्दात् 'येन विधिः' (१.१.७२) इत्येतच्छास्त्रसहायेनोपस्थितस्य तस्य विशेषणविशेष्यभाववैपरीत्यादिना व्यभिचरितोपस्थितिकतया तदुच्चारणव्यापकोपस्थितिविषयत्वाभावाच्च न निर्दिश्यमानत्वम् ।

'तदोः सः सौ' (७.२.१०६) इत्यादावनुवर्तमानस्य 'त्यादादीनां' (७.२.१०३) इत्यादेः 'वा नपुंसकस्य' (७.१.७२) इत्यत्रानुवर्तमानस्य शतुरिव श्रुतत्वं सुवचम् । तन्मध्यपतितलिङ्गविशिष्टपरिभाषाभ्यान्तु स्थानिवद्भावेनैव निर्दिश्यमानत्वस्याप्यारोप इति न दोषः । 'यदागम' (प.११) परिभाषया तु न तदारोपः । 'लावस्थायामद्' इति भाष्यकारीयसिद्धान्तव्याकोपात्परिभाषारम्भाच्च ।

न चैवं निष्ठापदोच्चारणव्यापकोपस्थितिविषययोः क्तक्तवत्वोरपि निर्दिश्यमानत्वाविशेषाद्रेफदकाराभ्यां परीभूतस्य निष्ठान्तावयवनिर्दिश्यमाननिष्ठावयवतकारस्य नकार इत्यर्थेनैव 'दृषत्तीर्णः' इत्यादौ नत्वव्यावृत्तौ तस्य 'प्रत्ययग्रहणे चापञ्चम्याः' (प.२४) इत्येतत्परिभाषोदाहरणत्वप्रतिपादनपरभाष्यासङ्गतिरिति वाच्यम् । उपायान्तरपरत्वेनादोषात् ।

अत एव 'आनन्त्यविकार'(प.६१)परिभाषया निरूढस्य तस्य तदुदाहरणत्वं स्वरसत उपपद्यते ।

एवञ्च 'न प्रतीयमानम्' इत्यस्य न यथाकथञ्चित्प्रतीयमानमित्यर्थ इत्याहुः ।

अथ विधेयस्थलान्तर्भावेन व्यभिचरितोपस्थितिकत्वाद्दीर्घादीनामकारोच्चारणव्यापकोपस्थितिविषयत्वाभावान्न निर्दिश्यमानत्वमिति शङ्कते – 'न च' इति । 'जातिपक्षे दोषाभावात्' इति । तत्पक्षे ह्यकारोच्चारणव्यापकोपस्थितिविषयताया अत्वजातावबाधितत्वेन निर्दिश्यमानत्व, तस्याञ्च साक्षादादेशनिवर्त्यतायां बाधितत्वात्तदाश्रयव्यक्तिषु पर्यवस्यन्ती दीर्घादिष्वापि प्रवर्तत एव विशेषाभावादतः सिद्धमिष्टमिति भावः ।

किञ्च 'न भूसुधियोः' (६.४.८५) इति निषेधेन ग्रहण-कशास्त्रागृहीतानां निर्दिश्यमानकार्यबोधनान्न दोषः ।

ननु व्यक्तिपक्षमवलम्ब्य प्रवृत्तस्याक्षेपस्य पक्षान्तरेण परिहारो न युक्त इत्यत आह— 'किञ्च' इति । 'निर्दिश्यमानकार्यबोधनात्' इति । 'एरनेकाचः' (६.४.८२) इत्यत्र 'ओस्सुपि' (६.४.८३) इत्यत्र च ह्रस्वयो-रेव निर्दिश्यमानतया दीर्घाणामादेशाप्रसक्तावारभ्यमाणो निषेधोऽस्यार्थस्य सामान्येन ज्ञापक इत्यर्थः ।

न च भाव्यमानोऽप्युकारः सवर्णान् गृह्णातीति विधेयविषयेऽपि दीर्घोपस्थितेः सुवचतया उकारोच्चारणव्यापकोपस्थितित्विषयतारूपस्य निर्दिश्यमानत्वस्य दीर्घोऽकारेऽप्यव्याघातान्न भूशब्दनिषेधवैयर्थ्यमिति वाच्यम् । तादृशपरिभाषाज्ञापकभूतस्य 'दिव उत्' (६.१.१३१) इत्यादि-तूपरकणस्य स्वांशे दीर्घोपस्थितेः प्रतिबन्धकतया तदुपस्थितेर्व्यापकता-विरोधेन निर्दिश्यमानत्वाभावात् ।

यत्तु 'भुवौ, सुधियौ' इत्यादौ 'इको यणचि' (६.१.७७) इति प्राप्त-यणवारणाय निषेधस्य सार्थकतया न ज्ञापकतासम्भव इति, तदप्रसात् । 'इग्यणस्सम्प्रसारणम्' (१.१.४५) 'एच इक्' (१.१.४८) इत्यादौ च सूत्रे विधेयविषयतया व्यभिचरितोपस्थितिकानां दीर्घोकारादीनां 'इको यणचि' (६.१.७७) इत्यत्र निर्दिश्यमानत्वाभावेन तेनापि यणो दुर्लभत्वात् सुपीत्य-स्य सम्बन्धेन सुन्निमित्तकस्यैव निषेधारम्भाच्चेति दिक् ।

स्यादेतत् , 'ओः सुपि' (६.४.८३) इत्यत्र यण्भाविनो ह्रस्वोकारस्या-प्रसिद्धेः सूत्रवैयर्थ्यवशेन गृहीतदीर्घाणां प्राप्तस्य यणो वारणाय भूशब्दनिषेध आवश्यकः ।

यदि तु प्रियं खल्पु कुलं ययोस्तावित्यार्थे यण्विधानाय 'तत्सार्थक्य-मित्युच्यते तर्हि 'स्वयं भवतीति स्वयम्भु' ब्रह्म 'सुष्ठु ध्यायतीति सुधि कुलं तत्प्रियं ययोस्तावित्यार्थे 'प्रियस्वयम्भुवौ प्रियसुधियौ' इत्यादौ प्राप्तस्य यणो वारणायायमपि निषेध आवश्यको भवेत् ।

न च 'गतिकारक' (६.२.१३९) इत्यादि निषेधादुभयोरप्यसम्भव इति वाच्यम्। तादृशनिषेधस्य 'गतिकारका (६.२.१३९) न्यतरघटितोत्तरपदकत्वाभाववत्परत्वेनादोषात्। अत एव 'सूत्रप्राम्ण्यौ' इत्यादौ यणिसद्धिः। न च 'श्रीपाय' इत्यत्र 'आतो लोपः' (६.४.६४) इव प्रकृतोदाहरणेषु तुरुवणपि दुर्लभ एव, सन्निपातपरिभाषाविरोधादिति वाच्यम्। अनित्यत्वेन तत्परिभाषायाः प्रकृत्यण्विषये प्रवृत्त्यभावेनादोषात्। अत एव 'ख्यात्' (६.१.११२) इति विकृतनिर्देशः सार्थकः। अन्यथा सखीयते: किवपि 'सख्युः' इत्यादौ प्रकृतपरिभाषया यणादेशाप्रवृत्तौ तदैयर्थ्यं स्पष्टमेव।

तथा च पूर्वोक्तप्रकारापन्न ''प्रियप्राम्ण्यौ'' इत्यादिहरदत्तोदाहृते यण्निबाध एवेति चेत्? न; प्रकृतनिषेधस्य ह्रस्वमात्रविषयकत्वें दीर्घोच्चारणवैयर्थ्यस्य तदवस्थत्वेन निरुक्तार्थसिद्धेः।

यत्तु अस्मादेव निषेधादुद्देश्यसमर्पकपदजन्योपस्थितिविषयार्थसमभिव्याहृतलिङ्गबोधकप्रत्ययेतरावघटितत्वं निर्दिश्यमानत्वमिति ज्ञाप्यते, एवञ्च ग्राहकशास्त्रगृहीतानां लिङ्गविशिष्टपरिभाषालब्धस्य तन्मध्यन्यायगोचरस्य च न निर्दिश्यमानताहानिः। 'यदागमाः' (प. ११) 'येन विधिः' (१.१.७२) इत्येतदुभयबोधितस्य तु न निर्दिश्यमानता उद्देश्यसमर्पकस्याशब्दाद्युपस्थितिविषयार्थसमभिव्याहृतार्थान्तरघटितत्वादिति? तदसत्; तदोरित्येतत्पदजन्योपस्थितिविषयार्थसमभिव्याहृतार्थान्तरघटितानां त्यादादीनां मपर्यन्तपदोपस्थाप्यसमभिव्याहृतार्थान्तरघटितयोर्युष्मदस्मदोश्च निर्दिश्यमानत्वानापत्तेरिति दिक्।

ननु वर्णग्रहणेऽप्यस्याः परिभाषायाः प्रवृत्तौ रीङृरिङोर्ङित्त्वं व्यर्थमित्याशङ्क्याह—

इयङुवङोर्ङित्त्वन्तु इवर्णोवर्णान्तस्नुधातुध्रुवामित्यर्थेन धात्वादीनामपि निर्दिष्टत्वादन्त्यादेशत्वाय। रीङृरिङोर्ङित्त्वं स्पष्टार्थमेव। एतेन इदं ङित्त्वं वर्णग्रहणे निर्दिश्यमानपरिभाषाया अप्रवृत्ति-

ज्ञापकमित्यपास्तम्। 'हयवरट्' (मा.सू. ५) सूत्रस्थेन आयोगवा-ज्ञानमुपदेशे अलोऽन्त्यविधिः प्रयोजनं वृक्षस्तत्र नैतदस्ति प्रयोजनं 'निर्दिश्यमानस्य (प. १२) इत्येव सिद्धमिति भाष्येण विरोधात्। अनया परिभाषया 'येन विधिः' (१.१.७२) इति सूत्रबोधिततदन्तस्य स्थानित्वाभावबोधनं 'यदागमाः' (प. ११) इति लब्धस्य च।

'स्पष्टार्थम्' इति। नात्र फलान्तराभिनिवेशः कार्यः। भाष्याविचारितप्रयोजनानां सूत्राक्षराणामस्मदादिभिः फलकल्पनाया अयुक्तत्वात्। अन्यथा भगवतः पतञ्जलेरज्ञानकल्पनाप्रसङ्गात्।

ननु वर्णग्रहणे प्रकृतपरिभाषामप्रवर्तयता तेन तेन भगवता भाष्यकारेण सूचित एवायमर्थ इति चेत्तत्राह—'भाष्यविरोधात्' इति। यदि च 'वर्णग्रहणे' इत्यत्र आक्षरसमाम्नायिक एव वर्णो विवक्ष्यते तदा न कोऽपि दोष इत्यपि वदन्ति।

प्रागुक्तं निर्दिश्यमानस्वरूपं प्रदर्शयन् परिभाषाफलं दर्शयति—'अनया' इति। यदपि प्रकृतग्रन्थस्वारस्यात् 'यदागमाः' (प. ११) 'येन विधिः' इत्येतदन्यतरानधीनप्रतीतिविषयताशालित्वं निर्दिश्यमानत्वमिति परिष्कुर्वन्ति; तदप्ययुक्तम्। अन्यतरानधीप्रतीतिविषयतायाः प्रत्येकमुभयोरपि तदधीनप्रतीतिविषययोरेव सत्त्वेनाव्यावर्तकत्वात्। विशेषणांशे 'स्वस्य च रूपस्य' इति वाक्यशेषेण स्वरूपप्रतीतेरपि 'येन विधिः' इत्येतच्छास्त्रानधीनत्वेन केवलस्यापि जराशब्दादेर्निर्दिश्यमानत्वनापत्तेश्च। तस्य व्यपदेशिवद्भावलब्धार्थानुवादरूपत्वे केवलस्यापि तदन्तत्वेनैव गृहीतव्यतया 'येनविधिः' (१.१.७२) इत्येतच्छास्त्रानधीनविषयताया दुर्वचत्वेन सुतरां निर्दिश्यमानत्वानुपपत्तेश्चेत्यास्तां तावत्।

तेन 'सुपदः' 'उदस्यात्' इत्यादिसिद्धिः। अनया च स्वस्वनिमित्तसन्निधापितानां 'अलोऽन्त्यस्य' (१.१.५२) इत्यादीनां समावेश एव न बाध्यबाधकभावो विरोधाभावात्।

'सुपदः' इति । यत्तु अङ्गभसंज्ञानिमित्तभूतप्रत्ययसम्बन्धं वैयधिकरण्यान्वयञ्चाश्रित्य भसंज्ञकाङ्गावयवस्य यञ्ञाद्यसर्वनामस्थानस्वादिप्रत्ययपरकस्य पाच्छब्दस्य पदादेश इत्येवं व्याख्यानेन विनैव परिभाषामभीष्टसिद्धेर्नेदमस्याः परिभाषायाः प्रयोजनमित्याहुः ।

अत्रेदं वक्तव्यम् अङ्गभसंज्ञानिमित्तभूतप्रत्ययसम्बन्धः क्रियाकालपक्षावलम्बादुतार्थापत्तिमूलकादाक्षेपाद्वा ? नाद्यः; आकाङ्क्षारीत्यसंज्ञासु कार्यकालत्वान्नभ्युपगमात्, अभ्युपगमे वा कार्यकालपक्षेऽपि संज्ञासु वाक्यैकवाक्यताया आवश्यकतया तादृशान्वयस्य दुर्लभत्वात्, आवृत्तेर्गौरवपराहतत्वेनायुक्तत्वाच्च ।

न द्वितीयः; 'इरियान्' इत्यादावङ्गमन्तरा प्रत्ययोपलम्भात्, 'वृषण्वसुः' इत्यादौ प्रत्ययमन्तरा भस्योपलम्भाच्च, ताभ्यां प्रत्ययाक्षेपासम्भवात् । आक्षेपे वा पदजन्यपदार्थोपस्थितेरेव शाब्दान्वयहेतुतया कथमाक्षिप्तस्य तथाविधान्वयसम्भवः । यदि स्यात्तथाऽप्यन्येनाक्षिप्तस्यान्यत्रान्वयोऽत्यक्तविरुद्धः । उभयथाऽपि पदाङ्गाधिकारे इति परिभाषाव्यतिक्रमेण वैयधिकरण्यान्वयश्च दुर्वचः । 'ष्णुङ्' (६.१.१३) इति सूत्रस्थन्तु भाष्यमेकदेशिन एवेति स्पष्टमुद्योतशेखरयोः । तस्मात्परिभाषयैव निर्वाह इति युक्तम् ।

यदपि 'द्विपात्सुपदः' इत्यादौ परिभाषाभ्युपगमेऽपि निर्दिश्यमानस्यैव पूर्वपदघटकस्य पदादेशवारणाय लक्ष्यानुरोधादाक्षेपादिपरिक्लेशानभ्युपगम्य कथञ्चिदुक्तरीतेरेवाश्रयणीयतया तयैव रीत्या सर्वत्र 'येन विधि' (१.१.७२) शास्त्रबोधिततदन्तस्यादेशवारणसम्भवादेतदर्थं प्रकृतपरिभाषारम्भो वृथैव । अनन्त्यविकारपरिभाषया तु न प्रकृते निर्वाहः । कार्यिणोऽन्त्यसदेशत्वाभावादिति वदन्ति । तदप्यकिञ्चित्करम् । पाच्छब्दान्ताङ्गावयवस्य निर्दिश्यमानस्य पाच्छब्दस्येत्यार्थे प्रयासत्तिवशादङ्गचरमावयवत्वापन्नस्यैव लाभेनोपपत्तौ निरुक्तक्लेशस्य निष्फलत्वात् । वैयधिकरण्यवादिनामपि प्रकारान्तरेण प्रत्यासत्तिरावश्यकी । अन्यथा सुपदः, इयान्, तेन इत्यर्थे 'सुपादियत' इत्यत्र टामाद्राय भसंज्ञकाङ्गावयवत्वाद्वृत्तमाद्राय यञ्ञाद्यसर्वनामस्थानस्वादिप्रत्ययपरकत्वाच्च दोषो दुर्वारः ।

तस्मादिह प्रकृतपरिभाषयैव निर्वाह उचित इत्येतदुदाहरणस्य परिभाषाविषयत्वप्रदर्शनपर 'पादः पत्' (६.४.१३) इति सूत्रस्थभाष्यस्वरस इत्यलम् ।

'उदस्थात्' इति । 'उदः स्थास्तम्भोः' (८.४.६१) इत्यत्र सकारप्रश्लेषे प्रश्लिष्टस्य वा स्थानषष्ठ्यन्तत्वकल्पनायां परिक्लेशात्प्रकृतपरिभाषोदाहरणत्वमेव युक्तमित्याशयः । आदिशब्देन मूर्धाभिषिक्तोदाहरणस्य 'अपिबत्' इत्यस्य संग्रहः । न हि तत्र वैयधिकरण्यान्वयेनापि निर्वाहः । 'लावस्थायामेवाडागमः' इति सिद्धान्तात्प्रथमतस्तदुत्पत्तावागमरहितस्याङ्गावयवस्य पाशब्दस्थानर्थकत्वेन अर्थवद्ग्रहणमरिभाषया पिबादेशायोगात् ।

यत्तु तत्परिभाषालभ्यास्यार्थवत्त्वांशस्याङ्गविशेषणत्वाभ्युपगमेन अर्थवदङ्गावयवस्य पाशब्दस्येति व्याख्यानाद्विनापि प्रकृतपरिभाषामभीष्टसिद्धिरिति, तदत्यन्तमयुक्तम् । 'स्वं रूपं' (१.१.६८) इत्येतच्छास्त्रसिद्धायास्तत्परिभाषाया अशब्दसंज्ञेति निषेधेन शब्दशास्त्रीयसंज्ञाविषये प्रवृत्तिविरोधात् । न्यायसिद्धत्वेऽपि षान्तसंख्यावाचकस्य षट्छब्दस्य षट्संज्ञाविधानबलेन एवंविधविषये तत्परिभाषाप्रवृत्तेरनिष्टत्वाच्च । प्रवृत्तौ वा परिभाषायास्तत्तदर्थविशिष्टस्वरूपबोधकत्वादङ्गांशे तत्सम्बन्धे तदवयवस्य पाशब्दस्येत्यर्थस्यदुर्वचत्वाच्च । 'प्रणिदापयति' इत्यादौ पुग्विशिष्टे दाशब्दबुद्धेरिव 'यदागम' न्यायात्प्रकृतेऽप्यागमविशिष्टे पाशब्दबुद्धेर्विभ्रान्त्या विशिष्टस्यैवादेशप्रसङ्गाच्च ।

उक्तरीत्या 'प्लीहन्'शब्दावयवेऽपि हन्युपधादीर्घनियमप्रसङ्गाच्च । एतेन अङ्गावयवो योऽर्थवान् तदवयवस्य पाशब्दस्येत्येवं व्यधिकरणान्वयपरम्परया निर्वाह इत्यपि निरस्तम् । व्यपदेशिवद्भावेन प्रकृतविषये दोषप्रौव्याच्चेति न किञ्चिदेतत् ।

अथ यदागमन्यायगोचरस्य निर्दिश्यमानत्वाभावे 'इनसोः' (६.४.१११) इति सूत्रस्थतपरकरणस्याभीयासिद्धत्वानित्यताज्ञापनपरभाष्यकारीयसिद्धान्तव्याकोपः । तद्धि परत्वादाटश्चन्तरङ्गत्वाद्वृद्धौ लोपाभावाय ।

अभीयत्वेनाङ्गमस्यासिद्धत्वे तु व्यर्थमेव तदित्यनित्यतायां ज्ञापकम्। तदुक्तम् --'अत एक' (६.४.१२०) इति सूत्रे भाष्ये — 'इनसोरतस्तकारेण ज्ञाप्यते त्वेत्वशासनम्'। उक्तविषये निर्दिश्यमानत्वाभावे हि ज्ञापितायामप्यनित्यतायां स्वांशे चारितार्थ्यविरहात्तदसङ्गतिरेवेति चेत्? सत्यम; 'यदागमाः' इति न्यायेन निर्दिश्यमानानुपूर्व्यनतिदेशेन हि तद्विषयस्य निर्दिश्यमानत्वाभाव इति सिद्धान्तः।

प्रकृते तु योन्तादिवद्भावप्रयुक्तस्तदतिदेशः स एव निरुक्तज्ञापकतां निर्वहतीत्याहुः।

नन्वेवमपि 'तदोः' (५.३.१९) इति सूत्रस्थशेखरासङ्गतिः। तत्र हि 'तोः' इति तु नोक्तम्। 'अनेषः' इत्यादौ नस्याप्यापत्तेरित्युक्तम्। यदि च 'यदागम'न्यायगोचरस्य निर्दिश्यमानत्वाभावः, तर्हि कथं नुटः सत्वापादनं तत्सहितस्य निर्दिश्यमानत्वाभावदिति चेत्? न; विशिष्टस्य निर्दिश्यमानत्वाभावेऽपि 'आद्यन्तौ टकितौ' (१.१.४६) इत्येतच्छास्त्रबोधितस्य तादृशत्यदाद्यवयवत्वस्य तत्राव्याघातात्।

अत एव 'चलीक्लृप्यते' इत्यादौ रीको रेफस्य लत्वसिद्धिः। 'उदः स्थात्' (८.४.६१) इत्यादौ तु निर्दिश्यमानस्याटा व्यवधानाददोषः। स्वावयवस्य व्यवधायकत्वाभाव इति प्रवादस्य तु स्वत्वेनाभिमतो यस्तदानुपूर्वीघटकस्य स्वव्यवधायकत्वाभाव इत्येवार्थः, तदिदमभिसन्धाय 'पादः पत्' (६.४.१३०) इति सूत्रे भाष्ये प्रकृतपरिभाषोदाहरणत्वेनोपदर्शितेषु 'सर्वस्यै' इत्यादिषु यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवतीत्याशङ्क्य निर्दिश्यमानस्य आगमेन व्यवधानादिति तत्र तत्र समाहितम्। 'विभाषेटः' (८.३.७९) इति सूत्रस्थमिटः परत्वेन षीध्वमादयो न विशेष्यन्ते, अवयवावयविनोः पौर्वापर्यासम्भवादिति तु चिन्त्यमेव। निर्दिश्यमानषीध्वमादेरिडवधिकपरत्वस्याबाधितत्वादित्यन्यत्र प्रपञ्चितम्।

नन्वेवमपि निर्दिश्यमानपदस्यावृत्तिमन्तरेणैकेनैव वाक्येन साक्षात्परम्परासाधारण्येनानया परिभाषया निर्दिश्यमानस्यादेशसम्बन्धो बोध्यत

इत्यभ्युपगमो यदि तदा अवयवषष्ठीविषये चरितार्थायाः प्रकृतपरिभाषायाः 'सार्वधातुकार्धधातुकयोः' (७.३.८४) इत्यादौ चरितार्थेन 'अलोऽन्त्यस्य' (१.१.५२)इत्यनेन परत्वाद्बाधाद्दिशब्दादाचारक्विबन्तात्कर्तृक्विपि द्विच्छब्दे तान्तस्यानिर्दिश्यमानस्यापि त्यदाद्यत्वप्रसङ्गः; तथा 'सन्लिटोर्जः' (७.३.५७) इत्यादौ साव्रकाशेन 'आदेः परस्य' (१.१.५४) इत्यनेन परत्वाद्बाधात् 'उदः स्थात्' (८.४.६१) इत्यत्र पूर्वसवर्णो दुर्वार इत्यत आह — 'अन्त्यस्य च' इति ।

'विरोधाभावात्' इति पदार्थसमन्वयकाल एवोपदोपस्थापनेन पदैकवाक्यतया विध्युपकाराय प्रवर्तमाना हि प्रकृतपरिभाषा वाक्यार्थबोधोत्तरं वाक्यैकवाक्यतया नियमेन स्थानिविशेषनिर्णयात्मने विध्युपकाराय प्रवर्तमानाश्च 'अलोऽन्त्यस्य' (१.१.५२) इत्यादय इति विभिन्नकालप्रवृत्तिकत्वात्कथं विरोधः ? असति विरोधे कथं बाध्यबाधकभावः ?. तस्मात् 'त्यदादीनामः' (७.२.१०२) इत्यादौ त्यदाद्यन्ताङ्गावयवीभूतानां निर्दिश्यमानानामकारो भवन्नन्त्यस्य भवतीत्येवं समावेश एवेति भावः ।

नन्वेवमुपजीव्यत्वात् 'अलोऽन्त्यस्य' (१.१.५२) इत्यादिभिरस्याः साक्षादेव सम्बन्धोऽस्तु । प्रकृतपरिभाषासङ्गृहीताभिश्च 'अलोऽन्त्यस्य' (१.१.५२) इत्यादिभिस्त्यदाद्यन्तानामकारो भवन्निर्दिश्यमानान्त्यस्य भवतीत्येवं सकृदेव विध्युपकार इत्यपरमनुकूलमित्यत आह —

नाप्यङ्गाङ्गिभावः । उभयोरपि परार्थत्वेन तदयोगात् । 'अनेकालुशित्' (१.१.५५) इति सूत्रे सर्वैश्चैतत्परिभाषाबोधित एव गृह्यते । यत्तु 'आदेः परस्य' (१.१.५४) 'अलोऽन्त्यस्य' (१.१.५२) इत्येतावेतद्बाधकाविति; तन्न । 'उदः स्थात्' (८.४.६१) इति सूत्रविषये अस्याः 'पादः पत्' (६.४.१३०) इति सूत्रे भाष्ये सञ्चारितत्वात् । नाप्येतयोरियं बाधिका । तयोर्निर्विषयत्वप्रसङ्गात्, इति 'तिरिंशति' (६.४.१४२) इति सूत्रे कैयटः ।

'नाप्यङ्गाङ्गिभावः' इति । 'परार्थत्वेन' इति । 'गुणानाञ्च परार्थत्वात्' (मी. द. ३.१.२२) इति न्यायेनेति भावः । सति त्वङ्गाङ्गिभावे 'अलोऽन्त्यस्य' (१.१.५२) 'आदेः परस्य' (१.१.५४) इत्यनयोर्निर्दिश्यमानप्रदेशेष्वप्रवृत्त्यापत्तिः । ननु सत्यपि समावेशे 'पादः पत्' (६.४.१३०) इत्यादौ 'अनेकाल्' (१.१.५५) सूत्रैकवाक्यतया पाच्छब्दान्ताङ्गावयवस्य निर्दिश्यमानस्य 'पदादेशो भवन् सर्वस्य भवति' इत्यर्थे सर्वशब्दस्य बुद्धिविषयतावच्छेदकधर्मावच्छिन्नपरतया तदन्तस्याप्यादेशो दुर्वार इत्यत आह 'अनेकाल्' इति । 'एतत्परिभाषाबोधित एव' इति । एतद्विषयकत्वेनोपप्लुतनिर्दिश्यमानांशस्य नैष्फल्यमेवात्र हेतुः । 'एतद्बाधकौ' इति । प्रकृतपरिभाषाया अवयवषष्ठीविषये चारितार्थ्यादनिर्दिश्यमानांशे सावकाशयोस्तयोः परत्वं बाधप्रयोजकम् । भिन्नकालप्रवृत्तिकयोरपि पौर्वापर्यं बाधप्रयोजकत्वेन दृष्टम् । आदिवृद्धेरन्त्योपधावृद्धयोश्चेति भावः ।

'उदः स्थात्' (८.४.६१) इति सूत्रविषये' इति । उदः स्थादित्येतदुदाहरणविषयकं यत्सूत्रं 'उदः स्थास्तम्भोः' (८.४.६१) इति तद्रूपे 'आदेः परस्य' (१.१.५४) इत्येतत्परिभाषायाविषये इत्यर्थः । ननु निर्दिश्यमानपदस्यावृत्तिवशादर्थद्वये पृथगेव व्यापार इत्यभ्युपगमे स्थानषष्ठ्यन्तनिर्दिश्यमानांशस्य 'अलोऽन्त्यस्य' (१.१.५२) इत्याद्यप्राप्तियोग्ये क्वापि चारितार्थ्याभावत्सत्यपि सम्भवे बाधनं भवतीति न्यायेन प्रथमद्विर्वचनस्य द्वितीयाद्विर्वचनमिव परिभाषेयं तयोर्बाधिका स्यादित्याशङ्क्य परिहरति—'नाप्येतयोः' इति । 'निर्विषयत्वप्रसङ्गात्' इति ।

ननु 'सार्वधातुकार्धधातुकयोः' (७.३.८४) इत्यादावुपस्थितस्येक्पदस्य श्रुतत्वाभावात्तद्बोध्यानां न निर्दिश्यमानत्वम् । 'सन्लिटोर्जेः' (७.३.५७) इत्यादौ उपस्थितपरशब्दबोध्योऽपि तादृश एव । यतश्च कथमनयोर्निर्विषयत्वमिति चेत् ? अत्राहुः; 'न भूसुधियोः' (६.४.८५) इति ज्ञापकेन ग्राहकशास्त्रविषयाणामविशेषेण निर्दिश्यमानत्वमितीक्पदबोध्यानामस्त्येवं तत्त्वम् । अत एव 'इको यणचि' (६.१.७७) इत्यादावपि न क्षतिः । 'सन्लिटोः' (७.३.५७) इत्यत्रापि मण्डूकानुवृत्त्या व्यञ्जोरित्यस्य सम्बन्धः ।

किञ्च तावन्मात्रफलकत्वे तत्रैवादेरिति ब्रूयात्। 'क्विन्प्रत्ययस्य कुः' (८.२.६२) इत्यत्र पदान्तग्रहणं सम्बध्यत एव। अन्यत्र स्थानी निर्दिष्ट एवेति केन तयोर्विषयः।

सिद्धान्ते तु 'दृप्तन्तरुपसर्गेभ्योऽप ईत्' (१.१.१९), 'त्यदादीनामः' (७.२.१०२) इत्यादिभिरादयन्तयोरेवादेशप्रवृत्त्यर्थमावश्यकयो ते इति। वस्तुतो निर्विषयत्वं न समावेशसाधको हेतुः। तस्योभयसाधारणतया पर्यायतायां अपि सुवचत्वात्। तस्मादिह समावेशे 'पादः पत्' (६.४.१३०) इति सूत्रस्थं प्रागुक्तं भाष्यमेव शरणमिति प्रामाणिकः पन्थाः। तदेतदभ्युपगम्याह — 'कैयटः' इति। 'तिविंशतेः' (६.४.१४२) इत्यत्र सूत्रारम्भादेव 'अलोऽन्त्य' (१.१.५२) परिभाषाया निवृत्तिः। तिग्रहणाच्च सर्वादेशताया इति निर्दिश्यमानस्यैव लोपप्रवृत्तावनुपयोग एव निर्दिश्यमान-परिभाषाया इत्यपि तत्रैव कैयटः। स्यादेतत्; प्रकृतपरिभाषायाः 'अलोऽन्त्यस्य' (१.१.५१) इत्यनया समावेशे यदुक्तं 'अलोन्त्य' (१.१.५२), सूत्रशेखरे 'अल इति किम्? अन्त्यस्य पदस्य मा भूत्, स्वनडुद्भ्याम्' इति; तद्विरुध्येत। समावेशे सत्यनडुच्छब्दान्तपदावयवस्य निर्दिश्यमानस्य दकारो भवन्नन्त्यस्य भवतीत्यर्थं हकारस्यैव तत्प्रवृत्त्या दोषाभावात्।

न च व्यपदेशिवद्भावेनान्त्यत्वं स्वतो निर्दिश्यमानत्वञ्चेत्यनडुच्छब्दात्मकस्य पदस्यैव तत्प्रवृत्तिरिति वाच्यम्। तथा सति केवलेऽपि 'अनडुद्भ्याम्' इत्यत्र दोषसम्भवेन तदन्तपर्यन्तानुधावनप्रयासवैफल्यापत्तेः।

न च मुख्यान्त्यसम्भवे परिभाषायां गौणान्त्यग्रहणस्यायुक्तत्वात्सामानाधिकरण्यानुरोधाच्च समुदायनिरूपितान्त्यत्ववतो निर्दिश्यमानस्यानडुच्छब्दस्यैव तत्प्रवृत्त्यापत्तिरिति वाच्यम्। वाक्यैकवाक्यतया एव तत्र निरूढतया निर्दिश्यमानस्यादेशो भवन्नन्त्यस्येत्युक्ते प्रत्यासत्त्या निर्दिश्यमान-निरूपितान्त्यत्ववतो ग्रहीतुमौचित्येन तत्र मुख्यत्वसामानाधिकरण्ययोर्दुर्वचत्वादिति चेत्? सत्यम्; 'अलः' इत्यस्याभावे निर्दिश्यमानान्त्यस्य उहशब्दस्य स्यादित्याशयादविरोधः।

न च 'अनचो डश्च' इति विहितक्विप्प्रत्ययान्तेन उहशब्देन 'गति-

कारक:' (६.२.१३९) इत्यादिसिद्धन्तवशात्सुबुत्पत्तेः पूर्वमेव समासे तस्य पदसंज्ञाया दुर्वचत्वात् पदस्य मा भूदित्युक्तिरसङ्गतैवेति वाच्यम्। पदशब्देनाश्रेयवद्वर्णसङ्घातस्य विवक्षितत्वेनादोषात्। प्रक्रियानिर्वाहाय कल्पितार्थवत्ता हि तत्रापि सुलभा। कथमन्यथा 'स्वनड्वुद्भ्याम्' इत्यत्रानड्वुच्छब्दस्य वा पदत्वं 'उत्तरपदत्वे च' इति निषेधात्।

यद्यपि केवलानुडुच्छब्द एव निरुक्तरीत्या दोषसम्भवेन तदन्तपर्यन्तानुधावनवैफल्यं तदवस्थमेव, तथापि समावेशस्फूर्त्यर्थमेव तथा प्रदर्शनमिति वदन्ति।

ननु तन्मध्यपतितन्यायगोचरस्य निर्दिश्यमानत्वे 'हुझल्भ्यः' (६.४.१०१) इति सूत्रस्थभाष्यविरोधः। तत्र हि 'भिन्धकी' इत्यत्राकचि कृते निर्दिश्यमानस्य हेरभावाद्धित्वं न प्राप्नोतीत्याशङ्क्य परत्वाद्धित्वमित्याहिना समाहितम्।

यदि च तस्य निर्दिश्यमानत्वाभावस्तर्हि 'त्यादादि (७.२.१०२) सूत्रस्थभाष्यविरोधः। तत्र हि कादेशः खल्ववश्यं वक्तव्यः। साकच्कार्थमित्युक्तम्। ततश्च किमत्र न्याय्यमत आह--

'अकच्' विषये नायं न्यायः। स्थानिवद्भावेनैव तन्मध्यपतितन्यायेन (प. ८९) तदबुद्धयैव कार्यजननात्। इयञ्चावयवषष्ठीविषयेऽपि। अत एव 'तदोः सः सौ' (७.२.१०६) इति 'सत्वमतिस्य' इत्यत्रोपसर्गतकारस्य न। निर्दिश्यमानयुष्यदस्मदाद्यवयवमपर्यन्तस्यैव; यूयादयो न त्वतियूयमित्यादौ सोपसर्गावयवमपर्यन्तस्येति बोध्यम्। 'पादः पत्' (६.४.१३०) इति सूत्रे 'षष्ठी स्थानेयोगा' (१.१.४९) इति सूत्रे भाष्ये स्पष्टैषा।

'अकञ्विषये नायम्' इति 'तदबुद्धयैव' इति। तन्मध्यपतितन्यायेन (प. ८९) निर्दिश्यमानत्वस्याप्यतिदेशः। तत्र च 'त्यदादि' (७.२.१०२) सूत्रस्थमुपदर्शितमेव भाष्यं मानम्। 'हुझल्भ्यः'

(६.४.१०१) इति सूत्रस्थन्तु भाष्यमेकदेशिन एव । अन्तरङ्गत्वात्प्राप्तस्य परत्वेन बाधयोगादिति स्पष्टमेव तद्विद्वांसमित्याशयः ।

अत एव 'नेदमदसोरकोः' (७.१.११) इति ककारवत्पर्युदासस्य तादृशन्यायज्ञापकत्वोपपादनपर, 'येन विधि' (१.१.७२) सूत्रस्थभाष्यमप्युपपद्यते । अन्यथा साकच्कयोरिमदसो निर्दिश्यमानत्वाभावेन त्यदाद्यत्वाप्राप्त्या स्वांशे चरितार्थ्ययोगात्तदसङ्गतिः स्पष्टैव । निर्दिश्यमानावयवरूपमेव वेत्यंशस्य फलमाह—'इयङ्' इति ।

'अतिस्यः' इति । अनन्त्यविकारपरिभाषया तु नात्र निर्वाहः । अन्त्यवर्णतद्गुणयोरितराव्यवधान एव प्रवृत्तेरिति द्रष्टव्यम् ।

अवयवषष्ठीविषये प्रवृत्तौ बीजमाह—'पादः पत्' इत्यादि । 'भाष्ये स्पष्टा' इति । 'अतिस्यः' 'सुपदः' इत्याद्युभयविधोदाहरणप्रदर्शनादर्थद्वयपरत्वेनेयं परिभाषा भाष्ये स्पष्टेत्यर्थः । निर्दिश्यमानावयवस्थानेन युज्यत इत्येव निर्दिश्यमानस्यापि व्यपदेशिवद्भावेन निर्दिश्यमानावयवतया निर्वाहे निर्दिश्यमानस्थानेन युज्यत इत्यंशो नातीवोपयुज्यते, निर्दिश्यमानावयवरूपमेव वेत्येवकारं पठन्नुपाध्यायोऽप्यमुमर्थमभिप्रैतीत्याहुः ।

केचित्तु स्थान्यादेशभावतात्पर्यविषयभूते विधावुद्देश्यत्वेन साक्षादुच्चार्यमाण एवेह निर्दिश्यमानपदार्थः । "तृज्वत्क्रोष्टुः' (७.१.९५) इत्यादेरतिदेशरूपत्वेन वाच्यवृत्त्या स्थान्यादेशभावबोधकत्वाभावेऽपि तात्पर्यविषयताया अव्याघातात् 'प्रियक्रोष्टा' इत्यादिसिद्धिः । 'येन विधि' (१.१.७२) शास्त्रबोधितस्य 'यदागम' (प. ११), न्यायलब्धस्य च साक्षादुच्चारणाभावान्न निर्दिश्यमानताप्रसङ्गः । 'हयवरट्' (मा. सू. ५)' सूत्रस्थञ्च भाष्यमन्तग्रहणसहसम्बद्धस्यैव पदाधिकारस्यात्र सम्बन्धात्पदान्ते वर्तमानस्य विसर्जनीयस्येत्यर्थः ।

यद्वा पदाधिकारस्यान्यत्र प्रायेणावयवषष्ठ्यन्ततायां अपि क्वचित्ततया प्रकृतेऽपि पदावयवस्य विसर्जनीयस्येत्यर्थः । मास्तु वा पदाधिकारो मण्डूकानुवृत्तेरपि बहुशो दर्शनादित्यनेकधा नास्ति 'अलोऽन्त्य' (१.१.५२) परिभाषाया उपयोगः । यस्य षष्ठ्या निर्देशस्तस्यैवादेश इत्यभिप्रायकं, न तु प्रकृत-

परिभाषाप्रवृत्तितात्पर्यकम्। उक्तप्रकारेण नियमाभावान्नियमकारिण्याः परिभाषायाः प्रवृत्त्ययोगात्।

इत्थमेव धात्वादिसंज्ञाविषयस्य निर्दिश्यमानत्वाभावेऽपि न क्षतिः। तन्मध्यपतितलिङ्गविशिष्टपरिभाषाभ्याञ्च तत्तद्भाष्यप्रामाण्यात् 'स्थानिवत्' (१.३.९) सूत्रेणैव निर्दिश्यमानताया अप्यतिदेश इत्यदोषः।

अवयवषष्ठीविषये तु नास्या परिभाषायाः प्रवृत्तिः। प्रदेशेषु स्थानिसमर्पकस्यैव परिभाषोपस्थापकतया स्वोपस्थापकसामानाधिकरण्यानुरोधेन स्थानषष्ठीविषयतायां एव युक्तत्वात्। परिभाषाया आवृत्तिवशेनार्थद्वयपरत्वाश्रयणेनोभयविषयकत्वमिति चायुक्तमेव, गौरवात्।

'तदोः सः सौ' (७.२.१०६) इत्यादौ तु लक्ष्यानुसारिणा वैयधिकरण्यान्वयेनैव निर्वाहोऽङ्गस्य त्यदादीनां तदोः सकार इति। 'पादः पत्' (६.४.१३०) इत्यादौ च 'सर्वस्यै' इत्यादौ स्मायादिवारणार्थं 'प्रपठ्य' इत्यादौ तदन्तस्य ल्यब्वारणार्थं चावश्यस्वीकर्तव्यया प्रकृतपरिभाषयैव सामानाधिकरण्येनोपपत्तौ जघन्यस्य वैयधिकरण्यस्यायुक्तता निमित्तसन्निधानभावश्चेति 'सुपदः' इत्यादेर्नैतदुदाहरणत्वप्रदर्शनपरभाष्यासङ्गतिः।

तस्मादवयवषष्ठीविषये प्रकृतपरिभाषाविषयत्वोपपादनं भाष्यस्थमेकदेशिवाद एवेति 'पादः पत्' (६.४.१३०) इति सूत्रस्थकैयटात्प्रतीयते। एवाच्चानुवर्तमानत्यदादिपदबोध्यानामनिर्दिश्यमानत्वेऽपि 'अति सः' इत्याद्यभीष्टसिद्धिरिति वदन्ति।

उक्तपरिभाषा स्थानिप्रयुक्तमनिष्टं वारयति, इयन्तु आदेशकृतमित्यनयोः सङ्गतिः। तदाह—

ननु च 'इतः' इत्यादौ ह्रस्वस्येकारस्य प्रमाणात आन्तर्यात्तस्यादकारोऽपि स्यादत आह—

१३. यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः।

'ननु चैतः' इत्यादि। 'अकारोऽपि' इति। 'स्थानेऽन्तरतमः' (१.१.५०) इत्यत्र प्रथमान्त एव पाठो न तु सप्तम्यन्तः। अन्यथा स्थानिन्यन्तरतमे भवत्यादेश इत्यर्थे विसदृशस्थानिव्यावृत्तौ 'इको यणचि' (६.१.७७) इत्यनेन दीर्घाणामादेशानापत्तिः। 'नादिन्याक्रोशे पुत्रस्य' (८.४.४८) 'ल्वादिभ्यः' (८.२.४४) इत्यादिनिर्देशानां तद्दोषनिवारणोपायत्वेनाभ्युपगमे च प्रथमान्तपाठसाधकत्वमेव तस्य युक्तं लाघवात्।

तस्माद्विसदृशादेशानिवर्तनार्थमेवेदं सूत्रम्। अस्याञ्चावस्थायां स्थानिनिरूपितान्तर्यस्य एङकारोभयसाधारणत्वेन पाक्षिक एवात्राकारप्रसङ्ग इति भावः। यादृशादेशविषये स्थानतद्भिन्नप्रयोज्यमनेकविधं स्थानिनिरूपितमान्तर्यमादेशप्रवर्तकतया प्रसक्तं तत्र स्थानप्रयोज्यमान्तर्यं बलीय इति परिभाषार्थः। बलीयस्त्वञ्च अन्यानपेक्षस्थानप्रयोज्यस्वप्रयुक्तकार्यनिर्वाहकत्वेन।

ननु स्थानकृतान्तर्यस्य स्वातन्त्र्येणादेशप्रवर्तकत्वे 'वाग्घरिः' इत्यादौ जायमानश्चतुर्थवदन्योऽपि स्यात्। एवं 'हो हन्तेः' (७.३.५४) इति कुत्वविषयेऽपि दोष एवेति चेत्? सत्यम्; संवृतावर्णस्य संवृतावर्णो विवृतावर्णस्य विवृतावर्ण इति 'एचोऽयवायावः' (६.१.७८) इत्येतद्विषयक 'यथासंख्य' (१.३.१०) सूत्रस्थभाष्यप्रामाण्येन यत्र स्थानकृतान्तर्यव्यधिकरणस्यैव गुणादिकृतान्तर्यस्य कार्यप्रवर्तकत्वेन प्रसक्तिस्तत्रैवास्याः परिभाषायाः प्रवृत्तिरित्यभ्युपगम्यते। 'वाग्घरिः' इत्यादौ स्थानकृतान्तर्यसमानाधिकरणस्यैव गुणकृतान्तर्यस्य प्रसक्तिरिति न तत्र स्थानकृतान्तर्यस्य प्राबल्यमनया बोध्यत इति न दोषः।

अनेकविधं स्थानार्थगुणप्रमाणकृतम्। अत्र मानं–'षष्ठी स्थानेयोगा' (१.१.४९) इत्यत एकदेशानुवृत्त्या 'स्थानेग्रहणे' अनुवर्तमाने पुनः 'स्थानेऽन्तरतमः' (१.१.५०) इति सूत्रे 'स्थाने' ग्रहणमेव। तद्धि तृतीयया विपरिणमय्य वाक्यभेदेन स्थानिनः प्रसङ्गे जायमानः सति सम्भवे स्थानत एवान्तरतम इत्यर्थकम्। 'तमब्ग्रहणमेवानेकविधान्तर्यसत्तागमकम्।

स्थानतः- स्थानेनेत्यर्थः । तत्र स्थानतः आन्तर्यं 'इको यणचि' (६.१.७७) इत्यादौ प्रसिद्धिमेव । अर्थतः 'पदन्' इत्यादौ स्थान्यर्थाभिधानसमर्थस्यैवादेशतेति सिद्धान्तात् तदर्थाभिधानसमर्थो यः स तस्यादेश इति तत्समानार्थतत्समानवर्णपादादीनां ते ।

'स्थानार्थगुणप्रमाणकृतम्' इति । उक्तत्रितयातिरिक्तः सादृश्यप्रयोजको वर्णगतो धर्म इह गुणपदार्थः । न तु बाह्यप्रयत्नमात्रम् । एतेनान्तर्यमेवैतयोरान्तर्यमिति 'उरण् रपरः' (१.१.५१) इति सूत्रभाष्योदीरितस्यानान्तर्यस्याधिक्यस्य सत्त्वादुक्तपरिगणनमयुक्तमित्यपास्तम् ।

'एकदेशानुवृत्त्या' इति । एकदेशस्यानुवृत्तिर्यया स्वतत्वप्रतिज्ञया तयेत्यर्थः । 'वाक्यभेदेन' इति । तत्र प्रथमे वाक्ये तमबर्थस्याविवक्षा । द्वितीये च स्थानपदं तालवादिस्थानपरं समर्थ्यादिति बोध्यम् ।

'सति सम्भवे' इति । स्थानकृतस्य गुणादिकृतस्य चान्तर्यस्य परस्परवैयधिकरण्येन यत्र कार्यसमर्पकत्वं तत्रेत्यर्थः । इदञ्च पूर्ववाक्यवैयर्थ्यालभ्यते । 'इत्यर्थकम्' इति । सम्पद्यत इति शेषः । अतो न 'विपरिणमय्य' इति ल्यबन्तस्यानुपपत्तिः । न त्वनेकेषामान्तर्यनिरूपकाणां प्रमाणसिद्धत्वे तत्तदान्तर्यप्रयुक्तकार्यसमर्पणाय सूत्रस्योपयोगाद्वाक्यभेदेनोक्तार्थसिद्धिरिति वक्तुं युक्तम् ।

तदभावे च कथं वाक्यभेद इत्यत आह--'तमब्ग्रहणमेव' इति । ननु विनापि वाक्यभेदं स्थानेन योऽन्यतरत्तमस्स भवतीत्यर्थकतया स्थानकृतान्तर्यस्यैवान्यूनानतिरिक्तत्वरूपातिशयलाभाय तमब्ग्रहणं भविष्यति । 'लाकृतिः' इत्यादौ वकारव्यावृत्तिः फलमान्तर्यस्यादेशसमर्पकत्वमन्यथैव सिद्धम् ।

'न च यथासंख्यविज्ञानात् 'इको यणचि' (६.१.७७) इत्यत्र वकारव्यावृत्तौ नैव तत्फलमिति वाच्यम् । तथा सति सावर्ण्यवशाद्वकारलृकार-

राम्यां परस्परग्रहणेनादेशव्यत्यासस्य दुर्वारत्वात् । किञ्च 'हरीणाम्', 'गुरूणाम्' इत्यादौ दीर्घविधानेन प्राप्तस्यैकारादेर्वारणमपि फलम्, ततश्चानेकविधान्तर्यसत्तायां न प्रामाण्यसम्भवः तमप्रत्ययस्येति, आयुक्त एव तन्मूलको वाक्यभेद इति चेत् ? मैवम्; अन्तरेणाति तमब्ग्रहणं 'स्थानेऽन्तरः' इत्युक्तावप्यस्यामवस्थायां स्थानग्रहणसामर्थ्यादेव अन्यूनानतिरिक्तत्वरूपातिशयविशिष्टतालव्वादिकृतमेवान्तर्यमित्यर्थस्य सुलभतया प्रागुक्तदोषनिवारणसम्भवादवशिष्टं तमब्ग्रहणमभीष्टसाधकमेवेत्याशयात् । किञ्चान्यूनानतिरिक्तस्थानकस्यादेशस्य सम्भवे तद्विधानेन चरितार्थस्य शास्त्रस्य न्यूनाधिकस्थानकस्याप्यादेशस्य विधायकत्वे मानाभावाच्चेति दिक् ।

पूर्ववाक्यफलं क्रमेणोदाहरति—'तत्र' इत्यादि । 'प्रसिद्धमेव' इति । यदि च तत्र स्वमते यथासंख्यसूत्रेणैव निर्वाहः । परस्परसावर्ण्यप्रयुक्तादेशव्यत्यासस्तु तदीयसवर्ण्यानित्यत्वेनाक्षरसमाम्नायिकलृकारोपदेशज्ञापितेनैव भवतीति सिद्धान्तितम् । अतः कथं 'इको यणचि' (६.१.७५) इत्यस्यैतदुदाहरणत्वमित्युच्यते तर्हर्यादिपदग्राह्येषु 'अकः सवर्णे दीर्घः' (६.१.१०१) इत्यादिषु फलं द्रष्टव्यम् । 'पहन्न इत्यादौ' इति । नन्वत्र स्थानिनामनुच्चारणात् आदेशनिरूपितान्तर्यवतां स्थानिनामेव व्यावर्तनीयतया विसदृशव्यावर्तनार्थे प्रथमान्तपाठे कथमस्योदाहरणत्वम् ? तत्राह—'स्थान्यर्थाभिधानसमर्थस्य' इत्यादि ।

अयं भावः—आन्तर्यस्य स्थान्यादेशभावप्रयोजकत्वमूलक एव ह्ययं सिद्धान्तः । तत्रादेशेषु स्थान्यर्थाभिधायकत्वग्रहे तत्स्थानिषु तदर्थाभिधायकत्वस्य तुल्यवित्तिवेद्यतया तद्ग्रहस्यापि सौलभ्यात्पदाद्यादेशैरनुमीयमानाः स्थानिनोऽप्यादेशसमानर्थकाः पदादयो लभ्यन्ते इत्यादेशाः सदृशा एव भवन्ति ।

यदि च स्थान्यादेशभावप्रयोजकत्वमर्थकृतान्तर्यस्य न स्यात्तर्ह्यसमानार्थकानामपि स्थानिनामाक्षेपः स्यादिति विसदृशा अप्यादेशा भवेयुरतस्तन्निवृत्तिप्रयोजकत्वमस्याः परिभाषाया इति । तदाह—'तत्समानर्थ' इति । नन्वर्थस्यैवेह व्यवस्थापकत्वे चरणशब्दस्यापि पदादेशापत्तौ 'पदङ्घ्रिश्चरणोऽ-

स्त्रियाम्' इति (अमर. २.६.७१) कोशात्तस्य द्विलिङ्गतया 'चरणानि' इतिवत् 'पन्दि' इत्यस्याप्यापत्तिः ।

न च स्थान्यर्थाभिधानसमर्थस्यैवादेशतया नपुंसकत्वविशिष्टार्थाभिधानसामर्थ्याभावादेव न तादृशस्य चरणशब्दस्य पदादेश इति वाच्यम् । एवमपि रात्रिशब्दस्य निशादेशे तस्मिन्परतो 'रूपरात्रि' इत्यहन् शब्दस्य रुत्वापत्तेः ।

न च 'नलोपः प्रातिपदिकान्तस्य' (८.२.७) इति सूत्रस्थभाष्यपर्यालोचनया रात्रेति समासान्तघटितस्यैव पाठान्नायं दोष इति वाच्यम् । एवमपि मुखशब्दस्यासन्नदेशे तस्य 'मुखं स्वाङ्गम्' (६.२.१०२) इति बहुव्रीहावन्तोदात्तत्वे 'गौरास्न' इत्यादौ उदात्तनिवृत्तिस्वरापत्तेः । तथा अम्भःशब्दस्योदन्नादेशे 'ओजःसहोम्भस्तमसस्तृतीयायाः' इति 'अम्भसा कृतम्' इत्यत्रेव उदा कृतमित्यत्राप्यलुक्प्रसङ्ग इत्यत आह—'तत्समानवर्ण' इति । तत्त्वञ्च तदवयवीभूतवर्णजनकस्थानजन्यवर्णावयवकत्वम् । एवञ्च स्थानत आन्तर्यस्यापि सहायतया कार्यसमर्पकत्वे सम्भवति तदुपेक्षायां मानाभाव इत्याशयः ।

ननु पादादीनां पदादीनाञ्च सार्वत्रिकत्वेन प्रयोगविषयतायाः प्रसक्तौ नियतप्रयोगलाभार्थमेवेदं सूत्रं, न तु स्थान्यादेशभावबोधनार्थमिति प्रकृतसूत्रे भाष्यकृता सिद्धान्तितम् । ततश्च कथमिदमुदाहरणमत आह—

'तृज्वत्क्रोष्टुः' (७.१.९५) इति च । गुणतो 'वाग्घरिः' इत्यादौ । प्रमाणतः 'अदसोऽसेः' (८.२.८०) इत्यादौ । स्थानेऽन्तरतमः' (१.१.५०) सूत्रे भाष्ये स्पष्टैषा ।

'तृज्वत्क्रोष्टुः' इति । इदमपि प्रयोगनियमार्थमेव सूत्रमित्याग्रहे तु पुंवद्भावविषये 'वातण्डयुवतिः, दारदवृन्दारिका' इत्यादीन्युदाहरणानि द्रष्टव्यानि । 'गुणतो वाग्घरिरित्यादौ' इति । आभ्यन्तरप्रयत्नस्याप्यत्र बाह्यप्रयत्नवद्गुणत्वेनाभिमतत्वाद्विवृताघोषस्य महाप्राणस्य सूत्र्य तादृश एव षकार इत्यादेर्नासङ्गतिः ।

'प्रमाणतोऽदसोसेः' इति । अत्र द्विमात्रिकभिन्नत्वमेव ह्रस्वव्यञ्जनयोरान्तर्यमिति प्रतीयते । केचित्तु कवयः कविभिः इत्यादिभाष्यकारोदीरितलोकदृष्टान्तबलादेव विसदृशादेशव्यावृत्तावारभ्यमाणां सूत्रमनावृत्तमेव प्रकृतमर्थं संगृह्णातीति न सूत्रावृत्तिमूलकवाक्यभेदस्योपयोगः । अनेकविधान्तर्यमन्तरापि लोकत एव सिद्धा । न हि सादृश्यप्रयोजकानां धर्माणां शास्त्रैकसमधिगम्यता क्वचिद्दृष्टा । तस्मादिह तमब्ग्रहणमस्य सूत्रस्य नियामकतया स्थानव्यतिरिक्तानामान्तर्यप्रयोजकतानिवर्तकत्वभ्रमनिरासार्थमेव । किञ्च गुरोः स्थाने तत्कार्याचरणसमर्थ एव शिष्यो यथा याज्यकुलानि प्राप्नोति तद्वत् शब्दस्याप्यर्थविशेषप्रतिपादनायोच्चारणप्रसङ्गे विधीयमानोऽपि शब्दस्तदर्थाभिधानसमर्थ एव भवतीति वस्तुस्थितिरेव ।

एवञ्च विसदृशार्थकादेशव्यावृत्तये प्रयत्नान्तरानुसरणं वृथैव । गुणशब्दस्त्विह वर्णवृत्तिधर्ममात्रपरः । स्थानन्तु न तथेति तस्य पृथगुक्तिः । आभ्यन्तरप्रयत्ना अपि बाह्यप्रत्नवद्वर्णेष्वारोपिता वर्णधर्मा एव । अनान्तर्यमपि आन्तर्यप्रयोजकस्थानराहित्यमेवेति न वर्णधर्मादतिरेकः । प्रमाणस्य ह्रस्वत्वादेरपि तथात्वाविशेषाद्गुणत्वमेव । इत्थञ्च स्थानगुणकृतमेवान्तर्यमिति सारम् । ब्राह्मणवशिष्ठन्यायेन तु पृथगुक्तिरिति युक्तमित्याहुः ।

इत्थं स्थान्यादेशभावकृतस्यातिप्रसङ्गस्य वारणे निमित्तिनिमित्तभावकृतस्याप्यतिप्रसङ्गस्य वारणं क्रमप्राप्तमिति सूचयन्नवतारयति —

ननु 'प्रोढवान्' इत्यत्र 'ग्रादूहोढे' (व. ६८०) इति वृद्धिः स्यादत आह —

१४. अर्थवद्ग्रहणे नानर्थकस्य ।

विशिष्टरूपोपादाने उपस्थितार्थस्य विशेषणतयाऽन्वयसम्भवे, त्यागे मानाभावोऽस्या मूलम् ।

ननु 'प्रोढवान्' इत्यादि । 'वृद्धिः स्यात्' इति । तथा 'गामुत् स्थानम्'

इत्यत्र 'उदः स्था' (८.४.६१) इति पूर्वसवर्णश्च स्यादित्यपि बोध्यम्। अर्थविशिष्टस्य ग्रहणे सम्भवति तद्रहितस्य ग्रहणं नेति परिभाषार्थः।

परिभाषासिद्धिं प्रदर्शयति 'विशिष्टरूपोपादाने' इति। वृत्तिनिरूपितावच्छेदकीभूतानुपूर्वीविशेषविशिष्टवर्णसमूहात्मकशब्दस्वरूपोपादाने इति तदर्थः। 'मानाभावोऽस्यां मूलम्' इति। अयं भावः - फलव्यापारयोर्धातूनामिव शब्दानां परस्परविशेषणविशेष्यभावानवगाहित्वरूपविशृङ्खलत्वोपहिता शक्तिरवश्यमभ्युपेया तत्रैकपदस्थाप्ययोरपि परस्परान्वयो व्युत्पत्तिवैचित्र्यात्। पृथगुपस्थितयोश्च तयोर्विशेषणविशेष्यभावे कामचारः। लोकं 'गामानय' इत्यादौ गवादिशब्दप्रकारकोऽर्थविशेष्यकश्च बोधः। शब्दे समभिव्याहृतक्रियाकर्मत्वविरोधात्। 'गामाह' इत्यादौ च शब्दविशेष्यकोऽर्थप्रकारश्च सः। तादृशविरोधादेव 'अग्नेर्ढक्' (४.२.७३) इत्यादौ शास्त्रेऽप्यर्थे कार्यस्य बाधाच्छब्दविशेष्यकोऽर्थप्रकारकश्च बोधो भविष्यतीति सिद्धमिष्टम्।

यद्वा शब्दप्रकारक एवार्थे शब्दानां शक्तिग्रहः। तदनुरोधादुपस्थिते शब्दविशिष्टेऽर्थे तत्तत्कार्यविरोधाद्विशेषणविशेष्यभावव्यत्यासेनार्थविशिष्ट एव शब्दो लक्ष्यत इत्यभीष्टसिद्धिः। ततश्च सर्वथा लोकन्यायसिद्धैवैषा परिभाषा न त्वपूर्वेति।

ननु सिद्धान्ते पदस्य वाक्यस्यैव वाऽर्थवत्त्वं न तु तद्व्यतिरिक्तस्य, ततश्च 'प्रोढः' इत्यत्रापि पदैकदेशभूतस्योढशब्दस्य क्तवतुप्रत्ययान्तोढवच्छब्दैकदेशादविलक्षणत्वेन कथमनया परिभाषया व्यवस्था स्यादत आह—

अत्रार्थः कल्पितान्वयव्यतिरेककल्पितः शास्त्रीयोऽपि गृह्यत इति 'संख्याया अतिशदन्त' (५.१.२२) इति सूत्रे भाष्ये स्पष्टम्। इयञ्च वर्णग्रणेषु नेति 'लस्य' (३.४.७७) इति सूत्रे भाष्ये स्पष्टम्। अत एव 'विशिष्टरूपोपादनविषया' इति वृद्धाः। एतन्मूलकमेव 'येन विधिः' (१.१.७२) इत्यत्र भाष्ये पठ्यते 'अलैवानर्थकेन तदन्तविधिः' इति।

'अत्रार्थः' इत्यादि । प्रक्रियानिर्वाहाय शास्त्रकारकल्पितौ यावन्वयव्यतिरेकौ ताभ्यां कल्पितः प्रकृतिप्रत्ययादीनां यः शास्त्रैकसमधिगम्योऽर्थः शास्त्रीयः, यस्तु लोके विशिष्टपदजन्यप्रतीतिविषयः, तदुभयमप्यत्र गृह्यत इत्यर्थः । द्वितीयस्य फलं पदनिमित्तके कार्ये द्रष्टव्यम् ।

तत्र शास्त्रीयार्थग्रहणे बीजमाह--'संख्याया अतिशदन्तायाः' (५.१.२२) इति भाष्ये इति । तत्र ह्यनेन न्यायेन तिशब्दस्यार्थवतो ग्रहणमित्युक्तम् । नन्वेवं वृत्त्या यत्रान्वययोग्यस्यार्थस्योपस्थितिस्तत्रास्याः परिभाषायाः प्रवृत्तिरिति लब्धम् । ततश्च वर्णमात्रोच्चारणेऽपि 'अकारो वासुदेवः स्यात्' इत्यादिकोशबलात्तथाविधार्थोपस्थितेः सुवचत्वाद्विशिष्टरूपोपादान इत्यसङ्गतमत आह – 'इयञ्च' इति । 'लस्य' (३.४.७७) इति सूत्रेभाष्ये इति ।

तत्र हि लिट् 'लुनाति' इत्यादौ तिबादिकमाशङ्क्य विहितविशेषणाश्रयणेन समाहितम् । वर्णग्रहणेऽप्यस्याः परिभाषायाः प्रवृत्तौ लुनात्यादिलकारस्यानर्थक्यादेव तदप्राप्तेस्तदसङ्गतिरेव । ततो विशिष्टरूपोपादानविषयत्वमस्याः सिद्धमिति भावः ।

'न भूसुधियोः' (६.४.८५) इति निषेधोऽप्यत्रार्थे प्रमाणम् । अर्थवतोरेवेकारोकारयोर्ग्रहणे हि निषेधो निरर्थक एव स्यात् । अत्रार्थे प्राचीनानां विप्रतिपत्तिरपि नेत्याह—'अत एव' इति । वृत्तिकारादयो वृद्धाः । कात्यायनानुकूल्यमत्रार्थे दर्शयति । 'एतन्मूलकमेव' इति । वार्त्तिकमिति शेषः । यदि च वर्णग्रहणेऽप्यस्याः प्रवृत्तिः स्यात्तर्हि 'अनर्थकेन' इति विशेषणमसंबद्धं स्यात् ।

अथास्याः परिभाषाया लोकसिद्धत्वनिर्वाहके पक्षद्वयेऽपि शब्दार्थयोरितरेतरालिङ्गितयोरेव सर्वत्र भाननियमात् 'घटः' 'कलशः' इत्येवं पर्याययोरपि सहप्रयोगापत्तिः । आनुपूर्वीविशेषवैशिष्ट्येनोद्देश्यतावच्छेदकविधेययोर्भेदस्य सुवचत्वात् । यदि त्वानुपूर्वीव्यतिरिक्तकृत एव तयोर्भेदः सामानाधिकरण्ये तन्त्रमनुभवानुरोधित्वात्कार्यकारणभावस्येति मन्यते, तदा क्लेशः ।

किञ्च शब्दानुभवानुरोधिनी शब्दशक्तिः, कारणस्य कार्यानुभवानुरोधेनैव कल्पनीयत्वात् ।

न हि लोके 'गामानय' इत्यादौ शक्यप्रकारकत्वेनार्थभानं, प्रसिद्धमनुकरणेषु वा तत्तदर्थप्रकारकत्वेन शब्दभानं क्वचित्प्रसिद्धम्, किन्त्वेतादृशशक्तिनिर्णायकशाब्दिकसिद्धान्तवासनावतामेव विलक्षणस्तथाभिधानुभवः । न च शक्तिभ्रमादिप्रयुक्त एव लोके विशिष्टबोधाभाव इति वाच्यम् । लाघवात्परस्परानुपहितयोरेव शब्दार्थयोः शक्तिर्विशिष्टबोधश्च शक्तिभ्रमाधीनो लाक्षणिको वेत्यस्यैव युक्तत्वात् ।

अपि च केवल एवार्थे शब्दानां शक्तिः । अनुकरणेष्वितिशब्दसमभिव्याहारे तदभावे वा भेदविवक्षायामनुकार्यानुकरणयोः सादृश्याख्यसम्बन्धेनोपस्थितस्याप्यनुकार्यस्य शाब्दान्वयप्रतियोगित्वं व्युत्पत्तिवैचित्र्यात् । तथाभूतमर्थवत्त्वं प्रातिपदिकसंज्ञानिमित्तम् । 'क्षियः' इत्यादिनिर्देशबलात् ।

अभेदविवक्षायान्तु प्रत्यक्षेण गृहीतस्यैव शाब्दान्वयोपयोगित्वमुक्तरीतेरिति प्राचीनपरिशीलितमार्ग एव युक्तो लघुतरत्वात्, अतः कथमस्याः परिभाषायाः लोकसिद्धत्वमिति विप्रतिपत्तावाह—

किञ्च 'स्वं रूपम्' (१.१.६८) इति शास्त्रे स्वशब्देनात्मीयवाचिना अर्थो गृह्यते । रूपशब्देन स्वरूपं तदुभयं संज्ञि शब्दस्येति तदर्थः । तत्रार्थो न विशेष्यः । तत्र शास्त्रीयकार्यासम्भवात् । किन्तु शब्दस्य विशेषणम् ।

'किञ्च' इति । तत्र यदि शब्दार्थयोः पृथक् शक्तिरिति मतं, तर्ह्यनर्थकेऽपि शब्दे प्रवर्त्तस्य शास्त्रस्य अर्थविशिष्ट एव प्रवृत्त्यर्थमपूर्वतया तत्र शक्तिनिर्णायकं लक्षणातात्पर्यकं वा । यदा तु केवलेऽर्थे शब्दानां वाच्यता क्वचिच्छब्दप्रत्ययस्तु प्रयत्नलभ्य एवेति पक्षस्तदा तद्वाच्यार्थे बाधितस्य सामर्थ्यादविशेषेण तद्वाचकशब्दमात्रे प्रवृत्तस्य उपात्तशब्दे एवेति नियमार्थं 'स्वं रूपम्' (१.१.६८) इत्येतच्छास्त्रमिति विवेकः ।

अत्रेदमवधेयम्—यदा तु पर्यायमात्रे प्रसक्तस्य प्रत्यासत्तिवशादेवोपात्तशब्दे प्रवृत्तिरिति सूत्रं प्रत्याख्यातं, तदा परिभाषासिद्धावापि सैव गतिः। सीरदेवादयस्तु ज्ञापकेनामुमर्थं साधयन्ति; तथा हि 'व्रश्चादि' (८.२.३६) सूत्रे राजेः पृथक् भ्राजिग्रहणं ज्ञापकमस्यां परिभाषायाम्। अन्यथा राजिग्रहणेनैव वृत्तिनिरूपकतावच्छेदकत्वानापन्नतादृशानुपूर्व्याक्रान्तस्यापि भ्राजन्तर्गतस्य षत्वविधानसम्भवार्तिक तेन ?

न च फणादिना राजिना साहचर्यात्तथाविधस्यैव भ्राजेर्ग्रहणार्थं तस्यावश्यकतया न ज्ञापकतासम्भव इति वाच्यम्। अस्यामवस्थायामफणादिभ्राजन्तर्गतस्यापि राजिग्रहणेन प्रसक्ततया फणादिमात्रग्राहकसाहचर्यस्य दुर्वचत्वात्। न च 'विपराभ्यां' (१.३.१९) इति सूत्रोदीरितमाष्यरीत्या फणाधोरेव तयोर्ग्रहणार्थं तद्भवतीति वाच्यम्। तावन्मात्रफलकत्वे 'भ्राजभास' (३.२.१७७) इति सूत्रे भ्राजिग्रहणाकरणलाघवानुरोधेन फणादिव्यतिरिक्ते ऋकारातिरिक्तानुबन्धोच्चारणेन 'व्रश्चादि' (८.२.३६) सूत्रे 'राजृ' इति पाठेन च निर्वाहात्।

न च 'राज्'इति पाठे इत्संज्ञकऋकारवतो धातोरित्यर्थे भ्राजवयवस्य राजेर्ग्रहणं दुर्लभमेव, ऋकारस्य समुदायानुबन्धत्वेन महिङो ङकारवदयवयानुबन्धत्वायोगादिति वाच्यम्। ऋकारोच्चारणमहिम्नैव तल्लाभसम्भवात्।

न च व्रश्चादिसाहचर्यात्स्वतन्त्रस्य धातुसंज्ञावत एव ग्रहणान्न भ्राजन्तर्गतस्य तदभावततो ग्रहणसम्भव इति वाच्यम्। तथा सति निर्दिश्यमानपरिभाषैकवाक्यतया धातुसंज्ञावतो निर्दिश्यमानस्य व्रश्चादेरित्यर्थे लावस्थायामडिति भाष्यसिद्धान्तात् 'अब्राष्टाम्' 'अयाष्टाम्' इत्यादावडागमसमवधाने केवलस्यातथात्वेन षत्वानापत्तेः।

न च राजिग्रहणेनानर्थकस्य ग्रहणेऽपि भ्राजन्तर्गतस्य तस्य विधीयमानः षकारादेशो 'नानर्थकेऽलोन्त्यविधिः' (प. ९६) इति सर्वादेशः प्रसज्येतेति तद्वारणाय भ्राजिग्रहणमावश्यकमिति वाच्यम्। 'अनेषः' इत्यादौ त्यदाद्यकारस्यान्त्यादेशत्वसिद्धये तादृशपरिभाषाया भाष्ये प्रत्याख्यानात्, सत्त्वे वा यत्रानर्थकमात्रग्रहणं तत्रैव तत्प्रवृत्तिस्वीकाराच्च।

यत्तु 'विभ्राक्', 'विभ्राट्' इति रूपद्वयं हि ब्रश्चादिषु भ्राजिग्रहणेन साधनीयं, तच्च भ्राशंतेः षत्वेन फणाद्यफणादिसाधारणतया भ्राजतेः कुत्वेन च विनैव षत्वविधौ भ्राजिग्रहणं सेत्स्यतीति ज्ञापितायामपि परिभाषायां स्वांशे चारितार्थ्यविरहान्न ज्ञापनसम्भवः ।

न च फणाद्यफणाद्योः क्विबन्तयोः सह विवक्षायामेकस्य कुत्वमपरस्य षत्वमिति क्वचिद्विभक्तौ वैरूप्याज्जननीपरिच्छेत्तृवाचकयोर्मातृशब्दयोरिवैकशेषाप्रवृत्त्या 'विभ्राक्' 'विभ्राजौ' इति प्रयोगसिद्धिस्तत्फलमिति वाच्यम् । सरूपसूत्रदृष्ट्या कुत्वादीनां त्रैपादिकासिद्धत्वेन तत्कृतवैरूप्यस्यैकशेषप्रतिबन्धकत्वायोगात् ।

न च सामर्थ्यादसिद्धत्वबाध इति वाच्यम्; उभयोरपि समानार्थकत्वेन 'विरूपाणामपि' इत्यनेन तस्य दुर्वारत्वादिति वदन्ति; तदसत्; भ्राजा नाम श्लोकास्तानाचक्षाणो भ्राट्—भ्राजस्तेजस्तदाचक्षाणो वा भ्राट्, एवम्विधेषु षत्वार्थं तस्यावश्यकत्वात् । न चानयोरव्युत्पन्नत्वादेतदन्तर्गतस्य निरनुबन्धकतया सानुबन्धकस्य ग्रहीतुमशक्यत्वात्, सानुबन्धकस्य स्वतन्त्रस्येह लाभार्थं राजिग्रहणं प्रदर्शितस्य भ्राजेर्ग्रहणार्थं भ्राजिग्रहणमिति द्वयोरपि सार्थक्यात् ज्ञापकत्वासम्भव इति वाच्यम् । तथा सति द्विवारं राजिग्रहणेनैव सिद्धे भ्राजिग्रहणं ज्ञापकमेव । ज्ञापितायान्तु परिभाषायां 'राजानमाचष्टे' राडित्यस्यार्थवतो ग्रहणेन कृतार्थतया द्वितीयराजिग्रहणेनापि निरुक्तभ्राजन्तर्गतस्यानर्थकस्य ग्रहणं न स्यादिति भ्राजिग्रहणसार्थक्यमपि सुवचमेवेत्याशयात् । तयोरभिधाने प्रमाणाभाव इति तु न शङ्क्यम् । सूत्रकारानुगृहीतस्य भ्राजिग्रहणस्यैव प्रमाणयितुं शक्यत्वात् । तस्मात्सम्भवत्येवेदं ज्ञापकं, परन्तु न्यायसिद्धेऽर्थे ज्ञापकानुसरणक्लेशो नातीवोपयुज्यत इत्युपेक्षितमुपाध्यायनेत्याहुः ।

केचित्तु परिभाषासिद्धेः प्राक् राजिग्रहणेन भ्राजयतेः क्विपि भ्राक्, भ्राजयतेः क्विपि भ्राक्, इत्यादावपि षत्वस्य प्राप्ततया भ्राजिग्रहणस्य तत्र नियामकताया अपि सुवचत्वान्न ज्ञापकतासम्भवः । प्रतिपदोक्तत्वं त्ववयव-

मात्रे न कुत्रापि प्रसिध्यतीत्युपाध्यायाशयमुत्पश्यन्ति । अर्थोपस्थितिनिमित्त-कत्वसाम्यमपवादापवादभाव एव वाऽत्र सङ्गतिरिति ध्वनयन्नवतारयति –

नन्वेवमपि 'महद्भूतश्चन्द्रमाः' इत्यत्र 'आन्महतः' (६.३.४६) इत्यात्वापत्तिरत आह —

१५. गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः ।

'नन्वेवमपि' इति । अनर्थकव्यावृत्तावपीत्यर्थः । 'आत्वापत्तिः' इति । 'महद्भूतः' इत्यत्र महच्छब्दश्च्विप्रत्ययान्ततया गौणार्थाभिधायी । तथा हि— कृभ्वास्तियोगे सम्पद्यकर्तरि च्विप्रत्ययो विधीयते । 'सम्पद्यकर्तरि' इति षष्ठीतत्पुरुषः । सम्पद्यः सम्पत्तिः । निपातेनाद्भावे शप्रत्ययः । अन्य-थाभवनं तदर्थः । विकार इति यावत् । स चेहारोपितो विवक्षणीयः । तदुक्तं कात्यायनेन—'अभूततद्भाव इति वक्तव्यम्' इति । यो वस्तुतो येन रूपेणाभूतस्तस्यायथार्थेन तेन रूपेण भवनमभूततद्भावः । न तु वस्तुतस्तेन रूपेण भवनम् । तथा सति वस्तुभूतप्रकृतिविकृतिभावस्यैव पर्यवसन्नतया 'सम्पद्यकर्तरि' (५.४.५०) इति सौत्रेणैव 'तल्लोभसम्भवादभूततद्भाव' इति वार्तिकारम्भस्य वैफल्यापत्तेः; स्पष्टश्चैदमुद्योते वैफल्यं स्पष्टश्चैदमुद्योते । कर्तृपदमाश्रय-परं, ततश्च समभिव्याहृत – क्राद्यर्थक्रियान्वये सत्यारोपितविकारप्रकारक-प्रवृत्ति(निमित्त)विशेष्यकप्रतीतिजनकाद्विकृतिवाचकाच्च्वेरिति फलितोऽर्थः । अत एव कारणीभूतो दण्डः कार्यीभूतो घट इत्यादयो न प्रयोगा इति वृद्धाः । एतदेवाभिप्रेत्य 'ओत्' (१.१.१९) सूत्रादौ भाष्ये च्व्यन्तार्थो गौण इति व्यवह्रियते ।

ननु च्विप्रत्ययस्य क्राद्यर्थक्रियायोगनिमित्ततया तदर्थस्य क्रियाग्राह्येवा-न्वयो न्याय्यः । अत एव क्रियायोगनिबन्धनगतिसंज्ञाप्रयुक्ताः 'पिण्डीभूय' 'सङ्घीभूय' इत्यादयः प्रयोगाः । ततश्च महद्भूतः इत्यत्र महच्छब्दस्य प्रधानभूतक्तप्रत्ययार्थानित्वयित्वात्समानाधिकरणोत्तरपदपरत्वप्रयुक्तस्यात्वस्य प्राप्तेर्नायमेतत्परिभाषाविषय इति चेत् ? न; महच्छब्दार्थस्य स्वकर्तृकत्व-

सम्बन्धेन भवनक्रियायामेवान्वयेऽपि तस्य क्तप्रत्ययार्थादनतिरिक्तत्वेन वस्तुभूतसामानाधिकरण्यस्य सुवचतया तन्निमित्तकात्वप्रवृत्तेर्दुर्वारत्वात्'। पूर्वोत्तरपदप्रतिपाद्ययोः सामानाधिकरण्येनान्वय एव तु न तन्निमित्तमिति वक्तुं शक्यम्। 'महान्तमात्मानं मन्यते महामानी' इत्यदावात्वसिद्धिप्रसङ्गात्।

यद्यपि निपातानां द्योतकतासिद्धान्ताच्च्व्यन्तस्यापि सैव रीतिः, अर्धजरतीयतायां आयुक्तत्वात् इत्युच्यते। तदाऽप्येकार्थबोधकत्वरूपं सामानाधिकरण्यं सुवचमेव। द्योत्येनैवार्थेनार्थवत्त्वमपि निर्विवादम्। अत एव 'नमस्कारोति देवान्' इत्यत्र 'उपपदविभक्तेः' (प. १४) इति न्यायेन चतुर्थीवारणमाकरे स्पष्टम्।

किञ्च भूतपूर्वगत्यधीनमप्यर्थवत्त्वमर्थवत्परिभाषाविषयः। अत एव 'महान्' असुमहारथादावत्यन्तरूढेषु जहत्स्वार्थतया वृत्तिघटकस्यानर्थक्येऽप्यात्वप्रवृत्तिरिति दिक्।

अथ प्रकृतिविकृतिभावस्थले विकृतेरेव समभिव्याहृतक्रियाकर्तृत्वं दृश्यते। 'एको वृक्षः' 'पञ्च नौका भवन्ति', 'सुवर्णं कुण्डले भवतः' इत्यादौ। ततश्चात्र महच्छब्दस्यारोपितविकारभूतमहत्त्वपुरस्कारेण प्रकृतिभूतामहदर्थबोधकत्वाद्भूतशब्दस्य च विकृतिबोधकत्वादसामानाधिकरण्यमेवेति चेत्? अत्र वदन्ति; यत्र विकृतिवाचकस्यारोपितविकारविशिष्टप्रकृतिबोधकता तत्र विकृतेः पार्थक्येनास्फुरणात्प्रकृतेरेव समभिव्याहृतक्रियाकर्तृत्वम्। यत्र विकृतिवाचकमनारोपितमेव स्वार्थं प्रत्याययति तत्र प्राधान्याद्विकृतेरेव कर्तृत्वम्। अत एव अत्वं त्वं सम्पद्यते सङ्घीभवन्ति ब्राह्मणा इत्युभयविधप्रयोगसिद्धिः। 'अहं रामो भविष्यामि सीता त्वं भव पार्वति' इत्यादिरप्यारोपविषय एवेति न तदनुपपत्तिः। 'आन्महतः' (६.३.४६) इति सूत्रे भाष्ये स्फुटमेतत्, तत्र हि अमहति महान् हि वृत्तस्तद्वाची चात्र भूतशब्दोऽयं तस्मादात्वं प्राप्तमित्याशङ्क्य प्रधानतो वा यतो वृत्तिरिति समाहितम्।

'अगोमती गोमती सम्पन्ना गोमतीभूता ब्राह्मणी' इति प्रत्ययलोपे-

सूत्र(१.१.६२)भाष्योदाहृते सामानाधिकरण्यनिबन्धनं पुंवत्त्वन्तु न भवति । गोमतीशब्दस्य तत्र रूढया नदीविशेषबोधकतया भाषितपुंस्कत्वाभावादिति स्पष्टमुद्योते इति मान्याः ।

गौणमुख्ययोरुभयोरपि कार्यप्रसङ्गे मुख्य एव कार्यप्रवृत्तिनिश्चय, इति परिभाषार्थः ।

अत्र दीक्षितादयः—गौणशब्देन अनुकरणलाक्षणिकप्राकृतसङ्केतविषयाणां त्रयाणामपि ग्रहणम् । तदुक्तम् –

'अभिव्यक्तपदार्थाये स्वतन्त्रा लोकविश्रुताः'
शास्त्रार्थेस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु ॥ इति ।

अत्र विशेषणत्रयेण क्रमादुक्तत्रितयव्यावृत्तिः । एवंभूतेषु शब्देषु शास्त्रप्रतिपाद्यं कार्यं प्रवर्तनीयम् । न त्वन्याहशेष्विति तदर्थः । कापिञ्जलाधिकरणन्यायेन प्राथमिकबुद्धिविषयमर्थमुपादाय शास्त्रार्थं निष्पन्ने पाश्चात्यबोधविषयाणां शब्दस्वरूपादीनां शास्त्रविषत्वमेव युक्तम्, आवृत्तौ मानाभावादिति न्यायसिद्धैषा परिभाषा ।

ततश्च मुख्यत्वं प्राथमिकबुद्धिविषयत्वं, गौणत्वं पाश्चात्यबुद्धिविषयत्वन्निमिति निष्कर्षः ।

अनुकरणस्य गौणत्वात् 'युष्मत्कृत्य' इत्यत्र 'अनुकरणञ्चानितिपरम्' (१.४.६२) इति गतिसंज्ञावत्यनुकरणभूते युष्मच्छब्दे 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) इत्यस्याप्रवृत्तिः । लाक्षणिकस्य गौणात्वाद्वाह्लीकाथबोधकाद्गो–शब्दात् 'गोपयसोर्यत्' (४.३.१६०) इत्याद्यप्रवृत्तिः । आधुनिकसङ्केतविषयस्य गौणत्वात्पुरुषविशेषसङ्केतितयोर्नित्सोमशब्दयोर्द्वन्द्वे सति 'अग्नेः स्तुत्स्तोमसोमाः' (८.३.८२) इति षत्वाप्रवृत्तिरित्येवमूहनीयम् ।

इयञ्चार्थवत्परिभाषावद्विशिष्टरूपोपादानविषयैव । अर्थोपस्थित्यनुरोधित्वात्तदपवादत्वाच्च । अत एव 'गां पाठय' इत्यादावत्वसिद्धिः । पदकार्यमात्रविषयता तु न युक्ता, मानाभावात् । युष्मदस्मदोस्स्वरूपमात्राश्रयाणां

त्वाहाबादेशानामुपसर्जनतायामिव संज्ञायामपि प्रकृत्यापत्तेश्च । 'संज्ञोपसर्जनी-भूतास्तु न सर्वादयः' इति वार्तिके संज्ञाग्रहणमेतत्परिभाषासिद्ध्यर्थानुवाद एवेति स्पष्टं हरदत्तग्रन्थे । अस्तु वा 'शुद्धा च' इति गुणसूत्रस्थजातिग्रहण-वादिदमपि न्यायानित्यताज्ञापकम् । फलन्तु पुरोडाशशब्दाल्लक्षणया तत्सह-चरितमन्त्रपाराद्यर्थाल्यानेऽर्थे ठनि 'पुरोडाशिकः' इत्यादेसिद्धिरित्याहुः । सोऽयं प्राचीनमार्गो वक्ष्यमाणदोषदूषितत्वादयुक्त इत्याशयेन प्रकारान्तरेण व्याचष्टे—

गुणादागतो गौणः, यथा गोशब्दस्य जाड्यादिगुणनि-मित्तोऽर्थो वाहीकोऽप्रसिद्धश्च संज्ञादिरपि तद्गुणारोपादेव बुध्यते ।

'गुणादागतः' इति शुद्धलाक्षणिकस्य गौणत्वे ह्यक्षरमर्यादाविरोधः । श्वशुरशब्दादेः साहचर्यादर्थान्तरप्रत्ययकत्वे श्वाशुयदिरभीष्टस्यासिद्धिप्रसङ्गश्च । न्यायस्यानित्यत्वेन तत्समर्थनन्तु न युक्तम् । प्रमितफलाभावात् 'प्रक्षालनात्' इति न्यायेन तथाविधस्य गौणत्वेन प्रकृते परिग्रहाभावस्यैव न्याय्यत्वादि-त्याशयः । 'जाड्यादिगुणनिमित्तोऽर्थः' इति । तादृशगुणारोपप्रयुक्तसाहश्या-रव्यसम्बन्धप्रयोज्यारोपविषयीभूततत्तद्धर्मप्रकारप्रतीतिविषय इत्यर्थः ।

स द्विविध इत्याह—'वाहीकोऽप्रसिद्धश्च' इति । अनादितात्पर्य-विषयोऽर्थान्तरप्रतीतिनिरपेक्षप्रतीतिविषयः प्रसिद्धः । तदन्यस्त्वप्रसिद्धः । 'संज्ञादिः' इति । संज्ञा सङ्केत आदिर्यस्य इति विग्रहः । न चायं ततः पूर्वमस्तीत्यादिशाब्दोऽप्रसिद्धत्वस्फोरणाय । ननु 'गोपालकमानय' इत्यादौ सङ्केतविषये न प्रसिद्धगोपालगतगुणवैशिष्ट्येन बोधः । अपि तु गोपालक-पदवत्त्वेनैव । ततश्च कथमाधुनिकसङ्केतविषयस्य निरुक्तं गौणत्वम् ? तत्राह 'तद्गुणारोपादेव' इति । प्रसिद्धगतगुणारोपादेवेत्यर्थः । अपिः हेतौ । यतस्तद्गुणारोपादेव बुध्यते ततोऽसौ गौण इत्यर्थः । अयं भावः — पित्रादि-सङ्केतितानामप्यनादिसङ्केतवशादन्यत्र प्रसिद्धानां स्वस्वप्रवृत्तिनिमित्तवै-कल्यादाधुनिकसङ्केतमात्रेणार्थान्तरे प्रवृत्त्ययोगात्तत्प्रसिद्धपदार्थगतगुणा-रोपादेव प्रवृत्तिः । स्पष्टञ्चेदं 'तस्य भावः' (५.१.११९) इति सूत्रे भाष्ये ।

तत्र हि डित्थादिषु भावप्रत्ययेन किमभिधीयत इत्याशङ्क्य अनादिरयं शब्द-व्यवहार इत्यभिप्रायेण पूर्वपूर्वडित्थादिगतगुणाद्यारोपेण प्रत्यये इत्युक्तम् ।

एवञ्चारोपिततत्तद्गुणादिप्रकारक एव सङ्केतितार्थबोधो न्याय्यः । कस्यचिदन्यथाप्रतीतिर्भ्रान्तिवशादेव । हर्यादिपदेषु मर्कटादिप्रतीतिर्न प्रसिद्ध-भगवद्गुणारोपेण, किन्तु मर्कटत्वादिनैवेति न तेषां गौणता ।

एवञ्च गौणलाक्षणिके स्वतोऽविद्यमानेष्वपि गुणेषु शक्यगतेभ्यो भिन्नतया तद्गतभूयोधर्मवत्त्वरूपसादृश्यस्य दुर्वचत्वात्तादृशगुणारोपमूलक-सादृश्याख्यसम्बन्धेन शक्यतावच्छेदकारोपः ।

सङ्केतविषये त्वत्यन्ताविद्यमानानामेव प्रसिद्धगतगुणानामारोपो न तु तत्प्रयुक्तोऽन्यस्यारोप इत्यतस्तयोर्भेद इति ।

मुखमिव प्रधानत्वान्मुख्यः, प्रथम इत्यर्थः । गौणे ह्यर्थे शब्दः प्रयुज्यमानो मुख्यार्थारोपेण प्रवर्तते । एवञ्चाप्रसिद्धत्वं गौणलाक्षणिकत्वञ्चात्र गौणत्वम् ।

'मुखमिव प्रधानत्वात्' इति । यद्यपि शक्यतावच्छेदकारोप एव लक्षणा सर्वत्र शाब्दिकनये सादृश्यप्रयुक्ते तदारोपे गौणोऽन्यत्र शुद्ध इत्ये-तावान् व्यवहारभेदः । ततश्च शुद्धलाक्षणिकस्यापि न निरुक्तमुख्यत्व-सम्भवः । तथापि प्रागुक्तद्वितयातिरिक्तं मुख्यमित्यत्र तात्पर्यादोषः । तदेतद्ध्वनन्नाह—'अप्रसिद्धत्वं गौणलाक्षणिकत्वञ्च' इति । द्विप्रकृतेर्गौण-लाक्षणिकत्वात्तत्सङ्ग्रहः । उपसर्जनस्य तु न निरुक्तं गौणत्वमिति तद्व्युदा-सश्च सिद्ध इति भावः ।

नन्वेवमप्यभियुक्तप्रसिद्धस्यानुकरणगौणत्वस्य परित्यागो न युक्त इति चेत् ? अत्राहुः; 'युष्मत्कुल्य' इत्यादौ यद्येकत्वसंख्याविशिष्टबोधकयुष्मदादे-रिदमनुकरणं तदा गौणत्वपुरस्कृतया प्रकृतपरिभाषया युष्मदादिशब्दस्व-रूपात्मकानुकार्यगतैकत्वनिबन्धना यौपदेशिकी त्वाद्यादेशप्राप्तिर्दुर्वारा, या तु

'प्रकृतिवदनुकरणम्' इत्यतिदेशप्रयुक्ता तादृशानुकार्यैक्यनिबन्धना प्राप्ति-रतिदेशिकी सा केन वार्यते ।

न ह्यातिदेशिक्यपि प्राप्तिरनया परिभाषया वार्यत इति वक्तुं युक्तम् । कार्यातिदेशपक्षस्यैवात्र मुख्यत्वेन सिद्धान्ततया विशिष्टरूपोपादानाभावेन तदंशे प्रकृतपरिभाषाप्रवृत्तिदौर्लभ्यात् ।

यदि च 'अस्यत्रास्मीयम्' इत्यादौ सुब्लोपाभाववदनुकरणस्वरूपम् भङ्गभयादनित्यत्वाद्वा 'प्रकृतिवत्' (प. ३६) इत्यस्याप्रवृत्तिरित्युच्यते, तर्हि उपदेशस्यापि तथैवास्तु, किमनया परिभाषया ? किञ्च 'अर्थवद्ग्रहणा' (प. १४) परिभाषायामर्थशब्देन अनुकार्यस्वरूपातिरिक्त एव ग्रहीतुमुचितः । अन्यथा तादृशार्थस्य सर्वत्राव्यभिचरिततया परिभाषाया निर्विषयत्वमेव स्यात् । तस्मादेतादृशे विषये त्वाद्यादेशानामानर्थक्यादेवाप्राप्तिरतो निष्फल-मिहानुकरणस्य गौणत्वम् । अभियुक्तोक्तावभिव्यक्तपदार्था इत्यस्याग्रिमं विशे-षणद्वयं विवरणभूतमत एव मध्ये यच्छब्दः पठित इति तदुक्तिरिह नानुकरणस्य गौणतां स्पृशतीति तदिदं विपश्चितो विचारयन्तु ।

उपसर्जनस्य गौणत्वाभावे फलमाह—

तेन 'प्रियत्रयाणाम्' इत्यादौ त्रयादेशो भवत्येव । तत्र त्रिशब्दार्थस्येतरविशेषणत्वेऽपि वक्तरूपगौणत्वाभावात् । किञ्चायं न्यायो न प्रातिपदिककार्ये । किन्तूपात्तं विशिष्यार्थोपस्थापक-विशिष्टरूपं यत्र तादृशपदकार्य एव । परिनिष्ठितस्य पदान्तरसम्बन्धे हि 'गौर्वाहीकः' इत्यादौ गौणत्वप्रतीतिः, न तु प्राति-पदिकवेलायामित्यन्तरङ्गत्वाज्ज्ञातसंस्कारबाधायोगः 'प्रातिपदिक-कार्यप्रवृत्त्यभावे बीजम् ।

'तेन' इत्यादि । ननूपसर्जनस्य लोकनिरूढ्या गौणत्वेन परिग्रहेऽपि संज्ञोपसर्जनीभूतास्तु न सर्वादय इति कालयावचनसार्थक्यान्यथानुपपत्त्या परिभाषायाः पदकार्यविषयत्वस्य वक्तव्यतया त्रयादेशस्यातथात्वादेव

तत्र हि डित्थादिषु भावप्रत्ययेन किमभिधीयत इत्याशङ्क्य अनादिरयं शब्द-व्यवहार इत्यभिप्रायेण पूर्वपूर्वडित्थादिगतगुणाद्वारोपेण प्रत्यये इत्युक्तम् ।

एवञ्चारोपितत्तद्गुणादिप्रकारक एव सङ्केतितार्थबोधो न्याय्यः। कस्यचिदन्यथाप्रतीतिस्त्रान्तिवशादेव । हंयादिपदेषु मर्कटादिप्रतीतिर्न प्रसिद्ध-भगवद्गुणारोपेण, किन्तु मर्कटत्वादिनैवेति न तेषां गौणता ।

एवञ्च गौणलक्षणिके स्वतोऽविद्यमानेष्वपि गुणेषु शक्यगतेभ्यो भिन्नतया तद्गतभूयोधर्मवत्त्वरूपसादृश्यस्य दुर्वृत्तत्वात्तादृशगुणारोपमूलक-सौदृश्यांशस्यासम्बन्धेन शक्यतावच्छेदकारोपः ।

सङ्केतविषये त्वत्यन्ताविद्यमानानामेवं प्रसिद्धगतगुणानामारोपो न तु तत्प्रयुक्तोऽन्यस्यारोप इत्यतस्तयोर्भेद इति ।

„मुखमिव प्रधानत्वान्मुख्यः, प्रथम इत्यर्थः। गौणे चार्थे शब्दः प्रयुज्यमानो मुख्यार्थारोपेण प्रवर्तते। एवञ्चाप्रसिद्धत्वं गौणलाक्षणिकत्वञ्चात्र गौणत्वम् ।

'मुखमिव प्रधानत्वात्' इति । यद्यपि शक्यतावच्छेदकारोप एव लक्षणा सर्वत्रा शाब्दिकनये साहश्यप्रयुक्ते तदारोपे गौणोऽन्यत्र शुद्ध इत्ये-तावान् व्यवहारभेदः । ततश्च शुद्धलाक्षणिकस्यापि न निरुक्तमुख्यत्वा-सम्भवः । तथापि, प्रागुक्तद्वित्वातिरिक्ते मुख्यमित्यत्र तात्पर्यादोषः । तदेतदभ्युपगन्याह- 'अप्रसिद्धत्वं गौणलाक्षणिकत्वञ्च' इति । च्विप्रकृतेर्गौण-लाक्षणिकत्वात्तत्सङ्ग्रहः । उपसर्जनस्य तु न निरुक्तं गौणत्वमिति तद्व्युदा-सश्च सिद्ध इति भावः ।

नन्वेवमप्यभियुक्तप्रसिद्धस्यानुकरणगौणत्वस्य प्रसिद्ध्यो न युक्त इति चेत् ? अत्राहुः; 'युष्मत्कृत्यः' इत्यादौ यद्येकत्वसंख्यादिविशिष्टबोधकयुष्मदादिपद-त्वमनुकरणे तदा गौणत्वपुरस्कृतया प्रकृतिपरिभाषया युष्मद्धिशब्दस्व-रूपात्मकानुकार्यगतैकत्वनिबन्धना औपदेशिकी त्वाद्युदेशप्राप्तिर्भवेत्, न तु

'प्रकृतिवदनुकरणम्' इत्यतिदेशप्रवृत्तौ तादृशानुकार्यगतैकत्वसिद्धिसम्भवात् प्राप्तिरतिदेशिकी सा केन वार्यते।

न ह्यातिदेशिक्यपि प्राप्तिरनया परिभाषया वार्यत इति वक्तुं युक्तम्। कार्यातिदेशपक्षस्यैवात्र मुख्यत्वेन सिद्धान्ततया विशिष्टरूपोपादानाभावेन तदंशे प्रकृतपरिभाषाप्रवृत्तिदौर्लभ्यात्।

यदि च 'अस्यत्राग्नीयम्' इत्यादौ सुब्लोपाभावदनुकरणस्वरूपस्य सङ्घभ्रादनित्यत्वाद्वा 'प्रकृतिवत्' (प. ३६) इत्यस्याप्रवृत्तिरित्युच्यते, तर्हि उपदेशस्यापि तथैवास्तु; किमनया परिभाषया? किञ्च 'कार्यवद्ग्रहणम्' (प. १४) परिभाषायामर्थशब्देन अनुकार्यस्वरूपातिरिक्त एव ग्रहीतुमुचितः। अन्यथा तादृशार्थस्य सर्वत्राभिधेयतया परिभाषाया निर्विषयत्वमेव स्यात्। तस्मादेतादृशे विषये त्वाद्यादेशानामानर्थक्यादेवाप्रातिरूपो विष्णुः सिंहानुकरणस्य गौणत्वम्। अभियुक्तोक्तावभिव्यक्तपदार्था इत्यस्याग्रिमं विशेषणार्थं विवरणभूतमेव मध्ये यच्छब्दः पठित इति तदुक्तिरिह नानुकरणस्य गौणतां स्पृशतीति तदिदं विपश्चितो विचारयन्तु।

उपसर्जनस्य गौणत्वाभावे फलमाह —

तेन 'प्रियत्रयाणाम्' इत्यादौ त्रयादेशो भवत्येव। तत्र त्रिशब्दार्थस्येतरविशेषणत्वेऽपि न्यूनरूपगौणत्वाभावात्। किञ्चायं न्यायो न प्रातिपदिककार्ये। किन्तूपात्तं विशिष्याप्रधानपदस्थापकम्। विशिष्टरूपं यत्र तादृशपदकार्य एव। परिनिष्ठितस्य पदान्तरसम्बन्धे हि 'गौर्वाहीकः' इत्यादौ गौणत्वमतीतिः, न तु प्रातिपदिकवेलायामित्यन्तरङ्गत्वाज्जातसंस्कारबाधायोगः 'प्रातिपदिक'कार्यमदृष्टत्वभावे बीजम्।

'तेन' इत्यादि। ननूपसर्जनस्य लोकेऽप्रसिद्ध्या गौणत्वेन परिग्रहेऽपि संज्ञोपसर्जनीभूतस्य न सर्वादय इति, कालाध्वनवचनसार्थकपान्यथानुपपत्त्या परिशेषाद्या; पदकार्यविषयत्वस्य वक्तव्यतया त्रयादेशस्यातथात्वाद्वेत्र

निर्वाहादिदं प्रयोजनं चिन्त्यमत आह—'किञ्च' इति । अत्र च 'महामानी' इत्यादौ कृतार्थस्य 'आन्महतः' इत्यात्वस्य 'महाबाहुः' इत्यादौ प्रवृत्तिः फलम् । 'महेन्द्राद् घाणौ च' इति निर्देशश्च प्रमाणमिति बोध्यम् । 'न प्रातिपदिककार्ये' इति ।

ननु प्रातिपदिकार्यं यदि वस्तुतः प्रातिपदिकसम्बन्धि कार्यमित्युच्यते तर्हि 'आन्महतः' (६.३.४६) इत्यस्यापि प्रकृतपरिभाषाविषयत्वाभावात् 'महद्भूतः' इत्यादावात्वप्रसङ्गः । यदि च तादृशसंज्ञावच्छिन्ननिमित्तताकं कार्यमित्युच्यते तर्हि 'राजश्वशुराद्यत्' (४.१.१३७) इत्यादितद्धितविधेरपि प्रतिपदिकाधिकारीयतया निरुक्तप्रातिपदिककार्यत्वाविशेषात्प्रकृतपरिभाषाया अप्रवृत्तौ गौणलाक्षणिकश्वशुरशब्दादेः श्वाशुर्यः इत्याद्यापत्तिः, अतो वक्ष्यमाणपदकार्यातिरिक्तमिह प्रातिपदिककार्यत्वेन विवक्षितमित्याशयेन आह—'किन्तु' इति । उपात्तत्वं प्रकृतशास्त्रीयवाक्यार्थसमर्पकत्वेनोच्चरितत्वम् । विशिष्यार्थोपस्थापकत्वमुद्देश्यतावच्छेदकरूपावच्छिन्नोपस्थितिजनकत्वम् । विशिष्टरूपता चार्थवद्वर्णसमूहात्मकमिति द्रष्टव्यम् ।

'पदकार्ये इति । तदुक्तं 'ओत्' (१.१.१५) सूत्रे कैयटे । पदकार्येष्वयं न्यायो न प्रातिपदिककार्येष्विति । वस्तुभूतसुबन्तत्वव्याप्योद्देश्यताकमिह पदकार्यत्वेन विवक्षितम् । पदत्वव्यपदेशस्य तु न निवेशः । 'श्वाशुरिः' इत्यादौ उपसङ्गनिष्यमाणन्यायेन भाविभंत्वविषयतामादाय पदत्वाप्रवृत्त्या दोषाभावात् । 'त्वद्भवति' 'मद्भवति' इत्यादिसिद्धये व्याप्यत्वनिवेशः । अन्यथा सुबन्तात्तद्धितोत्पत्त्या च्विप्रत्ययनिमित्तकयोरपि त्वमादेशयोर्वस्तुसूतसुबन्तत्ववदुद्देश्यकतया तदनुपपत्तिः । व्याप्यत्वनिवेशे च प्रत्ययनिमित्तकयोस्तयोरादेशयोः 'त्वादयति' 'मादयति' इत्यादावपि प्रवृत्तेरिष्टतया तादृशोद्देश्यतायास्सुबन्तत्वव्यपदेशव्याप्यत्वाभावाददोषः ।

यत्तु पदत्वतद्व्याप्यान्यतरधर्मावच्छिन्नोद्देश्यताकं कार्यमिह पदकार्यमिति ? तदसत् ; 'आन्महतः' (६.३.४६) इत्यात्वस्य उत्तरपदाक्षिप्तं पूर्वपदमादाय कथञ्चित्पदत्वनिमित्तकत्वेन पदकार्यत्वसम्भवेऽपि तद्धितविधेः पदत्वनिमित्तकत्वाभावात् 'धकालतुनेषु' (६.३.१७) इत्यलुग्विधानम-

हिम्ना सुपः परत्र तद्धितानामुत्पत्तावपि प्रातिपदिकपदस्य तत्र सुबन्त-लक्षणायां मानाभाव इति नव्यसिद्धान्ते सुबन्तत्वनिमित्तकत्वाभावाच्च श्वशुरसदृशापत्यादौ श्वाशुर्य इत्याद्यनिष्टस्य दुर्वारत्वात्। एतेन संज्ञाभूताभ्यां सजूः, अनडुच्छब्दाभ्यां भ्यामादावनया परिभाषया हृत्वदत्वयोः पदकार्ययोरप्रवृत्तिप्रसङ्ग इति निरस्तम्। एवञ्च संज्ञाविषयेऽप्युपसर्जनतायामिव युष्मदस्मत्स्वरूपाश्रयाणां त्वाहाद्यादेशानां प्रवृत्तौ सत्यभिधाने इष्टापत्तिरेवेत्युपाध्यायानुयायिनः।

नन्वस्तु विशिष्टरूपोपादानविषयत्वमर्थप्रतीतिमूलकत्वादर्थवद्ग्रहण-परिभाषापवादत्वाद्वा प्रकृतपरिभाषायाः। निरुक्तं पदकार्यविषयकत्वन्तु न युक्तं, प्रमाणवैकल्यात्, अत आह—'परिनिष्ठितस्य' इत्यादि। संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसम्बन्धो भवतीति वृद्धिसूत्र-भाष्योदीरिते पदसंस्कारपक्षे शक्यार्थमादायैव प्रातिपदिकसंस्कारो युक्तः। तत्काले पदान्तरसमभिव्याहारप्रयुक्तान्वयानुपपत्त्यादिरूपलक्षणाबीजपरि-स्फुरणाभावात्। पश्चात्तु पदान्तरसमभिव्याहारे सत्यामपि लक्षणायां जात-संस्कारो न निवर्तते, भुक्तवन्तमिति न्यायात्। यथा – 'गङ्गायां घोषः' इत्यादौ टाबादिः। एवञ्च स्वप्रवृत्तिहेतुभूताया गौणार्थत्वप्रतीतेः प्रातिपदिक-संस्कारवेलायामभावादप्रवर्तमानस्यास्य न्यायस्य न्याय्यं पदकार्यविषयत्व-मिति भावः।

नन्वस्तु पदकार्यविषयत्वं विशेषविषयतायां किं फलमत आह—

श्वशुरसदृशस्यापत्यमित्यर्थके 'श्वाशुरिः' इत्यादौ 'अत इञ्' (४.१.९५) सिद्धये उपात्तमित्यादि। न च प्रातिपदिक-पदं तादृशमिति वाच्यम्। तेन हि प्रातिपदिकपदत्वेनोपस्थितिः। तस्य विशिष्यार्थोपस्थापकत्वाभावात्। निपातपदन्तु चादित्वेनैव चादीनामुपस्थापकमिति तदुद्देश्यककार्यविधायके "ओत्" (१.१.१५) इत्यादावेतत्प्रवृत्त्या 'गोऽमवत्' इत्यादौ दोषो न। 'अग्नीषोमौ माणवकौ' इत्यत्र प्रसिद्धदेवताद्वन्द्ववाच्याग्नीषोम-पदस्य तत्सदृशपरत्वेऽन्तरङ्गत्वादीत्वषत्वे भवत एव। सदृशला-

क्षणिकाग्निसोमपदयोर्द्वित्वे तत्त्वाप्रकाक्षित्वार्थके च नेत्वप्रत्ये। आग्ने गौणलाक्षणिकत्वादन्त्येऽप्रसिद्धत्वात्। अत एव 'अग्निसोमौ माणवकौ' इत्यत्र गौणमुख्यन्यायेन त्वत्वकारणपरं 'अग्नेः स्तुत्स्तोमसोमाः' (८.३.१०३) इति सूत्रस्थं भाष्यं सङ्गच्छते। 'गां पाठय' इत्यादौ मुख्यगोपदार्थस्य पाठनकर्मत्वासम्भवेन विभक्त्युत्पत्तिवेलायां प्रयोक्तृभिर्गौणर्थप्रतीतावप्यप्रदर्श्यप्रयोगेषु बोद्धृभिः सर्वत्र पदस्यैव गौणार्थकत्वग्रहणे 'अत्वं त्वं सम्पद्यते, अमहान् महान् भूतस्त्वदभवति' इत्यादि प्राप्तप्रयोगे त्वाद्यादेशादीनां करणेन न अस्य न्यायस्य पदकार्यविषयत्वमेवोचितम्। अन्यथा वाक्यसंस्कारपक्षे तेषु तदनापत्तिः।

'श्वशुरशब्दस्य' इत्यादि। श्वशुरशब्दस्तु नोपात्तः। प्रातिपदिकपदत्वेन विशिष्यार्थोपस्थापकम्। अत इति न विशिष्टरूपमिति भावः। 'विशिष्यार्थोपस्थापकत्वाभवात्' इति। सावत्प्रातिपदिकानाञ्च अनुमतस्य कत्यन्निदमदण्डनप्रभृत्यप्राप्तिदेहत्तद्रूपापाकृतावत्वेन दुर्ज्ञेयत्वात्तद्रूपमेव प्रातिपदिकपदस्यप्रवृत्तिनिमित्तमिति भावः। निपातपदमतो विलक्षणं तद्व्युत्पन्नानां परिमितधर्मवत्त्वेन तत्तद्रूपेण वाचकतासम्भवात्। तस्मान्नास्त्योत्सूत्रस्थभाष्यविरोध इत्याह—'निपातपदन्तु' इति। चादित्वेनेत्यस्य चत्वादिनेत्यर्थः।

यद्यपि क्त्व्यन्तांशे निपातपदं न विशिष्यार्थोपस्थापकं किन्तु क्त्व्यन्तत्वेनैव तथापि चादीनादाय विशिष्यार्थोपस्थापकता। तत्र वर्तते 'एवेति न प्रकृतपरिभाषाप्रवृत्तिविरोधः। 'अथ अर्थविशेषोपस्थितिरेतत्परिभाषाप्रवृत्तौ निमित्तं मिति तावान्निर्विवादम्। तत्रेयं मुख्यार्थके कार्यस्य प्रवृत्तिं गौणार्थके च व्यावृत्तिं व्यवस्थापयति। निपातपदेन क्त्वप्रत्ययवाचीत्तामुपस्थितावपि तदर्थोपस्थितौ, सामग्र्याभावः। उच्यते, अत्र प्रत्ययग्रहणे न सम्प्रतीयमानम् इति भाष्यादृतः। क्त्वप्रत्ययस्य 'गोऽभवत्' इत्यादिगौणस्य, ग्राह्यत्वप्रसक्तिरिति चेत्? सत्यम्; 'त्वादयोऽसत्त्वे' (१.४.५७) इत्यत्र 'असत्त्वे' इति पर्युदासबलेन

अर्थवद्ग्रहण – (प. ४) परिभाषया च समुच्चयाद्यर्थविशेषविशिष्टानामेव चादीनां निपातसंज्ञा, तथा 'ऊर्यादिच्वि' (१.४.६१) इत्यत्रापि अभूततद्भावरूपार्थस्य च्विविधाननिमित्तस्योपस्थितेः सुलभत्वेन आरोपितप्रकृत्यर्थतावच्छेदकावच्छिन्नबोधकत्वविशिष्टयैव च्व्यन्तस्य निपानसंज्ञा युक्ता। ततश्च यद्रूपावच्छेदेन संज्ञाविधानं तद्रूपावच्छेदेनैव संहृत्योपस्थितेर्नियततया निपातप्रदेशेषु संज्ञिविशेषणत्वेनोपस्थितमर्थमादाय परियायाप्रवृत्तावारोपितानारोपितमहत्त्वविशिष्टबोधकयोर्महच्छब्दयोरेव मुख्यामुख्यार्थबोधकयोरुक्तादिइच्व्यन्तयोरपि व्यवस्था सुवचा।

न हि तथाविधयोः शब्दयोः स्वरूपेणोच्चारणे एवायं न्याय इत्यत्र किञ्चिद्विनिगमकमस्ति येन निपातप्रदेशेषु तदप्रवृत्तिः स्यात्। तस्माद्युक्तमेव 'गोऽभवत्' इत्यादौ अनया प्रगृह्यत्ववारणं भाष्यकृतामित्याहुः। 'इत्वपत्वे भवत एव' इति। विशिष्टस्य गौणत्वेऽप्यवयवयोरतथात्वादित्याशयः। 'नेत्वपत्वे' इति। ईत्वाप्राप्तिर्देवताद्वन्द्वत्वाभावबोधकत्वेपि बोध्यम्।

ननु वाक्यसंस्कारपक्षे 'गां पाठय' इत्यादौ प्रातिपदिकसंस्कारवेलायामपि गौणत्वग्रहः सुवचः। ततश्च प्रकृतपरिभाषाप्रवृत्त्यभावसाधकहेतोरभावात्पदकार्यविषयत्वमेवेति नियमव्याहतिरत आह—'गां पाठयेत्यादौ' इति। 'बोह्वृभिः सर्वत्र' इति। प्रयोक्तॄणां पूर्वं पश्चादपि गौणत्वग्रहस्य सम्भावितत्वेन बोद्धृसाधारणं पाश्चात्यगौणत्वमेव परिभाषाविषय इत्युचितम्, यद्वा प्रयोगस्य बोद्धृबोधोपायतया तदीयगौणत्वग्रहस्यैव प्रयोगनियामकता युक्तेति भावः।

ननु प्रयोगस्य वक्त्राधीनत्वात्प्रातिपदिकसंस्कारकालिकत्वेन अन्तरङ्गत्वाच्च बोद्धृगौणत्वग्रहसहायव्यतिरेकेणैव वक्तृगौणत्वग्रहस्य परिभाषाप्रवृत्तौ निमित्तत्वमित्यपि वक्तुं शक्यमत आह – 'अत्वं त्वं सम्पद्यते' इत्यादि। एतद्भाष्यप्रामाण्याद् बोद्धृगौणत्वग्रहस्यैव प्रयोगनियमकत्वं इत्यभिमानः।

ननु व्यवस्थितयोः पक्षयोरन्यतरपक्षेण लक्ष्यनिर्वाहे पक्षान्तरेण

दूषणोद्भावनमनुचितमित्यर्थस्य सर्वसम्मततया युक्तमेवेदं भाष्यमिति नाभीष्टसिद्धिरत आह –

किञ्च 'शुक्लाम्' इत्युक्ते कर्मनिर्दिष्टं कर्ता क्रिया चानिर्दिष्टे इत्याद्युक्त्वा; इहेदानीं 'गामभ्याज कृष्णां देवदत्त' इत्यादौ सर्वं निर्दिष्टे गामेव कर्म देवदत्त एव कर्ता अभ्याजैव क्रियेत्यर्थकेन 'अर्थवत्' (१.२.४५) सूत्रस्थभाष्येण कारकादिमात्रप्रयोगे योग्यसर्वक्रियाध्याहारे प्रसक्ते नियमार्थः क्रियावाचकादिप्रयोग इत्येतत्तात्पर्यकेण सामान्यतः क्रियाजन्यफलाश्रयत्वमात्रविवक्षायां द्वितीयादीनां साधुत्वान्वाख्यानमित्यर्थलाभेन पाठनक्रियान्वयकाले पदस्यैव गौणार्थत्वमतीतिः प्रयोक्तुरपि। एवमेतन्मूलको 'अभिव्यक्तपदार्थायं' इति श्लोकोऽपि पदकार्यविषयकः।

ध्वनितञ्चेदं 'सर्वादि' (१.१.२७) सूत्रे संज्ञाभूतानां प्रतिषेधमारभता वार्तिककृता, 'पूर्वपर' (१.१.३४) इति सूत्रे असंज्ञायामिति वदता सूत्रकृता, अन्वर्थसंज्ञया तत्प्रत्याख्यानं कुर्वता भाष्यकृता च।

'किञ्च' इति। कर्ता क्रिया चानिर्दिष्टेविति पाठः। 'पुंसन् स्त्रियां' (१.२.६७) इत्येकशेषः। 'गामेव कर्म' इत्यादि– अनुकरणमिदम्। अन्यथा गौरेव कर्मेति वक्तव्यं स्यात्। 'प्रयोक्तुरपि' इति। ततश्च सिद्धं पदकार्यविषयत्वं न्यायस्येति भावः। 'श्लोकोऽपि' इति। यतोऽयं श्लोकस्तत्परिभाषार्थानुवादरूपं इत्याशयः। 'ध्वनितञ्चेदम्' इति। संज्ञाविषये पदकार्यविषयत्वप्रदर्शनार्थमेतत्। 'भाष्यकृता च' इति। यदीयं प्रातिपदिककार्येऽपि प्रावर्तिष्यत् तदा विनैवान्वर्थसंज्ञावलम्बं तत्प्रत्याख्यास्यदिति तत्त्वम्।

नन्वेवं न्यायस्य पदकार्यविषयत्वसिद्धौ विशिष्टरूपोपादानमात्रविषय-

तात्पर्तिपादनपरं, 'ओत्' (१.१.१५) सूत्रस्थं भाष्यमनुपपन्नं स्यादत आह –

अर्थाश्रय एतदेवं भवति शब्दाश्रये च वृद्ध्यात्वे इति 'ओत्' (१.१.१५) सूत्रस्थभाष्यस्य लौकिकार्थवत्त्वयोग्यपदाश्रये एष न्यायः, तद्रहितशब्दाश्रये च ते इत्यर्थः । 'गोत' (७.१.९०) इति यथाश्रुतसूत्रे विशिष्टरूपोपादानसत्त्वेनोक्तरीत्यैतस्य भाष्यस्य व्याख्येयत्वादित्यलम् ।

'अर्थवद्ग्रहणे' (प. १४) इत्यस्यापवादमाह—

१६. 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ।

'येन विधिः' (१.१.७२) इत्यत्र भाष्ये वचनरूपेण पठितैषा । तेन 'राज्ञा' 'साम्ना' इत्यादावल्लोपः, 'दण्डी' 'वाग्मी' इत्यादौ 'इन्हन्' (६.४.१३) इति नियमः; 'सुपयाः' 'सुस्रोताः' इत्यादौ 'अत्वसन्तस्य' (६.४.१४) इति दीर्घः । 'सुशर्मा' 'सुप्रथिमा' इत्यादौ 'मनः' (३.२.८३) इति ङीबूनिषेधश्च सिद्धः ।

'अर्थाश्रये' इत्यादि । 'लौकिकार्थवत्त्वयोग्य' इत्यादि । ननु नायमक्षरमर्यादानुसारी वाक्यार्थ इत्यत आह—'गोत' इति । एवञ्च तदप्युक्तार्थसाधकमेवेति नास्माकं किञ्चित्प्रतिकूलमिति भावः ।

अत्रेदं बोध्यम् – 'स्वं रूपम्' (१.१.६८) इत्यतो गौणमुख्यसाधारण्येन अर्थविशिष्टस्य शब्दस्य ग्रहणप्रसक्तौ सदृशलाक्षणिकसंज्ञाभूतयोर्व्यावृत्तये वाचनिकीयं परिभाषा । 'प्रथमातिक्रमणे कारणाभावः' इति न्यायस्तु

नात्र शास्त्रे आश्रयितुं शक्यते; 'निजां त्रयाणाम्' इत्यत्र 'त्रयाणाम्'ग्रहणात्। आश्रीयमाणे वा न तेन निर्वाहः। शुद्धलाक्षणिकेऽपि कार्यप्रसङ्गात्। 'ओत्' (१.१.१९) सूत्रस्थभाष्यमपि वाचनिकत्व एव सङ्गच्छते। अन्यथा यदंशे गौणमुख्ययोरुभयोरप्युपस्थितिस्तदंशे गौणव्यावर्तकत्वेऽपि अंशान्तरीयं मुख्यत्वमादायांशान्तरे गौणव्यावृत्तेरयुक्तत्वाच्च्व्यन्तस्यापि ग्रहणं स्यादेवेति तदसङ्गतिः। एकदेश्युक्तिता तु न युक्ता। उपपत्तावसाङ्गत्यकल्पनाया अनुपपत्तेः। 'जानपद' (४.१.४२) सूत्रे नामग्रहणन्तु नियमार्थमेव। ङीषः पदकार्यत्वाभावाज्जातेः इत्यत्र विशिष्टरूपोपादानाभावाच्च संज्ञाविषये न्यायस्य पदकार्यविषयतायां सर्वनामसंज्ञाप्रघट्टकस्थं वार्तिकादिकमेव शरणमिति तदेव परिभाषायाः सामान्येन पदकार्यविषयत्वे प्रमाणमस्तु मास्तु गौणलाक्षणिकांशे तत्सिद्ध्यर्थं प्रमाणान्तरान्वेषणप्रयास इत्याहुः।

'अपवादमाह' इति सङ्गतिप्रदर्शनार्थम्। अनिनादीन्यनुकरणान्युभयविधेनापि स्वरूपेण तदन्तविधिं प्राप्नुवन्तीति परिभाषार्थः। 'अल्लोपोऽनः' (६.४.१३४) इत्यत्र सामानाधिकरण्येनैवान्वयः, व्यवहितनिवृत्तिस्त्वनन्त्यविकारपरिभाषयेति वदतां नव्याना मते प्रकृतपरिभाषायास्तदन्तविधिमात्रप्रयोजकता युक्ता। वैयधिकरण्येनान्वय इति वदतां प्राचान्तु 'तदन्तविधिम्' इति प्रस्तावपतितमिति योज्यम्।

'वचनरूपेण पठिता' इति। वाचनिकीति भावः। इयमानुमानिकी निरनुबन्धक (प.१८१) परिभाषां बाधते। तेन 'बहुविलासिका नगरी' इत्यत्र घिनुणन्तोत्तरपदकादपि बहुव्रीहेः 'इनः स्त्रियाम्' (५.४.१५२) इति नित्यं कप्। केचित्तु 'प्रत्ययाप्रत्ययोः' (प. १०३) इत्यस्येयं बाधिका। तेन 'मन्यतेर्विचि 'बहु मन्यते बहुमा' इत्यत्र ङाप्सिद्धिरित्याहुः।

'राज्ञा' इति। इदं व्युत्पत्तिपक्षावलम्बेन। अव्युत्पत्तिपक्षे त्वनितेर्विचि टायां नेत्युदाहर्तव्यम्। 'दण्डी वाग्मी इत्यादौ' इति। इमावादौ यस्य 'दण्डिनौ वाग्मिनौ' इत्यादेस्तत्रेत्यर्थः। 'सुपयाः' इति। अव्युत्पत्तिपक्षे तु 'अवयाः' इत्युदाहरणम्। 'सुस्रोताः' इति। इदं तत्प्रत्ययाभिप्रायेण। 'स्रुरीभ्यां

तुद् च' (द. उ. ९.६२) इति पञ्चपादीपाठानुसारे तु यदागमन्यायेन आगमविशिष्ट एवात्त्वबुद्धेरानर्थक्यं दुर्वचमेव ।

केचित्तु 'अधातोः' (६.४.१४) इत्यस्य धात्ववयवभिन्नस्येत्यर्थकतया सामर्थ्यादर्थवत्परिभाषालभ्यांशस्य निर्दिश्यमानविशेषणताया एव औचित्यात्पञ्चपादीपाठेऽपि युक्तमेवेदमुदाहरणमित्याहुः ।

'अङ्गग्रहणात्' इति । न च व्यतिपूर्वादस्तेः कर्मव्यतीहारे तङि 'व्यतिषीध्वम्' इत्यत्र ढत्ववारणार्थमङ्गग्रहणस्यावश्यकतया कथं ज्ञापकत्वमिति वाच्यम् । षत्वस्य बहिरङ्गासिद्धत्वेन तत्र षीध्वं बुद्धेर्दुर्लभत्वात् ।

अन्ये तु 'परिवेविषीध्वम्' इत्यत्र ढत्वव्यावृत्तये क्रियमाणादिणः 'षीध्वम्' इत्यत्राङ्गग्रहणादर्थवत्परिभाषाऽनित्या तन्मूलकमित्याहुः । 'विभाषेटः' (८.३.७९) इत्यत्रानर्थकस्यैव षीध्वमः सम्भवादत्रापि तस्यैव ग्रहणमिति भ्रमवारणायाङ्गादितीत्यपरे । ननु 'ऊश्च' इत्यत्र 'लिङ्सिचावात्मनेपदेषु' (१.२.११) इत्यत आत्मनेपदेष्वित्येव सम्बध्येत अनन्तरत्वदत आह—

१७. एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः, सह वा निवृत्तिः ।

वा शब्द एवार्थे । परस्परान्वितपदार्थकपदानां सहैवानुवृत्तिनिवृत्ती इत्यर्थः ।

'परे' इति । यद्यपि 'विभाषेटः' (८.३.७९) इत्यत्र इट इति धकारस्यैव विशेषणं व्यवधानसहनन्तु येन नाव्यवधानन्यायादिति स्पष्टमत्रैव सूत्रे शेखरे, ततश्च सार्थकस्यैव षीध्वम उत्तरत्रापि सम्भवान्नार्थाधिकारप्रयुक्तानर्थकग्रहणभ्रान्तिवारणार्थमङ्गग्रहणमिति युज्यत एव ज्ञापकता । तथापि तत्र इटः 'षीध्वम्' (८.३.७८) आदिविशेषणत्वेन व्याख्यायेह ज्ञापकतावादस्तेषामयुक्त इत्यत्र तात्पर्यम् ।

केचित्तु नेयं ज्ञापकसिद्धा 'ज्ञापकन्यायकसिद्धानि' इत्यस्य ज्ञापकसिद्धत्वादिना भाष्यकारादिसम्मतानि इत्यर्थकतया तथाविधानामेवेह ज्ञापकसिद्धत्वादिव्यवहारस्यौचित्यात्, अस्तु वचनरूपेणैव हि पाठो भाष्ये वस्तुतो बहिरङ्गपरिभाषायाः कार्यकालपक्षेऽपि त्रिपाद्यामप्रवृत्त्या 'व्यतिषीध्वम्' इत्यत्र ढत्ववारणार्थमावश्यकस्य तस्य कथं ज्ञापकत्वमिति युक्तमेव वाचनिकत्वमित्याहुः।

अङ्गग्रहणस्योक्तपरिभाषाज्ञापकताभङ्गकानुवृत्तिविचारप्रस्ताव इह सङ्गतिः। तद्ध्वनयन्नवतारयति 'ननूक्ष्व' इत्यादि। 'आत्मनेपदेष्वित्येव' इति। नन्वनुवृत्तिर्नामाकाङ्क्षानुरोधी पूर्ववाक्यगतपदसम्बन्धः। तत्र निमित्ताकाङ्क्षाया निमित्तबोधकपदसम्बन्धान्निवृत्तावपि निमित्त्याकाङ्क्षाया अनिवृत्त्या तद्वशात् 'लिङ्सिचोः' (७.२.४२) इत्यस्यापि सम्बन्धः स्यादेवेति नायं दोष इति चेत्? न; 'अप्लुतवदुपस्थितः' इत्यादौ विप्रतिषेधस्यातिदेष्टव्यतया तदभावतः सम्बन्धाद्वाकाङ्क्षानिवृत्तिरित्याशयात्।

अत्र कैयटादयः – एकस्मिन्नर्थे योग एकार्थीभावेन सम्बन्धो येषां तेषां पदानां समासवटकानामिति यावत्। समासे स्वार्थविशिष्टान्तरबोधकतानियमादुपस्थितार्थान्तरव्यतिरेकेण शब्दमात्रसम्बन्धस्यायुक्तत्वाच्च परस्परानुषक्तानामेव तेषामन्यत्र सम्बन्धासम्बन्धाविति परिभाषार्थः।

एवमुत्तरपरिभाषा अपि पूर्वोपात्तपदप्रतिपाद्यार्थविशेषानुसन्धानपरिक्लेशासहत्वे शब्दमात्रस्याप्याकाङ्क्षापूर्त्तये सम्बन्धसम्भवात्तथाविधानामेकदेशस्यानर्थकस्याप्यन्यत्र सम्बन्ध इत्यर्थः। अत एव 'पक्षात्तिः' (५.२.२५) इति सूत्रे 'तस्य पाक' (५.२.२४) इत्यतो मूलशब्दानुवृत्तिविचारे भाष्यम्। कथं पुनरेकयोगनिर्दिष्टानामेकदेशोऽनुवर्त्तत इत्याशङ्क्य 'एकदेशोऽप्यनुवर्त्तत' इति।

यदीदं परिभाषाद्वयं वाक्यविषयकं स्यात्तदा प्रकृतानुपयोगात् वाक्यैकदेशानामन्यत्र प्रायेण सम्बन्धदर्शनाच्चाक्षेपपरिहारौ निर्बीजावेव स्यातम्। तत इदमुभयं समासविषयमेव। एवञ्च लक्ष्यानुसारिणावर्थाधिकारशब्दाधि-

कारावेवानयोः परिभाषयोर्मूलमित्याहुः; तदसत् ; 'औतोम्शसोः' (६.१.९३) इति सूत्रस्थभाष्यविरोधात् । तत्र हि 'अचिनवम्' इत्यत्रात्ववारणाय, 'वा सुपि' (६.१.९२) इत्यतो वाशब्दं विहाय 'सुपि' इत्यस्यानुवर्तनार्थम् । कथं पुनरेकयोगनिर्दिष्टयोरेकदेशोऽनुवर्तते ? एकदेशोऽपि एकयोगे चैकदेशानुवृत्तिर्नावश्यमिहैव 'अलुगधिकारः प्रागानङः' 'उत्तरपदाधिकारः प्रागङ्गाधिकारात्' इत्युक्तम् ।

एवञ्च दृष्टान्तदार्ष्टान्तिकाभ्यां वाक्यविषयता स्पष्टमेवानयोरभिहिता 'पक्षात्तिः' (९.२.२१) इति सूत्रस्थन्तु भाष्यं तत्रत्यप्रकृताभिप्रायेण सिंहावलोकनन्यायेन वेत्याशयेनाह —'परस्परान्वितार्थकपदानाम्' इति । एकवाक्यघटकानामित्यर्थः ।

एककार्यनियुक्तानां बहूनां लोके तथैव दर्शनादिति भावः । यत्त्वत्र ज्ञापकं 'नेड्वशि' (७.२.८) इत्यतः इडिति वर्तमाने 'आर्धधातुकस्येड्' (७.२.३५) इत्यत्र पुनरिड्ग्रहणं तद्धि नेत्यस्यासम्बन्धार्थमिति ? तन्न; 'दीधीवेवी' (१.१.६) इति सूत्रे भाष्ये तत्रात्येड्ग्रहणप्रत्याख्यानाय इड्ग्रहणेऽनुवर्तमाने पुनरिड्ग्रहणस्य इदो गुणरूपविकारामावार्थत्वस्योक्तत्वेन तद्विरोधात् । नवो निवृत्तिस्तु 'क्वचिदेकदेशोऽप्यनुवर्तते' इति न्यायेन सिद्धा ।

वस्तुतस्तु, 'दीधीवेवीटाम्' (१.१.६) इति सूत्रस्थभाष्यमेकदेश्युक्तिः । 'आर्धधातुकस्य' (७.२.३५) इति सूत्रस्थेड्ग्रहणस्य 'नेड्वशि' (७.२.८) इति सूत्रे भाष्ये प्रत्याख्यानात् । तत्करणेन गुरुतरप्रयत्नमाश्रित्यैतत्प्रत्याख्यानस्यायुक्तत्वात् ।

'एककार्यनियुक्तानाम्' इत्यादि । एतेनेयं परिभाषा लोकन्यायसिद्धेति दर्शितम् । 'गुणरूपविकार' इति । एतद्वयावर्त्यानामन्यविकाराणामसम्भवः । तथा हि 'ग्रहो लिटि' (७.२.३७) इति दीर्घो वचनसामर्थ्यात्सिज्लोप एकादेशे सिद्धो वाच्य इत्येतदारम्भात् 'आतीत्' इत्यादौ सवर्णदीर्घो वा न

व्यावर्त्यः । 'पिपठीः' इत्यादौ दीर्घो वैभाजित्रे प्लुतश्च त्रैपादिकासिद्धः । 'पिपठी राज्यम्' इत्यादौ ह्रलोपदीर्घौ न प्रवर्तत एव 'रो रि' (८.३.१४) इत्यस्यासिद्धतया प्रथममेव 'वोः' (८.२.७६) इत्यस्य प्रवृत्तेरङ्गाधिकार-सम्बन्धादाङ्गस्यैव व्यावृत्तिरिति तत्त्वम् ।

यद्यपि वासुदेववाचकादकारादाचारक्विबन्तात्तृचि तस्येदमित्यणि 'ऐत्रम्' इत्यत्र वृद्धिः सम्भवति । तथापि तस्यानभिधानमेवारम्भप्रत्याख्यानयोः फलभेदात् । आरम्भे हीग्लक्षणाया एव तस्याः प्रतिषेधः । केचित्तु स्वसजातीयनिवर्तकताया एवेड्ग्रहणस्य न्याय्यतया धातुविहितप्रत्ययनिमित्तकानामेव विकाराणां निवृत्तिरिति सकलदोषपरिहार इत्याहुः ।

नन्विड्ग्रहणस्य परिभाषाज्ञापकत्वोपवर्णन एव न भाष्यविरोधः । किन्तु परिभाषा स्वीकारेऽपीत्याक्षेपं परिहर्तुमाह—'नञो निवृत्तिः' इति । 'प्रत्याख्यानात्' इति । सर्वथा ज्ञापकतावादो भाष्यविरोधान्न मुच्यत इति भावः । केचित्तु मास्तु प्रत्याख्यानमस्तु वा भाष्यविरोधः, कथमिड्ग्रहणस्य ज्ञापकता ? सूत्रारम्भादेव नञो निवृत्तेर्ज्ञापितायामपि चारितार्थ्याभावात् । तत्सामर्थ्यादार्धधातुकमात्रस्येडागमानुमाने तु 'नेड्वशि' (७.२.८) इत्यस्य वैयर्थ्यम् । तस्मादयुक्त एवायं ज्ञापनविचार इत्याहुः । प्रतिद्वन्द्विभाव इह सङ्गतिस्तदाह—

नन्वलुगधिकारः प्रागानङ उत्तरपदाधिकारः प्रागङ्गाधिकारात् इत्यनुपपन्नमेकयोगनिर्दिष्टत्वात् । तथा 'दामहायनान्ताच्च' (४.१.२७) इत्यादौ 'संख्याव्ययादेः' (४.१.२६) इत्यतः 'संख्यादेः' इति वर्तते 'अव्ययादेः' इति निवृत्तिमिति चानुपपन्नमत आह—

१८. एकयोगनिर्दिष्टानामेकदेशोऽप्यनुवर्तते ।

एकत्रार्थे योगस्सम्बन्धस्तेन निर्दिष्टयोः समुदायाभिधायिद्वन्द्वनिर्दिष्टयोरित्यर्थ इति 'पक्षात्तिः' (५.२.२५) इति सूत्रे

कैयटः । तावन्मात्रांशे स्वरितत्वप्रतिज्ञाबललभ्यमिदं, स्पष्टा चेयं 'दामहायनान्तात्' (४.१.२७) इति सूत्रे 'औतोम्शसोः' (६.१.९३) इति सूत्रे भाष्ये पूर्वा च ।

'नञ्वल्लुक्' इत्यादि । एकवाक्यार्थसम्बन्धितया निर्दिष्टानां पदानां व्याससमाससाधारण्येनैकदेशोऽप्यनुवर्तत इति परिभाषार्थः । 'कैयटः' इति । उक्तभाष्यविरोधादेतत्परिभाषार्थवर्णनपरस्यास्य कैयटस्य चिन्त्यतया स्वरूपव्याक्रियैव पराक्रियेति न्यायेनायमुपन्यासः । 'तावन्मात्रे स्वरितत्व-प्रतिज्ञा' इति । स्वरितत्वमिदं दोषविशेषरूपमज्झलसाधारणम् । तच्च यावति प्रतिज्ञायते तावत उत्तरत्र सम्बन्धः 'स्वरितेनाधिकारः' (१.३.११) इति वचनात् । एवञ्च यत्रैकदेशे स्वरितत्वप्रतिज्ञा तत्र तस्यैवोत्तरत्र सम्बन्ध इतीयं परिभाषा सिद्धा । एतेन समुदाये स्वरितत्वप्रतिज्ञानात्समुदायानुवृत्तेः पूर्वपरिभाषासिद्धौ तदर्थं लोकदृष्टान्तानुसरणपरिक्लेशोऽपि नेति सूचितम् । इदन्तु बोध्यम्—समुदायगतमपि स्वरितत्वं प्रतिज्ञावैचित्र्यात् क्वचिदेकम्, क्वचिच्च तत्तत्पदविश्रान्तं भिन्नभिन्नम् । यदि तस्यैक्यं तदा समुदायगता-नामवयवानां सहैवानुवृत्तिनिवृत्ती भवतः । यथा 'लिङ्सिचावात्मनेपदेषु' (१.२.११) इत्यादेः' 'ऊश्च' इत्यादौ सहैव सम्बन्धो 'हनस्सच्' इत्यादौ सहैव निवृत्तिः । यदि च भिन्नभिन्नं तदा तदवयवानां यथेष्टमुत्तरत्र सम्बन्धः । यथा 'अलुगधिकारः प्रागानङः' 'उत्तर पदाधिकारः प्रागङ्गाधिकारात्' इत्यादि व्यवस्थेत्याहुः ।

'स्थानेऽन्तरतम' (१.१.५०) परिभाषाविषयकविशेषनिर्णायकत्वमत्रा-स्याः परिभाषाया निरूपणकारणम् । प्रसक्तानुप्रसक्त्या च मध्ये परिभाषा-न्तरनिरूपणम् । तदभ्वनयन्नवतारयति—

ननु 'त्यदादीनामः' (७.२.१०२) इत्यादिना 'इमम्' इत्या-दावनुनासिकः स्यादत आह—

१९. भाव्यमानेन सवर्णानां ग्रहणं न ।

'अणुदित्' (१.१.६९) सूत्रे 'अमत्ययः' इत्यनेन सामर्थ्यात्सूत्रप्राप्तं जातिपक्षेण प्राप्तं गुणभेदकत्वेन च प्राप्तं नेत्यर्थः ।

'ननु त्यदादीनाम्' इत्यादि । अथ कोऽसौ परिभाषार्थः । यदि विधीयमानः सवर्णग्राहको नेत्यर्थस्तर्हि व्यक्तिपक्षे वार्णसमाम्नायिकापेक्षया भिन्नत्वेनाण्त्वाभावेऽपि स्वसदृशंवाच्यलक्षणया सवर्णग्राहकस्य सूत्रोच्चारितस्य न विधीयमानत्वं तद्बोध्यस्य विधीयमानस्य तु न सवर्णग्राहकत्वमुच्चरितस्यैव प्रत्यायकत्वादत इमामित्यादौ सत्यामपि परिभाषायां दुर्निवारो दोषः ।

न च प्रयुक्तानामिदमन्वाख्यानमिति सिद्धान्तात् प्रदेशस्थानां प्रायोगिकानुकरणरूपत्वेनानुकार्यानुकरणयोरभेदाध्यवसायात् प्रादेशिकस्यापि विधीयमानत्वं सुलभमिति वाच्यम् । एवमपि 'इको यणचि' (६.१.७७) इत्यादौ प्रत्याहारनिर्देशेषु तेषामनुकरणरूपत्वाभावेनानुनासिकानामपि तद्बोध्यवाच्यलक्षणया ग्रहणे दोषापत्तेः । यदि च विधेयबोधकः सवर्णग्राहको नेत्यर्थः, तदा यणादिपदसवर्णानामप्रसिद्धया दोषः ।

न च प्रत्याहारेष्वाद्यवर्णा एव वाचकाः तत्सहायार्थमनुबन्धा इति मते निर्वाह इति वाच्यम् । अनुनासिकवकायदीनां यकारादिसावर्ण्याभावेन तेषां ग्रहणस्य दुर्वारत्वात् । यदि च विधेयबोधकः स्ववाच्यसवर्णानां ग्राहको नेत्यर्थः, तदा जातिपक्षप्राप्तस्याप्यनयैव वारणमिति सिद्धान्तव्याहतिः ।

तत्पक्षे वाच्यभूतजातिसवर्णानामप्रसिद्धया प्रकृतपरिभाषाप्रसक्त्यभावेन तत्तज्जात्यवच्छिन्नानामनुनासिकादीनामपि दुर्वारत्वात् । तस्माद्दुर्निरूप एव परिभाषार्थ इति चेत् ? अत्राहुः; विधेयबोधकया साक्षात् प्रत्याहारद्वारा वा यो निर्दिष्टस्तज्जातीयानां तदवृत्तिधर्मविरुद्धधर्माक्रान्तानां व्यक्तीनां कथमपि विधेयतया समर्पणं नेत्यर्थः । उक्तं च शेखरे — 'सवर्णपदेन स्वसमानजातीयो भिन्नधर्मा उच्यत' इति । एतेन शुद्धस्याप्युपस्थाप्यस्य स्वापेक्षया भिन्नत्वात्सावर्ण्याविशेषाच्च निषेधापत्तिरिति निरस्तम् ।

कथमपीत्यनेन जातिपक्षे वाच्यवृत्त्या विधेयत्वाभावेऽपि पर्यवसितं तदादाय निषेधसिद्धिः। एवञ्च न कुत्रापि दोष इत्युपाध्यायानुयायिनः।

तदेतद्ध्वनयन्नाह—

अत एव 'अणुदित्' (१.१.६९) सूत्रे प्रत्ययागमादेशेषु सवर्णग्रहणाभावं प्रकारान्तरेणोक्त्वा एवं तर्हि सिद्धे यत् 'अप्रत्ययः' (१.१.६९) इति निषेधं शास्ति तज्ज्ञापयत्याचार्यो भवेत्येषा परिभाषा भाष्यमानेन सवर्णानां ग्रहणं नेति। किञ्च 'ज्याद ईयसः' (६.४.१६०) इत्येवान्तर्यतो दीर्घे सिद्धे ज्यादादिति दीर्घोच्चारणमस्या ज्ञापकम्। 'अणुदित्'(१.१.६९)सूत्रे 'ज्यादात्' (६.४.१६०) इति सूत्रे च भाष्ये स्पष्टैषा।

'अणुदित् (१.१.६९) सूत्रे' इत्यादि। 'अप्रत्यय इत्यनेन' इति। तद्धि पुथग्वाक्यम्, योगविभागबलाच्च तत्राण्ग्रहणं न सम्बध्यते। एवञ्चानसाधारणतया जातिपक्षगुणाभेदकत्वपक्षाभ्यां प्रसक्तस्यापि समानजातीयस्य भिन्नधर्मणो न ग्रहणम्। अत एव 'पधिमधि' (७.१.८५) इति सूत्रे भाष्ये तपरसूत्रेणान्तरतम्यादनुनासिकाकारः प्राप्नोतीत्याशङ्कितम्। न तु जातिपक्षेण गुणाभेदकत्वेन वेति। तपरसूत्रं चानणीवं विधीयमानांशेऽपि सवर्णग्राहकमिति तदाशयः। तदुत्तरं प्रक्रियालाघवादनुनासिकं उच्चारणीये शुद्धोच्चारणान्नानुनासिक इति समाहितमित्यन्यत्। तेन अष्टन आकारो विधीयमानो नानुनासिकः। तदाह—'सामर्थ्यात्' इत्यादि। गुणाभेदकत्वेन च प्राप्तमिति। स्यादेतत्; यद्यनया विधेयांशे गुणाभेदकत्वपक्षेण प्राप्तस्यापि निषेधस्तर्हि 'अनेकाल्शित्' इत्युदात्तग्रहणस्य तत्पक्षज्ञापकत्वोपवर्णनपरभाष्यविरोधः। ज्ञापनोत्तरमपि चारितार्थ्याभावेन तदसङ्गतेः। यदि च आकारस्य न विधीयमानत्वमपि तु तदवयवकस्यान इति न प्रकृतनिषेधप्रसक्तिरित्युच्यते। तदा यांडयासुडादावपि पाक्षिकानुनासिकयकारघटितस्य प्रसङ्गः। तस्मात्कथमयं 'गुणाभेदकत्वांशे निषेध इति चेत्? न; तद्भाष्यप्रामाण्येनास्यैवातिरिक्तपरत्वकल्पनेनादोषात्।

यत्तु निषेधघटकधर्मपदेनास्याभ्यन्तरकार्यातिरिक्त एव गृह्यत इति नार्थ दोष इत्याहुः, तदसत्; दीर्घादीनामप्यस्यान्तर्गतकार्यतया तद्विषयेऽपि निषेधाप्रवृत्तिप्रसङ्गात्। अत एव विधीयमानांशेऽपि यथायथमान्तरतस्यात् 'सातये' इत्यत्रोदात्तः 'बृहस्पतये' इत्यत्रानुदात्तश्चायादेश इत्यादिव्यवस्थास्थितिरिति दिक्।

ननु 'अप्रत्ययः' (१.१.६९) इत्यनेनैव प्रतीयते विधीयत इति व्युत्पत्तिबलाद्भाव्यमानबोधकेन प्रकृतार्थसिद्धौ किमनया परिभाषयेत्यत आह — 'अत एव' इति। परिभाषाङ्गीकारादेवेत्यर्थः। 'प्रकारान्तरेण' इत्यस्य प्रकृतपरिभाषाश्रयणेनेत्यर्थः। 'तज्ज्ञापयति' इत्यस्यैकदेशद्वारा सम्पूर्णपरिभाषां ज्ञापयतीत्यर्थः। 'ग्रहणं नेति' इत्यस्य भाष्ये उक्तमिति शेषः।

नन्वस्याः परिभाषायास्तदुक्त्या ज्ञापकसिद्धत्वे क्लेशः, स्वांशे चारितार्थ्याभावश्च। निषेधस्य प्रत्ययादेशागमेषु पृथक्प्रमाणसिद्धत्वाभ्युपगमे चं अप्रत्यय इति प्रत्ययांशे वृतो वेति चागमांशे प्रमाणं भवेत्। आदेशांशे त्वपूर्वत्वमेवेति गौरवम्। अप्रत्यय इत्यस्य विधीयमानपरत्वे तु तेनैवांशत्रयसंग्रहान्न कश्चित्क्लेशः। तस्माज्ज्ञापयति इत्यस्य भाष्ये बोधयतीत्यर्थकत्वमेव युक्तमत आह—

'किञ्च' इति। 'ज्ञापकम्' इति। इदमादेशांशे ज्ञापकम्। यदीयं परिभाषा 'ग्राहक'सूत्रस्थाप्रत्ययग्रहणसिद्धैव स्यात्तर्ह्यपूर्वत्वेन ज्ञापनपरमिदं भाष्यमसम्बद्धमेव स्यादित्याशयः।

यद्यपि 'बहोर्लोपः' (६.४.१५८) इत्यतो लोप इत्यनुवर्त्य विनैवाकारविधानं लोपविधानेऽपि 'अकृत्सार्व' (७.४.२५) इति दीर्घे सिद्धयत्यभीष्टं रूपमिति न चारितार्थ्यसम्भवः। तथाप्यङ्गवृत्तपरिभाषाज्ञापनद्वारा चारितार्थ्यमिति प्रकृतभाष्याशयाददोषः। केचित्तु 'घृष्णुया' इत्यादौ दीर्घवारणाय 'अकृत्सार्व' (७.४.२५) इत्यत्र 'ङिति' (१.१.५) इत्यनुवृत्तेरावश्यकतया न प्रकृते लोपमात्रविधानेन निर्वाहः। अङ्गवृत्तपरिभाषाज्ञापनपरं भाष्यमेकदेशिन एव। पिबेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो

भवतीत्यन्यथासिद्धप्रयोजनप्रदर्शनादन्यत्र लक्ष्यसंस्कारार्थमनुल्लेखाच्च । तस्मा-द्विनैव परिभाषान्तरज्ञापनं चारितार्थ्यं सुलभम् ।

नचैतादृशलोपसन्नियोगेन ह्रस्वाकारविधानेऽपि सामर्थ्यात्सवर्णदीर्घे रूपसिद्धेः कथं चारितार्थ्यमिति वाच्यम् । सामर्थ्यहेतुकायां कल्पनायां सन्ध्यभावस्यापि विनिगमकाभावप्रयुक्तस्य सम्भवेन दोषधौव्यादतो न काप्यनुपपत्तिरित्याहुः । उदिदंशोऽप्ययं निषेधः किं न स्यादत आह—

'चोः कुः' (८.२.३०) इत्यादौ भाव्यमानेनापि सवर्ण-ग्रहणं, विधेये उदिद्वचारणसामर्थ्यात् । एतदेवाभिप्रेत्य भाव्यमा-नोऽण् सवर्णान् न गृह्णातीति (व्या.प. ३५) नव्याः पठन्ति ।

नन्वेवं 'अदसोसेः' (८.२.८०) इत्यादिना 'अमू' इत्यादौ दीर्घविधानं न स्यादत आह—

२०. भाव्यमानोऽण्उकारः सवर्णान् गृह्णाति ।

'दिव उत्' (६.१.१३१) 'ऋत उत्' (६.१.१४) इति तपरकरणमस्या ज्ञापकम् । 'तित् स्वरितम्' (६.१.१८५) इति सूत्रे भाष्ये स्पष्टेयम् ।

'चोः कुः' (८.२.३०) इत्यादि । 'एतदेव' इति । न त्वाकारादिव्यावृत्तिमपीति भावः । तेन 'अष्टाभिः' इत्यादौ विधीयमानाकारो नानुनासिक इत्यनुसन्धेयम् । अत्रायं निष्कर्षः – 'अप्रत्ययः' (१.१.६९) इत्यत्र प्रकृतशास्त्रसङ्केतविषय एव यदि प्रत्ययशब्दः परिभाषा चेयमतिरिक्ता तदा व्यक्तिपक्षे परस्परभेदात् 'अणुदित्' (१.१.६९) सूत्रस्थाणुपदेन वर्णै-समाम्नायिकबोधकेन प्रादेशिकानामग्रहणात्सवर्णग्रहणानुपपत्तिरित्याशङ्कायां प्रत्याहाराश्रयवर्णेषु 'अणुदित्'(१.१.६९)सूत्रचारितार्थ्योपपादनपरभाष्य-विरोधः । 'अप्रत्ययः' (१.१.६९) इत्यस्य सार्थक्यासम्भवात् ।

न हि प्रत्याहाररूपेण कश्चित्प्रत्ययो निहितः। तस्माद्प्रत्यय इत्यस्य व्युत्पत्तिविशेषलब्धभाव्यमानपरत्वमेव युक्तम्। 'ज्यादादीयसः'(६.४.१६०) इति सूत्रस्थं भाव्यमप्रत्यय इत्यस्य उक्तार्थत्वज्ञापनपरम्। 'अणुदित्' (१.१.६९) सूत्रस्थन्तु 'ठित्किन्मित्सूपसंख्यानम्' इति वार्तिकं यथाश्रुताभिप्रायेण। भाष्यकारमपेक्ष्य वार्तिककारस्याज्ञानकल्पनायाः सार्वत्रिकत्वात्स्मादप्रत्यय इत्यस्यैवार्थो नातिरिक्ता परिभाषेति प्राचीनानामभिप्रायः। नव्यास्तु – गुणाभेदकत्वप्राप्तस्य सवर्णस्य वाक्यभेदेन वारणार्थतया सार्थक एवाप्रत्यय इति निषेधः।

न हि व्यक्तिपक्षे गुणानां भेदकत्वमेवेति नियमः। वृद्धिसूत्रादिभाष्यविरोधात्। येन तद्वैयर्थ्यमूलकः प्रागुक्तभाष्यविरोधः स्यात्। यदि तु 'अणुदित्' (१.१.६९)सूत्रस्थेनाणपदेन तत्र गुणानां भेदकत्वमेव युक्तम्, अन्यथा ह्यजित्येव सिद्धे यकारादिसंग्रहार्थस्य तस्य वैयर्थ्यं स्पष्टमेवेत्युच्यते; तर्हि मास्तु यण्सु गुणाभेदकत्वम्, 'अक्षु' केन वार्यते। अज्विषयेऽपि सामान्यज्ञापनबलादभेदकत्वानभ्युपगमे पक्षोच्छित्त्या तत्समर्थनपरभाष्यानुपपत्तिस्तदवस्था। किञ्च 'अणुदित्' (१.१.६९) सूत्रस्थवार्तिककारस्य विना विरोधमज्ञानकल्पनाऽपि न युक्ता, 'ज्ञापयति' इत्यस्य बोधयतीत्यर्थकत्वमपि न युक्तमस्वारस्यात्। अपि च प्रत्ययशब्दस्य न भाव्यमानार्थकत्वसम्भवः। 'योगाद्धि बलीयसी' इति न्यायविरोधात्। प्रपूर्वकस्येणो विधानार्थकत्वमपि न कुत्रचित्प्रसिद्धम्। 'ज्यादादीयसः' (६.४.१६०) इति सूत्रस्थमपि भाष्यमस्मद्रीत्यैव स्वारस्यमधिरोहति। तस्माज्ज्ञापकसिद्धैवैषा परिभाषेति प्रवदन्तीत्यलम्।

इयमुक्तपरिभाषाया अपवादस्तदाह—'ननु' इत्यादि। 'दिव उत्' इति। ननु ज्ञापनोत्तरमपि तपरकरणस्य चारितार्थ्याभावः। वकारस्य किञ्चित्साम्येन मात्रिकस्यैव प्रवृत्तेः। न च 'व्रश्च' (८.२.३६) इति सूत्रे छप्रहणाकरणलाघवानुरोधेन 'ह्रस्वोः शूट्' (६.४.१९) इत्यत्र 'इकिति' (१.१.५) इत्यनुवर्तनाद् 'घुश्याम्' इत्यादावूठि कृते प्रसक्तस्य द्विमात्रिकस्य वारणाय तच्चरितार्थमिति वाच्यम्। प्रतिपदविधित्वेन पूर्वमेव तत्रोत्त्वप्रवृत्तेरिति चेत्? न; दिश्शब्दादाचारक्विबन्तात् क्यनन्ताद्वा क्विपि निष्पन्नस्य घुशब्दस्य

पदान्तविषये मात्रिकादेशविधानाय तत्सार्थक्यसम्भवात्। इतोऽपि सुगमं ज्ञापकमस्तीत्याह—'ऋत ऊत्' (६.१.१११) इति। 'पितॄ राज्यम्' इत्यादौ ह्रस्वोपदीर्घवारणार्थं तु न तत्र तपरकरणम्। ऊ इपर इति 'उरण्रपरः' (१.१.९१) इति सूत्रस्थभाष्यविरोधात्। एवं तपरकरणं रपरत्वव्यावृत्त्यर्थं भिन्नकालत्वादित्यपि न युक्तम्। तस्योच्चारितभिन्नकालवर्णव्यावर्तकत्वात्। अन्यथा 'ऋत इदुदोष्ठ्यपूर्वस्य' इत्यादावपि तथात्वापत्तौ 'चिकीर्षति' 'मुमूर्षति' इत्याद्यसिद्धयापत्तेरिति दिक्।

अथैतत्परिभाषासत्त्वे पाणिनेः 'ऊदुपधाया गोहः' (६.४.८९) इत्यत्र दीर्घोच्चारणमसम्बद्धं स्यात्। 'उः' इत्युक्तावप्यन्तर्यतो दीर्घसिद्धेः। न च 'गोहः' इति विकृतनिर्देशस्य निमित्तभूताजादिप्रत्ययांशे गुणहेतुत्वसूचकतया चरितार्थत्वात्प्रक्रियालाघवाच्च गुहेरजादौ गुणनिमित्ते प्रत्यये परत उवर्णादेश इत्यर्थे विधीयमान आन्तरतम्याद्ह्रस्व एव स्यादिति दीर्घोच्चारणमावश्यकमेवेति वाच्यम्। ह्रस्वस्य ह्रस्वविधाने फलाभावादेव दीर्घप्रवृत्तेः।

न च गुणनिवर्तकतया तस्य चरितार्थ्यमिति वाच्यम्; 'नाभ्यस्तस्य' (७.१.७८) इत्यनन्तरं 'गुहोचि' इति न्यासेनैव सिद्धे ह्रस्वोकारस्य पुनर्ह्रस्वविधानवैयर्थ्यस्य तदवस्थत्वादिति चेत्? मैवम्; 'दोषो णौ' (६.४.९०) इत्युत्तरार्थत्वेनोवर्णग्रहणस्योपधाग्रहणस्य चावश्यकत्वेन निरुक्तन्यासे लाघवाभावेन ह्रस्वोवर्णादेशविधानस्य गुणनिवृत्तीतरफलकल्पनायां अयुक्तत्वात्। तस्माद्युक्तमेव दीर्घोच्चारणम्। 'दोषो णौ' (६.४.९०) इति विकृतनिर्देशस्तु प्रक्रमानुरोधेनैव। 'आहस्थः' (८.२.३५) इति थादेशवत् णेर्गुणनिमित्तत्वान्यभिचारात्।

नन्वेवमपि प्रकृतसूत्रद्वयगतविकृतनिर्देशप्रत्याख्यानपरभाष्यविरोधः। तत्र हि 'ऊत्' इत्यत्र ह्रस्वदीर्घयोः प्लेषेण गुणविषये परत्वाद्गुणप्रवृत्त्यनन्तरमान्तरतम्याद्दीर्घः। निषेधविषये तु ह्रस्व एवान्तरतम्यादिति सिद्धमिष्टमित्युक्तम्। न चैवं 'दोषो णौ' (६.४.९०) इत्यत्र ह्रस्वदीर्घयोरुभयोरपि सम्प्रत्ये पर्यायताप्रसङ्ग इति वाच्यम्। 'अनन्तरस्य' (प. ६२) इति न्यायेन दीर्घस्यैव तत्र सम्बन्धात्। प्रकृतपरिभाषाभ्युपगमे हि 'उः' इत्युक्तावपि

निर्वाहे प्रश्लेषप्रतिपादनमयुक्तमेवेति चेत् ? अत्राहुः; विकृतनिर्देशाभावे तत्कन्यायादुवर्णादेशो गुणमपि बाधेत । तदप्राप्तियोग्ये चारितार्थ्याभावात् ।

न च निषेधविषये चारितार्थ्यम् । तत्रापि गुणप्राप्तियोग्यतानपायात् । निषेधो हि गुणस्यैव न तु योग्यतायाः । अत एवाहन्शब्दांशे रुत्वपवादत्वान्नलोपं बाधिष्यत इति त्रैपादिकं भाष्यं सङ्गच्छते । अन्यथा निषेधविषये सम्बुद्धौ रुत्वस्य चारितार्थ्यात्तदसङ्गतिरेव । प्रश्लेषनिर्देशो तु सामर्थ्यान्न्यायबाध इति भाष्यतात्पर्यादविरोधः । उपायान्तरपरमिदं भाष्यमिति वदन्नुद्योतकारस्तु तादृशन्यायस्यानित्यत्वादेवाप्रवृत्तिं मन्यत इति । इदन्तु बोध्यम्—धर्मिग्राहकसाजात्यादियमादेशमात्रविषयिणी तेन 'सनांशसभिक्ष उः' (३.१.१६८) इत्यादौ न दोषः । अनभिधानन्तु 'नलक्षणैकचक्षुष्काणां युक्तमुत्तरम् । यद्यपि 'अदसोऽसेः' (८.२.८०) इत्यत्र ह्रस्वदीर्घयोस्समाहारद्वन्द्वमाश्रित्य निर्वाहोऽन्यत्र फलाभाव इतीयं प्राचीनैः प्रत्याख्याता, तथापि समाहारद्वन्द्वे निमित्तान्तरानपेक्षत्वेन अन्तरङ्गत्वान्नपुंसकह्रस्वे प्रथमं प्रवृत्ते ह्रस्वनिर्देशानुपपत्त्या परिभाषयैव निर्वाहो नान्यथेति गूढाशयः । 'तदेतद्भाष्ये स्पष्टा' इत्यनेन मूलकारः सूचयतीत्याहुः ।

ननु 'गव्रे हितम् गोहितम्' इत्यादौ प्रत्ययलक्षणेनावाद्यादेशापत्तिरत आह—

२१. वर्णाश्रये नास्ति प्रत्ययलक्षणम् ।

वर्णप्राधान्यविषयमेतत् ।

निषेधप्रकरणमपेक्ष्य सङ्गतिः 'अवाद्यादेशापत्तिः' इति । ननु 'अन्तरङ्गानपि (पं. ९२) इति न्यायेन ङेप्रभृतीनामित्संज्ञालोपाभ्यां प्रागेव लुग्युक्तः । ततश्च सत्यपि प्रत्ययलक्षणेऽचपरत्वाभावान्नोक्तदोषावकाशः ।

न च 'ङे'प्रभृतीनामपि प्रत्ययाधिकारे पाठादेव प्रत्ययत्वबुद्धेः सौलभ्यात्तत्रस्थानामेवेत्संज्ञानां घात्वादिसंज्ञानामिव सुप्संज्ञाया अप्यनु-

बन्धविनिर्मुक्तेष्वेव प्रवृत्त्या न तन्निबन्धनलुक्: सानुबन्धकेषु प्रसक्तिरिति वाच्यम् । तादृशन्यायस्य लुक इव तत्प्रयोजकानामपि प्रातिपदिकबोधकतया सुप्संज्ञाया अपि लुक्प्रवृत्तिप्रयोजिकाया इत्संज्ञातःपूर्वमेवा प्रवृत्त्यौचित्यादिति चेत् ? मैवम् । तादृशन्यायस्येत्संज्ञातिरिक्तविषयत्वमित्याशयात् ।

अत एव लुमति प्रतिषेधे 'एकपदस्वरस्योपसंख्यानम्' इति वार्तिक-तद्भाष्ययोः संगतिः । अन्यथा 'गार्गीः' 'बिदाः' इत्यादौ बहुत्वे 'यञिञोश्च' (२.४.६४) इतीत्संज्ञातः पूर्वमेव यञिञोर्लुकि क्लित्स्वराप्रवृत्त्या वार्तिका-रम्भो विफल एव स्यात् । 'गोहितम्' इत्यादिरेतत्परिभाषोदाहरणत्वप्रति-पादनपरं च प्रत्ययलक्षणसूत्रस्थं भाष्यमप्यत्रार्थे प्रमाणम् । 'न लुमता' (१.१.६३) इति निषेधस्तु नात्र 'प्रवर्तते' । 'राजपुरुषः' इत्यादौ पूर्वपदे नलोपादिसिद्धये लुप्तप्रत्ययनिरूपितार्क्षसंज्ञादुर्वृद्ध्यकतादृशप्रत्ययनिमित्त-कविधावेव निरुक्तनिषेधप्रवृत्त्यभ्युपगमादिति दिक् ।

ननु 'स्थानिवत्' (१.१.५६) सूत्रवत्प्रत्ययलक्षणस्यापि वर्णाश्रये विधावप्रवृत्तौ व्यर्थमेवेदं 'प्रत्ययलक्षणसूत्रं स्यादेतदाहि—'वर्णप्राधान्यविषयम्' इति । प्रत्ययलक्षणसूत्रं त्वप्राधान्येन वर्णाश्रयणे विध्यर्थम् । अत एव 'अतृणेट्' इत्यत्र हलादिसार्वधातुकनिमित्तक इमागमो 'मित्रवशीः' इत्यत्र 'शास इदङ्हलोः' (६.४.३४) इतीत्वञ्च सिद्ध्यतीत्याशयः ।

अत्र मानं दर्शयति—

तत्त्वञ्च 'प्रत्ययलोपे' (१.१.६२) इति सूत्रे 'स्थानिवत्' इत्यनुवृत्त्यैव सिद्धे प्रत्ययलक्षणग्रहणं प्रत्ययस्येतराविशेषणत्वरूपं यत्र प्राधान्यं तत्रैव प्रवृत्त्यर्थमित्येतत्सिद्धम् । वर्णप्राधान्यञ्च वर्णस्येतराविशेषणत्वरूपं प्रत्ययनिरूपितविशेष्यतारूपञ्च । तेन 'गोहितम्' इत्यादावविवादि नाश्चित्रायां जाता चित्रा' इत्यादावण्योकारः 'तदन्तात् ङीप्' इति ङीप् च न ।

'तत्त्वञ्च' इत्यादि । 'एतत्सिद्धम्' इति । यत उक्तप्रकारेणेयं परि-

भाषा सिद्धा ततो वर्णप्राधान्यविषयत्वमस्या इति तदर्थः। किमिदं वर्णप्राधान्यम्? यदीतरनिरूपितविशेष्यतारूपं तदित्युच्यते, तर्हि 'एचोऽयवायावः' (६.१.७८) इत्यत्राचोऽप्राधान्यात् 'गोहितम्' इत्यादौ दोष एव। यदि चान्यनिरूपितविशेषणताराहित्यं तदित्युच्यते, तदा 'टिड्ढाणञ्' (४.१.१५) इत्यस्याण् योऽकारस्तदन्तादित्यर्थकतया तत्राकारस्याप्राधान्यात् 'चित्रायां जाता चित्रा' इत्यादौ ङीप् प्रसज्य इत्यत आह—'वर्णप्राधान्यञ्च' इति। 'इतराविशेषणत्वम्' इति। अभेदसंसर्गावच्छिन्नान्यनिरूपितविशेषणताराहित्यमित्यर्थः। तेन 'एचोऽयवायावः' (६.१.७८) इत्यत्राजुपस्थिष्टस्यैच इत्याद्यर्थेनाचोभेदसंसर्गावच्छिन्नविशेषणतावत्त्वेऽपि न क्षतिः। तावतोऽपि न निर्वाह इत्याह—'प्रत्ययनिरूपितविशेष्यतारूपञ्च' इति। प्रत्ययनिरूपितविशेषणताराहित्यमेवात्र वर्णप्राधान्यमिति तत्त्वम्।

'ङीप् च न' इति। ननु प्रत्ययलक्षणग्रहणस्य यत्र प्रत्ययत्वतद्व्याप्यान्यतरधर्मपुरस्कारेण प्रत्ययस्याश्रयणं तत्रैव यथा स्याद्वर्णत्वव्याप्यधर्मपुरस्कारेण तदाश्रयणे मा भूदित्येवमर्थकतया 'गोहितम्' इत्यादावववादिवारणेन चरितार्थत्वात्कथं 'चित्रा' इत्यादौ ङीब्वारणार्थत्वेनोक्तार्थलाभइति चेत्? न; प्रत्ययलोपे तल्लक्षणमित्येव सिद्धे पुनः प्रत्ययपदोपादानेन यत्र विधौ प्रत्ययत्वतद्व्याप्यान्यतरधर्मपुरस्कारेण प्रत्ययस्य प्राधान्येनाश्रयणं तत्रैव प्रत्ययलक्षणमित्येवमर्थसम्पादकतया निरुक्तोभयविधवर्णप्राधान्यविषयकत्वं परिभाषायाः सिद्ध्यतीत्याश्रयात्।

यत्तु प्राधान्यलाभः स्वारसिक एवाप्राधान्यं हि यत्नलभ्यम्। अत एव 'अनल्विधौ' (१.१.५६) इत्यत्र विधिग्रहणादप्राधान्येनाप्यलाश्रयणे निषेध इत्याकरसिद्धान्तः। ततश्च प्रत्ययग्रहणस्य विशेषणतया प्रत्ययाश्रयणेऽपि प्रत्ययलक्षणसम्पादकताया एव न्याय्यत्वादप्योऽकार इत्येवमन्वयेऽपि 'चित्रा' इत्यादौ ङीब्निवारणं दुर्घटमेवेत्याहुः, तदसत्; वार्तिकमते हीयं, परिभाषा तन्मते चालाश्रयणे विध्यर्थं प्रत्ययलक्षणसूत्रं, तत्र प्रत्ययविशेषणत्वेनालाश्रयणे निषेधबाधकतया विधिसम्पादनेन कृतार्थस्य प्रत्ययग्रहणस्य प्राधान्येनालाश्रयणे बाधकत्वानौचित्येनाभीष्टार्थसिद्धेः।

अथैतन्मते 'शोभना हृदयो यस्य स सुहृत्प्रासादः' इत्यत्र स्थानिवद्भावेनासन्तत्वमादाय 'सोर्मनसी अलोमोषसी' (६.२.११७) इत्युत्तरपदाद्युदात्तत्वप्रसङ्गः। तथा यङ्लुकि 'बोभवीति' इत्यादौ ङित्त्वनिबन्धनस्यात्मनेपदस्याप्यापत्तिरिति चेत्? सत्यम्; अनल्विधावित्यस्य प्रसज्यप्रतिषेधरूपेण निषेधकत्वादपवादविषयपरिहारेण वाक्यार्थनिषेध्यसमर्पकत्वेन सम्बध्यमानस्यादेशशब्दस्य प्रत्ययलोपातिरिक्तपरत्वस्य न्याय्यतया विधिकोटावपि तथाविधस्यैवार्थाधिकारात्स्वीकारेण प्रत्ययलोपे स्थानिवद्भावाप्रवृत्तेः।

यद्वा मन्साहचर्यादसोऽपि श्रूयमाणस्यैव ग्रहणादाद्यो न दोषः। असन्तात्रावयवस्य निर्दिश्यमानस्यास उपधाया उच्चारणप्रसङ्गाभावाच्च न दीर्घः। ङित्त्वस्यानुबन्धघटितत्वेनानुबन्धकार्याणां यङ्लुक्यप्रवृत्तेः 'चर्करीतं च' इत्यादौ परस्मैपदेषु पाठाच्छान्दसत्वाच्च द्वितीयोऽपि न दोष इति वार्तिककृतो निष्कर्षः।

इयमल्विधौ स्थानिवत्त्वाप्राप्तावपि प्राप्तप्रत्ययलक्षणविधेर्निषेधिकेति स्पष्टं भाष्ये।

ननु 'अतः कृकमि' (८.३.४६) इत्यत्र कमिग्रहणेन सिद्धे कंसग्रहणं व्यर्थमत आह—

२२. उणादयोऽव्युत्पन्नानि प्रातिपदिकानि।

इदमेवास्या ज्ञापकमिति कैयटादयः। कमेस्तु न कंसोऽनभिधानात्। 'युवोरनाकौ' (७.१.१) इत्यादौ भाष्ये स्पष्टा। 'ण्वुल्तृचौ' (३.१.१३३) इत्यादौ भाष्ये 'व्युत्पन्नानि' इत्यपि। 'इदं शाकटायनरीत्या, पाणिनेस्त्वव्युत्पत्तिपक्ष एवेति' शब्देन्दुशेखरे निरूपितम्। 'आयनेयी' (७.१.२) इति सूत्रे भाष्ये स्फुटमेतत्।

भाष्ये स्पष्टम् इति। वार्त्तिककाराभिप्रायवर्णनमेतत्। भाष्यमते तु नेयमावश्यकी परिभाषा। 'प्रत्यलक्षण' (१.१.६२) सूत्रन्तु अनल्विधावेव प्रत्ययत्वतद्घटकान्यतरधर्मनिमित्तकमेव भवति नान्यदिति 'स्थानिवत्' (१.३.९) सूत्रस्य नियामकम्। तेन 'सुङ्घप्रासादः' इत्यादौ न दोषः। 'तृणह इम्' (७.३.९२) इत्यत्र 'सूचि न' (७.३.८७) इत्यनुवर्तनान्निर्वाहः, 'ग्रास इदङ्' (६.४.३४) इत्यत्र 'अङ्' इति योगविभज्यादौ यदि स्यात्तर्हि अङ्ग्रहेवेति नियमाश्रयणेन हलग्रहणस्य प्रत्याख्यानात् 'मित्रश्रीः' इत्यत्रापि न दोषः।

ननु वार्त्तिकमतेऽपि प्रागुक्तरीत्या दोषाभावार्त्तिके बीजं तन्मतोपेक्षायां भाष्यकारस्येति चेत्? अत्र केचित्—प्रत्ययग्रहणसामर्थ्यमूलकत्वेनाश्रीयमाणं प्राधान्यं यदि सर्वात्मना विशेषणताराहित्यं तर्हि तन्निमित्तकमेवानेन प्रार्थ्यते न तु तत्स्थानिकमित्यप्रसिद्धिरेव। यदि च तादात्म्यावच्छिन्नविशेषणताराहित्यं तदित्युच्यते तावतापि 'राजा' इत्यादौ हल्ङ्यादिलोपोत्तरं 'सुतिङन्तम्' (१.४.१४) इत्यनेनापेक्षितं सुबन्तत्वनिबन्धनं पदत्वं दुर्लभमेव। तस्माद्गुणनिरूपितविशेषणताराहित्यं तदिति विवक्षायां क्लेशः।

यदि च विशेषणतया अलाश्रयणे विध्यर्थत्वात् 'प्रत्ययलक्षण' (१.१.६२) सूत्रस्यान्यत्रानल्विधौ प्रत्ययलोपे 'स्थानिवत्' (१.३.९) सूत्रं प्रवर्तत एवेत्युच्यते तर्हि 'अनन्तरस्य' (प. ६२) इति न्यायेन प्रत्ययलक्षणप्राप्तिविषये कृताश्रयस्य न लुमता (१.१.६३) इत्यस्य 'स्थानिवत्' (१.३.९)) सूत्रविषये प्रवृत्त्ययोगात् 'कति' इत्यत्र स्थानिवत्त्वेन गुणापत्तिः। यदि च लक्ष्यानुरोधात् 'अनन्तरस्य' (प. ६२) इति न्यायोऽत्र नाश्रीयत इत्युच्यते, तर्हि 'सुमया' 'सुस्रोता' इत्यादौ स्थानिवत्त्वेनान्तर्वर्तिनः सोरुगित्त्वमादाय प्राप्तस्य नुमस्त्रियां ङीपश्च वारणायानुबन्धकार्येष्वपि 'अचक्विधौ' (१.३.९) इति प्रतिषेधे आश्रयणीय इति क्लेशः।

यदि तु प्रत्ययत्वतद्घटकान्यतरधर्मपुरस्कारेण तदाश्रयणमेव प्राधान्यमित्युच्यते, तर्हि 'अण्प्रोकारस्तदन्तात्' इत्यर्थे अण्रूपाकारत्वस्य प्रत्ययत्वव्याप्यतया 'चित्रा' इत्यादौ ङीब्वारणाय प्रत्यत्वव्याप्यश्च धर्मो वर्णत्वव्याप्यतानवरुद्ध एव विवक्षणीय इत्यपि क्लेश इति तदुपेक्षाबीजमाहुः

प्रत्ययत्वज्ञानसहकृतज्ञानसम्पादकत्वसाम्येन 'प्रत्ययग्रहण' (प. २३) परिभाषाया अपि स्मृतिविषयत्वेऽपि सूचीकटाहन्यायेनास्याः परिभाषायाः प्रथमतो निरूपणमिति द्रष्टव्यम्। 'व्यर्थं स्यात्' इति। तत्र 'कमि' इत्यस्य समासाक्षिप्तोत्तरपदविशेषत्वेऽपि तदधिकारे धातुग्रहणे तदादिविधेः 'विष्वग्देवयोः' (६.३.९२) इति सूत्रस्थप्रत्ययग्रहणेन ज्ञापितत्वात्कंसेऽपि प्रवृत्तिरित्याशयः। उणादिप्रत्ययान्तत्वेन व्याकरणान्तराभिमतानि प्रातिपदिकानि वस्नसादिवत्प्रकृतिप्रत्ययविभागविहीनानीति परिभाषार्थः। 'कैयटादयः' इति। भाष्यानवगृहीतत्वमत्रारुचिः। 'भाष्ये स्पष्टा' इति। तत्र हि 'कंसीयपरशव्ययोः' (४.३.१३८) इति विधीयमानो लुक् प्रकृत्यवयवयोरुप्रत्ययसप्रत्ययययोर्मा भूदित्यर्थं प्रवृत्तं विशिष्टनिर्देशासिद्धमिति वार्तिकं प्रकृतपरिभाषाया प्रत्याख्यातम्।

'०वुल्तृचावित्यादौ भाष्ये' इति। तत्र हि तृचश्चकारस्य 'अप्तृन्' (६.४.११) इत्यत्र तृप्रत्ययान्तमातृशब्दग्रहणवारणार्थमित्युपपाद्य, नप्त्रादिग्रहणादेतेषामेव योनिसम्बन्धवाचिनां नान्येषामिति नियमाश्रयणेन परिहृतम्। 'इदं शाकटायनरीत्या' इति।

"नाम च धातुजमाह निरुक्ते
व्याकरणे शाकटस्य च तोकम्"

इति 'उणादयो बहुलम्' (३.३.१) इति सूत्रस्थभाष्यबलात्तन्मते सर्वेषामेव प्रातिपदिकानां व्युत्पन्नत्वमिति बोध्यम्।

'अव्युत्पत्तिपक्ष एव' इति। 'सर्वनामस्थानम्' (१.१.४२) इति महासंज्ञाकरणवत् 'अयामन्त' (६.४.९९) इति सूत्रप्रणयनं पाणिनेर्व्याकरणान्तरानुसारेण। 'उणादयो बहुलम्' (३.३.१) इति च तादृशप्रत्ययान्तत्वेन परसम्मतानि साधूनीत्यर्थकं तेषामसाधुताव्यावृत्त्यर्थं बहुलग्रहणञ्च शास्त्रान्तरप्राप्तानामभीष्टकार्याणां प्रवृत्त्यर्थमिति तदाशयः।

ननु व्युत्पन्नत्वाव्युत्पन्नत्वयोरुभयोरपि पक्षयोर्भाष्यारूढत्वात्कथमव्युत्पन्नत्वमेवेत्याग्रहोऽत आह—'आयनेयीति भाष्ये स्फुटम्' इति। तत्र

हि 'शङ्खः' इत्यादावादेशवारणाय उणादीनां प्रतिषेधो वक्तव्य इति वार्तिकमुपक्रम्य न वक्तव्यः, प्रातिपदिकविज्ञानाच्च प्राप्तिनेः सिद्धमित्युक्तम् ।

केचित्तु जातिव्यक्तिपक्षयोरिव अनयोरपि पक्षयोर्द्वयोर्व्यवस्थया प्रकृतशास्त्रे आश्रयणं युक्तम् । 'उणादयोऽव्युत्पन्नानि' (प. २२) इत्यय-मतिदेशो न तु वस्तुस्थितिकथनम् । अतिदेशिकस्यानित्यत्वाच्च व्युत्पन्नत्व-मप्यत्र शास्त्रे निर्बाधम् । 'अयामन्त' (६.४.५५) इति सूत्रमत्रैवार्थे प्रमाणमित्युच्यताम् । अत एव 'प्रत्ययस्य लुक्' (१.१.६१) इति सूत्रे कैयटेन 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इति भाष्यमुपादाय कंसप्रहण-दुणादिप्रत्ययान्तानि प्रातिपदिकानि क्वचिदव्युत्पत्तिकार्यं लभन्त इत्यर्थ उक्तः ।

किञ्च सर्वथैव प्रकृतशास्त्रे व्युत्पत्तिपक्षमनङ्गीकुर्वतां 'ण्वुल्तृचौ' (३.१.१३३) 'न धातुलोप आर्धधातुके' (१.१.४) 'वेरपृक्तस्य' (६.१.६७) इत्यादिषु बहुप्रदेशेषु व्युत्पत्तिपक्षाश्रयणं भगवतः पतञ्जलेरसम्बद्धं स्यात् । 'रात्री' 'शकटी' इत्यादौ 'कृदिकारादक्तिनः' (ग.सू.९०) इति ङीष्प्रत्ययस्य, 'सर्पिषा यजुषा' इत्यादौ प्रत्ययत्वनिबन्धनस्य षत्वस्य 'प्रतिदीष्णा' इत्यादौ धातुत्वनिबन्धनस्य दीर्घस्य च समर्थने क्लेशोऽपि । तस्मात् 'आयनेयी' (७.१.२) इति सूत्रस्थं प्रागुक्तं भाष्यं पक्षान्तरेण परिहाराभिप्रायकं, न त्वत्र शास्त्रे व्युत्पत्तिपक्षाभावपरमिति योजनीयम् । अत एव 'इसुसोः सामर्थ्ये' (८.३.४४) इति सूत्रे श्लोकवार्तिककारैः

> "अथ चेत्कृदन्तमेतत्ततोऽधिके नैव मे प्राप्तिः ।
> वाक्ये च मे विभाषा प्रतिषेधो न प्रकल्पेत्" ॥
>
> अथ चेत्संविज्ञानं नित्ये षत्वे ततो विभाषेयम् ।
> सिद्धश्च मे समासे प्रतिषेधार्थस्तु यत्नोयम् ॥

इत्यनेन षत्वविधावुभयोरपि पक्षयोर्निर्वाह उपपादित इत्याहुः ।

प्रागुपदर्शितेन सन्दर्भेणेदानीमस्याः परिशाष्यायाः सापवादायाः प्रपञ्चस्याव-सरः इति दर्शयति –

ननु 'देवदत्तश्चिकीर्षति' इत्यादौ देवादेः सन्नन्तत्वप्रयुक्त-धातुत्वापत्तिरत आह—

२३. प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ।

'यस्मात्प्रत्ययविधिः' (१.४.१३) इति सूत्रे यस्मात्प्रत्यय-विधिस्तदादिप्रत्यये इति योगो विभज्यते । गृह्यमाणे इति उपतिष्ठत इति शेषः । तेन तदाद्यंशः सिद्धस्तदन्तांशस्तु 'येन विधिः' (१.१.७२) इति सूत्रेण सिद्धः । स च शब्दस्वरूपं विशेष्य-मादाय विशेष्यान्तरासत्त्वे ।

ननु 'देवदत्तश्चिकीर्षति' इत्यादि । 'धातुत्वापत्तिः' इति । 'देव-दत्तो गार्ग्यः' इत्यत्र अङ्गसूत्रस्य(१.४.१३)भाष्यकाराप्रातिपदिक-कत्वसाद्धिशब्दार्थः । ननु 'मूलकेन उपदंशम्' इत्यादौ कृदन्तत्वप्रयुक्तमिव प्रकृते, तद्धितान्तत्वप्रयुक्तामपि प्रातिपदिकसंज्ञां समासकृतविधयः परत्वाद् बाधत इति नायं दोष इति चेत् ? न; अस्यामवस्थायां प्रायेण सर्वेषामेव समासानां प्रत्ययान्तत्वेन अप्राप्तायाः प्रातिपदिकसंज्ञायाः समर्थनेन कृता-र्थस्य समासग्रहणस्य नियामकत्वानुपपत्त्या दृष्टान्तदार्ष्टान्तिककक्ष्योरुभयोरपि तदापत्तेर्दुर्वारत्वात् । सति च धातुत्वे प्रातिपदिकत्वे वा 'सुपो धातुप्राति-पदिकयोः' (२.४.७१) इति लुक्प्रसङ्गः । वाक्यसंस्कारे च देवदत्तश्चि-कीर्षति' इत्यादौ देवादेः सन्नन्तत्वप्रयुक्तधातुत्वप्रसङ्गश्चेति भावः ।

'येन विधिः' इति सूत्रेण' इति । प्रमाणान्तरसिद्धस्यापूर्वत्वकल्पनम-युक्तमित्याशयः । अत्र एव 'उगितश्च' (६.३.४९) इति सूत्रे तदान्तां-शविकलैवैषा परिभाषा भाष्ये पठिता । 'नन्वेवं ङ्याप्प्रातिपदिकात्' (४.१.१) इत्यादौ विशेष्यसमभिव्याहाराभावात् 'येन विधिः' (१.१.७२) इत्यस्याप्राप्त्या तदन्तांशो दुर्लभः । न चोपस्थितंतदाद्यंशमेव विशेष्यत्वेनाश्रित्य

तत्सिद्धिरिति वाच्यम्। तस्य बहुव्रीहित्वेन विशेष्यान्तरसाकाङ्क्षतया 'न ह्यनुपाधेः' इति न्यायेन तथापोस्तद्विशेषणत्वासम्भवात्। किञ्चाङ्गसंज्ञाबोधकवाक्यान्तरे तदाद्यंशस्य प्रत्ययप्राग्वर्तिबोधकतया प्रकृतेऽप्यर्थाधिकारेण धर्मिग्राहकसाजात्येन वा तथैव न्याय्यत्वात्पश्चादपि सामानाधिकरण्यासम्भवेन तद्विशेषणतया न तदन्तांशलाभ इत्यत आह—'स च' इति। शब्दस्वरूपविशेष्याध्याहारे च तदाद्यंशोऽप्यगत्या प्रत्ययविशिष्टपर एवेति ध्येयम्। एवञ्च विशेष्यविशेषणभावे कामचारात्तदाद्यंशविशेष्यतापन्नस्यैव शब्दस्वरूपस्य प्रत्ययांशे सम्बन्धे सामानाधिकरण्याभावादेव तदन्तविधेरप्राप्तेः 'प्रत्ययग्रहणे चापञ्चम्याः' (प. २४), इति नापूर्वं, किन्तु तत्रैव तात्पर्यग्राहकमिति लाघवमुपपद्यते। तदाद्यंशस्यैव विशेष्यतावादे तु परत्र प्रत्ययविशिष्टबोधकत्वेन क्लृप्तस्य पञ्चम्यन्तविषये प्रत्ययप्राग्वर्तिमात्रपरत्वकल्पनाद्वारेणापूर्वत्वगौरवं स्पष्टमेवेत्याहुः।

'विशेष्यान्तरसत्त्वे' इति। तत्सत्त्वे तु तेनैवान्यपदार्थविषयकाकाङ्क्षाया निवृत्तेस्तदन्तांशस्य च सिद्धौ विशेष्यान्तराध्याहारे मानाभाव इत्याशयः। अन्यथा गृहीतविशेषणेनैकः शब्दस्वरूपविशेष्याध्याहारेणापरं इति तदन्तविधिद्वयापत्तौ 'यञिञोश्च' (२.४.६४) इत्यादिना विधीयमानः फगादिस्तदन्तान्तादपि प्रसज्येत। प्रत्ययविधौ तदन्तविधिनिषेधश्च स्वरूपेण गृहीतप्रातिपदिकविषय इति स्पष्टमन्यत्रेति बोध्यम्। इदञ्च प्रायिकम्। 'नित्यं समासे' (८.३.४९) इति सूत्रस्थादुत्तरपदस्थपर्युदासात्। अन्यथा 'परमसर्पिःकुण्डिका', इत्यादौ विशिष्टस्य प्रकृतपरिभाषया इसुसन्तत्वाभावादेकदेशस्य 'सर्पिः' इत्यादेः 'उत्तरपदत्वे च' इति निषेधेन पदत्वाभावाच्च षत्वाप्राप्तेस्तद्वैयर्थ्यं स्पष्टमेव। तेन 'वनो र च' (४.१.७) इत्यस्य तदन्तान्तादपि प्रवृत्त्या 'बहुधीवरी' इत्यादिसिद्धिरिति स्पष्टं 'इसुसोः' (८.३.४९) इति सूत्रे शेखरे।

नन्वर्थापत्तिमूलकादाक्षेपादेव प्रकृतपरिभाषासिद्धौ वृथैवायं योगविभागादिपरिक्लेश इति प्राचीनोदघोषं दूषयति —

यत्तु प्रत्ययेन स्वप्रकृत्यवयवकसमुदायाक्षेपात्तद्विशेषणत्वेन

तदन्तविधिरिति ? तन्न; 'इयान्' इत्यादौ तस्य तादृशसमुदायेन व्यभिचारेणाक्षेपासम्भवात् ।

'यत्तु' इति । 'समुदायाक्षेपात्' इति । ननु स्वप्रकृत्यवयवकत्वस्य पदान्तरघटितेऽपि सम्भवेन 'देवदत्तश्चिकीर्षति" इत्यादौ देवादिविशिष्टे सन्नन्तत्वादिप्रयुक्तधातुत्वादिप्रसङ्गो दुर्वारः । न च स्वप्रकृत्याद्यवयवक-समुदायाक्षेप इत्याशय इति वाच्यम् । इनमकजादिविषये प्रकृत्याद्यवयवक-त्वस्य व्यभिचरिततया प्रत्ययेन तदाक्षेपासम्भवत् । अत्रोच्यते-स्वस्व-प्रकृतिकतदुभयपर्याप्तसमुदायस्याक्षेपः तस्य सर्वत्राविनाभूतत्वात् ।

न च 'पपाचकः' इत्यादौ 'तिङश्च' (९.३.९६) इति विधीयमान-स्याकचः समुदायप्रकृतिकत्वेऽपि स्वप्रकृतिप्रकृतिकत्वाभावादकञ्घटितसमु-दायस्य तिङ्प्रत्ययेनाक्षेपासम्भवात्पदत्वानापत्तिरिति वाच्यम् । तन्मध्यपतित-न्यायेनाकञ्घटिते तद्रहितसमुदायपर्याप्तिरतिदेशेनादोषात् । यद्वा स्वप्रकृति-तदर्थान्वयवदर्थप्रत्ययैतदुभयपर्याप्तसमुदायस्याक्षेपः । तिङन्तप्रतिकस्याप्यकचो धात्वर्थगतकुत्साबोधकतया तदर्थान्वयोत्सेवेति न कश्चिद्दोष इत्याहुः ।

'व्यभिचारेण' इति । नन्वलौकिके वाक्ये वर्तत एवाव्यभिचारः । ततश्च प्रकृतिभागस्य लोपेऽपि स्थानिवद्भावेन तद्बुद्धिः सुलभा, स्थानिव-त्वञ्चाशास्त्रीयेऽपि प्रवर्तत एव । किञ्चातीतधूमज्ञानेन महानसादौ वह्वयनुमितेः प्रसिद्धतया नेदानीं तत्सत्तायां आवश्यकता । ततश्च कथमाक्षेपासम्भव इति चेत् ? अत्रोपाध्यायानुयायिनः; स्थानिवद्भावप्रयुक्तस्याव्यभिचारस्याक्षेप-प्रयोजकत्वमिति तावदयुक्तम् । 'स्थानिवत्' (१.३.९) सूत्रेणाभावातिदेश-स्यानिष्टतया व्यभिचाराभावरूपस्याव्यभिचारस्य तेनातिदेष्टुमशक्यत्वात् ।

किञ्च सत्यप्यतिदेशे तथाविधमव्यभिचारमाश्रित्य न लोकन्यायसिद्ध-स्याक्षेपस्य शास्त्रे सम्भवः । तस्य अनाहार्याव्यभिचारप्रयोज्यत्वेन 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यादौ लोके दृष्टत्वात् । शास्त्रकारीयाहार्यारोपो हि शास्त्रस्यैव प्रवर्तको निवर्तको वा, न तु लोकस्य । तथा भूतपूर्वस्याव्य-भिचारस्याक्षेपप्रयोजकत्वमित्यप्ययुक्तम् ।' विनष्टजलेऽपि ह्रदे भूतकालिका-

त्रिनाभावप्रयुक्तह्रदत्वानुपपत्तिमूलकादाक्षेपाज्जलवत्ताप्रत्ययप्रसङ्गात्। अतीत॰ धूमादिज्ञानमप्यतीतवह्न्यादेरेवानुमापकम्। न तु वर्तमानस्येति युक्तम्। न हि निष्कासितवह्नौ महानसे तथाविधं धूमज्ञानमादाय वह्निमत्ताप्रत्ययः कस्यचिदुपजायते। किञ्च आक्षेपो नाम मानसिकज्ञानविशेषः। अनुमितिर्वा। तद्विषयस्य च निर्मुक्तसमुदायस्य न शाब्दान्वयप्रतियोगित्वसम्भवः। वृत्तिज्ञानजन्योपस्थितिविषयताया एव तत्प्रयोजकत्वात्। ततश्च सामानाधिकरण्यान्वयप्रयुक्तस्तदन्तांशः कथं सिद्धयेत्। वृत्तिज्ञानजन्योपस्थितिविषयाविनाभावस्यापि शाब्दान्वयप्रयोजकत्वमिति तु युक्तं, शब्दस्वरूपेऽपि शक्तिमभ्युपगच्छतां शाब्दिकानां मते तादृशोपस्थितिविषयशब्दस्वरूपाविनाभूतस्य गगनस्यापि शाब्दधीविषयत्वप्रसङ्गात्। 'आदिरन्त्येन' (१.१.८) इत्यत्र तु संज्ञाविशेषकाकाङ्क्षायामाद्यन्तावयवापेक्षितसमुदायबोधकशब्दाध्याहारः शाब्दाकाङ्क्षायाश्शब्देनैव निवर्त्यत्वात्। आदेशपदवैयर्थ्यापादनपर 'स्थानिवत्' (१.३.९) सूत्रभाष्यस्याप्ययमेवाशय इत्यतो न समुदायाक्षेपप्रयुक्ता परिभाषासिद्धिरित्याहुः।

केचित्तु – नात्राक्षेपस्य प्रसक्तिः। यत्र हि 'पीनो देवदत्तः', इत्यादौ दिवसभोजनाभाववद्देवदत्तपीनत्वादिबुद्धेरनुपपत्तेः, आक्षिप्यमाणेन च रात्रिभोजनादिना तत्परिहारस्तत्र खल्वसौ न्यायः। प्रकृते च द्वयोरप्यसम्भवः। न हि जातिविशेषात्मकप्रत्ययत्वप्रकारकबुद्धेस्तत्प्रकृतिघटितसमुदायमन्तरेणानुपपत्तिः। आक्षिप्यमाणेन वा तेन तत्परिहारः। तस्मादयुक्त एवायं समुदायाक्षेपप्रकार इत्याहुः। तदादितदन्तांशयोरसन्नियुक्तत्वेन निष्पत्तेः।

फलमुपपादयितुमाह –

यत्र प्रत्ययो निमित्तत्वेनाश्रीयते तत्र तदादीत्यंशमात्रोपस्थितिरिति 'अङ्गस्य' (६.४.१) इति सूत्रे भाष्यकैयटयोः। एवं यत्रापि पञ्चम्यन्तात्परः प्रत्यय आश्रीयते तत्रापि तदादीत्यंशोपस्थितिः, परन्तु तत्र पञ्चम्यन्तता। अत एव 'एङ् ह्रस्वात्' (६.१.६९) इति सूत्रे एङन्तादित्यर्थलाभः।

'यत्र' इति । ईदृशविषये तदाद्यंशस्य विशेष्याकाङ्क्षायां सुपीत्यादि सप्तम्यन्तानुरोधेन शब्दस्वरूपस्यापि तादृशविभक्त्यन्तस्यैव अध्याहर्तव्यतया निर्दिष्टपरिभाषाबलात् सुब्विधानवर्ष्याद्यवय(व)कसुनन्तोपश्लिष्टस्य पूर्वस्येत्याद्यर्थं तथाविधस्यादन्तस्य प्रत्यासत्त्या तादृशसुब्निरूपिताङ्गत्ववतो दुर्लभत्वेन 'उत्तमैकाभ्याञ्च' (१.४.९०) इति निर्देशेन च न शब्दस्वरूपविशेष्याध्याहारमूलकस्तदन्तविधिः । नाप्यङ्गस्येत्यस्य विशेष्यतामादाय तत्सम्भवः । विभक्तिकत्वेन प्रत्ययप्राग्वर्तिमात्रबोधकत्वेन च सामानाधिकरण्यायोगात् । तस्मात्तदाद्यंश एव प्रवर्तते । सन्नियोगाभावेन तदंशानुपस्थितौ मानाभावात् । एवं 'सुप्तिङन्तम्' (१.४.१४) इत्यादौ यत्र तदन्तांशः क्लृप्तः तत्रापि तदाद्यंशः प्रवर्तत एव । अत एव पदसमुदायस्य न पदत्वम् । अन्यथा हि मश्नाहीति वाक्यार्थवर्त्तमानस्यापि 'प्राहवती नदी' इत्यस्य 'अनेकमन्यपदार्थे'-(२.१.२४) इत्येतत्सूत्रविषयताप्रसङ्ग इति तात्पर्यम् ।

ननु यत्र प्रत्ययो निमित्तत्वेनाश्रीयते तत्र तदाद्यंशोपस्थितेः फलाभावः । न च 'प्राकरोदुपैहिष्ट' इत्यादौ उपसर्गात्पूर्वमडादिव्यावृत्तिस्तत्फलमिति वाच्यम् । लुङाद्युपश्लिष्टस्य पूर्वस्येत्याद्यर्थं पूर्वत्वेनाधिकारप्राप्ताङ्गस्यैव विशेषणताया औचित्यादिति चेत् ? सत्यम् ; 'आन्महतः' (६.३.४६) इत्यत्र जातीयरप्रत्ययोपस्थापिततदाद्यंशमादाय महच्छब्दस्य तदन्तविधौ 'अतिमेहाजातीयः' इत्याद्यात्वप्रवृत्तिः । अन्यथा प्रत्यासत्त्या जातीयरप्रकृतिभूतस्य महत आत्वमित्यर्थे तदौर्लभ्यं स्पष्टमेव । तथा 'घरूप' (६.३.४६) इति तरबाद्युपस्थापिततदाद्यंशविशेषणत्वेन ङ्यन्तस्य तदन्तविधौ 'बहुश्रेयसितरा' इत्यादौ ह्रस्वप्रवृत्तिरित्येवमादीनि फलानि विभावयन्त्वित्याहुः ।

प्रागुपदर्शितरीत्या 'प्रत्ययग्रहणे चापञ्चम्याः' (प. २४) इति परिभाषा नापूर्वेति सूचयितुमाह – 'एवं यत्रापि' इति । एतेन उत्तरपरिभाषाविषयस्यात्रोल्लेखः प्रामादिक इति पाठकाद्युक्तिः प्रत्युक्ता ।

'पञ्चम्यन्तता' इति । उपात्तपञ्चम्यन्तविशेषणानुरोधेन विशेष्यबोधकस्यापि पञ्चम्यन्ततायाः एव युक्तत्वादित्याशयः ।

'एङन्तादित्यादयर्थलाभः' इति। एतेन तदर्थमपूर्वोऽत्राक्षेप इति प्राचीनोक्तमयुक्तमिति ध्वनितम्। यत्तु प्रस्तवादङ्कादेशो सम्बुद्धिलोपस्य सकृद्गतिन्यायेन सुपरिहरत्वादङ्गाक्षेपस्तदार्थशोपस्थितिर्वा तदुपपत्तये वृथैवेति वदन्ति, तदसत्। सम्बुद्धिलोपे सकृद्गतिन्यायावलम्बे 'हे कुल' इत्यादौ परेण पूर्वरूपेण बाधितस्य सम्बुद्धिलोपस्य पुनरनेन न्यायेनाप्रवृत्तिप्रसङ्गात्। ध्वनितमिदमत्रैव सूत्रे भाष्ये 'इतरादिभ्यः प्रतिषेधः' इति वार्त्तिकस्य विहितविशेषणत्वमाश्रित्य प्रत्याख्यानं कुर्वता भगवता पतञ्जलिनेति स्पष्टं तद्विद्माम्।

यदपि 'एङ ह्रस्वान्तात्' (६.१.६९) तदादेरित्युक्तावपि 'कुलेत्या'दिसिद्धये सम्बुद्ध्यधिकरणीभूतहल्विशेषणतायाः आवश्यकतया 'कतरत्' इत्यत्रानुनासिकस्थनिवद्भावेन प्रकृतित्वात् ह्रस्वान्तस्य च तदादित्वाल्लोपो दुर्वार इति प्राचीनोक्ताङ्गाक्षेपप्रकार एव युक्त इत्याहुः; तदपि न; 'तदादि' इत्यस्य प्रत्ययप्राग्वर्तिबोधकतायाः पूर्वमुपपादितत्वात्। तदार्थशोपस्थित्यात्मकविहितविशेषणाश्रयणेन इतरादिप्रतिषेधप्रत्याख्यानसरणिरत्रापि भाष्यकारस्य प्रमाणीभवितुमर्हति। इतोऽपि न शब्दस्वरूपविशेष्याध्याहारमन्तरेण तदार्थशमादाय तदन्तविधि प्रत्याशा कार्या।

अस्याः परिभाषायाः प्रयोजनान्तरं 'येन विधिः' (१.१.७२) इत्यत्र भाष्ये उक्तम्। 'परमगार्ग्यायणः' इति 'परमगार्ग्यस्यापत्यम्' इति विग्रहेऽपि गार्ग्यशब्दादेव प्रत्ययो न विशिष्टात्। निष्कृत्य तावन्मात्रेणैकार्थीभावाभावेऽपि वृत्तिर्भवत्येव। अत्र चेदं भाष्यमेव मानमित्यन्यत्रं विस्तरः। प्रत्ययमात्रग्रहणे एव न तु प्रत्ययाप्रत्ययग्रहण इति 'उगितश्च' (४.१.६) इति सूत्रे भाष्ये।

'अस्याः परिभाषायाः' इति। विशेष्यान्तरासत्त्वे एव शब्दस्वरूपविशेष्याध्याहार इत्यत्र प्रमाणप्रदर्शनार्थमेतम्। यदि 'यञिञोश्च' (४.१.१०१) इत्यत्र प्रातिपदिकादिति विशेष्यसत्त्वेऽपि तदध्याहारस्तर्हि यञिञन्तादित्यर्थं स्यादेव विशिष्टात्प्रत्यय इति भाष्यासङ्गतिः स्पष्टैव।

ननु 'सुप आत्मन' (३.१.८) इति सूत्रे भाष्ये सविशेषणानां सर्वत्रा-वृत्तिरित्युपक्रम्य क सर्वत्र समासविधौ प्रत्ययविधौ च 'ऋद्धस्य राज्ञः पुरुषः ऋद्धस्य उपगोरपत्यम्' इत्युदाहृत्य षष्ठ्यन्तस्य सुबन्तेन सामर्थ्येन समासो विधीयते। यच्चात्र षष्ठ्यन्तं न तत्सुबन्तेन समर्थं यस्य च सामर्थ्यं न तत् षष्ठ्यन्तं वाक्यम्। एवं षष्ठीसमर्थात् अपत्येन योगे प्रत्ययो विधीयते यच्चत्र षष्ठीसमर्थं न तस्यापत्येन योगः। यस्य चापत्येन योगो न षष्ठीसमर्थं वाक्य तदित्युक्तम्। किञ्च 'येन विधिः' (१.१.७२) इति सूत्र एव भाष्ये 'समासप्रत्ययविधौ प्रतिषेधे' इत्यस्य प्रत्ययांशे 'सौत्रनाडिः' इत्यत्र नडा-दित्वप्रयुक्तफक्प्रत्ययाभावः प्रयोजनत्वेनोक्तः। ततश्च यादृशार्थस्यापत्यादि-भिर्योगस्तादृशार्थात्पत्ययापकृत्तिपर्यन्त्यधिकरणादेव प्रातिपदिकादपत्यादयर्थकः प्रत्यय इत्यर्थस्य स्पष्टतया कथं परमगार्ग्यसम्बन्ध्यपत्यबोधने गार्ग्यशब्दा-त्प्रत्यय इत्यत आह—'निष्कृष्य' इति। अयं भावः—वृत्तावयवानां-मर्थान्तरोपहित एव स्वार्थो न तु केवलः। स्वभावात्।

एवञ्च प्रकृते गार्ग्यशब्दोऽपि परमत्वविशिष्टगार्ग्याभिधायी, परन्तु प्रत्येकमवयवानां स्वातन्त्र्यवारणाय समुदाय एवैकार्थीभावः कल्पितः प्रकृत-भाष्यबलात्कचिदवयवेऽप्यन्युपगम्यते। अत एव 'शिवभागवतो भूतका-लिकः' इत्यादेः सिद्धिः। उत्तरपदनिमित्तके द्विगावप्येवैव गतिः। ततश्च समुदायात्पृथक्कृत्य गार्ग्यशब्दस्य तद्धितेनैकार्थीभावे भवत्येव प्रत्ययः। अतिप्रसङ्गस्त्वनभिधानाद्वारणीय इति।

तदेतदाह—'अत्र च' इति। 'अनुपसर्जनात्' (४.१.१४) इति सूत्रे भाष्ये स्पष्टोऽयमर्थः।

अथ सत्यामस्यां परिभाषायां 'बह्वो गोमन्तो यस्यां नगर्यां सा बहुन-गोमती' इत्यत्र 'उगितश्च' (४.१.६) इति ङीप् 'बहुगोमान् ग्रामः' इत्यत्र 'उगिदचाम्' (७.१.७०) इति नुम् च न स्यादत आह—'प्रत्ययमात्रग्रहणे' इति। 'उगितश्च' (४.१.६) इति सूत्रे भाष्ये इति। तत्र हि 'निर्गोमतीम्' इत्यादौ प्रकृतपरिभाषया ङीपोऽप्रवृत्तिमाशङ्क्य प्रत्ययग्रहण इत्युच्यते, न चेदं प्रत्ययग्रहणं वर्णोऽण्युगित् प्रातिपदिकमप्युगित्' इत्युक्तम्। यद्यपि

तदन्तविधिद्वयाङ्गीकारे पूर्वोक्तविषये ङीबनुमौ भवत एव । तथापि प्रत्ययान्तरन्यत्र 'भवती भवन्तौ, अर्वन्तौ, अर्वती' इत्यादावेतत्परिभाषोपस्थापितस्तदाद्यंशस्य बाधितत्वात्तयोरनुप्रवृत्तिः ।

यदि च प्रत्ययाप्रत्ययकोटिद्वयपरतया वाक्यमेदमभ्युपगम्य प्रत्ययातिरिक्तविषये तदाद्यंशस्यासम्बन्धभूतस्य कृद्ग्रहण इत्यादेस्तत्तन्मात्रग्रहणविषयतासम्पत्यर्थमस्याः प्रत्ययमात्रग्रहणविषयत्वमिति तत्त्वम् । अत एव 'सुप्तिङन्तम्' (१.४.१४) इति सूत्रेऽन्तग्रहणस्य संज्ञाविधाविति परिभाषाज्ञापकता भाष्यकृदुक्ता सङ्गच्छते । अन्यथा प्रकृतपरिभाषया प्रदेशेषु 'तदन्तविधौ' अन्तग्रहणस्य चारितार्थ्याभावात्तदसङ्गतिः स्पष्टैव । तदेतन्मूल एव स्फुटीभविष्यति ।

ननु सन्नन्ते शेखरे 'प्रतीषिषति' इत्यत्र 'अज्झनं' (६.४.१६) इति दीर्घमाशङ्क्य 'आगन्तूनामन्ते निवेशः' इति न्यायेनोत्तरखण्डस्य द्वित्वनिष्पन्नतया तस्य प्रत्ययाधिकारे पाठाभावेन प्रत्ययत्वाभावात्पूर्वस्य तन्निरूपिताङ्गत्वप्रसक्त्या न दीर्घ इति समाहितम् । न च प्रत्ययत्वाभावात्तन्निमित्तकमुत्तरखण्डस्य षत्वमपि दुर्लभमेवेति वाच्यम् । पूर्वत्रासिद्धीयमद्विर्वचन इति षत्वोत्तरमेव द्वित्वप्रवृत्त्या निर्वाहात् । न च 'सन्यतः' (७.४.७९) इतीत्त्वमपि प्रत्ययत्वाभावे दुर्लभमिति वाच्यम् । 'अङ्गावयवाभ्यासस्य सनि परत इत्त्वम्' इत्यर्थे तस्य सनित्येतदानुपूर्वीमात्रनिबन्धनत्वेऽपि प्रत्ययत्वानपेक्षणेनादोषात् । न च सति परत इत्युक्ते निर्दिष्टपरिभाषया 'पिपठिषति' इत्यादौ उत्तरखण्डादिना व्यवधानात्तदप्राप्तिरिति वाच्यम् । अत इत्येतत्सामर्थ्यादव्यवहितत्वांशबाधापूर्वकं व्यवहिताव्यवहितसाधारण्येन तत्प्रवृत्त्यभ्युपगमात् ।

नन्वेवं 'जगलिप्सुः' इत्यत्रापि सुब्निरूपितमङ्गत्वं व्यवहितञ्च सन्परत्वमाश्रित्य जकाराकारस्येत्वप्रसङ्ग इति वाच्यम्, प्रत्यासत्त्या सन्नन्तप्रकृतिकप्रत्ययनिरूपिताङ्गत्वस्यैव तन्निमित्तत्वाङ्गीकारेणादोषात् । एवञ्च सन्त्वस्य प्रत्ययाप्रत्ययसाधारणतया 'सनाद्यन्ता' (३.१.३२) इत्यत्र प्रकृतपरिभाषाप्रवृत्तेरयुक्ततया स्यादेव 'देवदत्तश्चिकीर्षति' इत्यादौ दोष इति चेत् ? मैवम् ;

यत्र प्रत्ययस्यैव बोधकं पदमुपादीयते तत्रैवास्याः परिभाषायाः प्रवृत्तिरिति नियमाकारः। 'सनाद्यन्ताः' इत्यत्र च कथजादिसाहचर्यात्सनः प्रत्ययस्यैव ग्रहणान्न प्रकृतपरिभाषाप्रवृत्तौ विरोध इत्याहुः।

केचित्तु 'प्रतीषिषति' इत्यादावुत्तरखण्डभूतस्यापि सनः प्रत्ययत्वमस्तीत्येव युक्तम्। षाष्ठद्वित्वस्य द्विः प्रयोगरूपतया द्वित्वनिष्पन्नस्यापि प्रत्ययाधिकारपठितत्वप्रत्यभिज्ञाने बाधकाभावात्। कथमन्यथा 'दयतेर्दिक्' (७.४.९) इति सूत्रस्थभाष्ये प्रामाण्याभ्युपगतो धातुद्वित्वेषूत्तरखण्डस्यैव धातुत्वमिति, तनादिशेषस्यशेखरोक्तसिद्धान्तः सङ्गच्छेत्? उत्तरखण्डस्य प्रत्ययप्राग्वर्तित्वेन क्रियावाचित्वेऽपि भ्वादिपाठाभावेन धातुत्वस्य दुर्वचत्वात्।

किञ्च प्रत्ययत्वाभावे सन्प्रत्ययान्तत्वनिबन्धनधातुत्वप्रयुक्तो लडादिः किपि 'प्रतीषीः' इत्यादौ दीर्घश्च दुर्लभः। अपि च 'सन्यतः' (७.४.७९) इत्यत्र प्रत्ययस्यैव ग्रहणमुत्तरत्र तस्यैव सम्भवादिति युक्तम्। अन्यथा सनन्तेर्द्वित्वमेकवचने 'ससन' इत्यत्रापि तत्प्रवृत्तिप्रसङ्गात्। तस्माद्युक्तिविरोधात्स्वोक्तिविरोधाल्लक्ष्यविसंवादाच्च चिन्त्य एवायं सन्नन्तशेखरः। हन्साहचर्याद्जन्तांशेऽपि दीर्घ आदेशत्वानापन्नस्यैवेति न 'प्रतीषिषति' इत्यादौ दोष इत्याहुः।

यत्तु 'कार्यमनुभवन्' इति न्यायेन कार्यिणस्सनो निमित्तत्वायोगान्नैतादृशेषु दीर्घप्रसक्तिरिति मन्युदेवादयः तदयुक्तम्; यत्र ह्येकस्यामेव व्यक्तौ कार्यिता निमित्तता च तत्रैव खलु धर्मिग्राहकसाजात्यादयं न्यायः। प्रकृते च व्यक्तिभेदेन तदाश्रयणान्न्यायप्रवृत्तेरनौचित्यात्। अन्यथा 'सन्यतः' (७.४.७९) इत्यस्यापि तत्र दौर्लभ्यापत्तेः। 'अवीवदत्' इत्यादौ ण्यन्तात्णिचि' णौ णिलोपानापत्तेश्च। एतेन निमित्तभूतप्रत्ययघटितस्य नाङ्गत्वमुक्तन्यायादिति कण्ठीरवोक्तिरपि निरस्तेति दिक्।

अथ। वनतेर्विजन्तस्याप्रत्ययस्यापि वनः सम्भवेन 'वनो र च' (४.१.६७) इत्यत्र प्रकृतपरिभाषायाः प्रवर्तयितुमशक्यत्वात् तत्रैतत्परिभाषाप्रवृत्तिप्रतिपादनपरसकलग्रन्थोच्छेदप्रसङ्ग इति चेत्? न; 'अतिधीवरी इत्यादौ

द्वितीयतदन्तग्रहणेनानुपसर्जनाधिकारज्ञापितेन ङीप्रत्वे समर्थयता, तत्सूत्रस्थ-भाष्यकारेण ङीब्विधौ ग्रहणयोग्यस्य वनः प्रत्ययातिरिक्तस्यानभिधानबोधने-नादोषात् ।

यद्वा तद्भाष्यप्रामाण्यात् 'गोस्त्रियोः' (१:२:४८) इत्यादाविव स्वरितत्वप्रतिज्ञाबलात्प्रत्ययस्यैव वनो ग्रहणकल्पनया न दोष इत्याहुः ।

इयं अङ्गसंज्ञासूत्रे भाष्ये स्पष्टा । 'येन विधिः' (१.१.७२) इति सूत्रे भाष्ये एतद्घटकैतदन्तांशस्य अपवादः पठ्यते ।

२४. 'प्रत्ययग्रहणे चापञ्चम्याः' ।

यत्र पञ्चम्यन्तात्परः प्रत्ययः कार्यान्तरविधानाय परि-गृह्यते तत्र तदन्तविधिर्नेत्यर्थः। यथा 'रदाभ्यां निष्ठातो न' इत्यत्र।

'अङ्गसंज्ञासूत्रे' इति । तत्र हि योगविभागेनेमां परिभाषामुपपाद्य संज्ञाधिकारो दूषितः । अत्रेदं बोध्यम्--'सङ्ग्रामयुद्धे' इति णिज्विधौ सोप-सर्गपाठादुपसर्गसमनाकृतेः पूर्वपदस्य पृथक्करणं ज्ञाप्यते । ततश्च 'सुमा-नायते' इत्यादौ क्यङादिचिकीर्षायां पूर्वपदस्य पृथक्करणे 'सुप्तिङन्तम्' (१.४.१४) इति सूत्रोपस्थिततदाद्यंशस्य बाधितत्वात्समासप्रकृतिकं सुपमा-दाय मनःशब्दादेः सुबन्तत्वस्य दुर्वचतया क्यङाद्यनुत्पत्तिप्रसङ्गः । समास-प्रयोजकमवयवद्वारकं सुपमादाय तदुत्पत्तौ क्वचित्प्रत्ययोत्तरं समुदायसुपः श्रवणापत्तिः ।

किञ्च कर्मबोधकात्सुबन्तात्क्यजित्युक्ते द्वितीयान्तादेव क्यचो न्याय्यतया समासघटकस्य चातादृशत्वात्तदनुपपत्तिरेव । यदि तथाविधात्सो-पसर्गपाठाज्जातसमासाभाव एव कल्प्यते, तदा तस्य वाक्यविशिष्टतया समुदायात्सुपामनुत्पत्तिरुत्पन्नानां वा निवृत्तिरवयवाक्वामीष्टैव विभक्तिरुत्प-द्यत इत्युच्यते, तर्हि 'उपजरसीयती' इत्यादौ क्यचि समासान्तादीनामपि

निवृत्तिप्रसङ्गः । यदि च तदाद्यंशस्याधिकव्यवच्छेदकत्वमेव न तु न्यूनव्यवच्छेदकत्वमिति भृशादिसूत्रोक्तशेखरीत्या समुदायप्रकृतिकं सुपमादाय मनःशब्दादेरवयवस्य सुबन्तत्वमक्षतमेवेति मन्यते, तर्हि 'चिकीर्षति' इत्यादौ द्विरुक्तोत्तखण्डाद्यवयवकसङ्घातस्यापि सन्नन्तत्वप्रयुक्तधातुत्वापत्तौ ततोऽपि कदाचिल्लुङादिष्वभ्यासोत्तरमङागमप्रसङ्गः ।

न च तदाद्यंशस्य न्यूनव्यवच्छेदकत्वे 'तुर्यः', 'तुरीयः' इत्यत्र 'चतुरश्छयतौ' (वा. ९७१) इत्यनेन प्रकृत्याद्यक्षरस्य लुप्तत्वात् अवशिष्टस्य तद्धितान्तत्वनिबन्धनप्रातिपदिकत्वानापत्तिरिति वाच्यम्, आनुमानिकस्थानिवद्भावेन निर्वाहात् । किञ्च प्रकृतपरिभाषोपस्थापिततदाद्यंशस्याधिकमात्रव्यवच्छेदकत्वेऽङ्गाधिकारप्रत्याख्यानपक्षे 'प्राकारोत्', 'उपैहिष्ट' इत्यादौ उपसर्गात्पूर्वं प्रसक्तयोरडाटोर्वारणाय प्रकृतपरिभाषाश्रयणव्यर्थतदेकदेशात्पूर्वं प्रसक्तयोस्तयोर्वारणोपायान्तराप्रदर्शनं भाष्यकृतामसङ्गतं स्यात् । अत एषा परिभाषा न्यूनाधिकयोरुभयोरपि व्यवच्छेदिकेत्यवश्यमभ्युपेयम् ।

एवञ्च 'सुमनायते' इत्यादौ प्रागुक्तदोषो दुरुद्धर एव । तस्मादिह तथाविधस्य पूर्वपदस्य धातुसंज्ञाप्रयोजकीभूतप्रत्ययविधानावधित्वेन ग्रहीष्यमाणो यः सङ्घातः समाससंज्ञकस्तद्घटकत्वाभावो ज्ञाप्यते स च नित्यत्वात्समासप्रकृतिकसुबुत्पत्तेः पूर्वमेव । तावताऽप्येकार्थीभावस्यापरित्यागान्मनःशब्दादेरवशिष्टस्यापि विशिष्टाभिधायकतैवेति न क्यङाद्युत्पत्तौ दोषः ।

अत एव भाष्ये क्यजन्तेनैव 'विशिष्टार्थाभिधानादुक्तार्थानाम्' इति न्यायेन 'उन्मनायते' इत्यादौ उपसर्गस्याप्रयोगमाशङ्क्य अर्थप्रतीतिनियमार्थस्तत्प्रयोग इति समाहितम् । समाससंज्ञाप्रवृत्त्युत्तरमेव पृथक्करणादवशिष्टस्य समासत्वानपायान्न समासान्तादीनामनुपपत्तिः । अवयवद्वारकमेव सामर्थ्यमुपादाय कृत्वान्तेन समासे 'सुमनाय्य' इत्यादौ ल्यबप्युपपद्यत इति सकलेष्टसिद्धिरित्याहुः ।

सन्दर्भसूचनार्थमाह–'अपवादः पठ्यते' इति । यद्यपि भाष्ये तदन्तविधिप्रयोजनप्रतिपादनावसरे पञ्चम्यन्तातिरिक्तविभक्त्यन्तार्थनिरूपितविशेष्य–

तावत्त्वेन गृह्यमाणः प्रत्ययस्तदन्तविधिं प्रयोजयतीत्यर्थकं 'प्रत्ययग्रहणं चापञ्चम्याः' इत्युक्तम् ।

तथापि फलत्येवायमर्थ इति भावः । यद्वा प्रत्ययग्रहणं तदन्तविधिं प्रयोजतीत्युत्सर्गः पञ्चम्यन्तार्थात्परत्वेन कार्यविशेषविधानाय प्रत्ययग्रहणे तदन्तविधिर्नेत्यर्थकमपञ्चम्या इति निषेध इति वाच्य एवायमर्थ इत्याशयः । अस्मिन्पक्षे अपञ्चम्या इति पञ्चमी पूर्वत्र तु षष्ठीति विवेकः । तदाह–'यत्र' इत्यादि । परिभाषाफलं दर्शयति–'यथा रदाभ्याम्' इत्यादि । अन्यथा रेफदकाराभ्यां परीभूतो यो निष्ठान्तावयवस्तकारस्तस्येत्यर्थः स्यादिति भावः ।

तेन दृषत्तीर्णेत्यादौ धातुतकारस्य न नत्वम् । 'तदन्त' इत्यंशानुपस्थितावपि 'तदादि' इत्यंशस्योपस्थितौ रेफदान्तात्परस्य निष्ठातस्येत्यर्थः । तदंशानुपस्थितौ मानाभावात् ।

'दृषत्तीर्णा' इति । अत्र पदसंस्कारपक्षे दोषः । यदि च वाक्य–संस्कारपदसंस्कारयोर्व्यवस्थितत्वादिह लक्ष्यानुरोधाद्वाक्यसंस्कार एवाश्रीयते ततश्चानन्त्यविकारपरिभाषया न धातुतकारस्य नत्वमिति मन्यते तर्हि 'दृषत्तीर्णवान्' इत्यत्र दोष इति बोध्यम् । तत्र हि अन्त्यवर्णतद्वर्णयोरितरा–व्यवधान एव प्रवर्तमानायास्तत्परिभाषाया अप्रवृत्तिः ।

ननु निर्दिश्यमानपरिभाषया निष्ठान्तावयवीभूतनिर्दिश्यमाननिष्ठावय–वतकारस्य रेफदकाराभ्यां परस्य नत्वमित्यर्थो लभ्यते संज्ञाविषयस्यापि निर्दिश्यमानतायाः पूर्वमुपपादितत्वात् । ततश्च तदन्तांशोपस्थितावपि 'दृषत्तीर्णः' इत्यादौ नायं दोष इति चेत् ? सत्यम् ; निर्दिश्यमानपरिभाषोप–स्थितिस्वीकारे निमित्तस्य तत्र तत्र तदीयांशविशेषणतायाः क्लृप्ततया प्रकृतेऽ पि तथैव स्यात् । ततश्च 'चरितं' 'गदितं' इत्यादौ नत्वापत्तिवारणेऽपि 'तीर्णवन्तौ' इत्यादौ क्तवतुप्रत्ययसम्बन्धिनश्चरमतकारस्य नत्वापत्तिर्दुर्वारा ।

तस्मात् 'ततवद्धातुन्नवद्वा' इति पस्पशास्थभाष्यकारीयप्रयोगबलादप्रवृत्तिरेव प्रकृते निर्दिश्यमानपरिभाषायाः ।

यदि च तत्प्रामाण्यादिह निमित्तस्य प्रधानभूततकारविशेषणतैव कल्प्यत इत्युच्यते, तर्हि 'षट्त्रिचतुर्भ्यो हलादिः' (६.१.१७९) इत्याद्यर्थमावश्यकी परिभाषा विनिगमनाविरहात्प्रकृतविषये प्रवर्तमाना न दोषाय भवति । न ह्युपास्योपायान्तरं दूषकमिति विभावनीयम् ।

नन्वस्याः परिभाषायास्तदन्तांशनिषेधकत्वेऽपि तदाद्यंशस्य निषेधकत्वाभावान्निष्ठापदोपस्थापितस्य तस्य प्रत्ययांशे साकाङ्क्षस्य निष्ठायामेवान्वयस्यौचित्यात् 'चरितम्' 'गदितम्' इत्यादौ दोषो दुर्वार इत्यत आह— 'परस्य निष्ठातकारस्य' इति । निष्ठापदस्य समासघटकतया तदर्थान्वयस्यैकदेशान्वयदोषदूषितत्वात्प्रधानीभूततकारविशेषणत्वमेवागत्या स्वीक्रियत इति भावः । केचित्तु प्रकृत्याद्यवयवकसमूहत्वरूपतदादित्वस्य प्रत्ययविशिष्टसाधारणतया स्वाव्यवहितोत्तरत्वसम्बन्धेन प्रत्ययांशे नियताकाङ्क्षत्वाभावादन्यत्रान्वयेऽपि न दोषः । अत एव 'एङ्ह्रस्वात्' (६.१.६९) इत्यत्र सम्बुद्ध्युपस्थापिततदाद्यंशस्य सम्बुद्ध्यवयवहल्विशेषणत्वमपि निर्विवादम् । कथमन्यथा 'सनाद्यन्ताः' (३.१.३२) इत्यत्र समुदायविशेषणता तदाद्यंशस्य ? अङ्गसंज्ञायां प्रत्ययस्य निमित्तत्वेनोपादानादङ्गप्रत्यययोः परस्परमुत्थिताकाङ्क्षत्वान्न तयोरन्यतरव्यतिरेकेणान्यत्रान्वयो युक्तः । इत्थिताकाङ्क्षाया अपि प्राधान्यमन्वये प्रबलं प्रयोजकमिति त्वयुक्तमेवेति स्पष्टमन्यत्रेत्याहुः । एतेन 'अल्लोपोऽनः' (६.४.१३४) इति सूत्रस्थशेखरविरुद्धत्वाच्चिन्त्योऽयं ग्रन्थ इति केषाञ्चिदुक्तिः प्रत्युक्ता ।

अथ तदाद्यंशस्य तकारविशेषणत्वे पञ्चम्यन्तार्थात्परत्वेन प्रत्ययस्यानाश्रयणात्प्रकृतपरिभाषाप्रवृत्तिरेव दुरुपपादा स्यादिति चेत् ? सत्यम् ; 'सात्पदाद्योः' (८.३.१०९) इति निषेधबलात् 'आदेशप्रत्यययोः' (८.३.५९) इत्यनेन प्रत्ययावयवेऽपि षत्ववृत्तिकल्पनापेक्षया प्रत्ययावयवस्यापि प्रत्ययत्वमित्येवं कल्पयितुमुचितम् । 'प्रत्ययलक्षण' (१.१.६२) सूत्रस्थभाष्यारूढमप्येतत् । 'इदुदुपधस्य' (८.३.४१) इत्यादौ लक्षणानाश्रयणेन

लाघवमपि सम्भवतीत्यपरमनुकूलम् । तस्मान्निष्ठावयवतकारस्यापि प्रत्ययत्वमस्त्येवेति न प्रकृतपरिभाषाप्रवृत्तेर्विरोधः । यद्वा साक्षादवयवद्वारा वा तथाविधपरत्वेन कार्यान्तरविधानायाश्रीयमाणे प्रत्यये तदन्तविधिर्नेत्यतो नायं दोष इति दिक् ।

ननु तदाद्यंशस्याप्यत्राप्रवृत्तिरेवास्तु किमनेनान्वयप्रयासेनेत्यत आह– 'मानाभावात्' इति । एकनिषेधे तदन्यनिषेधप्रयोजकस्य सन्नियोगशिष्टत्वस्याभावादित्यर्थः । असन्नियुक्तत्वफलमधस्तान्निरूपितमेव ।

नन्वनयोरंशयोरसन्नियुक्ततायां 'आने मुक्' (७.३.८२) इति सूत्रस्थभाष्यविरोधः । तत्र हि 'पचमानः' इत्यादावदन्ताङ्गस्य मुगित्यर्थे लसार्वधातुकस्यागमेन व्यवधानाददुपदेशात्परत्वाभावेन स्वराप्रवृत्तिमाशङ्क्य वैयधिकरण्यान्वयेन समाहितम् । यदि च प्रकृतपरिभाषया तदन्तांशनिषेधेऽपि तदाद्यंश उपतिष्ठेत तर्ह्युपदेशान्तात्तदादेरित्यर्थेन सामानाधिकरण्येऽपि स्वरस्य निर्बाधत्वात्तदसङ्गतिरेवेति चेत् ? न; अन्तरङ्गपरिभाषाया इव प्रत्ययग्रहणपरिभाषाया अपि सहायमन्तरेणान्वयवैचित्र्यादेव स्वरसाधनार्थं तस्य प्रौढिवादत्वेनादोषात् । अत एव 'अङ्गस्य' (६.४.१) इति सूत्रेभाष्ये तदधिकारप्रत्याख्यानाय 'प्रत्ययः' इति न्यासमुपक्रम्य 'तदन्तांशाभावेऽपि तदाद्यंशमुपादाय 'प्राकरोत्' इत्यादौ उपसर्गात्पूर्वं प्रसक्तयोरडाटोर्व्यावृत्तिः प्रदर्शितेति प्राहुः ।

ननु तदन्तांशोपस्थितावपि रेफदकारान्तात्तदादेः परस्य निष्ठान्तावयवतकारस्येत्यर्थे प्रागुक्तदोषस्य प्रसक्त्यभावात् वृथैव तदन्तविधिनिषेधप्रयास इत्यत आह –

तदन्तांशोपस्थितौ तूभयोरेकविषयत्वमेव स्यादिति 'दृष्टीर्णा' इत्यादौ दोषः स्यादेव । 'स्यतासी लृलुटोः' (३.१.३३) इत्यादौ लृलुटोः परयोरित्यर्थे नियमेनावधिसाकाङ्क्षत्वेन उपस्थितधातोरित्यस्यैवावधित्वेन अन्वयान्न तदन्तविधिः ।

'हलङ्याब्भ्य' (६.१.६८) इत्यादौ न दोषः । तत्र कस्मादिति नियतावध्याकाङ्क्षाया अभावेन पञ्चम्यन्तस्य प्रत्ययविशेषणत्वाभावात् ।

'तदन्तांशोपस्थितौ' इति । 'एकविषयत्वम्' इति । तदन्तविधिप्रयोजकप्रत्ययाक्षिप्तशब्दस्वरूपविशेष्यस्यैव तदाद्यंशोऽपि विशेषणं स्यादन्यत्र, तथा क्लृप्तत्वादिति भावः ।

नन्वेवमपि यत्र पञ्चम्यन्तार्थात्परत्वेन प्रत्ययो नाश्रीयते 'स्यतासी-लृलुटोः' (३.१.३३) इत्यादौ तत्र तदन्तांशो दुर्वारः । न हि लृलुडन्तपूर्वत्वं वा धातोरसम्भवि येन तदन्तांशो निवर्तेतेत्यत आह–'स्यतासी' इति । 'परयो-रित्यर्थे' इति । निर्दिष्टपरिभाषया सप्तमीनिर्देशेषु पूर्वशब्दस्यैवाध्याहार इत्यत्र मानाभावात्परशब्दस्यैवध्याहारः । तस्याः खलु परिभाषायाः सप्तमीनिर्देश-घटितशास्त्रेण विधीयमानं पूर्वस्यैवाव्यवहितस्यैवेति नियमः प्रयोजनम् । स च प्रदेशेषु परशब्दाध्याहारेऽपि युज्यत एव । अत एव 'तस्मिन्' (१.१.६६) इति सूत्रे भाष्ये सप्तमीपञ्चम्युभयनिर्देशेषु सन्देहनिरूपणावसरे तास्यादिभ्यः परस्य लसार्वधातुकस्य लसार्वधातुके परतस्तास्यादीनां वेत्याद्युक्तिस्त्वरसत उपपद्यते । किञ्च परशब्दाध्याहार एव न्याय्यः । अन्यथा हयेतत्परिभाषा-विषयभूतायाः सप्तम्याः परसप्तमीत्वव्यवहारो भाष्यकारादीनामनुपपन्नं स्यात् । 'स्वादिष्वसर्वनामस्थाने' (१.४.१७) इत्यादौ तूपस्थिततदाद्यंश-स्याकाङ्क्षावशादावृत्त्या सन्निधित्वेनावधित्वेन च सम्बध्यत इत्याशयः । एतेन निर्दिष्टपरिभाषया पूर्वशब्दाध्याहारे लृलुटोः परयोरित्यस्य फलविधया भास-मानत्वेऽपि शब्दत्वाभावेन पञ्चम्यन्तार्थात्परत्वेन शाब्दान्वये प्रवर्तमानस्य प्रकृतपरिभाषाबोध्यतदन्तांशनिषेधस्य प्रवृत्त्ययोगाच्चिन्त्योऽयं ग्रन्थ इति परास्तम् । 'उपस्थितधातोः' इत्यादि । लृलुडुपस्थापिततदाद्यंशस्य योग्यता-बलात्पञ्चम्यन्तत्वमाश्रीयत इति भावः । इदमेव युक्तम्, धातोरित्येतस्यावृत्तौ गौरवात् । एवञ्च 'सुपि च' (७.३.१०२) इत्यादावपि परशब्दाध्याहारे बाधकाभावेन प्रत्ययस्य तदाद्यंशात्मकपञ्चम्यन्तार्थात्परत्वेनाश्रयणमस्त्येव । एवञ्च प्रत्ययस्य निमित्तत्वेनाश्रयणे यस्तदन्तांशनिषेधः सोऽप्यस्या एव

परिभाषायाः कोडीकारः । निषेधप्रयोजकत्वेन प्रत्ययाश्रयणं निमित्तत्वेन कार्यित्वेन वेत्यत्र नाग्रह इति परमार्थः । नन्वेवं 'हल्ङ्याब्भ्यो' (६.१.६८) इत्यत्रापि ङ्याप्प्रत्ययगतपरत्वस्यावध्याकाङ्क्षायामुपस्थिततदाद्यंशस्य अवधित्वेन योजनीयतया तदन्तांशनिषेधे स्वीयतदादेः परौ यौ ङ्यापौ तदन्तात्सुतिसिविधानावध्यादेः परस्य सुतिसीत्यस्य लोप इत्यर्थापत्तौ उपसर्जनस्त्रीप्रत्यये तदादिनियमाश्रयणात् 'बहुश्रेयसी' इत्यादौ लोपो दुर्लभ इत्यत आह-'हल्ङ्याब्भ्यः' (६.१.६८) इति । 'अवध्याकाङ्क्षाया अभावेन' इति ।

ङ्याप्प्रत्ययगतपरत्वस्य वस्तुतः सत्वेऽप्यशाब्दतया शाब्दावध्याकाङ्क्षास्फूर्त्ययोगात्तदभाव इत्याशयः ।

सिद्धान्ते तु तदन्तविधिद्वयाश्रयणाददोष इति स्पष्टं शब्दरत्नादौ । यस्य कस्यापि विशेष्यतामादाय तदन्तविधौ स्वीयविधानावध्याद्यवयवकत्वनियम इत्यभिमानः ।

अङ्गसंज्ञासूत्रेऽपि तदादिप्रत्यये परे इत्यर्थे पञ्चम्यन्तस्य विशेषणत्वं स्पष्टमेव । अत एवोत्तमैकाभ्यामित्यादिनिर्देशाः सङ्गच्छन्ते ।

नन्वेवं 'कुमारी ब्राह्मणिरूपा' इत्यादौ 'घरूप' (६.३.४३) इति ह्रस्वापत्तिरत आह –

२५. उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ।

'अङ्गसंज्ञासूत्रे' इति । उपस्थिततदाद्यंशस्य प्रत्ययेन सामानाधिकरण्यासम्भवाद्गृहीततदाद्यंशेनान्वये वैयर्थ्याच्च पञ्चम्यन्तता तस्येत्यपि बोध्यम् ।

'अत एव' इति । सप्तमीनिर्देशेषु परशब्दाध्याहारद्वारा प्रकृतपरि-

भाषावशात्तदन्तांशनिषेधाभ्युपगमादेवेत्यर्थः । 'निर्देशाः' इति । तदन्तविधावेकशब्दे दीर्घो न स्यादिति बोध्यम् । प्रकृतनिर्देशस्य प्रकारान्तरेण सप्तमीनिर्देशेषु तदन्तांशनिषेधज्ञापकतामपेक्ष्य परशब्दाध्याहारबोधनद्वारा तन्निषेधबोधकत्वमेव ज्यायो लाघवादित्यभिप्रायः ।

अत्रेदं बोध्यम्—अनया परिभाषया शब्दस्वरूपविशेष्याध्याहारमूलक एव तदन्तांशो निषिध्यते न तूपात्तविशेष्यान्तरनिबन्धनः । अत एवोत्तरपदाधिकार इति वक्ष्यमाणपरिभाषायां 'हृदयस्य' (६.३.५०) इति सूत्रस्थलेखग्रहणस्य ज्ञापकत्वं भाष्यकारोपवर्णितमुपपद्यते । परिभाषा च प्रयोजनवती । 'हृदयस्य' (६.३.५०) इति सूत्रस्य चाणन्ते उत्तरपदे हृदयशब्दस्य हृदादेश इत्यर्थेन लेखशब्दस्याप्यणन्ततया हल्लेखसिद्धिरिति हि तस्य ज्ञापकता । यदि तत्र तदन्तविधिर्निषिद्धः स्यात्तदा सम्बन्धार्नहत्वादुत्तरपदे इत्यस्याणप्रत्ययांशे निवृत्तौ स्वीयविधानावश्यादेर्हृदयशब्दस्य हृदादेश इत्यर्थे लेखशब्दे प्रसङ्गाभावात्तदसङ्गतिः स्पष्टैव । घरूपेत्यादावपि प्रकृतपरिभाषायैव 'सुपि च' (७.३.१०२) इत्यादाविव तदन्तांशनिषेधे तस्याः प्रयोजनाभावोऽपि स्पष्ट एव । प्रकृतभाष्यबलादुपात्तविशेष्यविषये पूर्वशब्दाध्याहारबोधनद्वारा तदन्तांशाभ्यनुज्ञाने तु तदेतदुभयं सुस्थम् । तत्र हि प्रकरणप्राप्तमुत्तरपदात्मकं विशेष्यमुपादीयत एव ।

न च पूर्वशब्दाध्याहारेऽपि अण्प्रत्ययोपस्थापिततदाद्यंशस्य श्रूयमाणहृदयशब्दविशेषणताया एव युक्तत्वात्प्रकरणप्राप्तोत्तरपदविशेषणत्वेन प्रत्ययस्य तदन्तविध्यसम्भवाल्लेखग्रहणस्य स्वविषये हृदादेशविधानार्थमावश्यकस्य कथं ज्ञापकत्वमिति वाच्यम् । ज्ञापनेपरभाष्यप्रामाण्येन यत्र तदादितदन्तांशयोरुभयोरप्युपस्थितिः तत्र तयोः समानविशेष्यकत्वनियमस्यापि ज्ञापनेनादोषात् । स्पष्टञ्चैतदुद्योते । एवञ्च 'तिङ्ङतिङः' (८.१.२८) इत्यादौ पञ्चम्यर्थात्परत्वेन गृहीतस्यापि तिङः पदाधिकारविशेषतया तदन्तविधिर्भवत्येव । न च सामर्थ्यादेव तत्र 'तदन्तविधिः' । न ह्यतिङन्तात्पदात्परः केवलस्तिङ् सम्भवतीति वाच्यम् । 'व्यतिसे' इत्यादौ तत्सम्भवात् । यत्तु 'रदाभ्यां' (८.२.४२) इत्यत्र निष्ठेत्यस्य लुत्षष्ठीकपृथक्पदत्वमाश्रित्य निष्ठान्तावियवस्य रेफदकाराभ्यां परस्य प्रत्यासत्त्या निष्ठान्तावयवतकारस्य

नत्वमित्यर्थेनैव निर्वाहादस्य सूत्रस्य प्रकृतपरिभाषोदाहरणत्वमयुक्तमित्याहुः, तदसत्, 'कृद्ग्रहण' (प. २८) परिभाषया विशिष्टस्यैव 'निष्ठान्ततया 'दृषत्तीर्णवान्' इत्यादौ धातुतकारस्य नत्वापत्तेर्दुर्वारत्वात् । 'थलि च सेटि' (६.४.१२१) 'इडन्तो वा' इत्यादौ तु 'सौवर्यः' 'सप्तम्यः' 'तदन्तसप्तम्यः' इति षाष्ठभाष्यबलान्निर्दिष्टपरिभाषोपस्थितिप्रयोजकीभूतौपश्लेषिकाधिकरण-सप्तम्यन्तत्वाभावान्न परशब्दाध्याहारमूलकस्तदन्तांशनिषेध इति सर्वमनवद्यमित्याहुः ।

तदन्तांशनिषेधप्रसङ्गादेवंजातीयकस्य परिभाषान्तरस्याप्यत्रैव निरूपणं युक्तमिति सूचयन्नाह—'नन्वेवम्' इति । प्रत्ययग्रहणे तदन्तग्रहणे चेत्यर्थः । 'ह्रस्वापत्तिः' इति । ब्राह्मणीशब्दात् रूपपि 'तसिलादिषु' इति पुंवत्वस्य 'जातेश्च' (६.३.४१) इति निषेधे 'धरूप' (६.३.४३) इति ह्रस्वः । ततः कुमारीशब्देन बहुव्रीहौ वयोवाचिनां 'वैकल्पिकजाति-कार्यस्य 'जातेरस्त्रीविषयात्' (४.१.६३) इति सूत्रभाष्यारूढतया पुंवत्व-निषेधे तदन्तविधिना ह्रस्वापत्तिरित्यर्थः । कर्मधारये तु प्रतिप्रसवभूतेन 'पुंवत्कर्मधारय' (६.३.४२) इत्यनेन पुंवत्त्वे 'कुमारब्राह्मणिरूपा' इति भवितव्यम् 'कुमारीगौरितरा' इत्युदाहृतवतो भाष्यकारस्याप्ययमेवाशयः । एवञ्च वाक्यमित्यभिप्रायेण तस्य समासभूतकुमारगौरितरा इत्येतदुपलक्षण-त्वोक्तिः कैयटस्य प्रामादिकीति द्रष्टव्यम् ।

तथाविधप्रत्ययान्तौत्तरपदपरकत्वाभावात् 'ब्राह्मणी'शब्दे ह्रस्वाना-पत्तिरप्यत्र दोषः ।

'हृदयस्य हृल्लेखयदण्लासेषु' (६.३.५०) इत्यत्र लेख-ग्रहणात् । तत्रा 'लेख' इति न घञन्तमनभिधानात् । इयञ्च 'हृदयस्य' (६.३.५०) इति सूत्रे भाष्ये स्पष्टा ।

'लेखग्रहणात्' इति । यत्तु उत्तरपदाधिकारस्थं यत्किञ्चिन्निरूपित-विशेष्यत्वाभावे एवं ज्ञाप्यतां प्रत्ययग्रहणे तदन्यत्र प्रामाणानां सामान्ये पक्षपातात् ।

एवञ्च 'इष्टकापरिचितम्' इत्यादौ 'इष्टकेषीकामालानाम्' (६.३.६१) इति प्रभृतिभिर्विधीयमानस्य ह्रस्वादेर्वारणायोत्तरपदविशेष्यकत्वेन प्राप्तस्य तदन्तविधेर्वारणार्थं 'गिलगिले च' इत्यस्य ज्ञापकत्वाश्रयणक्लेशोऽपि नेत्यपरमनुकूलमित्याहुः, तद्रभसात्। तथा सति 'तस्मान्नुडचि' (६.३.७४) 'दस्ति' (६.३.१२४) इत्यादौ उत्तरपदविशेष्यकत्वेन प्राप्तस्य तदादिविधेरपि दौर्लभ्यापत्तेः अण्प्रत्ययांशे योग्यताविरहादुत्तरपदे इत्यस्यासम्बन्धेऽपि प्रत्ययग्रहणपरिभाषाप्रयुक्तस्य शब्दस्वरूपनिबन्धनस्य तदन्तविधेर्दुर्वारतया लेखग्रहणस्य चारितार्थ्यायोगाच्च।

'अनभिधानात्' इति। ज्ञापनपरं भाष्यमेवात्र शरणम्। 'भाष्ये स्पष्टा' इति। तत्र हि यदण्ग्रहणे रूपग्रहणं लेखग्रहणादित्युपक्रम्य अपर आह - अत्यल्पमिदमुच्यते सर्वत्रैवोत्तरपदाधिकारे प्रत्ययग्रहणे रूपग्रहणं लेखग्रहणादित्युक्तम्। अत्रेदमवधेयम्-धर्मिग्राहकसाजात्यादादेशविधिविषयोऽयं तदन्तांशनिषेधः। स च विधिरादेशस्य प्रवर्तक इव निवर्तकोऽपीत्यलुगधिकारस्य संग्रहः। ततश्च 'रात्रेः कृती' इत्यादावागमविधौ न दोषः। न चैतत्परिभाषाया अप्रावृत्तावपि संज्ञाविधाविव्यनया प्रदेशेष्वपि तदन्तविध्यभावस्य मूलकारेण व्यवस्थापितत्तया दोष एवेति वाच्यम्। 'कुमारगौरितरा' इत्यत्र घान्तोत्तरपदपरत्वप्रयुक्तस्य ह्रस्वस्य निवृत्तेरेतत्परिभाषारम्भप्रयोजनत्वोपवर्णनपरहरदत्तस्येतिसूत्रस्थभाष्यप्रामाण्येन 'प्रत्ययग्रहणे चापञ्चम्याः' (प. २४) इतिवृत्तस्या अप्युपात्तविशेष्यनिबन्धनतदन्तांशनिषेधकत्वाभावकल्पनेनादोषात्। स्पष्टमिदं तत्रैव सूत्रे कैयटे।

न च सामर्थ्यादेव 'रात्रेः कृती' इत्यत्र तदन्तविधिः, न हि रात्रिशब्दात्परः केवलः कृत्प्रत्ययस्सम्भवतीति वाच्यम्। आचारकिनन्तात्तृजादौ 'रात्रयिता' इत्यादिषु तत्सम्भवात्। न च 'रात्रेः कृती' इत्यत्रैतन्निषेधाप्रवृत्तये धर्मिग्राहकसाजात्यादेतस्याः स्वरूपेण गृह्यमाणप्रत्ययविषयत्वमिति भट्टाचार्योक्तं युक्तमिति वाच्यम्। 'घकालतनेषु' (६.३.१७) इत्यादौ प्रकृतपरिभाषाया अप्रवृत्तिप्रसङ्गात्। 'कुमारीगौरितरा' इत्यस्य 'घरूप' (६.३.४३) इत्येतत्सूत्रविषयस्य प्रकृतपरिभाषोदाहरणत्वे वदता भाष्यकारेण

विरोधाच्च । 'खित्यनव्ययस्य' (६.३.६६) इत्यत्र 'अनव्ययस्य' इति पर्युदासमहिम्नैव तदन्तविधिरिति स्पष्टं भाष्ये ।

यद्यपि लेखग्रहणेन प्रातिपदिकप्रत्ययोभयसाधारणस्यैव तदन्तांश-निषेधस्य सामान्यतो ज्ञापयितुं शक्यत्वात्, परिभाषायां प्रत्यय इत्यस्यावयुत्याऽनुवादपरत्वेन समर्थने प्रातिपदिकसम्बन्ध्युत्तरपदविशेष्यकतदन्तांश-निषेधोऽपि प्रयत्नान्तरमन्तरेणानयैव परिभाषया क्रोडीकर्तुं शक्यते । तदाप्यादेशसम्बन्धिविधिमात्रविषयः प्रत्ययांशे तदन्तविधिनिषेधः । प्रातिपदिकविषये तु कारे सत्यागदस्येत्याद्यागमविधिविषयोऽपीति विशेषात्प्रत्ययमात्रविषयैवेयं परिभाषा, प्रातिपदिकांशे तु ज्ञापकान्तरसाध्योऽतिरिक्त एव तदन्तांशनिषेध इति रमणीयः पन्थाः ।

किञ्चायमुत्तरपदाधिकारे तदान्तांशनिषेधः कृत्स्नोऽप्युत्तरपदविशेष्यकस्यैव, न तु पूर्वपदविशेष्यकस्य, तेन 'ष्यङस्सम्प्रसारणम्' (६.१.१३) 'इष्टकेषीकामालानाम्' (६.३.६५) इत्यादौ पूर्वपदविशेष्यकस्तदन्तविधिर्भवत्येव । 'उपसर्गस्य घञि' (६.३.१२२) इत्यादौ तूत्तरपदविशेष्यकोऽपि तदन्तविधिः सामर्थ्यादेव भवतीति सकलेष्टसिद्धिरित्याहुः ।

नन्वेवं 'परमकारीषगन्धीपुत्रः' इत्यत्रेव 'अतिकारीषगन्ध्यापुत्रः' इत्यत्रापि 'ष्यङस्सम्प्रसारणं पुत्रपत्योः' (६.१.१३) इति स्यादत आह—

२६. स्त्रीप्रत्यये चानुपसर्जने न ।

'स्त्रीप्रत्यये' इति विषयसप्तमी । यः स्त्रीप्रत्ययः स्त्रियं प्राधान्येनाह तत्र तदादिनियमो न । यस्त्वप्राधान्येनाह तत्र तदादिनियमोऽस्त्येवेत्यर्थः ।

तदन्तांशनिषेधप्रस्तावे तदांशनिषेधस्याप्युपस्थितत्वात्सन्दर्भः ।

'नन्वेवमपि' इति । तदादिनियमोपस्थापकतया परिभाषाभ्युपगमे इत्यर्थः । 'इत्यत्रैव' इति । इवापिशब्दौ भिन्नक्रमौ । मातृवदस्मिन्कला इतिवदभावे दृष्टान्तः । 'अतिकारीषगन्ध्यापुत्रः' इत्यत्रैव 'परमकारीषगन्धीपुत्रः' इत्यत्रापि सम्प्रसारणं स्यादित्यर्थः । यद्वा 'परमकारीषगन्धीपुत्रः' इत्यत्र तदादिनियमादप्राप्तस्य सम्प्रसारणस्य साधनायोत्तरपदाक्षिप्तपूर्वपदात्मकविशेष्यसद्भावेऽप्यन्तरा शब्दस्वरूपविशेष्याध्याहारेण 'वनो र च' (४.१.७) इत्यत्रैव तदन्तविधिद्वयाश्रयणस्यावश्यकत्वात् 'अतिकारीषगन्ध्यापुत्रः' इत्यत्रापि सम्प्रसारणप्रसङ्ग इत्यर्थकं यथाश्रुतमेव साधु । एवञ्च एवञ्च तदन्तविधिद्वयानभ्युपगमे 'परमकारीषगन्धीपुत्रः' इत्यत्राव्याप्तिः । तदभ्युपगमे च 'अतिकारिषगन्ध्यापुत्रः' इत्यत्रातिव्याप्तिरिति सर्वथा तदादिनियमो न युक्त इत्यत्र तात्पर्यम् ।

न च सत्यामपि परिभाषायां तदन्तविधिद्वयाश्रयणात् 'अतिकारीषगन्ध्यापुत्रः' इत्यत्र दोषो दुर्वार एवेति वाच्यम् । आरम्भसामर्थ्यात्परिभाषासत्त्वे तदन्तविधिद्वयानभ्युपगमेनादोषात् । 'गोस्त्रियोः' (१.२.४८) इत्यत्र तूपसर्जनं प्रातिपदिकमिति विशेष्यद्वयमुपादीयत एवेति न तत्र तदन्तविधिद्वयाश्रयणानुपपत्तिरिति बोध्यम् ।

केचित्तु 'गोस्त्रियोः' (१.२.४८) इति सूत्रे भाष्ये 'स्त्रीप्रत्यये न' इति सामान्यतस्तदादिनियमाभावमुपक्रम्य 'अतिकारीषगन्ध्यापुत्रः' इत्यादौ दोषवारणाय स्त्रीप्रत्यये चानुपसर्जननेनेति पठितम् । एवञ्चांशद्वयवतीयं परिभाषा, तत्र प्रथमांशमवष्टभ्यांशान्तरस्य न्याय्यत्वात्तथाभूते स्त्रीप्रत्यये गृह्यमाणे तदादिनियमो नेत्यर्थस्यैवानया परिभाषया लाभात्सम्प्रसारणविधौ च ष्यङ्प्रत्ययस्य उपसर्जनानुपसर्जनोभयसाधारण्येन गृहीतत्वादेतन्नियमनिषेधप्रवृत्त्ययोगेन सत्यामपि परिभाषायाम् 'अतिकारीषगन्ध्यापुत्राः' इत्यत्र दोषो दुर्वार इत्यत आह—'विषयसप्तमी' इति । अनुपसर्जन इत्येतदित्यर्थः । न तु स्त्रीप्रत्यय इति तस्य गृह्यमाण इत्यनेनान्वयानुपपत्तेः ।

एवञ्च स्त्रीप्रत्यये गृह्यमाणेऽनुपसर्जनस्त्रीप्रत्ययविषये तदादिनियमो

नेत्यर्थे 'ष्यङः सम्प्रसारणम्' (६.१.१३) इत्यादौ संग्राहकवाक्यस्योभयसाधारणत्वेऽप्येतत्परिभाषावशादनुपसर्जनस्त्रीप्रत्ययविषयकत्वेनोपकल्पिते वाक्ये न तदादिनियमोऽन्यत्र तदादिनियम इति व्यवस्था सुवचा । अनुपसर्जनत्वञ्चेह स्त्रीप्रत्ययगतं विवक्षितं तच्च न शास्त्रीयोपसर्जनत्वाभावः । तस्य सकलस्त्रीप्रत्ययसाधारणत्वेन व्यावर्त्यालाभात् । किन्तु स्ववटित-वृत्त्युपस्थापितार्थान्तरनिरूपितविशेषणत्वाभावलक्षणं प्राधान्यम् । इदमेव लौकिकमित्युच्यते । तच्च स्त्रीप्रत्यये प्रकृत्यर्थद्वारकमाश्रीयते । स्वद्योत्यार्थस्य स्त्रीत्वरूपलिङ्गविशेषस्य प्रकृत्यर्थं प्रति सर्वत्र प्रकारतयैव भासमानतया तत्कृतस्य तस्य कुत्रापि सम्भवाभावात् ।

तदेतत्सकलमभिप्रेत्याह—'यः स्त्रीप्रत्ययः' इत्यादि । विषयसप्तमीस्वीकारादेव परिभाषाऽपि प्रयोजनवती । अन्यथा हि कस्यापि शास्त्रस्य अनुपसर्जनस्त्रीप्रत्ययमात्रग्रहणवतः प्रसिद्ध्यभावात्तदानर्थक्यं स्पष्टमेव । यत्तु विषयसप्तमीस्वीकारे अनुपर्जनं इव उपसर्जनांशेऽपि वाक्यकल्पनायां न्याय-प्राप्ततया तादृशवाक्यसाफल्यान्यथानुपपत्त्या स्वीकर्तव्येन तदन्तविधिद्वयेन स्यादेव 'अतिकारीषगन्ध्यापुत्रः' इत्यत्रातिप्रसङ्ग इत्याहुः, तदसत् ; 'कारीषगन्ध्येव मनुष्यः' इत्यर्थे 'इवे प्रतिकृतौ' (५.३.९६) इति विहितस्य कनो लुपि निष्पन्नस्य कारीषगन्ध्याशब्दस्य पतिशब्देन समासे सम्प्रसारणसम्पादकतया तादृशकार्यस्य सार्थकत्वेन तदन्तविधिद्वयापादकसामर्थ्यस्य दुर्वचत्वादिति दिक् ।

अथ 'गोस्त्रियोः' (१.२.४८) इति सूत्रभाष्योदाहृते 'अतिराजकुमारिः' इत्यत्र ह्रस्वानुपपत्तिः । 'गोस्त्रियोः' (१.२.४८) इत्यत्र हि शास्त्रीयमुपसर्जनम् । कुमारशब्दप्रकृतिकस्य स्त्रीप्रत्ययस्य लौकिकोपसर्जनताया निर्विवादत्वात् । परिभाषाप्रवृत्तिप्रयोजकस्यानुपसर्जनत्वस्याभावात्तदादिनियमप्रवृत्तौ निग्रहवाक्यीयनियतविभक्तिकत्वेन शास्त्रीयोपसर्जनं यत् 'राजकुमारी' इति न तत् स्त्रीप्रत्ययान्तम् ; यच्च स्त्रीप्रत्ययान्तं 'कुमारी' इति न तदुपसर्जनमिति स्त्रीप्रत्ययान्ततादृशोत्तरपदकसमासरूपप्रातिपदिकत्वस्य ह्रस्वप्रवृत्तिप्रयोजकस्य तत्र दुर्वचत्वात् ।

न च 'गोस्त्रियोः' (१.२.४८) इत्यत्रापि लौकिकमेवोपसर्जनमाश्रीयते । ततश्च 'कुण्डोघ्नीपुत्रः' इत्यत्र ह्रस्ववारणाय प्रत्यासत्त्या यस्य समासस्य ह्रस्वश्चिकीर्षितः, तं प्रत्युपसर्जनीभूतो यः स्त्रीप्रत्ययस्तदन्तस्य तादृशसमासरूपप्रातिपदिकस्य ह्रस्व इत्यर्थ लक्ष्यासम्मर्दगत्या तदन्तविधिद्वयाश्रयणेनोपसर्जनीभूतस्त्रीप्रत्यान्तान्तसमासरूपप्रातिपदिकस्य ह्रस्व इत्यर्थस्य त्याज्यतया यत्र एव 'अतिराजकुमारि:' इत्यत्र ह्रस्व इति वाच्यम् । 'राजकुमारीमिच्छन्त्याचार्यत्वा ब्राह्मणी राजकुमारी' इत्यादावपि ह्रस्वापत्तेः ।

तस्मादियुक्तं गोस्त्रियोः (१.२.४८) इत्यत्रापि स्त्रीप्रत्ययमुपसर्जनमास्थातमिति 'अतिराजकुमारि:' इत्यत्र दोषस्तदवस्थ एवेत्यत आह—

प्रत्यासत्त्या यस्य स्त्रीप्रत्ययान्तत्वमाश्रीयते, तदर्थं प्रत्युपसर्जनमेवतत्परिभाषाप्रवृत्तौ निमित्तम् । तेन 'अतिराजकुमारि:' इत्यादौ राजकुमारीशब्दार्थस्यातिशब्दार्थे प्रत्युपसर्जनत्वेऽपि तदर्थं प्रत्यनुपसर्जनत्वाज्जातीयादिनियमाभावेन ह्रस्वसिद्धिः । अत एवात्र परिभाषायां न शाकटायनमुपसर्जनत्वमसम्भवात् ।

'प्रत्यासत्त्या' इति । प्रत्यासत्त्या यस्य स्त्रीप्रत्ययान्तत्वेन निश्चयः तद्विरूपितोपसर्जनत्वाभावेन यः स्त्रीप्रत्ययस्तदन्तोपसर्जनान्तप्रातिपदिकस्येत्यादिः 'गोस्त्रियोः' (१.२.४८) इत्यस्यार्थः पर्यवस्यतीति भावः । 'अनुपसर्जनत्वमेव' इति । स्त्रीप्रत्ययस्यानुपसर्जनत्वस्वीकारादेवेत्यर्थः । ननु वासुदेववाचकादकारादप्ययोगलक्षणे ङीषि निरूपिते इश्चब्देन प्रातिपदिकसमास 'अतिरि:' इत्यादौ तदसम्भव इति चेत् ? तर्हि स्त्रीप्रत्ययसामान्ये तदसम्भव इत्याशयः । यद्वा 'अत एव' इत्यस्यैवंविधपरिभाषाङ्गीकारादेवेत्यर्थः । अन्यथा 'स्त्रीप्रत्यये चानुपसर्जनस्य' इत्येव ब्रूयात् । तथा हि—सति स्त्रीप्रत्ययग्रहणे 'अनुपसर्जनस्य' इत्यस्य उपस्थितिरित्यर्थ व्यङ् इत्यादौ

स्त्रीप्रत्ययान्ते यदनुपसर्जनं शास्त्रीयोपसर्जनभिन्नं तदन्तस्य पूर्वपदस्य सम्प्रसारणमित्यर्थेन 'परमकारीषगन्धीपुत्रः' इत्यादावभीष्टसिद्धेः, 'अतिकारीषगन्ध्यापुत्रः' इत्यादावनिष्टनिवृत्तेश्च वृथैव तदादिनियमनिवर्तकतया प्रकृत-परिभाषाश्रयणं स्यादित्याशयः।

अत एव 'परमकारीषगन्ध्येव मनुष्यः परमकारीषगन्ध्या तस्य पुत्रः' इत्यर्थे 'परमकारीषगन्ध्यापुत्रः' इत्यत्र सम्प्रसारणाभावः। तत्रा व्यक्तौ लौकिकोपसर्जनत्वसंस्त्वात्तदादिनियमप्रवृत्तेः पूर्वपदस्य व्यक्तन्तत्वाभावात्।

'अतिगोबष्कयणी' इत्यत्र बष्कयणीशब्दस्य शास्त्रीयोपसर्जनत्वाभावेन पूर्वनिपाताभावेऽपि गुणवाचितया लौकिकोपसर्जनत्वान्नायात्प्रकृत्यर्थद्वारकं स्त्रीप्रत्ययस्यौपसर्जनत्वमादाय तदादिनियमप्रवृत्त्या स्त्रीप्रत्ययान्तोपसर्जनोत्तरपदकत्वाभावात् 'गोस्त्रियोः', (१.२.४८) इति ह्रस्वाभावश्च सिद्ध इति दिक्। केचित्तु शास्त्रीयमेवात्रोपसर्जनम्, अनुपसर्जन इति च प्रसज्यप्रतिषेधः। चरमनञोऽभेदेन सम्बन्धः। स्त्रीप्रत्यये गृह्यमाणे तदादिनियमो न, तदादावुपसर्जनेऽयं निषेधो नेति परिभाषार्थः। अत एव 'गोस्त्रियोः' इति सूत्रे भाष्ये 'अतिराजकुमारिः' इत्यादौ ह्रस्वसंरक्षणाय 'स्त्रीप्रत्यये न' इति तदादिनियमनिषेध एवारब्धो न तु तत्रोपसर्जनप्रतिषेधः। अन्यथा 'अतिगोबष्कयणी' इत्यत्र ह्रस्ववारणाय सोऽपि वक्तव्यः स्यात्।

अस्मन्मते तु 'कुमारी' 'बष्कयणी'शब्दयोरविशेषादेवमुक्तिः। एवञ्च 'अतिगोबष्कयणिः' इति ह्रस्वो भवत्येव। तथा 'परमकारीषगन्ध्येव मनुष्यः परमकारीषगन्ध्या तस्य पुत्रः' इत्यर्थे सम्प्रसारणेन 'परमकारीषगन्धीपुत्रः' इत्येव भवितव्यं करीषगन्ध्याशब्दस्य शास्त्रीयोपसर्जनत्वाभावात्। इत्थञ्च एकदेशिसमासप्रत्याख्यानभाष्यमप्युपपद्यते। अन्यथा 'अर्धपिप्पलीमतिक्रान्तः' इति विग्रहे एकदेशिसमासपक्षे ङीष उपसर्जनत्वात्तदादिनियमेन ह्रस्वप्रवृत्तेः 'अत्यर्धपिप्पलि' इति भवति। कर्मधारयाश्रयेण तत्प्रत्याख्याने तु स्त्रीप्रत्ययस्यानुपसर्जनत्वात्तदादिनियमाभावेन ह्रस्वाप्रवृत्त्या 'अत्यर्धपिप्पलिः' इति भवतीति फलभेदेन प्रत्याख्यानासङ्गतेस्तदनुपपत्तिः स्पष्टैव।

अस्मन्मते तु पिप्पलीशब्दस्य पक्षद्वयेऽपि शास्त्रीयोपसर्जनत्वाभावात्तदादिनियमनिषेधेन ह्रस्वो भवत्येवेति न तद्विरोधः। 'अतिबहुश्रयसी' इत्यत्र नास्माकमपि ह्रस्वः। श्रेयसीशब्दस्य शास्त्रीयोपसर्जनत्वेन तदादिनियमात्। 'प्रियातिबहुश्रेयसिः' इत्यत्र ह्रस्वो भवत्येव। प्रत्यासत्त्या स्त्रीप्रत्ययान्तत्वेन जिघृक्षितसमुदायनिष्ठसमाससंज्ञाप्रयुक्तोपसर्जनतायां एव प्रकृतपरिभाषाविषयत्वात्। एवं 'अल्पर्धकारीषगन्ध्यौपुत्रः' इत्यत्र सम्प्रसारणमपि निर्विवादमेत्याहुः।

अस्याः 'प्रत्ययग्रहणे' (प. ३४) इत्यस्यापवादत्वात् तदेकवाक्यतापन्नत्वाच्च अत्रापि ग्रहणपदसम्बन्धेन स्त्रीप्रत्ययसामान्यग्रहणे विशेषग्रहणे वा प्रवृत्तिः, न तु स्त्रीप्रत्ययाऽस्त्रीप्रत्ययग्रहणे। ध्वनितञ्चेदं **'अर्थवत्'** (१.२.४५) सूत्रे भाष्ये। इयञ्च वाचनिक्येव **'ष्यङः'** (६.१.१३) इति सूत्रे भाष्ये स्पष्टा।

'सामान्यग्रहणे विशेषग्रहणे वा' इति। 'गोस्त्रियोः' (१.२.४८) इत्यादौ सामान्यग्रहणम्। 'ष्यङः' (६.१.१३) इत्यादौ विशेषग्रहणम्। ध्वनितञ्चेदं 'अर्थवत्' (१.२.४५) सूत्रे इति। तत्र हि समासग्रहणं नियमार्थमित्युक्तम्। यदि हि स्त्रीप्रत्ययास्त्रीप्रत्ययग्रहणेऽपीयं परिभाषा स्यात्तर्हि 'राजकुमारी' इत्यत्र प्रत्ययान्तपर्युदासवशात्पूर्वसूत्रेणाप्राप्तायाः प्रातिपदिकसंज्ञायाः प्रवर्तकतया समासग्रहणस्य चारितार्थ्येन तदसङ्गतिरेवेति भावः।

अथ सत्यामस्यां परिभाषायां 'दृष्टा गौरी' इत्यादौ समुदायादौत्सर्गिकैकवचनसम्पत्तये ङ्याप्प्रातिपदिकग्रहणस्यावश्यकत्वात्तत्प्रत्याख्यानपरं 'ङयाप्' (४.१.१) सूत्रस्थं भाष्यं विरुध्येत।

न च तत्र सुबुत्पत्तौ तदनुत्पत्तौ वा विशेषाभाव इति वाच्यम्। 'दृष्टा गौरी' इत्यादिसमुदायस्यैकपदे 'आम् दृष्टा गौरी देव दत्त' इत्यादौ आमः 'एकान्तरम्' इति स्वरापत्तेरिति चेत्? न; ङयाप्प्रहणस्य अन्यार्थत्वोपवर्णनपरभाष्यप्रामाण्येन प्रातिपदिकसाहचर्येण च पृथगर्थोपस्थापकविभक्त्य-

न हि तत्र ङ्यन्तान्तमेव पर्युदस्यते केवले च व्यपदेशिवद्भावः इति वक्तुं युक्तम्। विशेष्यान्तरासन्निधानेन द्वितीयतदन्तविधेर्दुर्लभत्वात्। किञ्च 'स्त्रीभ्यो ढक्' (४.१.१२०) इत्यत्र स्त्रीप्रत्ययस्यैव ग्रहणं युक्तम् आदिषु कञ्शब्दपाठात्। पितृष्वसृमातृष्वसृशब्दाभ्यां ढकि लोपः (१.१.३८) इत्यनेन प्रत्ययो ज्ञाप्यत इत्येव युक्तम्। अत एव 'दनोरपत्यं दानवः' इत्यस्य सिद्धिः। एवञ्च राजकुमारीयः' इत्यादौ ढकि सदृश्यमपीह परिभाषा। न हि तत्र तदन्तविधिमाश्रयितुं शक्यते। 'यञिञोश्च' (६.४.१८९) इत्यादाविव गृह्यमाणविशेष्यसद्भावे शब्दस्वरूपविशेष्याध्याहार-

प्रयुक्तस्य तस्यायुक्तात्वाद्युवजान्यन्तार्वाण्यादिभ्योऽपि ढक् प्रसङ्गाच्च । अपि च 'गोस्त्रियोः' (१.२.४८) इत्यत्र तदन्तविधिद्वयाश्रयणे गोशब्दांशेऽपि तदापत्तौ 'शोभना गौ सुगौः, तामतिक्रान्तोऽतिसुगौः' इत्यत्रापि ह्रस्वप्रसङ्गः । तस्मादावश्यकीयं परिभाषा ।' परन्तु लौकिकमेवात्रोपसर्जनं 'घ्यङः' (६.१.१३) इति सूत्रस्थभाष्यस्वरसात् । तत्र हि यो ह्यनुपसर्जनं भवत्येषा परिभाषा तत्रोपतिष्ठत इति प्रकृतपरिभाषार्थो वर्णितः । अत्र पक्षे एकदेशिसमासप्रत्याख्यानस्यारम्भसमानफलकत्वसम्पत्त्यर्थं 'अर्धकारीषगन्ध्यापुत्रः' इत्यादीनामनभिधानमेव शरणमिति सुधीभिर्विभाव्यमित्याहुः ।

नन्वेवं 'तरप्तमपौ घः' (१.१.२२) इत्यादिना तरबन्तादेः संज्ञा स्यादत आह –

२७. संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ।

'सुप्तिङन्तम्' (१.४.१४) इत्यन्तग्रहणमस्या ज्ञापकम् । न च प्रत्यययोः पदसंज्ञायामपि 'प्रत्ययग्रहण' (प. २३) परिभाषया तदन्तग्रहणसम्भवात् ज्ञापितेऽपि फलाभाव इति वाच्यम् ।

इयं 'स्त्रीप्रत्यये च' (प. २६) इत्यतः प्रागेव निरूपयितुमुचिता । तदांशनिवर्तकपरिभाषाद्वयमध्ये निरूपणे सङ्गत्यभावात् । 'तरबन्तादेः संज्ञा स्यात्' इति । एवञ्च 'घरूप' (६.३.४३) इत्यत्र घशब्देन प्रत्ययान्तस्यैवोपस्थानात् प्रत्ययग्रहणाभावेन तल्लिङ्गाया उत्तरपदाधिकारपरिभाषाया अप्रवृत्तौ 'कुमारी ब्राह्मणितरा' इत्यत्र ह्रस्वापत्तिर्दुर्वारेत्यत्र तात्पर्यम् ।

'अन्तग्रहणमस्या ज्ञापकम्' इति । न च प्रत्ययग्रहणपरिभाषया तदन्तलाभेऽपि श्रूयमाणतदन्तलाभायान्तग्रहणमिति वाच्यम् । तथा सति 'न ङिसम्बुध्योः' (८.२.८) इत्यस्य वैयर्थ्यापत्तेः । धर्मिग्राहकसाजात्याद्यस्य प्रत्ययस्य संज्ञित्वं सम्भाव्यते तेन प्रत्ययेन तदन्तग्रहणं नेति परिभाषार्थः । तेन 'ईदूदेदद्विवचनम्' (१.१.११) इत्यत्र वर्णग्रहणे तदन्तविधावेदन्तद्विव–

चनस्य प्रगृह्यत्वमव्याहतम्। 'कृत्तद्धित' (१.२.४६) इति सूत्रे तदन्तांशलाभस्त्वर्थवद्ग्रहणानुवृत्तेस्तस्य च लौकिकार्थवत्परत्वात् केवलयोश्च तयोस्तादृशार्थवत्त्वासम्भवादिति स्पष्टमन्यत्र। डतरडतमयोस्तु सर्वनामसंज्ञायां फलाभावादेव तदन्तलाभः।

न च संज्ञाविधौ तदन्तविधिनिषेधेऽपि प्रादेशिकेन तदन्तविधिना सर्वनामसंज्ञाप्रयुक्तकार्यनिर्वाह इति वाच्यम्। 'वर्णाश्रमेतराणाम्' इत्यादौ सुंडादिवारणार्थं 'आमि सर्वनाम्नः सुट्' (७.१.५२) इत्यादेरवर्णान्तादङ्गात्परस्य सर्वनाम्नो विहितस्येत्याद्यर्थकतायां आवश्यकत्वेनाङ्गस्येत्यस्य सर्वनामांशे विशेष्यत्वाभावादेव प्रादेशिकतदन्तविधेर्दुर्लभत्वात्। एवं वेतुडत्योरपि संख्यासंज्ञायाः फलाभावादेव तदन्तांशलाभः। न च 'दिक्संख्ये संज्ञायाम्' (२.१.५०) इत्यत्र समर्थविशेषणत्वेन तदन्तविधौ फलसम्भव इति वाच्यम्। 'समासप्रत्ययविधौ' (वा. १२) इति तत्र तदन्तविधेः प्रतिषेधात्। 'सामन्त्रितम्' इत्यत्र च महासंज्ञाकरणबलादेव तदन्तांशलाभ इति स्पष्टमन्यत्र।

अत्रेदं बोध्यम्–परिभाषायां 'संज्ञाविधौ' इति सम्बन्धसामान्यषष्ठ्या समासः। ततश्च संज्ञासम्बन्धिविधानाधिकरणे प्रदेशोपीति तत्रापि निषेधः। अत एव परिभाषायाः सौफल्यम्; अन्यथा संज्ञासूत्रे निषेधेऽपि प्रादेशिकेन तदन्तविधिना विशिष्टे कार्यप्रवृत्तेर्दुर्वारतया तदानर्थक्यं स्पष्टमेव। तदुक्तं 'सुतिङन्तम्' इति सूत्रे शेखरे। तेनात्सामर्थ्यादेव प्रदेशेष्वपि न तदन्तविधिरिति। न चैतत्परिभाषाभावे संज्ञास्थलीय एकः प्रादेशिको द्वितीय इति तदन्तविधिद्वयेन 'कुमारी परमब्राह्मणितरा' इत्यत्र ह्रस्वप्रसङ्गः। सत्यान्तु परिभाषायां प्रादेशिक एकस्तदन्तविधिरिति न तत्र ह्रस्वप्रवृत्तिः। एवञ्च फलवैचित्र्यात्कथं सामर्थ्यं, स्पष्टश्चेदं कैयटे इति वाच्यम्। 'इष्टकापरिचितम्' 'उदकाधिवासः' इत्यादौ ह्रस्वोदादेशादिवारणार्थेन 'गिलगिले' च (वा.७९१) इति ज्ञापकसिद्धेन उत्तरपदविशेष्यकप्रातिपदिकीयतदन्तविधिनिषेधेन परिभाषाया अभावे 'धरूप' (६.३.४३) इत्यत्र घान्तप्रातिपदिकोपकस्थापकेन घशब्देनोत्तरपदविशेष्यकद्वितीयतदन्तविधेर्दुर्लभतया फलविशेषस्य दुरुपपादत्वात्।

न च प्रगृह्यसंज्ञाविषये 'ईदूदेद्द्विवचनम्' (१.१.११) इत्यत्र तदन्त-विध्यभावसम्पादनेन परिभाषायाः साफल्यम्। प्रगृह्यपदस्य प्रत्ययाप्रत्यय-साधारणतया तत्प्रदेशेषु प्रत्ययग्रहणपरिभाषाप्रयुक्तस्य तदन्तांशस्य दुर्लभत्वा-दिति वाच्यम्। ईदाद्यन्तं यद् द्विवचनं तदन्तं प्रगृह्यमित्यर्थेन सत्यपि तदन्तविधौ 'कुमार्योरगारं कुमार्यगारं, वध्वोरगारम् वध्वगारम्' इत्यत्र प्रगृह्य-त्वाप्रसङ्गादेतत्परिभाषायास्तत्र फलाभावादप्रवृत्तिरेवेत्याशयात्। नन्वेवमपि 'क्तक्तवतू निष्ठा' (१.१.२६) इत्यत्र तदन्तांशनिषेधः फलम्। तत्प्रदेशे 'क्लिशः क्त्वानिष्ठयोः' (७.२.५०) इत्यादौ 'प्रत्ययग्रहणे चापञ्चम्याः' (प. २४) इत्यनया तदन्तांशनिषेधसम्भवात्।

न च निष्ठापदेनैव क्तक्तवत्वोर्विधानेन संज्ञाप्रवृत्तेः प्राक् प्रत्ययत्वज्ञाना-भावात्तयोः प्रत्ययत्वतद्व्याप्यान्यतरधर्मप्रकारकोपस्थितिजन्यकत्वासम्भवेन प्रत्य-ग्रहणपरिभाषाप्रयुक्ततदन्तांशस्य तत्र दुर्लभतया फलाभावात्स्वोपस्थापकलिङ्गा-भावाच्च अप्रवृत्तिरेव तत्रास्याः परिभाषायां इति वाच्यम्। द्विवचनेग्रहणेन तदन्तग्रहणाभावस्य प्रकृतपरिभाषाविषयत्वप्रतिपादनपरप्रगृह्यसंज्ञाप्रकरणस्य-भाष्यप्रामाण्यात् 'रदाभ्यां' (८.२.४२) इत्यत्र तदन्तग्रहणाभावस्य 'प्रत्यय-ग्रहणे चापञ्चम्याः' (प. २४) इत्येतत्परिभाषाविषयत्वोपपादनपर 'येन विधिः' (१.१.७२) इति सूत्रस्थभाष्यप्रामाण्याच्च भाविप्रत्ययसंज्ञाव्युत्पत्त्यवि-च्छिष्टतत्तदानुपूर्वीप्रकारेणैव क्तक्तवत्वादीनां स्वार्थोपस्थापकत्वमवश्यमभ्यु-पेयम्। अन्यथा 'निष्ठोपमानादन्यतरस्याम्' (६.२.१६९) इत्यादौ सम्ब-ध्यमानपूर्वपदादिरूपविशेष्यमहिम्ना तदन्तांशलाभेऽपि तदाद्यंशस्य दुर्लभतया 'सुरापीतं मुखं यस्य' इत्यर्थे 'सुरापीतमुखः' इत्यादौ विशिष्टस्य पूर्वपदस्य निष्ठान्तत्वमादाय उत्तरपदाद्युदात्तत्वादिरूपकार्यप्रसङ्गः। ततश्च प्रकृतेऽपि प्रत्ययग्रहणपरिभाषाप्रयुक्ततदन्तांशस्य दुर्वारतया तन्निवारणायास्याः परि-भाषाया आवश्यकत्वात्।

किञ्च 'कृदतिङ्' (३.१.९३) इत्यत्रापि तदन्तांशनिषेधोऽस्याः फलम्। तत्प्रदेशे 'ह्रस्वस्य पिति' (६.१.७१) इत्यादौ 'प्रत्ययग्रहणे चापञ्चम्याः' (प. २४) इति तदन्तांशनिषेधसम्भव इति चेत्? सत्यम्; कार्यकालपक्षे तत्तत्प्रदेशैक-वाक्यतापन्नसंज्ञाशास्त्राणां वाक्यैकवाक्यतया पृथगेव स्वस्वसंज्ञाप्रतिपाद-

कत्वात्संज्ञावाक्येष्वेकवाक्यतापन्ना प्रकृतपरिभाषा तदन्तांशं निवारयन्ती विधिवाक्येऽपि यदि प्रकारान्तरेणानिवारितस्तदन्तांशः प्राप्नोति तर्हि तमपि वारयतीत्याशयो विभावनीयः ।

ननु प्रदेशनिषेधस्य फलाभावः । 'वरूप' (६.३.४३) इत्यत्र उत्तरपदाधिकारपरिभाषयैव तदन्तांशनिषेधसम्भवात् । न चोत्तरपदस्य विशेष्यतामादाय प्राप्त एव तदन्तांशस्तया निषिध्यते, न तु शब्दस्वरूपविशेष्याध्याहारप्रयुक्त इति वाच्यम् । तथा सति तत्परिभाषाया आनर्थक्यप्रसङ्गात् । ज्ञापितायामपि लेखग्रहणस्य चारितार्थ्याभावेन ज्ञापकतापरभाग्यविरोधापत्तेश्च ।

पदसंज्ञायाः 'स्वादिषु' (१.४.१७) इति विषये प्रकृतिनिष्ठतया पदग्रहणस्य प्रत्ययमात्रग्रहणत्वाभावात् । 'सुप्तिङन्तम्' (१.४.१४) इति सूत्रे भाष्ये स्पष्टा ।

'नादृघस्य' (८.२.१७) इत्यादौ तु 'प्रत्ययग्रहणे चापञ्चम्याः' (प. २४) इत्यनयैव तदन्तांशनिषेध इति चेत् ? तर्हि 'आदुत्तमस्य पिच्च' (३.४.९२),'यासुट् परस्मैपदेषूदात्तो ङिच्च' (३.४.१०३) इत्यनयोरुत्तमपरस्मैपदसंज्ञाभ्यां तदन्तांशनिषेधः प्रकृतपरिभाषाबोध्यप्रदेशनिषेधस्य मूलम् । तत्र हि विकरणव्यवधानेऽपि प्रवृत्तये 'धातोः' (३.१.९१) इत्यस्य विहितपञ्चम्यन्ततया 'प्रत्ययग्रहणे चापञ्चम्याः' (प. २४) इत्यस्याप्रवृत्तिः । यद्यपि पित्त्वाद्यतिदेशबलात्तत्र तदन्तांशनिषेधः सुवचस्तथापि तादृशातिदेशस्य साक्षात्तदन्तांशनिषेधकत्वकल्पनामपेक्ष्योक्तार्थस्योपोद्बलकत्वकल्पनैव ज्यायसीत्याहुः ।

केचित्तु—'संज्ञाविधौ' इति कर्मषष्ठयन्तेनैव समासः । ततश्च संज्ञाकर्मविधानादिकरणे संज्ञाशास्त्रे एव निषेधो, न तु प्रदेशे । अत एव 'गतिकारकोपपदात्कृत्' (६.२.१३९) इत्यादौ तदन्तांशलाभः । न चानया शब्दस्वरूपविशेष्याध्याहारमूलक एव तदन्तांशो निषिध्यते, न तूपात्तविशेष्यनिबन्धन इति 'हृदयस्य' (४.४.९९) इति सूत्रस्थकैयटोक्तरीत्या निर्वाह इति वाच्यम् । एवमपि 'निष्ठा' (२.२.३६) इति पूर्वनिपातविधायके

विशेष्यान्तरसान्निध्याभावेन शब्दस्वरूपविशेष्याध्याहारमूलकतया सम्पादनीयस्य तदन्तांशस्य निषेधापत्तेः ।

न च तत्र 'उपसर्जनं पूर्वम्' (२.२.३०) इत्यतः उपसर्जनपदानुवृत्तेरुपादीयत एव विशेष्यमिति वाच्यम् । एवमपि 'निष्ठा च द्व्यजनात्' (६.१.२०९) इत्यत्र शब्दस्वरूपविशेष्याध्याहारमूलकस्य तदन्तांशस्याभीष्टस्य दौर्लभ्यापत्तेः । तत्र संज्ञायामित्यनुवर्तमानस्य प्रथमया विपरिणामाद्विशेष्यत्वमित्युक्तौ च क्लेशः । अनादित्यप्रसज्यप्रतिषेधपरतया न 'प्रत्ययग्रहणे चापञ्चम्याः' (प. २४) इत्यस्याप्रवृत्तिः । तथा च 'रदाभ्यां' (८.२.४२) इत्यत्र 'प्रत्ययग्रहणे चापञ्चम्याः' (प. २४) इत्यनया निष्ठांशे तदन्तांशनिवर्तनपरं 'येन विधिः' (१.१.७२) इति सूत्रस्थं भाष्यमप्युपपद्यत इत्याहुः ।

नन्वेवं 'अवतप्ते नकुलस्थितम्' इत्यादौ नकुलस्थितशब्दस्य क्तान्तत्वाभावात्समासो न स्यादत आह —

२८. कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ।

अस्याश्च कर्मणि क्तान्ते उत्तरपदेऽनन्तरो गतिः प्रकृतिस्वर इत्यर्थके 'गतिरनन्तरः (६.२.४९) इति सूत्रेऽनन्तरग्रहणं ज्ञापकम् । तद्धि 'अभ्युद्धृतम्' इत्यादावतिव्याप्तिवारणार्थम् । प्रत्ययग्रहणपरिभाषया उद्धृतशब्दस्य क्तान्तत्वाभादप्राप्तौ तद्व्यर्थं सदस्या ज्ञापकम् ।

न च 'अभ्युद्धृतम्' इत्यादौ परत्वात् 'गतिर्गतौ' (८.१.७०) इत्यनेन अभेर्निघात एवेति वाच्यम् । पादादिस्थत्वेन पदात्परत्वाभावेन च तदप्राप्तेः । अनन्तरग्रहणे कृते तत्सामर्थ्याद्गत्याक्षिप्तधातुनिरूपितमेवानन्तर्यं गृह्यत इति न दोषः ।

न च 'अभ्युद्धृतम्' इत्यादावभिना समासेऽनन्तरस्योदोऽपूर्वपदत्वेऽपि स्वरार्थं तदिति वाच्यम्।

'समासो न स्यात्' इति। 'क्षेपे' (२.१.४७) इति सूत्रे हि 'क्तेनाहोरात्रावयवाः' (२.१.४९) इत्यतः क्तेनेति वर्तते, समर्थग्रहणस्य विशेष्यतामादाय द्वितीयतदन्तविधिस्तु न भवति 'समासप्रत्ययविधौ' (वा. १२) इति प्रतिषेधादिति भावः। 'अस्यां ज्ञापकम्' इति। एकदेशानुमत्या वचनरूपेण तन्त्रान्तरपरिगृहीतायाः सम्पूर्णपरिभाषाया इहाप्यनुमतिः कल्प्यत इत्यत्र तात्पर्यम्। एतेन कारकांशे ज्ञापकालाभेऽपि न क्षतिः। 'निघात एव' इति। एवञ्च ज्ञापितायामपि चारितार्थ्यलाभान्नेदं ज्ञापकं युक्तमित्याशङ्काभिप्रायः। 'पदात्परत्वाभावेन च' इति। चो हेतौ न समुच्चये। तेन यतः पदात्परत्वाभावस्ततः पादादिस्थत्वमिति तदर्थः। 'गतिर्गतौ' (८.१.७०) इत्यत्र तु 'अनुदात्तं सर्वमपादादौ' (८.१.१८) इत्येवानुवर्तते, न तु पदादि। तस्य हि 'कुत्सने च सुपि' (८.१.६९) इत्यतः प्रागेव निवृत्तिरित्यन्यत्र स्पष्टम्।

नन्वेवमपि चारितार्थ्यं दुर्निरूपमेव ज्ञापनोत्तरमुद्धृतशब्दस्यैवोक्तान्ततया तन्निरूपितानन्तर्यस्याभिशब्देऽपि सूपपादत्वादत आह—'तत्सामर्थ्यात्' इति। एवञ्चानेकगतिसमभिव्याहारे व्यवहितस्यानन्तरग्रहणात्सन्निहितस्य पूर्वपदाधिकारबलाच्च प्रकृतशास्त्राविषयत्वादेकगतिसमभिव्याहृतं 'प्रकृतं' 'प्रहृतं' इत्याद्यस्योदाहरणम्। तत्र हि समासस्त्रापवादभूतमव्ययपूर्वपदप्रकृतिस्वरं बाधित्वा प्राप्तस्य कृत्स्वरस्य थाथादिस्वरस्य च बाधकोयं सतिशिष्टो गतिस्वर इति सिद्धान्तः।

ननु 'अभ्युद्धृतम्' इत्यादौ व्यवहितनिवृत्तिरेव यद्यनन्तरग्रहणस्य फलं स्यात्तदा विनापि परिभाषां तादृशफलाप्रसिद्धेरस्तु ज्ञापकता। प्रकृते च वाक्यभेदेन सामर्थ्यात्पूर्वपदाधिकारविरहितेन पुनर्विधानादनन्तरस्य उदादेस्थाथादिस्वरं बाधित्वा पूर्वपदाधिकारात्प्राप्तस्य गतिस्वरस्य प्रापकत्वादनन्तरग्रहणं सफलमिति कथं ज्ञापकत्वम्? न, त्रास्यामवस्थायां कृद्ग्रहणपरिभाषाया

अभावादुद्धृतशब्दस्य क्तान्तत्वाभावेन गतेः कारकादुपपदाद्वा पूर्वपदात्परे क्तप्रत्ययान्ते प्रवर्तमानस्य थाथादिप्रयुक्तान्तोदात्तस्य प्रकृते प्रसक्त्यभावात्कथं तद्बाधकगतिस्वरविधानेनानन्तरग्रहणासाफल्यमिति वाच्यम्। भाष्यसम्मतफलाभावेन थाथादिसूत्रे पूर्वपदाधिकारसम्बन्धानभ्युपगमेनादोषात्। तस्मादयुक्तमेवेदं ज्ञापकमित्याशयेन शङ्कते 'न च' इति। 'गतिग्रहणमनुवर्त्यं' इति। 'सूपमानात् क्तः' (६.२.१४९) इत्यतः क्त इति वर्तते। पूर्वपदाधिकार एवेह सम्बध्यते। न तूत्तरपदाधिकारः। योग्यताविरहात्। ततश्च कारकात्पूर्वपदात्परो यो गतिस्ततः परं क्तान्तमन्तोदात्तमिति तदर्थः।

'कारकादत्त' (६.२.१४८) इति सूत्रे कारकादिति योगं विभज्य तत्र गतिग्रहणमनुवर्त्य कारकादेव परं गतिपूर्वपदं क्तान्तमन्तोदात्तमिति नियमेन थाथादिस्वरप्राप्त्या कृत्स्वरेणोद उदात्तत्वसिद्धेः। तस्मादनन्तरग्रहणं व्यवहितनिवृत्त्यर्थमेवेति ज्ञापकमेव। यत्र गतिकारकसमभिव्याहृतं कृदन्तं तत्र कृद्ग्रहणे तद्विशिष्टस्यैव ग्रहणम्, अपिशब्दात् तदसमभिव्याहृतस्य केवलस्यापीति तदर्थः। अन्यथाऽनया कृद्ग्रहणविषये परत्वात्प्रत्ययग्रहणपरिभाषाया बाध एव स्यादित्यपिग्रहणम्।

'थाथादि' (६.२.१४४) सूत्रेणैव सिद्धे नियमार्थमित्याह – 'कारकादेव' इत्यादि। 'कृत्स्वरेण' इति। नन्वस्यामवस्थायामुद्धृतशब्दस्य कृदन्तत्वाभावात् कृदन्तत्वप्रयुक्तप्रकृतिस्वरस्य वक्तुमशक्यत्वात्कथमुद उदात्तत्वसिद्धिः? न च 'गतिकारकोपपदात्' (६.२.१३९) इत्यत्र तदन्तविधिद्वाराश्रयणेन कृदन्तान्तमुत्तरपदं प्रकृतिस्वरमित्यर्थादिह न दोष इति वाच्यम्। तथा सति 'देवदत्तकुसृष्टिः' इत्यादौ कारकषष्ठ्या समासे कृदन्तान्तत्वप्रयुक्तेन प्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वप्रसङ्गात्। कुसृष्टिशब्दे हि 'तत्पुरुषे तुल्यार्थ' (६.२.२) इत्यादिना कुशब्दोदात्तः सतिशिष्टः।

सिद्धान्ते तु समासान्तोदात्तत्वमिष्यत इति चेत्तर्हि ज्ञापकपरभाष्यप्रामाण्यादीदृशेषु कारकषष्ठ्या समासस्यानभिधानमिति मन्युदेवादयः। केचित्तु

ज्ञापितायां परिभाषायामुदधृतशब्दस्थानया परिभाषया क्तान्तत्वात् 'थाथादि' (६.२.१४४) सूत्रेणान्तोदात्तत्वप्रसङ्गः । इष्यते हि तत्रोद एवोदात्तत्वम् । तस्मात्पूर्वपदाधिकारबाधनेनानेकगतिकेष्वपूर्वपदस्यः गतेरुदात्तत्वप्रवृत्तिप्रयोजकत्वमेवानन्तरग्रहणस्येति युक्तं न तु व्यवहितनिवृत्तिफलकत्वेन परिभाषाज्ञापक त्वमित्याशङ्काभिप्रायः । सत्यामपि परिभाषायां थाथादिस्वराप्रवृत्तिप्रयोजकस्य नियमस्य सुवचत्वाद्गतिस्वरेणाद्युदात्तस्योदधृतशब्दस्य कृदन्तत्वात् 'गतिकारकोपपदात्' (६.२.१३९) इत्युत्तरपदप्रकृतिस्वरेणोद एवोदात्तत्वसिद्धेर्न लक्ष्यासिद्धिप्रयुक्तो दोष इत्युत्तरग्रन्थतात्पर्यम् ।

यद्वा ज्ञापकतापक्षे कारकांशे ज्ञापकान्तरालाभाद्वाचनिकत्वस्यैकदेशानुमतिन्यायस्यैव वा स्वीकर्तव्यत्वेन लक्ष्यानुरोधाद्वाचनिक्यैवैषा विशिष्टपरिभाषा स्वीक्रियतामनन्तरग्रहणं त्वभ्युदधृतमित्यादौ अनेकगतिकेषु थाथादिस्वरबाधनार्थमस्तु मास्तु परिभाषाज्ञापनार्थमित्याशयोऽत्र शङ्काबीजम् । उपदर्शितस्थले थाथादिस्वरनिवृत्तिपूर्वकगत्युदात्तस्यान्यथासिद्धत्वाद्व्यवहितनिवृत्तिरेवानन्तरग्रहणस्यासाधरणं फलं, तच्च विना परिभाषां न सम्भवतीति सुस्थं ज्ञापकत्वमित्याशयः समाधानबीजम् । तदुक्तविधिद्वयाश्रयणे हि तुल्यरीत्या 'गतिरनन्तरः' (६.२.४९) इत्यत्रापि तदापत्तौ 'अभ्युदधृतम्' इत्यादौ विनैव परिभाषाममेः स्वरवारणार्थमनन्तरग्रहणस्य आवश्यकत्वात् ज्ञापकत्वोपवर्णनमसम्बद्धमेव स्यात्। ज्ञापनपरभाष्यप्रामाण्यात् 'गतिरनन्तरः' (६.२.४९) इत्यत्रैं तदनाश्रयणमिति तु न समञ्जसम् । किञ्च 'देवदत्तकुसृष्टिः' इत्यादावतिव्याप्तस्य कृदुत्तरपदप्रकृतिस्वरस्यानभिधानेन वारणमपि सहृदयानामुद्वेगकरमिति सुधीभिर्विभावनीयमित्याहुः । तदेतत्सर्वमालोच्य व्यवहितनिवृत्त्यर्थकत्वेनैव साफल्यमनन्तरग्रहणस्य न त्वन्यथेत्युपसंहरति 'ज्ञापकमेव' इति ।

यत्तु अहीनवाचिनि समासे क्तान्तोत्तरपदे द्वितीयान्तं प्रकृत्येत्यर्थके 'अहीने द्वितीया' (६.२.४७) इति सूत्रस्थं 'अनुपसर्गं इति वक्तव्यम्' (वा. ७०९) इति वार्तिकमेवैतस्यां परिभाषायां ज्ञापकमित्याशयो 'न च'

इत्यादि ग्रन्थप्रवृत्तिहेतुरिति, तदसत्। ज्ञापकान्तरसिद्धस्यार्थस्य पुनर्ज्ञापकेन साधनस्यास्वारसिकत्वात्। वाचनिकत्वेन तदङ्गीकारस्तात्पर्यकत्वे तु तन्त्रान्तराभ्युपगतस्यार्थस्य, लक्ष्यानुरोधेनात्र शास्त्रे स्वीकारापेक्षया ज्ञापकेन तत्स्वीकारो न्याय्य इति वक्तुं युक्तमिति दिक्।

परिभाषायामपिशब्देन गतिकारकसमभिव्याहृतस्य केवलस्य 'प्रत्ययग्रहण' (प०:२३) परिभाषाबोध्यस्य ग्रहणमिति केषाञ्चिद्व्याख्यानं खण्डयति 'तद्विशिष्टस्यैव' इति। यस्य गतेः कारकस्य वा निमित्तत्वोद्देश्यत्वान्यतररूपेण ग्रहणं तस्य पुनः सामर्थ्यादेव कृदन्ततयाग्रहणम्। यथा 'गतिकारकोपपदात्कृत्' (६.२.१३९) 'गतिरनन्तरः' (६.२.४९) इत्यादौ तदतिरिक्तगतिकारकसमभिव्याहारे विशिष्टस्यैव ग्रहणमितितत्तदर्थं।

अन्यथाऽत्तया कृद्ग्रहणविषये परत्वात् प्रत्ययग्रहणपरिभाषाया बाध एव स्यादित्यपिग्रहणम्। अत एव 'सांकूटिनम्' इति 'गतिकारकोपपदानाम्' (प. ७५) इति 'कृद्ग्रहण' (प. २८) इति च परिभाषाभ्यां कृदन्तेन समासे कृते विशिष्टादेवाणि सिद्ध्यति, न तु 'सङ्कूटिनम्' इति 'पुंयोगात्' (४.१.४८) इति सूत्रभाष्योक्तं सङ्गच्छते। अन्यथा तत्र 'केवलकूटिन्' इत्यस्यापीनिनुणन्तत्वात्ततोऽणि पाक्षिकदोषो दुर्वार एव स्यात्। स्पष्टञ्चेदं 'समासेऽनञ्पूर्वे' (७.३.३७) इति सूत्रे भाष्यकैयटयोः। 'गतिरनन्तरः' (६.२.४९) इत्यत्र तु गतेः पूर्वपदस्य क्तान्ते उत्तरपदे कार्यविधानात् तत्समवधानेऽपि केवलस्य क्तान्तत्वेन ग्रहणं बोद्धव्यम्। इयञ्च कृद्विशेषग्रहणे कृत्सामान्यग्रहणे च, न तु कृदकृद्ग्रहणे इति 'अनुपसर्जनात्' (४.१.१४) इति सूत्रे भाष्ये स्पष्टम्।

'परत्वात्' इति। 'स्यावक्रोशी' इत्यादौ स्त्रीप्रत्यये तदादिनियमनिषेधेन क्रोशशब्दादेः प्रसक्तस्य 'णचः स्त्रियामञ्' (५.४.१४) इत्यस्य वारणेनाह्या:

परिभाषायाः साफल्यं त्रिरोधोऽपि परिभाषाणां नियामकत्वादस्त्येवेत्याशयः। परत्वादित्यस्यौत्कृष्टत्वादपवादत्वादित्यर्थः। 'णंचः स्त्रियामव्' (५.४.१४) इत्यत्र 'स्त्रीप्रत्यये चानुपसर्जने न' (प. २६) इति तदादिनियमनिषेधेऽपि प्रत्ययग्रहणपरिभाषाप्रवृत्तियोग्यतामाश्रित्य तदप्राप्तियोग्ये चारितार्थ्याभावमूलकस्य तक्रकौण्डिन्यन्यायस्य सुवचत्वादिति केचित्।

उक्तव्याख्याने फलमाह—'अत एव' इति। गतिकारकसमभिव्याहारे केवलस्य कृदन्तत्वेन ग्रहणाभावादेवेत्यर्थः। 'इदम्' इति। केवलस्य ग्रहणाभावरूपमित्यर्थः। 'समासेऽनञ् पूर्व' इत्यादि। तत्र हि 'स्नात्वाकालकः' इत्यादौ ल्यब्वारणाय नञ्भिन्नपूर्वपदकस्य क्त्वान्तोत्तरपदकस्य समासस्यावयवो यः क्त्वा तस्य ल्यप्त्रित्यर्थे प्रकृत्येत्यादौ प्रकृतपरिभाषया विशिष्टस्यैव क्त्वान्ततया ल्यब्भावमाशङ्क्य 'अनञ्पूर्वपद' इत्यनेन तत्रास्याः परिभाषाया अप्रवृत्तिर्ज्ञापिता। कैयटे च प्रकृतपरिभाषाप्रवृत्तौ हि समासस्यैव क्त्वान्तत्वात्तदन्तस्य समासस्य नञ्भिन्नपूर्वपदकस्येत्येवार्थः सम्पद्येत, ततश्च नञो गतिकारकाभ्यां व्यतिरिक्तत्वात्तत्पूर्वपदकस्य कृत्वान्तसमासस्याप्रसिद्ध्या व्यर्थमनञ्पूर्वग्रहणमतः परिभाषाया अप्रवृत्तौ ज्ञापकमित्याशयो भाष्यकारस्य वर्णितः। एवञ्च गतिकारकसमभिव्याहारे केवलस्य कृदन्तत्वेन ग्रहणाभावः स्पष्टमेव भाष्यकैयटाभ्यामभिहित इति भावः। नन्वेवं 'देवदत्तेन कृतम्' इत्यादौ कारकसमभिव्याहृतस्य केवलस्य कृतशब्दस्य कृदन्तत्वाभावात्प्रातिपदिकत्वानापत्तिः। तथा 'मूलकेनोपदंशम्' इत्यत्र केवलस्य 'उपदंशम्' इत्यस्य कृदन्तत्वाभावात् 'कृन्मेजन्तः' (१.१.३९) इत्यव्ययत्वमपि न स्यात्। सत्यम्, धर्मिग्राहकसाजात्याल्परिभाषायास्समासघटकातिकारकमात्रप्रत्ययाभ्युपगमाद्दोषः।

किञ्च धर्मिग्राहकसाजात्यादेवास्याः कृन्मात्रग्रहणविषयत्वमपि। तदाह—'इयञ्च' इति। 'अनुपसर्जनात्' इत्यादि। तत्र हि भाष्ये अनुपसर्जनाधिकारज्ञापिततदन्तविधेरुदाहरणभूते 'कुम्भकारी' इत्यत्र प्रकृतपरिभाषया सङ्कुचितस्यैवाणन्तत्वात् ङीपोऽन्यथासिद्धिरित्याशङ्क्य कृद्ग्रहण इत्युच्यते, न चेदं कृद्ग्रहणम्, 'कृदव्ययमणौ तद्धितोऽपि' इत्युक्त्वा समाहितम् तेन 'ञ्नित्यादिर्नित्यम्' (६.१.१९७) इत्यादावस्याः परिभाषायाः अप्रवृत्त्या

पदि. २८. कृद्ग्रहणे गतिकारकपूर्वस्यापि
२९. पदाङ्गाधिकारे तस्य च तदन्तस्य च

'इतिहरिः' इत्यादौ विशिष्टस्य नाद्युदात्तत्वम्। अत्रेदं बोध्यम्—'गतिकारकपूर्वस्य' इत्यत्र अवधारणापूर्वप्रदो बहुव्रीहिः। तेन गतिकारकाभ्यामन्यत्पदं यत्र मध्ये प्रविशति न तत्र कृदन्तत्वेन विशिष्टस्य ग्रहणम्। तेन 'देवदत्तसुन्दरकृतिः' इत्यत्र कर्तृषष्ठया समासेऽपि करणतृतीयान्तयोगे 'हस्तेन देवदत्तसुन्दरकृतिः' इति वाक्यमेव। न तु तत्र 'कर्तृकरणे कृता बहुलम्' (२.१.३२) इति समासः। गतिकारकातिरिक्तपदान्तरघटितत्वेन देवदत्ताद्यवयवस्य तत्र कृदन्तत्वाभावादिति स्पष्टमाकरे।

किञ्च क्रियाविशेषणानामपि नात्र कारकत्वेन ग्रहणमिति 'समासेऽनञ्पूर्वे' (७.१.३७) इति सूत्रे स्पष्टं भाष्यकैयटयोः। तेन 'परशुद्विधाकरणम्' इत्यत्र करणतृतीयान्तेन न समास इति 'तत्पुरुषे तुल्यार्थ' (६.२.२) इत्यस्याप्रवृत्तिरित्याहुः।

२९. पदाङ्गाधिकारे तस्य च तदन्तस्य च।

पदमङ्गञ्च विशेष्यं विशेषणेन तदन्तविधिः। 'येन विधिः' (१.१.७२) इत्यस्यायं प्रपञ्चः। तेन 'इष्टकचितम्' 'पकेष्टकचितम्' इत्यादौ 'इष्टकेषीकामालानां चिततूल' (६.३.६५) इति ह्रस्वः, 'महान्', 'परममहान्' 'परमातिमहान्' इत्यादौ 'सान्तमहतः' इति दीर्घश्च सिद्धः। अत एव 'तदुत्तरपदस्य' इति पाठोऽयुक्त इति भाष्ये स्पष्टम्। अत्र पदशब्देन उत्तरपदाधिकारः केवलपदाधिकारश्च। 'पादस्य पदाज्याति' (५.३.५१) इत्यत्र न तदन्तग्रहणं, लक्ष्यानुरोधादिति सर्वं 'येन विधिः' (१.१.७२) इत्यत्र भाष्ये स्पष्टम्।

तदन्तविधिप्रस्तावोऽत्र सन्दर्भः। 'येन विधिः' (१.१.७२) इत्यस्यायं प्रपञ्चः' इति। तत्र पदाङ्गाधिकारयोर्गृह्यमाणं प्रति विशेष्यत्वमेवेत्यत्र तात्पर्यग्राहिकेयं परिभाषेति तत्त्वम्। 'अत एव तदुत्तरपदस्य' इति

'परमातिमहान्' इत्यादौ दीर्घस्याभीष्टत्वादेवेत्यर्थः। 'उत्तरपदाधिकारः' इति। अत्रत्वोत्तरपदाकाङ्क्षितमध्याहारलब्धं पूर्वपदात्मकं विशेष्यमादायैव तदन्तविधिरस्तु तूत्तरपदमादाय। तद्विशेष्यकप्रातिपदिकतदन्तविधिः 'गिलगिले च' (वा.७९५) इति ज्ञापकेन निषिद्ध इति प्रागुक्तं न विस्मर्तव्यम्। 'न तदन्तग्रहणात्' इति। एवञ्च तादृशेषु पूर्वपदशब्दस्याध्याहार एव न कल्पते। अध्याहृतस्य वा तस्य गृह्यमाणं प्रति विशेष्यत्वाभाव इति। बोध्यम्।

टक्ष प्रानन्वेवे ीअस्यापत्यमिः' इत्यादौवदन्तप्रातिपदिकाभावादिञ् न स्यादतो आह —

(६.४.३) 'प्राक्ङि'

३०. व्यपदेशिवदेकस्मिन्।

निमित्तसद्भावमद्विशिष्टोऽपदेशो मुख्यो व्यवहारो यस्यास्ति स व्यपदेशी।

'प्राक् तदन्तशब्दव्याप्तिनिवारकत्वमत्रैतत्परिभाषानिरूपणे कारणमिति सूचयन्नाह — निन्वेवम्' इति। 'इञ् न स्यात्' इति। ननु पूर्वपरिभाषायां 'तस्य' इति सामेन स्वस्यापि ग्रहणादिञ् सिद्धः। न च प्रकृतपरिभाषालब्धार्थानुवाद एव तत्र 'तस्य च' इत्यंशो न त्वपूर्वः स्वशब्दानुवृत्तिसाध्य इति वाच्यम्। तथा सति 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' (प. ३२) इति निषेधविषये 'राजन्' (४.१.७८) इति सूत्रेण विधीयमानस्याणः केवलराणीशब्दादप्रवृत्तिप्रसङ्गात्। तस्मादिदमयुक्तमिति चेत्। न; धर्मिग्राहकसामान्यात्तद्विशेषनिषेधस्य सूत्रोपात्तान्तादिशब्दविषयकतायां वक्ष्यमाणतया 'राणी' (४.२.७८) इत्यत्र तदप्रवृत्त्या व्यपदेशिवद्भावेनैव रौण इत्यस्यापि सुसाधत्वात्पूर्वपरिभाषास्थः 'तस्य च' इत्यंशो निष्फल एवेत्याशयात्।

(६०.१.१) 'ङीडी ङ'

'निमित्तसद्भावात्' इति। एतच्चाक्षेपलब्धम्, व्यवहारे व्यवहर्तव्यतावच्छेदकस्य हेतुतया विशिष्टव्यवहारहेतोर्विशेषणस्य सत्त्वादिति तदर्थः।

'अपदेशशब्दविवरणं व्यवहारः' इति। विशिष्ट इति व्यवहारो मुख्यो यस्येत्यन्वयः। मुख्यत्वञ्चारोपविषयताशून्यत्वम्।

यस्तु व्यपदेशहेत्वभावादविद्यमानव्यापदेशोऽसहायः स तेन तुल्यं वर्तते कार्यं प्रतीत्येकस्मिन्नसहायेऽपि तत्कार्यं कर्तव्यमित्यर्थः। तेन अकारस्याप्यदन्तत्वान्न क्षतिः। 'एकस्मिन्' इत्युक्तेः सभासन्नयने आकारस्य नादित्वम्, 'दरिद्राधातौ' इकारस्य नान्तत्वम्।

अतिदेशिविषयं निरूपयति–'यस्तु' इत्यादि। 'अविद्यमानव्यपदेशः' इति बहुव्रीहिः। इदं स्वरूपकथनं तदभाववद्विशेष्यकतत्प्रकारकबुद्धेरेवातिदेशपदार्थत्वात्। असहाय इत्येव त्वेकशब्दार्थः। सहायश्च सजातीयो द्वितीयः। अत्र च सजातीयमतिदेष्टुमिष्टो यो धर्मस्तदाश्रयत्वेन। एवञ्चातिदिदिक्षितधर्मावच्छिन्नद्वितीयशून्यत्वमसहायत्वमिति फलितम्। यथा 'व्यतिसे' इत्यादौ प्रकृतिप्रत्ययोभयनिरूपितस्य यस्माद्विहितस्तदादितदन्तरूपातिदिदिक्षितधर्मस्याश्रयान्तराभावादसहायत्वं 'से' इत्यस्य। 'हरिषु करोति' इत्यादौ तथाविधधर्माक्रान्तस्य सद्भावात्प्रत्ययः ससहाय इति न तत्रातिदेशप्रवृत्तिः। तत्र ह्यतिदेशे पदत्वेन 'सात्पदाद्योः' (८.३.१०९) इति षत्वनिषेधप्रसङ्गः।

'तेन तुल्यम्' इति। फलितार्थकथनमिदम्, असहाये विशिष्टव्यवहारवतीव कार्याणि कर्तव्यानीति 'सुप्तिङन्तम्' (१.४.१४) इति सूत्रस्थशेखरोक्त एव शब्दोऽर्थः। उपमेये सप्तमीदर्शनेन सप्तम्यन्तादेव वतेरुचितत्वात्। सप्तमी तु 'आद्यन्तवदेकस्मिन्' (१.१.२१) इति सूत्रानुरोधादिति द्रष्टव्यम्। एवञ्च यादृशविशेषणवैकल्यप्रयुक्तो विशिष्टव्यवहाराभावस्तादृशविशेषणस्यारोपः प्रकृतपरिभाषया बोध्यते। तन्मूलकत्वाद्व्यवहारस्यारोपविषयत्वम्। एतावतैवायं व्यपदेशतिदेश इति वृद्धाः। न तु विशिष्टव्यपदेशातिदेशः, गौरवात्।

न चैवं निमित्तातिदेशेन साङ्कर्यम्। यश्च, शास्त्रप्रवृत्तिनिमित्तस्य

कस्यचिद्धर्मस्यातिदेशः स निमित्तातिदेशः। यथा 'काभ्याम्' इत्यत्र 'स्थानिवत्' (१.३.९) सूत्रेणादेशे 'सुपि च' (७.३.१०२) इत्यस्य प्रवृत्त्यर्थमङ्गत्वारोपः। अयन्तु विशिष्टव्यवहारनिमित्तस्यारोपो न ह्याभ्या-मित्यत्राकारगतं चरमत्वविशिष्टमवयवत्वमेवारोप्यमाणं 'सुपि च' (७.३.१०२) इत्यस्य प्रवृत्तौ निमित्तम्। किन्तु परस्परविरुद्धधर्मद्वयघटितमका-रान्तत्वमिति भेदस्य सुवचत्वात्।

यत्तु वदन्ति—अभेदे भेदनिबन्धेन विशिष्टव्यवहारोपपत्त्यर्थमनया परिभाषया भेद एवारोप्यते। विवक्षितविशिष्टव्यवहारप्रयोजकविशेषधर्मः सम्बन्धविधया भासते। ततश्च 'आभ्याम्' इत्यादौ स्वनिष्ठचरमावयवत्व-निरूपितावयवित्वस्य विशेषणतावच्छेदकसम्बन्धविधया सुलभत्वादकारस्या-प्यकारान्तत्वमक्षतम्। 'येन विधिः' (१.१.७२) इत्यस्य लाघवाद्गृह्यमाण-स्याङादिरूपविशेष्यान्वये विशेषणतावच्छेदकसम्बन्धविशेषनियामकत्व-मेव। 'यस्मिन्विधिः' (प. ३३) इत्यस्याप्येवमेव। अत एव 'अभेदे भेदारोपः' इति ग्रन्थकाराः प्रवदन्तीति, तदसत्; स्वस्य स्वनिष्ठविधाना-वधित्वासम्भवेन 'व्यतिसे' इत्यादौ स्ववृत्तिप्रथमावयवत्वनिरूपितावयवित्व-सम्बन्धेन प्रत्ययविधानावधिविशिष्टताया दौर्लभ्येन तिङ्विधानावध्याद्यवयवक-त्वविशिष्टतिङन्तत्वप्रयुक्तपदत्वव्यवहारस्य दुर्घटत्वात्। लोकेऽपि भेदमात्रा-रोपेणाधिकसूर्यपरिस्पन्दाश्रयत्वादिरूपज्येष्ठत्वादीनां सम्बन्धविधया भानं दुर्लभमेव। तस्माद्भेदमूलकविशेषधर्मारोप एवावश्यकः। एवं स्थिते भेदारोप इति प्रवादस्य भेदमूलकविशेषधर्मारोप इत्येवार्थ इति निष्कर्ष इति दिक्।

'अकारस्याप्यदन्तत्वात्' इति। अन्तत्वं 'चरमत्वे सत्यवयवत्वम्' इति सखण्डो धर्मः। अन्तशब्दश्चरमावयववाचीति व्यवहारात्। तत्र चरमत्वं विद्यमानपूर्वकत्वविशिष्टमविद्यमानपरकत्वमिति गोनर्दीयमते चरमत्वावयवत्वयोरानयनार्थमुभौ व्यपदेशिवद्भावौ।

एवमादित्वमपि प्राथम्यविशिष्टमवयवमिति सखण्डो धर्मः, प्राथम्यन्तु विद्यमानपरकत्वविशिष्टमविद्यमानपूर्वकत्वमतस्तत्राप्युभावेव व्यपदेशिवद्-भावौ। अपूर्वानुत्तरलक्षण आद्यन्तभाव इति कात्यायनमते त्वविद्यमानपर-

कत्वमेव, चरमत्वमविद्यमानपूर्वकत्वमेव प्राथम्यमिति तयोरतिदेशमन्तरैव सिद्धत्वादवयवत्वमात्रसाधक एक एव व्यपदेशिवद्भाव इति विवेकः।

'एकस्मिन्नित्युक्तेः' इति। तद्भावे हि यो यद्धर्माभावप्रयुक्तया-दृशव्यवहाराभाववान् स तद्धर्मारोपेण तादृशव्यवहारविशिष्टः कर्तव्य इत्येव परिभाषार्थः सम्पद्येत। ततश्च सभासन्नयने सत्यपि भकाराकारस्य समुदायनिरूपितावयवत्वे यावदज्निरूपितप्राथम्याभावादप्रवर्तमान आदित्व-व्यवहारस्तथाविधप्राथम्यारोपादापद्येत। तथा दरिद्रातेरिकारे चरमत्वारोप-प्रयुक्तोऽन्तत्वव्यवहारो दुर्वारः। एकास्मिन्नित्युक्तौ चातिदिदिक्षितस्य प्राथम्यस्याश्रयः सकाराकारोऽस्तीति न तदारोपेण भकाराकारे समुदायनिरू-पितादित्वव्यवहारो नापि दरिद्रतावाकारस्य चरमत्वाश्रयस्य सत्त्वादिकारे तदारोपप्रयुक्तोऽन्तत्वव्यवहार इत्याशयः।

नन्वारोपस्य कार्यार्थत्वात्फलाभाव एव पूर्वोक्तविषये तादृशारोपस्य प्रतिबन्धक इत्यत आह –

अन्यथा 'सभासन्नयने भवः' इत्यर्थे 'वृद्धाच्छः' (४.२.११४) दरिद्रातेरिवर्णान्तलक्षणोऽञ्च स्यात्। अत एव 'हरिषु' इत्यादौ सोः पदत्वं न। लोकेऽपि बहुपुत्रासत्त्वे एकास्मिन्न ज्येष्ठकनिष्ठत्वाद्व्यवहारः, 'अयं मे ज्येष्ठोऽयं मे कनिष्ठोऽयं मध्यमः' इति। किन्त्वेकपुत्रसत्त्व एव। अनेन चाशास्त्रीयस्याप्यऽतिदेशोऽत एव 'इयाय' इत्यादौ एकाच्त्वनिबन्धनद्वित्वसिद्धिः। अत एव 'भवति' इत्यादौ भू इत्यस्याङ्गत्वम्, 'व्यतिसे' इत्यादौ से इत्यस्य पदत्वम्। 'इरियान्' इत्यादौ कार्यकालपक्षे तद्धितान्तत्व-निबन्धनप्रातिपदिकत्वञ्च सिद्ध्यति। अन्यथा 'यस्माद्विहितस्तदा-दित्वाभावान्न स्यात्।

'अन्यथा' इति। 'वृद्धाच्छः' (४.२.११४) इति। ननु 'वृद्धिर्य-स्याचामादिः' (१.१.७९) इत्यत्र प्रातिपदिकाधिकाराभावाद्यत्किञ्चित्समुदाय-

घटकयावदज्जिनरूपितं भकाराकारगतमादित्वमादाय तदादेर्वृद्धसंज्ञायां 'वृद्धाच्छः' (४.२.११४) इत्यत्र तदन्तविधिना समुदायाच्छप्रत्ययो दुर्वारः। न च 'समासप्रत्ययविधौ' (वा.१२) इति प्रतिषेध इति वाच्यम्। तादृशनिषेयस्य ग्रहणवता प्रातिपदिकेनेत्येतदेकवाक्यतया प्रातिपदिकत्वव्याप्यधर्मावच्छिन्नविषयताकोपस्थितिजनकप्रातिपदिकपरत्वस्य वक्ष्यमाणत्वेन वृद्धत्वस्य प्रातिपदिकत्वव्याप्यत्वाभावात्तदप्रवृत्तेरिति चेत्? न; लक्ष्यानुरोधेन कार्यकालत्वाभ्युपगमाद्वृद्धसंज्ञायाश्च प्रत्ययप्रदेशे वाक्यैकवाक्यत्वेऽपि प्रत्यासत्त्या प्रदेशीयोद्देश्यताक्रान्तस्य प्रातिपदिकस्यैव यत्तच्छब्दाभ्यां परामर्शेनादोषात्। अत एव गहादिषु समानग्रामशब्दपाठोऽपि सार्थकः।

अथ वृद्धसंज्ञायामादिग्रहणादनतिदिष्टमेवादित्वं, तन्निमित्तमित्यभ्युपगमान्नैतादृशेषु वृद्धसंज्ञाप्रसङ्ग इति चेत्? तर्हि 'ज्ञाया अयं ज्ञीयः' इत्यत्रापि तदप्रवृत्तिप्रसङ्गः। प्रत्युत तद्बलादादित्वघटकमवयवत्वमेवानारोपितं विवक्षितं स्यादिति सभासन्नयनाद्दुरुद्धरा तत्प्रवृत्तिर्ज्ञाशब्दाच्च तदप्रवृत्तिरिति महती दुरवस्था। तस्मादतिदेशस्यासहायविषयतायामेव तात्पर्यग्राहकमादिग्रहणमिति युक्तम्।

'इवर्णान्तलक्षणोऽच्' इति। 'अय' इत्यत्र तु भवत्येव प्रत्ययः। तत्र अन्तत्वव्यपदेशहेतोरवयवत्वस्य चरमत्वस्य वा न काश्चिदन्य आश्रय इति व्यपदेशिवद्भावस्य सुवचत्वात्। अतिदेशस्य विशेषविषयत्वमपि धर्मिग्राहकलोकन्यायादेव लभ्यत इत्याह-'लोकेऽपि' इति। 'ज्येष्ठः कनिष्ठो मध्यमः' इति। ज्येष्ठत्वमधिकसूर्यपरिस्पन्दवत्त्वम्, कनिष्ठत्वं न्यूनसूर्यपरिस्पन्दवत्त्वम्, मध्यमत्वं तु तदुभयवत्त्वम्। तथा चेदन्तवच्छिन्ने पुत्रे निरुक्ते ज्येष्ठत्वादीनामतिदेशस्तादृशाभिलापेन बोध्यते। तत्रातिदिश्यमानधर्माक्रान्तस्य पुत्रान्तरस्याप्रसिद्धत्वादसहायविषयत्वं सिद्धमतिदेशस्येति भावः। तदाह - 'किन्त्वेकपुत्रसत्त्वे एव' इति। ननु 'आद्यन्तवदेकस्मिन्' (१.१.२१) इत्यनेन सिद्धे व्यपदेशिवद्वचनं व्यर्थमत आह - 'अनेन च' इति।

'अशास्त्रीयस्यापि' इति । तदन्तत्वं 'येन विधि' (१.१.७२) इत्यनेन बोधितम् । तदादित्वं 'यस्मिन्विधिः' (प. ३३) इत्यनेन भवति । तस्माच्छास्त्रीयम् । एकाच्त्वन्तु न केनापि शास्त्रेण बोधितमित्यशास्त्रीयमित्याशयः ।

'द्वित्वसिद्धिः' इति । तत्तत्प्रत्ययविशेषसमभिव्याहारप्रयुक्तयुगपदारोपितप्रायोगिकानेकावस्थाविशिष्टसमुदायत्वारोपात्सकलप्रयोगसमवेतस्वरूपसमुदायभूत एकोऽयमिण्धातुस्तस्य च लिट्परत्वावस्थावस्थित एकोऽवयवस्तत्र प्राथम्यैकाच्त्वयोरारोपाद्द्वित्वसिद्धिरित्यर्थः । 'प्रातिपदिकत्वच्च' इति । केचित्तु 'इरियान्' इत्यादावानुमानिककथानिवद्भावेन यथोद्देशे प्राक्प्रवृत्तायास्संज्ञाया आरोपेण निर्वाहः । न हि व्यवस्थितयोः पक्षयोरन्यतरपक्षेण लक्ष्ये सिद्धे पक्षान्तरेणनिष्ठापादनं युक्तम् । अतो नेदं फलमित्याहुः ।

अनु अर्थविशिष्टशब्दात्मकस्य धातोरन्यपदार्थतया तदन्तर्भूतस्यार्थसहायविहीनस्याचो वर्तिपदार्थत्वेन विनैवारोपं कैयरोक्तमार्गेणैकाच्त्वस्य सुलभत्वात् 'इयाय' इत्यादेरारोपोदाहरणत्वमयुक्तमित्यतः कैयटोक्तिं खण्डयति —'यत्तु' इत्यादि ।

यत्तु योऽर्थवांस्तत्रार्थस्य त्यागोपादानाभ्यामेकाऽव्यपदेशो यथा–'इयाय' इत्यादौ अर्थवतो धातोरयं वर्णरूप एकोजिति कैयटः, तन्न; तस्य 'एकपदा ऋक्' इत्यत्र भाष्योक्तरीत्या मुख्यव्यवहारसत्त्वात् । 'एकपदा ऋक्' इत्यत्र अर्थेन युक्तो व्यपदेशः इति भाष्ये उक्तम् । ऋक्त्वादेरर्थशब्दोभयवृत्तित्वेन तस्याश्शब्दमात्ररूपं पदमेकोऽवयव इत्यर्थ इति तदाशयः ।

'अर्थस्य त्यागोपादानाभ्याम्' इति । अर्थालिङ्गितशब्दस्तदनालिङ्गितत्वेन विवक्षिताच्छुद्धशब्दाद्भिन्नः 'तस्यापत्यम्' (४.१.९२) इति सूत्रस्थभाष्यसम्मतात् 'विशिष्टं शुद्धादतिरिच्यते' इति न्यायात् विशेषणवद्विशेष्यस्यापि शुद्धस्य विशिष्टान्तर्भावो निर्बाध इत्याशयः, तदाह—'अर्थवतो धातोः'

इति । 'वर्णरूपः' इति । अर्थानालिङ्गितत्वेन विवक्षित इत्यर्थः । अयमपि समुदायसमुदायिभावो गौण एव । अर्थस्य त्यागोपादानाभ्यां परकल्पितत्वेन वैवक्षिकत्वात् । अतो व्यपदेशिवद्भावसाध्य इति कैयटाशयः ।

ननु धात्ववयवस्यैकाचो द्वित्वं न तु धातोरेवैकाचः । अन्यथा 'ददरिद्रौ' इत्यादौ द्वित्वानापत्तेः; ततश्च धातोरेकाचत्वं 'इयाय' इत्यादौ न द्वित्वोपयोगि । शब्दार्थोभयसमूहरूपस्य धातुत्वस्वीकारेण तदन्तभूतस्य अर्थसहायविहीनस्यावयवत्वोपपादनेऽपि तस्यैकाचत्वं दुर्वचम् । अन्यपदार्थस्यार्थविरहितत्वेन वर्तिपदार्थभूतमेकाचं प्रत्यवयवित्वायोगात् । किञ्च तथाविधस्यावयवस्याधिकारबलादपेक्षितं प्राथम्यमप्यतिदेशमन्तरेण दुर्वचम् । तस्मात कथमस्य कैयटस्योक्तिसम्भव इति चेत्; अत्र केचित् – 'लिटि धातोः' (६.१.८) इत्यस्य यत्रानेकाज्घटितधातुविषयकत्वेनोपप्लुते लक्षणे 'प्रथमस्य' इत्यस्य सम्भवो व्यावर्त्यलाभश्च तत्रैव तत्सम्बन्धादवयवषष्ठ्यन्तता 'धातोः' इत्यस्य एकाज्धातुविषयकत्वेनोपप्लुते तु लक्षणे कथञ्चित्प्राथम्यसमर्थने क्लेशो व्यावर्त्यलाभश्चेति तदसम्बन्धेन 'धातोः' इत्यस्यैव कर्मषष्ठ्यन्तत्वम्, 'एकाचः' इति तु सम्भवमात्रेण समानाधिकरणं, 'धातोः' इत्यस्य विशेषणमित्याशयमाहुः ।

'मुख्यव्यवहारसत्त्वात्' इति । 'एकपदा ऋक्' इत्यादेर्व्यपदेशिवद्भावोदाहरणत्वनिराकरणाय ह्यर्थेन युक्तो व्यपदेश इत्युक्तं भाष्ये । ततश्च अर्थस्य त्यागोपादानाभ्यां परिकल्पितः समुदायसमुदायिभावो मुख्य एव न गौण इति 'इयाय' इत्यादेर्व्यपदेशिवद्भावफलत्वप्रतिपादनं भाष्यकृतामसङ्गतं स्यादिति भावः । न च तत्रैकाचत्वव्यवहारस्य उक्तरीत्या मुख्यत्वसम्भवेन व्यपदेशिवद्भावसाध्यत्वेन गौणत्वोपपादनपरं भाष्यमेकदेशिन एवेति कैयटाशय इति वाच्यम् । यथा वा 'शिलापुत्रकस्य शरीरम्' इति व्यपदेशिवद्भावविषयस्यारोपितानेकावस्थामूलकस्य गौणत्वव्यवहारस्य दृष्टान्तत्वसमर्थनपरतदुत्तरकैयटग्रन्थविरोधापत्तेः ।

केचित्तु विशिष्टशुद्धयोः सत्यपि कथञ्चिद्विशेषणप्रयुक्ते भेदे तादृशस्यावयवावयविभावादिरूपसम्बन्धेऽपि शेषनियामकत्वमनुपपन्नम्, तस्य

स्वतस्सिद्धभेदैकसाध्यत्वात्। अन्यथा हि 'घटः,' 'नीलघटः' इत्यादौ षष्ठी-प्रसङ्गः ततश्च अर्थविशिष्टशब्दात्मकस्य धातोरवयवत्वं शब्दस्य व्यपदेशिवद्-भावसाध्यं गौणमेवेति न मुख्यत्वसम्भवः। ऋगादिशब्दानां पाठविशिष्टार्था-भिधायकत्वे, तत्तदर्थमन्त्राभिधायकत्वे वा तत्सम्बन्धित्वं केवलशब्दस्य पाठात्मकस्य मुख्यमेवेति 'नैकपदा ऋक्' इत्यत्रत्यभाष्यविरोध इत्याहुः।

'अर्थशब्दोभयवृत्तित्वेन' इति। ऋगादिशब्दानां तत्तदानुपूर्वीविशेष-विशिष्टशब्दस्वरूपात्मके पाठे तदर्थे चोभयत्र विश्रङ्खला शक्तिः। फलव्या-पारयोर्धातुवत्। समभिव्याहारानुरोधी चान्यतरधर्मिको विशिष्टबोधः। प्रकृते च पाठविशिष्ट एवार्थो ऋगादिशब्दार्थः। एवञ्च परस्परालिङ्गितशब्दार्थो-भयवृत्तित्वमृगादिपदजन्यबोधविषयतावच्छेदकरूपस्य ऋक्त्वादेरिति भावः।

ननु पाठात्मकशब्द एव ऋगादिशब्दानामर्थोऽस्तु। पाठतदर्थोभय-शक्तौ गौरवात्। अत एव 'अणुदित्' (१.१.६९) सूत्रे भाष्ये ऋगित्युक्ते पाठमात्रं गम्यते नास्या अर्थो गम्यत इत्युक्तम्। अर्थभानन्तु क्वचिदभेदोप-चारात्। यथा – 'ऋचमनुसंरन्ति' इत्यादौ। तथा च 'आद्यन्तवत्' (१.१.२१) सूत्रे ऋङ्नामार्थ इत्यादि भाष्यमुपादायाभेदोपचारादृगादिभिः शब्दैरर्थोऽभिधीयत इत्युक्तं कैयटे। वाच्यवाचकभावेन पदादिशब्दप्रतिपाद्य-केवलशब्दसम्बन्धित्वस्य अर्थरूपतापन्नानामृगादीनामव्याहतत्वात् 'एकपदा ऋक्' इत्यत्र भाष्यविरोधोऽपि न। तस्मात्पाठतदर्थोभयशक्तेरनुपयोगो मानाभावश्चेति चेत्? 'एकपदा ऋक्' इत्यादौ प्रसिद्धया प्रतीयमानस्यावयवा-वयविभावस्य निर्वाहाय खलु व्यपदेशिवद्भावोदाहरणत्वमाशङ्क्यार्थेन युक्तो व्यपदेश इत्यादिना समाहितं भाष्ये।

यदि चेदानीमवयवावयविभावो न प्रतीयेत, तर्ह्यसाङ्गत्यमेव समा-नस्य, तत्प्रतीतिश्च विशिष्टबोधनिर्वाहकादुक्तशब्दार्थोभयशक्तेरेवेति तदुप-योगः। प्रकृतभाष्यमेव न तत्र प्रमाणम्। 'ऋङ् नामार्थः' इत्यादौ नाम-शब्दस्य वाचकशब्दपरत्वात्पाठविशिष्टतत्तदर्थ एव ऋगादिशब्दार्थ इति भाष्यार्थः। नास्या अर्थः प्रतीयत इति 'अणुदित्' (१.१.६९) सूत्रस्थ-भाष्यस्य तु अर्थविशेषो न प्रतीयते तन्नियामकस्य शब्दविशेषस्य अनुपादा-

नात्। किन्तु ऋगर्थत्वेन ऋगर्थ इत्येवार्थ इत्याशयात्। अथात्र पक्षे पदशब्दस्य 'सुप्तिङन्तम्' (१.४.१४) इत्यादिना सङ्केतितरूपत्वात्सङ्केतग्राहकेत्यर्थानुपस्थितेः शब्दार्थोभयबोधानौचित्येन 'एकवर्णं पदम्' इत्यत्रानुपपत्तेरेवेति चेत्? न; पदशब्देन पदकारव्यवारप्रसिद्धस्य पृथग्विभज्यमानस्य ग्रहणेनादोषात्। तदेतदभिसन्धायोपसंहरति —

तस्मादेकस्मिंस्तत्तद्धर्मारोपेण युगपद्यथा ज्येष्ठत्वादिव्यवहारो, यथा वा 'शिलापुत्रकस्य शरीरम्' इत्यादावेकस्मिन्नारोपितानेकावस्थाभिः समुदायरूपत्वाद्यारोपेण 'एतस्य शरीरम्' इत्यादिव्यवहारः, तथात्रैकाच्त्वादिव्यवहारोपपत्तिरिति लोकन्यायसिद्धेयम्। न च 'असहाय एवैतत्प्रवृत्तौ भवति' इत्यत्र भूं इत्यस्याङ्गत्वानापत्तिः, ससहायत्वादिति वाच्यम्। शपमादायाङ्गत्वे कार्ये यस्माद्विहितस्तदादित्वे तस्य ससहायत्वाभावात्। लोके विजातीयकन्यादिसत्वेऽपि एकपुत्रस्य तस्मिन्नेवायमेव ज्येष्ठ इत्यादिव्यवहारवत्।

'तस्मात्' इति। 'अवस्थाभिः' इति। सहयोगे तृतीया। प्राणिनिष्ठवयःकृतबाल्याद्यवस्थाविशिष्टशरीरसमुदायत्वाद्यारोपेणेत्यर्थः। असहायपदार्थकतां द्रढयितुं शङ्कते 'न च' इति। 'शपमादाय' इति। अत्र शप्प्रत्ययप्रकृतिनिष्ठप्रथमावयवत्वनिरूपितावयवित्वं ह्यतिदेश्यम्। तद्धर्माक्रान्तस्यान्यस्यासन्निकृष्टत्वादसहायत्वं भूं इत्यस्य। भवशब्दस्तु तिप्रत्ययप्रकृतिनिष्ठतादृशावयवत्वंनिरूपितावयवित्वाक्रान्तत्वाद्विजातीय इति न सहायो भवतीति भावः।

सजातीयस्यैव सहायता लोकसिद्धेत्याह 'लोकेऽपि' इति। ह्रदन्त्वावच्छिन्ने पुत्रे अतिदिदिक्षितं ज्येष्ठत्वादिकं पुत्रत्वघटितम्। पुत्रत्वञ्च जन्यत्वे सति पुंस्त्वम्। कन्यायास्तदनाक्रान्तत्वेन विजातीयत्वादसहायः पुत्र इति लोकदृष्टान्ताभिप्रायः। भाष्यविरोधं परिहर्तुं शङ्कते 'न च' इति। "अपर्यालोचनया' इत्यस्य निरुक्तासहायार्थकत्वापर्यालोचनयेत्यर्थः।

नन्वेवं 'धुक्ष्' इत्यादौ 'उह' इत्यादिना ससहायत्वात्समुदाये धात्ववयवत्वातिदेशानुपपत्तिरिति चेत् ? तर्हि तत्तत्कार्यसमर्पकतासामानाधिकरण्येनैव धात्ववयवत्वादिरूपतत्तद्धर्मो लोकन्यायादतिदिश्यते । प्रकृते च भष्भावरूपकार्यसमर्पकत्वस्य बश्त्वरहिते दुर्लभत्वेन तत्सामानाधिकरण्यविशिष्टस्य अतिदिश्यमानधात्ववयवस्याश्रयान्तराभावादसहाय एव धातुरिति न व्यपदेशिवद्भावानुपपत्तिरित्याशयः । यद्वा धात्ववयवत्वमर्थस्य त्यागोपादानाभ्यामेव धातौ सिद्धमिति न तत्र व्यपदेशिवद्भावोपयोग इत्याशयः ।

नन्वसहाय एव व्यपदेशिवद्भावाभ्युपगमे अर्थवदसहाये मुख्यव्यवहारसद्भावाद्व्यपदेशिवद्भावस्यानुपयुक्तत्वेनानर्थकस्यैव तदुदाहरणतया 'तास्यनुदात्तेत्' (६.१.१८६) इत्यादिष्वनर्थकं वर्णमुपक्रम्यार्थवता व्यपदेशिवद्भावः, न चायमर्थवानित्युक्तिर्भाष्यकाराणामसङ्गता स्यादित्यत आह—

न चैनं निजौ चत्वार एकाच इति भाष्यासङ्गतिः । इकारस्यासहायत्वाभावेन तत्रैकाच्त्वानुपपादनादिति वाच्यम् । एकस्मिन्नित्यस्यापर्यालोचनया तत्प्रवृत्तेः । 'अर्थवता व्यपदेशिवद्भावः' इत्यत्र अर्थवत्पदेनाप्यसहायत्वमुपलक्ष्यते, अर्थबोधकेन शब्देन व्यपदेशिसदृशो भावः कार्ये लभ्यत इति तदर्थः, प्रायेणासहाय एवार्थवत्त्वात् । 'कुरुते' इत्यादौ तशब्दाकारः 'अचामन्त्य' इति व्यवहारे स आदिर्यस्येति व्यवहारे च असहाय एवेति तत्र व्यपदेशिवद्भावेन टिसंज्ञासिद्धिरित्यन्यत्र विस्तरः ।

'अर्थवता' इति । बोध्यबोधकभावो मत्वर्थः । तत्सदृशेनानर्थकेनेत्यर्थः । सादृश्यञ्चासहायत्वेनेत्याशयः । कैयटाभिमते यथाश्रुतार्थे त्वनर्थके दोष एवेति सूचयति—'कुरुते' इत्यादि । 'अचामन्त्यः' इति व्यवहारः कदाचित्प्रकृतिमादाय सम्भवेत्, स आदिरिति व्यवहारस्तु दुर्लभ इत्याशयः । इदन्तु बोध्यम्—यद्धर्मावच्छिन्ने अतिदेशश्चिकीर्षितस्तद्धर्मावच्छिन्ननिरूपितधर्मस्यैवातिदेशः, पूर्वोक्तधर्मिग्राहकदृष्टान्तसाजात्यात् । तेन रामशब्दे सर्वशब्दस्य नातिदेशः । तस्य तन्निरूपितत्वाभावात् । 'दधि, मधु' इत्या-

दावजव्यवहितपूर्वत्वातिदेशेन यणादिप्रसङ्गस्तु न । 'इको यणचि' (६.१.७७) इत्यादौ अज्ग्रहणसामर्थ्येन अनतिदिष्टाच्परत्वस्यैव यणादिप्रवर्तकत्वाभ्युपगमात् । अतो न कोऽपि दोष इत्याहुः ।

केचित्तु परस्परनिरूप्यनिरूपकभावापन्नयोर्विभिन्नाधिष्ठानावस्थितिस्वभावयोर्धर्मयोरेकस्मिन् धूर्मिण्यारोपेणावस्थानमनया परिभाषया बोध्यते । लोकन्यायेनाप्येतावानेवाश्रयणीयोऽर्थः, सामान्ये पक्षपातात् । न त्वसहायपरत्वमतिदेशस्य । तस्मात्परिभाषायामेकग्रहणं संख्यापरमेव । इत्थञ्च स्वस्यैव स्वनिरूपितमवयवत्वमवयवित्वञ्चेति 'इयाय' इत्यादौ द्वित्वं, 'आभ्यां' इत्यादौ दीर्घश्च सिद्धः ।

यद्येवं दरिद्रातेर्विकारस्य स्वनिरूपितमन्तत्वं स्यात् । अस्तु, तत्तु न विशिष्टधातुनिरूपितम् । तन्निरूपितमेव ह्यच्प्रत्ययविधौ उपयोक्ष्यते । समासन्नयने भकाराकारस्य स्वनिरूपितादित्वे सत्यपि तत्तद्विध्युद्देश्यतावच्छेदकसमुदायनिरूपितादित्वस्य दुर्लभतया न वृद्धसंज्ञाप्रयुक्तच्छप्रत्ययादिप्रसङ्गः । 'व्यतिसे' इत्यादौ तु स्वनिष्ठविधानावच्छित्त्वविशिष्टस्वनिरूपितप्रथमावयवत्वस्वावधिकविधानाश्रयत्वविशिष्टस्वनिरूपितचरमावयवत्वस्य चारोपात्परत्वसिद्धिः । 'हरिषु' इत्यादौ प्रत्ययमात्रस्य न पदत्वम्, वृक्षप्रचलनन्यायात्, अस्तु वा तथा न 'सात्पदाद्योः' (८.३.१०९) इत्यस्य प्रसङ्गः । 'दधिसेचौ' इत्यादौ सुबुत्पत्तेः पूर्वं समासे षत्वनिषेधप्रवृत्तये तत्र पदादिरिति पञ्चमीसमासाश्रयणम् । सातिग्रहणेन 'स्वादिषु' (१.४.१७) इति पदत्ववन्निष्ठपदसंज्ञामादाय तन्निषेधाप्रवृत्तेरन्यत्र ज्ञापनाच्च ।

ननु च 'करोषि' इत्यादौ विकरणविशिष्टस्य प्रकृतित्वाभावेन तिङ्प्रत्ययत्वातिदेशस्य तत्र दुर्लभत्वेऽपि 'बिभेषि' इत्यादौ तदतिदेशेन प्रवृत्तेः पदत्वसम्भवादेतन्मते षत्वनिषेधो दुर्वार इति चेत् ? सत्यम्; प्रत्ययत्वस्य कदाचित्प्रकृतिनिरूपितत्वेन सनिरूपकत्वादतिदेशसम्भवेऽपि तिङ्त्वस्य कथमतिदेशस्तस्य तन्निरूपितत्वाभावादिति विभावनीयम् । न चैवमपि 'बिसं मुसलम्' इत्यादौ प्रकृतौ प्रत्ययत्वादेशेन प्रत्ययावयवत्वनिबन्धनं षत्वं दुर्वारमेवेति वाच्यम् । षत्वविधावादेशग्रहणात् 'किसरादिभ्यः'

(४.४.९३) इत्यादिनिर्देशाच्च प्रकृतौ प्रत्ययत्वातिदेशाभावबोधनद्वारा षत्वाभावबोधनेनादोषात्। कथमन्यथा भवन्मतेऽपि प्रत्ययलोपोत्तरं प्रकृतावतिदेष्टव्येन प्रत्ययत्वेन प्राप्तं षत्वं निवर्त्तेत। एवञ्च समुदायसद्भावेऽपीकारस्य स्वनिरूपितावयवत्वनिमित्तकैकाच्त्वव्यवहारे बाधकाभावेन निजौ चत्वार एकाच इति भाष्यं स्वरसत उपपद्यत इति तदेवात्रार्थे प्रमाणम्। एकशब्दस्यासहायार्थकत्वाभावादेव च प्रयोजनविचारोऽपि भाष्यकृता न कृत इति विपश्चितां विचारणीयोऽयमर्थ इत्याहुः।

ननु 'गर्गादिभ्यो यञ्' (४.१.१०५) तदन्तविधिना परमगर्गादिभ्योऽपि स्यादत आह —

३१. ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति।

इयं समासप्रत्ययविधौ प्रतिषेधः, 'उगिद्वर्णग्रहणवर्जम्' (वा. १३) इति वार्तिकस्थप्रत्ययांशानुवादः। अत एवेयं प्रत्ययविधिविषय एव। अत एव 'येन विधिः' (१.१.७२) इति सूत्रे भाष्ये प्रत्ययविधिभिन्ने 'अप्तृन्' (६.४.११) इत्यादौ ग्रह्यमाणप्रातिपदिकेनापि तदन्तविधिप्रतिपादनं 'स्वसा, परमस्वसा' इत्युदाहरणञ्च सङ्गच्छते। अत एव तदन्तविधिसूत्रे भाष्ये 'समासे' इत्यादिनिषेधस्य कथनवदस्य न कथनम्, सोऽपि निषेधो विशिष्य तत्तद्रूपेण गृहीतप्रातिपदिकसूत्र एव। ध्वनितञ्चेदं 'असमासे निष्कादिभ्यः' (५.१.२०) इति सूत्रे भाष्ये। अत्र च ज्ञापके 'सपूर्वाच्च' (५.२.८७) इति सूत्रम्। अन्यथा 'पूर्वादिनिः' (५.२.८६) इत्यत्र तदन्तविधिनैव सिद्धे किं तेन!।

१. यद्यपि प्रकृतव्यपदेशिवद्भावातिव्याप्तिनिवारणार्थाया उत्तरपरिभाषाया इह निरूपणं न्याय्यम्, तथापि तत्र ग्रहणवत्पदसम्बन्धसूचनार्थमिहास्याः

परिभाषाया उल्लेखः । तत्फलन्तूत्तरपरिभाषाशेषे मूल एव स्फुटीभविष्यति । 'अनुवादः' इति । अपूर्वत्वे गौरवं स्पष्टमेव । अत एव 'वनो र च' (४.१.७) इत्यत्र तदन्तविधिद्वयं सिद्धम् । अन्यथा तस्य सिद्धान्ते रादेशमात्रविधायकतया प्रत्ययविधित्वाभावेन 'समासप्रत्यय' (वा. १२) इत्यादिनिषेधाप्रवृत्तावप्यनया द्वितीयतदन्तविधिनिषेधो दुर्वारः । तदनुवादत्वाच्चात्र प्रत्ययविधावित्यस्याध्याहारः, वार्तिके च प्रातिपदिकेनेत्यस्य । समासविधावित्यस्य तु नायमनुवादः । धर्मिग्राहकवैजात्यात् । 'आख्यातमाख्यातेन क्रियासातत्ये' (ग. सू. २०) इत्यत्र प्रातिपदिकग्रहणाभावेन तिङन्तान्तेन समर्थेन समासप्रसङ्गाच्च । आद्यस्यात एवेत्यस्यानुवादत्वादेवेत्यर्थो द्वितीयस्य तु प्रत्ययविधिविषयत्वादेवेत्यर्थः ।

अनुवादफलं दर्शयति – 'सोऽपि' इति । 'तत्तद्रूपेण' इति । प्रातिपदिकत्वव्याप्यधर्मपुरस्कारेणेत्यर्थः । 'गृहीतप्रातिपदिकसूत्र एव' इति । बहुव्रीहिगर्भकर्मधारयः । प्रातिपदिकमात्रग्रहणेन तदन्तविधिर्नेत्यत्र 'तात्पर्यम् । एतत्फलं 'टिड्ढाणञ्' (४.१.१५) इति सूत्रे टिद्विषये तदन्तविधिनिषेधकतया वार्तिकाप्रवृत्तिः । न चैवं तत्रोपसर्जनानुसर्जनसाधारण्येन तदन्तविधावुपसर्जनांशे तन्निषेधायानुपसर्जनादित्यस्यावश्यकत्वेन तदन्तविधिज्ञापनपरभाष्यासङ्गतिरिति वाच्यम् । तावन्मात्रफलकत्वेऽनुपसर्जटिदिति समस्तपाठेनैव निर्वाहे व्यस्तपाठो ज्ञापक इत्याशयात् ।

यदि तु अनुपसर्जनाधिकारेण ज्ञापिततदन्तविधिनैव तत्र निर्वाह इत्युच्यते, तर्हि उगिद्वर्णविषये निषेधाप्रवृत्तेरुगिद्वर्णपर्युदासस्यापूर्वत्वाभावः फलम् । किञ्च वासुदेववाचकादकाराद्विहितमिन्नमादाय 'यञिञोश्च' (४.१.१०१) इत्यत्र इञः प्रत्ययमात्रग्राहकत्वाभावेन प्रत्ययग्रहणपरिभाषालभ्यतदन्तांशस्य प्रसक्त्यभावेऽपि प्रातिपदिकमात्रबोधकत्वाभावेन प्रकृतनिषेधाप्रवृत्त्या 'येन विधिः' (१.१.७२) इत्यनेन तदन्तविधिः प्रयोजनमित्याहुः ।

ननु प्रमाणवैकल्यादयुक्त एवायमर्थ इत्यत आह—'ध्वनितम्' इति । 'भाष्ये' इति । तत्र हि असमासग्रहणप्रयोजनप्रस्तावे ठगिविधिघटकपर्युदा-

सवर्णलुब्धान् गोपुच्छादीनाश्रित्य 'प्राग्वतेष्ठञ्' (५.१.१९) इत्यत्र तदन्तविधौ परमनिष्कशब्दाट्ठञ्सिद्धि फलत्वेन प्रदर्श्य 'ग्रहणवता' (प. ३१) इति निषेधस्तु न विशिष्य प्रवृत्त्यनिर्देशादित्युक्तम्। यदि 'समासप्रत्ययविधौ' (वा. १२) इत्यस्य साधारणता, तदा तेन निषेधस्य दुर्वारतया तदविषयताऽपि वक्तुमुचिता। तदनभिधानाच्चोभयोस्तुल्यविषयता सूचितेति भावः। अथ 'समासप्रत्ययविधौ' (वा. १२) इत्यस्य प्रकृतपरिभाषैकविषयतायां 'इजादेश्च गुरुमतोऽनृच्छः' (३.१.३६) इत्यत्रेजादित्वस्य प्रातिपदिकाप्रातिपदिकसाधारणतया निषेधाप्रवृत्तेरिजाद्यन्तादपि धातोराम्प्रत्ययप्रसङ्गः। तथा 'नौद्व्यचः' (४.४.७) इत्यत्र तदन्तविधिना द्व्यच्कान्ताद्बह्वचोऽपि ठन्प्रत्ययप्रसङ्ग इति चेत्? न; 'इजादेः' (३.१.३६) इत्यत्र 'इर्ज्वतः' इति सिद्धावादिग्रहणेन 'नौद्व्यचः' (४.४.७) इत्यत्र 'अनेकाचः' इत्येव सिद्धे द्व्यच्ग्रहणेन च तदस्तविध्यभाव इत्याशयात्।

केचित्तु—वार्तिकपरिभाषयोरनयोरेकविषयतायां डतरडतमयोः सर्वनामसंज्ञाविधाने सामर्थ्यात् 'संज्ञाविधौ' (प. २७) इति परिभाषाबाध इत्यनुपपन्नम्। 'किं सर्वनामबहुभ्यः' (५.३.२) इत्यत्र तन्निषेधाप्रवृत्त्या तदन्तविधिना 'कतरत्र' इत्यादिरूपसम्पादनेन चारितार्थ्यात्। तथा 'बहुगण' (१.१.२३) इति सूत्रेण संख्यासंज्ञाविधाने डतिप्रत्यये तदन्तग्रहणं सामर्थ्यादित्यप्ययुक्तम्। 'संख्याया विधार्थे' (५.३.४२) प्रदेशे तदन्तविधिना 'कतिथा' इति रूपसम्पादनेन कृतार्थत्वात्। एवञ्च 'कतरेषां' 'कति' इत्यादीनामसिद्धिः। तस्मादत्र गत्यन्तरमन्वेषणीयमित्याहुः। परिभाषाभ्युपगमे प्रमाणमाह—'अत्र च ज्ञापकम्' इति। 'संपूर्वाच्च' इति।

यत्तु केवलात्तदन्ताच्च सामान्यतः प्राप्तस्येन्प्रत्ययस्य नियमेन केवलान्मा भूदित्येवमर्थं सार्थकमिति कथं ज्ञापकत्वमित्याहुः; तदसत्; वचनाज्ञापनेन विधायकतामपेक्ष्य नियामकत्वे लाघवाभावात्। किञ्च नियमेन साक्षाद्विधिबाधकल्पनापेक्षया वचनज्ञापनेन गुणशास्त्रबाधकल्पनमेवोचितमिति दिक्।

नन्वेवं 'सूत्रान्तात् ठक्' (४.२.६०) 'दशान्ताड्डः' (५.२.

४५) 'एकगोपूर्वात्' (५.२.११८) इत्यादेः केवलसूत्रशब्दं-दशन्शब्दैकशब्दादिष्वपि प्रवृत्तिर्न्यशिवद्भावात्स्यादत आह —

३२. व्यपदेशिवद्भावोऽप्रातिपदिकेन ।

'पूर्वात्सपूर्वादिनिः' (५.२.८६) इत्येकयोग एव कर्तव्ये पृथग्योग-करणमस्या ज्ञापकम् । न च 'इष्टादिभ्यः' (५.२.८८) इति सूत्रे अनुवृत्त्यर्थं तथा पाठोऽत एव 'अनिष्टि' इत्यादिसिद्धिरिति वाच्यम् । ज्ञापकपरभाष्यप्रामाण्येन 'अनिष्टि' इत्यादिप्रयोगाणा-मनिष्टत्वात् । एकयोगेऽपि तावत उत्तरत्रानुवृत्तौ बाधकाभावाच्च । अत एव 'नान्तादसंख्यादेः' (५.२.४९) इति चरितार्थम् ।

'पृथग्योगकरणम्' इति । चकारस्तु प्रत्याख्यातचकारसमूहान्तर्भूत एवेति भावः । 'ज्ञापकपरभाष्यप्रामाण्यात्' इति । अत्र 'येन विधिः' (१.१.७२) इति सूत्रस्थेत्यादिः । 'अनिष्टत्वात्' इति । नन्वेकयोगनिर्दिष्टा-नामेकदेशोऽप्यनुवर्तत इति परिभाषया योगविभागमन्तरेव तदनुवृत्तेः सौलभ्या-त्परिभाषाज्ञापनमनुवृत्तिश्चेत्युभयमपि पृथग्योगकरणेन सिद्धयतीत्यनिष्टीत्या-दीनामनभिधाने मानाभाव इत्याशयेनाह – 'एकयोगे' इति । 'अत एव' इत्यस्य परिभाषाङ्गीकारादेवेत्यर्थः । 'चरितार्थम्' इति । नन्वस्याः परि-भाषायाः प्रत्ययविधिविषयत्वस्य वक्ष्यमाणत्वान्नान्तादसंख्यादेरित्यस्याग-मविधित्वाच्च कथं चारितार्थ्यप्रतिपादनम् । न च मद् प्रत्यय एवास्तु. एवञ्च 'पञ्चमः' इत्यादौ लोपवारणाय टिलोपसूत्रे भाधिकाराश्रयणक्लेशोऽपि नेत्यपरमनुकूलमिति वाच्यम् । अत्र विच्छिन्नत्वात् । 'षट् कति' इत्यत्रा ङटः सम्बन्धाभावे धुकोऽपि प्रत्ययत्वापत्तेः । न च तत्रापि षट् इत्येवास्तु ततश्च वृद्धयभावो ङीप् च निर्बाध इति वाच्यम् । जश्त्वे 'न पदान्तात्' (८.४.४२) इति निषेधेनानिष्टप्रसङ्गात् । तस्मादयुक्तमेवेदं पूर्वापरविरोधा-दिति चेत् ? न; वक्ष्यमाणग्रन्थे प्रत्ययविधिशब्देन प्रत्ययाधिकारीयविधि-

विवक्षणेनादोषात्। अत एव 'सर्वादेस्सादेश्च' इति लुक् 'सर्वानधीते सार्वः' इत्यत्र व्यपदेशिवद्भावेन न भवति।

अन्यथा 'पञ्चमः' इत्यादावपि व्यपदेशिवद्भावेन संख्यादित्वात्तद्वैयर्थ्यं स्पष्टमेव। इयं प्रातिपदिकग्रहणे एव, न तु प्रातिपदिकाप्रातिपदिकग्रहणे। तेन 'उगितश्च' (४.१.६) इत्यत्र न दोष इति तत्रैव भाष्ये स्पष्टम्। इयं 'ग्रहणवता' (प. ३१) इति च परिभाषा प्रत्ययविधिविषयेवेति 'असमासे निष्कादिभ्यः' (५.१.२०) इति सूत्रे भाष्यकैयटयोः। तेन 'अहन्' इत्यादेः केवलाहन्शब्दे 'परमाहन्'शब्दे च प्रवृत्तिरित्यन्यत्र विस्तरः।

'प्रातिपदिकग्रहण एव' इति। अत्रापि ग्रहणवत्पदसम्बन्धादित्याशयः। 'न दोषः' इति। प्रातिपदिकमात्रग्रहणाभावादेवात्र पूर्वपरिभाषाया अप्रवृत्त्या तदन्तविधौ उगिदन्तादित्यर्थेऽपि प्रकृतपरिभाषाया अप्रवृत्तेः 'इयती', 'भवती' इत्यादौ ङीबप्रवृत्तिरूपो दोषो नेत्यर्थः। 'तत्रैव सूत्रे' इति। 'येन विधिः' (१.१.७२) इति सूत्रे इत्यर्थः। 'भाष्यकैयटयोः' इति। भाष्ये आर्हादगोपुच्छसंख्या' (५.१.१९) इत्यत्र प्रतिषिध्यमानेषु गोपुच्छादिषु 'ग्रहणवता' (प. ३१) इत्यनेन निषिद्धस्य तदन्तविधेः पुनः प्राप्तस्यासमास-ग्रहणप्रयोजनमित्यभिधाय विधौ स निषेधः प्रतिषेधश्चायमिति प्रयोजनं प्रत्याख्यातम्। कैयटेन चात एव व्यपदेशिवद्भावप्रतिषेधोऽपि नेत्युक्तम्। एवञ्च धर्मिग्राहकसाजात्यसिद्धमनयोः प्रत्ययविधिविषयत्वं सप्रमाणमिति भावः।

अत्र केचित् – यत्र सूत्रे गृह्यमाणातिरिक्तग्राहकान्तादिशब्दोपादानं तत्रैव निषेधः प्रकृतपरिभाषया बोध्यते ज्ञापकसाजात्यादित्यवश्यमभ्युपेयम्। अत एव 'ग्रोणी' (४.२.७९) इति सूत्रेण विधीयमानस्याञ्प्रत्ययस्य केवलादपि प्रवृत्तिः। ननु तदन्तविधिरेव दुर्लभः 'ग्रहणवता' (प. ३१) इति निषेधात्। न च सापि परिभाषा सूत्रोपात्तान्तादिशब्दविषयैव इति वाच्यम्। 'गर्गादिभ्यो यञ्' (४.१.१०५) इत्यादौ कथञ्चिदादिशब्दघटितत्वेन

तदन्तविधिनिषेधसम्भवेऽपि 'ढक् च मण्डूकात्' (४.१.११९) इत्यादौ सुतरां तदघटितत्वेन निषेधाप्रवृत्तिप्रसङ्गादिति चेत्? न; 'येन विधिः' (१.१.७२) इति सूत्रस्थभाष्यकृता 'रोणी' (४.२.७८) इत्यत्र वाचनिक-तदन्तविधेरभ्युपगमात्। एवं रथसीताहलेभ्यो यद्विधावभीष्टेन तदन्तविधिना रथाद्यन्ताज्जायमानस्य यत्प्रत्ययस्य केवलादपि प्रवृत्तिः फलम्। स्पष्टमिदं 'येन विधिः' (१.१.७२) इत्यत्र कैयटे। तथा च 'असमासे निष्कादिभ्यः' (५.१.२०) इति सूत्रे कैयटे प्रतिषिध्यमानेषु गोपुच्छादिषु अन्तादिशब्द-घटितत्वाभावादेव प्रकृतपरिभाषाया अप्रवृत्तौ विधित्वाभादप्रवृत्तिरिति यदुक्तं तदेतद्विरोधाच्चिन्त्यमेवेति तदवलम्बप्रयुक्तमस्याः प्रत्ययविधिविषयताकल्पनं चिन्त्यम्।

किञ्च तद्रीत्या प्रकृतपरिभाषायाः प्रत्ययविधिविषयत्वे 'आर्हात्' (५.१.१९) इति सूत्रे गोपुच्छादय इव 'नान्तादसंख्यादेः' (५.२.४९) इत्यत्र संख्यादिरपि प्रतिषिध्यत एवेति परिभाषाप्रवृत्त्ययोगात्कथं 'अत एव' इत्यादिस्वकीयग्रन्थः सङ्गच्छेत। अन्तादिशब्दानाञ्चतिदिदिक्षितधर्मोपस्था-पकानामेव विवक्षणात् 'न षट्स्वस्रादिभ्यः' (४.१.१०) इत्यनेन केवलेभ्यः स्वस्रादिभ्यो निषेधस्सिद्धः। 'पालकान्तान्न' (वा. ४.१.१८) इति निषेध-स्त्वन्तग्रहणबलात्केवलान्नेति सर्वमनवद्यमित्याहुः।

ननु 'वान्तो यि' (६.१.७९) इत्यादौ यादौ प्रत्यय इत्यर्थः कथम्? अत आह —

३३. यस्मिन्विधिस्तदादावल्ग्रहणे।

तदन्तविधेरपवाद इयम्। वाचनिक्येषा 'येन विधिः' (१.१.७२) इत्यत्र भाष्ये पठिता। अस्याश्च स्वरूपसती सप्तमी निमित्तम्। अत एव 'नेड्वशि कृति' (७.२.८) इत्यादौ वशादेः कृत इत्यर्थलाभः। इयञ्च 'आर्धधातुकस्य' (७.२.३५) इति सूत्रे वलादेरित्यादिग्रहणसामर्थ्याद्विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्वे

एव प्रवर्तते । तेन 'ङस्सि धुट्' (८.३.२९) इत्यादौ सादेः पदस्य इति नार्थः । 'तीषसह' (७.२.४८) इत्यत्र 'सेऽसिचि' [७.४.५७] इत्यादौ यथा तादेरित्यर्थलाभः, तथा शब्देन्दुशेखरे निरूपितम् ।

'यादौ प्रत्यये इत्यर्थः कथम्' इति । यान्ते इत्यर्थापत्तिरिति नोक्तम् । तादृशप्रत्ययासम्भवात् । न च 'गोमयमत्ति' 'गोमयात् तमाख्यायात्' गोमय्यात्' इत्यत्राज्झलादेशत्वेन स्थानिवत्त्वाप्रवृत्तेस्तत्सम्भव इति वाच्यम् । बहिरङ्गपरिभाषया तस्यापि यान्तत्वायोगात् । 'अपवाद इयम्' इति । एतेनास्याः परिभाषायाः सन्दर्भो विशेषणे एव प्रवृत्तावुपाये 'उत्सर्ग सामान्यदेशा अपवादाः' इति न्याय इत्यपि सूचितम् ।

ननु कथमपवादत्वं 'वान्तो यि' (६.१.७९) इत्यत्र तदन्तविधेरसम्भवेन तदादिविधेः सावकाशत्वादिति चेत् ? न; उत्सर्गप्राप्तियोग्यताविरहविशिष्टलक्ष्यवत्त्वं ह्यपवादशास्त्रस्य सावकाशत्वम् । प्रकृते च यान्तप्रत्ययपरकाकाराद्यात्मकलक्ष्यासम्भवप्रयुक्तं तदन्तविधेरनुपयुक्तत्वम् ; न हि तावता तदन्तविधिप्राप्तियोग्यताया अभावः । किञ्च तावन्मात्रफलत्वे यकारग्रहणेनैव सिद्धे प्रत्याहारग्रहणं व्यर्थमतो निरवकाशत्वमेवेत्याशयात् । परिभाषायामल्ग्रहण इति करणल्युडन्तेन षष्ठीतत्पुरुषः । यच्छब्दस्तु बुद्धिस्थपरामर्शकतया सप्तम्यन्तबोधकः । सप्तमी तु तत्रैव तात्पर्यग्राहिका । एवञ्च अल्बोधके सप्तम्यन्ते सति प्रत्यासत्त्या तत्करणको यो विधिः स तदादौ बोध्य इत्यर्थः । एवञ्च 'वान्तो यि' (६.१.७९) इत्यत्र तदन्तविधेरसम्भवेऽपि 'इदृद्धौ' (६.३.२८) इत्यादाविव मत्वर्थलक्षणया यकारवति प्रत्यय इत्यर्थे या काम्यजादावतिप्रसक्तिस्तद्वारणमस्याः परिभाषायाः फलम् । 'अल्ग्रहणे' इति तु 'प्रियवशे वदः खच्' (३.१.१०६) इत्यादौ प्रियादीनामुपपदविशेषणानां तदादिविधिवारणाय ।

'वाचनिकी' इति । 'कोः कत्तत्पुरुषेऽचि' (६.३.१०३) इत्येव सिद्धे 'रथवदयोश्च' (६.३.१०२), इति सूत्रमस्यां ज्ञापकम् । अन्यथा 'कोः कत्' (६.३.१०३) इत्यत्र तदन्तविधिनाऽजन्त उत्तरपद इत्यर्थे रथशब्दवदशब्दयोरप्यजन्तत्वाविशेषात्तद्वैयर्थ्यं स्पष्टमेव ।

न च रथवदशब्दाभ्यामाचारकिबन्ताभ्यां कर्तृकिपि अतोलोपोत्तरमजन्तत्वाभावेनाप्राप्तस्य कदादेशस्य सिद्धये तत्सूत्रमावश्यकमिति वाच्यम् । स्थानिवद्भावेन तत्राजन्तताया: सुलभत्वात् । 'कौ लुप्तम्' इति तु किनिमित्तकविधाविवेति स्पष्टमाकार इति चेत् ? न; तत्सूत्रबलादुक्तवचनकल्पनामपेक्ष्याज्ग्रहणस्य श्रूयमाणाजन्तपरत्वकल्पनायां लाघवेनोपदर्शितस्थले कदादेशसिद्धये सूत्रसार्थक्यसम्भवात् । 'आद्यन्तवदेकस्मिन्' (१.१.२१) इत्यत्र तदाद्यंशस्य अङ्गसंज्ञापदसंज्ञयोस्सार्थक्यम् । एवञ्च ज्ञापकाभावाद्वाचनिकत्वमेव तदादिविधेरिति भाव: ।

'स्वरूपसती' इति । अर्थविशेषानाश्रिता सप्तमी श्रुतिरस्या: परिभाषाया लिङ्गम् । तत्श्च यदि कदाचिदर्थान्तराभिधायिनी सप्तमी तथापि प्रवर्तत एवैषा परिभाषेत्याशय: । 'सामर्थ्यात्' इति । नन्वादिग्रहणाभावे वलीत्युक्तौ 'आर्धधातुकस्य' (७.२.३५) इत्यनेन विविभक्तितया सामानाधिकरण्यायोगान्निर्दिष्टपरिभाषया पूर्वत्वाव्यवहितत्वांशयोरुपस्थापने तयो: प्रधानान्वयस्य न्याय्यत्वाद्वल्वर्णाव्यवहितपूर्वस्य आर्धधातुकस्येडागम इत्यर्थे 'भविता' इत्यादौ तदप्रवृत्तिप्रसङ्ग इति चेत् ? न ; नेड्वशि' (७.२.८) इति निषेधात् 'शमिता' 'यज्ञ:' इति निर्देशाच्च 'गुण: कृतात्मसंस्कार:' इति न्यायावलम्बेनाङ्गविशेषणतया तदन्वयबोधने क्षत्याभावात् ।

किञ्च तदादिप्रवृत्तिप्रयोजकसामानाधिकरण्योपायतया 'वलि' इति

सप्तम्या अपि षष्ठ्यर्थत्वेन निर्दिष्टपरिभाषाप्रवृत्तिहेतोरौपश्लेषिकाधिकरण-रूपार्थस्य वैकल्यादेव न तत्परिभाषोपस्थितिप्रयुक्तो विरुद्धान्वयं इत्याहुः ।

'सादेः पदस्य इति नार्थः' इति । ननु सान्तस्य पदस्येत्यर्थवारणाय विपरीतविशेषणविशेष्यभावस्यावश्यकतया तत एव तदादिविधेरप्रवृत्त्या विशेषणविशेष्ययोः सप्तम्यन्ततानियमस्य नेदं फलमिति चेत् ? सत्यम् ; नात्र तदन्तविधिनिवारणार्थो विशेषणविशेष्यभावव्यत्यासः । किन्तु 'श्चुत्वं धुटि सिद्धं वाच्यम्' इति वार्तिकबलात्तदन्तविधेरुक्तनियमात्तदादिविधेश्चा-प्रवृत्तौ गत्यन्तराभावादाश्रीयते तथाविधव्यत्यासो वैयधिकरण्यञ्च । एवं प्रकृत-नियमाधीन एव तत्र पदावयवस्य सस्येत्यर्थलाभ इति विभावनीयम् । तदादि-विधिप्रवृत्तौ च 'षट्त्सु' इत्यादौ धुडनापत्तिर्दोष इति दिक् ।

'निरूपितम्' इति । सौत्रत्वादनुवृत्तबलादेरित्येतद्विशेषणीभूतबलपदा-र्थस्य तकारेण विशेषणात्तकाररूपबलादेरित्यक्षरार्थः । एवं 'सेऽसिचि' (७.२.५७) इत्यादावपि 'सप्तमी तु प्रथमार्थे एव' इति 'तीषसह' (७.२. ४८) इति सूत्रे उक्तमित्यर्थः । तकारपरकेच्छब्दादेः परस्य बलादेरिति तु नार्थः । यतः स्वान्वययोग्यविशेष्यवाचकपदान्तरसमभिव्याहृतस्याल्बोधक-सप्तम्यन्तस्य प्रकृतपरिभाषारम्भबलेन विशेषणमात्रापरत्वमेव, न तु स्वा-तन्त्र्येण परसप्तम्यन्तत्वमित्यपि नियमः स्वीक्रियत इत्यभिमानः । अत्रेदमव-धेयम्—यदि विशेषणविशेष्ययोरुभयोरपि सप्तम्यन्तत्वमिति नियमस्तदा 'हुझल्भ्यः' (६.४.१०१) इतिसूत्रस्थभाष्यविरोधः । तत्र हि 'वसि भसोर्हलि च' (६.४.१००) इति सूत्रादनुवृत्तस्य 'हलि' इति सप्तम्यन्तस्य हेः इति षष्ठ्यन्तविशेषणतामदायानया परिभाषया तदादिविधिरुक्तः ।

यदि च विशेष्यवाचकपदसमभिव्याहृतस्यापि अल्बोधकसप्तम्यन्तस्य विशेषणमत्रबोधकत्वनियममपहाय 'हलि' इत्यस्य परसप्तम्यन्ततामाश्रित्य हल्प-रकाज्झलान्तात्परस्य 'हेः' इति सम्बन्धे 'हलादेर्हेः' इत्यर्थः फलतीति

भाष्यमुपवर्ण्यते, तर्हि 'आर्धधातुकस्येड्' (७.२.३५) इत्यत्र 'वलि' इत्युक्तावपि परसप्तम्यन्तत्वाल्लविशेषणत्वाभ्यां विनैवादिग्रहणमभीष्टसिद्धेः स्वांशे चारितार्थ्यलाभाद्विशेषणविशेष्ययोः सप्तम्यन्ततानियमज्ञानस्यैव विरोधः। तस्मादयुक्त एवायं नियमः।

किन्तु 'कारनाम्नि च प्राचां हलादौ' (६.३.१०) 'तादौ च निति कृत्यतौ' (६.२.९०) इत्यादावादिग्रहणेनाल्बोधकसप्तम्यन्तस्य समभिव्याहृतसमानाधिकरणभावो न सार्वत्रिक इति ज्ञाप्यते। तेन 'ङस्सि घुट्' (८.३.२९) इत्यादौ वैयधिकरण्यलाभः। 'आर्धधातुकस्येड्' (७.२.३५) इत्यत्रादिग्रहणन्तु 'वलि' इत्यस्य परसप्तम्यन्ततायां श्रुतसम्बन्धस्य बलीयस्त्वादार्धधातुकविशेषणत्वेन प्राप्तानिष्टवारणार्थमेव स्पष्टार्थमित्याहुः।"

अथैतस्याः परिभाषयाः फलाभावः। 'वान्तो यि प्रत्यये' (६.१.७९) इत्यादौ 'वृक्षे शाखा' इति वद्ववयविन एवाधारत्वविवक्षया प्रत्यये यो यकारस्तत्परकयोरोदौतोरित्येव सम्बन्धेन प्रत्ययो यकारादिरेवेत्येवं रीत्यैव काम्यजादावतिप्रसङ्गभङ्गात्। 'अमि पूर्वः' (६.१.१०७) इत्यादावावश्यकश्चार्थः। अन्यथा 'पूर्वपरयोः' इत्यधिकारघटकपरशब्देन सर्वनाम्ना प्रधानीभूतस्यामादेरेव परामर्शेन पूर्वरूपादेशेन मकारादेरपि निवृत्तिप्रसङ्गः॥ न च परशब्दबोधितमम्प्रत्ययादिगतं स्थानित्वं 'आदेः परस्य' (१.१.५४) इत्यनेनाद्यक्षरे परिसमाप्यत इति वाच्यम्। यत्र परस्यैव कार्यं तत्रैव 'आदेः परस्य' (१.१.५४) इत्येतत्प्रवृत्तेरभीष्टत्वात्। अन्यथा 'ओमाङोश्च' (६.१.९५) इति पररूपादेशोऽपि 'शिवायोम्' इत्यादौ 'ओम्' इत्यादावोकारपर्यन्तस्यैव स्यादिति सर्वथा मकारद्वयश्रवणापत्तिः।

यदि तत्र 'आदेः परस्य' (१.१.५४) इत्यस्य 'अनेकाल्' (१.१.५५) इत्यनेन परत्वाद्बाधनान्न दोष इत्युच्यते, तर्हि शिवायतेः क्विपि नपुंसके सम्बुद्ध्यन्तस्य हे शिवेत्यस्य ओमा पररूपे पूर्वान्तवद्भावेन धातुत्वात् 'मो नो धातोः' (८.२.६४) इति नत्वप्रसङ्गः। न च 'वान्तो यि' (६.१.७९) इत्यत्र तदादिविध्यभावे 'गोगोयुगम्' इत्यत्र गोयुगन्तप्रत्ययः

सम्बन्धिन ओकारस्य तदीययकाराव्यवहितपूर्वत्वमादाय वान्तादेशप्रसङ्ग इति वाच्यम्। प्रत्यये ओकारोच्चारणमहिम्नैव तत्र वान्तादेशनिवृत्तिसम्भवात्।

न च 'गोत्रेऽलुगचि' (४.१.८९) इत्यत्र तदादिविध्यभावे प्राग्दीव्यतीयप्रत्ययस्याञ्चिषये गोत्रप्रत्ययस्य अलुगित्यर्थेनाञ्चवत्प्राग्दीव्यतीयप्रत्ययविवक्षायामित्यर्थस्यैव पर्यवसन्नतया 'गर्गरूप्यम्' इत्यत्र हलादावपि तत्प्रसङ्ग इति वाच्यम्। प्राग्दीव्यतीयप्रत्ययघटकत्वत्वरमावयवत्वायोरव्यभिचरितत्वेनाञ्चग्रहणसाध्यत्तादृशप्रत्ययादिभूतस्यैवाचो ग्रहणमित्यभ्युपगमेनादोषात्। प्राग्दीव्यतीयप्रत्ययघटकाञ्चर्णे परत्वेन विवक्षिते इत्यर्थेन वा न दोषः। न च 'तृणह इम्' (७.३.९२) इत्यत्र 'हलादिर्पिति सार्वधातुक' इति तदादिविध्याभावे तादृशसार्वधातुकस्थे हलीत्युक्तावतृणेडित्यत्रान्तरङ्गत्वाद्धल्ङ्यादिलोपे प्राधान्येन वर्णाश्रयत्वात्प्रत्ययलक्षणाप्रवृत्तेरिमागागमानापत्तिरिति वाच्यम्। प्रतिपदविधित्वेनेमागमस्याप्यन्तरङ्गतया परत्वेन निर्वाहात्। हल्ङ्यादिलोपः शब्दान्तरात्प्राप्त्या न नित्यः।

यद्वा प्रत्ययलक्षणसूत्रस्य नियामकत्वमभ्युपगच्छतो भगवतो भाष्यकारस्य सरणिमनुसृत्य 'हलि' इत्यस्यानुवृत्तिं विहाय 'नाभ्यस्तस्य (७.३.८७) इति सूत्रात् 'अचि न' इत्यनुवर्त्य सामान्यतो विहितस्येमागमस्याचि निषेधाभ्युपगमाददोषः।

न च 'ङमो ह्रस्वात्' (८.३.३२) इत्यस्य ङमन्तपदात्परस्य पदस्यस्याचो 'ङमुट्' इत्यर्थे 'परमदण्डिनौ' इत्यादौ उत्तरपदस्य कार्यित्वाभावेन प्रत्ययलक्षणनिषेधाप्रवृत्तेरन्तर्वर्तिनीं विभक्तिमाश्रित्य उत्तरखण्डस्य पदत्वादौकारस्य च विशिष्टसमुदायमादाय पदस्यत्वाच्च प्राप्तस्य ङमुटो वारणाय तदादिविधिसम्पादकतया परिभाषेयमावश्यकीति वाच्यम्। अच्परकङमन्तपदात्परस्य पदस्य पदपरकङमन्तपदात्परस्याचो वा ङमुडित्यर्थेनादोषात्।

न च 'मिदेर्गुणः' (७.३.८२) इत्यादौ 'शिति' इत्यस्य लिङात्मनेपदैकवचने दोषवारणाय कर्मधारयत्वाङ्गीकारे तदादिविधिसम्पादनार्थमियमा-

वश्यकी परिभाषा । न हि तत्र प्रत्ययघटकेत्संज्ञकशकार इत्यर्थः सम्भवति । अनुबन्धविनिर्मुक्तस्यैव प्रत्ययसंज्ञोद्देश्यतया शकारस्येत्संज्ञाविशिष्टस्य तद्घटकत्वायोगात् । प्रत्ययस्येत्संज्ञकशकारादित्वन्तु भूतपूर्वगत्या सुलभमिति वाच्यम् । अनुबन्धानामेकान्ततावादे सिद्धान्ते 'तस्य लोपः' (१.३.९) इति लोपवशादनुमानिकेन स्थानिवद्भावेन 'सानुबन्धकानां निरनुबन्धका आदेशाः' इत्यभ्युपगमादनुबन्धकार्येषु 'अनल्विधौ' (१.१.५६) इति प्रतिषेधाभावेन प्रत्यये स्थानिवत्त्वेनेत्संज्ञकशकारादित्वमिव-तदादिविध्यभावेऽपीत्संज्ञकशकारबुद्धिः स्थानिवद्भावेन प्रत्ययात्पूर्वं प्रक्रियाज्ञानवतां सुवचतया तस्य प्रत्ययघटकत्वाभावेऽपि प्रत्ययपरकेत्संज्ञकशकारपरकस्य मिदेरित्याद्यर्थे-नादोषात् ।

तस्मादवृथैवैषा परिभाषेति चेत्तर्हि बहुविधाभिः क्लिष्टकल्पनाभि-स्तत्र तत्र फलान्यथासाधनापेक्षया परिभाषाश्रयणे कः प्रयासः । आश्रीय-माणायां परिभाषायाम् 'अमि पूर्वः' (६.१.१०७) इत्यादौ परिभाषाप्रवृत्ति-प्रयोजकसामानाधिकरण्यानित्यत्वज्ञापनादेव प्रागुक्तानिर्वाह इति सर्वमुपपन्न-मित्याहुः ।

'घटपटं' 'घटपटौ' इत्यादिसिद्धये आह —

३४. सर्वो द्वन्द्वो विभाषैकवदभवति ।

'द्वन्द्वश्च प्राणि' इत्यादिप्रकरणाविषयः सर्वोऽपि द्वन्द्व इत्यर्थः । 'चार्थे द्वन्द्वः' (२.२.२९) इति सूत्रेण समाहारेतरेतरयोगयोरविशेषेण द्वन्द्वविधानान्न्यायसिद्धेयम् ।

'व्यपदेशिवत्' इत्यतिदेशे बोधकपरिभाषानिरूपणमतीतमनुसन्धायेदानीमातिदेशिकपरिभाषाणामारम्भः । ननु परिभाषायां 'द्वन्द्वः' इत्येक-वचनमनुपपन्नम् । द्वन्द्वसमासानां बहुत्वात् । न च द्वन्द्वत्वेन द्वन्द्वसमासान् क्रोडीकृत्य जातिपरतया निर्देश' इति वाच्यम् । सर्वपदान्वयप्रसङ्गात् ।

अत एव द्वन्द्वविधायकशास्त्रपरत्वमपि दुर्वचम्। तस्यैकत्वादिति चेत्? सत्यम्; द्वन्द्वशब्दोऽत्र तत्समासासमूहपरः सर्वशब्दस्त्ववयवकात्स्न्ये वर्तते। सर्वः पटो दग्ध इतिवत्। एवञ्च सर्वावयवावच्छिन्नो द्वन्द्वसमाससमूह इत्यर्थ इत्यदोषः। एकशब्द एकत्वसंख्याविशिष्टबोधकपरः। ततश्च तद्वृत्तिकार्यं लभत इत्यर्थेनानया परिभाषया विकल्पेनैकवचनमतिदिश्यते इति भावः।

ननु सर्वशब्दबलान्नियमविषयाणां प्राण्यङ्गादिद्वन्द्वानामपि ग्रहणापत्तौ नियमशास्त्राणामानर्थक्यप्रसङ्गः। न च तेषामितरेतरयोग एवैकवद्भाव-विधायकत्वेनैकवचनसम्पादकतया 'पाणिपादः' इत्यादिपुंल्लिङ्गैकवचनान्त-प्रयोगसाधनाय सार्थक्यमिति वाच्यम्। 'द्विगुरेकवचनम्' (२.४.१) इति साहचर्येण 'द्वन्द्वश्च' (२.४.२) इत्यादिषु समाहारद्वन्द्वस्यैव ग्रहीतव्यत्वे-नोक्तार्थसिद्धेः। न चैवं 'दधिपयसी, इध्माबर्हिषी' इत्यादावपि पाक्षिकैक-वद्भावो दुर्वारः। निषेधस्य 'जातिरप्राणिनाम्' (२.४.६) इति नियमव्या-वर्तनेन कृतार्थत्वादिति वाच्यम्। 'न दधिपयआदीनि' (२.४.१४) इत्येतन्निषेधस्य 'जातिरप्राणिनाम्' (२.४.६) इति सूत्रबोधितैकवद्भाव-नियममात्रनिवर्तकत्वाभ्युपगमे तद्ग्रहणे ब्रह्मप्रजापतिशब्दपाठवैयर्थ्यस्य दुर्वा-रत्वात्। तस्मादिह साहचर्यादिना सर्वथा समाहारद्वन्द्वनिषेध एवेति नियम-शास्त्रवैयर्थ्यमेव परिभाषायां सर्वशब्दग्रहणस्य दोष इत्यत आह—'द्वन्द्वश्च' इत्यादि। 'प्रकरणाविषयस्सर्वः' इति। सर्वनाम्नां बुद्धिस्थपरामर्शकत्वान्नि-यमशास्त्रवैयर्थ्यान्यथानुपपत्त्या तदविषये एव द्वन्द्वराशिः सर्वशब्देन बोध्यत इति भावः। 'अविशेषेण' इत्यस्य लक्ष्यविशेषानादरेणेत्यर्थः।

'न्यायसिद्धेयम्' इति। ननु सिद्धान्ते समाहारेतरेतरयोगयोरुभयोरपि समूहस्यैव प्राधान्यादितरेतरयोगे समुदभूतावयवभेदविवक्षामूलकतया सम्पा-दनीयस्य द्विवचनादेर्विना प्रमाणमनुपपन्नत्वात्कथं न्यायसिद्धत्वमत आह—

'तिष्यपुनर्वस्वोः' (१.२.६३) इति सूत्रस्थं बहुवचनग्रहण-मस्या ज्ञापकम्। तद्धि 'तिष्यपुनर्वसु' (१.२.६३) इत्यत्र तद्वया-वृत्त्यर्थम्। न चैवमप्यत्र 'जातिरप्राणिनाम्' (२.४.६) इति

नित्यैकवद्भावेन बहुवचनाभावादिदं सूत्रं व्यर्थमिति वाच्यम्। तद्वैकल्पिकत्वस्याप्यनेन ज्ञापनात्। न च 'एते प्राणिनः' इति वाच्यम्। 'आपोमयः प्राणः' इति श्रुतेरद्भिर्विना ग्लायमान-प्राणानामेव प्राणित्वात्। स्पष्टश्चेदं 'तिष्यपुनर्वस्वोः' (१.२.६३) इति सूत्रे भाष्ये। अत एव 'द्वन्द्वश्च प्राणि' (२.४.२) इत्यादौ प्राण्यङ्गादीनामेव समाहार इति विपरीतनियमो न।

'ज्ञापकम्' इति। 'इदं सूत्रं व्यर्थम्' इति। बहुवचनग्रहणविशिष्टं सूत्रं व्यर्थम्, न तु सर्वथा सूत्रवैयर्थ्यमेकवद्भावेऽप्येकवचनस्य द्विवचनविधानाय सार्थकत्वादिति बोध्यम्। 'तद्वैकल्पिकत्वस्यापि' इति। जातिप्राधान्यं एवायमेकवद्भावनियमो न तु व्यक्तिप्राधान्य इत्येवं कल्पनया फलितो यो विकल्पस्तद्बोधकत्वस्यापीति तदर्थः। यथाश्रुते सूत्रवैयर्थ्यप्रसङ्गात्। एवञ्च जातिप्राधान्ये नक्षत्राद्वन्द्वस्याभावात् प्रकृतसूत्राप्रवृत्तिरेवेति, व्यक्तिप्राधान्ये समाहारेतरेतरयोगयोस्तौल्येन समूहप्रधानत्वेऽपीतरेतरयोगस्योद्भूतावयवभेद-विवक्षावलम्बेन द्विवचनादिविषयत्वमित्यर्थबोधनद्वारा निरुक्तपरिभाषाज्ञापनेन बहुवचनग्रहणस्य स्वांशे चारितार्थ्यमिति भावः।

ननूक्तज्ञापकात्समाहारस्यैवोद्भूतावयवभेदविवक्षानिबन्धनं द्विवचना-दिकम्, न त्वितरेतरयोगस्येति वैपरीत्यमेव किं न स्यादिति चेत्? मैवम्; 'समानमध्यमध्यमवीराश्च' इति पुंलिङ्गबहुवचनान्तप्रयोगस्य 'पूर्वा-परावरोत्तरम्' (२.२.१) इति नपुंसकैकवचनान्तप्रयोगस्य च सूत्रकृताम-सङ्गतिप्रसङ्गादिति दिक्। 'अत एव' इत्यस्य ज्ञापकसिद्धत्वेन प्रकृतपरिभाषा-भ्युपगमादेवेत्यर्थः। 'विपरीतनियमो न' इति। अन्यथा प्राण्यङ्गादीनामित-रेतरयोगद्वन्द्वस्य नित्यनिवृत्तिः, अन्यत्र तु तन्निवृत्तिः स्यादिति भावः। एवञ्च व्यक्तिप्राधान्ये नियमप्रकरणाविषयस्य 'घटपटं' 'घटपटौ', इत्यादेः प्रकृतपरिभाषोदाहरणत्वं निर्बाधमेवेत्यभीष्टसिद्धिरित्याहुः।

३५. सर्वे विधयश्छन्दसि विकल्प्यन्ते ।

'व्यत्ययो बहुलम्' (३.१.८५) इति सूत्रे भाष्ये 'बहुलम्' इति योगविभागेन षष्ठीयुक्तः 'छन्दसि' इति सूत्रे 'वा' इति योगविभागेन चैषा साधिता । तेन 'प्रतीपमन्य ऊर्मिर्युज्यते' इति सिद्धम् । 'युध्यत' इति प्राप्नोति ।

सर्वशब्दघटितत्वेन विकल्पबोधकत्वेन च पूर्वपरिभाषासाम्यादतिदेशेन प्रकरणमध्ये निरूपणमस्याः परिभाषाया इति बोध्यम् । 'बहुलम्' इति । 'योगविभागेन' इति । सूत्रन्तु प्रकरणादिकरणानामेव व्यत्ययबोधकमित्याशयः । 'युद्धयति' इत्यादि । 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' (प. ९३.४) इति त्वेतदुदाहरणस्य प्रकृतपरिभाषया साधनप्रेरणोक्तभाष्येण विरोधाच्चिन्त्यमित्याशयः ।

ननु 'क्षियः' (६.४.५९) इत्यादौ 'इयङ्' कथमत आह—

३६. प्रकृतिवदनुकरणं भवति ।

'क्षियः' (६.४.५९) इति निर्देशोऽस्या ज्ञापकः । तत्रैव प्रातिपदिकत्वनिबन्धनविभक्तिकरणात् अनित्या चेयमिति 'क्षियो दीर्घात्' (८.२.४६) इति सूत्रे भाष्ये स्पष्टम् ।

'क्षिय्रः' इति । 'इयङ्निर्देशः' इति । 'क्षियो दीर्घात्' (८.२.४६) इति निष्ठानत्वविधायके सूत्रे इत्यर्थः । अनुकरणस्यानुकार्यशब्दस्वरूपबोधकत्वेऽपि क्रियावाचकत्वाभावाद्धातुत्वाप्राप्त्या तन्निबन्धनेवेङादेशोऽत्रानुपपन्नः प्रकृतपरिभाषां ज्ञापयतीति भावः । नन्वत्र ह्रस्वान्तस्यानुकरणमुत कृतदीर्घस्य ? नाद्यः । 'विपराभ्यां जेः' (१.३.१९) इत्यत्रैव परत्वात् 'घेर्ङिति' (७.३.१११) इति गुणस्यैव न्याय्यतया ङ्गापितायामपि परिभाषायामियङ्निर्देशानुपपत्तिपरिहारासम्भवात् । नान्त्यः; निर्देशादेव दीर्घग्रहणे लब्धे पुनर्दीर्घग्रहण-

स्य वैयर्थ्यापत्तेरत्रैव सूत्रे शेखरे स्पष्टत्वात् । एवञ्च क्वचिदजादावियङादेशं प्राप्तवतस्तस्य धातोरनुकरणे निष्ठायमियङ्विशिष्टरूपदर्शनार्थमुपलक्षणविधया यस्याजादावेतादृशं रूपं तथाविधादीर्घान्तात् क्षिधातोरित्यर्थस्यावश्यकतया निर्देशानुपपत्तिविरहात्कथं ज्ञापकत्वम् । तथा च सूत्रशेषे भाष्यम्—'अथाप्येतन्नास्ति प्रकृतिवदनुकरणं भवतीति ।' एवमपि न दोषः । धातीरजादौ यद्रूपं तदनुक्रियत' इति । अत एव क्षिय इति ल्यपि दीर्घविधायकसूत्रस्थस्यापि तन्निर्देशस्य न ज्ञापकत्वसम्भव इति चेत् ? सत्यम् ; 'कृतदीर्घस्यैवेयङा निर्देशः, दीर्घग्रहणन्तु ह्रस्वस्थानिकेयङ्विशिष्टस्यानुकरणमिति भ्रमनिरासार्थमित्याशयेन ज्ञापनोपन्यासः । वस्तुतः 'भुवो वुक्' (६.४.८८), 'अवोदोर्नियः' (३.३.२६) इत्यादेस्तद्ज्ञापकता युक्ता । अनुकार्यानुकरणयोरर्थभेदेन भेदादियमर्थवती परिभाषा । अत्र च शास्त्रीयांया एव प्रकृतेराश्रयणमनया च शास्त्रीयस्यैव प्रकृतिधर्मस्य अतिदेश इति स्पष्टं 'ऋलृक्' (मा. सू. २) सूत्रे भाष्यकैयटयोः । धर्मिग्राहकसाजात्यमत्र बीजम् । तेनापशब्दानुकरणेषु नापशब्दत्वं नापि 'भू सत्तायाम्' (धा. पा. १) इत्यादावशास्त्रीयार्थवत्त्वातिदेशनिबन्धनं प्रातिपदिकत्वमिति बोध्यम् । यत्तु 'गवित्यमाह' इत्यत्र तादृशार्थवत्त्वातिदेशप्रयुक्तप्रातिपदिकत्वाभावः शास्त्रबोधितधर्मातिदेशाभावप्रयोजनमिति; तदसत् ; अर्थवत्त्वातिदेशाभावेऽपि शास्त्रीयप्रातिपदिकत्वातिदेशस्य दुर्वारत्वात् । तस्मादिहौत्सर्गिकैकवचनप्रवृत्तिलोपाभ्यां पदान्तत्वेन प्राप्तस्य शाकलवकारलोपस्य निवृत्तये वक्ष्यमाणपरिभाषाऽनित्यत्वेन प्रातिपदिकत्वातिदेशाभाव इत्येव युक्तः पन्थाः ।

अनुकरणस्वरूपभङ्गभीतिस्तु न शास्त्रप्रवृत्तेः प्रतिबन्धिका । 'ङेराम्' (७.३.११६) इत्यादौ गुणानुपपत्तेः 'पटत्पटत्' इत्यादौ जश्त्वानुपपत्तेश्चेति दिक् ।

'अनित्या चेयम्' इति । इदमनित्यत्वं कार्यभेदेन, न तु लक्ष्यभेदेन । एवञ्चैतद्विषये अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभाव इति नाश्रीयत इत्यत्र तात्पर्यम् । तेन 'यत्तदेतेभ्यः' (५.३.३९) इत्यत्र त्यदादित्वातिदेशादत्वं स्वाश्रयतदभावनिबन्धनश्चैकशेषाभाव इति सर्वं सिद्धमित्याहुः ।

ननु 'रामौ' इत्यादौ वृद्धौ कृतायां कार्यकालपक्षे कथं पदत्वम् ? उभयत आश्रयणे अन्तादिवद्भावाभावाद्यस्माद्विहितस्तदादितदन्तत्वाभावादत आह—

३७. एकदेशविकृतमनन्यवत् ।

'अनन्यवत्' इत्यस्यान्यवन्न इत्यर्थः । तत्रान्यसादृश्यनिषेधे अन्यत्वाभावस्सुतराम् । अत एव तादृशादर्थबोधः । अन्यथा शक्तावच्छेदकानुपूर्व्यज्ञानात्ततो बोधो न स्यात् ।

'कार्यकालपक्षे' इति । यथोद्देशे तु कार्यविशेषानुसन्धानमन्तरेण नित्यादप्येकदेशात्पूर्वमपरनिमित्तकत्वेनान्तरङ्गत्वात्प्रवृत्तायाः पदसंज्ञाया अनुमानिकस्थानिवद्भावेन समुदाये सुलभत्वान्नैतन्न्यायोपयोगः । ननु कार्यकालपक्षेऽपि तादृशस्थानिवद्भावेन समुदाये सुबन्तत्वमाश्रित्य पदसंज्ञा सुलभा। न च सुबन्तत्वस्य सखण्डत्वेनाशास्त्रीयत्वादनतिदेश इति वाच्यम् । 'स्थानिवत्' (१.१.५६) सूत्रेण ह्यशास्त्रीयस्याप्यतिदेशः । अत एव 'प्रत्ययलक्षण' (१.१.६२) सूत्रस्य नियामकत्ववर्णनं भाष्यकारोक्तमुपपद्यते । अन्यथा प्रत्ययलोपोत्तरं तत्तत्प्रत्ययान्तत्वस्य 'स्थानिवत्' (१.१.५६) सूत्रेणातिदेष्टुमशक्यतया तत्प्रयुक्तकार्यनिर्वाहायावश्यकस्य तस्य सूत्रस्य कथं नियामकत्वमिति तदनुपपत्तिः स्पष्टैव ।

कथमन्यथा विशिष्टादेशानां वस्नसादीनां सुबन्तत्वातिदेशमूलकः पदाङ्गवद्भावो 'यन्ति' इत्यादौ प्रकृत्यादेशेषु प्रत्ययविधानावधित्वरूपप्रकृतत्वातिदेशेन समुदाये तिङन्तत्वमाश्रित्य प्रवर्तमानः 'तिङ्ङतिङः' (८.१.२८) इति निघातश्च स्निष्येदिति चेत् ? न; सुप्त्वस्य अल्मात्रवृत्तिधर्मावच्छिन्नप्रकृतादेशस्थानितावद्वृत्तिधर्मत्वात् 'अनल्विधौ' (१.१.५६) इति निषेधेन तद्घटितसुबन्तत्वस्यातिदेशे सम्भव इत्याशयात् । आकडारीयसंज्ञासु यथोद्देश एव इति नियमस्तु यत्र परस्परविरोधेन संज्ञाद्वयप्रसङ्गस्तत्रैव बाध्यबाधकभावव्यवस्थापनार्थमिति न प्रकृते तद्विरोध इति बोध्यम् ।

'अन्तादिवत्त्वाभावात्' इति । इदं प्रचामनुरोधेन । स्वमतेन ह्यभयत आश्रयणेऽप्यन्तादिवद्भाव इष्यत एव, परन्तु पौर्वापर्यलक्षणो व्यपवर्गस्तेन दुर्लभः । तावतैव 'आभीयात्' इत्यादौ 'एलिङि' (६.४.६७)? इति न ह्रस्वः । 'प्लायते' इत्यादौ स्थानिवद्भावेन व्यपवर्गाश्रयणाल्लक्षणमित्यत्रोक्तम् । एवञ्च प्रकृते व्यपवर्गस्यानुपयुक्तत्वेन यस्माद्विहितस्यदादितदन्तत्वस्य अन्तादिवद्भावेन विशिष्टे सुलभत्वात्समुदाये पदत्वमक्षतम् । अत पूर्वार्द्धधिकविकारसत्त्वेन प्रकृतन्यायस्याप्रवृत्तावपि 'कौ' इत्यादौ कार्यकाले पदत्वम् । तस्माम् 'ब्राह्मण्यश्वः' 'मासपूर्वः' इत्यादौ सुब्लुगुत्तरं विशिष्टसमासत्वसम्पत्तिरेतत्परिभाषारम्भप्रयोजनम् । तेन ह्यजहत्स्वार्थायां वृत्तौ प्रत्येकमप्यर्थवत्त्वेनानुमानिकस्थानिवद्भावेन समुदाये तदतिदेशस्य दुर्लभत्वादियमेव परिभाषा तत्समर्थने शरणम् । फलन्तु पूर्वत्र 'न समासे' (वा. ३६८४) इति शाकलप्रतिषेधः । परत्र 'तृतीयासमासे' (१.१.३०) इति सर्वनामसंज्ञाप्रतिषेधश्चेति द्रष्टव्यम् ।

'अन्यवन्ने इत्यर्थः' इति । वत्यन्तेन नञ्समासः, न तु नञ्समासाद्वतिरिति भावः । अथ नञ्समासाद्वतिरेवास्तु, उक्तरीत्या प्रसज्यप्रतिषेधाश्रयणे गौरवात् । अन्यत्वस्याविकृतप्रतियोगिकत्वेन विवक्षणात् । अनन्यशब्दोऽत्राविकृतपरः । एकदेशविकृतशब्दस्तु तृतीयातत्पुरुषेण विकृतवाची । ततश्चाविकृतवद्विकृतकार्यं लभत इत्यर्थसम्पत्तौ विकृताविकृतयोर्भेदस्य प्रत्यक्षसिद्धतया सादृश्यस्य भेदघटितत्वेऽपि न क्षतिः । नच्चान्यत्वस्योपस्थितविकृतप्रतियोगिकत्वमुपेक्ष्य अविकृतप्रतियोगिकत्वकल्पनायां अनौचित्येनान्यशब्दस्य विकृतपरत्वे विकृत स्ववदित्यर्थाप्त्तौ सादृश्यस्य भेदघटितत्वानभ्युपगमेन कथञ्चिदर्थोपपत्तावप्यतिदेशवैयर्थ्यं दुर्वारमिति वाच्यम् । स्ववदित्येव सिद्धावनन्यवदित्युक्तेरतिदेशवैयर्थ्याच्च, अविकृतप्रतियोगिकस्यैवान्यत्वस्य विवक्षणेनादोषात् । कथमन्यथा प्रसज्यप्रतिषेधवादेऽप्यस्य दोषस्य निस्तार इति चेत् ? अत्र केचित्—पर्युदासपक्षेऽन्यत्वस्य यावत्प्रतियोगिकाप्रसिद्धत्वेऽपि यत्किञ्चित्प्रतियोगिकस्य तस्य सुप्रसिद्धत्वात्तादृशमेव सामान्येनान्यत्वं गृह्येत । विशिष्याविकृतप्रतियोगिकत्वेन तद्विवक्षायां मानाभावात् । ततश्च कप्रत्ययान्तदामलिहशब्दोत्तरषदकप्रावि-

समासादाचश्चाणिजन्तात्किपि 'सुदामलिट्' इत्यत्र स्वभिन्नाव्ययीभावभिन्न-बहुव्रीहित्वातिदेशेन 'नभ्सुभ्यां' (६.२.१७२) इति स्वराप्तेः। प्रसज्य-प्रतिषेधे तु यत्किञ्चिदन्यत्वस्य केवलान्वयितया तदवच्छिन्नप्रतियोगिताक-सादृश्यस्य भेदघटितस्याप्रसिद्धत्वात् तद्वन्निष्ठप्रतियोगिताकसादृश्यग्रहणे तस्याः केवलान्वयित्वेन निषेधाप्रसिद्धेः सादृश्यस्य भेदघटितत्वाभावेऽपि यत्किञ्चिदन्यत्वविशिष्टस्वनिरूपितसादृश्यस्य स्वस्मिन्दुर्वारत्वेन निषेधानुप-पत्तेश्च गत्यन्तराभावेन तत्तद्विकारोपादानकारणीभूताविकृतप्रतियोगिकस्यैवा-न्यत्वस्य स्वीकर्तव्यत्वेन न प्रागुक्तदोषावकाश इति मूलकाराशयमुद्भाव-यन्ति – 'तादृशात्', इति। विकारविशिष्टादित्यर्थः।

यत्तु 'शास्त्रीयविकारविशिष्टादिति तदर्थः। अत एवाशास्त्रीयविकार-विषये रामशब्दस्य ग्रामशब्दार्थबोधकत्वाभेऽपि न क्षतिरिति' तदसत्; 'प्राग्दीव्यतः' (४.१.८३) इत्यत्र दीव्यतिशब्दैकदेशानुकरणभूतदीव्यच्छब्द-स्याशास्त्रीयविकारविशिष्टस्यार्थबोधकत्वानुपपत्तावर्थस्यावधित्वाभावप्रसङ्गात्। न च दीव्यच्छब्दस्यैवावधित्वमस्तु, किं तदर्थपर्यन्तानुधावनेनेति वाच्यम्, तथा सत्यर्थानामवधिविजातीयानामवधिमत्त्वनियमाभावेन तत्तत्प्रकृतीनामेवा-वधिमत्त्वापत्तौ प्राग्दिव्यतो याः प्रकृतयस्ताभ्योऽण्प्रत्यय इत्याद्यर्थेनापवाद-विषयेऽप्यौत्सर्गिकस्याणादेः प्रवृत्तिप्रसङ्ग इति भाष्य एव स्पष्टत्वात्।

न च निर्देशेनैवानेन लोपस्यापि बोधनादन्यत्रानुमीयमानामिव शास्त्रीयत्वे बाधकाभावाददोष इति वाच्यम्। तथा सति स्थानिवत्त्वेनैवा-र्थबोधकस्य सुलभतया तदुपपत्तिसाधकत्वेन प्रवृत्तस्य प्रकृतपरिभाषा-ज्ञापनपरभाष्यस्य निर्बीजत्वापत्तेरिति। तस्मान्न्यायानित्यत्वादेव क्वचिदर्थ-बोधकत्वाभावोऽपीत्येव युक्तमिति दिक्।

'बोधो न स्यात्' इति। अनया चानुपूर्वीभेदेऽप्यविकृतशक्तेरारोपाद्-बोध इति भावः। इदं फलं स्थानिवद्भावविषयत्वे द्रष्टव्यम्। तद्विषये तेनैव सिद्धेः।

एवञ्च 'रामौ' इति मान्तस्य यस्माद्विहितस्तत्त्वं 'औ' इत्यस्य परादित्वेन सुप्तामिति तदादितदन्तत्वमार्थसमाजग्रस्तम्। च्छिन्नपुच्छे शुनि श्वत्वव्यवहारवन्मान्ते तत्वं लोकन्यायसिद्धम्। अत एव 'प्राग्दीव्यत' (४.१.८३) इति सूत्रे भाष्ये दीव्यतिशब्दैकदेशदीव्यच्छब्दानुकरणमित्युक्त्वा 'किमर्थं विकृतनिर्देशः? एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा 'एकदेशविकृतमनन्यवत्' (प. ३७) इतीत्युक्तम्। एतेनायं न्यायः शास्त्रीयकार्य एव शास्त्रीयविकार एवेत्यपास्तम्। विकृतावयवनिबन्धनकार्ये तु नायम्, च्छिन्नपुच्छे शुनि पुच्छवत्त्वव्यवहारवत् विकृतावयवत्वव्यवहारस्य दुरुपपादत्वात्। एवमक्तपरिमाणग्रहणेऽपि नायम्। उक्तयुक्तेः। एतत् 'येन विधिः (१.१.७२) इत्यत्र भाष्यकैयटयोर्ध्वनितम्।

'आर्थसमाजग्रस्तम्' इति। अर्थस्येमान्यर्थानि साधनानि तेषां समाजेन समूहेन ग्रस्तं सम्पन्नमित्यर्थः। 'अत एव' इत्यस्य लोकन्यायसिद्धाया अप्यस्याः परिभाषायाः शास्त्रे आश्रयणीयत्वादेवेत्यर्थः।

'ज्ञापयति' इति। ज्ञापितायान्तु परिभाषायां शब्दलाघवसम्पादकतया कथञ्चिद्विकृतनिर्देशस्य स्वांशे चारितार्थ्यं बोध्यम्। एतेन लोकन्यायसिद्धत्वेन। 'अपास्तम्' इति। लोके विकारकार्ययोरशास्त्रीयत्वेऽपि प्रवर्तमानस्यास्य न्यायस्य शास्त्रे तन्मात्रविषयकत्वेन सङ्कोचकल्पनायां प्रमाणविरह इत्याशयः।

ननु 'द्यौः पन्थाः' इत्यादौ 'अनल्विधौ' (१.१.५६) इति प्रतिषेधेन स्थानिवत्त्वाप्रवृत्तावप्यनेन न्यायेन हलन्तत्वातिदेशमाश्रित्य हल्ङ्यादि (६.१.६८) लोपो दुर्वार इत्यत आह—'विकृतावयवनिबन्धनकार्ये' इति। 'दुरुपपादत्वात्' इति। ध्वनितमिदम् 'ऋलृक्' (मा. सू. २) सूत्रे भाष्ये। तत्र हि 'राजकीयम्' इत्यत्र कादेशोत्तरमनेन न्यायेनान्नन्तत्वादल्लोपमा-

शङ्कय 'मघवतः' इत्यादौ 'श्वयुव' (६.४.१३३) इति सम्प्रसारणवारणाय कात्यायनचोदितस्य नकारग्रहणस्याप्रकर्षणेन - नकारान्तान्नन्तग्रहणाददोष इति समाहितम् ।

नन्वेवमपि भयशब्दे उभयशब्दत्वनिबन्धनं सर्वनामत्वं दुर्वारमेवेत्यत आह – 'अक्तपरिमाण' इत्यादि । अक्तं प्रातिस्विकरूपेण गृहीतं परिमाणमानुपूर्वीविशेषो यस्य तादृशार्थबोधकशब्दग्रहणे इत्यर्थः । यद्यपि लोके द्रोणाढकादिष्वेव परिमाणशब्दव्यवहारो निरूढस्तथापि परिच्छित्तिसाधनतापुरस्कारेणात्र शास्त्रे तत्तद्वर्णानुपूर्वीविशेषोऽपि तथा व्यवह्रियत इत्याशयः ।

'उक्तयुक्तेः' इति । द्रोणादिपरिमाणशब्ददृष्टान्तमूलकभाष्यकारोक्तयुक्तेरित्यर्थः । एवञ्चानुपूर्वीविशेषलक्षणाधर्मो नानेन न्यायेनातिदिश्यत इति तात्पर्यम् ।

ननु गङ्गाप्रविष्टनदीदृष्टान्तमूलकेन 'नेदमदसोरकोः' (७.१.११) इति सूत्रस्थककारवत्पर्युदासबोधितेन तन्मध्यपतितन्यायेन' तथा परिच्छिन्नपरिमाणधर्माणां धातुत्वसर्वनामत्वादीनां शास्त्रे सप्तम्यके साकच्के चाध्यारोपस्तथा दीव्यदग्रहणाभ्यनुज्ञातेनानेनापि लोकन्यायेन तथाविधानां धर्माणामारोपो दुर्वार इत्यत आह – 'भाष्यकैयटयोः' इति । तत्र ह्युक्तपरिमाणानामर्थानां याः संज्ञास्तासां धातुत्वसर्वनामत्वादीनां द्रोणादिपरिमाणसंज्ञादृष्टान्तेन न्यूनातिरेकाभ्यामन्यथाभूते शब्दस्वरूपे न प्रवृत्तिरित्याशङ्कय, एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति 'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति यदयं 'नेदमदसोरकोः' (७.१.११) इत्यककारयोरिदमदसोः प्रतिषेधं शास्तीत्युक्तम् ।

यद्येकदेशविकृतन्याय ईदृशे विषये प्रवर्तेत तर्हि न्यूनताधिकतयोरपि विकारहेतुत्वाविशेषादनेन न्यायेन उपपत्तौ प्रयत्नान्तरानुसरणं भगवतो भाष्यकारस्य विफलमेव स्यादतस्तेनेदं ध्वनितमिति भावः ।

॥ अत्रेदं तत्त्वम्– 'नेदमदसोरकोः' (७.१.११) इत्यत्र ककारवत्पर्युदासस्तन्मध्यपतितन्यायं ज्ञापयन् यदि विशेषधर्मातिदेशबोधनपूर्वकं तस्योक्त-

परिमाणग्रहणविषयतां न बोधयेत्तर्हि स्वांशे चारितार्थ्याभावाज्ज्ञापकानुपपत्तिः। दीव्यद्ग्रहणन्तु एकदेशविकृतन्यायं ज्ञापयदप्यविकृततदीयार्थप्रतिपादकशक्त्यादिरूपसामान्यधर्मातिदेशबोधकताकल्पनयैव कृतार्थत्वादुक्तपरिमाणग्रहणविषयतां न्यायस्य कल्पयितुं न प्रभवतीति। एतेन 'लोपागमवर्णविकारज्ञ' इत्यादौ भाष्ये विकारादागमस्य पृथग्गणनात् 'उद्ग्रामम्' इत्यादितदीयोदाहरणस्वारस्याच्च रूपान्तरापत्तेरेव विकारपदार्थतया श्नमकचोश्च तत्त्वाभावेन प्रकृतन्यायप्रवृत्तिविषयत्वाभावादुक्तभाष्यध्वननासम्भवेन 'कथमुक्तपरिमाणग्रहणविषयत्वाभावो न्यायस्येत्यपास्तम्।

किञ्च अस्तु रूपान्तरापत्तिरेव विकारः, परन्तु 'एकदेशेन विकृतम्' इति तृतीयातत्पुरुषवशात्सामुदायिकोऽसौ न्यायप्रवृत्त्युपयोगी। अत एव ज्ञापनपरभाष्यसङ्गतिः।

अन्यथा लोपस्याप्युक्तरीत्या विकारपदार्थत्वाभावात्तदसङ्गतिः स्पष्टैव। प्रसिद्धश्च न्यूनाङ्गवदधिकाङ्गेऽपि विकृतत्वव्यवहारो लोके 'देवदत्तो विकृतः-स्थौल्यात्' इति। ततश्च श्नमकच्कृतविकारस्यापि सामुदायिकस्य स्यायप्रवृत्तिप्रयोजकत्वे बाधकाभावेन युक्तमेव मूलोक्तमिति वदन्ति।

अथैतन्न्यायस्योक्तपरिमाणग्रहणविषयत्वानभ्युपगमे 'गुडोदकम्' इत्यादौ पूर्वान्तत्वेन एकदेशविशिष्टे पूर्वपदत्वाद्दकशब्दस्यानेन न्यायेनोदकशब्दत्वादुदके 'केवल' (४.१.३०) इति पूर्वपदान्तोदात्तत्वप्रवृत्तिरित्याशयकमन्तवद्भावप्रयोजनप्रतिपादनपरम् 'अन्तादिवच्च' इति सूत्रस्थं भाष्यं विरुध्येतेति चेत्? न; 'पूर्वोत्तरपदनिमित्तककार्यात्पूर्वमन्तरङ्गोऽप्येकादेशो न' (प. ९३) इति परिभाषामादाय तत्रैकादेशात्पूर्वमेव स्वरप्रवृत्तेरव्याघातादन्यथासिद्धोदाहरणप्रदर्शनपरस्य तद्भाष्यस्यैकदेश्युक्तित्वेनादोषात्। विप्रतिषेधेनैकदेशात्पूर्वं स्वरप्रवृत्तिरावश्यकी 'स्वरितो वाऽनुदात्तेऽपदादौ' (८.२.६) इत्येतत्प्रवृत्त्यर्थमित्यपि तत्रैव भाष्ये स्पष्टम्।

केचित्तु--'येन विधिः' (१.१.७२) इतिसूत्रस्थभाष्यबलादागमजन्यविकारस्य प्रकृतन्यायप्रयोजकत्वाभाव एव कल्पनीयः, न त्वक्तपरि-

माणग्रहणस्य । अत एव 'आयसौ' इत्यत्रैकदेशोत्तरं सान्तस्याङ्गत्वातिदेश-माश्रित्य नुमापादनपरम् । तथा 'माथितिकः' इत्यत्र 'यस्य' (१६.४.१४८) इति लोपोत्तरं तान्तस्यानेनैव न्यायेनाङ्गत्वातिदेशेन कादेशापादनपरञ्च स्थानिवद्भावप्रयोजनप्रस्तावे; भाष्यकारोक्तं 'अचः परस्मिन्' (१.१.५७) इति सूत्रस्थं सङ्गच्छते । अन्यथा अङ्गसंज्ञासूत्रस्थ भाष्यबलात्तत्संज्ञाया अक्तपरिमाणसंज्ञात्वेन तदतिदेशासङ्गतिः स्पष्टैव । तत्तदानुपूर्वीविशेष एवाङ्गसंज्ञानिमित्तमिति तदाशयः । अङ्गत्वातिदेशपरभाष्यस्यैकदेश्युक्तित्व-कल्पनायान्तु क्लेशः ।

किञ्चैवं 'पचतु' इत्यादौ 'एरुः' (३.४.८६) इत्येतत्प्रवृत्युत्तरं कार्यकाले पदत्वायानेन न्यायेन तिङ्त्वातिदेश इत्येवं प्रतिपादनपरमपि 'अचः परस्मिन्' (१.१.५७) इति सूत्रस्थ भाष्यं कथं सङ्गच्छताम् । तिङन्तत्वस्य ह्यक्तपरिमाणसंज्ञात्वं स्फुटमेव । तस्माद्यत्र अक्तपरिमाणग्रहणे स्वनिष्ठा प्रकृतन्यायप्रवृत्तिस्तत्र वक्ष्यमाणपरिभाषानित्यत्वमेव शरण मिति युक्ततरमित्याहुः ।

यत्र त्वर्द्धं तदधिकं वा विकृतं तत्र जातिव्यञ्जकभूयोऽवयव-दर्शनाभावेन तत्वाप्रतीतौ कार्यसिद्ध्यर्थं विकृतानलरूपावयवत्व-प्रतीत्यर्थश्च 'स्थानिवत्' (१.१.५६) सूत्रम् ।

नन्वनेनैव न्यायेन सिद्धौ स्थानिवद्भावो व्यर्थ इत्या-शङ्क्याह — 'यत्र त्वर्धं तदधिकं वा' इत्यादि । तत्र अर्धविकारो 'ज्वरत्वरा' इति ऊठि 'तूर्णः' इत्यादौ, तदधिकविकारो मपर्यन्तादेशेषु 'त्वद्दीयः' इत्यादौ । 'जातिव्यञ्जक' इति । विकृताविकृतयोर्भेदप्रवृत्तिसाधको धर्मोऽत्र जातिः । 'विकृतानलरूप' इति । तेन यशश्शब्दादाचक्षाणणिजन्तात्किपि निष्पन्नाद्यश् इत्यस्मात्स्थानिवद्भावेनासन्तत्वमाश्रित्य 'अस्मायामेधास्रजः' (५.२.१२१) इति सूत्रान्मत्वर्थे विनिः सिद्ध्यति ।

किञ्च यत्र सर्वस्यैव विकारः 'किमः कः' (७.२.१०३) इत्यादिनो यत्र वा परिच्छिन्न परिमाणसंज्ञायां अतिदेशस्तत्र स्थानिवद्भाव एव शरणम् । नन्वेवमपि 'अभीयात्' इत्यत्रैकादेशोत्तरमनेन न्यायेन भान्तस्य पदत्वाज्जश्त्वापत्तिर्दुर्वारित्यत आह —

कचित्तु-लक्ष्यानुसारान्न्यायानाश्रयणम्। तेन 'अभीयात्' इत्यादिसिद्धिः। स्पष्टञ्च कैंचिन्न्यायप्रवृत्तिः 'प्रथमयोः पूर्वसवर्णः' (६.१.१०२) इत्यत्र कैयटेन दर्शितेत्यन्यत्र विस्तरः।

'कचित्' इत्यादि। 'अभीयात्' इति। यत्तु भान्तस्योपसर्गत्वादनेन न्यायेनैकादेशोत्तरम् 'एतेर्लिङि' (७.२.२४) इति ह्रस्वापत्तिर्दोष इत्याशय इति। तदसत्; परिच्छिन्नपरिमाणसंज्ञायाः प्रकृतन्यायेनातिदेशमनिच्छतो-मूलकारस्य मते प्रकृतन्यायेनोपसर्गत्वस्य दुर्लभतया ह्रस्वापत्तेर्दुर्वचत्वात्। केचित्तु नैतन्न्यायाश्रयणे प्रयोजनम्। न च 'वाप्यश्वः' इत्यादौ सुब्लुगुत्तरं समासत्वं प्रयोजनमिति वाच्यम्। कार्यकाले प्रत्ययलक्षणेन सुबन्ततामा श्रित्य पुनः समाससंज्ञायाः सुवचत्वात्। न हि व्यवस्थितयोः पक्षयोरन्य-तरपक्षेण लक्ष्ये सिद्धे पक्षान्तरेण दोषोपन्यासो न्याय्यः। तस्माद्यथो-देशमादाय नात्र समासत्वानुपपत्तिर्दोषः।

न च 'द्व्यङ्गुलम्' इत्यादावन्तरङ्गयणादेशोत्तरमनेन न्यायेन तत्पुरु-षत्वात् 'अङ्गुलेर्दात्रिणि' (५.४.११४) इति समासान्तः प्रयोजनमिति वाच्यम्। 'तादर्थ्यात् ताच्छब्द्यम्' इति न्यायेन समासार्थलौकिकप्रक्रियावाक्यार्था-देव समासान्तोत्पत्त्या निर्वाहात्। न च 'द्व्यूष्नी' इत्यादावनङादेशोत्तरं बहुव्रीहित्वातिदेशेन 'बहुव्रीहेरूधसः' (४.१.२६) इति ङीषः प्रवृत्तिः फलमिति वाच्यम्। अनङ्विधौ बहुव्रीहित्वस्यैव उद्देश्यतावच्छेदकतया 'स्यौनिवृत्' (१.१.५६) सूत्रेण तदतिदेशे बाधकाभावात्। ङीष्विधानसा-मर्थ्यादेव तदुपपत्तेश्च।

न च 'विषूषूवुः' इत्यादावभ्यासांशे हलादिः शेषोत्तरं सुब्रूपता-सम्पादनेन 'सुविनिर्दुभ्यः' (८.३.८८) इति षत्वसमर्थनमस्य न्यायस्या प्रयोजनमिति वाच्यम्। 'पूर्वत्रासिद्धीयमद्विर्वचने' (प. ११७) इत्याश्रित्य षत्वोत्तरमेव द्वित्वप्रवर्तनेनादोषात्। न चाभ्यासविकारेषु बाध्यबाधकभावा-भावेन हलादिशेषोत्तरम् 'अजीगणत्' इत्यत्राभ्यासांशे गणरूपत्वातिदेशात् 'ईच गणः' (७.४.९७) इत्यस्य प्रवृत्तिः प्रयोजनमिति वाच्यम्। भूतपूर्व-

गणरूपत्वमादायापि तत्रेत्वस्य सुवचत्वात् ।

किञ्चाभ्यासवृत्तिशक्तितज्जन्योपस्थितिविषयस्यार्थस्य बोधावृत्तिभीत्या तदुत्तरखण्डशक्तिजन्योपस्थितेः प्रतिबन्धकताकल्पनया बोधविषत्वानभ्युपगमेऽप्युपस्थितिस्वीकारे बाधकाभावेन वृत्त्या पदार्थोपस्थापकत्वरूपस्यार्थवत्त्वस्य सुवचत्वादानुमानिकस्थानिवद्भावेनैव हलादिशेषोत्तरमभ्यासांशे गणरूपत्वम् । ईदृशमेवार्थवत्त्वमानुमानिकस्थानिवद्भावे प्रयोजकम् । अत एव 'चकार' इत्यादावुरदत्वोत्तरमर्थविकारविशिष्टस्य प्रकृतन्यायविषयत्वाभावेऽभ्यासत्वमानुमानिकस्थानिवद्भावेनेति निष्कर्षः ।

पुनरभ्यासस्य संज्ञाप्रवृत्तिरप्येतादृशस्थानिवद्भावप्रयोज्यद्विरुक्तधातुपूर्वभागत्वातिदेशैकसाध्या । तस्मादनावश्यकोऽयं न्यायः । अत एव 'स्थानिवत्' (१.१.५६) सूत्रे भाष्ये 'स्थानिवत्' इत्येव ससम्बन्धिकत्वादादेशे लब्धे पुनरादेशग्रहणमानुमानिकादेशग्रहणार्थमित्येवमभ्युपगतेनानुमानिकस्थानिवद्भावेनैकदेशविकृतन्यायः प्रत्याख्यातः एवञ्च 'रामौ' इत्यादौ पदत्वाय यथोद्देश एव युक्तः । 'दीर्घवद्ग्रहणमपि' विनैव न्यायज्ञापकतामुपपद्यते । अर्धनिर्देशेषु स्वरूपस्यानुपयुक्तत्वादिग्योगपञ्चमीमादायाप्रथमासामानाधिकरण्यलक्षणेन शतृप्रत्ययेन तदुपपत्तेः । स्पष्टमिदं तत्रैव सूत्रे भाष्ये इत्याहुः ।

३८. पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ।

पूर्वात्परं बलवत् । विप्रतिषेधशास्त्रात् । पूर्वस्य परं बाधकमिति यावत् ।

इदानीमन्तरङ्गपरिभाषामुपपिपादयिषुस्तदुपयोगाय प्रदर्शयति—पूर्वपरेति । 'विप्रतिषेधशास्त्रात्' इति । एतेन प्रकारान्तरसिद्धमेव बलीयस्त्वमनूद्यते । नित्यत्वपूर्वं तदनेन बोध्यत इत्युक्तम् ।

नन्वेवं 'भिन्धि' इत्यत्र परत्वात्तातङा बाधितो धिः न स्यादत आह—

३९. पुनः प्रसङ्ग विज्ञानात्सिद्धम् ।

वक्ष्यमाणपरिभाषावतरणेनैवैतदुदाहरणं स्फुरतीति पुनरुदाहरणान्तरमनुपयुक्तमित्याशयेनाह—'नन्वेवं भिन्धि' इत्यादि । ततश्च 'भिन्तात्' इत्याद्युदाहरणामित्याशयः । 'तातङा बाधितः' इति । दृष्टान्तप्रदर्शनार्थमेतत् । 'धिर्नस्यात्' इति । विकल्पशास्त्राणामभावांशेऽपि विधीयमानत्वेन तात्पर्यात्तातङ्पक्षे तेन बाधितः पश्चात्स्थानिवद्भावेन हिबुद्धौ सत्यामपि यथा न भवति तथा तदीयाभावांशेन बाधितो धिभावः पक्षान्तरेऽपि न स्यादित्यर्थः । इदन्तु चिन्त्यम्—अप्राप्तविभाषास्वभावांशस्य सिद्धतया विधेयत्वायोगेन भावांशस्यैव विधेयत्वात् । अन्यथा 'नपरे नः' (८.३.२७) इति विधीयमानो नकारः 'किन्हुते' इत्यादावनुस्वारं यथा बाधते तथा तदीयाभावांशः 'किन्हुते' इत्यादावपितं बाधेत । अत एव 'शेषाद्विभाषा' (५४.१५४) इति सूत्रेभाष्ये—'शेषग्रहणं किमर्थम् याभ्यः प्रकृतिभ्यस्समांसान्ता विधीयन्ते ताभ्यः कप्मा भूत् । नैतदस्ति प्रयोजनम् । ये प्रतिपदं विधीयन्ते ते बाधका भविष्यन्ति । अनवकाशाश्च विधयो बाधका भवन्ति सावकाशाश्च समासान्ताः । कोऽवकाशः । 'विभाषाऽकप्' यदा न कप् तदा सोऽवकाश इति परत्वात्कप् प्राप्नोति । तस्माच्छेषग्रहणं कर्तव्यम् इत्युक्तम् । अभावांशस्यापि विधेयत्वे तु निरवकाशत्वमेवेति तदसङ्गतिः स्पष्टैव ।

प्राप्तविभाषासु च अभावांश एव विधेयस्तत्र भावांशस्य सिद्धत्वात् । ततश्च 'ऊकालोऽज्' (१.२.२७) इति सूत्रस्थस्याज्ग्रहणस्य 'तितउच्छत्रम्' इत्यत्र 'पदान्ताद्वा' (६.१.७६) इति तुग्विकल्पाभावः प्रयोजनमिति वदता भाष्यकारेण न विरोधः । तत्र निषेधस्य विधेयत्वेन बलीयस्त्वाद्दीर्घलक्षण इव ह्रस्वलक्षणोऽपि नित्यस्तुग्निवर्त्तयेतेति वा तदाशयः । उभयत्र विभाषासु च कथञ्चिदुभयोरपि विधेयत्वान्न तदंशे नित्यस्य कदापि प्रवृत्तिः । अन्यथा उभयत्र विभाषात्वभङ्गापत्तेः । तस्मात्ततातङ्विकल्पस्य अप्राप्तविभाषात्वेन निषेधस्य विधेयत्वानुपपत्तिः । अविधीयमानश्च कथमभावांशो धिभावं बाधेत,

कथं वा पुनः प्रसङ्ग इति। तस्मात् 'त्रपुणी' इत्यत्र परत्वान्नुमि कृते शीभावो न स्यात्। तथा 'भवति' इत्यत्र गुणे कृते विकरणो न स्यात्। 'इमौ' इत्यत्र वा मत्वे कृते त्यदाद्यत्व न स्यादित्यवतरणं युक्तमित्याहुः

यत्तु 'ईजतुः' इत्यत्र परत्वात्संप्रसारणे द्वित्वं न स्यात्तथा 'बह्वनड्वांहि' इत्यत्र नुमि कृते अम्न स्यादित्यवतरणमाहुः, तदसत्; 'वचिस्वपि' (६.१.१५) इति संप्रसारणस्य 'चतुरनडुहोः' (७.१.९८) इत्यामश्च प्रतिपद विधित्वहेतुकान्तरङ्गत्वमाश्रित्य पूर्वमेव प्रवृत्तेः सुवचतया प्रकृतन्यायस्यानुपयोगात्। क्वचित्तु 'भिन्धकी' इत्यत्र परत्वाद्विभावेन बाधितोऽकच् न स्यादिति पाठः; सोऽपि न समीचीनः। अर्थकृतबहिरङ्गत्वस्यानाश्रयणान्निमित्तान्तरासत्त्वाच्च अन्तरङ्गत्वादेव धिभावात्पूर्वमकचसिद्धेः। 'हृल्लभ्यः' (६.४.७०१) इति सूत्रस्थन्तु भाष्यमेकदेशिनः। कैयटश्च तदनुरोधीति स्पष्टमन्यत्रेति दिक्।

पुनः प्रसङ्ग विज्ञानात् सिद्धम्। द्वारमिति शेषः। पुनःप्रसङ्गपरिज्ञानादबाध्यशास्त्राप्रवृत्तेरुपायसिद्ध इत्यर्थः। एवञ्च सति प्रसङ्गे बाधितमपि शास्त्रं पुनः प्रवर्तनीयमिति फलति।

ननु प्रवृत्तौ शास्त्राणां प्रसङ्ग एवासाधारणो हेतुः, स च बाधकप्रवृत्तेः पूर्वं सत्प्रतिपक्षतया स्वकार्यसमर्पणासमर्थोऽपि पश्चात्स्वकार्यं किमिति न साधयेत्ततो न्यायसिद्ध एवायमर्थ इति सत्यपि प्रसङ्गे शास्त्राप्रवृत्तिरेव वाचनिकी, ततश्च शास्त्रान्तरेण पश्चादपि बाध्यशास्त्रप्रवृत्तेः प्रतिघातसम्भावनया प्रकृतन्यायोपन्यासो न्याय्यः। तदुपघातश्च प्रकृते सकृद्गतिन्यायाधीन इति स एव पूर्वमुपपादनीयः। अत एव भाष्ये सकृद्गतिन्यायमुपक्रम्यैव तद्बाधकतया पुनः प्रसङ्गविज्ञानमुपपादितमिति चेत्—न; सकृद्गतिन्यायस्य वाचनिकत्वेन प्रत्यक्षसिद्धेन तेन न्यायसिद्धस्यास्य सर्वथैव बाधौचित्यात्पुनः प्रसङ्गविज्ञानमेव विलीनं स्यात्। अतो वक्ष्यमाणभाष्यानुरोधेन विप्रतिषेधशास्त्रविपरिणामरूपयो रनयोस्तुल्यबलयोः परस्परं बाध्यत्वं बाधकत्वञ्च लक्ष्यानुरोधादिति नात्रोत्सर्गापवादभावो नियत इत्याह —

नन्वेवं 'तिसृणाम्' इत्यत्र परत्वात्तिस्रादेशे पुनस्त्रयादेशः स्यादत आह—

४०. सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ।

तत्र क्वचिच्चरितार्थयोरेकस्मिन् युगपदुभयोः कार्ययोरसम्भवेन बाधकाभावात्पर्यायेण तृजादिवच्छास्त्रद्वयप्रसङ्गे नियमार्थं विप्रतिषेधसूत्रमिति सकृद्गतिन्यायसिद्धिः । यदा तुल्यबलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं करोति, यदा तमुभौ युगपत्प्रेषयतो नानादिक्षु च कार्यं तदोभयोर्न करोति यौगपद्यासम्भवात् । शास्त्रयोर्लक्ष्यार्थयोः क्वचिल्लक्ष्ये यौगपद्येन प्रवृत्त्यसम्भवादप्रतिपत्तौ माम्नायामिदं परविध्यर्थमिति तत्र कृते यदि पूर्वप्राप्तिरस्ति, तर्हि तदपि भवत्येवेति पुनः प्रसङ्गविज्ञानसिद्धिरिति 'विप्रतिषेधे' (१.४.२) सूत्रे भाष्ये स्पष्टम् ।

यत्तु कैयटाययो व्यक्तौ पदार्थे प्रतिलक्ष्यं लक्षणोपप्लवादुभयोरपि शास्त्रयोस्तत्तल्लक्ष्यविषयोरचारितार्थ्येन पर्यायेण द्वयोरपि प्राप्तौ परमेवेति नियमार्थमिति सकृद्गतिन्यायसिद्धिः ।

'नन्वेव तिसृणाम्' इति । 'आयादेशः स्यात्' इति । यद्यपि निमित्तनिमित्तिभ्यामुभाभ्यामपि प्रतिपदोक्तत्वादन्तरङ्गस्तिस्रपेक्षया त्रयादेशः, तथापि तादृशान्तरङ्गत्वानादरेण 'स्थानिवत्' (१.१.५६) सूत्रे कात्यायनोक्तं त्रयादेशे स्रन्तस्य प्रतिषेध इति भाष्यकारोऽपि 'यक्षानुरूपो बलिः' इति सकृद्गतिन्यायेन तत्प्रत्याचारब्धौ । तदिदमिहोपन्यस्तम् । वस्तुतः 'कुरुतात्' इत्यत्र परत्वात्तातङि स्थानिवत्त्वेन हित्वात् 'उतश्च' (६.४.१०६) इति हेर्लुक्प्रसङ्गः । 'चतस्रस्तिष्ठन्ति' इत्यत्र चतसृभावोत्तरं 'चतुरनडुहोः' (७.१.९८) इत्याम्प्रसङ्गश्चनिर्विचिकित्सो दोषः ।

परस्परविरोधविशिष्टयोर्द्वयोरशास्त्रीययोरेकत्र प्रवृत्तौ सकृद् बाधितं पुनर्न प्रवर्तत इति परिभाषार्थः। परिभाषाद्वयमप्येदं न्यायसिद्धमेवेति दर्शयति—'तत्र' इत्यादिना।

अयंभावः—लोकदृष्टान्तस्यापि शास्त्रव्यवस्थापकतया तत्र तत्र प्रायेण परिगृहीतत्वादिह तृजादिशास्त्रीयदृष्टान्तपरिपन्थिभावः 'तुल्यबलयोः' इत्यादिलोकदृष्टान्तश्च नायुक्तः। ततश्च परस्परविरुद्धाभ्यामुभयथा विप्रतिषेधशास्त्रपरिणानादुभयन्यायसिद्धेर्लोकदृष्टान्तात्पुनःप्रसङ्गविज्ञानं शास्त्रीयदृष्टान्तात्सकृद्गतिन्यायो लक्ष्यानुसाराच्च सर्वं व्यवतिष्ठत इति।

अत्र कैयटादयः—व्यक्तौ पदार्थे सकृद्गतिन्यायः, जातौ तु तस्मिन् पुनः प्रसङ्गविज्ञानमिति, न्यायद्वयसिद्धिमभ्युपागच्छन्। तदूदूषयति—'यत्तु' इत्यादि। 'प्रतिलक्ष्यं लक्षणोपप्लवात्' इति। व्यक्तिपक्षेलक्ष्यव्यक्तीनां भेदात्तत्तत्संस्कारकत्वेन प्रातिस्विकतया लक्षणानां भेदः। जातिपक्षे तु सकलव्यक्त्यनुस्यूता जातिरेव शब्दतो लक्ष्यम्। तच्चैकमेवेति न लक्षणभेदस्योपयोगः। किन्तु लक्ष्यसंस्कारकमेव महावाक्यम्। ततश्च व्यक्तिपक्षे 'सुपि च' (७.३.१०२) इत्यादौ रामशब्दस्य दीर्घ इत्यादिरर्थोऽनेकरूपः, जातिपक्षे तु—अदन्ताङ्गस्य दीर्घ इत्येकरूप एवार्थः।

अत्र पक्षे एतन्नियमवशादेतल्लक्ष्यवियकपूर्वशास्त्रानुपप्लव एवं। जातिपक्षे तूद्देश्यतावच्छेदकाक्रान्ते कचिल्लक्ष्ये चरितार्थयोर्द्वयोः शास्त्रयोः सत्प्रतिपक्षन्यायेन युगपदुभयासंभवरूपविरोधस्थले उभयोरप्यप्राप्तौ परविध्यर्थमिति पुनः प्रसङ्गविज्ञानसिद्धिरिति, तन्न; व्यक्तिपक्षे सर्वं लक्ष्यं शास्त्रं व्याप्नोति न जातिपक्ष इत्यत्र मानाभावात्। 'न ब्राह्मणं हन्यात्' इत्यादौ जात्याश्रयसकलव्यक्तिविषयत्वार्थमेव जातिपक्षाश्रयणस्य भाष्ये दर्शनात्। अत एव 'सरूपे' (१.२.६४) सूत्रे भाष्ये जातौ पदार्थेऽनवयवेन

साकल्येन विधेः प्रवृत्तेः 'गौरनुबन्ध्यः' इत्यादौ सकलगवानुबन्धनासम्भवात्कर्मणो वैगुण्यमुक्तम्, द्रव्यवादे चासर्वद्रव्यगतेः 'गौरनुबन्ध्यः' इत्यादावेकं शास्त्रोक्तमपरमशास्त्रोक्तमित्युक्तम्।

- जातौ विधीयमानं कार्यं तत्र बाधे तदाश्रव्यव्यक्तिषु सङ्क्रामति 'व्रीहीन् प्रोक्षति' इत्यादिभिर्विधीयमानं प्रोक्षणादिकमिवेत्याशयः। 'सत्प्रतिपक्षन्यायेन' इति। नित्यत्वाभावसाधकेन कृतकत्वरूपहेतुना सत्प्रतिपक्षत्वात् श्रावणत्वहेतुः शब्दे यथा नित्यत्वं साधयितुमपर्याप्तः, तथा पूर्वपरशास्त्रे च 'सुपि च' (७.३.१०२) 'बहुवचने झलि' (७.३.१०३) इत्येते परस्परविरुद्धत्वात् 'वृक्षेभ्यः' इत्यादौ स्वस्वकार्यं साधयितुं न प्रभवत इति दृष्टान्तसमन्वयः।

एवञ्च शास्त्राचारितार्थ्यमप्रवृत्तौ हेतुः, तदभावश्च पर्यायतायामिति तेषां निष्कर्षः।

'मानाभावात्' इति। जातिपक्षेऽपि सकलव्यक्तिषु प्रवृत्त्यभावे सामान्यजातौ कार्यविधानमनर्थमेवेत्यचारितार्थ्यम्, विरोधस्तु पक्षद्वयसाधारण इति भावः। किञ्च नायमर्थः प्रकृतभाष्यानुगृहीतः; भाष्यान्तरविरुद्धश्चेत्याह—'न ब्राह्मणम्' इत्यादि।

'सकलव्यक्तिविषयत्वार्थम्' इति। व्यक्तिपदार्थतायामेकवचनान्तेन ब्राह्मणशब्देनानेकब्राह्मणव्यक्तिबोधनासम्भवादसर्वव्यक्तिविषयत्वं निषेधस्येति भाष्याशयः। यद्यप्युद्देश्यगतसंख्याया अविवक्षणे विधेयस्य विनिगमनाविरहान्निखिलव्यक्तिविषयत्वं वक्तुं युक्तं व्यक्तिवादेऽपि। तथा 'गौरनुबन्ध्यः' इत्यत्रैकवचनोपस्थितस्यैकत्वस्य गोत्वजातावव्यभिचरितत्वेन विधेयगतसंख्याया अविवक्षितत्वायोगेन च व्यक्तिद्वारके तत्सम्बन्धे स्वीक्रियमाणे जातिवादेऽपि सकलगवानुबन्धनाप्रसक्तेर्न कर्मवैगुण्यदोषः। तथापि पक्षान्तरेणोपपत्तौ उद्देश्यगतसंख्याया अविवक्षा। विधेयगतसंख्यायाश्च

परम्परया सम्बन्ध इति च प्रयासो विफल इति भाष्याशय इति बोध्यम्। भाष्यस्थस्यस्यानवययेन इत्यस्य विवरणं 'साकल्येन' इति। 'असर्वद्रव्यावगतेः' इत्यस्य आलम्बव्यत्वेन निखिलव्यक्तिप्रतीत्यभावादित्यर्थः।

यत्तु व्यक्तिपक्षे विशेषरूपेण वचनोपप्लवात्तत्तल्लक्ष्यविषयाणां तेषां नैष्फल्यापत्त्या लक्ष्यावर्तनेन विधेः सकललक्ष्यव्याप्तिरावश्यकी। जातिपक्षे तु लक्षणैक्यात्क्वचिदप्रवृत्तावपि चारितार्थ्यस्य सुवचतया सति विरोधे लक्ष्यावर्त्तनमपेक्ष्य लक्षणाप्रवृत्तिरेव वरम्। अतो न सकललक्ष्यव्याप्तिः। सामान्यजातौ कार्यविधानञ्च स्वविषयत्वमात्रेण विरोधिशास्त्रान्तराप्रवर्तकतया चरितार्थम्। 'न ब्राह्मणं हन्यात्' इत्यादौ च न केनचिच्छास्त्रेण क्वचिदपि विरोध इति सकललक्ष्यव्याप्तिरव्याहता, ततो न प्रकृते दृष्टान्तसम्भव इति युक्तमेव कैयटाद्युक्तमित्याहुः। तदसत्; जातिपक्षेऽपि लक्ष्यसंस्कारक-महावाक्यार्थबोधकाले हि जातौ बाधितो विधिस्तदाश्रयेषु व्याप्रियते। तत्काले विरोधिशास्त्रान्तरोपस्थितौ मानाभावेन तदीयवाक्यार्थपरिशीलन-पूर्वकविषयपरिज्ञानस्य दुर्लभतया सकललक्ष्यव्याप्तेर्दुर्वारत्वात्।

यदि तूत्सर्गापवादन्यायेन विरोधिशास्त्रसम्भावनया जायमानप्रकृत-शास्त्रीयवाक्यार्थबोधाप्रामाण्यसन्देहनिर्वितर्कत्वेन आवश्यके तदीयोपस्थिति-प्रयुक्तकार्यार्थपरिशीलने तुल्यन्यायात्तद्विरोधित्वेन प्रकृतशास्त्रस्य प्रसक्तत्वाच्चा-रितार्थ्यस्य सत्त्वाच्चान्यत्र द्वयोरपि परस्परविषयपरिहारेण प्रवृत्तिकल्पनायामर्थतः सिद्धो विरोधविषये प्रवृत्त्यभाव इत्युच्यते, तर्हि व्यक्तिपक्षेऽप्येवंरीत्या परस्प-रविषयपरिहारेण वचनोपप्लवकल्पनायामेतादृशे विषये प्रवृत्त्यभावः सुवचः।

यदि चापवादविषयपरिहारेणोत्सर्गशास्त्रप्रवृत्तावपवादशास्त्रवैयर्थ्यं प्रयोजकमिह तु न विरोधिशास्त्रवैयर्थ्यम्, अपि तु विरोधमात्रं तस्य च शास्त्रीयदृष्टान्ततावलात्पर्यायताकल्पकत्वमेव, न तु सकललक्ष्यव्याप्तिप्रति-बन्धकत्वमित्युच्यते, तर्हि जातिपक्षेऽपि तत्तुल्यम्। तदेतदाह —

"किञ्च न हि भाष्योक्तगुंजादिदृष्टान्तस्य व्यक्तिपक्ष एव एव सर्वविषयत्वं न जातिपक्ष इत्यत्र मानमस्ति। अपि च व्यक्ति-

पक्षेऽपि अन्यव्यक्तिरूपविनियमलाभेन चरितार्थयोरियं व्यक्तिर्विरोधात्स्वविषयकत्वं न कल्पयतीतिवक्तुं शक्यम्। जातिपक्षेऽपि तज्जात्याश्रयतद्व्यक्तिविषयकत्वमेव; नैतद्व्यक्तिविषयकत्वमित्यत्र विनिगमकाभाव:।

'किञ्च' इति। 'न मानमस्ति' इति। पक्षविशेषानुपक्रमेणैव भाष्यप्रवृत्तेरित्यर्थ:। ननु तृजादिदृष्टान्तो ह्यचरितार्थमूलकस्तस्य च विरोधमात्रेण कथं प्रकृते प्रवृत्ति: स्यात्, तस्मात् कथञ्चिदचरितार्थ्यं सम्पादनीयं व्यक्तिपक्षे तत्तद्रूपेण लक्ष्यव्यक्तीनामुपस्थितौ विनिगमनाविरहेण विरोधविषयेऽपि लक्षणोपप्लवो न्याय्य:। विरोधस्याशास्त्रीयतया शास्त्रप्रवृत्तिविघातकत्वायोगात्। अतस्तत्तल्लक्ष्यविषयकयोर्लक्षणयोरचरितार्थ्यं सम्भवतीति प्रकृतदृष्टान्तसङ्गति:। जातिपक्षे तु व्यक्तीनां शब्दादनुपस्थितिरेव, किन्तु जातिमात्रस्य। तत्र विरोधतस्तदाश्रयव्यक्तिषु क्रमेणावतरतो विधेयैक्यविरोधाभावस्तत्र क्वचिच्चरितार्थ्याद्विरोधविषयेनैतद्दृष्टान्तसङ्गतिरत: कैयटोद्भावितो युक्त एव भाष्याशय इति चेत्, तर्हि वैपरीत्यमेव कैयटोक्तेरापद्येतेत्याशयेनाह—'अपि च' इति। 'व्यक्तिपक्षेऽपि' इति। अत्र पक्षे हि व्यक्तीनामानन्त्यात्संग्राहकवाक्यानुरोधेन लक्षणोपप्लवकल्पनाया आवश्यकत्वादुपस्थितलक्ष्यानुरोधिनी लक्षणकल्पना। ततश्च परस्परविरोधेन कार्यद्वयप्रवर्तकयो: शास्त्रयोरन्यत्र विरोधाभावे चरितार्थयोरानर्थक्यभीत्यभावेन तादृशं लक्ष्यं स्वानुपस्थितिद्वारा स्वविषयकं लक्षणं नोपप्लावयतीति भाव:।

'जातिपक्षेऽपि' इति। अस्मिन्पक्षे संग्राहकवाक्यजन्यबोधविषयलक्ष्यस्यैकत्वाल्लक्षणानुरोधेन लक्ष्यकल्पनायां न किञ्चिद्बाधकम्, तथा च शास्त्रप्रवृत्तियोग्यलक्ष्यकल्पनायां जातिरेव निमित्तं, सा च विरोधविषयेऽपि वर्त्तत एवेति कथं तस्या: परित्याग:। विरोधो वा न शास्त्रप्रवृत्ते: प्रतिबन्धक इति तेषामुद्घोष इति भाव:।

'विनिगमकाभाव:' इति। 'इयमेव शक्यम्' इति शेष:। तस्मादिह चरितार्थमचरितार्थं वा न विवक्षितम्, किन्तु विरोधमेव

पुरस्कृत्य पक्षद्वयेऽपि शास्त्रस्याप्रवृत्तौ लोकदृष्टान्तः, पर्यायतायाञ्च शास्त्रीयदृष्टान्त आश्रितो भाष्यकारैरिति युक्तम्। अत एव शास्त्रप्रवृत्तिप्रघट्टके प्रकृतसूत्रे भाष्ये तव्यदादिषु नियमकारितया शास्त्रस्य परस्परविरोधेन धातोरप्रवृत्तिरित्येवंरूपो दोष उद्भावितः। चरितार्थ्यस्यैव शास्त्राप्रवृत्तिनिर्वाहकत्वे हि तव्यदादीनां धातुमात्रात्कापि विरोधपरिहारेण चारितार्थ्यस्य दुर्लभतया तदनुपपत्तिः स्पष्टैव। विरोधस्यैव तत्प्रयोजकत्वे तु वर्त्तत एव तव्यदादीनां तुल्यबलविरोध इति तदुपपत्तिरित्याहुः।

ननु तुल्यबलविरोधस्यैव शास्त्रे दृष्टान्तद्वयस्यापि प्रवृत्तिहेतुत्वे सर्वत्रैव द्वयोः प्रसङ्गात्परस्परविरोधाच्च शास्त्रीयतया प्रबलेन तृजादिदृष्टान्तेन लोकदृष्टान्तस्य बाध एव स्यात्। चारितार्थ्याचारितार्थ्ययोः तत्प्रवृत्तिहेतुत्वे तु भिन्नविषयत्वान्नायं दोष इत्याशङ्कायामाह —

तत्र लक्ष्यानुसारात्क्वचिच्छास्त्रीयदृष्टान्ताश्रयणं क्वचिल्लौकिकदृष्टान्ताश्रयणमिति भाष्यसम्मतमार्ग एव युक्त इति बोध्यम्। द्वयोः कार्ययोर्यौगपद्येनासम्भव एव विप्रतिषेधशास्त्रोपयोगी, इदम् 'इको गुण' (१.१.३) इति सूत्रे कैयटे स्पष्टम्। यथा 'शिष्टात्' इत्यादौ तातङ्शाभावयोर्युगपत्प्राप्तौ स्वस्वनिमित्तानन्तर्यासम्भवः। यद्यपि तातङादेः स्थानिवत्त्वेनास्त्येव तत्, तथाप्यादेशप्रवृत्त्युत्तरमेव सः, न तु तत्प्रवृत्तिकाले। एवं नुम्शृज्वत्त्वयोः 'प्रियक्रोष्टूनि' इत्यादौ युगपदसम्भवः, 'यदागया' (प. ११) इत्यस्य नुम्प्रवृत्त्युत्तरं प्रवृत्तेः। एवं 'भिन्धि' इत्यत्र तातङ्धिभावयोर्युगपदेकस्थानिसम्बन्धस्याङ्गरूपनिमित्तानन्तर्यस्य चासम्भवो बोध्यः। नुम्नुटोरपि नुटा अजादिविभक्त्यानन्तर्यबाधः। नुमि ह्रस्वन्ताङ्गबाध इत्यसम्भवाद्विप्रतिषेधः। क्वचिदिष्टानुरोधेन पूर्वशास्त्रो स्वरितत्वप्रतिज्ञाबलात्स्वरितेनाधिकं कार्यमित्यर्थात्पूर्वमेव भवति। तेन सर्वे पूर्वविप्रतिषेधाः संगृहीता इति 'स्वरितेन'

(१.३.११) इति सूत्रे भाष्ये विप्रतिषेध सूत्रस्थ परशब्दस्य इष्टवाचित्वात्तत्संग्रह इति विप्रतिषेधसूत्रे भाष्ये इत्यन्यत्र विस्तरः ।

'तत्र' इत्यादि । लक्ष्यानुरोध एव तयोर्दृष्टान्तयोर्विषयविभाजकतया बाध्यबाधकभावं निराकर्तुं प्रभवतीति निष्फलोऽयं चारित्रार्थ्यचारित्राद्य-पर्यालोचनापरिक्लेश इति भावः । यत्तु विरोधमात्रेणैव तृजादिदृष्टान्तस्यात्र शास्त्रे पर्यायतानियामकत्वे सामान्यविशेषयोरपि पर्यायतापसक्त्या बाध्यबाध-कभावविलयप्रसङ्ग इत्याहुः, तदसत् ; तत्रकौण्डिन्यन्यायादिरूपन्याय-विशेषेण तत्र बाध्यबाधकभावस्य सुवचत्वादिति दिक् ।

ननु 'विप्रतिषेध' (१.४.२) सूत्रे भाष्ये द्वौ प्रसङ्गावन्यर्थावेकस्मिन् स विप्रतिषेध इत्युक्तम् । प्रसज्येते इति प्रसङ्गौ विधी इति च कैयटेन व्या-ख्यातम् । ततश्च एकस्य कार्यिणः कार्यद्वययोगो विप्रतिषेध इति पर्यवसन्नम् । तादृशश्च विप्रतिषेधो 'वृक्षेभ्यः' इत्यादौ एकस्याकारस्यैत्वदीर्घाभ्यां योगाद्वर्तत इति युक्तं तत्र विप्रतिषेधशास्त्रस्य परबलीयस्त्वे नियामकत्वम् । 'शिष्टात्' इत्यादौ तु तातङ्शीभावयोः कार्यिभेदाद्विप्रतिषेधाभावेन कथं परबलीयस्त्व-मतमाह—'द्वयोः' इत्यादि । 'इको गुण' (१.१.३) इति सूत्रे कैयटे इति । इदं भाष्यस्याप्युपलक्षणम् । तत्रापि ह्ययमर्थो दृश्यते ।

'शिष्टात् इत्यादौ' इति । विषयसप्तमी । एवं विधरूपसम्पादकालौकिक-कप्रक्रियावाक्ये इति तदर्थः । 'स्वस्वनिमित्तानन्तर्यासम्भवः' इति । अयम-सम्भवः कार्यित्वनिमित्तत्वयोर्यौगपद्यासम्भवप्रयुक्त इति द्रष्टव्यम् ।

एकस्थानिसम्बन्धस्य' इति । ननु 'भक्ष्यति' इत्यादौ यथा रोपधयो-र्द्वयोः स्थानिनोरेकरमागमनिवर्त्यत्वं, तथा तातङ्शिभावयोर्द्वयोरप्यादेशयो रेकस्थानिनिवर्त्तकत्वमविरुद्धम् । क्रमेण च तयोः प्रयोगः इत्यत आह— 'अङ्गरूप निमित्तानन्तर्यस्य च' इति अङ्गान्तर्येण हेरुच्चारणप्रसङ्गे विधीय-मानस्यादेशस्य तदान्तर्यैणैव प्रयोगस्यावश्यकत्वेन युगपत्प्रवृत्तयोस्तातङ्शि-भावयोरुभयोस्तदानन्तर्यं न सम्भवतीति भावः ।

'नुम्नुटोः' इति। 'वारीणाम् इत्यादौ' इति शेषः। एवं 'प्रियक्रोष्ट्रूनि' इत्यादौ नृमतृज्वत्वाभ्यां युगपदेकस्य स्थानिवत्वावयवित्वयोरप्यसम्भव इति बोध्यम्। 'अन्यत्र विस्तरः' इति। यत्र पूर्वपरशास्त्राभ्यामेकमेव कार्यं बोध्यते यथा 'कर्ता' इत्यादौ–'अप्तृन्' (६.४.११) इत्यनेन 'सर्वनामस्थाने च' (६.४.८) इत्यनेन च दीर्घः। यत्र चैकस्यैव निमित्तानन्तर्यविघातकत्वं नान्यस्य, यथा राजेत्यादौ 'हल्ङ्याद्' (६.१.६८) लोपस्य दीर्घनिमित्तानन्तर्यविघातकत्वम्। न तु दीर्घस्य हल्ङ्यादिलोपनिमित्तानन्तर्यविघातकत्वं तादृशेषु प्रवृत्तिबीजाभावान्न विप्रतिषेधशास्त्रस्य व्यवस्थापकत्वमिति' स्पष्टं शेखरादावित्यर्थः।

नन्वेवं 'एधते' इत्यादौ परत्वाद्विकरणे 'अनुदात्तङित' (१.३.१२) इत्यादिनियमानुपपत्तिस्तेन व्यवधानादत आह —

४१. विकरणेभ्यो नियमो बलीयान्।

अत्र 'वृद्भ्यस्स्यसनोः (१.३.९२) इति सूत्रेण स्ये विभाषा तङ्विधानं ज्ञापकम्। अन्यथा स्यव्यवधाने नियमानामप्रवृत्तौ सामान्यशास्त्रेणोभयसिद्ध्या विकल्पविधानं व्यर्थं स्यात्। अत्रार्थे ज्ञापिते तु 'स्ये' इति तत्र विषयसप्तमी बोध्येति 'अनुदात्तङित' (१.३.१२) इत्यत्र भाष्यकैयटयोः स्पष्टम्।

'परत्वात्' इति।' आर्धधातुके नियमस्य चानर्हि' विकरणानाञ्च चारितार्थ्यमिति तुल्यबलत्वं 'पूर्वपरशास्त्रयोरिति भावः। ननु सामान्यतो लादेशेषु कृतेषु नियमात्पूर्वमिव नियमप्रवृत्त्यनन्तरमपि विकरणप्रवृत्तेस्सुब्वचनवत् कृताकृतप्रसङ्गित्वेन विकरणानां नित्यत्वसम्भवात्कथं परत्वोक्तिरिति चेत्? सत्यम्; यस्मिन् लक्ष्ये शास्त्रान्तरप्रवृत्त्यप्रवृत्तिसाधारण्येन स्वस्य प्रसङ्गस्तत्रा तन्नित्यम्। इह तु नियमस्य 'निवृत्तिरूपत्वात्तत्प्रवृत्त्या

निवर्तिते लक्ष्ये विकरणप्रसक्तिरसंभावितैव, किन्त्ववशिष्टे लक्ष्यान्तरे ततो नित्यत्वाभाव इत्याशयः ।

यदि तु नियमशास्त्राणां विधिमुखेनैव प्रवृत्तिरुचिता निषेधमुखेन प्रवृत्तावात्मनेपदादीनां विरुद्धलक्षणया तद्भिन्नपरत्वे क्लेशात् । तत्र सामान्यतः प्राप्तस्यैवात्मनेपदादेः पुनर्विधानबलादुत्सर्गशास्त्रस्य तद्विषये सङ्कोचकल्पनायामनिष्टनिर्वृत्तिरर्थतस्सिद्धा । ततश्चानिवर्तमानमेव 'एधत' इत्यादिनियमशास्त्राणां लक्ष्यम् । तत्र नियमशास्त्रप्रवृत्त्युक्तं विकरणप्रसक्तेरविरोधाद्युक्तमेव नित्यत्वं विकरणानामिति चेत् ? तर्हि तदनादरेणायं ग्रन्थ इति बोध्यम् ।

'तङ्विधानं ज्ञापकम्' इति । यद्यपि तत्र 'शेषात्कर्तरि' (१.३.७८) इत्यतः परस्मैपदस्य 'वा क्यशः' (१.३.९) इत्यतो वेत्यस्य च सम्बन्धात्परस्मैपदस्यैव विभाषया विधानं शब्दतो लभ्यते । तथापि तङि विकल्पः फलतीत्याशयः । यद्वा अतङ्विधानं परस्मैपदविधानमिति तदर्थः ।

'सामान्यशास्त्रेणोभयसिद्धया' इति । उत्सर्गसमानविषयत्वादपवादानां लादेशोत्तरमेव शबाद्यपवादस्य स्यप्रत्ययस्य प्रवृत्तिरित्याशयः । ननु ज्ञापितायां परिभाषायां नियमप्रवृत्तिकाले स्यप्रत्ययपरत्वासम्भवेन विकल्पाप्रवृत्तेर्नियमस्य निष्प्रतिपक्षत्वाद्विकल्पासिद्धिः । न च परिभाषाज्ञापनेन कृतार्थस्यापि विकल्पविधानस्य तत्रकौण्डिन्यायमूलकत्वेनापवादत्वे बाधकाभावादुपजनिष्यमाणन्यायसहकृतेन नियमबाध इति वाच्यम् । तथासति नियमात्पूर्वमेव विकरणप्रवृत्तिरिति तद्व्यवधानात्तत्रकौण्डिन्यायमूलकापवादविषये पुनरुत्सर्गप्रवृत्त्ययोगाच्च सामान्यशास्त्रविहितस्य पदद्वयस्य सुलभतया विकल्पविधानवैयर्थ्यात् । अतः स्वांशे चारितार्थ्यमत आह--विषयसप्तमी' इति । अनेन यावता विनाऽनुपपत्तिरिति न्यायाद्विषयसप्तमीत्वमपि ज्ञाप्यते । ततश्च नियमबाधनेन विकल्पविधानस्य स्वांशे चारितार्थ्यं सुवचमिति भावः ।

'भाष्यकैयटयोः' इति । तत्र हि "परत्वाद्विकरणेषु विकरणैर्व्यवहित-त्वान्नियमो न प्राप्नोति । नैषदोषः; आचार्यप्रवृत्तिर्ज्ञापयति 'विकरणेभ्यो नियमो बलीयान्' इति 'यदय मनुपसर्गाद्वा' इति विभाषां शास्ति" इत्येवोक्तं भाष्ये । कैयटे तु "एतच्च विकल्पविधानं लिङ्लिङर्थं 'चक्रमे, चक्राम, क्रम्यात्, क्रंसीष्ट' इति । तस्माद् ज्ञापकदिक् प्रदर्शिता भाष्यकृता । ज्ञाप-कन्तु 'वृदृभसः स्यसनोः' (१.३.९२) इत्यत्र स्ये विभाषा तङ्विधानमित्यु-क्तमिति द्रष्टव्यम्। अत्र पक्षे 'स्ये' इत्यस्य विषयसप्तमीत्वस्वीकारेण निर्दिष्टपरिभाषाबाधकल्पनायां गौरवमतो लाघवसहकृतं पक्षन्तरमाह —

विकरण व्यवधानेऽपि नियमप्रवृत्तेरिदं ज्ञापकमिति 'शदे-शितः' (१.३.३०) इत्यत्र भाष्ये ध्वनितम्। वस्तुतोऽस्मा-ज्ज्ञापकात्–'अनुदात्तङित' (१.३.१२) इत्यादि प्रकरणं तिबादि-विध्येकवाक्यतया विधायकं तत्र 'धातोः' इति विहितपञ्चमीति तत्समाधिकरणम्। 'अनुदात्तङित' (१.३.१२) इत्यादि विहित-विशेषणमेव ।

'विकरणव्यवधानेऽपि' इति । तत्र हि उपसर्गपूर्वस्य नियमे 'अड्व्य-वाय उपसंख्यानम्' न्यविशतीति कात्यायनेन चोदिते तदुपपादनाय भाष्य-कारेणोक्तम्—"अत्र खलु लादेशे कृते त्रीणि कार्याणि युगपत् प्राप्नुवन्ति । विकरणा अङागमो नियमः' इति । तद्यदि सर्वतः पूर्वं नियमो लभ्येत, कृतं स्यात् । तत्तु न लभ्यमिति । यदीयं परिभाषा स्यात्तर्हि तद-सन्नतिरेव, विकरणात्पूर्वं नियमप्रवृत्तौ बाधकाभावात् । तथा च भाष्यकारः प्रकृतमर्थं ध्वनयतीति भावः । कैयटे तु स्पष्ट एवायमर्थः । तत्र हि 'ननु विकरणेभ्यो नियमस्य बलीयस्त्वं साधितं तत्किमुच्यते तत्तु न लभ्यमिति। उच्यते अन्यथाऽपि ज्ञापकं समर्थयितुं शक्यते कृतोऽपि विकरणो न व्यव-धायकः' इत्युक्तम् । अत्र पक्षे 'स्ये' इत्यस्य परसप्तमीत्वेऽपि न क्षतिः । स्यप्रत्ययाव्यवहितपूर्वाद्धातोर्विकरणव्यवहितस्य लस्येत्यर्थसम्भवात् ।

ननु विकरणेभ्यो नियमस्य बलीयस्त्वेऽपि नियमात्परस्त्वादडागम-स्तदपेक्षया नित्यत्वाद्विकरणस्ततो बलीयस्त्वान्नियम इति चक्रकेण नियमस्य पूर्वमप्रवृत्तिरिति भाष्याशयात्कथमुपदर्शितार्थध्वनिः।

न च नियमस्यापरनिमित्तकत्वेनान्तरङ्गत्वादडागमपरत्वस्य पूर्वप्रवृत्ति प्रयोजकत्वायोगेन चक्रकाप्रसक्तिरिति वाच्यम्। तथाविधान्तरङ्गत्वस्यात्र-स्वीकारे विकरणादडागमाच्च पूर्वमेव नियमस्य सुवचतया कथमलोमोक्ति-रिति भाष्यासङ्गतेः। प्रकृतपरिभाषाभ्युपगमवैयर्थ्यापत्तेश्च। न च चक्रकदोष-स्यैव नियमशास्त्रीयप्राथमिकप्रवृत्तिप्रतिबन्धकत्वे 'चक्रकेऽभिष्टतो व्यवस्था' इति तत्र तत्र भाष्यकारोपदर्शितरीत्यैव प्रकृतेऽपि दोषनिर्वारणसम्भवे तदवष्ट-म्भेन वार्तिकारम्भस्य प्रकारान्तरेण, लृत्प्रत्याख्यानसमारम्भस्य च भाष्यकृतो निर्बीजत्वापत्तिरिति वाच्यम्। यत्र शास्त्राणां पुनः पुनः प्रवृत्यात्मकेन चक्रकेण लक्ष्यस्यापरिनिष्ठितत्वप्रसङ्गो यथा 'प्राच्छत्' इत्यत्र सादृक्स्य ऋच्छभावे पुनराट्, पुनश्च ऋच्छभाव इति। तथाविधे विषये "लक्ष्यानुरो-धिना लक्ष्ये लक्षणस्य" इति न्यायानित्यत्वेन कथञ्चिदभ्युपगता शास्त्राणां पुनः प्रवृत्तिरभीष्टव्यवस्थापनायैव भवति न त्वनिष्टापादनायेति 'चक्रकेऽभिष्टतो व्यवस्था' इत्यस्यार्थः।

इह तु परस्परविरुद्धहेतुभिर्न कस्यापि शास्त्रस्य लक्ष्ये प्रवृत्तिरिति वैषम्यान्नास्ति तादृशसिद्धान्तविषयत्वमित्याशयात्। अत्राहुः-नियमशास्त्रीय-प्राथमिकप्रवृत्तिप्रतिबन्धकं चक्रकमेवेत्येव भाष्यकाराशयः स्यात्, तर्हि प्रागुक्तवार्तिकप्रत्याख्यानपरतदुत्तरग्रन्थोऽपि विरुद्धयेत।

तत्र हि 'नेर्विशः' (१.३.१७) इत्यादावुपसर्गस्य 'षत्वधन्तताप्राप्तित्यं तद्द्योत्यार्थवाचकाद्धातोरित्यर्थेन व्यवधानेऽपि नियमप्रवृत्तिरित्युपसंहृतम्। न हि तावता चक्रकदोषो निरस्तः। प्रथममडागमप्रवृत्तावुपायाभावात्, येन तदुपपत्तिस्स्यात्। किञ्च चक्रकेण प्रथममडागमप्रवृत्त्ययोगात् 'अड्व्यवाये उपसंख्यानम्' इति वार्तिकं वा कथं सङ्गच्छताम्? तस्मादुपक्रमोपसंहारबलेन परिभाषानादर एव भाष्याशयः प्रतीयते, ततो युक्तमेवोक्तमिति।

ननु परिभाषाज्ञापनपक्षे 'स्ये' इत्यस्य विषयसप्तमीत्वकल्पनायां 'तस्मिन्' (१.१.६६) इति परिभाषाबाधः। इदानीं विकरणव्यवधाने प्रवृत्तिकल्पनया 'तस्मात्' (१.१.६७) इति परिभाषाबाध इति, नास्ति-विशेषः। न च विषयसप्तमीत्वकल्पनायामव्यवहितत्वपूर्वत्वयोर्द्वयोरप्यंशयो-र्बाधनात् 'तस्मिन्' (१.१.६६) इति परिभाषायाः सर्वात्मना बाधः। व्यवधानेऽपि प्रवृत्तिरिति कल्पनायामव्यवहितत्वांशस्यैव बाधो, न तु परत्वां-शस्येत्यांशिको बाधः' 'तस्मात्' (१.१.६६) इति परिभाषाया इति लाघव-मिति वाच्यम्। विषयसप्तमीत्वकल्पनया 'तस्मिन्' (१.१.६६) इति परिभाषायाः सर्वात्मबाधः काचित्कः। व्यवहितप्रवृत्तिकल्पनया 'तस्मात्' (१.१.६७) इति परिभाषया आंशिकबाधस्तु 'अनुदात्तङित' (१.३.१२) इत्यादिषु बहुषु प्रदेशेष्विति लाघवानवकाशात्। यदि च लादेशोत्तरं स्यता-स्योः प्रवृत्तये येन नाप्राप्तिन्यायेन स्वविषये सर्वत्र प्रसक्तस्य शपो बाधनेन 'भविष्यति, भविता' इत्यादौ चरितार्थयोस्तयोः 'देविष्यति, देविता' इत्यादौ परत्वात् श्यन्नादिभिर्बाधो मा भूदित्यवश्यमभ्युपगन्तव्येन आर्धधातुकानुवृत्त्या-दिना स्यसासोर्लोपावस्थायामेव प्रवृत्तिरिति 'स्यतासी लृलुटोः' (३.१.३३) इति सूत्रस्थाकारसम्मते सिद्धान्ते लादेशविधौ 'धातोः' (३.१.९१) इत्यस्य विहितपञ्चम्यन्ततायाः सकलमतसाधारणत्वेऽपि 'अनुदात्तङित्' (१.३.१२) इत्यादौ दिग्योगपञ्चम्यन्ततया नियमाप्रवृत्त्या वैयर्थ्यमाश्रित्य 'स्ये' विकल्प-विधानेन कथञ्चिदुक्तपरिभाषाज्ञापकत्वसमर्थनेऽपि स्वांशे चरितार्थ्यसम्पत्तये नियमशास्त्राणां विकरणव्यवधानेऽपि प्रवृत्तिरित्यर्थज्ञापनस्यापि गले पतित-त्वेन लाघवात्प्रथमत एव तदर्थज्ञापनेन निर्वाहात्परिभाषाज्ञापनपक्षो न युक्त इत्युच्यते, तर्हि नियामकत्वपक्षे नियमशास्त्राणां व्यवहितप्रवृत्तिज्ञापने भिन्नवाक्यतया नियामकेषु 'अनुदात्तङित' (१.३.१२) इत्यादिषु 'तस्मात्' (१.१.६७) इति परिभाषाबाधकत्वकल्पनमेकमपरञ्च तदुपपत्तये लादेश-विधौ धातोरित्यस्य विहितपञ्चम्यन्तत्वकल्पनमित्येतत्त्वेन प्रकृतज्ञापकेन वेति गौरवम्। लादेशविध्येकवाक्यतया 'अनुदात्तङित' (१.३.१२) इत्यादीनां विधायकत्वाभ्युपगमे तु लादेशविधिघटकस्य धातोरित्यस्य विहित-पञ्चम्यन्तत्वकल्पनामात्रेण लक्षिशेषणीभूतेषु 'अनुदात्तङित' (१.३.१२)

इत्यादिषु नातिरिक्तत्वेन 'तस्मात्' (१.१.६७) इति परिभाषाबाधकल्पनेमिति लाघवम्।

तस्मादयुक्त एवायं नियामकत्वपक्ष इत्यस्वरसादाह–'वस्तुतः' इति। 'विहितपञ्चमी' इति। विहितशब्दाध्याहारप्रयुक्ता तदार्थाक्षिप्तपरत्व–निरूपितावधित्वबोधिका पञ्चमी, न तु दिक्शब्दाध्याहारप्रयुक्तादर्थनिरूपितावधित्वबोधिकेत्यर्थः। ईदृशे विषये पञ्चमी तु 'यस्मात्प्रत्यय विधिः' (१.४.१३) इति निर्देशबलादित्यवगन्तव्यम्। यत्तु विहितशब्दाध्याहारेण तदर्थभूतविधानक्रियानिरूपितावधित्वबोधिका पञ्चमीत्यर्थ इत्याहुः, तदसत्; विधानस्यावधिनिरूपकतायाः कुत्राप्यदर्शनात्। तद्योगपरत्वापेक्षणेन स्वा–तन्त्र्येण पञ्चम्यन्तानुशासनकल्पनायां 'विप्रस्य विहितं श्रुतम्' इत्यादावति–प्रसङ्गाच्चेति न किञ्चिदेतत्।

एवञ्च लावस्थायां 'स्ये' अपि तद्व्यवधाने तङ्सिद्धिः। शबादिभ्यस्तु पूर्वमेव नियमः। यद्वा लमात्रापेक्षत्वादन्तरङ्गा आदेशा लकारविशेषापेक्षत्वात् 'स्यादयो बहिरङ्गाः' इति दिग्योगलक्षणपञ्चम्यामपि न दोषः।

'पूर्वमेव' इति। सार्वधातुके परशब्दादीनां विधानादित्याशयः। नियम इत्यस्यात्मनेपदपरस्मैपदव्यवस्थेत्यर्थः। अत्र पक्षे परिभाषात्वम् 'अनुदात्तङित' (१.३.१२) इत्यादीनाम्। तद्द्वारेणैषां लादेशविध्येकवाक्यताज्ञापनात्। तदुक्तम् 'अनुदात्तङित' (१.३.१२) इत्यत्र भाष्ये। यदीयं परिभाषा विज्ञायेत किं कृते भवति? कार्यकालं संज्ञापरिभाषम्। यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्। लस्य तिबादयो भवन्तीत्युपस्थितमिदं भवति। 'अनुदात्तङित' (१.३.१२) इत्यादिभाष्ये कार्यकालमित्याद्युपलक्षणम्। यथोद्देशेऽपि 'ङिच्च' (१.१.५३) इति सूत्रस्थैकयटरीत्या विध्येकवाक्यताया: सुवचत्वात्। परं तु यथोद्देशे परिभाषादेशे विध्येकवाक्यता, कार्यकाले तु प्रदेशदेश एवेति प्रागुपदर्शितो विशेषः।

ननु 'धातोः' (३.१.९१) इत्यस्य विहितपञ्चम्यन्तत्वम् 'अनुदात्तङित' (१.३.१२) इत्यादीनां परिभाषात्वं कल्पनीयमित्यस्यैवात्रापि पक्षे क्लेश इत्यत आह—'यद्वा' इति। 'लमात्रापेक्षत्वात्' इति। लकारघटितसमुदायानपेक्षत्वादित्यर्थः। लकारविशेषापेक्षत्वादित्यस्य लकारविशेषोपस्थापकलृलुट्रूपसमुदायापेक्षत्वादित्यर्थः। एवञ्च शब्दतः स्यादिनिमित्तभूतलृलुट्रूपसमुदायघटकलकारनिमित्तकत्वात्तिबादीनामन्तरङ्गत्वम्। तद्घटितसमुदायनिमित्तकत्वाच्च स्यादीनां बहिरङ्गत्वमिति भावः। एतेन सामान्यापेक्षाद्विशेषापेक्षं बहिरङ्गमित्यस्य दूषयिष्यमाणत्वादिदं चिन्त्यमित्यपास्तम्।

अथात्र पक्षे 'वृद्भ्यस्स्यसनोः' (१.३.९२) इत्यस्य तिबादिविध्येकवाक्यतया अनुपपत्तिः। लादेशात्पूर्वं स्यप्रत्ययानुत्पत्त्या स्यप्रत्ययपरत्वासम्भवात्। एकवाक्यतानभ्युपगमे च लादेशविध्येकवाक्यतापन्नेन 'अनुदात्तङित' (१.३.१२) इत्यनेन अन्तरङ्गत्वादात्मनेपदे लकारस्याभावात् 'स्ये' परस्मैपदविकल्पविधानस्यानुपपत्तिः। अत आह —

अत्र पक्षे 'वृद्भ्यस्स्यस्य' (१.३.९२) इति सूत्रं 'स्यविषये ञित्' इति व्याख्येयम्। आत्मनेपदसञ्ज्ञा भाविसंज्ञा आश्रयणीयेति तत्त्वम्। भिन्नवाक्यतया सामान्यशास्त्रविहितानियमे तु लुगादिनेव नियमेन जातनिवृत्तिरङ्गीकार्या। 'भुक्तवन्तं मति मा भुङ्क्ष्वा इति ब्रूयात्, किं तेन कृतं स्यात्' इति न्यायस्तु नात्र शास्त्रो आश्रयितुं शक्यः। नियमादिशास्त्राणां वैयर्थ्यापत्तेः। ध्वनित्वञ्चैदम् 'स्थानेऽन्तरतमः' (१.१.५०) इति सूत्रे भाष्ये। शास्त्रानर्थक्यन्तु वृद्धिसंज्ञा सूत्रे भाष्ये तिरस्कृतम्।

'अत्र पक्षे' इति। 'यद्वा' इति पक्षे इत्यर्थः। 'विषये इति व्याख्येयम्' इति। विषयसप्तमीति भावः। यद्यपि पूर्वस्मिन्पक्षे विहितपञ्चम्याश्रयणमत्र तु विषयसप्तम्याश्रयणमिति नास्ति लाघवगौरवकृतो विशेषः। तथापि विहितपञ्चम्याश्रयणेन 'तस्मात्' (१.१.६७) इति परिभाषाबाध-

स्तत्तच्छास्त्रैकवाक्यतापन्नेषु बहुषु वाक्येषु विषयसप्तम्याश्रयणेन 'तस्मिन्' (१.१.६६) इति परिभाषाबाधः क्वचिदेवेति लाघवमिति गूढाभिसन्धिः।

केचित्तु लावस्थायामेव स्यतासी विहितपञ्चम्याश्च तिबादय इत्येव युक्तम्। अन्यथा 'देविता' 'देविष्यति' इत्यादावन्तरङ्गत्वात्तिबादिषु प्रवर्तिष्यमाणयोः स्यतास्योः स्वविषये सर्वत्र प्रसक्तस्य शपो बाधनेन कृत्यर्थयोः परत्वाच्छ्यन्नादिभिर्बाधापत्तिरिति भाष्यकारोद्भावितदोषस्य दुर्वारत्वापत्तेः। यदि तु श्यन्नादिविधौ शव्प्रहाणानुवृत्तिविभक्तिविपरिणामाभ्यां श्यन्नादीनां शबादेशत्वाभ्युपगमेन तद्दोषपरिहार इत्युच्यते, तर्हि क्लेशः स्पष्ट एव।

किञ्च लादेशानामुक्तप्रकारेणान्तरङ्गत्वात्प्रथमतः प्रवृत्तिरित्यप्ययुक्तम्। स्यतास्योरपि लृलुडंशे प्रतिपदोक्तत्वेनान्तरङ्गत्वस्य सुवचत्वात्। न ह्योभयोरन्तरङ्गयोः परत्वं व्यवस्थापकमिति पूर्वं तिबादय इति वाच्यम्। स्यतास्योः कृताकृतप्रसङ्गित्वेन नित्यत्वात्। तिबादयो हि स्यतास्योः प्रवृत्तौ तद्व्यवधानाल्लकारस्य न प्रवर्तन्त इत्यनित्याः। अपि च दिग्योगपक्षम्याश्रयणे 'लविषीष्ट' इत्यादौ परत्वात्प्रतिपदोक्तत्वाच्च, प्रथमतः सीयुटि धातोरव्यवहितस्य निर्दिश्यमानस्य लस्याभावाल्लादेशानामप्रवृत्तिरिति स्पष्टम्, 'आशीर्दाङ्ताच्च' (३.१.३) इति सूत्रे भाकरे। तस्मादिह 'यद्वा' इत्यादिपक्षश्चिन्त्य इत्याहुः।

अथात्रैकवाक्यताया असम्भवः। 'आत्मनेपदपरस्मैपदसंज्ञाभ्यां विधानं विहितानाञ्च ते संज्ञे इत्यन्योन्याश्रयात्। अत आह —

'आत्मनेपदशब्दादौ' इति। 'भाविसंज्ञा' इति। भविष्यदात्मनेपदसंज्ञास्तद्योग्या वा तिबादयो भवन्तीति वाक्यार्थ इत्याशयः। इदानीमेकवाक्यतापक्षस्य प्राशस्त्यबोधनाय नियामकत्वपक्षे गौरवमुपपादयति।

'भिन्नवाक्यतया' इत्यादि। 'अङ्गीकार्या' इति। यदि च लुगादिभिरनुत्पत्तिरेवान्वाख्यायत इति दृष्टान्तबलेन नियमशास्त्रैरपि सामान्यशास्त्रसङ्कोचो, न तु जातनिवृत्तिरित्युच्यते। तर्हि नियामकत्वपक्षस्यैव वैलक्षण्यमित्याशयः।

'वैयर्थ्यापत्तिः' इति। तद्वैयर्थ्यमेव 'भुक्तवन्तम्' इति न्यायानाश्रयणे बीजमिति तत्त्वम्।

ननु नियमशास्त्रवैयर्थ्यादेकवाक्यतापक्ष एव स्वीक्रियतामित्यत्र 'भुक्तवन्तम्' इति न्यायोप्यादृत एव भवतीति किं भिन्नवाक्यतया नियामकत्वकल्पनया, तत्राह—'ध्वनितम्' इति। 'स्थानेऽन्तरतमः' (१.१.५०) इति सूत्रे भाष्ये इति। तत्र हि स्थानेन्तरतमसूत्रस्य भिन्नवाक्यतया शास्त्रान्तरसिद्धादेशनिवर्तकत्वे 'भुक्तवन्तम्' इति न्यायविरोधेन जातनिवृत्त्ययोगाच्छास्त्रवैयर्थ्यमापाद्य समाहितम्। "उक्तं वा, किमुक्तम्? सिद्धन्तु षष्ठ्यधिकारे पाठादित्येकवाक्यापक्षेण"। तत्र पक्षान्तरस्यानुक्तत्वात् 'उक्तं वा' इति वाशब्देनायमेवार्थस्सूचित इति भावः।

ननु शास्त्रवैयर्थ्यमेव पक्षान्तरं किं न स्यादत आह—'शास्त्रनर्थक्यम्' इत्यादि। 'वृद्धिसंज्ञासूत्रे भाष्ये' इति। तत्र हि "प्रमाणभूत आचार्यो दर्भपवित्रपाणिश्शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्रं प्रणयति स्म, तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण इत्युक्तम्।

सामान्यशास्त्रेणोत्पत्तिस्तु समाससूत्रस्थकैयटरीत्या प्रधानानुरोधेन गुणभेदकल्पना तावत्प्रकृतिकल्पनया कार्या प्रत्ययनिवृत्तौ च तत्कल्पितप्रकृतेर्वा निवृत्तिः कल्प्येति गौरवमित्यन्यत्र विस्तरः॥

नन्वेकस्याः प्रकृतेरनेकेषां प्रत्ययानामव्यवहितपरत्वेनोत्पत्तेरेव दुर्लभत्वात्कथं नियमेन ज्ञातानां निवृत्तिरत आह—'सामान्यशास्त्रेण' इति। 'अन्यत्र विस्तरः' इति। इदन्तु बोध्यम्—विकरणेभ्यः पूर्वं लादेशाः सामान्यतो विहितानां च 'अनुदात्तङित' (१.३.१२) इत्यादिना नियमेन निवृत्तिरिति पक्षे सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः इत्यस्य नापूर्वत्वम्। 'तास्यनुदात्तेत्' (६.१.१८६) इत्यादिना तासेः प्रत्ययस्य लसार्वधातुकस्य विधीयमानानुदात्तत्वं ज्ञापकमिति वक्तुं शक्यत्वात्। लादेशेभ्यः प्रथमतो विकरणा एकवाक्यतया विहितपञ्चम्या विधानमिति पक्षे पश्चात्प्रवर्त-

मानलसार्वधातुकप्रत्ययाद्युदात्तत्वबाधनायावश्यकस्य तासिस्वरस्य ज्ञापकत्वासम्भवादपूर्वत्वमेवोक्तार्थस्येत्याहुः ।

परान्नित्यं बलवत् । कृताकृतप्रसङ्गित्वात् । तत्राक्लृप्ताभावकस्य अभावकल्पनामपेक्ष्य क्लृप्ताभावकस्यैव तत्कल्पनमुचितमिति नित्यस्य बलवत्त्वे बीजम् । तदाह –

४२. कृताकृतप्रसङ्गि नित्यम् ; तद्विपरीतमनित्यम् ।

अत एव 'तुदति' इत्यादौ परादपि गुणान्नित्यत्वाच्छप्रत्ययादिर्भवति । यद्व्यक्तिसम्बन्धितया पूर्वं प्रवृत्तिस्तद्व्यक्तिसम्बन्धितयैव पुनः प्रवृत्तौ कृताकृतप्रसङ्गित्वमित्याशयेनाह –

४३. शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति ।

ननु परान्नित्यस्य बलीयस्त्वं कुत इत्यत आह—'कृताकृतप्रसङ्गित्वात्' इति । 'तत्र' इति । परनित्ययोरित्यर्थः । 'नित्यस्य बलवत्त्वे बीजम्' इति । नन्वयं लौकिको न्यायः कथं विप्रतिषेधशास्त्रं बाधते ? सत्यम् , चरितार्थाचरितार्थयोरिव क्लृप्ताभावकाक्लृप्ताभावकयोरपि प्रबलदुर्बलभावस्य स्वतस्सिद्धतया तृजादिदृष्टान्तस्य लोकदृष्टान्तस्य वा तत्र वर्णयितुमशक्यत्वेन विधायकतया नियामकतया वा विप्रतिषेधशास्त्राप्रसङ्गः । शास्त्रस्यैव प्रथममत्र वृत्तिप्रयोजकत्वमचरितार्थ्यस्येव नित्यत्वस्यापीति वक्तुं युक्तमित्याहुः ।

कृताकृतयोरशास्त्रान्तरप्रवृत्त्यप्रवृत्त्योः प्रसज्यतीति कृताकृतप्रसङ्गि । 'यद्व्यक्तिसम्बन्धितया' इति । यथा 'पिबन्ति' इत्यत्र शबन्त्यकार्ययोः परिरूपम् । तथा पिबादेशित्वेन पूर्वं नित्यत्वात्परिरूपे पूर्वान्तत्वेन शित्परत्वात्पि-

परि. ४३. शब्दान्तरस्य प्राप्नुवन्
४४. शब्दान्तराप्राप्नुवतः शब्दान्तरे
४५. लक्षणान्तरेण प्राप्नुवन्

बादेश इत्यन्तवद्भावस्य प्रयोजनमुक्तम् 'अन्तादिवच्च' (६.१.८५) इति सूत्रे भाष्ये।

अत्र शब्दान्तरत्वं वस्तुभूतं तेनातियेशबलात्तत्त्वबुद्धावपि न क्षतिः। 'शब्दान्तरात्प्राप्नुवतः' इति। इदं 'शदेरिशतेः' (१.३.६०) इति सूत्र एव भाष्ये स्थितम्। तत्र हि 'न्यविशत' इत्यादावड्विकरणनियमेषु पदान्तरसापेक्षानियमादन्तरङ्गत्वादड्विकरणयोर्नित्यत्वाद्विकरणे विकरणान्तिमकस्य अङ्गागमस्य धातूपसर्गयोर्व्यवधायकत्वान्नियमाप्राप्तिरित्याशयेन प्रवृत्तस्य 'अङ्व्यवाय उपसंख्यानम्' इति वार्तिकस्याकर्तव्यत्वोपायतया। 'अथापि विकरणात्पूर्वमट् लभ्यते' एवमपि कृते स्यात्। तत्तु न लभ्यमङ्गात्पूर्वं विकरणा एवितव्या' इत्युक्तम्। तेन च परत्वाद्विकरणात्पूर्वमेडागमे धातुमात्रस्य धातूपसर्गयोर्व्यवधायकत्वाभावादात्मनेपदनियमसिद्धिरिति वार्तिकमनावश्यकमित्यभिप्रायो गम्यते, यदि शब्दान्तरात्प्राप्नुवतामनित्यत्वं न स्यात्तर्हि तदसङ्गतिरेव।

इदं 'शदेरिशतेः' (१.३.६०) इति सूत्रे भाष्ये स्पष्टम्। तत्रा हि 'न्यविशत' इत्यत्र विकरणे कृते तदन्तरस्याट्, अकृते 'धातुमात्रस्य' इति अडनित्य इत्युक्तम्।

एतत्तुल्यन्यायेनाह—

४४. शब्दान्तरात्प्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम्।

एतन्मूलकमेवाह—

४५. लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः।

अतिदेशविषय इयम् 'असिद्धवत्' (६.४.२२) सूत्रे कैयटे-

४६. क्वचित्कृताकृतप्रसङ्गित्वमात्रेणापि नित्यता

४७. यस्य च लक्षणान्तरेण निमित्तं विहन्यते, न तदनित्यम्

४८. यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम्

नोक्ता। यदा तु शास्त्राव्यतिरेकेण तद्विधेयकार्ययोरेव नित्यत्वादिविचारो, यदाऽपि व्यक्तिविशेषाश्रयणाभावस्तदाह —

४६. क्वचित्कृताकृतप्रसङ्गित्वमात्रेणापि नित्यता।

कृते द्वितीये नित्यत्वेनाभिमतस्य प्रसङ्गमात्रं नित्यत्वव्यवहारे प्रयोजकं, न तु बाधकाबाधितफलोपहितप्रसङ्गस्तत्रेति भावः। तदाह —

४७. यस्य च लक्षणान्तरेण निमित्तं विहन्यते, न तदनित्यम्।

क्वचित्तु बाधकाबाधितफलोपहितप्रसङ्ग एव गृह्यते, तदाह —

४८. यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम्।

तत्त्वे तु शब्दान्तरस्य प्राप्तस्य अडागमस्यैव, शब्दान्तरात्प्राप्तस्यापि विकरणस्यानित्यत्वादुभयोरनित्ययोः परत्वं व्यवस्थापकमिति भाष्यसङ्गतिः। 'शब्दान्तरे प्राप्नुवतः' इति। इदं 'वस्वेकाजाद्घसाम्' (७.२.६७) इति सूत्रे भाष्ये ध्वनितम्। तत्र हि 'विभिद्वान्' इत्यादौ इड्वारणाय कृते द्विर्वचने 'य एकाच्' इति व्याख्याय "किं पुनरयमेतत्। न हि कथमनुच्यमानं गम्यते एकाज्ग्रहणसामर्थ्यात्" इत्युक्तम्। शब्दान्तरे प्राप्तानित्यत्वाभावे तु तदसङ्गतिरेव। तत्त्वे तु शब्दान्तराप्राप्नुवतः इडागमस्यैव शब्दान्तरे प्राप्नुवतो द्विर्वचनस्याप्यनित्यतया परत्वेन व्यवस्था स्यादिति भाष्यसङ्गतिः।

'असिद्धवत्' (६.४.२२) सूत्रे इति। भाष्ये ध्वनितमिति शेषः।

'कैयटेनेद्युक्तम्' इति। तत्र 'कुर्वः' इत्यादावुकारलोपोत्तरं तस्यासिद्धत्वात् 'अत उत्सार्वधातुके' (६.४.११०) इत्युत्त्वमिष्टं सूत्रानारम्भे कथं सिद्ध्यतीति श्लोकवार्तिककारोक्तप्रयोजनमादाय नित्यत्वात्पूर्वमुकारलोपः, पश्चादगुणः, कृते ह्युकारलोपे प्रत्ययलक्षणेन भवन्, गुणो लक्षणान्तरेण प्राप्नुवन्विधिरनित्य इत्यनित्यः। ततश्चादिष्टादचः 'पूर्वाकार' इत्युत्त्वविधौ नास्ति स्थानिवत्त्वमित्युक्तम्।

नन्वेवं 'तुदति' इत्यादौ गुणे कृते शब्दान्तरात्प्राप्त्या 'स्थानिवत्' (१.१.५६)सूत्रेण प्राप्त्या च विकरणस्यानित्यत्वं स्यात्। अत आह— 'यदा तु' इत्यादि। 'कृताकृतप्रसङ्गित्वमात्रेण' इति। व्यक्तिभेदलक्षणभेदयोरनादरेणेत्यर्थः। इदम् 'इन्धिभवतिभ्याञ्च' इतिसूत्रस्थभाष्यबलाल्लभ्यते। तत्र हि 'बभूव' इत्यादौ गुणवृद्धिनिवारणार्थमारब्धं कित्त्वं भुवो वुकोऽनित्यत्वेन प्रत्याख्यातम्। यद्युक्तरीत्या नित्यत्वमनभ्युपगतं स्यात्तर्हि गुणवृद्धयोः कृतयोश्शब्दान्तरप्राप्तिलक्षणान्तरप्राप्तिभ्यामनित्यत्वमेव वुगागमस्येति तदसङ्गतिः स्पष्टैव।

(यस्य च लक्षणान्तरेण इति।) 'आतोऽनुपसर्गे' (३.२.३) इति सूत्रे भाष्ये स्फुटमेतत्। तत्र हि 'आह्वः' 'पह्वः' इत्यादौ सम्प्रसारणस्येव तदुत्तरं प्रवर्तिष्यमाणस्यान्तरङ्गेण परूपेण बाधितस्याप्याकारलोपस्यानेनैवार्थेन कृताकृतप्रसङ्गित्वमात्रमुपादाय, नित्यतया द्वयोरप्यनित्ययोः परत्वादाकारलोपे तस्याभीयत्वेनासिद्धतया सम्प्रसारणोत्तरमुवङ्भावे यण्यभीष्टसिद्धेः। कविधौ 'सर्वत्र प्रसारिणिभ्यो ङः' इति वार्तिकमनावश्यकमित्युक्तम्।

सप्तमे कैयटेन एतदुपष्टम्भकं लोकव्यवहारद्वयमुदाहृतम्। 'वालिसुग्रीवयोर्युध्यमानयोर्भगवता वालिनि हतेऽपि सुग्रीवस्य वालिनः प्राबल्यं न व्यवहरन्ति। भगवत्सहायैः पाण्डवैर्जये लब्धेऽपि पाण्डवानां प्राबल्यं व्यवहरन्ति च इति।

सर्वञ्चेदं लक्ष्यानुरोधाद्व्यवस्थितम्। 'लुटः प्रथमस्य' (२.४.८५) इति सूत्रे भाष्ये —

४९. स्वरभिन्नस्य प्राप्नुवन् विधिरनित्यो भवति ।

इति पठ्यते । यत्र त्वेकस्यैव कार्यस्य परत्वं नित्यत्वञ्च तत्रेच्छयाऽन्यतरदुभयं वा तस्य बलवत्त्वं नियामकमुल्लेख्यम् । अत एव तत्र तत्र 'परत्वान्नित्यत्वाच्च' इति भाष्ये उच्यते ।

वस्तुतः 'परत्वात्' इत्युक्तिरेकदेशिनः । स्पष्टञ्चैदं विप्रतिषेधसूत्रे कैयटे । 'णौ चङि' (७.४.१) इति ह्रस्वापेक्षया नित्यत्वान्तरङ्गत्वयुक्तद्वित्वस्य प्रथमतः प्रवृत्तौ नित्यत्वादित्येव मूल्ये उक्तम् । एवं नित्यान्तरङ्गयोर्बलवत्त्वमपि योगपद्यसम्भव एवेति बोध्यम् ।

'स्यात्' इत्यत्र कृति कृते प्रसक्तयोर्गुणणयोरन्तरङ्गत्वाद्गुणेति वदता भाष्यकारस्य नित्यत्वादगुणात्पूर्वमूठ् गुणस्त्वन्तरङ्गेण णया बाधितत्वादनित्य इति हि गूढाभिप्रायः । 'इति पठ्यते' इति । तत्र हि 'श्वः कर्ता' इत्यादौ लसार्वधातुकानुदात्तत्वस्य, यथा शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवतीत्यनित्यत्वं, तथा डारौरसामपि स्वरभिन्नस्य प्राप्नुवन्विधिरनित्यो भवतीत्यनित्यत्वम्, तृतीये द्वयोरप्यनित्ययोः परत्वाल्लसार्वधातुकानुदात्तत्वे पुनः प्रसक्तविज्ञानाद्देशे टिलोपे उदात्तनिवृत्तिस्वरेण सिद्धमिष्टमन्तोदात्तत्वम् ।

ननु परस्परप्रतिद्वन्द्विभावेनान्यत्र प्रथमप्रवृत्तिप्रयोजकबलवत्त्वनियामकत्वेन तथा परत्वादीनां सकलेष्वेव समावेशात्तत्र ताद्दृग्बलवत्त्वनियामकत्व समुदाय परिसमाप्यते, उत प्रत्येकमिति सन्देहे आह— 'यत्र तु' इति । 'अन्यतरदुभयं वा' इति । उभयथापि भाष्ये दर्शनादुभयत्रापि तत्कल्पनेति भावः ।

'एकदेशिनः' इति । समावेशस्थले प्रत्येकं क्लृप्तबलवत्त्वनियामकत्वस्य त्यागः समुदाये चाक्लृप्ते तन्नियामकत्वमिति कल्पनायां गौरवादेकदेश्युक्तित्वमेव तथाविधभाष्यस्य न्याय्यमित्याशयः ।

'विप्रतिषेधसूत्रे' (१.४.२) इति। तत्र हि 'परादन्तरङ्गं बलीयः' इत्यस्य प्रयोजनप्रस्तावे प्रत्ययविधिरेकादेशादन्तरङ्गतः प्रयोजनम् 'अग्निरिन्द्र' इति भाष्यमुपादाय कैयटेनोक्तम्। 'पदस्य विभज्यान्वाख्याने यद्यपि प्रत्ययस्य नित्यत्वं, तथाप्यन्तरङ्गेणैव सिद्धत्वान्न तदाश्रितमिति। एवञ्च प्रत्येकं बलवत्तानियामकत्वं स्पष्टमेवोक्तमित्याशयः।

'णौ चङि' (७.४.१) इति। अस्य अत एवेत्यादिः। 'नित्यत्वान्तरङ्गत्वयुक्तद्वित्वस्य' इति। ह्रस्वस्य 'चङ् णिच्च' इत्युभयं निमित्तम्, द्वित्वस्य तद्घटकश्चङेवेत्यन्तरङ्गत्वमित्याशयः। 'यौगपद्यासम्भव एव' इति। बाधकस्य बाध्यसमानविषयकताया औचित्यमत्र हेतुरित्याहुः।

'नित्यादपि' इति। अपिः परसमुच्चायकः। नन्वस्तु नित्यान्तरङ्गयोर्यत्र यौगपद्येन प्रसङ्गस्तत्र यौक्तिकबलवत्त्वोपहितान्नित्यादन्तरङ्गस्य ज्ञापकसिद्धबलवत्त्वोपहितस्य बलीयस्त्वम्। न्यायापेक्षया लिङ्गस्य प्रबलत्वात्, यत्र तु परान्तरङ्गयोः प्रसङ्गः तत्र वाचनिकबलवत्त्वाक्रान्तपरापेक्षया लिङ्गजन्यबलवत्त्वाक्रान्तस्य कथमन्तरङ्गस्य प्राबल्यम्। श्रुत्यपेक्षया लिङ्गस्य दौर्बल्यौचित्यात्। एतेन परादन्तरङ्गस्य बलवत्त्वे विप्रतिषेधशास्त्रमेव हेतुः। ज्ञापकदेशमादाय बहिरङ्गपरिभाषा हि परेत्ययुक्तमेव तुल्यबलत्वाभावात् इति चेत्, मैवम्; अन्तरङ्गबलवत्ताज्ञापकेन 'ओमाङोश्च' (६.१.९५) इत्याङ्ग्रहणेनैवोक्तार्थसिद्धेः। अन्यथा 'शिव आ इहि' इत्यादौ परत्वात्सवर्णदीर्घे पश्चात् गुणे 'शिवेहि' इत्यादिसिद्धौ ज्ञापितेऽपि चारितार्थ्ययोगात् ज्ञापकत्वमेव भज्येतेत्याहुः।

नित्यादप्यन्तरङ्गं बलीयः, अन्तरङ्गे बहिरङ्गस्यासिद्धत्वादित्याह —

५०. असिद्धं बहिरङ्गमन्तरङ्गे।

अन्तर्मध्ये बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्येऽन्तर्भूतान्यङ्गानि निमित्तानि यस्य तदन्तरङ्गम्।

अत्र प्राञ्चः—अन्तर्बहिश्शब्दौ व्याप्यव्यापकपरौ, अङ्गशब्दश्च निमित्तवाची। निमित्तगतश्च व्याप्यव्यापकभावः संख्याकृतो विवक्षितः, ततश्च बहुसंख्याकनिमित्तापेक्षमल्पसंख्याकनिमित्तापेक्षे कर्तव्ये जातं समकालप्राप्तञ्चाविद्यमानवदिति परिभाषार्थः। अङ्गशब्देन च तत्तत्कार्योपकारकत्वेन शास्त्रे गृहीतं सर्वं परामृश्यते, न तु शब्दस्वरूपमेवेत्याग्रहो मानाभावात्। एवञ्च संज्ञाविशेषस्यार्थस्य च "निमित्तत्वेन ग्रहणं निर्बाधम्"। अत एव 'येन विधिः' (१.१.७२) इतिसूत्रे भाष्यम्। 'इको यणचि' (६.१.७७) इत्यादावपि तदादिविधौ 'स्योनः' इत्यत्रान्तरङ्गत्वाद्यणो गुणबाधकत्वमिष्यते, तन्न सिद्ध्येत्। ऊनशब्दमाश्रित्य यणादेशो, न शब्दमाश्रित्य गुण इत्युक्तम्। तस्य वा सीव्यतेर्बाहुलकादौणादिके नप्रत्यये गुणवलोपोठां प्रसङ्गे ऊठपवादत्वाद्वलोपं बाधते, गुणन्त्वन्तरङ्गत्वात्, गुणो ह्यङ्गसम्बन्धिनौ लघ्वीमुपधामार्धधातुकञ्चाश्रयति; ऊठ् तु 'वकारान्तमङ्गमनुनासिकादिञ्च प्रत्ययम्, इत्यल्पापेक्षत्वादन्तरङ्गः। तत्र कृते यणगुणौ प्राप्नुत इति कैयटवर्णितोऽभिप्रायः।

ततश्च संज्ञानिमित्तकत्वेन गुणस्य बहिरङ्गत्वं स्पष्टमेवाभ्युपगतम्। 'बह्वपेक्षं बहिरङ्गं, अल्पापेक्षमन्तरङ्गम्' इत्यत्राप्ययमेवाकरः प्रमाणम्। तथा च 'वर्णो वर्णेन' (२.१.६९) इति सूत्रे भाष्यम्। 'समानाधिकरणसमासाद्बहुव्रीहिर्विप्रतिषेधेन समानाधिकरणसमासस्यावकाशो' 'वीरः पुरुषो वीरपुरुषः' इति बहुव्रीहेस्तु 'कण्ठेकालः' इति। इहोभयं प्राप्नोति 'वीरपुरुषको ग्रामः' इति बहुव्रीहिर्भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। अन्तरङ्गः कर्मधारयः। काऽन्तरङ्गता? स्वपदार्थे कर्मधारयः, अन्यपदार्थे बहुव्रीहिः' इति। इत्थञ्च बहुव्रीहेरर्थनिमित्तकत्वेन बहिरङ्गत्वं स्पष्टमेवोक्तम्।

निमित्तगतानामपि धर्माणां निमित्तत्वाविशेषात्सामान्यापेक्षाद्विशेषापेक्षं बहिरङ्गमित्यपि सिद्धम्। विशेषे हि निमित्तत्वेनोपादीयमाने तदविनाभूतस्य सामान्यस्य निमित्तत्वेन ग्रहणं न्यायप्राप्तमिति विशेषापेक्षमुभयनिमित्तं भवति। सोऽयमन्तरङ्गबहिरङ्गभावो लक्षणेनैव सिद्धो, न लक्ष्यपर्यालोचनमपेक्षते।

यश्च 'पद्भ्याम्', मृद्भ्यः इत्यादौ पूर्वं पूर्वमन्तरङ्गं, परं परं बहिरङ्गमिति 'अचः परस्मिन्' (१.१.५७) इति सूत्रे भाष्यकारोपदर्शितो लोकदृष्टान्तसिद्धान्तरङ्गबहिरङ्गभावः स इह लक्ष्यदर्शनापेक्षः। प्रक्रियाक्रमाधीनकार्यगतपूर्वोपस्थितिकत्वज्ञानस्य तत्पर्यालोचनामन्तरेण दुर्लभत्वात्। 'पूर्वं धातुसुबर्गेण युज्यते' इति सिद्धान्तसिद्धं धातूपसर्गयोः कार्यमन्तरङ्गमित्यप्येतन्मूलकमेव। अत एवं 'सञ्चस्कार' इत्यादावन्तरङ्गत्वात्सुटि पश्चाद्द्विर्वचनेनाभीष्टसिद्धया व्यर्थं सुट्कात्पूर्वे इति प्रत्याख्यातं षाष्ठे भाष्ये।

अथास्मिन्बह्वपेक्षं बहिरङ्गमल्पापेक्षमन्तरङ्गमिति निष्कर्षे ज्ञापकभूमिविरोधः। तथा हि जातबहिरङ्गस्यासिद्धताविषये 'वाह ऊठ्' (६.४.१३२) सूत्रस्थमूठ्ग्रहणं ज्ञापकम्। तद्धि वृद्ध्यर्थम्; अन्यथा सम्प्रसारणमात्रविधानेऽपि ण्विनिमित्तके लघूपधगुणे 'वृद्धिरेचि' (६.१.८८) इति वृद्धौ व्यर्थं तदिति ज्ञापकतासम्भवः।

यदि च बह्वपेक्षत्वं बहिरङ्गत्वं, संज्ञायाश्च निमित्तत्वं, तर्ह्यङ्गलघूपधासंज्ञासापेक्षादार्धधातुकसंज्ञासापेक्षाच्च गुणादङ्गभसंज्ञामात्रसापेक्षस्य सम्प्रसारणस्य बहिरङ्गत्वानौचित्याच्चारितार्थ्यायोगेन ज्ञापकताभङ्गः। वृद्ध्यपेक्षया न सम्प्रसारणस्य गुणस्य वा बहिरङ्गासिद्धत्वेन चारितार्थ्यसम्भवः। वृद्धावन्तरङ्गे 'नाजानन्तर्यं' (प. ९) इति निषेधेन प्रकृतपरिभाषाप्रवृत्तिदौर्लभ्यादिति चेत्? सत्यम्; 'वाहनं वहतीति, वाहनवाट्, तस्य वाहनौहः' इत्यादौ प्राथमिकस्य वाहः सम्प्रसारणव्यावृत्तये 'व्यङः' (६.१.१३) इति सूत्रस्थभाष्यकारोपदर्शितदिशा भसंज्ञाक्षिप्तयजाद्यसर्वनामस्थानस्वादिप्रत्ययसम्बन्धस्यावश्यकत्वेन गुणापेक्षया सम्प्रसारणस्य बह्वपेक्षत्वं सुपपादमित्यदोषः। 'अनन्त्यविकारेऽन्त्यसदेशस्य' इति परिभाषा तु नेह प्रवर्तते, अन्त्यवर्णतद्वर्णयोरितराव्यवधान एव तत्प्रवृत्तेरिति दिक्।

अत्रेदं बोध्यम्—जातबहिरङ्गासिद्धत्वमन्तरङ्गस्याप्रवर्तकम्, यथा 'पचावेदम्' इत्यत्र गुणस्यासिद्धत्वेन निमित्ताभावात् 'एत ऐ' (३.४.९३) इत्यस्याप्रवृत्तिः। समकालप्राप्तबहिरङ्गासिद्धत्वन्तु बहिरङ्गस्यैव, यथा 'अदुद्रुवत्'

इत्यत्र चङ्निमित्तकादुर्वङो ,बहिरङ्गत्वेनासिद्धत्वाल्लघूपधगुणस्याप्रवृत्ति-रित्याहुः। अन्तरङ्गशास्त्रमेवास्याः परिभाषायाः प्रवृत्तौ लिङ्गम्।

अथापि कार्यकालपक्षे त्रिपाद्यां प्रवर्तत एव। तत्पक्षे संज्ञापरिभाषाणां विधिदेशीयत्वाभ्युपगमेन प्रकृतपरिभाषादृष्ट्या अन्तरङ्गे त्रैपादिकासिद्धत्वस्य दुर्वचत्वात्। ननु परिभाषादृष्ट्या त्रैपादिकान्तरङ्गस्यासिद्धत्वाभावेऽपि सापादिकबहिरङ्गशास्त्रदृष्ट्या तदसिद्धत्वस्य दुर्वारत्वेन युगपदुभयोरेकस्यां बुद्धौ समावेशासम्भवादन्तरङ्गबहिरङ्गभाव एव दुर्लभः। अन्तरङ्गे हि बुद्धिस्थे तन्निरूपितं बहिरङ्गत्वेनाभिमतस्य बहिरङ्गत्वं लभ्यते। तथा बहिरङ्गनिरूपित-मन्तरङ्गत्वमप्यन्तरङ्गत्वेनाभिमतस्य बहिरङ्गे बुद्धिस्थे।

ततश्च निरूप्यनिरूपकभावापन्नबहिरङ्गत्वान्तरङ्गत्वरूपधर्मद्वयप्रयोजकयोर्द्वयोरपि शास्त्रयोर्यत्र यौगपद्येनोपस्थितिस्तत्रैवान्तरङ्गबहिरङ्गभावः। यत्र त्वन्यतरस्यासिद्धत्वं तत्र तादृशधर्मद्वयप्रयोजकयोर्द्वयोः शास्त्रयोरसिद्धा-सिद्धिभावेन युगपदुपस्थितिविषयता। लक्षणस्यैकबुद्ध्युपारोहस्यासम्भवात्क-थमन्तरङ्गबहिरङ्गभावः। तदुक्तं विसर्जनीयसूत्रे भाष्ये नार्कुटादौ विसर्गा-भावाय "विसर्जनीयोऽनूत्तरपदे न वा बहिरङ्गलक्षणत्वात्" इति वार्त्तिक-मुपक्रम्य "नैषयुक्तः परिहारः, अन्तरङ्गं बहिरङ्गमिति प्रतिद्वन्द्वभाविनावे-तावर्थौ सत्यन्तरङ्गे बहिरङ्गं, सति च बहिरङ्गे अन्तरङ्गम्। न चात्रान्तर-ङ्गबहिरङ्गयोर्युगपत्समवधानमस्ति, किं कारणम्? असिद्धत्वात्" इति। ततश्च कथं त्रिपाद्यामन्तरङ्गपरिभाषया व्यवस्था स्यादितिचेत्? मैवम्; 'पूर्वत्रासिद्धम्' (८.२.१) इत्यत्र हि कर्तव्ये इत्यध्याहारेण पूर्वशास्त्रीय-कर्तव्यतायां जातं, समकालप्राप्ते वा परमसिद्धमित्येवार्थः। न तु पूर्वशास्त्र-प्रवृत्तिविषये परमसिद्धमिति।

अन्यथा 'गोमान्, धीमान्' इत्यादौ नलोपप्रवृत्तिविषयतामादाय पूर्वं संयोगान्तलोपस्याप्रवृत्त्यापत्तेः। नार्कुटादौ च वृद्ध्युत्तरमसिद्धत्वादेव विसर्गा-प्रवृत्तौ वार्तिकारम्भवैफल्याच्च। तस्माज्जातबहिरङ्गविषये त्रैपादिकासिद्ध-त्वस्य अन्तरङ्गबहिरङ्गभावप्रतिबन्धकत्वायोगेन परिभाषाप्रवृत्तेरव्याहतत्वात्।

प्रागुक्तभाष्यन्तु समकालप्राप्तान्तरङ्गभावविषयकं. प्रसङ्गाज्जातबहिरङ्गविषये प्रवर्तितं केनाप्येकदेशिना ।

अत एव जातबहिरङ्गविषये त्रैपादिकान्तरङ्गस्यासिद्धत्वाभावतात्पर्यकं नानभिनिर्वृत्ते बहिरङ्गेऽन्तरङ्गं प्राप्नोति । तत्र निमित्तमेव बहिरङ्गमन्तरङ्गस्येति तदुत्तरभाष्यं स्वरसत उपपद्यते । अनभिनिर्वृत्तं हि बहिरङ्गं सापादिकं 'पूर्वत्रासिद्धम्' (८.२.१) इत्यस्य विषयः । न ह्यत्र तथा, येन त्रैपादिकासिद्धत्वादन्तरङ्गबहिरङ्गयोर्युगपदुपस्थित्यभाव आपद्येतेति तदाशयः । न च 'अनिमित्तं बहिरङ्गमन्तरङ्गस्य । किं कारणम् ? असिद्धत्वात्' इति । जातबहिरङ्गमुपादाय प्रवृत्तस्य तदुत्तरभाष्यस्यासङ्गतिरिति वाच्यम् । तस्य यथोद्देशतात्पर्यकैकदेश्युक्तित्वेनादोषात् । यथोद्देशे परिभाषां प्रत्यन्तरङ्गस्यासिद्धतया तन्निरूपितबहिरङ्गत्वस्य बहिरङ्गत्वेनाभिमते दुर्ज्ञेयत्वेनान्तरङ्गबहिरङ्गभावप्रयुक्तायाः प्रकृतपरिभाषाया अप्रवृत्त्या यदन्तरङ्गत्वेनाभिमतं तन्निरूपितबहिरङ्गत्वाभिप्रायविषयस्य बहिरङ्गासिद्धत्वं प्रति निमित्तत्वं नेति तदर्थः ।

अत एव तदुत्तरं कथमिति प्रश्ने यावता 'पूर्वत्रासिद्धम्' (८.२.१) इत्यसिद्धा परिभाषेत्युत्तरितं भाष्ये । 'असिद्धा' इत्यस्य 'अप्रवृत्ता' इत्यर्थः । ततस्सिद्धान्तिना कार्यकालपक्षमाश्रित्य प्रकृतपरिभाषायास्त्रिपाद्यां प्रवृत्तौ साधितायां 'पूर्वत्रासिद्धम्' इत्यत्र 'कर्तव्ये' इत्यस्याध्याहारमजानानेनैकदेशिनां कुतो नु खल्वेतत् ! द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः 'पूर्वत्रासिद्धम्' (८.२.१) इत्यसिद्धं बहिरङ्गमन्तरङ्ग इति च । 'पूर्वत्रासिद्धम्' इत्येतामुपमृद्यासिद्धं बहिरङ्गमन्तरङ्ग इत्येतया व्यवस्था भविष्यति, न पुनरसिद्धं बहिरङ्गमन्तरङ्ग इत्येतामुपमृद्य, 'पूर्वत्रासिद्धम्' (८.२.१) इत्यनया व्यवस्था स्यात् ।

आतः 'किम्' इत्युक्तम् । चक्रकदोषाद्वयोरप्यप्रवृत्त्यापत्तौ नार्कुटादौ रेफस्यासिद्धत्वं दुर्निरूपमिति कार्यकालपक्षाश्रयणात्तव किं भवतीति तदाशयः । ततस्सिद्धान्तिना 'अतो युक्तः परिहारो न वा बहिरङ्गलक्षणत्वात्'

इत्युक्त्वा 'उपसंहृतम्'। 'कर्तव्ये' इत्यध्याहारात्कृते 'पूर्वत्रासिद्धम्' (८.२.१) इत्यस्याप्रवृत्त्या निष्प्रतिपक्षत्वाद्बहिरङ्गपरिभाषया व्यवस्था भविष्यति।

मास्तु वा 'कर्तव्ये' इत्याध्याहारः। 'चक्रकेऽविष्टतो व्यवस्था' इति बहिरङ्गपरिभाषया व्यवस्था भविष्यति। तस्मादुक्त एवायं परिहारो न वा बहिरङ्गलक्षणत्वादिति तदर्थः।

इत्थञ्च कार्यकालपक्षे त्रैपादिकान्तरङ्गमाश्रित्य बहिरङ्गपरिभाषाप्रवृत्तौ न कश्चिद्विरोधः। अत एव 'एओङ्'सूत्रे भाष्ये 'वर्णैकदेशा वर्णग्रहणेन न गृह्यन्ते' इति पक्षे 'मातॄणां' 'पितॄणां' इत्यादौ णत्वार्थं, णत्वविधावृकार-ग्रहणं कर्तव्यमिति गौरवमुद्भाव्यं, 'यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति—'भवति ऋवर्णान्नो णत्वम्' इति। यदयं क्षुभ्नादिषु नृमनशब्दं पठति। नैतदस्ति ज्ञापकं वृद्ध्यर्थमेतत्स्यात्, नार्न-मनिरिति। मत्तर्हि तुप्नोतिशब्दं पठति। यच्चापि नृमनशब्दं पठति। ननु चोक्तं वृद्ध्यर्थमेतत्स्यात् न; बहिरङ्गा वृद्धिः, अन्तरङ्गं णत्वम्। 'असिद्धं बहिरङ्गमन्तरङ्गे' (प. ९०) इत्युक्तम्। तथा 'रदाभ्यां' (८.२.४२) इति सूत्रे भाष्ये 'कृतस्यापत्यं कार्तिः। क्षितस्यायत्यं क्षैतिः' इत्यादौ निष्ठानत्वा-भावाय प्रवृत्तं 'वृद्धिनिमित्तात्प्रतिषेधः' इति वार्तिकमुपक्रम्य, 'स तर्हि प्रति-षेधो वक्तव्यो न वा बहिरङ्गलक्षणत्वात्। न वा वक्तव्यः; बहिरङ्गलक्षण-त्वात्। बहिरङ्गा वृद्धिरन्तरङ्गं नत्वम्। 'असिद्धं बहिरङ्गमन्तरङ्गे' (प. ९८) इति प्रत्याख्यातम्। अत एव 'नृमतोऽपत्यं नामतः' इत्यादौ 'मादुप-धायाः' (८.२.९) इति वत्वाभावो, 'नृकल्पस्यापत्यं नार्कल्पिः' इत्यादौ विसर्गाभावश्च सिद्ध इति सर्वमिष्टं संगृहीतमिति प्राहुः। उपाध्यायस्तु—वक्ष्यमाणदोषैः प्रागुक्तदोषैश्च तत्रासाङ्गत्यं मन्यमानः प्रकारान्तरेण व्याचष्टे-'अन्तर्मध्य' इति।

मध्यत्वस्य सनिरूपकत्वादाह-'बहिरङ्गशास्त्रीय' इत्यादि। निमित्त-समुदायश्च लक्ष्यगतो विवक्षितः। तत्रैव घटितघटकभावोपपत्तेः। एवमुत्तर-त्रापि। एवञ्च लक्ष्यगत एवायं बहिरङ्गभावः सर्वत्र कार्याणामिति निष्कर्षः।

अत्र बहिरङ्गशब्देन बहिरङ्गत्वेनाभिमतं विवक्षितम । एवं 'तदीयसमुदाय' इत्यत्र तच्छब्देनान्तरङ्गत्वेनाभिमतमतो नान्योन्याश्रयः । एवञ्च यदीयनिमित्तसमुदायघटितनिमित्तकं यत् तदपेक्षया तद्बहिरङ्गम् । तथा यदीयनिमित्तसमुदायघटकनिमित्तकं यत् तदपेक्षया तदन्तरङ्गमिति परमार्थः ।

एवं तदीयनिमित्तसमुदायादबहिर्भूताङ्गकं बहिरङ्गम् । एतच्च 'खरवसानयोः' (८.३.१५) इति सूत्रे 'असिद्धवत्' (६.४.२२) सूत्रे च भाष्यकैयटयोः स्पष्टम् । अत्र 'अङ्ग'शब्देन शब्दरूपं निमित्तं गृह्यते । शब्दशास्त्रे तस्य प्रधानत्वात् । तेनार्थनिमित्तकस्य न बहिरङ्गत्वम् । अत एव 'न तिसृ' (६.४.४) इति निषेधश्चरितार्थः ।

'शब्दस्वरूपं निमित्तम्' इति । अत्रोद्देश्यस्यापि निमित्तत्वेन ग्रहणमभ्युपेत्यैवोपकारकमात्रपरत्वात् । न हि 'कार्यी' इति न्यायस्तु नात्र प्रवर्तते । ऊठ्ग्रहणेनैतत्परिभाषाज्ञापनपरभाष्यप्रामाण्यात् । अन्यथा ण्वि-शसोः परस्परमनन्तभूतत्वेन तदसङ्गतिरेव ज्ञापकभूमिविरोधात् । षष्ठ्यन्तोपात्तस्यादेशस्यापि निमित्तत्वेन ग्रहणे तु लघूपधगुणोद्देश्यघटितसमुदायोद्देश्यकस्य सम्प्रसारणस्य बहिरङ्गत्वम् । सम्प्रसारणोद्देश्यघटकसमुदायोद्देश्यकस्य लघूपधगुणस्य अन्तरङ्गत्वमिति परिभाषाप्रवृत्तिसौलभ्यान्न तद्विरोधः । नापि 'सुस्यूषति' इत्याद्यसिद्धिः । अन्यथा ह्यपरनिमित्तकत्वेन अन्तरङ्गत्वादूठः पूर्वं द्वित्वप्रसङ्गः । सिद्धान्ते तु द्वयोरप्यन्तरङ्गत्वेन परत्वाद्वयवस्था सुवचेत्याहुः ।

'अर्थनिमित्तकस्य' इति । उपकारकत्वाविशेषात्प्राप्तं निमित्तत्वमर्थस्येह नाश्रीयत इति भावः । उक्तमर्थं प्रमाणयति — 'अत एव' इत्यादि । 'न तिसृ' इति । अन्तरङ्गत्वात्त्रयादेशे तत एव दीर्घे पश्चात्तिस्रादेशे तस्यासिद्धत्वादादेशे दीर्घाप्राप्तिः । स्थानिनि कृतत्वाल्लक्ष्ये लक्षणस्येति न्यायेन तद्बुद्ध्यापि न तत्प्राप्तिरिति वैयर्थ्यमित्याशयः ।

अन्यथा स्त्रीत्वनिमित्तकतिस्रपेक्षयान्तरङ्गत्वात्त्रयादेशे तदसङ्गतिः स्पष्टैव। अत एव त्रयादेशे 'स्रन्तस्य प्रतिषेधः' इति स्थानिवत्सूत्रा(१.१.५६)भाष्यवार्तिकादि सङ्गच्छते। एतेन 'गौधेरः पत्तेरन्' इत्यादौ एयादीनामङ्गसंज्ञाद्यपेक्षत्वेन बहिरङ्गतया असिद्धत्वात् वलिलोपो न स्यादिति परास्तम्।

प्रतिपदविधित्वमूलकं तिस्रादेशस्यान्तरङ्गत्वन्तु। न। दीर्घस्यापि निमित्तांशे प्रतिपदोक्तत्वेन तन्मूलकान्तरङ्गत्वस्य सुवचत्वात्। न च तक्रकौण्डिन्यन्यायेन तुटं बाधित्वा त्रयादेशे पश्चान्नुटोऽप्राप्त्या व्यर्थ एवायं निषेध इति वाच्यम्। तस्यानित्यत्वेनाप्रवृत्त्या सार्थक्यसम्भवात्। 'त्रयादेशे स्रन्तस्य' इति। त्रयादेशे कर्तव्ये स्थानिवद्भावेन स्रन्तस्य त्रिशब्दत्वं नेति तदर्थः। नन्वर्थस्य निमित्तत्वानभ्युपगमे 'वर्णो वर्णेन' (६.२.३) इति सूत्रस्थभाष्यविरोधः। तत्र हि कर्मधारयापेक्षया बहुव्रीहेरन्यपदार्थापेक्षत्वेन बहिरङ्गत्वमुक्तमिति चेत्? न; 'कण्ठेकालः' इत्यादौ 'सप्तमीविशेषणे बहुव्रीहौ' (२.२.३५) इति ज्ञापकादेव बहुव्रीहिसिद्धिमास्थाय, 'पञ्चभिर्मुक्तमस्य' इत्यर्थे बहुव्रीहिवारणाय समानाधिकरणानामेव बहुव्रीहिरित्यर्थस्यावश्यमभ्युपगन्तव्यतया निरवकाशत्वादेव 'वीरपुरुषः' इत्यादावन्यपदार्थविवक्षायां कर्मधारयव्यावृत्तौ समानाधिकरणसमासात् 'बहुव्रीहिर्विप्रतिषेधेन' इति वार्तिकारम्भस्य तत्खण्डनोपायतया बहुव्रीहिकर्मधारययोरन्तरङ्गबहिरङ्गभावोपवर्णनमित्यनयोर्द्वयोरप्येकदेश्युक्तित्वेनादोषात्।

यत्तु 'दिक्संख्ये संज्ञायाम्' (२.१.५०) इति नियमेन संज्ञायामेव दिक्संख्ययोः कर्मधारयप्रवृत्तेरसंज्ञायां बहुव्रीहेश्चारितार्थ्यम्। तथा 'प्राप्तोदकः' इत्यादौ समासगतस्योदककर्तृकप्राप्तिकर्मरूपार्थस्य अलौकिके आरोपेण समासस्य वक्तव्यतया तत्र प्राप्तशब्दस्य प्राप्तिमात्रबोधकत्वेन सामानाधिकरण्याभावात्कर्मधारयाप्रवृत्तेश्च तस्य चारितार्थ्यम्। ततश्च बहुव्रीहेरपवादत्वासम्भवात् कथमस्य भाष्यस्यैकदेश्युक्तित्वमित्याहुः।

तत्रेदं वक्तव्यम्–'दिक्संख्ये संज्ञायाम्' (२.१.५०) इत्ययं नियमो

हि न कर्मधारयस्य, किन्त्वेकार्थीभावस्य, अन्यथा वृत्त्यभावेऽप्येकार्थीभावप्रसङ्गात्। तस्मादसंज्ञायामेकार्थीभावाभावात्कथमिदानीं दिक्संख्याविषये बहुव्रीहिः स्यात्। सिद्धान्ते तु 'स्वपदार्थे कर्मधारयः, 'अन्यपदार्थे बहुव्रीहिः' इति व्यवस्थापनादयं नियमः स्वपदार्थमात्रविषयक एवेति।

अन्यपदार्थान्तर्भावेण वृत्तौ तद्विषये संज्ञायामसंज्ञायां वा बहुव्रीहिर्भवत्येव। प्राप्तोदकादावपि प्रातिपदकार्थसूत्रस्थशब्दरत्नाद्युक्तमार्गेण 'प्राप्तकर्तृदककर्म' इत्येव बोध इति तदर्थारोपेऽपि अलौकिके वाक्ये प्राप्तशब्दस्य प्राप्तिकर्तृरूपार्थबोधकत्वाबाधेन कथमलौकिके कर्मधारयप्रवृत्तिप्रतिबन्धकसामानाधिकरण्यं स्यात्। अस्तु वा 'उदककर्तृकप्राप्तिकर्म' इत्येवार्थः, तावतापि 'समानाधिकरणानामेव बहुव्रीहिः' इत्यनुशासनानुरोधेन यदि बहुप्रवृत्तिप्रयोजकतया लौकिकवाक्यीयसामानाधिकरण्यमुपादीयते, तर्हि कर्मधारये तस्य कुतस्त्याग इत्यतो न किञ्चिदेतत्।

यदपि 'पञ्चगवधनः' इत्यादौ त्रयाणामेकार्थीभावे बहुव्रीहेश्चारितार्थ्यं, न हि तत्र कर्मधारयः प्राप्नोति। द्वयोरेव तद्विधानादित्याहुः, तदपि न; द्वयोरेकार्थीभावे बहुव्रीहेरप्रवृत्तावनेकग्रहणवैयर्थ्येण चारितार्थ्यस्य दुर्वचत्वात्। अत एव अपवादत्वेन 'वीरपुरुषः' इत्यादौ बहुव्रीहिसमर्थनपरमग्रिमं भाष्यं सङ्गच्छते। 'स्थानिवत्' (१.१.५६) सूत्रस्थमुक्तवार्तिकं तद्भाष्यमप्यस्यैवैकदेश्युक्तित्वे साधकमिति दिक्।

'एतेन' इति। परिभाषायां 'अङ्ग'शब्देन 'शब्दस्वरूपस्यैव ग्रहणम्' इत्यभिधानेनेत्यर्थः। 'अपास्तम्' इति। संज्ञानिमित्तकस्य बहिरङ्गत्वाभावादित्याशयः।

एयादेशादेरपरनिमित्तकत्वेनान्तरङ्गत्वाच्च। ननु 'येनविधिस्तदन्तस्य' (१.१.७२) इति सूत्रे भाष्ये 'इको यणचि' (६.१.७७) इत्यादावपि तदन्तविधौ स्योन इत्यत्रान्तरङ्गत्वाद्यणो गुणबाधकत्वमिष्यते, तन्न सिद्ध्येत्। 'ऊनशब्दमाश्रित्य यणादेशः, न

शब्दमाश्रित्य गुणः इत्यन्तरङ्गत्वात् गुण एव स्यादित्युक्तम् । अत्र कैयटः—सिवेर्बाहुलकादौणादिके नप्रत्यये गुणवलोपेठां प्रसङ्गे ऊठ् अपवादत्वाद्वलोपं बाधते । गुणन्त्वन्तरङ्गत्वाद्बाधते । गुणो-ह्यङ्गसम्बन्धिनीमिग्लक्षणां लघ्वीमुपधामार्धधातुकञ्चाश्रयति । ऊठ् तु वकारान्तमङ्गमनुनासिकादिञ्च प्रत्ययमित्यल्पापेक्षत्वादन्तरङ्गम्, तत्र कृते यणेगुणौ प्राप्नुत इति । एवञ्च संज्ञापेक्षस्यापि बहिरङ्ग-त्वं स्पष्टमेवोक्तमिति ? तन्न; तदन्तविधावपि बह्वपेक्षत्वस्य गुणे सत्त्वेन तत्र दोषकथनपरभाष्यासङ्गतेः । बहिरङ्गान्तरङ्गशब्दा-भ्यां बह्वपेक्षत्वाल्पापेक्षत्वयोः शब्दमर्यादया अलाभाच्च ।

'अपरनिमित्तकत्वेन' इति । 'वृद्भ्यः स्यसनोः' इति स्ये तङ्-विकल्पविधानेन विकरणेभ्यो नियमस्य बलीयस्त्वज्ञापनं भाष्यकृतामेवम्वि-धान्तरङ्गत्वज्ञापकमूलकमेव लाघवात् । अत एव 'शदेश्शितः' (१.३.६०) इति सूत्रे भाष्ये 'अड्व्यवाय उपसंख्यानम्' इति वार्तिकमुपक्रम्य 'न्यविशत' इत्यत्राडपेक्षया अन्तरङ्गत्वाल्लादेशे, ततोऽङ्विकरणयोर्नित्यत्वाद्विकरणे, पश्चादटि, तेन व्यवधानाद्धातूपसर्गयोः विंशः (१.३.१७) इति प्राप्नोती-त्युक्तम् । अन्यथा लादेशस्याडपेक्षया पूर्वं प्रवृत्तावुपायाभावात्तदसङ्गतिरेव ।

अत एव 'चुञ्चुप्चणपोः' उपदेशे यकारादित्वेन यलोपस्य बहिरङ्गा-सिद्धत्वमास्थाय, तयोश्चारस्येन्संज्ञावारणमित्संज्ञाप्रघट्टकस्थं भाष्यकैयटयोः सङ्गच्छते । अतिप्रसङ्गस्त्वनित्यत्वेन परिभाषायाः परिहरणीयो यद्युपलभ्ये-तेत्याशयः । यत्तु अपरनिमित्तकस्य कथमन्तरङ्गत्वम् । 'घटकनिमित्तकस्या-न्तरङ्गत्वं, घटितनिमित्तकस्य बहिरङ्गत्वम्' इत्येव शब्दमर्यादया लाभात् । अत इदमयुक्तमेवेति ? तदसत् ; अन्तर्भूतानि पूर्वत्र विद्यमानानि, न तु परत्र निमित्तानि यस्य तदन्तरङ्गम् । बहिर्भूतानि कार्यिणः परत्र विद्यमानानि निमित्तानि यस्य तद् बहिरङ्गमिति विवक्षया निरुक्तार्थलाभसम्भवात् । परि-भाषाचेयमीदृशान्तरङ्गबहिरङ्गभावविषयेऽपि प्रवर्तत एव प्रागुक्तभाष्यप्रामा-ण्यादित्याहुः ।

'अन्तरङ्गत्वाद्गुण एव स्यात्' इति । एवमर्थकमुक्तमित्यर्थः । भाष्ये तु अन्तरङ्गबहिरङ्गे न प्रकल्पेयाताम् । अन्तरङ्गलक्षणस्य यणो बहिरङ्गलक्षणो गुणो बाधकः प्रसज्येत । ऊनशब्दमाश्रित्य यणादेशो नशब्दमाश्रित्य गुण इत्युक्तम् ।

'अल्पापेक्षत्वादन्तरङ्गः' इति । गुणस्य निमित्तपञ्चकाश्रयणम् । ऊठस्तु तच्चतुष्टयाश्रयणमिति भावः । 'भाष्यासङ्गेतेः' इति । ननु यणपेक्षया गुणस्य निमित्तपञ्चकाश्रयत्वेन बहिरङ्गत्वेऽपि यणादेशनिमित्तभूतो नशब्दघटकनशब्दनिमित्तकत्वेन गुणस्य अन्तरङ्गताया अपि सुवचत्वेन विरोधात्परिभाषाया अप्रवृत्तौ परत्वाद्गुणः स्यादित्याशयः । कथमन्यथा षष्ठ्यन्तोपात्तस्यापि निमित्ततया यणादेशसम्बन्धिसप्तम्यन्तोपात्तनिमित्तघटकनिमित्तकत्वेन गुणस्येव गुणसम्बन्धिषष्ठ्यन्तोपात्तनिमित्तघटकनिमित्तकत्वेन यणादेशस्याप्यन्तरङ्गतया भवतामपि तद्भाष्यं सङ्गतं स्यात् । अतः कथमसाङ्गत्यमिति चेत् ? न; बहिरन्तरशब्दयोः संख्याकृतबहुत्वाल्पत्वबोधकतां पुरस्कृत्य 'बह्वपेक्षं बहिरङ्गम्, अल्पापेक्षमन्तरङ्गम्' इत्यभ्युपगच्छता, तथाविधबहुत्वाल्पत्वविरोधाद् घटितघटकनिमित्तकयोर्बहिरङ्गान्तरङ्गभावस्य वक्तुमशक्यत्वेनोक्तरीत्या प्रकृतभाष्यसमर्थनानुपपत्तेः ।

न च बहिरङ्गान्तरङ्गशब्दयोरावृत्तिवशादर्थद्वयकल्पनया निर्वाह इति वाच्यम् । आवृत्तौ मानाभावत्, गौरवाच्च । घटितघटकनिमित्तकयोर्बहिरङ्गान्तरङ्गभावोपवर्णने एवोपपत्तावधिकस्य 'बह्वपेक्षं बहिरङ्गम्, अल्पापेक्षमन्तरङ्गम्' इत्यस्य नैष्फल्यापत्तेश्चेत्यास्ताम् । अभ्युपगम्येदमुक्तम् । वस्तुतो 'बह्वपेक्षं बहिरङ्गम्, अल्पापेक्षमन्तरङ्गम्' इत्ययुक्त एवायमर्थ इत्याह–'बहिरङ्गान्तरङ्गशब्दाभ्याम्' इति । शब्दमर्यादा शब्दशक्तिः । 'अलाभात्' इति ।

तथा सत्यसिद्धं बह्वपेक्षमल्पापेक्ष इत्येव वदेत् । अत एव 'विप्रतिषेध'(१.४.२)सूत्रे भाष्ये गुणाद्यणादेशोऽन्तरङ्गत्वादित्यस्य 'स्योनः' इत्युदाहरणम् । न तु गुणादूठ् अन्तरङ्गत्वादित्युक्तम् । त्वद्रीत्या तदपि वक्तुमुचितम् । प्राथम्यात्तदेव वा वक्तु-

मुचितम्। प्रम त्वन्तरङ्गपरिभाषया तद्वारणासम्भवात्तन्नोक्तम्। किञ्च सिद्धान्ते नित्यत्वाद्गुणात्पूर्वमूटं, गुणस्तु ऊठि णया बाधितत्वादनित्यः।

ननु बहिस्संख्याकान्यङ्गानि यस्य तद्बहिरङ्गम्। अन्तस्संख्याकानि निमित्तानि यस्य तदन्तरङ्गमिति व्युत्पत्तिवशाल्लभ्यत एवायमर्थ इति कथमलाभोक्तिरत आह—'तथा सति' इति। तथाविधार्थबोधतात्पर्ये सतीत्यर्थः। 'अल्पापेक्ष इत्येव' इति। यच्च लोकदृष्टान्तसिद्धोऽन्तरङ्गबहिरङ्गभावः 'पूर्वं पूर्वमन्तरङ्गं, परं परं बहिरङ्गम्' इति भाष्यकारोपदर्शितः स यथा यथाश्रुते पूर्वोत्तरकालवाचकाभ्यामन्तर्बहिःशब्दाभ्यां संगृह्यते। तद्वदिदानीमपि कालगतालल्पत्वबहुत्वबोधकावल्पबहुशब्दावाश्रित्य सम्ग्रहीतुं शक्य इत्यभिमानः।

'वदेत्' इति। 'सौगम्यात्' इति शेषः। भाष्यकारोऽत्र कर्ता। तदनुक्त्या च तात्पर्यविरुद्धत्वात्कथञ्चिद्बहिरङ्गान्तरङ्गशब्दाभ्यां गम्यमानोऽप्ययमर्थो न युक्त इत्याशयः। ननु बहिरङ्गान्तरङ्गशब्दाभ्यां बह्वपेक्षाल्पापेक्षयोः प्रतिपादने यथा क्लेशः, तथा 'पूर्वं पूर्वमन्तरङ्गम्, परं परं बहिरङ्गम्' इत्यस्य बह्वपेक्षाल्पापेक्षशब्दाभ्यां कोडीकरणे तुल्य एव क्लेश इति नास्ति विशेष इत्यत आह—'अत एव' इति। 'तदपि वक्तुमुचितम्' इति। नन्वस्योपलक्षणत्वात्तदप्युक्तमेवातो न दोष इत्यत आह—'प्राथम्यात्' इति। प्रक्रियाक्रमानुरोधेनेति शेषः।

'तदेव' इति। प्रथमातिक्रमणे निमित्तामाव एवात्र निमित्तमिति भावः। 'तन्नोक्तम्' इति। यद्येवं गुणात्पूर्वमूटः प्रवृत्तिर्दुर्लभा स्यात्तत्राह—'किञ्च' इति। 'वार्णादाङ्गं बलीयः' (प. ९५) इति तु तदन्ततदादिविध्योर्यणो वर्णमात्रानपेक्षत्वात्तदभावे च व्याश्रयत्वादिह नाश्रीयत इति कैयटादयः। अनित्यत्वादनाश्रयणामित्यन्ये। 'अनित्यः' इति। लक्ष्यानुरोधाच्छब्दान्तरप्राप्तस्याप्यूठः कृताकृतप्रसङ्गित्वमात्रेण नित्यत्वे, गुणस्य तु लक्षणान्तरेण निमित्तविघातादनित्यत्वञ्च स्वीक्रियत इति तत्त्वम्।

'ऊनशब्दमाश्रित्य' इत्यादिभाष्येण च परिभाषायामङ्गशब्देन सप्तम्याद्यन्ततयोपात्तं शब्दरूपं निमित्तमेव गृह्यते इति स्पष्टमेवोक्तम्। यत्तु कैयटेन तदन्तविधिपक्षे परत्वाद्गुणः प्राप्नोतीत्युक्तम्। तत्तु ऊनशब्दमाश्रित्येत्यादिभाष्यासङ्गत्या चिन्त्यम्। वलिलोपे 'अन्तरङ्ग' (प. ५७)परिभाषा न प्रवर्तत इति तु न युक्तम्। तत्सूत्रभाष्ये एव वश्चादिषु लोपातिप्रसङ्गमाशङ्क्य उपदेशसामर्थ्यान्न। न च 'व्रश्चति' इत्यादौ चारितार्थ्यम्। बहिरङ्गतया सम्प्रसारणस्यासिद्धत्वेन पूर्वमेव तत्प्राप्तेरिति भाष्योक्तेः।

किञ्च यदवलम्बेन चायमुद्घोषो भवतां तदेव भाष्यं विपरीतमित्याह–'ऊनशब्दमाश्रित्य' इत्यादि। 'स्पष्टमेवोक्तम्' इति। एवञ्च मूलशैथिल्यादन्त्यार्थसंज्ञयोर्निमित्तभावस्तत्प्रयुक्तश्च 'बह्वपेक्षाल्पापेक्षयोरन्तरङ्गबहिरङ्गभावश्च न युक्त इति परमार्थः। एवं स्थिते 'स्योनः' इत्यत्र निमित्तचतुष्टयाश्रयादूठो निमित्तपञ्चकाश्रयस्य गुणस्य बहिरङ्गत्वमभिदधता कैयटेन यदुक्तं तदन्तविधिपक्षे परत्वाद् गुणः प्राप्नोतीति तस्योक्तिसम्भव एव दुर्निरूपः। न हि तन्मते यदितष्टकृनिमित्तकत्वाभ्यां शब्दस्वरूपं निमित्तमाश्रित्य बहिरङ्गान्तरङ्गभावोऽस्ति। येनाल्पापेक्षयणादेशीयान्तरङ्गत्वविधातुकष्टकनिमित्तकत्वप्रयुक्तगुणगतान्तरङ्गत्वसम्पादनद्वारेण बहिरङ्गपरिभाषाप्रवृत्तिप्रतिबन्धो विप्रतिषेधशास्त्रप्रवृत्त्यभ्युपगमो वा भवेदित्याशयेनाह–'यत्तु' इत्यादि।

'ननु भास्तु 'बह्वपेक्षं बहिरङ्गम्' इति मते तदादिविधिप्रयुक्तं यणादेशीयशब्दस्वरूपात्मकनिमित्तघटकनिमित्तकत्वरूपमन्तरङ्गत्वं, गुणस्य पूर्वोपस्थितनिमित्तकत्वेन तु यणादेशगताल्पापेक्षत्वप्रयुक्तान्तरङ्गत्वविघटकमन्तरङ्गत्वं गुणे सुवचं, गुणनिमित्तस्य यणादेशनिमित्तादूठः प्रथममेव प्रवृत्तेः।। न चैवं तदादितदन्तविध्योरभावेऽपि तथाविधान्तरङ्गत्वमादाय गुणस्यैव पूर्वं यणो दुर्लभतया तत्प्रयुक्तत्वेन यणादेशाभावोपपादने भाष्यकैयटयोरसङ्गतमेव स्यादिति वाच्यम्। तत्प्रामाण्येन वर्णकार्यस्य पूर्वोपस्थितनिमित्तकादप्यन्तरङ्गत्वबोधनेनादोषात्। ततश्च द्वयोरप्यन्तरङ्गयोर्बहिरङ्गपरि-

भाषाप्रवृत्तिविरोधेन त्रिप्रतिषेधशास्त्रस्यैव, व्यवस्थापकत्वमित्याशयेकतया युक्तमेव कैयटोक्तमित्यस्त आह—'जश्शब्द' इत्यादि। 'भाष्यसङ्गत्या' इति। तथा सति भाष्ये गुणो बाधकः प्रसज्येतेत्यनन्तरमूनशब्देत्यादिपन्यासस्य निष्फलत्वादसङ्गतिः।

अस्मन्मते तु तदन्ततदादिविध्योरभावे, गुणसन्ध्यक्षिप्रषष्ठ्यर्थतोऽपि निमित्तघटकनिमित्तकत्वेनान्तरङ्गत्वाद् बहिरङ्गपरिभाषया यणो गुणबाधकत्वमिष्यते। तत्सत्वे तु परस्परनिमित्तघटकनिमित्तकत्वादुभयोरप्यन्तरङ्गतया तत्परिभाषाप्रवृत्तिविरोधेन परत्वस्यैव व्यवस्थापकतया गुणस्यैव यणो बाधकत्वं प्रसज्येत्याशयकृतया साफल्यम्। यदि च 'कैयटमतेऽपि तदादितदन्तविध्यभावे वर्णकार्यत्वेनान्तरङ्गत्वं यणः। तत्सत्वे तु यणादेशस्योनशब्दाश्रयत्वेन वर्णकार्यत्वाभावात्पूर्वोपस्थितनिमित्तकत्वेन गुणस्यात्यपेक्षत्वेन च यण इत्युभयोरप्यन्तरङ्गत्वमिति बाधनाय तत्सार्थक्यमित्युच्यते, तावतापि नञ्शब्दमाश्रित्य गुण इत्येतत्साफल्यं दुर्वचम्' वर्णत्वाभावबाधकतया तदन्ततदिविधिविषयस्यानुल्लेखान्न्यूनता च। तथा हि सत्यूनंशब्दसिशब्दावाश्रित्य णादेशः, न त्विकारोकारवित्येव वदेदित्याशय इत्यलम्।

ननु 'गौवेरः पचेरन्' इत्यादावेयादेरङ्गसंज्ञासापेक्षत्वेन सत्यपि बहिरङ्गत्वे वलिलोपे अन्तरङ्गपरिभाषाया अप्रवृत्त्यभ्युपगमात्कथं तत्र 'यलोपासिद्धिः। अत एव 'याति:, क्नोपयति' इत्यादौ यलोपसिद्धिः। अन्यथा 'यातोलोपातोलोपयोः पुगागमस्य च बहिरङ्गत्वेनासिद्धत्वात्सं न स्यात्। 'चेर्ले क्नोपेः' (३.४.३३) इति निर्देशश्चात्रार्थे प्रमाणम्। स्वरदीर्घयलोपेषु लोपजादेश एव, न स्थानिवत् इति निग्रमात् 'वाय्वोः' इत्यादौ स्थानित्वेन यलोपाप्रवृत्तिः।

अतः संज्ञासापेक्षस्य बहिरङ्गतायां न प्रागुक्तलक्ष्यासिद्धिर्दोष इत्यंतआह—'वलिलोपे' इति। तत्सूत्रभाष्ये वलिलोपसूत्रभाष्ये इत्यर्थः। 'बहिरङ्गतया सम्प्रसारणस्य' इति। पूर्वोपस्थितनिमित्तकत्वेनान्तरङ्गत्वं वलिलोपस्येति भावः। 'पूर्वमेव' इति। पदसंस्कारे स्वसमानकालप्राप्तसम्प्र-

सारणं बाधित्वेति शेषः। तृतश्च सम्प्रसारणात्पूर्वमेव लोपप्रवृत्त्या कृते सम्प्रसारणे क तद्धुच्चारणं स्यादिति निरवकाश एवोपदेश इति भावः।

'भाष्योक्तेः' इति। नन्वस्य भाष्यस्य समकालप्राप्तबहिरङ्गविषये परिभाषाप्रदर्शनपरत्वाज्जातबहिरङ्गविषयकतया वलिलोपे प्रकृतपरिभाषा न प्रवर्तत इति ज्ञापनान्न विरोध इति चेत्? अत्र केचित्, प्रकृतभाष्यमपि जातबहिरङ्गविषयकृत्येन प्रकृतपरिभाषाप्रदर्शनपरम्। अन्यथा हधुपदेशावस्थायां सामर्थ्याल्लोपाप्रवृत्तावपि सम्प्रसारणहलादिशेषयोः 'वृश्चति, वव्रश्च' इत्यादौ वलपरत्वाभावेन लोपाप्रवृत्त्या चास्तिाथ्यात् 'ब्रश्चन्' इत्यादौ, लोपापत्तिरित्याशयकस्य प्रश्नस्य अन्तरङ्गो लोप इति सिद्धान्तिप्रदर्शितमुत्तरमसम्बद्धमेव स्यात्। जातबहिरङ्गविषयकत्वे तु सम्प्रसारणहलादिशेषाभ्यां पूर्वमिव तदुत्तरमपि प्रकृतपरिभाषया वलपरत्वेन नाप्राप्तो लोप इत्युपदेशसामर्थ्याल्लोपाभाव इति युक्तमुत्तरम्। अतो जातबहिरङ्गमादाय वलिलोपे निरुक्तपरिभाषा न प्रवर्तत इत्यस्य युक्ता कल्पना। 'क्नोपेः' इति निर्देशास्तु सामान्यत एव परिभाषाया अनित्यत्वे प्रमाणम्। 'यातिः' इत्यादयोऽपि तन्मूलका एव प्रयोगा इत्याहुः।

यत्तु नलोपस्य षट्संज्ञायामसिद्धत्वात् 'पञ्च' इत्यत्र 'न षट्' इति निषेधं इति? तच्चिन्त्यम्; नलोपस्य हि पदसंज्ञापेक्षत्वेन बहिरङ्गत्वं वाच्यम्। तच्च न, संज्ञाकृतबहिरङ्गत्वस्यानाश्रयणात्। 'पञ्च' इत्यत्र निषेधस्तु स्त्रियां यत्प्राप्नोति तन्न इति व्याख्यानसामर्थ्येन भूतपूर्वषट्त्वमादायेति बोध्यम्।

ननु सिद्धान्ते 'वृद्भ्यः स्यसनोः' (१।३।९३) इति स्ये विकल्पविधानस्यैकवाक्यत्वेन 'अनुदात्तङित' (१।३।१२) इत्यादीनां विधायकत्वं लादेशविधौ 'लोरिलस्य' विहितविशेषणत्वेन विकल्पाप्यवधानेऽपि प्रवृत्तिरित्यर्थस्यैव ज्ञापकतया 'गौधेरः' इत्यादिप्रयोगसमर्थनोपायभूतापरनिमित्तकमन्तरङ्गमित्यर्थस्य दुर्लभत्वात्कथं तत्प्रयोगसिद्धिरिति चेत्? मैवम्; परिभाषानित्यत्वेनान्यार्थमावश्यकेनैव तत्सिद्धेः। एवञ्च नियमपक्षे त्वापरनिमित्तकस्या-

अपूर्वत्वे गौरवात् । तस्मादिह कार्यकालपक्षस्यैवाभावेन तदनुरोधी भूतपूर्वगत्याश्रयणप्रयासो विफल एव; स्थानिवद्भावेनैव तत्सिद्धेरित्याहुः ।

अत एव कृति तुग्ग्रहणं चरितार्थम् । 'वृत्राहभ्याम्' इत्यादौ पदत्वनिमित्तकत्वेऽपि नलोपस्य बहिरङ्गत्वाभावात् । भ्यामः पदसंज्ञानिमित्तत्वेऽपि नलोपस्य तन्निमित्तकत्वाभावात् । परम्परया निमित्तत्वमादाय बहिरङ्गत्वाश्रयणे तु न मानम् । ध्वनितञ्चेदं 'नलोपः सुप्' (८.२.२) इति सूत्रे भाष्ये' इति तत्रैव भाष्यप्रदीपोद्योते निरूपितम् । अन्तरङ्गे कर्त्तव्ये जातं तत्कालप्राप्तिकं बहिरङ्गमसिद्धमित्यर्थः । वृश्चत्यादिषु पदसंस्कारपक्षे समानकालत्वमेव द्वयोरिति बोध्यम् । एतेन 'अन्तरङ्गं बहिरङ्गाद्बलीयः' इति परिभाषान्तरमित्यपास्तम् । एनामाश्रित्य विप्रतिषेधसूत्रे भाष्ये तस्याः प्रत्याख्यानाच्च । अन्तरङ्गशास्त्रत्वमस्या लिङ्गम् । इयञ्च त्रिपाद्यां न प्रवर्तते, त्रिपाद्या असिद्धत्वात् ।

'न मानम्' इति । बहिरङ्गत्वेनाभिमतशास्त्रोपयोगिसंज्ञाप्रयोजकप्रत्ययादेर्निमित्तत्वाश्रयणे मानाभाव इत्यर्थः । न चैवमूठ्ग्रहणस्य परिभाषाज्ञापकत्वानुपपत्तिः, स्वांशे चारितरर्थ्यायाङ्गसंज्ञानिमित्तभूतशसादिनिमित्तकत्वेनैव सम्प्रसारणस्य बहिरङ्गतायां वक्तव्यत्वादिति वाच्यम् । षष्ठ्यन्तोपात्तस्यापि स्यां परिभाषायां निमित्तत्वेन ग्रहणात्सम्प्रसारणनिमित्तभूतयोरङ्गयोर्घटितघटकभावेनैव बहिरङ्गान्तरङ्गभावोपपत्त्या ज्ञापकताया निर्बाधत्वात् ।

ननु सन्निपातपरिभाषामाश्रित्य प्रत्याख्यातमेव कृति तुग्ग्रहणमिति कथं तस्य प्रामाण्यमत आह—'ध्वनितम्' इति । अनयैव परिभाषया निर्वाहे तत्परिभाषोपन्यासो भाष्यकारस्य निर्बीज एव स्यादिति भावः । 'अपास्तम्' इति । 'ओमाङोः' (६.१.९५) इत्यादिग्रहणस्यास्मिन्नर्थे ज्ञापकत्वाङ्गीकारेण तदर्थस्यापि प्रत्ययेनैव सङ्ग्रहे लाघवादिति भावः ।

ननु सत्यपि लाघवे पृथगुपन्यस्तयोरनयोः परिभाषयोरेकीकरणं प्रमाणविरहादयुक्तमत आह—'एनामाश्रित्य' इति। 'विप्रतिषेधसूत्रे भाष्ये' इति। तत्र हि 'अन्तरङ्गं बहिरङ्गाद्बलीयः' (प. ९०) इति परिभाषायाः प्रयोजनान्युपपाद्य यदि सन्ति प्रयोजनानीत्येषा क्रियते। ननु चेयं कर्त्तव्या, असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षण इति। किं प्रयोजनम्? पचावेदं पचमेदम्। असिद्धत्वाद्बहिरङ्गलक्षणस्य गुणस्यान्तरङ्गलक्षणमैत्वं मा भूदिति। उभे तर्हि कर्त्तव्ये। नेत्याह। अनयैव सिद्धम्। इहापि स्योनः, स्योनेति। असिद्धत्वाद्बहिरङ्गलक्षणस्य गुणस्यान्तरङ्गलक्षणो यणादेशो भविष्यतीत्युक्तमिति बोध्यम्। एवं च यदुक्तं 'सम्प्रसारणाच्च' (६.१.१०८) इति सूत्रे भाष्ये अन्तरङ्गाद् बहिरङ्गाद् बलीय इत्युपक्रम्य अवश्यमेषा परिभाषा कर्तव्या प्रतिविधेयं दोषेष्विति। यदपि 'अचः परस्मिन्' (१.१.५७) इति सूत्रे भाष्ये बहुप्रयोजनैषा परिभाषा। तस्मादवश्यमेषा कर्तव्येति। तदुभयस्याप्यत्रैवार्थे तात्पर्यम्। उपदर्शितविप्रतिषेधसूत्रस्थभाष्यैकवाक्यतालाभायेत्याहुः। 'अन्तरङ्गशास्त्रत्वम्' इति। न तु 'बहिरङ्गशास्त्रत्वम्', एवं हि सति 'पपुत्र' इत्यादावातो लोपादिषु सम्प्रसारणस्य बहिरङ्गासिद्धत्वमाशङ्क्य आभीयानामातो लोपादीनामसिद्धत्वादाभीया बहिरङ्गपरिभाषा न प्रवर्तत इति भाष्यकारोक्तमुत्तरं सङ्गच्छते। बहिरङ्गशास्त्रत्वस्यैव लिङ्गत्वे हि गुणशास्त्राणामुपस्थापकसमानाश्रयत्वनियमादन्तरङ्गैरातोलोपादिभिर्व्याश्रयत्वात्तदसङ्गतिरेव।

अस्याश्च 'वाह ऊठ्' (६.४.१३२) सूत्रस्थमूठ्ग्रहणं ज्ञापकमित्येषा सपादसप्ताध्यायीस्था। अन्यथा सम्प्रसारणमात्रविधानेन लघूपधगुणे 'वृद्धिरेचि' (६.१.८८) इति वृद्धौ 'विश्वौहः' इत्यादिसिद्धेस्तद्वैयर्थ्यं स्पष्टमेव।

न च बहिरङ्गशास्त्रत्वस्य लिङ्गत्वेऽपि तत्समानाश्रयायां परिभाषायामाभीयासिद्धत्वेन बहिरङ्गस्याभावान्निरधिष्ठानारोपाप्रवृत्त्या परिभाषाप्रवृत्त्यसम्भव इति युक्तमेवोत्तरमिति वाच्यम्। तथा सति 'विश्वौहः' इत्यादौ सम्प्रसारणस्य लघूपधगुणदृष्ट्या बहिरङ्गासिद्धत्वायोगेन ऊठ्ग्रहणस्य स्वांशे चरितार्थ्यायोगात् ज्ञापनपरभाष्यविरोधापत्तेः। अत्रार्थे फलं दर्शयति—

वृद्ध्यभावमाशङ्क्य चर्त्वे कृते भविष्यतीति परिहरता सिद्धान्तिना चर्त्वमसिद्धमित्येकदेशिनः शङ्कायामाश्रयात्सिद्धत्वमिति परिहार उक्तः। तत्राश्रयादित्यस्य 'वाह ऊठ्' (६.४.१३२) दीर्घवैयर्थ्यमूलकतन्त्रनिर्देशप्रयुक्तात् 'च्छ्वोः शूठ्' कृतचर्त्वस्यापि वृद्धिविधौ निमित्तकत्वेनाश्रयणादित्यर्थः।

सत्यां हि तस्यां बहिरङ्गसम्प्रसारणस्यासिद्धत्वाल्लघूपधगुणो न स्यात्। न च 'पुगन्त' (७.३.८६) इति सूत्रे निमित्तमिको विशेषणम्। अत एव 'भिनत्ति' इत्यादौ न गुणः। एवञ्च 'नाजानन्तर्य' (प. ५१) इति निषेधात्कथं परिभाषाप्रवृत्तिरिति वाच्यम्। प्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षत्वेन तत्रैवान्वयात् 'पुगन्त' (७.३.८६) इत्यादौ कर्मधारयाश्रयणेन प्रत्ययपराङ्गावयवलघूपधारूपेको गुण इति भाष्यसम्मतेऽर्थे 'भिनत्ति' इत्यादावदोषाच्च। अकारान्तोपसर्गे अनकारान्तोपपदे वहेर्वाहेर्वा ण्विचिचावनभिधानान्न स्त एव।

तत एतदुत्तरम्--असत्यन्यस्मिन्नाश्रयात्सिद्धत्वमित्याशयानभिज्ञस्यैकदेशिनः प्रश्नं परिजिहीर्षुणा सिद्धान्तिना 'वाह ऊठ्' (६.४.१३२) अपि ठित्करिष्यते, आश्रयात्सिद्धत्वं भवतीत्युक्तम्। यत उक्तरीत्या 'च्छ्वोः शूठ्' कृतचर्त्वस्यापि वृद्धिविधौ निमित्तत्वेनाश्रयणादसिद्धत्वाभावः। तत 'वाह ऊठ्' (६.४.१३२) अपि ठित्सदृशः, न तु तद्घावृत्तिप्रयोजकधर्मविशेषाश्रय इति हि तदाशयः। अत एव 'वाह ऊठ्' अपि ठिति नोक्तम्। किञ्च द्वयोरपि ठित्त्वे वृद्धिविधावुभयोष्ठान्तयोरनुकरणे लक्षणावशात्सम्पन्नमेव चर्त्वमिति कस्याप्याश्रयात्सिद्धत्वाभावादाश्रयात्सिद्धत्वमित्यस्यासङ्गतिरेव। यथाश्रुतार्थपर्यालोचनेन तद्भाष्यस्य चिन्त्यतां वदन् कैयटश्चिन्त्य एव।

न चैवमपि 'उपेतः' इत्यादौ वृद्धिवारणोपायत्वेन 'एचि' इत्येतद्विशेषणसमन्वयाय योगविभागेन भाष्यकारोपदर्शिते न्यासे द्वयोरप्यसंग्रह इति

वाच्यम्। योगविभागो हि यथाश्रुतस्य विभागकरणं, न तु न्यासान्तरेण तथाकरणम्। ततश्च 'एति एधति इत्येको योग उठ्त्सु' इति चापर इत्येव भाष्यतात्पर्यम्। उपदर्शितन्यासस्तदर्थोपपादनपर 'ऊठि' इति च तत्रोपलक्षणमेवेत्यदोषात्। एवञ्च स्वरविधौ वार्त्तिकबलात् ठित एव ग्रहणम्। न तु 'ठितः' इति 'वाह ऊठ्' (६.४.१३२) विषये स्वराप्रवृत्तिरेव। प्रकृत-परिभाषाज्ञापनपर 'वाह ऊठ' (६.४.१३२) सूत्रभाष्येणाप्ययमेवार्थो ध्वनितः स्वरांशे दोषानुद्भावनात्। वृत्तिकारादीनान्तु प्रमाद एवातो न ज्ञापकताभङ्ग इत्याहुः।

'बहिरङ्गसम्प्रसारणस्य' इति। अस्य यथा बहिरङ्गत्वं तदधस्तान्नि-रूपितम्। 'अदोषाच्च' इति। चो हेतौ। यतो भाष्यकारोक्तरीत्या 'भिनत्ति' इत्यादावदोषस्ततो निमित्तभूतस्य प्रत्ययस्य अङ्गांश एवान्वय इति तदाशयः। ननूक्तसम्प्रसारणयोर्विशेषदर्शनात् ज्ञापकत्वानुपपत्तिरत आह— 'अकारान्तोपसर्गे' इत्यादि। 'प्रौहः' इत्यादौ सम्प्रसारणगुणयोः पररूप-प्रसङ्गः। 'शाल्यूहः' इत्यादौ च दीर्घश्रवणानापत्तिरिति बोध्यम्। 'अनभि-धानात्' इति। ज्ञापनपरभाष्यमेवात्र मानम्। इह 'विचोऽनभिधानं चिन्त्यम्। णिलोपस्य स्थानिवत्त्वेन ऊडादेशाप्रसङ्गात्।

'वार्यूहः' इत्यादि तूहतेः किपि बोध्यम्। धातूनामनेकार्थ-कत्वान्नार्थासङ्गतिः। 'प्रौहः' इत्याद्यसाध्वेव। वृद्धेरप्राप्तेः। अस्योहस्यानर्थक्यान्न 'प्रादूहोढ' (वा. ६८०) इत्यस्यापि प्रवृत्तिः। न च कार्यकालपक्षे त्रिपाद्यां तत्प्रवृत्तिर्दुर्वारेति वाच्यम्। पूर्वं प्रति परस्यासिद्धत्वादन्तरङ्गाभावेन पूर्वस्य तन्निरूपितबहिरङ्ग-त्वाभावात्तया तस्यासिद्धत्वप्रतिपादनासम्भवात्।

विचशब्देन वा किबुपलक्षणीयः। 'क्ङौ लुप्तम' इत्यनेन स्थानिवत्त्व-निषेधात्। न च किपि यजादित्वप्रयुक्तं सम्प्रसारणं प्रसज्जतेति वाच्यम्। 'काम्यच्च' (३.१.९) सूत्रभाष्यबलेन यजादिस्थो विहित एव किति तत्प्रवृत्ति-रित्यदोषात्। केचित्तु वाहूधातोरिदमनभिधानमित्याहुः।

'कार्यकालेपक्षे' इति । परिभाषादृष्ट्या त्रेपादिकस्यान्तरङ्गत्वेनाभिमतस्यासिद्धत्वेऽपि तदृष्ट्या परिभाषायास्सिद्धत्वादत्र पक्षे विधीनामेव स्वातन्त्र्यात्स्वीयोपकाराय तदाकाङ्क्षितायाः परिभाषायास्त्रिपाद्यामप्युपस्थितौ न विरोध इत्याशयः । 'पूर्वं प्रति परस्यासिद्धत्वात्' इति । अयं भावः—शास्त्रे चेतनत्वारोपस्य बहुशो दृष्टत्वादिह परिभाषायां तदारोपात्तया ज्ञायमानमेवान्तरङ्गं परिभाषोपस्थितौ तद्बोध्यान्तरङ्गशास्त्रीयप्रवृत्तिनिवृत्त्यन्यतरप्रयोजकस्य बहिरङ्गात्सिद्धत्वस्य वा नियामकं, न तु वस्तुभूतम् । अन्यथा भाधिकारीयेष्वप्यन्तरङ्गेषु परिभाषाप्रवृत्तावसिद्धवत्सूत्रस्थभाष्यविरोधापत्तेः । ततश्च कार्यकालेऽपि परिभाषाणां विधिदेशीयत्वानभ्युपगममात्त्रैपादिकासिद्धत्वेनान्तरङ्गत्वेनाभिमतस्याविद्यमानतया तदपेक्षया बहिरङ्गत्वेनाभिमते सापादिके बहिरङ्गत्वस्य ज्ञातुमशक्यत्वात्तन्निरूपितमन्तरङ्गत्वमपि दुर्ज्ञेयमेव; निरूपितबुद्धेर्निरूपकबुद्धयधीनत्वात् । तदुक्तं 'विसर्जनीय' (८.३.३४) सूत्रे भाष्ये प्रतिद्वन्द्विभाविनावेतावर्थौ सत्यन्तरङ्गे बहिरङ्गं, सति च बहिरङ्गे अन्तरङ्गमिति । तस्मात्स्वप्रवृत्तिप्रयोजकान्तरङ्गबहिरङ्गभावपरिज्ञानस्य दौर्लभ्यात्कथमिह तया परिभाषया व्यवस्था स्यात् । न चेदमयुक्तम् । तथा हि—'अतो रोः' (६.१.११३) इति सूत्रे भाष्ये 'अप्लुतादप्लुते' इति विशेषणादुत्वं प्रति प्लुतस्य नासिद्धत्वमित्यभिधाय, अप्लुतादप्लुतवचने समासपदे प्रतिषेधः । 'आगच्छ हे पयोट् ; आगच्छ हे पयोद' इत्युक्तम् । तत्र परत्वात् प्लुते, प्लुतपरत्वादाद्ये प्लुतात् परत्वादन्त्येऽप्युत्वानापत्तिरिति चोदितस्य प्रतिषेधस्य वाक्याश्रयात् प्लुतात्पदाश्रयमुत्वमन्तरङ्गत्वात्प्रथमतः प्रवर्तत इति परिहार उक्तः ।

तथा 'प्लुतप्रगृह्या' (६.१.१२५) इति सूत्रे भाष्ये सिद्धः प्लुतः स्वरसन्धिष्वित्युपक्रम्य शालेन्द्रादावतिप्रसङ्गवारणाय बहिरङ्गः प्लुतः, अन्तरङ्ग एकादेश इति समाहितम् । यदि च निजबुद्धिगोचरस्यैवान्तरङ्गबहिरङ्गभावस्य परिभाषाप्रवृत्तौ निमित्तत्वं स्यात्, तदा प्रमाणबलादुत्वैकादेशावन्तरङ्गौ प्रति प्लुतस्यासिद्धत्वाभावेऽपि परिभाषां प्रति प्लुतासिद्धत्वस्य दुर्वारतया बहिरङ्गाभावे तन्निरूपितान्तरङ्गत्वस्यान्तरङ्गत्वेनाभिमते सापादिके दुर्ज्ञेयत्वेन परिभाषाप्रवृत्तिप्रयोजकान्तरङ्गबहिरङ्गभावपरिज्ञानस्य दुर्लभ-

त्वात्तुल्यरीत्या परिभाषाप्रवृत्तिविरोधेन भाष्यासङ्गतेरिति वाच्यम्। उत्वस्वरसन्ध्योः प्लुतस्यासिद्धत्वाभावकल्पनं तदीयप्रापकप्रतिबन्धकसाधारणमित्यभ्युपगमेनादोषात्।

अन्यथा बहिरङ्गपरिभाषां प्रतीव विप्रतिषेधशास्त्रे प्रत्यपि प्लुतासिद्धत्वस्य दुर्वारत्वेन प्लुतगतपरत्वस्य व्यवस्थापकत्वायोगात् 'प्रतिषेधवार्तिकस्यैवानुत्थितिः स्यात्। द्वितीयेऽपि प्रकृतिभावं प्रति प्लुतस्यासिद्धत्वाभावो नानुगृहीतः स्यात्। किञ्चास्याः परिभाषाया आरोपबोधकत्वेन बहिरङ्गस्य प्लुतस्यासिद्धत्वे 'निरधिष्ठानारोपासम्भवात्कथं प्लुतस्य बहिरङ्गासिद्धत्वम्। अस्तु वा तद्भाष्यबलादन्तरङ्गबहिरङ्गयोरेव चेतनत्वारोपात्तयोः परस्परबुद्धिगोचर एव अन्तरङ्गबहिरङ्गभावः, स्वदृष्ट्या' विद्यमानतात्राहीनोऽपि वस्तुभूतः परिभाषाप्रवृत्तौ निमित्तम्। 'आभात्' (६.४.२२) सूत्रस्थन्तु भाष्यमापातः प्रवृत्तमनित्यत्वमेव तत्र शरणमिति। तावतापि न निर्वाहः; बहिरङ्गं प्रत्यन्तरङ्गस्यासिद्धत्वात्।

न च 'पूर्वत्रासिद्धम्' (८.२.१) इत्यत्र कर्तव्ये इत्यध्याहारात्कृते तदयोग इति वाच्यम्। सिद्धान्तभूते शास्त्रासिद्धत्वपक्षे तस्यायुक्तत्वात्। इदानीं शास्त्रस्य कर्तव्यत्वानुपपत्तावपि, कार्यद्वारिका सा शास्त्रे स्वीक्रियत इति कल्पनायाः क्लिष्टत्वात्। 'उपपदविभक्तेः' (प. १४) इति न्यायेनाधिकरणसप्तम्या एव न्याय्यत्वाच्च। तस्माच्छास्त्रे चेतनत्वारोपात्परशास्त्रं पूर्वशास्त्रीयबुद्धिगोचरत्वाभाववदित्यर्थः। 'स्वच्छाया' इत्यादौ श्चुत्वस्य जश्त्वबुद्धिविषयत्वाभावाद्विप्रतिषेधशास्त्रबुद्धिविषयत्वाभावाच्च पूर्वमप्रवृत्तावपि पश्चात्प्रवृत्तौ न विरोधः। आवश्यकञ्चेदं कृते परस्यासिद्धत्वम्। अन्यथा 'दुग्धं दोग्धा' इत्यादौ तकारस्वरूपझलन्निमित्तकधत्वप्रवृत्त्युत्तरं सन्निपातपरिभाषया 'झषस्तथोः' (८.२.४०) इति धत्वं प्रति धत्वमनिमित्तं स्यात्। तथा धत्वनिमित्तकं धकारस्य 'झलां जश्' (८.४.५३) इति जश्त्वमपि न स्यात्। कृतेऽप्यसिद्धत्वे तु धत्वदृष्ट्या धत्वस्य, तद्दृष्ट्या जश्त्वस्य

चासिद्धत्वेन निमित्तविघातकत्वापरिज्ञानान्न तया परिभाषया धत्वजश्त्वयोः प्रवृत्तौ प्रतिबन्धः ।

न च सन्निपातलक्षणविधि प्रति तद्विघातकविधेरसिद्धत्वाभावेऽपि स्वदृष्टया तदसिद्धत्वमेवेह परिभाषायाः प्रवृत्तौ प्रतिबन्धकमिति वाच्यम् । लोकन्यायसिद्धायास्तत्परिभाषायास्तत्तत्सन्निपातलक्षणशास्त्रस्य स्वकीयसन्निपातविघातकविधेरनिमित्तमित्येवमात्मकवाक्यशेषरूपेणोपकारकतया तद्बुद्ध्वाभ्युपगममन्तरा परिभाषां प्रति पृथगसिद्धत्वस्य दुर्वचत्वात् । न च सन्निपातस्याशास्त्रीयत्वात् 'पूर्वत्रासिद्धम्' (८.२.१) इत्यनेन, कथमतिदेश इति वाच्यम् । 'नहो धः' (८.२.३४) इति धत्वविधानादेतादृशस्याप्यतिदेशाबोधनेनादोषात् । तद्धि 'नद्धः' इत्यादौ 'झषस्तथोः' (८.२.४०) इति धत्वाय यद्यशास्त्रीयत्वात्सन्निपातः 'पूर्वत्रासिद्धम्' (८.२.१) इत्यनेन नातिदिश्येत, तकाररूपझल्निमित्तकं धत्वं 'झषस्तथोः' (८.२.४०) इति धत्वं प्रत्यनया परिभाषया न निमित्तं स्यादिति तदसङ्गतिरेव । न च 'रदाभ्याम्' (८.२.४२) इत्येतद्व्यावृत्तये धत्वविधाने दकारविधाने हि तत्प्रसङ्ग इति वाच्यम् । सन्निपातातिदेशमनभ्युपगच्छतां तत्प्रवृत्तेर्दुर्वचत्वात् । तकारविधानस्यापि सुवचत्वाच्च । अधिकमग्रे निरूपयिष्यते इत्यलम् ।

अस्तु वा 'कर्तव्ये' इत्यध्याहारः कथञ्चित् । तथापि स्वदृष्ट्या त्रैपादिकासिद्धत्वेनान्तरङ्गस्याविद्यमानतया कं प्रतीयं परिभाषा बहिरङ्गासिद्धत्वं बोधयेत् । तदुक्तं भाष्ये—'नानभिनिर्वृत्ते बहिरङ्गेऽन्तरङ्गं प्राप्नोति' । तत्र निमित्तमेव बहिरङ्गमन्तरङ्गस्य । अनिमित्तं बहिरङ्गमन्तरङ्गस्य यावता 'पूर्वत्रासिद्धम्' (८.२.१) इत्यसिद्धा परिभाषा' इति । असिद्धत्वेनास्याप्रवृत्तेत्यर्थः । एतेन कर्तव्ये इत्यस्याध्याहाराभावे सत्यपि, कृते परस्यासिद्धत्वे, बहिरङ्गान्तरङ्गभावस्यान्तरङ्गगोचरस्यैव परिभाषाप्रवृत्तिप्रयोजकत्वाभ्युपगमात् 'प्रवर्तत एव कार्यकाले त्रैपादिकेषु बहिरङ्गपरिभाषेत्यपास्तम् ।

नन्वसिद्धत्वस्य कार्यप्रवृत्तिनिवृत्त्यन्यतरफलकत्वात्त्रैपादिकासिद्धत्वस्य कार्यज्ञानोत्तरमेव प्रवृत्तिः। तच्च कार्यज्ञानं कार्यकालपक्षे तत्तच्छास्त्रीयविशेषवाक्यार्थबोधप्रयुक्तमेव; न तु पदपदार्थोपस्थितिमात्रप्रयोज्यसामान्यवाक्यार्थबोधप्रयुक्तं समान्यभूतम्। अन्यथा कार्यकालपक्षस्यैवोच्छेदप्रसङ्गात्। स्पष्टमिदं प्रगृह्यसंज्ञाप्रकरणे आकरे। ततश्च स्ववृत्तिलिङ्गंचिह्नितपरिभाषाणां स्वीयविशेषवाक्यार्थबोधनिर्णयाय विधिशास्त्रैराक्षिप्तानामुपस्थितौ तत्तत्परिभाषाप्रयोज्येनोपकारविशेषेण जायमाने विधिशास्त्रीयवाक्यार्थबोधे तत्प्रयुक्तं विशेषकार्यज्ञानमादाय पश्चात्प्रवर्तिष्यमाणेन त्रैपादिकासिद्धत्वेन ततः पूर्वमेव विध्युपकारिकाया अन्तरङ्गपरिभाषायाः कथं प्रतिबन्धः स्यात्।

यदि तु अस्या अपि परिभाषायाः कार्यज्ञानसहायेन वाक्यैकवाक्यतया स्वोपस्थापकान्तरङ्गापेक्षया बहिरङ्गासिद्धत्वबोधकत्वेऽपि, निर्दिष्टपरिभाषादिवत्पदैकवाक्यतया विधिशास्त्रीयविशिष्टवाक्यार्थबोधोपरञ्जकत्वाभावात्, पूर्वत्रासिद्धशास्त्रसमकक्षतया प्रथमतः प्रवृत्तौ प्रमाणाभाव इत्युच्यते, तर्हि भवतु त्रैपादिकासिद्धत्वबहिरङ्गासिद्धत्वयोर्योगपद्येनैव प्रसङ्गः, तावतापि त्रैपादिकासिद्धत्वस्य प्रथमप्रवृत्तिप्रयोजकसाधनान्तरानुपलम्भाद्बहिरङ्गासिद्धत्वमेव प्रथमं प्रवर्तेत; तदुक्तं भाष्ये—'एवं तर्हि कार्यकालं संज्ञापरिभाषं तत्र कार्यम्। तत्रोपस्थितमिदं द्रष्टव्यम्। 'खरवसानयोर्विसर्जनीयः' (८.३.१५) उपस्थितमिदं भवति। 'असिद्धं बहिरङ्गमन्तरङ्गे' (प. ९०) एवमेषा परिभाषा सिद्धा भवति' इति।

न चानया पूर्वस्यासिद्धत्वादभावेन तं प्रति परासिद्धत्वं पूर्वत्रेत्यनेन वक्तुमशक्यमिति वाच्यम्। एवं हि विनिगमनाविरहादुभयोरप्रवृत्त्यापत्तेः। किञ्च 'पूर्वत्र' इत्यस्य प्रत्यक्षत्वेन तेन आनुमानिक्या अस्या बाध एवोचितः। अतः कार्यकालपक्षेऽपि त्रिपाद्यामस्या अनुपस्थितिरेव। अत एव कार्यकालपक्षमुपक्रम्योक्तयुक्तीरुक्त्वा, 'ततोऽयुक्तोऽयं परिहारो, न वा बहिरङ्गलक्षण-

त्वादिति' इत्युक्ते विसर्जनीयसूत्रे (८.३.३४) भाष्ये सिद्धान्तिना । त्रिपादीस्थेऽन्तरङ्गे कर्तव्ये, अयं परिहारोऽयुक्त इति तदर्थः । किन्तु वचनमेवारभ्यमिति तदाशयः । अत एव 'निगाल्यते' इत्यादौ लत्वार्थं तस्य दोष इति वचनमेवारब्धम् ।

तत्र च कार्यकालपक्षे कुतस्त्रिपाद्यां बहिरङ्गपरिभाषाया अप्रवृत्तिरित्याशयेन शङ्कते—'न च' इति । 'अप्रवृत्त्यापत्तेः' इति । कार्यकालपक्षे तत्तत्प्रदेशोपस्थितयोर्द्वयोरप्यचरितार्थ्येन विप्रतिषेधशास्त्राप्रवृत्तिः । पर्यायेण प्रवृत्तावेकस्यैव प्रयोगस्य साधुत्वासाधुत्वयोः प्रसङ्गः । 'चक्रकेष्विष्टतो व्यवस्था' इत्यस्यापि नायं विषयः । यत्रैकैकप्रवृत्युत्तरमन्यान्यस्य प्रवृत्तिस्तद्विषयो हि स इत्याशयः । तथा च भाष्यम्; 'कुतो न खल्वेतत् । द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः पूर्वत्रासिद्धमसिद्धं बहिरङ्गमन्तरङ्गे' इति च । 'पूर्वत्रासिद्धम्' (८.२.१) इत्येतामुपमृद्य 'असिद्धं बहिरङ्गे' (प; ९०) इत्येतया व्यवस्था भविष्यति । न पुनः 'असिद्धं बहिरङ्गमन्तरङ्गे' (प; ९०) इत्येतामुपमृद्य, 'पूर्वत्रासिद्धम्' (८.२.१) इत्येतया व्यवस्था स्यात् । 'अतः किम्' इति । परस्परविरोधाद्द्वयोरप्यप्रवृत्त्यापत्तौ नार्कुटादौ विसर्जनीयो दुरुद्धर इति किमेतावदुद्घोषस्य प्रयोजनमिति तदर्थः ।

'चक्रकेष्विष्टतो व्यवस्था' इत्यस्य विषयसङ्कोचमन्तरेण प्रवृत्तिं मन्यमानं प्रत्याह—'किञ्च' इति । 'बाध एवोचितः' इति । 'श्रुतिलिङ्ग' (जै.सू. ३.३.१३) इति सूत्रेण जैमिनीये श्रुत्यपेक्षया लिङ्गस्य दुर्बलत्वाभिधानादिति भावः । ननु 'श्रुतिलिङ्ग' (जै.सू. ३.३.१३) इति सूत्रस्य यत्र 'कदाचन्स्तरीयसी' इत्यादौ 'ऐन्द्रया गार्हपत्यमुपतिष्ठते' (मै. सं. ३.२.४) इत्यादिप्रत्यक्षश्रुतिबोधितानन्याद्युपस्थानविनियोगे सम्पन्ने, तदाकाङ्क्षाया अनुत्थानेनेन्द्रादिपदवत्स्वरूपलिङ्गेन विनियोजकश्रुत्यन्तरकल्पनाया असम्भवात्, इन्द्रीद्युपस्थानविनियोगस्य एकशेषे द्वन्द्वस्येवाप्राप्तिरेव बाधस्तथाविधो हि विषयः । प्रकृते चान्यार्थं लिङ्गविशेषेणानुमितायां बहिरङ्ग-

परिभाषाया अन्तरङ्गशास्त्रीयाकाङ्क्षाबलात् त्रिपाद्यामुपस्थितायाः पूर्वत्रासिद्धशास्त्रेण बाध इति भेदात्कथं तन्न्यायप्रवृत्तिरिति चेत् ? तर्हि प्रत्यक्षत्वानुमानिकत्वरूपधर्मद्वयसाम्याद्विषयसङ्कोचे प्रमाणाभावाद्वा प्रकृतेऽपि तन्न्यायप्रवृत्तिरित्याशयः ।

यद्वा 'पूर्वत्रासिद्धम्' (८.२.१) इत्यस्याधिकारतया प्रत्यक्षत्वेन शीघ्रोपस्थितिकत्वादन्तरङ्गत्वम्, बहिरङ्गपरिभाषायास्तु लक्ष्यपर्यालोचनापेक्षान्तरङ्गरूपलिङ्गोपस्थाप्यतया विलम्बोपस्थितिकत्वाद्बहिरङ्गत्वम् । अतो लोकन्यायसिद्धबहिरङ्गासिद्धत्वेनैव बहिरङ्गासिद्धत्वस्य बाध इत्याशयः ।

'अयं परिहारो न युक्तः' इति । 'अतोऽयुक्तोऽयं परिहारः' इत्यत्र भाष्ये नञ्घटित एव युक्तश्छेदः । अन्यथा 'नैष युक्तः परिहारः' इत्युपक्रम्य, अनेनोपसंहारेण विरोधापत्तेरिति भावः । 'वचनमेवारब्धव्यम्' इति । एवमुपसंहरतो भाष्यकारस्य 'नार्कुटः, नार्पत्यम्' इत्यादौ विसर्गाभावाय 'विसर्जनीयोऽनुत्तरपदे' इति वचनमेवारब्धव्यमित्यत्र तात्पर्यमित्यर्थः । समुदायद्वारेणोत्तरपदनिमित्तको यो रेफः तस्य विसर्गो नेति तदर्थः । तेन 'दास्याः पुत्रः' इत्यलुक्समासे न दोषः । 'नार्कुटः' इत्यादौ चाङ्गनिमित्तकवृद्धिप्रयुक्तस्य रेफस्यावयवद्वारेणोत्तरपदनिमित्तकत्वञ्च नानुपपन्नमिति निषेधसिद्धिश्च । समुदायद्वारकञ्चावयवस्य निमित्तत्वं 'द्विर्वचनेऽचि' (१.१.५९) इत्यत्र स्पष्टमाकरे ।

अन्यथाऽन्तरङ्गत्वाण्णिलोपात्पूर्वं वैकल्पिकत्वे तद्वैयर्थ्यं स्पष्टमेव । येऽपि लक्ष्यानुरोधादानुमानिक्याप्यन्तरङ्गपरिभाषया प्रत्यक्षसिद्धस्य पूर्वत्रेत्यस्य बाधं वदन्ति, तेऽपि लक्षणैकचक्षुर्भिर्नादर्तव्या इति दिक् ।

न च वचनारम्भे 'नृकल्पस्यापत्यं नार्कल्पिः' इत्यादौ रेफस्योत्तरपदे सत्यनुत्पन्नत्वाद्विसर्गो दुर्वार इति वाच्यम् । उत्तरपदशब्दस्यार्थवदवृत्तिचरमावयवपरत्वेनादोषात् । अत एव 'राजीव, राजीवत्' इत्यत्र 'ङावुत्तरपदे'

इति निर्देशेन 'न ङिसम्बुद्धयोः' (८.२.८) इत्यस्याप्रवृत्त्या नलोपसिद्धिः। न च बहिरङ्गपरिभाषायास्त्रिपाद्यामप्रवृत्तौ 'कृतस्यापत्यं कार्तिः, क्षितेरपत्यं क्षैतिः' इत्यादौ रदाभ्यां 'क्षियो दीर्घात्' (८.२.४६) इति निष्ठानत्वप्रसङ्ग इति वाच्यम्। 'वृद्धिनिमित्तात्प्रतिषेधः' (वा. ३–८.२.४२) इति कात्यायनेन तत्रापि वचनस्यारम्भात्। न च फुल्लस्यापत्यं फौल्लिः' इत्यत्र 'त्रिफला विशरणे' इत्यस्मादुत्वसन्नियोगेन विधीयमानस्य निष्ठालत्वस्य वृद्ध्युत्तरं निवृत्तिवारणाय, त्रिपाद्यां परिभाषायाः प्रवृत्तिरावश्यकी, न हि तत्र प्रागुक्तवचनेन निर्वाहः, प्रतिषेधस्यानिष्टत्वादिति वाच्यम्। पञ्चमीसमासपक्षे स्थानिवद्भावेन तन्निवृत्तिवारणात्। 'पूर्वत्रासिद्धीये न स्थानिवत्'(जै. प. वृ. ४८) इति च तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषिद्धम्।

'मादुपधायाः' (८.२.९) इत्यत्र विहितविशेषणाश्रयणाच्च 'नृमतोऽपत्यं नार्मतः' इत्यत्र वत्वाभावः। 'महिष्मान्' इत्यत्र तदभावश्च यवादेराकृतिगणत्वात्सिद्धः। एतन्मूलकमेव 'नार्मते वत्वप्रतिषेधः' इति वार्तिकम्, अपूर्वत्वे गौरवात्। किञ्च त्रिपाद्यामन्तरङ्गपरिभाषाप्रवृत्तिमभ्युपगच्छताऽपि 'अक्राष्टाम्' इत्यादौ 'झलो झलि' (८.२.२६) इति सलोपोत्तरं तस्य बहिरङ्गासिद्धत्वेन, 'षढोः कः सि' (८.२.४१) इति प्रवृत्तिवारणाय यथोद्देशमाश्रित्य परिभाषायास्त्रिपाद्यामप्रवृत्तिरभ्युपगन्तव्यैवेति, फलानामन्यथासिद्धौ, किं त्रिपाद्यां तत्प्रवृत्त्यभिनिवेशेन ? न्यायोपहितत्वादस्यैव भाष्यस्य सिद्धान्त्युक्तित्वम्। यच्च 'एमोङ्' (मा. सु. ३) सूत्रे 'रदाभ्यां' (८.२.४६) इति सूत्रे 'संयोगान्तस्य लोपः' (८.२.२३) इति सूत्रे च त्रिपाद्यामेतत्परिभाषाप्रवर्तनपरं भाष्यं, तस्यैकदेश्युक्तित्वं न्यायविहीनत्वादिति भावः।

ननु प्रमाणविरोधे न्यायस्यापि परित्यागो दृश्यते, यथा 'तौ सत्' (३.२.१२७) इति निर्देशोद्भ्रष्टावसरन्यायस्य। किञ्चैकं प्रमाणीकृत्य बहूनां सजातीयानामप्रामाण्यकल्पनापेक्षया, बहूनां प्रामाण्यादेकस्याप्रामाण्यमुचितमित्येषोऽपि न्यायः। तस्मात्कथमस्य सिद्धान्त्युक्तित्वमत आह—'अत एव' इति। 'तद्वैयर्थ्यम्' इति। ननु 'प्लायते' इत्यादौ 'उपसर्गस्यायतौ' (८.२.१९) इति लत्वापेक्षया सवर्णदीर्घस्य बहिरङ्गत्वाभावेन परिभाषाप्रवृत्तिविरहात् स्थानिवत्त्वेन, लत्वसमर्थनायावश्यकमेव वचनमिति कथं

तद्वैयर्थ्यम्। न च पूर्वान्तत्वेनोपसर्गत्वं, परादित्वेनायतित्वमिति, विनैव स्थानिवद्भावं निर्वाह इति वाच्यम्। 'उभयत आश्रयणे नान्तादिवत्' (व्या. प. ९१)' इति निषेधात्। सत्त्वे वा पौर्वापर्यलक्षणस्य व्यपवर्गस्य दौर्लभ्यात्।

न च धातूपसर्गयोः कार्यमन्तरङ्गमित्यन्तरङ्गत्वं लत्वस्येति वाच्यम्। तस्यान्यादृशविषयकताया वक्ष्यमाणत्वात् इति चेत्? तर्हि प्रकृतपरिभाषोदाहरणसाधकत्वेन भाष्यकारोपन्यस्तस्य तस्य वचनस्य वैयर्थ्यमित्याशयः। न च यथोद्देशपक्षाभिप्रायकत्वेन वचनारम्भस्य सार्थक्यात्कथं वैयर्थ्यमिति वाच्यम्। व्यवस्थितयोः पक्षयोरन्यतरपक्षेण लक्ष्यसिद्धौ पक्षान्तरानुरोधेन वचनारम्भस्यानावश्यकत्वात्। कथमन्यथा पक्षद्वयसाधारणतया प्रवृत्तानां 'वृद्धिनिमित्तात्प्रतिषेधः' (८.२.४२-वा. ३) इत्यादीनां वचनानां कार्यकालपक्षावलम्बेन प्रत्याख्यानं कुर्वद्भवतामालम्बभूतमेव भाष्यमुपपद्यताम्। तथा णत्वविषयकोऽपि वचनारम्भः प्रकृतार्थे प्रमाणम्।

यत्तु 'प्रहिणोति' इत्यादौ गुणोत्तरं 'हिनुमीना' (८.४.१५) इति णत्वसिद्धये वचनारम्भः। न हि तत्र प्रकृतपरिभाषया निर्वाहे णत्वस्यैव बहिरङ्गत्वादित्याहुः, तदसत्; आनुमानिकस्थानिवद्भावेनैकदेशविकृतन्यायेन वा गुणोत्तरमपि हिनुशब्दत्वमाश्रित्य णत्वस्य सुवचतया, बहिरङ्गपरिभाषाविषयाणां मृषवपनीत्यादीनामेव वचनारम्भप्रयोजकत्वात्। तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि 'तक्, रक्' इत्यादौ संयोगादिलोपं वारयितुं तद्विषये वचनारम्भः सार्थकः। 'नादृतब्याः' इत्यस्य कैयटादय इत्याशयः।

अत्रायं निष्कर्षः - त्रैपादिकान्तरङ्गशास्त्रस्य परिभाषां प्रत्यसिद्धत्वाभावो द्वेधा परिभाषाणां विधिदेशीयत्वाभ्युपगमेन निर्दिष्टपरिभाषावत्पदैकवाक्यतया, विध्युपकारकत्वेन वा। इह तु तयोरुभयोरप्यसम्भवः। तथा हि- विधिदेशीयत्वन्तु परिभाषाणां व्यवहर्तृदृष्टान्तेन निराकृतमेवाधस्तात्। पदैकवाक्यतापि न पूर्वत्रासिद्धशास्त्रवदतिदेशबोधकत्वेन विधिभिरेककियासम्बन्धस्य बाधितत्वात्। अतः कार्यकालेऽपि त्रिपाद्यामस्याः परिभाषाया अप्रवृत्तिरेव।

ननु यथोद्देशे परिभाषाणामेव स्वातन्त्र्यात्, तासु चेतनत्वारोपस्य आवश्यकतया प्रकृतेऽपि तदारोपात्परिभाषाबुद्धिगोचरत्वेनैवान्तरङ्गभावस्य बहिरङ्गासिद्धत्वसम्पादनेन अन्तरङ्गस्य प्रवृत्तौ निवृत्तौ वा प्रयोजकत्वम्। कार्यकाले तु विधीनामेव स्वातन्त्र्यात्तेषु चेतनत्वारोपस्य न्याय्यत्वेन, अन्तरङ्गशास्त्रीयबुद्धिगोचरस्यैवान्तरङ्गबहिरङ्गभावस्य परिभाषाप्रवर्तकत्वमिति युक्तम्। परिभाषा चेयमत्र पक्षे सामान्यमुखेन यदन्तरङ्गं तन्निरूपितबहिरङ्गत्वाक्रान्तस्य तदपेक्षमसिद्धत्वमित्येव बोधयति। न तु यथोद्देशंवच्छून्यग्राहिकया तत्तदन्तरङ्गमुपादाय, तदपेक्षया बहिरङ्गमसिद्धमिति। सामान्योपकारस्य च न त्रैपादिकासिद्धत्वं प्रतिबन्धकम्। सामान्यस्यान्यत्र प्रसिद्धत्वात्। नापि परिभाषोपस्थितेः। अन्तरङ्गदृष्ट्या परिभाषाया असिद्धत्वाभावेन तद्विषयकोपकारकाकाङ्क्षाया दुर्वारत्वात्। भाधिकारे तु परिभाषाया अप्रवृत्तिर्यथोद्देशपक्षावलम्बादेव। तस्मात्कथमस्याः परिभाषायास्त्रिपाद्याम् प्रवृत्तिरिति चेत्? सत्यम्; सामान्योपकारस्य तत्तदन्तरङ्गशास्त्रीयविशेषव्यवस्थापकत्वे मानाभावः।

न हि विशेष्योपकारमन्तरा तत्सम्भवः। नापि विशेषव्यवस्थामन्तरेणान्तरङ्गशास्त्रीयप्रवृत्तिनिवृत्त्योरसन्देहः। किञ्च गुणशास्त्रकृतोपकारस्तत्तद्विद्युद्देश्यकत्वेनैव प्रवृत्तः, विधेः प्रवर्तको निवर्तको वा सा चोद्देश्यता सामान्यरूपेण विशेषरूपेण वेत्यन्यत्। ततश्च त्रैपादिकासिद्धत्वेन सुतरामविद्यमानस्य सामान्यरूपेणाप्युद्देश्यत्वायोगात्कथं प्रकृतपरिभाषाबोधितेन तथाविधोपकारेण त्रैपादिकान्तरङ्गशास्त्रीयप्रवृत्तिनिवृत्त्योर्व्यवस्था स्यात्। ततश्च पक्षद्वयेऽपि परिभाषाभिर्विशेषेणैवोपकार एष्टव्यः। एवञ्च परिभाषाबुद्धिगोचर एवान्तरङ्गबहिरङ्गभावः प्रकृतोपयोगीति त्रैपादिकासिद्धत्वेन तत्प्रतिबन्धान्न त्रिपाद्यां परिभाषायाः प्रवृत्तिरिति विभाव्यताम्।

यत्तु घटकनिमित्तकत्वमन्तरङ्गत्वम्, तच्च लक्ष्यसमवायिकार्यगतम्। लक्ष्यन्तु परिभाषादृष्ट्या सिद्धमेव, ततस्त्रैपादिकेऽप्यन्तरङ्गशास्त्रे कुतो न तत्परिभाषाप्रवृत्तिरिति। तत्रेदं विचार्यते—स्वदृष्ट्या लक्ष्यस्याविद्यमानवद्भावाभावेऽपि न तत्र परिभाषोपस्थितिः। किन्तु शास्त्रे तत्र च कार्यगत-

मारोपितमन्तरङ्गत्वमुपस्थापकम्। शास्त्रस्यासिद्धत्वे च निरधिष्ठानारोपासम्भवात् क्व तदारोपेण परिभाषोपस्थितिः स्यात्। यद्वा शास्त्रगतमन्तरङ्गबोधकत्वमेव लिङ्गम्। शास्त्रस्याविद्यमानवत्त्वे च कथं तत्परिज्ञानं स्यात्? सम्भवेदेवं यदि, विनष्टघटीयरूपं चाक्षुषं स्यात्, अतो न किञ्चिदेतत्। अत्रेदं बोध्यम्—अन्तरङ्गशास्त्रस्यापि स्वगतान्तरङ्गत्वपरिज्ञानं पक्षद्वयसाधारणेनावश्यकम्। अन्यथा हि कार्यकालेन 'अहमन्तरङ्गम्' इति परिभामेव नाक्षिपेत्। यथोद्देशे वा परिभाषाक्षिप्तमन्तरङ्गं तद्देशं न प्राप्नुयात्। एवञ्च कार्यकालेऽन्तरङ्गशास्त्रगतमन्तरङ्गबहिरङ्गभावपरिज्ञानमाकाङ्क्षाहेतुः। परिभाषागतञ्च तत्परिज्ञानं प्रवर्तकम्। यथोद्देशे तु विपरीतमिति विवेकः।

यदि च 'असिद्धवत्' (६.४.२२) सूत्रस्थं भाष्यमनादृत्य परिभाषागतस्यान्तरङ्गबहिरङ्गभावपरिज्ञानस्यान्तरङ्गपरिभाषाप्रवृत्तिप्रयोजकत्वं नाभ्युपगम्यते, तदा 'प्रतिद्वन्द्विभाविनौ' इत्यादिना त्रैपादिकासिद्धत्वस्य परिभाषाप्रवृत्तिप्रयोजकान्तरङ्गबहिरङ्गभावपरिज्ञानविघटकत्वोपपादनपरभाष्यस्यासाङ्गत्यप्रसङ्गः। यदि च तद्भाष्यसामरस्यायान्तरङ्गबहिरङ्गयोः परस्परबुद्धिगोचर एवान्तरङ्गबहिरङ्गभावः परिभाषाप्रवर्तकः, कृतेऽपि पूर्वस्मिन् परस्यासिद्धत्वमित्यवगम्यते। तदा पूर्वस्मिन् कर्तव्य एव परस्यासिद्धत्वमित्याशयकस्याग्रिमभाष्यस्यास्वारसिकत्वापत्तिः। तत्समर्थनाय 'प्रतिद्वन्द्विभाविनौ' इत्यादिभाष्यस्य समकालप्राप्तबहिरङ्गविषयकत्वं 'नानभिनिर्वृत्तः' इत्यादेर्ज्ञातबहिरङ्गविषयकत्वमिति कल्पनायां 'नार्कुटः' इत्यादेरुपक्रमविरोधः। एवञ्च परिभाषागतस्यान्तरङ्गबहिरङ्गभावपरिज्ञानस्य परिभाषाप्रवर्तकत्वमित्येव 'प्रतिद्वन्द्विभाविनौ' इत्यादिभाष्याभिप्रायः। अत एवैतद्भाष्यान्तर्गतस्य 'असिद्धत्वात्' इत्यस्य परिभाषां प्रत्यसिद्धत्वादित्यर्थं कैयटश्चावर्णयत्।

'नानभिनिर्वृत्तः' इत्यादिभाष्यन्तु बहिरङ्गदृष्टयान्तरङ्गस्यासिद्धत्वाभावेऽपि परिभाषां प्रत्यसिद्धत्वात्त्रिपाद्यां परिभाषाया अप्रवृत्तेः 'पूर्वत्रासिद्धम्' (८.२.१) इत्यत्र कर्तव्ये इत्यध्याहारो निष्फल एव। तत्फलं हि त्रिपाद्यां परिभाषायाः प्रवृत्तिरिति चोद्यपरिहाराभ्यां प्रदर्शनपरम्। अतो न तद्विरोधः।

अत एव 'कुतो नु खल्वेतत्' इत्यादिचरमभाष्योपपत्तिः। अन्यथा तस्यैकदेशयुक्तित्वकल्पनापत्तिः। 'नानभिनिर्वृत्तः' इति भाष्यमुपादाय, वस्तुस्थितिः कथमिति वदन् कैयटोऽप्यमुमेवार्थमभिप्रैति। किञ्च वस्तुतो विद्यमान एवान्तरङ्गबहिरङ्गभावो यदि परिभाषाप्रवर्तको यदि वा 'पूर्वत्रासिद्धम्' (८.२.१) इत्यत्रावश्यवधिमतोः साजात्यनियमात्पूर्वशब्देन परिभाषाशास्त्रं न गृह्येत, तदा यथोद्देशेऽपि परिभाषायास्त्रिपाद्यां प्रवृत्तिप्रसङ्ग इत्यतो महदनिष्टम्। तस्मादुक्तरीत्या पक्षद्वयेऽपि परिभाषायास्त्रिपाद्यामप्रवृत्तिरित्येव समञ्जसमिति नव्याः प्रवदन्तीत्यलम्।

ननु जातबहिरङ्गासिद्धत्वे प्रमाणमस्तु धर्मिग्राहकसाजात्यात् 'वाहऊठ्' (६.४.१३२)ग्रहणं समकालप्राप्तबहिरङ्गासिद्धत्वे किं मानमत आह—

अत एव 'ओमाङोश्च' (६.१.९५) इत्याङ्ग्रहणं चरितार्थम्। तद्धि 'खट्वा आ ऊढ' इत्यत्र परमपि सवर्णदीर्घं बाधित्वान्तरङ्गत्वात् आद्गुणे वृद्धिप्राप्तौ पररूपार्थम्। साधनबोधकप्रत्ययोत्पत्त्यनन्तरं पूर्वं धातोरुपसर्गयोगे पश्चात् खट्वाशब्दस्य समुदायेन योगादगुणस्यान्तरङ्गत्वमिति 'संप्रसारणाच्च' (६.१.१०८) इति सूत्रे भाष्ये स्पष्टम्। 'एहि' इत्यनुकरणस्य शिवादिशब्दसम्बन्धे तु नास्य प्रवृत्तिः ज्ञापकपर'संप्रसारणाच्च' (६.१.१०८) इति सूत्रस्थभाष्यप्रामाण्येन अनित्यं 'प्रकृतिवदनुकरणम्' (प. ३६) इत्यतिदेशमादाय लब्धाङ्त्वे एतदप्रवृत्तेः।

'अत एव' इति। समकालप्राप्तबहिरङ्गस्याप्यसिद्धत्वादेवेत्यर्थः। विभज्यान्वाख्याने समकालप्राप्तिसम्भव इति दर्शयति। 'खट्वा आ ऊढ' इति। 'अन्तरङ्गत्वात्' इति। नित्यत्वन्तूभयसाधारणम्। यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यमिति सवर्णदीर्घस्यापि नित्यत्वसम्भवादित्याशयः।

ननु सवर्णदीर्घापेक्षया गुणस्यान्तरङ्गत्वमनुपपन्नम् । पदद्वयसम्बन्धि-वर्णद्वयाश्रयत्वस्योभयोस्तुल्यत्वात् । परनिमित्तकत्वमप्युभयोः समानमत आह- 'साधनबोधकप्रत्यय' इत्यादि । सम्बन्धक्रमेण पूर्वोपस्थितनिमित्तकत्वादिति भावः । धातूपसर्गकार्यत्वन्तु नान्तरङ्गत्वप्रयोजकम्, 'प्रेद्धः' इत्यादौ व्यभि-चारात् । 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इत्येतद्विषयश्चाग्रे स्फुटीभविष्यति।

ननु प्रक्रियाक्रमेण परनिमित्तस्य पूर्वमुपस्थितावपि पूर्वनिमित्तानुप-स्थित्या मास्तु सवर्णदीर्घस्य तादृशक्रमाधीनं पूर्वोपस्थितनिमित्तकत्वम् । प्रायोगिकक्रमाधीनन्तु तद्दुर्वारमेव । एवं रीत्याऽप्यन्तरङ्गत्वम् 'अचः पर-स्मिन्' (१.१.५७) इति सूत्रे 'कर्त्र्या' 'हर्त्र्या' इत्यादौ प्रथमतः पूर्वयणा-देशप्रवृत्तिद्वारेण 'उदात्तयणो हल्पूर्वात्' (६.१.१७४) इत्येतत्स्वरसिद्धये 'पूर्वं पूर्वमन्तरङ्गम्' इत्यभिदधता भाष्यकारेण स्पष्टमेवोक्तम् । ततश्च तुल्य एवान्तरङ्गबहिरङ्गभावो गुणदीर्घयोरित्यन्तरङ्गताया अव्यवस्थापकत्वेन परत्वात्प्रसक्तं सवर्णदीर्घं बाधित्वा पररूपविधानायावश्यकमेवाङ्ग्रहणमिति कथं ज्ञापकत्वमिति चेत् ? सत्यम् ; आङ्ग्रहणस्योक्तार्थज्ञापकतापरभाष्य-प्रामाण्येन प्रयोगीयोच्चारणक्रमाधीनपूर्वोपस्थितनिमित्तकत्वप्रयुक्तान्तरङ्गबहि-रङ्गभावस्यैव पदाश्रितकार्यमात्रविषयैकत्वमित्यभ्युपगम्यते; प्रकृते तु नाना-पदाश्रितं कार्यमित्यदोषः । तदेतदाह- 'भाष्ये स्पष्टम्' इति ।

नन्वेवमपि 'एहि' इत्यनुकरणस्य शिवादिशब्दसम्बन्धे प्रसक्तां वृद्धिं बाधित्वा पूर्वं तत्त्वेनानुकार्यगतस्याङ्त्वस्यातिदेशमाश्रित्य, पररूपविधानाया-वश्यकमेवाङ्ग्रहणम् । न चानेन न्यायेन प्रकृतिपर्यन्तस्यैव धर्मस्यातिदेशो न तु तदवयवे गतस्य मात्राभावात् । अत एव 'अस्यवामीयम्' इत्यादौ सुब्लुको न प्रसङ्ग इति दुर्लभ एवाङ्त्वातिदेश इति वाच्यम् । 'अस्यवा-मीयाम्' इत्यादेर्न्यायानित्यत्वेनैवोपपत्तिमाश्रित्य 'आपो योनियन्मतुषु' इति वार्तिकेनानुकरणभूतेऽप्सुशब्दे सुपा मतुष्यलुग्विधानबलेन अवयवगतस्यापि तु-कार्यधर्मस्यातिदेष्टव्यत्वेनाङ्त्वस्य सुवचत्वात् ।

न चैवमप्यन्तवद्भावेनाङ्त्वस्यानुकार्ये फलाभावादप्रवृत्तेरनुकरणे

तदतिदेशो दुर्लभ एवेति वाच्यम्। 'गङ्गे अमू' इत्यादौ प्रगृह्यसंज्ञाप्रयोजक-द्विवचनत्वादिसम्पत्तये भविष्यति किञ्चित्प्रयोजनमित्यभिसन्धिमात्रेणाप्यतिदेशप्रवृत्त्यभ्युपगमात्। अत एव 'अतिखट्वाय' इत्यत्र स्वाश्रयमाकारत्वं स्थानिवद्भावेनाप्त्वमिति याडापादितो भाष्ये। दीर्घस्थानिनि फलभावे नाप्त्वातिदेशाभावे हि तदसङ्गतिः स्पष्टैव। उक्तप्रकारेणातिदेशप्रवृत्तेः 'सुनयिका' इत्यादौ 'धात्वन्तयकोस्तु नित्यम्' इतीत्वप्रवृत्तिरपि फलं बोध्यम्। ततश्च कथं ज्ञापकत्वमत आह—'एहि' इत्यादि। 'एतदप्रवृत्तेः' इति। यदि तु प्रागुक्तवार्तिके 'मतिषु' इत्येव पाठः 'अप्सुमतिः' इत्युदाहरणमिति संप्रासशेखरे स्पष्टम्। अनुकार्यावयवगतधर्मस्य चैव नेष्यत एवातिदेशः। ततश्च नैतादृशेषु क्तातिदेशप्रयुक्तो दोष इत्युच्यते। तर्हि 'एहि' इत्येतदन्तर्गतस्यैकारमात्रस्यानुकरणे प्रसक्तस्य दोषस्य परिहारार्थमयमुद्योगः। कृतसन्धेः 'एहि' इत्यादेरननुकृतस्य शिवादिशब्दसम्बन्धस्त्वयुक्त एव ज्ञापकपरभाष्यप्रामाण्यादिति दिक्।

यत्तु पूर्वं धातुरुपसर्गेण युज्यते, पश्चात्साधनेन, उपसर्गेण-तत्संज्ञकशब्देन, साधनेन कारकेण, तत्प्रयुक्तकार्येण वा। अत एव 'अनुभूयते' इत्यादौ सकर्मकत्वात्कर्मणि लकारसिद्धिरिति? तन्न; क्रियायाः साध्यत्वेन बोधात्साध्यस्य च साधनाकङ्क्षया तत्सम्बन्धोत्तरमेव निश्चितक्रियाबोधेन साधनकार्यप्रवृत्त्युत्तरमेव क्रियायोगनिमित्तोपसर्गसंज्ञकस्य सम्बन्धौचित्यात्। अत एव 'सुट् कात्पूर्वः' (६.१.१३५) इति सूत्रे 'पूर्वं धातुरुपसर्गेण' इत्युक्त्वा, नैतत्सारम्; पूर्वं धातुः साधनेन युज्यते, पश्चादुपसर्गेणेत्युक्त्वा उक्तस्यैव युक्ततत्वमुक्तम्—'साधनं हि क्रियां निर्वर्तयति' इत्यादिना।

प्र॰ प्रसङ्गाद्धातूपसर्गयोः कार्यमन्तरङ्गमित्यस्य विषयविशेषं व्यवस्थापयितुं

प्राचीनोक्तव्यवस्थायामसाङ्गत्यबोधनाय तद्बीजभूतं 'पूर्वं धातुरुपसर्गेण' इत्यादि सिद्धान्तं तावद्दूषयति—'यत्तु' इत्यादि। 'तत्संज्ञकशब्देन' इति। एवञ्च उपसर्गसम्बन्धस्य प्राथमिकत्वात्, तत्प्रयुक्तं कार्यमन्तरङ्गम्। साधन-सम्बन्धस्य पाश्चात्यतया तत्प्रयुक्तं बहिरङ्गमिति तदाशयः। 'साध्यत्वेन बोधात्' इति। तादृशबोधविषयत्वमेव क्रियायाः स्वरूपमिति भावः। 'साधनाकाङ्क्षया' इति। साध्यसाधनयोर्मिथो निरूप्यनिरूपकभावापन्नधर्माक्रान्तत्वात्तयोर्नियतसाकाङ्क्षत्वमिति बोध्यम्। 'निश्चितक्रिया' इत्यस्य निष्पन्नक्रियेत्यर्थः। साधनसम्बन्धेनैव क्रियाया निष्पाद्यत्वावगमस्तादृश-सम्बन्धावगमश्च साधनबोधकप्रत्ययसमभिव्याहाराधीन इति तत्त्वम्।

'सम्बन्धौचित्यात्' इति। क्रियात्वनिश्चयोत्तरमेव हि तन्निमित्तको-पसर्गसंज्ञाप्रवृत्तिः। तदुत्तरञ्च 'ते प्राग्धातोः' (१.४.८०) इति प्रादीनां धातुसम्बन्धः, क्रियात्वनिश्चयश्च साधनसम्बन्धपूर्वक इत्यतो धातोरादौ साधन-बोधकप्रत्ययादिसम्बन्धः। पश्चात्तूपसर्गसम्बन्ध इति युक्तः क्रम इत्याशयः।

'इत्यादिना' इति। साधनं हि क्रियां निर्वर्त्तयति, तामुपसर्गो विशि-नष्टि। अभिनिर्वृत्तस्य चार्थस्य उपसर्गेण विशेषः शक्यो वक्तुमित्यनेने-त्यर्थः। 'उपपदमतिङ्' (२.२.१९) इति सूत्रे 'गतिर्गतौ' (८.१.७०) इति सूत्रे च भाष्ये परिशीलितोऽयमर्थः। ननु निष्पत्तेः पूर्वमुपसर्गद्योत्य-विशेषसम्बन्धवत्, तिङादिप्रतिपाद्यकर्त्रादिरूपकारकसम्बन्धोऽपि दुर्वचः। न ह्यनिष्पन्नेनार्थेन कस्यचित्सम्बन्धो भवतीति चेत्? सत्यम्; क्रिया-कारकयोर्निष्पाद्यनिष्पादकभावस्य निर्विवादतया कारकनिरूपितं निष्पाद्यत्वमेव क्रियायां सम्बन्धः। तच्चाश्रयत्वसम्बन्धावच्छिन्ननिष्पत्तिरेवेति न तस्य निष्पत्त्यन्तरसापेक्षत्वम्; अनवस्थाप्रसङ्गात्। उपसर्गबोध्यविशेषसम्बन्धो विशेषणविशेष्यभावः। स च वस्तुनिष्पत्त्यनन्तरभावी। न ह्यनिष्पन्ने घटे 'रक्तोऽयं, श्यामोऽयं' इति विशेषसम्बन्धावगाही व्यवहारः। तस्मात्क्रिया-रूपस्य वस्तुनो निष्पत्त्यनन्तरमेव विशेषसम्बन्ध इति तस्य निष्पत्तिसापेक्ष-

त्वम्। तदुक्तं 'गतिर्गतौ' (८.१.७०) इत्यत्र 'अभिनिर्वृत्तस्य' इति प्रतीकमुपादाय; कैयटे 'सतो ह्यर्थस्य विशेषणेन सम्बन्धो दृश्यते, साधनायत्तत्वं च क्रियायाः सत्त्वम्। ननु चासत् साधनेन वा कथं सम्बन्ध्यते इति चेत्? साधनेन तस्या उत्पाद एव सम्बन्धः। साधनाद्वाप्तात्मलाभा क्रिया उपसर्गेण विशेष्यत इति।

ननु साधनसम्बन्धात्पूर्वमुपसर्गसमभिव्याहाराधीनविशेषसम्बन्धानभ्युपगमे विशिष्टस्य साधनसाध्यत्वनिबन्धक्रियात्वस्य दुरुपपादयतया तन्निरूपितकारकत्वकर्मत्वयोरनुपपन्नत्वात्सामान्यस्य चाकर्मकत्वात् "उपास्यते गुरुः' इत्यादौ कर्मणि लकारो दुर्लभः। तथा 'वि' इत्येतदुपसर्गसम्बन्धोत्तरं करोतेर्विकारार्थकत्वेनाकर्मकत्वेऽपि, साधनसम्बन्धवेलायामुत्पादनार्थकतया सकर्मकत्वेन 'विक्रियते सैन्धवेन' इत्यादौ भावे लकारानापत्तेरत आह—

उपसर्गद्योत्यार्थान्तर्भावेण धातुनैवार्थाभिधानादुक्तेषु कर्मणि लकारादिसिद्धिः। पश्चाच्छ्रोतृबोधायं द्योतकोपसर्गसम्बन्धः।

'उपसर्गद्योत्यार्थान्तर्भावेन' इति। अयं भावः—उपसर्गाणां वाचकत्वे तदर्थसम्बन्धस्य, तत्समभिव्याहारैकसाध्यत्वात् 'तद्वसम्बन्धे तदर्थसम्बन्धः' इति शक्यते वक्तुम्। इह च तेषां द्योतकत्वमेव। तच्च समभिव्याहृतधातुनिष्ठविशिष्टार्थविषयकशक्त्यभिव्यञ्जकत्वम्। एवञ्चातेकार्थत्वाद्धातूनामेव विशिष्टार्थे शक्तिरिति, विशिष्टैव क्रिया साधनेन साध्यते। तां तु साधनादवाप्तरूपाऽसावन्वयतो विशेषं लभते। तदुक्तं भाष्ये—यस्त्वसौ धातूपसर्गयोरभिसम्बन्धः, तमभ्यन्तरीकृत्य, धातुः साधनेन युज्यते। अवश्यञ्चैतदेवं विज्ञेयं, यो हि मन्यते 'पूर्वं धातुः साधनेन युज्यते, पश्चादुपसर्गेण' इति 'आस्यते गुरुः' इत्यकर्मकः 'उपास्यते गुरुः' इति केन सकर्मकः स्यादिति।

धातूपसर्गसमभिव्याहाराधीनत्वेन योऽर्थस्तेवाभिमतः, तं विशिष्टार्थं

केवलो धातुरेव स्वार्थं कृत्वा, साध्यत्वेन बोधाय साधनेन युज्यते। पश्चादुपसर्गसंज्ञकशब्देन। यस्तूपसर्गाणां वाचकत्वमभ्युपेत्य, शब्दसम्बन्धव्यङ्ग्यसम्बन्धोऽपि साधनसम्बन्धानन्तरमेवेति मन्यते, तस्य 'आस्यते, उपास्यते' इत्यनयोरुभयोरप्यकर्मकत्वमेव स्यादिति तदर्थः। इत्थञ्च 'नदी वहति, भारं वहति' इतिवदकर्मकत्वसकर्मकत्वयोर्व्यवस्था सुवचा। साधनसम्बन्धकाल एव उपसर्गसमभिव्याहाराभावेऽपि तद्द्योत्यार्थसम्बन्धस्याक्षतत्वादिति। तदाह—'लकारादिसिद्धिः' इति।

नन्वेवं धातुनैव विशिष्टार्थप्रतीतावुपसर्गाणामप्रयोग एव स्यादत आह—'पश्चाच्छ्रुतबोधाय' इति। अन्यथा केवलात्ततोऽन्यत्राप्रतीयमानो विशिष्टार्थः कथं प्रतीयेतेति भावः। तदुक्तं 'गतिर्गतौ' (८.१.७०) इत्यत्र कैयटे, विशिष्टैव क्रिया साधनेनोह्यते, ततश्च प्रयोक्ता विशिष्टायाः क्रियायाः साधनेन सम्बन्धं प्रतिपादयितुं धातूपसर्गयोः समुदायं प्रयुङ्क्ते इति। एवञ्च 'पूर्वमुपसर्गेण' इत्यस्य तद्द्योत्यार्थेनेत्यर्थः। 'पश्चादुपसर्गेण' इत्यस्य तत्संज्ञकशब्देनेत्यर्थ इत्युक्तौ तु नानयोः पक्षयोर्विरोधः। ततश्च पूर्वमुपसर्गद्योत्यार्थसम्बन्धः, ततो वाचकप्रत्ययसमभिव्याहाराधीनः साधनसम्बन्धः, पश्चादुपसर्गसमभिव्याहार इत्येवंविधक्रमानुरोधिनान्तरतत्प्रयुक्तकार्याणां पौर्वापर्यलक्षणोऽन्तरङ्गबहिरङ्गभाव इति वस्तुस्थितिः। स्यादेतत्; पूर्वमुपसर्गसमभिव्याहारानभ्युपगमे 'विषुषुपतुः' इत्याद्यसिद्धिः। तत्र नित्यत्वात्सम्प्रसारणे 'पूर्वत्रासिद्धीयमद्विर्वचने' (प. ११७) इत्येतत्परिभाषाबलाद्द्वित्वापेक्षया तत्प्रयुक्तहलादिशेषापेक्षया च षत्वस्यासिद्धत्वाभावेऽपि साधनबोधकप्रत्ययप्रयुक्तद्वित्वादिप्रवृत्तिवेलायामुपसर्गसमभिव्याहाराभावात्, पश्चाच्च सुब्रूपत्वाभावात् 'सुविनिर्दुर्भ्यः' (८.३.८८) इत्यस्याप्रवृत्त्या तदप्राप्तेः।

न च हलादिःशेषोत्तरमेकदेशविकृतन्यायेन सुब्रूपत्वात्षत्वं सुलभमिति वाच्यम्। सत्यामप्युक्तरीत्या, सुब्रूतायामभ्यासस्यानर्थकत्वेन, 'अर्थवदग्रहण' (प. १४)परिभाषया तदप्राप्तेः। अत एव 'विसुस्रुवाप' इत्यत्र तदप्रवृत्तिरिति चेत्? मैवम्; अर्थवत्सुप्सम्बन्धिनः सस्येत्यर्थेनोत्तरखण्डस्यार्थवत्तया

तृत्सम्बन्धित्वेऽस्याभ्यासेसकारेऽपि परम्परिकस्योक्षतत्वेन दोषाभावात्। 'विसुष्वाप' इत्यत्र तृत्तरखण्डे सम्प्रसारणाप्रवृत्त्यौ तस्यार्थवत्सुप्सम्बन्धित्वाभावादोषः।

एवञ्चान्तरङ्गतरार्थकोपसर्गनिमित्तः सुट् 'सम् कृति' इत्यवस्थायां द्वित्वादितः पूर्वं प्रवर्तते, ततो द्वित्वादि। अत एव 'प्रणिदापयति' इत्यादौ णत्वं 'यदाममा' (प. ११) इति न्यायेन समाहितं भाष्ये। अत एव 'प्रत्येति, प्रत्ययः' इत्यादिसिद्धिः।

नन्वेवमपि 'उष्ट्रप्रणायः', 'गोसम्प्रदायः' इत्यादिप्रामाणिकप्रयोगविरोधः। संज्ञासूत्रे 'तत्र ग्रहणात्' महासंज्ञाकरणाच्च उपपदसंज्ञासन्नियोगेनैव 'कर्मण्यण्' (३.२.१) इत्यादीनां प्रवृत्तिरित्यर्थस्याकरसम्मततया प्रथमतः कर्माद्युपपदसमभिव्याहारस्यावश्यकतया संज्ञासन्नियोगेनाणाद्युत्पत्तौ, तदन्तेन सुबुत्पत्तेः पूर्वमुपपदसमासे, विशिष्टात्सुबुत्पत्त्यनन्तरं प्रयोगकाले समभिव्याहर्तव्यानामुपसर्गाणां समासमध्यगतत्वेन प्रयोक्तुमशक्यत्वादिति चेत्? सत्यम्; उपसर्गद्योत्यार्थान्तर्भावेण बुद्धिगतकर्मादीनामुपपदसंज्ञासन्नियोगेन प्रत्ययोत्पत्तौ सुबुत्पत्तेः पूर्वं गतिसमासारम्भादुपसर्गयोगे गतिसमासोत्तरं कर्माद्युपपदसमभिव्याहारपूर्वकस्तेत्समास इति तदुपपत्तिः।

अत एव कर्मोपपदात्कविधावनुपसर्गग्रहणं सार्थकम्। अन्यथा ह्युपपदविषये प्रागुक्तरीत्या प्रयोगानुगानुपपत्तेस्तद्वैयर्थ्यं स्पष्टमेव। स्पष्टमिदं 'उपपदमतिङ्' (२.२.१९) इत्यत्रोद्द्योतं इति। तत एवावधार्यमित्याहुः। अथैवं 'सम्परिभ्यां करोतौ' (६.१.१३७) इत्यादेस्ताभ्यां परस्य 'करोतेस्सुट्' इत्येवमर्थं 'सञ्चस्कार', 'समस्कार्षीत्' इत्यादौ प्रयोगवेलायामर्थविशेषस्फोरणाय प्रयुज्यमानस्य 'सम्' इत्युपसर्गस्य द्वित्वादिप्रवृत्तिवेलायामसमभिव्याहृततया, प्रथमतो द्वित्वादिविधिवारणायावश्यकं कर्मपूर्वग्रहणम्। यदि तु सम्परिभ्यां परत्वयोरेवस्य करोतेरित्यर्थ इति पक्षः, यदि च पदावधिकर्मन्वाख्यानमिति पूर्वमेवोपसर्गसमभिव्याहाराश्रयणेन 'सम्परिभ्यां परस्य'

इत्येवार्थ इति पक्षः, उभयथापि साधनबोधकप्रत्ययनिमित्तकद्वित्वादेः प्रक्रिया-क्रमाधीनपूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वानपायात्स्यादेवानिष्टप्रसङ्गो विना 'क्रात्पूर्वग्रहणम्', इति कथं तत्प्रत्याख्यानं भाष्यकाराणामत आह--'एवञ्च' इति। 'अन्तरङ्गतरार्थके' इति। पूर्वोपस्थितिविषयत्वमिहान्तरङ्गत्वं बोध्यम्। उपसर्गद्योत्यार्थविशेषविशिष्टस्यैव साधनसम्बन्धाद्द्वित्वादिकार्याणां प्रथमप्रवृत्तिप्रयोजकसाधनीभूतकर्त्राद्यर्थविषयकोपस्थितेरप्युपसर्गद्योत्यार्थविषय-कोपस्थितेः पूर्वकालिकत्वादन्तरङ्गत्वम्। इत्यञ्च द्वित्वाद्यपेक्षया प्रथमप्रवृत्ति-प्रयोजकमन्तरत्वं सुटो निर्बाधमित्याशयः।

नन्वर्थस्य परिभाषायामङ्गशब्देन ग्रहणं नेति निरूपितमधस्तात्। ततश्च सुटः पूर्वोपस्थितोपसर्गद्योत्यार्थनिमित्तकत्वलक्षणमन्तरङ्गत्वमाश्रित्य कथं तया परिभाषया व्यवस्था स्यात्? सत्यम्; इह खल्वर्थविशेषविशिष्ट उपसर्गो निमित्तम्, न केवलमर्थः। विशिष्टे चार्थद्वारकं पूर्वोपस्थितिक-त्वम्। अथ वा हस्तिस्मृतिः, हस्तिपकमिवयाकमिव 'एकसम्बन्धिज्ञान-मपरसम्बन्धिस्मारकम्' इति न्यायेन द्योत्यार्थविषयकोपस्थितिर्जायमाना द्योतकमुपसर्गमुपस्थापयतीति अर्थविशिष्टस्योपसर्गस्यैव पूर्वोपस्थितिकत्वमिति नानुपपत्तिः। अत एव अन्तरङ्गतरार्थकोपसर्गनिमित्तके इत्युक्तम्। न त्वन्यरङ्गतरोपसर्गद्योत्यार्थनिमित्तक इत्युक्तमिति वदन्ति।

यत्तु 'सम्परिभ्यां' (६.१.१३७) इति तृतीयान्ते, ताभ्यामर्थद्वारा सम्बद्धस्य करोतेरित्यर्थ? इति। तदसत्; तथा सति सम्परिद्योत्यार्थवाचिनः करोतेरित्यर्थस्य पर्यवसन्नत्वादलंशब्दसमभिव्याहारेऽपि करोतेः तथाविधा-र्थवाचकत्वसम्भवात् 'अलङ्करोति' इत्यादावेपि सुट्प्रसङ्गात्। यदि सामर्थ्या-द्भाविसम्परिद्योत्यत्वविशिष्टार्थवाचिनः करोतेरित्यर्थस्य विवक्षणादलंशब्दयोगे सम्परिद्योत्यत्वस्योपलक्षणत्वेऽपि विशेषणत्वाभावाददोष इत्युच्यते, तर्हि 'समलङ्करोति' इत्यत्र तदापत्तिर्दुर्वारा।

यदि तु सम्परीतिरगतिनिरूपितद्योत्यत्वाभावसामानाधिकरण्येन तद्द्यो-त्यत्वविशिष्टो योऽर्थस्तथाविधार्थवाचिन इति विवक्ष्यते, तर्हि 'संस्करोति'

इत्यत्राभीष्टस्य सुडागमस्यनापत्तिः। तस्मात्सम्पर्यिभ्यां परत्वयोग्यस्य करोतेरित्येवार्थो युक्तः। ततश्च 'उपात्प्रति यत्ना' इत्यादावपि न क्लेशः। आवश्यकश्चायमर्थः। अन्यथा विनापि प्रत्ययं 'पूर्वोत्तरपदयोर्लोपः' इति समो लोपे 'स्कर्ता' इत्येतन्मात्रप्रयोगस्यापि साधुत्वमभीष्टमनुपपन्नं स्यात्। 'नेर्विशः' (१.३.१७) 'विपराभ्यां जेः' (१.३.१९) इत्यादावप्येवमेव गतिरिति सर्वमनाविलमिति दिक्।

'अत एव प्रणिदापयति' इति। उपसर्गसमभिव्याहारस्य पाश्चात्यत्वादेवेत्यर्थः। 'प्रणिदापयति' इत्यत्र उपसर्गद्योत्यार्थविशिष्टाण्णिच्, पुक्च तद्विशिष्टस्य घुत्वमादायोपसर्गनिमित्तकं णत्वं समर्थितं भाष्ये। यदि तु पूर्वमुपसर्गयोगस्तदा अन्तरङ्गत्वात्पुकः पूर्वं णत्वे तदसङ्गतिरेव। न च पूर्वशास्त्रप्रवृत्तियोग्यतायां, परशास्त्रस्य त्रैपादिकत्वेनासिद्धत्वात्, 'कथमादौ णत्वमिति वाच्यम्। विरोधे सत्येव त्रैपादिकासिद्धत्वप्रवृत्तिः, इह तु पुङ्णत्वयोर्यौगपद्येन प्रवृत्तौ न कश्चिद्विरोध इत्याशयात्। एवं स्थिते 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इत्यस्य विषयमाह —

अन्यथान्तरङ्गत्वात्सवर्णदीर्घे रूपासिद्धेः। यदुपसर्गनिमित्तकं कार्यं उपसर्गाश्रितं विशिष्टोपसर्गनिमित्तत्वात् तदन्तरङ्गम्। यत्तु न तथा तत्र पूर्वगतसाधननिमित्तमेवान्तरङ्गम्। अत एव 'न धातु' (१.१.४) इति सूत्रे 'प्रेद्धः' इत्यत्र गुणः 'बहिरङ्ग' (प. ५०) इति भाष्ये उक्तम्। किञ्च पूर्वमुपसर्गयोगे धातूपसर्गयोः समासे ऐकस्वर्याद्यापत्तिरिति 'उपपदम्' (२.२.१९) इति भाष्ये स्पष्टम्। भावार्थमत्ययस्यापि पूर्वमेवोत्पत्तिः। अत एव 'प्रेरण्यन्ते वृत्तम्' (७.२.२६) इति निर्देशः सङ्गच्छते। इदञ्च सामान्यापेक्षं ज्ञापकम्। भावतिङोऽपि पूर्वमुत्पत्तेः; अन्यथा 'तत्र समासापत्तिः। तिङन्तु 'अतिङ्' (२.२.१९) इति निषेधान्न दोषः, यदि भावतिङ्युपसर्गयोगोऽस्तीत्यलम्।

'यदुपसर्ग' इत्यादि। अयं भावः — उपसर्गाणां स्वरूपनिर्देशेषु 'अर्थवद्ग्रहण' (प. १४) परिभाषावशादर्थविशेषविशिष्टस्यैवोपसर्गस्य निमित्तता, न तु केवलस्य; ततश्चार्थद्वारा पूर्वोपस्थितिकत्वात्तादृशार्थविशिष्टोपसर्गनिमित्तकं कार्यमन्तरङ्गमित्ययं 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इत्यस्य विषयः।

अस्ति हि सुडागमस्यैवम्विधमन्तरङ्गत्वम्। 'नेर्गद' (८.४.१७) इत्यत्र तूपसर्गात्परत्वं निमित्तम्। तच्च प्रयोगकाल एव सम्भवतीति न 'प्रणिदापयति' इत्यादीनां णत्वमस्य विषयः। न वा 'प्रत्येति प्रत्ययः' इत्यादौ सवर्णदीर्घस्तद्विधावुपसर्गस्य निमित्तत्वेनानुपादानादिति।

'अत एव' इति। 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इत्यस्योक्तविषयत्वादेवेत्यर्थः। यद्वा उपसर्गसमभिव्याहारस्य पाश्चात्यत्वादेवेत्यर्थः। 'बहिरङ्गो गुणः' इति। पूर्वमुपसर्गसमभिव्याहारे हि पूर्वोपस्थितनिमित्तकत्वेन गुणस्यान्तरङ्गत्वमेव स्यादिति तदसङ्गतिरेव। 'भाष्ये उक्तम्' इति। ननु प्रकरणादिगलक्षणयोरेव 'गुणवृद्धयोर्न धातु' इत्यनेन निषेधो न्याय्यः। ततश्चानिगलक्षणत्वात् आदगुणस्य न निषेध इति परिहारान्तरसम्भवादन्यथासिद्धम्।

प्रयोजनमभिदधानो भाष्यकारः कथमत्रार्थे प्रमाणम्? इत्यरुचेराह— 'किञ्च' इति। 'ऐकस्वर्याद्यापत्तिः' इति। 'अन्वभवत्' इत्यादावभीष्टस्य शाकलप्रकृतिभावस्य 'न समासे' इति निषेध आदिशब्दार्थः। ननु साधनबोधकप्रत्ययोत्तरमुपसर्गसमभिव्याहारेऽपि धातूपसर्गयोः समासो दुर्वारः। 'अतिङ्' इति तु तिङन्तोत्तरपदकसमासवारणेन चरितार्थम्। न च पूर्वं साधनबोधकप्रत्ययोत्पत्तौ साधनसंसृष्टस्यैवार्थस्य उपसर्गार्थेन योगः; न केवलं धात्वर्थस्येति धातुना सामर्थ्याभावादेव समासाभाव इति वाच्यम्। उपसर्गार्थविशिष्टस्यैव धात्वर्थस्य साधनेन सम्बन्धात्, धातूपसर्गयोः सामर्थ्यस्य सुवचत्वादिति चेत्? सत्यम्; 'अतिङ्' इत्यनेन तिङुपस्थाप्यसाधनसंसृष्टार्थेन धातुना गतेरसामर्थ्यमेव बोध्यत इति न धातुना समासस्य प्रसङ्गः। इत्थञ्च अवयवद्वारकसामर्थ्यमूलकस्तिङन्तोत्तरपदकोऽपि समासो न प्राप्नोतीति

न कश्चिद्दोषः। अत्र च भाष्यानुग्रहो बीजम्, तदाह—'[1]उपपदमतिङिति सूत्रे भाष्ये' इति। ननु भवतु प्रागुक्तरीत्या साधनबोधकप्रत्ययविषये तदुत्पत्त्यनन्तरमेव उपसर्गसमभिव्याहारः। यत्र तु भावार्थक एव प्रत्ययः, यथा—'व्यत्ययो, विपर्ययः' इति, तत्र पूर्वमुपसर्गसमभिव्याहारप्रयुक्तो दोषस्तदवस्थ एवेत्यत आह— [2]'णेरध्ययने इति निर्देशः' इति। ज्ञापकस्य कृन्मात्राविषयकत्वव्युदासायाह—'सामान्यापेक्षम्' इति। '[3]यद्युपसर्गयोगोऽस्ति' इति। यत्र पूर्वं पश्चाद्वा योगे विशेषः, तादृशोपसर्गयोगोऽस्ति यदीत्यर्थः। एतेन 'सैन्धवैर्विचक्रे, योषितां समूहैः प्रचेले' इत्यादिप्रामाणिकप्रयोगाणामुपलम्भाद्—सन्दिग्धे सन्दिग्धवचनमिदमनुपपन्नमित्यपास्तम्।

अत्रेदं बोध्यम्—क्रियात्वक्रियासंख्याकालकारकात्मकं पञ्चकं धातोरेवार्थाः। लकारास्तु द्योतका इति भूवादिसूत्रभाष्यसूचिते सिद्धान्ते धातोरेव साधनविशेषसम्बद्धतत्तदर्थोपस्थापकतया व्यञ्जकप्रत्ययसमभिव्याहारस्य नियामकत्वात् ततः पूर्वमपि साध्यत्वावगतेः क्रियात्वनिश्चयः सुलभः। युक्तञ्चैतत्; अन्यथा धातुसंज्ञायां प्रत्ययः, प्रत्यये सति तदुपस्थाप्यसाधनसम्बन्धग्रहाधीनसाध्यत्वावगतिविषयतत्तदर्थविशेषात्मकक्रियावाचकत्वनिबन्धना धातुसंज्ञेत्यन्योन्याश्रयः। इत्थञ्च 'कुत्सिते' (७.३.८४) इति सूत्रस्थभाष्यानुसारादर्थानामुपस्थितिक्रमानुरोधेनैव द्योतकशब्दप्रादुर्भावस्य न्याय्यतया साधनविषयेऽपि धातूनां पूर्वमुपसर्गयोगः प्राप्तः। सोऽप्यव्यायिन्यदेशकालादित्यादिनिर्देशबलेन वारयितुं शक्यते।

यत्तु 'सन्' (७.४.९३) सूत्रे भाष्ये सोपसर्गात्सन्व्यावृत्तिर्धातुग्रहणप्रयोजनमित्युक्तं तदेकदेशिन एव, प्रागुपदर्शितानेकभाष्यविरोधाल्लक्ष्यविसम्वादाच्च। तस्मात्सर्वथा पूर्वमुपसर्गयोगो धातूनामनिष्ट एवेति तदिदमभिसन्धायोपसंहरति 'अलम्' इति।

यत्तु विशेषापेक्षात्सामान्यापेक्षमन्तरङ्गं विशेषापेक्षे विशेष-

---

१. उपपदमिति सूत्रे-मूलम्। २. 'णेरध्ययने वृत्तमिति निर्देशः'-मूलम्।
३. 'यदि भावतिङ्युपसर्गयोगोऽस्ति'-मूलम्।

धर्मस्याधिकस्य प्रत्ययनिमित्तत्वात्। यथा 'रुदादिभ्यः सार्वधातुके' (७.२.७६) इत्यत्र रुदादित्वं सार्वधातुकत्वञ्च; तत्र सार्वधातुकज्ञानाय प्रकृतेर्धातुत्वज्ञानं प्रत्ययस्य प्रत्ययत्वज्ञानञ्चावश्यकमिति यासुडन्तरङ्गः। एतेन यत् 'अनुदात्तङित' (१.३.१२) इति सूत्रे कैयटेनोक्तं लमात्रापेक्षयाऽन्तरङ्गास्तिबादयो लकारविशेषापेक्षत्वाद्बहिरङ्गाः स्यादय इति परास्तम्। विशेषापेक्षत्वेऽपि तस्य सामान्यधर्मनिमित्तकत्वाभावेन तत्त्वस्य दुरुपपादत्वात् परनिमित्तकत्वेन स्यादीनां बहिरङ्गत्वाच्चेति; तन्न; विशेषस्य व्याप्यत्वे, व्यापकस्यानुमानेनोपस्थितावपि तस्य निमित्तत्वे मानाभावेनाधिकधर्मनिमित्तकत्वानुपपादनात्। भाष्ये एवंविधान्तरङ्गबहिरङ्गभावस्य क्वाप्यनुल्लेखाच्च।

एवमन्यदपि प्राचीनाभिमतं खण्डयति–'यत्तु विशेषापेक्षात्' इति। 'अधिकस्य [1]निमित्तत्वात्' इति। सामान्यापेक्षयादृशकार्यापेक्षया विशेषापेक्षयादृशकार्ये समान्यधर्मविशिष्ट एव कश्चन विशेषधर्मो निमित्तकोटावधिकः प्रविशति तत्ततो बहिरङ्गम्। तथाविधञ्च सामान्यापेक्षमन्तरङ्गमिति निष्कर्षः। 'यासुडन्तरङ्गः' इति। धात्वधिकारीयतया यासुटो धातुसामान्यापेक्षत्वादन्तरङ्गत्वम्। इटस्तु सार्वधातुकाक्षिप्ततथाविधसामान्यावरुद्धरुदादित्वरूपविशेषधर्मसापेक्षत्वाद्बहिरङ्गत्वमित्याशयः।

'एतेन' इति। 'सामान्यविशेषोभयनिमित्तकस्यैव विशेषापेक्षस्य बहिरङ्गत्वमित्यभिधानेनेत्यर्थः। 'तत्त्वस्य दुरुपपादत्वात्' इति। स्यादिविधौ निमित्तांशे वस्तुतोऽविद्यमानमपि लत्वं न निमित्तत्वेनोपादीयते, फलाभावात्, अतो न बहिरङ्गत्वमित्यभिसन्धिः। ननु इड्विधावपि रुदाद्यंशे

---

१. 'प्रत्ययनिमित्तत्वात्'–मूलम्।

सार्वधातुकाक्षिप्तधातुत्वस्य निमित्तत्वेनोपादाने फलाभावस्तुल्य एव, अत आह – 'परनिमित्तकत्वेन' इति ।

'अधिकधर्मनिमित्तकत्वानुपपादनात्' इति । शब्दतः प्रतीयमानस्यैव निमित्तत्वं, न त्वाक्षेपादिलभ्यस्य; न ह्यशाब्दे शाब्दो निमित्तनिमित्तिभावः सम्भवतीति भावः । 'रुदादिभ्यः' (७.२.७६) इत्यादौ यासुडविधिघटकस्य 'परस्मैपदेषु (३.४.१०३) इत्यस्य विषयसप्तम्यन्ततया लावस्थायामेव यासुट्, वलादित्वाभावादिडागमस्याप्रसङ्ग एवेति सिद्धान्तः । 'अनुल्लेखाच्च' इति ।

यत्तु 'मतुप्' सूत्रे भाष्ये–'पञ्च गावो यस्य सन्ति सः पञ्चगुः' इत्यत्र मतुप्प्राप्नोतीत्याशङ्क्य न प्रत्येकमसामार्थ्यात्, समुदायात्, अप्रातिपदिकत्वात्, समासात्, समासेनोक्तत्वात्, इति सिद्धान्तिनोक्ते-नैतत्सारम्; उक्तेऽपि हि प्रत्ययार्थे उत्पद्यते द्विगोस्तद्धितो यथा 'पाञ्चनापितिः' इति पूर्वपक्षयुक्तमाभ्यम् । 'द्विगोर्लुगनपत्ये' (४.१.८८) इति लुग्विधानात्तद्धितार्थेद्विगोस्तद्धितोऽयम् । पञ्चगुशब्दश्च दिगुरिति तदाशयं कैयटः। ततो 'द्वैमातुरः 'पाञ्चनापितिः' 'पञ्चसु कपालेषु संस्कृतः' इत्यादौ सावकाशद्विगोर्बहुव्रीहिणा प्रकृते परत्वात् बाध इत्याशयेन नैष द्विगुः, कस्तर्हि बहुव्रीहिरिति सिद्धान्तिनोक्ते तमवकाशमजानानोऽपवादत्वाद्द्विगुः प्राप्नोतीति पूर्वपक्षी । अन्यपदार्थे सुबन्तमात्रस्य विधीयमानबहुव्रीहेः सङ्ख्यायास्तद्धितार्थे विधीयमानो द्विगुः, विशेषविहितत्वात् बाधकः प्राप्नोतीति कैयटः। ततः सिद्धन्त्येकदेश्याह–अन्तरङ्गत्वाद्बहुव्रीहिः। का अन्तरङ्गता? अन्यपदार्थे बहुव्रीहिर्विशिष्टेऽन्यपदार्थे द्विगुः, तस्मिंश्चास्य तद्धितेऽस्तिग्रहणं क्रियत इति अधिकास्त्यर्थापेक्षमत्वर्थनिमित्तो द्विगुर्बहिरङ्ग इति कैयटः । नैषा सिद्धान्त्युक्तिः । एतावताऽप्यपवादत्वाहानेः । अच्सामान्यापेक्षयणो विशिष्टसवर्णाजपेक्षदीर्घेण बाधदर्शनात् ।

किञ्च उक्तरीत्या परत्वेनैव बाधसिद्धेः। किञ्चात्राधिकापेक्षत्वेनैव बहिरङ्गत्वम्, न केवलविशेषापेक्षत्वेनेति नैतद्भाष्यारूढं विशेषापेक्षस्य बहिरङ्गत्वम्। अत एव सुबन्तसामान्यापेक्षो बहुव्रीहिः, तद्विशेषापेक्षो द्विगुरिति नोक्तं भाष्ये। न चार्थकृतबहिरङ्गानाश्रयणादिदमयुक्तम्। एकदेशयुक्तित्वेनादोषात्। अत एवास्तिग्रहणं नोपाध्यर्थम्; किन्तु अस्तिशब्दान्मतुबर्थमिति त्वदभिमतं बहिरङ्गत्वमपि द्विगोर्नास्तीति प्रतिपाद्य सिद्धान्तिना मत्वर्थे द्विगोः प्रतिषेधो वक्तव्य इति वचनेनैतत्सिद्धमित्युक्तम्।

ननु वर्तत एवोल्लेखो 'मतुप्' सूत्रे भाष्ये, अत आह 'यत्तु' इत्यादि। 'पूर्वपक्ष्युक्तिः' इति। तद्धितार्थे वाच्ये समासो यदि विधीयेत, तर्ह्युक्तेऽपि प्रत्ययार्थे उत्पद्यत इत्यादेरुक्तिसम्भवः। इह तु 'तद्धितार्थे' इति विषयसप्तमीति, तदसाङ्गत्यात्पूर्वपक्ष्युक्तित्वमिति भावः। 'पञ्चगुशब्दश्च द्विगुः' इति। समासान्तविधेरनित्यत्वान्न टच्, 'द्विगोर्लुगनपत्ये (४.१.८८) इत्यस्याप्रसङ्गः प्राग्दीव्यतीयत्वाभावाद् द्विगुनिमित्तत्वाभावाच्चेति बोध्यम्। 'प्रकृते बाधः' इति। परत्वादिति शेषः। 'अपवादत्वाद्द्विगुः' इति। ननु द्विगुरप्यतद्धितार्थे सावकाश इति कथमपवादत्वम्? अतो द्विगोरपवादत्वमुपपादयति—'अन्यपदार्थे' इति। 'तस्मिंश्चास्य' इति। अस्य द्विगोरर्थद्वारा निमित्तभूते तस्मिन् मतुप्यस्तिग्रहणं क्रियत इत्यर्थः। 'नोपाध्यर्थम्' इति बहुव्रीहिवन्मतुपोऽपि शब्दशक्तिस्वाभाव्यादेवास्त्यर्थविषयतासम्भवादित्याशयः। 'अस्तिशब्दात्' इति। अस्तिसामानाधिकरण्ये मतुब्विधीयते। 'अस्ति' इत्यव्ययस्य सत्तावदर्थकतया सत्ताप्रतिपादनाय तत्समवधाने अस्तिक्रियायाः फलाभावेन प्रयोगाप्रसक्त्या तत्सामानाधिकरण्यासम्भवान्मतुपो न प्राप्तिरिति भावः। तदुक्तं भाष्ये—'अस्तिसामानाधिकरण्ये मतुब्विधीयते, न चास्तेरस्ति सामानाधिकरण्यम्' इति। गवादीनां सम्भवव्यभिचाराभ्यां मस्तिसामानाधिकरण्यं सम्भवति। अस्तेस्त्वव्यभिचारादस्तिसामानाधिकरण्यासम्भव इति कैयटः। 'अस्तिमान्' इति वृत्तावस्तिशब्दः सत्ताकर्तृत्वेन धनस्यैव प्रत्यायकः, वृत्तिस्वाभाव्यादिति तत्त्वम्।

अत एव 'तदोः सः सौ' (७.२.१०६) इति सूत्रे 'अनन्त्ययोः' इति चरितार्थम्। अन्यथा प्रत्ययसामान्यापेक्षत्वेनान्तरङ्गत्वादन्त्यस्यात्वेऽनन्त्यस्यैव सत्वे सिद्धे, तद्वैयर्थ्यं स्पष्टमेव। 'पादः पत्' (६.४.१३०) इति सूत्रे भाष्यकैयटयोरप्येतदन्तरङ्गत्वाभाव एव सूचित इति सुधियो विभावयन्तु। नन्वेवं 'असुसुवत्' इत्यत्र लघूपधगुणादुवङोऽल्पनिमित्तत्वाभावादुङ् न स्यादिति चेत्? नः तत्रान्तःकायत्वरूपान्तरङ्गत्वसत्त्वात्। अन्तःकायत्वञ्च पूर्वोपस्थितनिमित्तकत्वम्। अङ्गशब्दस्य निमित्तपरत्वात्। इदमन्तरङ्गत्वं लोकन्यायसिद्धमिति 'मनुष्योऽयं प्रातरुत्थाय, प्रथमं शरीरकार्याणि करोति, ततः सुहृदां, ततः सम्बन्धिनाम्।

'वैयर्थ्यम्' इति। केचित्तु प्रतिपदविधित्वेन 'तदोः सः सौ' (७.२.१०६) इति सत्वं, त्यदोयत्वस्य बाधकं स्यादिति साफल्यादनन्त्यग्रहणस्य न वैयर्थ्यमित्याहुः। "'पादः पत्' इति सूत्रे' इति। तत्र हि निर्दिश्यमानपरिभाषाफलनिरूपणावसरे तामादीनामिटश्च 'रुदिताम्' इत्यादौ प्रवृत्तिविषये सम्प्रधारणायां परत्वादिटमाशङ्क्य अन्तरङ्गत्वं तामादीनामुक्तं भाष्ये। कैयटे च प्राग्लादेशेभ्यो धात्वधिकारात्, तामादीनामन्तरङ्गत्वमुक्तम्। एवंविधान्तरङ्गबहिरङ्गभावसत्त्वे तु तेषां विशेषापेक्षत्वेन बहिरङ्गत्वादन्तरङ्गत्वप्रतिपादनमसङ्गतमेव स्यादित्याशयः।

केचित्तु प्रतिपदोक्तत्वेनैव तामादीनामन्तरङ्गत्वमिति भाष्याशयः; कैयटश्च 'प्राग्लादेशेभ्यो धात्वधिकारात्' इत्यनैमित्तिकत्वेनान्तरङ्गत्वमभिप्रेतीत्ययुक्तमेव। आतृतीयसमाप्तेर्धात्वधिकारेऽपि यासुडविधिघटकस्य परस्मैपदेष्वित्यस्य विषयसप्तम्यन्ततया लावस्थायामेव यासुटि, तद्वयवधाने क्रियास्तामित्यादौ तामादीनां प्रवृत्तये 'धातोः' (६.१.६२) इत्यस्य विहितषष्ठ्यन्ततया परनिमित्तकत्वाभावस्य सुवचत्वात्। तस्मादुपदर्शितान्तरङ्गभावनिराकरणेनानयोर्भाष्यकैयटयोः प्रामाण्यसम्भव इत्याहुः।

'उवङ् न स्यात्' इति । ननु सिद्धान्तेऽपि 'सार्वधातुकार्धधातुकयोः' (७.३.८४) इति गुणात्पूर्वं नित्यत्वाच्च किं 'द्विर्वचनेऽचि' (१.१.५९) इति निषेधादुवङोऽप्राप्तौ, द्वित्वात्परत्वाल्लघूपधगुणो दुर्वारः । न च लघूपधगुणसम्बन्धिषष्ठ्यन्तोपात्तनिमित्तघटकचङ्निमित्तकत्वेन द्वित्वस्यान्तरङ्गतया प्रथममेव प्रवृत्तिरिति वाच्यम् । एवमपि ओणिक्-दित्करणेन उपधाकार्यस्य द्वित्वापेक्षया प्राबल्यबोधनेन द्वित्वात्पूर्वं गुणस्य दुर्वारत्वात् । अत्राहुः— ज्ञापकसाजात्यादुपधाकार्यस्य द्वित्वसमाननिमित्तकस्य चङ्निमित्तकस्यैव वा द्वित्वापेक्षया प्राबल्यं ज्ञाप्यते, न त्वन्यस्येत्यदोषः ।

'[1]अल्पनिमित्तकत्वाभावात्' इति । प्राचीनमतेनाप्यन्तरङ्गत्वालाभ इति बोधनार्थमिदम् । 'अन्तःकार्यत्वम्' इति । अन्तर्भूतनिमित्तककार्यत्वमित्यर्थः । 'पूर्वोपस्थितनिमित्तकत्वम्' इति । अलौकिकवाक्यीयोच्चारणक्रमेणेति भावः । नन्विदमन्तरङ्गत्वं न बहिरङ्गपरिभाषाप्रवृत्तिप्रयोजकं, कृते "बहिरङ्गे करिष्यमाणं यदन्तरङ्गं, तत्वस्यैव तत्प्रयोजकत्व ज्ञापकसाधर्म्येण, तथैव लाभादत आह —

अर्थानामपि जातिव्यक्तिलिङ्गसंख्याकारकाणां बोधक्रमः शास्त्रकृत्कल्पितः, तत्र क्रमेणैव तद्बोधकशब्दप्रादुर्भावः कल्पित इति तत्क्रमेणैव तत्कार्याणीति 'पद्व्या' इत्यादावन्तरङ्गत्वात्पूर्वं पूर्वयणादेशः परयणादेशस्य बहिरङ्गतयाऽसिद्धत्वादित्यादिना 'अचः परस्मिन्' (१.१.५७) इति सूत्रे भाष्ये स्पष्टम् । तदपि युगपत्प्राप्तौ पूर्वमवृत्तिनियामकमेव; यथा—'पद्व्या' इत्यत्र पदस्य विभक्त्यान्वाख्याने । न तु जातस्य बहिरङ्गस्यैतादृशेऽन्तरङ्गेऽसिद्धतानियामकं प्रागुक्तलोकन्यायेन, तथैव लाभादिति 'वाह ऊठ्' (६.४.१३२) सूत्रे कैयटे स्पष्टम् ।

---

१. अल्पनिमित्तकत्वाभावात्—मूलम् ।

अत एव 'वाग्वोः' इत्यादौ वलिलोपो, यणः स्थानिवत्त्वेन वारितो भाष्यकृता। क्रमेणान्वाख्याने तूक्तोदाहरणे पूर्वप्रवृत्तिकत्वमन्तरङ्गत्वं पश्चात्प्रवृत्तिकत्वं बहिरङ्गस्यासिद्धत्वं बोद्धव्यम्। यच्चेवंरीत्या पूर्वस्थानिकमप्यन्तरङ्गमिति, तच्चिन्त्यम्। 'स्रजिष्ठ' इत्यादौ विन्मतोर्लुकि टिलोपस्यापवादविन्मतोर्लुक्प्रवृत्त्या जातिपक्षाश्रयेण वारणस्य 'प्रकृत्यैकाच्' (६.४.१६३) इति सूत्रप्रयोजनखण्डनावसरे भाष्यकृत्कृतस्य नैष्फल्यापत्तेः। त्वदुक्तरीत्या विन्मतोर्लुको बहिरङ्गासिद्धत्वेन अनायासतस्तद्वारणात्। भाष्ये ईदृशरीत्या बहिरङ्गत्वस्य काप्यनाश्रयणाच्च। परिभाषायामङ्गशब्दस्य निमित्तपरत्वाच्च। इयञ्चोत्तरपदाधिकारस्थबहिरङ्गस्य नास्तित्वबोधिकेति 'इच एकाचोऽम्' (५.३.३८) इति सूत्रे भाष्ये पूर्वपक्ष्युक्तिरिति सा नादर्तव्या।

'इदम्' इति। अन्तःकार्यत्वरूपमित्यर्थः। 'भाष्ये स्पष्टम्' इति। ईदृशान्तरङ्गत्वस्य परिभाषाप्रवृत्तिप्रयोजकतायामिदमेव भाष्यं प्रमाणमिति भावः। 'न तु जातस्य' इति। एतेन जातबहिरङ्गविषयायाः परिभाषाया अन्यथासिद्धत्वं निराकृतम्। 'अङ्गशब्दस्य निमित्तपरत्वाच्च' इति। ऊठ्ग्रहणेनैतत्परिभाषाज्ञापनपरभाष्यप्रामाण्यादवयवद्वारा कार्यानुभववतो निमित्तत्वेन ग्रहणे मास्तु, न हि कार्यीति न्यायप्रवृत्तिः। साक्षात्कार्यानुभववतो निमित्तत्वेन ग्रहणे न्यायप्रवृत्तिः केन वार्यते इत्याशयः।

ननु 'द्विषन्तपः' इत्यादावनुस्वारे खिदन्तोत्तरपदकस्य मुमो बहिरङ्गासिद्धत्वाभावायास्याः परिभाषाया उत्तरपदाधिकारे यदि प्रवृत्तिरिष्यते, तदा 'श्रियमन्यं ब्राह्मणकुलम्' इत्यादावपि खिदन्तोत्तरपदनिमित्तकस्य 'इच एकाचः' इति विहितस्य अमो बहिरङ्गासिद्धत्वायोगात् 'स्वमोः' (७.१.२३) इति लुगापत्तिः, अत आह – 'इयञ्च' इति। 'पूर्वपक्ष्युक्तिः' इति। अथेह कथं भवितव्यम्। श्रियमात्मानं मन्यते ब्राह्मणकुलं, श्रियमन्यं ब्राह्मणकुलम्, आहोस्वित् श्रिमन्यमिति विप्रतिपत्तिमुद्भाव्य, 'श्रियम्मन्यमिति भवित-

ष्यमित्युक्त्वा 'स्वमोर्नपुंसकात्' (७.१.२३) इति लुक् कस्मान्न भवतीति पूर्वपक्षमुपक्रम्य, बहिरङ्गपरिभाषया न भविष्यतीति सिद्धान्त्युक्तौ नैषा परिभाषा उत्तरपदाधिकारे शक्या विज्ञातुम्। इह हि दोषः स्यात्; 'द्विषन्तपः, परन्तपः' इति। तस्मात् श्रियम्मन्यमित्येव भवितव्यमिति हि तदुक्तिः।

'परन्तपः' इत्यादावनुस्वारेणासिद्धत्वम्, मुमस्त्रिपाद्यां तदप्रवृत्तेः। नवीनमतेऽपि यथोद्देशपक्षाश्रयणेन अन्यथासिद्धोदाहरणादानेन तस्य तदुक्तित्वमावश्यकमित्याहुः। आभीयेऽन्तरङ्गे आभीयस्य बहिरङ्गस्य समानाश्रयस्य नानेनासिद्धत्वम्, असिद्धत्वादिति 'असिद्धवत्' (६.४.२२) सूत्रे भाष्ये स्पष्टम्। एवं सिचि वृद्धेर्येन नाप्राप्तिन्यायेन अन्तरङ्गबाधकत्वमूलकं, न सिच्यन्तरङ्गमस्तीति 'इको गुण' (१.१.३) इति सूत्रे भाष्ये स्पष्टम्॥

न्यायाप्रवृत्तिप्रयोजनान्यथासिद्धया चास्याः पूर्वपक्ष्युक्तित्वमिति सूचयन्नाह—'परन्तप इत्यादौ' इति। 'अनुस्वार' इति। इदमुपलक्षणं 'अरुन्तुदः' इत्यत्र संयोगान्तलोपस्य। नव्या दीक्षितादयः। 'तदुक्तित्वम्' इत्यस्य पूर्वपक्ष्युक्तित्वमित्यर्थः। 'आहुः' इति। 'श्रियम्मन्यम्, 'गाम्मन्यम्' इत्यादावियङादेशादीनां प्रवृत्तिः, अम्प्रत्ययत्वातिदेशबलादेवेति बोध्यम्। अथैतत्परिभाषाभ्युपगमे बहिरङ्गसम्प्रसारणस्यासिद्धत्वात् 'आतो लोपः' (६.४.६४) न स्यादत आह—'आभीये' इत्यादि। उपस्थापकतया स्वसमानाश्रयस्य अन्तरङ्गस्याभीयत्वादसिद्धत्वेनाभीयया बहिरङ्गपरिभाषया न तादृशस्य बहिरङ्गासिद्धत्वम्। अन्तरङ्गस्याविद्यमानतया बहिरङ्गत्वेनाभिमतस्य तन्निरूपितबहिरङ्गत्वायोगेन परिभाषाप्रवृत्त्ययोगादिति तदर्थः। बहिरङ्गसमानाश्रयत्वन्तु परिभाषाया दुर्वचम्। बहिरङ्गस्य तदुपस्थापकत्वाभावात्। उपस्थापकसमाननिमित्तकत्वमेव हर्यूपस्थाप्यानाम्। बहिरङ्गस्यैवोपस्थापकत्वे तु 'विश्वौहः' इत्यादौ गुणदृष्ट्या सम्प्रसारणस्योक्त्रीत्या बहिरङ्गासिद्धत्वानुपपत्तावूठ्ग्रहणस्य चारितार्थ्ययोगात् ज्ञापकभूमिविरोध इति प्रागेवोपपादितम्।

'भाष्ये स्पष्टम्' इति । तत्र हि वसुसम्प्रसारणमज्विधौ सिद्धं वक्तव्यम् । पुपुषः पश्य । किं पुनः कारणं न सिद्ध्यति । बहिरङ्गलक्षणत्वादसिद्धत्वाच्च । समानाश्रयवचनात्सिद्धम् । व्याश्रयश्चैतत् । द्वौ हेतू व्यपदिष्टौ । बहिरङ्गलक्षणम्, असिद्धत्वञ्च । तत्र भवेदसिद्धत्वं प्रत्युक्तम् । बहिरङ्गलक्षणत्वन्तु नैव प्रत्युक्तम् । नैष दोषः; अन्तरङ्गं बहिरङ्गमिति प्रतिद्वन्द्वभाविनावेतावर्थौ सत्यन्तरङ्गे बहिरङ्गं, सति च बहिरङ्गेऽन्तरङ्गम् । न चात्रान्तरङ्गबहिरङ्गयोर्युगपत्समवधानमस्ति । असिद्धत्वात्, नानभिनिर्वृत्ते बहिरङ्गेऽन्तरङ्गं प्राप्नोति । तत्र निमित्तमेव बहिरङ्गमन्तरङ्गस्येत्याद्युक्तम् । तत्र 'नानभिनिर्वृत्तः' इत्याद्युक्तिरन्तरङ्गस्य परिभाषायाश्च समानाश्रयत्वबोधनाय ।

यत्तु तद्भाष्यबलाद्धर्मिग्राहकसाजात्येन यत्र बहिरङ्गमन्तरङ्गस्य समवायिकारणम्, तत्रैवास्याः परिभाषायाः प्रवृत्तिः । इह तु सम्प्रसारणं बहिरङ्गमातो लोपस्य निमित्तकारणम् । अतो न प्रवृत्तिरित्याशयमुद्भावयन्ति, तदसत्, 'प्रतिद्वन्द्वभाविनौ' इत्याद्युपक्रमभाष्यासङ्गात्यापत्तेः । 'अरिष्ठियात्' इत्यादौ रिङो बहिरङ्गासिद्धत्वेन यलोपवारणानुपपत्तेश्चेति दिक् ।

अन्तरङ्गत्वाव्यवस्थापकत्वप्रसङ्गादाह –'एवम्' इति । 'इको गुणेति सूत्रे भाष्ये' इति । तत्र हि वृद्धिविधौ स्थानिनिर्देशात्सचि वृद्धेरिग्लक्षणत्वसम्पादनद्वारा 'किति' इति निषेधप्रवर्तनाय वृद्धिग्रहणम् । न्यधुवीत् । नैतदस्ति; अन्तरङ्गत्वादुवङि कृते, अनन्त्यत्वादवृद्धिर्न प्राप्नोति । एवं तर्हि न सिच्यन्तरङ्गमस्ति । यदयं हि 'अन्त' इत्यत्र णिश्विग्रहणं करोतीत्युक्तम् । न्यायादप्येतत्सिद्ध्यति । येन नाप्राप्तिन्यायेनान्तरङ्गस्य वृद्धया बाधनादिति कैयटः । तेन 'अचिरायीत्' इत्यादावभीष्टा वृद्धिः सिद्ध्यतीति सर्वमनुकूलम् ।

नन्वेवम् 'अक्षद्यूः' इत्यादौ बहिरङ्गस्योठोऽसिद्धत्वात्, अन्तरङ्गो यण् न स्यादत आह –

५१. नाजानन्तर्ये बहिष्ट्वप्रकल्पृप्तिः ।

अत्र 'षत्वतुकोरसिद्धः' (८.१.८३) इति सूत्रस्थं तुग्ग्रहणं ज्ञापकम्। अन्यथा 'अधीत्य' इत्यादौ समासोत्तरं ल्यप्प्रवृत्त्या पूर्वं समासे जाते, तत्र संहिताया नित्यत्वात्, ल्यब्युत्पत्तिपर्यन्तमप्यसंहितयाऽवस्थानासम्भवेनैकादेशे ल्यपि, तुगपेक्षया पदद्वयसम्बन्धिवर्णद्वयापेक्षैकादेशस्य बहिरङ्गतयाऽसिद्धत्वेन तद्वैयर्थ्यं स्पष्टमेव। पदद्वयसम्बन्धिवर्णद्वयापेक्षं बहिरङ्गमिति 'प्रेद्धः' इत्यादौ गुणो बहिरङ्ग इति ग्रन्थेन, 'न धातुलोपः' (१.१.४) इति सूत्रे 'संयोगान्तस्य लोपः' (८.२.२३) इति सूत्रे च भाष्ये स्पष्टम्।

यत्तु षत्वग्रहणमपि ज्ञापकम्। अन्यथा 'कोऽसिचत' इत्यादौ पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेन बहिरङ्गस्यैकादेशस्यासिद्धत्वेन षत्वाप्रवृत्तौ किं तेन ? इति। तन्न;

अर्थतोऽस्या अन्तरङ्गपरिभाषापवादत्वात्सङ्गतिः। 'नन्वेवम्' इति। परिभाषायां स्वीकृतायामित्यर्थः। 'अन्तरङ्गो यण्' इति। ऊठ्निमित्तभूताङ्गघटकवकारस्थानिकोकारनिमित्तकत्वेनास्यान्तरङ्गत्वं द्रष्टव्यम्। एवं 'अष्टादश' इत्यादावुत्तरपदनिमित्तकस्यात्वस्यासिद्धत्वात्, अन्तरङ्गः सवर्णदीर्घो न स्यादित्यपि दोषः। 'अधीत्य' इत्यादि। 'अधिस्+इत्वा' इति स्थिते, ''अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' (प. ५२) इति न्यायेनाव्ययसुब्लुगपेक्षया सामासिकः; तत्प्रयोजकसमासस्य च प्राबल्यबोधनाज्जाते समासे, सुब्लुकि, ल्यपोऽन्तरङ्गनिमित्तविनाशकत्वाभावेन 'अन्तरङ्गानपि विधीन्बहिरङ्गो ल्वब्बाधते' (प. ५४) इत्यस्याप्रवृत्त्या सवर्णदीर्घे, ल्यप्येकपदसम्बन्धिह्रस्वप्रत्ययोभयसापेक्षत्वेन तुकोऽन्तरङ्गत्वमित्याशयः।

यद्वा पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमन्तरङ्गोऽप्येकादेशो नेति पूर्वं समासः। पूर्वपदत्वेनोत्तरपदत्वेन च निमित्तत्वमित्यत्र मानाभाव इत्याशयः। तदाह 'समासे जाते' इति। यत्तु समासात्पूर्वं संहिताया अविवक्षणान्न

तत्कार्यमिति, तदसत्; धातूपसर्गयोः समासाभावेऽपि नित्यत्वात्। तदुक्तम् —

संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥ इति।

अत उक्तरीत्या सवर्णदीर्घाप्रवृत्तिः समासात्पूर्वमित्येव युक्तमित्याहुः।

ननु घटितघकटनिमित्तकत्वेन न तुगेकादेशयोरन्तरङ्गबहिरङ्गभावो वक्तुं युज्यत इत्यत आह--'पदद्वयसम्बन्धि' इति। 'न धातुलोप इति सूत्रे' इति। 'प्रेद्धः' इत्यादावेकपदसम्बन्ध्यार्धधातुकप्रत्ययापेक्षितधातुघटकेकारप्रत्ययोभयनिमित्तकत्वादन्तरङ्गो निषेधः। गुणस्तु पूर्वोत्तरपदसम्बन्धिवर्णद्वयापेक्षत्वाद्बहिरङ्ग इति हि तदाशयः। नन्विदं साध्यं पूर्वपक्षिणः, न सिद्धान्तिन इति कथं प्रामाण्यमत आह—'संयोगान्तस्य लोप इति सूत्रे' इति। तत्र हि यणः प्रतिषेधो वाच्यः, न वा बहिरङ्गलक्षणत्वादित्युक्तम्।

ननु पदद्वयसम्बन्धिवर्णद्वयनिमित्तकस्य बहिरङ्गत्वे 'क्रोऽसिचत्' इत्यादावेकादेशस्यापि तथाविधत्वेन बहिरङ्गतया षत्वग्रहणस्यापि ज्ञापकताऽसम्भवात् तुग्ग्रहणस्यैव ज्ञापकत्वमित्ययुक्तमत आह—'यत्तु' इत्यादि।

इणः पूर्वपदसम्बन्धित्वेन षत्वस्यापि पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेनोभयोः समत्वात्। एकादेशस्य परादिवत्त्वेन 'असिचत्' इत्यस्य पदत्वेऽपि पदादित्वाभावात् न 'सात्पदाद्योः' (८.३.१०९) इत्यनेन निषेधः। त्रैपादिकेऽन्तरङ्गे कार्यकालपक्षेऽपि, बहिरङ्गपरिभाषाया अप्रवृत्तेः पूर्वमुपपादितत्वाच्च। परिभाषार्थस्तु अचोऽन्यानन्तर्यनिमित्तकेऽन्तरङ्गे कर्तव्ये जातस्य बहिरङ्गस्य बहिष्ट्वप्रक्लृप्तिः। बहिष्पदेन बहिरङ्गं तस्य भावो बहिष्ट्वं, बहिरङ्गत्वं तत्प्रयुक्तासिद्धत्वस्य न प्रक्लृप्तिः न मासिरिति।

'इणः पूर्वपदसम्बन्धित्वेन' इति। पूर्वपदान्तवर्णस्थानिकत्वेनेति भावः। तथा च 'उरण् रपरः' (१.१.५१) इति सूत्रे भाष्यम्। यो हचुभयोः स्थाने भवति लभतेऽसावन्यतरतो व्यपदेशमिति। 'समुत्वात्' इति। नन्वेकदेशस्य पूर्वान्तवद्भावे 'असिचत्' इत्यस्यैकदेशविकृतन्यायेन पदत्वात्, 'सात्पदाद्योः' (८.३.१०९) इति निषेधेन षत्वाप्रवृत्तेर्व्यर्थमेव षत्वग्रहणम्। न च 'प्रेद्धः' इत्यादाविवान्तरङ्गे निषेधे बहिरङ्गस्यैकादेशस्यासिद्धत्वम्। किञ्चातिदिश्यमानधर्मनिमित्तककार्य एवातिदेशप्रवृत्तेः 'सात्पदाद्योः' (८.३.१०९) इति निषेधस्य पूर्वान्तवद्भावप्रयुक्तो न कोऽपि धर्मो निमित्तत्वेनाश्रीयत इति निषेधस्याप्रवृत्तिरेवेति वाच्यम्।

'पदस्यादिः पदादिः' इति षष्ठी समासपक्षे उक्तरीत्या निषेधाप्रवृत्तावपि 'पदादिः' इति पञ्चमीसमासपक्षे निषेधस्य सुवचत्वादत आह—'एकादेशस्य पूर्वान्तत्वेन' इति। विनिगमनाविरहादिति भावः। 'न सात्पदाद्योः' इति। न च निषेधप्रतिबन्धस्याशास्त्रीयत्वात् कथं तत्रातिदेश इति वाच्यम्। अभावाभावस्य प्रतियोगिरूपत्वेन निषेधप्रतिबन्धस्य विधिरूपतया शास्त्रीयत्वमित्याशयात्। ननु परादिवद्भावादिणः पूर्वपदसम्बन्धित्वाभावेन षत्वस्यैकादेशादन्तरङ्गत्वमेवेति युक्तमेव तस्यापि ज्ञापकत्वमत आह—'त्रैपादिकेऽन्तरङ्गे' इति। किञ्च 'प्रसवतीति प्रोः'; 'उपवसतीत्युपोः'; किञ्च, तस्य भावः 'प्रोष्ठवम्, उपोष्ठवम्' इत्यादौ 'ह्रस्वात् तादौ' इति षत्वसमर्थनायासिद्धवचने षत्वग्रहणमावश्यकम्। षत्वविध्युपात्ततद्धितग्रहणेन तदाश्रयोपस्थापनाद्विशिष्टनिमित्तकतया प्रत्यङ्गत्वायोगात् न ज्ञापकत्वशङ्कावकाशः। यत्तु निरुक्तोदाहरणविषये 'वौः' (८.२.७६) इति दीर्घप्रवृत्तेरसिद्धत्वेऽप्येकादेशस्य दीर्घात्परत्वेन 'ह्रस्वात्तादौ' (८.३.९९) इत्यस्याप्राप्तेर्नैतादृशानि षत्वग्रहणं प्रयोजयन्तीत्याहुः, तदभसात्; 'प्र उस्' इत्याद्यवस्थायां 'गतिकारकोपपदानाम्' (प ७९) इति सुबुत्पत्तेः पूर्वं समासे, कृतसन्धेरेव तद्धितोत्पत्त्या गुणात्मकैकादेशविशिष्टतादृशप्रातिपदिकप्रकृतिकषष्ठ्यन्तात्वप्रत्यये, सुब्लुकि, अन्तर्वर्तिविभक्तिनिमित्तकत्वेन त्वप्रत्ययात्मकासर्वनामस्थानस्वादिनिमित्तकत्वेन वा पदत्वमास्थाय रुत्वेप्रवृत्तावप्येकादेशात्पूर्वं तदप्राप्त्या 'वौः' (८.२.७६) इत्यस्य दुरुपपादत्वात्।

'सात्पदाद्योः' (८.३.१०९) इत्यस्य तु नात्र प्रसक्तिः। तस्य सातिसाहचर्येणापदान्तषत्वविषयकत्वेन पदान्तविषये तदप्रवृत्तेः। 'शासिवासि' (८.३.६०) इति षत्वविषये तु निषेधप्रवृत्तिर्निर्विवादैवेत्यसिद्धवचनघटकषत्वग्रहणस्य न ज्ञापकत्वसम्भव इत्यपि वदन्ति।

ननु वेञ्धातोः किपि निष्पन्ने उशब्दे तुग्वारणाय सार्थक्यात्कथं तुग्ग्रहणस्य ज्ञापकत्वम्। न च पदान्तपदाद्योरेवैकादेशस्यासिद्धत्वमत एव 'शक्हूषु', 'परिवीषु' इत्यादौ षत्वसिद्धिरिति स्पष्टमकरे इति वाच्यम्। भ्यामादौ 'स्वादिषु' (१.४.१७) इति पदत्वमाश्रित्य तथाविधैकादेशस्य उशब्देऽपि सुवचत्वादिति चेत्? न; ज्ञापनपरभाष्यप्रामाण्येन पूर्वपदान्तोत्तरपदाद्योरेवैकादेशस्यासिद्धत्वमित्यवश्याभ्युपगन्तव्यन्तत्वेन सत्यभिधाने, निरुक्तोदाहरणे तुक्प्रवृत्तेरभीष्टत्वात् सिद्धान्ते 'परिवीः, शकहूः' इत्यादौ परत्वाद्दीर्घ इति दिक्।

अत्र प्राञ्चः—'अचोरानन्तर्यम्' इति द्विवचनान्तेन समासः। अन्तरङ्गबहिरङ्गशब्दयोरध्याहारः। एवञ्च निमित्तनिमित्तिभावापन्नाज्जन्यनिरूपितपरस्परानन्तर्ये बहिरङ्गेऽन्तरङ्गे वा निमित्तत्वेनाश्रीयमाणे बहिरङ्गासिद्धत्वं नेति प्रकृतपरिभाषां व्याचक्ष्युः, तदसत्; 'पचावेदम्, पचामेदम्' इति भाष्यकाराद्युदाहृतबहिरङ्गपरिभाषोदाहरणासाङ्गत्यप्रसङ्गात्। 'प्रेद्धः' इत्यत्र निषेधाद्गुणस्य बहिरङ्गत्वमास्थाय, निषेधाप्रवृत्तिप्रतिपादनपरं 'न धातुलोप' (१.१.४) सूत्रस्थभाष्यविरोधापातात्। कृति तुग्ग्रहणवैयर्थ्यान्चेत्याशयेनाह—'परिभाषार्थस्तु' इति। अच आनन्तर्यमन्यनिरूपितव्यवधानराहित्यं निर्दिष्टपरिभाषालभ्यं निमित्तं यस्मिन्निति व्यधिकरणो बहुव्रीहिः। अच इति च सम्बन्धसामान्यषष्ठी, न तु स्थाने, ज्ञापकभूम्यनुरोधात्। अन्यत्वञ्चोद्देश्यप्रतियोगिकम्। एवञ्च सप्तम्यन्तपञ्चम्यन्तान्यतरबोध्यानन्तर्यविशिष्टाजुद्देश्यकेऽन्तरङ्गे कर्तव्ये इति फलितोऽर्थः।

'असिद्धं बहिरङ्गमन्तरङ्गे' (प. ५०) इत्युक्त्वा 'नाजानान्तर्ये' (प. ५१) इति वक्ष्यामीति भाष्योक्त्या तत्रत्यस्यान्तरङ्ग इत्यस्यानुवृत्तिसूचनात्। तेन 'पचावेदम्' इत्यादौ न दोषः।

अन्तरङ्गस्याङ्स्थानिककार्यस्यैत्वस्यान्यानन्तर्यनिमित्तकत्वाभावात्। 'जातस्य बहिरङ्गस्य' इत्युक्त्या 'अयजे इन्द्रं धियति' इत्यादौ बहिरङ्गदीर्घगुणादेरसिद्धत्वं सिद्धम्। अत एव इण्डिशीनामाद्गुणः सवर्णदीर्घत्वाच्छचङन्तस्यान्तरङ्गलक्षणत्वादिति सङ्गच्छते। अत एव 'ओमाङोश्च' (६.१.९५) इत्याङ्ग्रहणं चरितार्थम्। तद्धि 'शिव+आ+इहि' इति स्थिते परमपि सवर्णदीर्घं बाधित्वा, धातूपसर्गकार्यत्वेनान्तरङ्गत्वादगुणे वृद्धिबाधनार्थम्, न च 'अक्षद्यूः' इत्यत्र यणि कृते ऊठोऽसिद्धत्वाद्वलिलोपापत्तिरिति वाच्यम्। अचोऽन्यानन्तर्यनिमित्तकेऽन्तरङ्गे कर्तव्ये, कृते तस्मिन् यदन्तरङ्गं प्राप्नोति, तत्र च कर्तव्ये नासिद्धमिति तदर्थात्। असिद्धपरिभाषाया अनित्यत्वेन तद्वारणे तु अस्या वैयर्थ्यं तेनैव सिद्धेः। अत एव 'नलोपः सुप्' (८.२.२) इति सूत्रे कृति तुग्ग्रहणं चरितार्थम्।

'तत्प्रयुक्तासिद्धत्वस्य' इति। बहिष्ट्वपदमर्थगत्या स्ववाच्यबहिरङ्गत्वनिमित्तकासिद्धत्वे उपचरितमिति भावः। तेन 'पचावेदम्' इति। 'अजानन्तर्य' इत्यस्यान्तरङ्गविशेषणत्वाभ्युपगमेनेत्यर्थः। 'आनन्तर्यनिमित्तकत्वाभावात्' इति। यद्यपि 'धातोः' इति वर्तते, तथापि विकरणादिव्यवहितस्यैत्वसिद्धये तस्य विहितपञ्चम्यन्तत्वमिति भावः। अत एव ऐत्वे आद्गुणप्रतिषेधः। न वा बहिरङ्गलक्षणत्वादिति 'एत ऐ' (३.४.९३) इति सूत्रे कात्यायनः।

बहिरङ्गांशे धर्मिग्राहकसाजात्यसिद्धस्य विशेषणस्य व्यावर्त्यं दर्शयति–'जातस्य' इति। 'दीर्घगुणादेः' इति। 'अयज इन्द्रम्' इत्यादौ पदद्वयसम्बन्धिवर्णद्वयनिमित्तकत्वाद्बहिरङ्गः सवर्णदीर्घः। 'धियति' इत्यादावुत्तरकालोपस्थितिकत्वादियङादेशीयनिमित्तघटितषष्ठ्यन्तोपात्तनिमित्तकत्वाद्वा लघूपधगुणो बहिरङ्गः।

'सवर्णदीर्घत्वात्' इति। इदं विप्रतिषेधसूत्रे भाष्ये। तन्निमित्तग्रहणेऽपि 'धियति' इत्यादावियङादेशस्यान्तरङ्गत्वाद्बहिरङ्गो लघूपधगुणो न प्रवर्तत इति शचङन्तस्य प्रतिषेधो न वक्तव्य इति तदर्थः। ननु पदसंस्कारे 'अयजे इन्द्रम्' इत्यादौ बहिरङ्गासिद्धत्वस्यानुपयोग एव, 'धियति' इत्यादाविय्ङि कर्तव्ये अजादिप्रत्ययानन्तर्यविशिष्टमङ्गमुद्देश्यम्। अतः कथमिदमुभयं तत्फलं स्यादत आह—'अत एव' इति। 'पद्भ्याम्', 'मृद्भ्या' इत्यादौ प्रथमतः पूर्वयणादेशसिद्धये नित्यः परयणादेशः। परश्चासौ व्यवस्थया। युगपत्सम्भवो नास्ति, बहिरङ्गेण सिद्ध्यतीति 'अचः परस्मिन्' (१.१.५७) इति सूत्रस्थभाष्यकारोपदर्शितं परयणादेशीयबहिरङ्गासिद्धत्वमस्य मूर्धाभिषिक्तं फलमिति तात्पर्यम्।

[1]'इत्यर्थात्' इति। विप्रतिषेधसूत्रे प्रकृतपरिभाषोदाहरणत्वेन 'अक्षण्वूः' इत्यस्योपदर्शनमत्रार्थे भाष्यकाराणां प्रमाणमिति भावः। ये तु प्रकृतपरिभाषाया उक्तमर्थमनभ्युपगच्छन्तो बाहिरङ्गपरिभाषानित्यत्वेन 'अक्षण्वूः' इत्यादौ वलिलोपं वारयन्ति, तन्मतं निराकर्तुमाह—'असिद्धपरिभाषायाः' इति।

अन्यथा 'वृत्रहभ्याम्' इत्यादौ बहिर्भूतभ्यान्निमित्तकंपदत्वाश्रयत्वेन बहिरङ्गतया नलोपासिद्धत्वेन सिद्धे, तद्वैयर्थ्यं स्पष्टमेव। मम तु तुकि आजानन्तर्यसत्वान्न दोषः। न चैवं सति 'ह्रस्वस्य पिति' (६.१.७१) इति माष्यविरोधः। तत्र हि 'ग्रामणिपुत्राः' इत्यत्र 'इको ह्रस्वो ङ्यः' (६.३.६१) इति ह्रस्वे कृते, तुकमाशङ्क्य, ह्रस्वस्य बहिरङ्गासिद्धत्वेन समाहितम्। 'नाजानन्तर्ये' (प. ३१) इत्यस्य सत्वे तत्र तदप्राप्तेरसङ्गतिः स्पष्टैवेति वाच्यम्। तेन भाष्येणास्या अनावश्यकत्वबोधनात्। तज्ज्ञापकेनान्तरङ्गपरिभाषाया अनित्यत्वबोधनस्यैव न्याय्यत्वात्, अत एव

---

१. 'इति तदर्थात्'-मूलम्।

'अचः परस्मिन्' (१.१.५७) इति सूत्रे भाष्ये 'पटु+ई+आ' इत्यत्र परयणादेशस्यानयाऽसिद्धत्वात्पूर्वयणादेशः साधितः। अत एवैषा भाष्ये पुनः क्वापि नोल्लिखिता। अत एवान्तरङ्गपरिभाषामुपक्रम्य विप्रतिषेधसूत्रेऽस्या बहूनि प्रयोजनानि सन्ति, तदर्थमेषा परिभाषा कर्तव्या प्रतिविधेयं दोषेष्वित्युक्तं 'सम्प्रसारणाच्च' (६.१.१०८) इति सूत्रे भाष्ये। प्रतिविधानञ्च परिभाषाविषये अनित्यत्वाश्रयणमेवेति ध्वनितमित्यलम्।

इदानीं स्वातन्त्र्येण परिभाषां प्रत्याख्यातुं शङ्कते 'न चैवम्' इति। 'अनावश्यकत्वबोधनात्' इति। तुग्विधौ प्रत्ययग्रहणपरिभाषालभ्यतदाद्यंशस्यानुपस्थितिः; फलाभावात्। अत एव 'कृदतिङ्' (३.१.९३) इति सूत्रस्थभाष्यकारोपदर्शिना 'धात्वादेः' (६.१.६४) इति सूत्रघटकधातुग्रहणानुवृत्तिरप्येकदेशिन एव। एवञ्च ह्रस्वस्यैव तुग्विधानात्परिभाषाविषयतया भाष्यविरोध इत्याशयः। 'पूर्वयणादेशः साधितः' इति। तद्भाष्यप्रामाण्यात् 'ओमाङोश्च' (७.१.९९) इत्याङ्ग्रहणाच्च जातबहिरङ्गमात्रविषयकत्वेन परिभाषायाः सङ्कोचकल्पनापेक्षया तस्या अनावश्यकत्वकल्पनैव लघीयसीति भावः।

ननु 'श्रौतमानन्तर्यमाश्रीयते परिभाषायाम्' इति 'ह्रस्वस्य पिति' (६.१.७१) इति सूत्रस्थभाष्यतात्पर्यकल्पनायान्तु न तद्विरोधः। 'असिद्धं बहिरङ्गमन्तरङ्गे' (प. ९०) इत्युक्त्वा, नाजानन्तर्ये इति वक्ष्यामीति भाष्यबलेन, बहिरङ्गपरिभाषास्थान्तरङ्गपदस्य प्रकृतपरिभाषाजन्यवाक्यार्थबोधीयविषयतासमर्पकत्वप्रतीत्या जातबहिरङ्गविषयकतायाः स्वयमेवोपवर्णनात्, नैव 'अचः परस्मिन्' (१.१.५७) इति सूत्रस्थभाष्यविरोध इति कथमनावश्यकत्वबोधनमस्याः परिभाषाया इत्यरुचेराह—'अत एव' इति। 'नोल्लिखिता' इति। सिद्धान्तिनेति शेषः। एवञ्च पूर्वपक्षिणा विप्रतिषेधसूत्रे तदुल्लेखेऽपि न क्षतिः।

ननु विप्रतिषेधसूत्रस्थतदुल्लेखस्य पूर्वपक्षीयत्वं विप्रतिपन्नमत आह—

५२. अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते ।

'अत एव' इति । 'विप्रतिषेधसूत्रे' इति । अस्य उपदर्शितानीति शेषः । 'दोषेष्वित्युक्तम्' इत्यस्य 'सम्प्रसारणाच्च' (६.१.१०८) इति सूत्रे इत्येनेनान्वयः । 'ध्वनितम्' इति । तत्र 'नाजानन्तर्ये' (प. ९१) इत्यादिना पृथक् प्रतिविधानमनुक्त्वा, तथा कथनात्प्रतिविधेयशब्दस्यैकवचनान्तत्वाद्दोषशब्दस्य बहुवचनातत्वाच्च बहूनां दोषाणां परिभाषानित्यत्वरूपमेकं प्रतिविधानमिति भाष्यकारो मन्यते । किञ्च 'नाजानन्तर्ये' (प. ९१) इति प्रतिविधानं विप्रतिषेधसूत्रप्रतिपादितं सिद्धान्ती यद्यावश्यकत्वेनाभिप्रैष्यत्, तदा तत्रा प्रतिविधानमप्युक्तमित्येवावक्ष्यत् अपि चैवं 'अन्तरङ्गानपि' (प. ९२) इत्यादीनामप्यनावश्यकतैव, परिभाषानित्यत्वेनैवोपपत्तेः । तत्तज्ज्ञापकसामग्री निखिलाऽपि तदनित्यतायामेव प्रमाणमनावश्यकत्वेऽपि तदुल्लेखः परिभाषाया अप्रवृत्तिविषयपरिज्ञानार्थ इत्युपाध्यायगूढाभिप्रायः । तदिदमभिसन्धायोपसंहरति—'अलम्' इति । 'अक्षण्वः' इत्यादौ यलोपवारणमपि परिभाषाया अनित्यत्वेनैवोपपद्यत इति सर्वमनवद्यम् ।

नन्वेवं 'गोमत्प्रियः' इत्यादौ पदद्वयनिमित्तकसमासाश्रितत्वेन बहिरङ्गं लुकं बाधित्वा, अन्तरङ्गत्वाद्धलन्ताद्दिलोपे नुमादयः स्युरत आह —

५२. अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बधते ।

अत्रा च 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) इति सूत्रं ज्ञापकम्, 'त्वकृतम्' इत्यादौ लुगपेक्षयाऽन्तरङ्गत्वाद्विभक्तिनिमित्तकेन 'त्वमावेकवचने' (७.२.९७) इत्यनेन सिद्धे, इदं व्यर्थं सत् ज्ञापकम् । ननु 'तव पुत्रः, त्वत्पुत्रः' इत्यादौ तवममादिबाधनार्थं तदावश्यकमिति चेत् ? एवं तर्हि, अत्र मपर्यन्तग्रहणानुवृत्तिस्तद्ज्ञापिकेति भाष्यकृतः ।

प्रतिविधानप्रस्तावात्समकालप्राप्तबहिरङ्गासिद्धत्वप्रतिविधानारम्भः। 'नन्वेवम्' इति। समकालप्राप्तबहिरङ्गासिद्धत्वाभ्युपगमे इत्यर्थः। 'समासाश्रितत्वेन' इत्यस्य तदर्थावबोधकतत्संज्ञकप्रक्रियावाक्याश्रितत्वेनेत्यर्थः। 'लुकम्' इत्यस्य च तत्प्रयोजकसमाससंज्ञामित्यर्थः। यथाश्रुतन्तु न युक्तं लुक्प्राक्कालिकसमाससंज्ञाप्रवृत्तिकाल एव हल्ङ्यादिलोपप्रवृत्त्या लुका सम्प्रधारणानुपपत्तेः। 'हल्ङ्यादिलोपे' इति। ननु लोपापेक्षया परत्वान्नुमाद्यापादनं युक्तमिति चेत्? सत्यम्; फले विशेषाभावादेवम्विधेषु विप्रतिषेधाशास्त्रस्याप्रवृत्तिरपरनिमित्तकत्वेन हल्ङ्यादिलोपस्यान्तरङ्गत्वमित्येव वात्रोपाध्यायाशय उद्भाव्यताम्। 'अन्तरङ्गानपि' इत्यपिना तदपेक्षया दुर्बलस्य परस्यापि बाधनं कैमुत्येन सूचितम्। तेन 'तत्कुलम्' इत्यादौ परमपि त्यदाद्यत्वं बाधित्वा, प्रकृतपरिभाषया 'स्वमोः' (७.१.२३) इति लुगेव। शोभना आपो यस्मिन्नित्यर्थे 'स्वप्' इत्यत्र प्रतिपदोक्तस्य 'अप्तृन्' (६.४.४) इति दीर्घस्य शीघ्रोपस्थितिकत्वेनान्तरङ्गत्वमेवेति तं बाधित्वा नपुंसकत्वलक्षणो लुक्।

'विभक्तिनिमित्तकत्वेन' इति। 'त्वं प्रथमः पुत्रो यस्य' इति त्रिपदे बहुव्रीहौ त्वाद्यादेशवारणार्थम् 'अष्टन आ विभक्तौ' (७.२.८४) इत्यतो 'विभक्तौ' इत्यनुवर्तत इति भावः। अत एव 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) इति सूत्रे भाष्यम्–'किमर्थमिदमुच्यते, न, त्वमावेकवचन इत्येव सिद्धम्? न सिद्ध्यति; एकवचन इत्युच्यते न चात्रैकवचनं पश्यामः' इत्युक्तम्। सूत्रघटकस्यैकवचनशब्दस्यार्थविशेषपरत्वादनुपस्थितिलभ्या युष्मदस्मदोरेकार्थकाभ्यां परत्वेन गृहीता विभक्तिरेकवचनमेव सम्पद्यत इति वा तदाशयः।

'तवममादिबाधनार्थम्' इति। 'त्वद्धितम्' इत्यादौ 'तुभ्यमह्यौ' आदिशब्दार्थौ। ननु समासात्प्रागलौकिके वाक्ये सुब्लुगभावेन तद्घटकयोस्त्वमयोरप्राप्तिः। सुपमादाय प्रत्ययनिमित्तकत्वेन तत्प्राप्तिः। उत्तरपदसाहचर्येण वृत्तिचरमावयवस्यैव प्रत्ययस्य विवक्षणीयत्वात्। अत एव 'त्वमावेकवचने' (७.२.९७) इति चरितार्थम्। अन्यथा प्रत्ययनिमित्तकत्वेनैव सिद्धे तद्वैयर्थ्यं स्पष्टमेव। एवं 'त्वदीयः' इत्यादावपि

अलौकिके वाक्ये सुपा व्यवधानात्तद्धितनिमित्तकयोर्वृत्तिचरमावयवत्वाभावात्सुप्निमित्तकयोश्च तयोरप्रसङ्ग एव। तथा च तस्यामवस्थायां तवममादिप्रवृत्तेरप्रतिहतत्वात्कथं तन्निवर्तकयोस्त्वमयोर्विधानेन सूत्रसार्थक्यं स्यादिति चेत्? न; निरवकाशेनानेन सूत्रेण उपजनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधत इति न्यायबोधनद्वारा पूर्वमेव तवममादीनां निवर्तकतया तत्सार्थक्यमित्याशयात्।

न चैतादृशन्यायबोधनद्वारा शास्त्रबाधकल्पनापेक्षया लाघवात्प्रकृतपरिभाषाज्ञापनमेव युक्तमिति वाच्यम्। एतत्परिभाषाज्ञापनेऽपि शास्त्रबाधाया गले पतित्वेन तुल्यतया लाघवस्य दुर्निरूपत्वात्। न चैवमपि विनिगमनाविरहात्परिभाषाज्ञापनमेव किं न स्यादिति वाच्यम्। तत्तदपवादशास्त्रवैयर्थ्यमूलकेन 'अदभ्यस्तात्' (७.१.४) इत्यादौ परिक्लृप्तस्य, उपजनिष्यमाणन्यायस्य बोधनेनैव सार्थक्यसम्भवादपूर्वतया प्रकृतपरिभाषाज्ञापने क्लेशाधिक्येन गौरवादित्यलम्।

'मपर्यन्तग्रहणानुवृत्तिः' इति। यत्तु तवममौ ङस्य वृत्ताविति न्यासेन पूर्वत्रापकर्षणेन च 'त्वपुत्रः' इत्यादौ तवममादिव्यावृत्त्या 'त्यमावेकवचने' (७.२.९७) इत्यनेनैवाभीष्टसिद्धेर्विशिष्टमेव सूत्रं ज्ञापकम्। न चैवं न्यासे परमतवेत्यादौ तवममाद्यादेशानामप्रवृत्तिः, युष्मदस्मदोर्वृत्तिघटकत्वादिति वाच्यम्। 'अवृत्तौ' इत्यस्य निमित्तविशेषणत्वेन वृत्तिघटकातिरिक्ते, ङसीत्यादर्थपरतया 'परमतव' इत्यादौ समासप्रकृतिकस्य ङसादेर्वृत्तिघटकत्वाभावेनादोषादित्याहुः, तदसत्; इवेन समासे 'तवेव' इत्यादौ वृत्तिघटके ङसि तवममाद्यनापत्तेः। 'षष्ठ्या आक्रोशे' (६.३.२१) 'पुत्रेऽन्यतरस्याम्' (६.३.२२) इत्यलुकि 'तव पुत्रः' इत्यादौ तदनापत्तेश्चेति दिक्।

युष्मदादिभ्य आचारक्विप्तु न। सम्पूर्णसूत्रज्ञापकतापरभाष्यप्रामाण्यात् 'ह्रस्वनद्यापः' (७.१.५४) इति नुड्विधायकसूत्रस्थभाष्यप्रामाण्येन हलन्तेभ्य आचारक्विबभावाच्च। एवमेकार्थकाभ्यां प्रातिपदिकप्रकृतिकणिचोऽप्यनभिधानं बोध्यम्। एतेन त्वादेशार्थं प्रत्ययग्रहणं चरितार्थमित्यप्रास्तम्।

ननु युष्मदस्मच्छब्दाभ्यामाचारक्विपि, प्रातिपदिकप्रकृतिके वा णिचि, त्वमयोर्विधानेन प्रत्ययांशे सूत्रस्य सावकाशतया कथमुपजनिष्यमाणेति न्यायेन तवममादिबाधकतया सूत्रसार्थक्योपवर्णने निर्भर इत्यत आह— 'युष्मदादिभ्यः' इति । 'ज्ञापकतापरभाष्यप्रामाण्यात्' इति । ज्ञापकत्वोपपादकं यद्भाष्यं, तद्विवटकतया सूत्रसार्थक्योपपादके तदुत्तरे भाष्ये प्रत्ययांशस्यातादृशक्विबाद्यंशे सार्थक्यानुद्भावनादिति तदर्थः ।

नन्विदं भाष्यमुपलक्षणविधया तत्रापि सार्थक्यप्रतिपादनपरमेवेत्यत आह--'नुड्विधायकसूत्रस्थभाष्यप्रामाण्येन' इति । तत्र हि 'अथास्य कस्मान्न भवति' इत्यादिना 'कास्प्रत्ययात्' (३.१.३९) इति विहितस्यामो नुटमाशङ्क्य, सानुबन्धकत्वेन समाधायोक्तं स तर्ह्येवमर्थमनुबन्धः कर्तव्यः । ननु चावश्यमित्संज्ञापरित्राणार्थमनुबन्धः कर्तव्यः । नार्थ इत्संज्ञापरित्राणार्थेन । इत्कार्याभावादित्संज्ञा न भविष्यति । इदमस्तीत्कार्यं 'मिदचोऽन्त्यात्परः' (१.१.४७) इति । प्रत्ययान्तादयं विधीयते तत्र नास्ति विशेषः । 'मिदचोऽन्त्यात्परः' (१.१.४७) इति वा परत्वे 'प्रत्ययः' (३.३.१) 'परश्च' (३.३.२) इति वेति ।

अत्र कैयटः—'हलन्तेभ्य आचारक्विबन्तेभ्य आम्यस्त्येव विशेषः । नैतदस्ति, एकीयमतमेतत् । तत्र हलन्तेभ्य आचारक्विभावोऽनभिधानात्' इत्याह । एवञ्च स्पष्टमेव भाष्यकैयटाभ्यामनभिधानं प्रतीयत इत्याशयः ।

ननु युष्मदस्मच्छब्दाभ्यां प्रातिपदिकप्रकृतिके णिचि 'मपर्यन्तस्य' (७.२.९१) इति सूत्रभाष्यसम्मते प्रत्ययांशस्य सार्थक्यं सूपपादमत आह-'एकार्थकाभ्याम्' इति । 'मपर्यन्तस्य (७.२.९१) इति सूत्रे भाष्ये परिग्रहणाभावे मान्त इतीयत्युच्यमाने यत्रैव मान्ते युष्मदस्मदी तत्रैवादेशाः स्युः । क च मान्ते युष्मयतेरस्मयतेश्चाप्रत्यय इत्युक्तम् । अतस्तस्य बह्वर्थविषयकत्वान्न प्रकृतार्थविरोध इति भावः ।

केचित्तु 'त्वमावेकवचने' (७.२.९७) इत्येतच्छास्त्रीयविषयविशेष-

व्यवस्थापनाय 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) इत्यत्रापि 'विभक्तौ' इत्यनुवर्तनीयम्। प्रत्यये उत्तरपदे च परतो या विभक्तिस्तस्यामित्येवं तदर्थः। एवञ्च 'त्वत्पुत्रः' इत्यादावेतत्सूत्रविधेययोस्त्वमयोर्निरवकाशत्वादलौकिके वाक्ये 'सुपो धातुप्रातिपदिकयोः' (२.४.७१) इत्यतः प्रथममेव प्रवृत्तेर्विनैव प्रयासं भाष्यकारोपपादिततवममादिबाधकत्वं स्वरसत उपपद्यते। अथ मास्तु विभक्तिग्रहणानुवृत्तिः 'त्वमावेकवचने' (७.२.९७) इत्यस्यापि पृथगनारम्भ एवास्तु, प्रत्ययसामान्ये चाविशेषेण 'प्रत्ययोत्तरपदयोः (७.२.९८) इत्येव प्रवर्तेतां को विरोध इति चेत्? न; मपर्यन्तानुवृत्तेः प्रकृतपरिभाषाज्ञापकत्वानुपपत्त्या विरोधस्य जागरूकत्वात्। न हि 'त्वमावेकवचने' (७.२.९७) इत्येतच्छास्त्रारम्भमन्तरेण 'त्वत्कृतम्' इत्यादौ त्वमादेशयोरन्यथा सिद्धिः। यथा तत्र सर्वादेशपरिहारार्थायाः 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) इत्यनुवर्तमानाया मपर्यन्तानुवृत्तेर्वैयर्थ्येन ज्ञापकत्वमुपपद्येत।

नच 'त्वमावेकवचने' (७.२.९७) इत्यत्र फलाभावेन विभक्तिग्रहणासम्बन्धे, तेनैव प्रत्ययोत्तरपदयोरप्यादेशप्रवृत्त्या व्यर्थमेव 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) इति सूत्रमिति वाच्यम्। 'त्वं सुन्दरः पुत्रो यस्य' इत्येवं त्रिपदबहुव्रीहौ त्वमयोरप्रवृत्तये, तत्र विभक्तिग्रहणसम्बन्धस्यावश्यकत्वात्।

न च 'उत्सर्गसमानदेशा अपवादाः' इति न्यायेन, 'अग्निचिद्वत्' (६.४.२२) सूत्रस्थभाष्यसम्मतेन मपर्यन्तस्यैवादेशे सिद्धे तदनुवृत्तिर्व्यर्थेति वाच्यम्। तस्य इनमकजादौ व्यभिचारादिति चेत्? न; इनमि मित्त्वेन बहुचि पुरस्ताद्ग्रहणेन, अकचि प्रकृतिग्रहणेन तस्य बाधेति, अत्रोत्सर्गत्यागे मानाभावात्। अत एव तस्मिन्नणि चेत्यनेन युष्माकाद्यादेशविधानं चरितार्थम्। अन्यथा आकङमेव विदध्यात्। आकङि तवकाद्यादेशयोरेतदपवादयोरुक्तन्यायेन अन्त्यादेशत्वापत्तिः। अतस्तद्विधानमिदमेव तज्ज्ञापकम्। यद्यपि विरोधे बाधकत्वमिति वार्तिकमतेऽयं न्यायः।

भाष्यकारस्तु विनापि विरोधं सत्यपि सम्भवे, बाधकत्व-मिच्छतीति 'अनभिहित' (२.३.१) सूत्रस्थकैयटरीत्या नायं नियमः। तथापि युष्माकाद्यादेशविधानज्ञापित उत्सर्गः स्वीक्रियत एवेति न प्रकृते दोषः। एतद्भाष्यमपि तत्स्वीकारे मानम्। एवञ्च मपर्यन्तप्नुवृत्तिः 'त्वत्कृतम्' इत्यादौ मपर्यन्तस्यादेशविधानार्था। तत्र चान्तरङ्गत्वात् 'त्वमौ' ७.२.९७) इत्येव सिद्धे व्यर्था सा एतज्ज्ञापिकेति। ज्ञापिते त्वस्मिन् एतद्विषये तवादीनाम-प्राप्त्या तृक्पवादत्वाभावेन मपर्यन्तस्यैवादेशार्थं सा चरितार्थेवि तदाशयः। यत्तु हरदत्तेन अन्तरङ्गप्रवृत्तौ प्रत्यये उत्तरपदे च मपर्यान्तासम्भवेन तदनुवृत्तिर्व्यर्था सती ज्ञापिकेत्युक्तम्, तन्न।

न च 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) इत्यत्र विभक्तिग्रहणसम्बन्धे व्यासस्थले चरितार्थयोस्तवममयोः 'पुत्रेऽन्यतरस्याम्' (६.३.२२) इत्य-लुक्कि, 'तव पुत्रः' इत्यादावुत्तरपदनिमित्तकाभ्यां त्वमादेशाभ्यामपवा-दत्वाद्बाधापत्तिरिति वाच्यम्। प्रकृतपरिभाषानारम्भे 'त्वत्पुत्रः' इत्यादौ लुगिव, अलुक्यपि तथाविधबाधकत्वसम्भवेऽपि सिद्धान्ते प्रकृतपरिभाषया लुग्विषये तवममयोरप्राप्त्या चरितार्थयोरुत्तरपदनिमित्तकयोः 'त्वममयोरपवादो ऽपि' इति न्यायेन तवममाभ्यामेवान्तरङ्गतया बाधाभ्युपगमेनादोषात्। इत्थञ्च प्रातिपदिकप्रकृतिके क्विप्रि ण्विचि वा प्रत्ययपरकविभक्तिपरत्वासम्भ-वेन तन्निमित्तकयोस्त्वममयोरप्राप्त्या तथाविधे चरितार्थ्यस्य दुर्वचत्वादनभि-धानाश्रयणं मूलकृतो दुराग्रह एवेत्याहुः।

'असिद्धवत्सूत्रभाष्यसम्मतेन' इति। तत्र हि भाष्ये 'क्विप्रि' इत्यस्य तत्सूत्रोदाहरणत्वखण्डनावसरे उक्तमेत्वं लोपापवादो विज्ञास्यते, न च सकारस्य लोपः प्राप्नोतीत्युक्तम्। उक्तन्यायानाश्रयणे एत्वस्य लोपस्था-न्यकारस्थाश्रिकत्वासम्भवेन तदसङ्गतिरेवेति भावः। 'स्वीक्रियत एव' इति। यथा 'भवेत्' इत्यादाविवादेशस्य 'दीर्घबाधकत्वोपपत्तये वार्तिककृता-

रमते तत्परित्यागः; तथा भाष्यकारमतेऽपि सति सम्भवे तत्स्वीकार इति भावः ।

'मपर्यन्तासम्भवेन' इति । आदेशानां हलन्तत्वान्मपर्यन्ताच्छेषस्य लुप्तत्वाच्च ममादेशेऽपि तदसम्भवः । यत्र हि मान्तात्किञ्चिदवशिष्टं तत्रैव मपर्यन्तव्यवहारः, 'कटिपर्यन्तं स्नानम्' इत्यादौ तथा दर्शनात् । परिग्रहणाच्च युष्मदस्मदवयवीभूतस्य तथाविधस्येह ग्रहणम् ।

न च 'मान्तस्य' इत्युक्ते यत्रैव मान्ते युष्मदस्मदी तत्रैवादेशाः स्युः । परिग्रहणाच्च वैयधिकरण्यान्वयलाभेनान्यत्राप्यादेशसिद्धिरिति कथमुक्तार्थलाभ इति वाच्यम् । 'म' इत्युक्तावपि तदन्तविधिना सामानाधिकरण्यलाभादन्तग्रहणेनैव वैयधिकरण्यान्वयसिद्धेरवशिष्टस्य परिग्रहणस्य निरुक्तार्थसंग्रहमन्तरेण सार्थक्यायोगात् । स्पष्टञ्चेदं भाष्ये इत्याशयः ।

अन्तरङ्गाणामप्यपवादबाध्यत्वेन तद्विषये तदप्रवृत्तेः । वस्तुत इदं ज्ञापकं वार्तिकरीत्यैव । भाष्यरीत्या तु वाचनिक एवायमर्थ इत्याहुः । इदं 'सुपो धातु' (२.४.७१) इति विषये एवेति केचित् । 'एङ्ह्रस्वात्सम्बुद्धेः' (६.१.६९) 'न यासयोः' (७.३.४५) इत्यादिसूत्रास्थाकरग्रामाण्येन लुङ्मात्रविषया । आद्ये 'हे त्रपु' इत्यादावनेन लोपं बाधित्वा लुग्भवतीति भाष्ये उक्तम् । अन्त्येऽन्तरङ्गांश्च विधीन्सर्वोऽपि लुग्बाधते न सुब्लुगेव । अत एव 'सनीस्रस' इत्यादौ नलोपो न भवति । 'पञ्चभिः खट्वाभिः क्रीतः, पञ्चखट्वः' इत्यादौ एकादेशात्प्रागेव टापो लुक् । अन्यथा कृतैकादेशस्य लुकि आकारश्रवणं न स्यादिति कैयटे उक्तम् । एतदनुरोधात् यत् 'तद्राजस्य' (२.४.६२) इति सूत्रे कैयटेनोक्तम् ।

'तद्विषये तदप्रवृत्तेः' इति । तवममविषये त्वमयोः 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) इत्येतद्विषये तवममयोश्चाप्रवृत्तेरिति तदर्थः । एवञ्च विषयाभावप्रयुक्तं वैयर्थ्यं नेह ज्ञापकताबीजम् । किन्त्वन्यथासिद्धिप्रयुक्तमेव तदिति भावः । ननु 'एधि' इत्यत्राभीयासिद्धत्वेन निर्वाहाच्छ्नमकजादिषु व्यभिचारात् , 'भवेत्' इत्यादौ विरोधाच्च, नात्र शास्त्रे 'उत्सर्गसमानदेशा अपवादाः' इति न्याय आश्रयितुं युक्तः । युष्मकाद्यादेशविधानस्यापि नैतन्न्यायज्ञापकतासम्भवः । तस्मिन्ननणि च, तवकममकौ, आकडनेकवचने, इति न्यासेनैवोपपत्त्या ज्ञापनोत्तरमपि स्वांशे चारितार्थ्ययोगात् । किन्तु वैचित्र्यार्थमेव तादृशादेशविधानम् । एवञ्च कथमीदृशन्यायालम्बेन परिभाषाज्ञापनमत आह—'वस्तुतः' इति । 'वार्तिकारीत्या' इति । तन्मते हि एकस्य द्विकार्ययोगात्मके विरोध एवापवाद्यापवादकभावाभ्युपगमाद्युज्यते कथञ्चिदयं न्याय आश्रयितुमिति भावः ।

'वाचनिक एव' इति । नन्वन्तरङ्गपरिभाषानित्यत्वमूलकतया नाजानन्तर्यपरिभाषावत्प्रकृतपरिभाषाया अपि सिद्धया ज्ञापकसिद्धत्वमेव किन्तु परम्परया । अत एव 'भवतात्' इति प्रतीकमुपादाय शब्देन्दुशेखरे ज्ञापकसिद्धत्वमेवास्याः परिभाषाया अभिहितम् । ततश्च कथं भाष्यमते वाचनिकत्वोक्तिरिति चेत् ? सत्यम् ; तुक्यसिद्धवचनेन जातबहिरङ्गविषय एव परिभाषानित्यत्वं ज्ञापकसाजात्यादाश्रीयत इत्यभ्युपगच्छतामियमुक्तिः । तदाह—'आहुः' इति । केचित्तु 'तत्कुलम्' इत्यादौ विप्रतिषेधशास्त्रबाधनार्थमस्य वाचनिकत्वमेव, अपिशब्देन लुकः परबाधकतायां अप्यावश्यकतया परिभाषायामाश्रयणीयत्वादित्याहुः ।

'सुपो धात्विति लुग्विषय एव' इति । धर्मिग्राहकसाजात्यादिति तद्भावः । 'आकरप्रामाण्येन' इति । आकरोऽत्र भाष्यं कैयटश्च । तत्प्रामाण्याच्चात्र प्रमाणानां सामान्ये पक्षपात इत्येवाश्रयणीयमिति भावः । 'लुङ् न स्यात्' इति । तद्राजसूत्रे (२.४.६२) बहुशब्दस्य बहुवचनपरत्वे पदावधिकेऽन्वाख्याने 'अति अङ्ग अण् शस्' इत्यवस्थायां परत्वात्सामासिके शसो लुकि, लुप्तता लोपात्प्रत्ययलक्षणायोगेन बहुवचनपरत्वाभाव इति शङ्काभिप्रायः । न चैवं पदाश्रयत्वेन तद्राजलुकोऽन्तरङ्गत्वात्कथं विशिष्टसमासा-

श्रयस्य सुब्लुकः परबलीयस्त्वमिति वाच्यम्। अपरनिमित्तकत्वेन सुब्लुकोऽप्यन्तरङ्गत्वाविशेषादुभयोरन्तरङ्गयोः परत्वेन व्यवस्थाया औचित्यात्। 'इत्याशङ्क्य' इत्यस्य मनसीति शेषः।

अङ्गानतिक्रान्तः अत्यङ्गः' इत्यत्र सुपो लुकि बहुवचनपरत्वाभावात् 'तद्राजस्य' (२.४.६२) इति लुङ्न स्यादित्याशङ्कापरभाष्यव्याख्यावसरे 'अन्तरङ्गानपि' इति न्यायेन अयं लुक् सुब्लुको बाधकः स्यादित्याशङ्क्य सुब्लुक एवानेन बलवत्त्वं बोध्यत इत्युक्तं तत्रेति द्रष्टव्यम्। लुगपेक्षया लुको बलवत्त्वस्य वक्तुमशक्यत्वादिति तदाशङ्कासमाधानं वक्तुं युक्तम्। अनेन न्यायेनान्तरङ्गनिमित्तविनाशकलुकस्तत्प्रयोजकसमासादीनाञ्च प्राबल्यं बोध्यत इत्यन्यत्र विस्तरः।

कैयटे हि 'न चात्र बहुवचनं पश्यामः' इति भाष्यप्रतीकमुपादाय, 'अन्तरङ्गानपि विधीन्' (प. ५२) 'सुपो धातुप्रातिपदिकयोः' (२.४.७१) इत्ययं लुक् 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) इति ज्ञापकादस्यैवात्र सम्भवाद्बाधत इति भाव इत्येतदुक्तम्। 'अस्यैवात्र' इत्यनेन 'प्रत्ययोत्तरपदयोश्च' (७.३.९८) इत्येतद्विषये सुब्लुक एव सम्भवाद्धर्मिग्राहकसाजात्येन तस्यैव बलीयस्त्वं युक्तमिति सूचितम्। तदाह—'सुब्लुक एव' इति। 'लुगपेक्षया' इति। धर्मिग्राहकसाजात्येन लुगितरकार्यापेक्षयैव लुकः प्राबल्यम्। न तु लुगपेक्षयेति भाष्यकाराशयोऽत्र न्याय्य इति भावः। ननु सत्यामस्यां परिभाषायां सर्वस्तोमादिबहुव्रीहौ 'सर्वस्य सुपि' (६.१.१९१) इत्याद्युदात्तं बाधित्वा सामासिके लुकि, परत्वादबहुव्रीहिप्रयुक्ते पूर्वपदप्रकृतिस्वरे स्वतः सर्वशब्दस्योञ्छादित्वेनान्तोदात्तत्वादन्तोदात्तपूर्वपदकत्वापत्तिर्दुर्वारा। इष्यते तु तत्राद्युदात्तपूर्वपदकत्वमत आह—'अनेन न्यायेन' इति। 'अन्तरङ्गनिमित्तविनाशकलुकः' इति। 'सर्वस्तोमः' इत्यादौ तु सौवरीणां सप्तमीनां तदन्तसप्तमीत्वात्कृतेऽपि लुकि 'सर्वस्य सुपि' (६.१.१९१) इत्यस्य

प्रवृत्तिसम्भवान्निमित्तविनाशकत्वाभावेन न तदपेक्षया लुकः प्राबल्यमनया परिभाषया बोध्यत इति भावः ।

ननु 'गोमत्प्रियः' इत्यादौ नुमाद्यपेक्षया सामासिकलुकः प्रकृतपरिभाषया प्राबल्यबोधनेऽपि समासस्य तदभावात्स्यादेवानिष्टप्रसङ्गोऽत आह— 'तत्प्रयोजकसमानादीनाञ्च' इति । आदिशब्दादुक्तस्थले प्रातिपदिकसंज्ञा, 'गोमत्यति' इत्यादौ धातुसंज्ञा च सङ्गच्छते । अत्रेदं बोध्यम् – ज्ञापकसिद्धस्यासार्वत्रिकत्वात्क्वचिदस्याः परिभाषाया अप्रवृत्तिः, तेन 'कुरुतात्', 'भवतात्' इत्यादौ परत्वात्तातङि सकृद्गतिन्यायात्पुनश्च हेर्लुगभाव इत्यभीष्टसिद्धिः । स्पष्टमिदं विप्रतिषेधसूत्रे कैयटे । ननु भाष्यकृन्मते वाचनिकत्वात्कथमुक्तार्थलाभ इति चेत् ? सत्यम् ; तन्मतेऽप्यन्तरङ्गपरिभाषानित्यत्वमूलकत्वादन्तरङ्गांशे ज्ञापकसिद्धत्वमेव; परविषये तु विप्रतिषेधसूत्रघटकपरशब्दस्येष्टवाचित्वादिष्टविचारस्य च लक्ष्यानुरोधित्वाच्च न लक्ष्यविरोधेन लुकः प्राबल्यमनया बोध्यत इति न कोऽपि दोष इत्याहुः ॥ ५२ ॥

नन्वेवं 'सोमेन्द्रे' अन्तरङ्गत्वादगुणे पूर्वपदात्परेन्द्रशब्दाभावेन 'नेन्द्रस्य परस्य' (७.३.२२) इति वृद्धिनिषेधो व्यर्थः । अन्तादिभावस्तूभयत आश्रयणे निषिद्धः । किञ्च वृद्धिरत्र न प्राप्नोति । अन्तादिवच्चोभयाभावेऽपि पूर्वान्तवच्चैनैकादेशविशिष्टे पूर्वपदत्वेनेन्द्रशब्दस्यैकदेशविकृतन्यायेन उत्तरपदत्वेऽपि तस्यानुक्तत्वात् । एकस्यैकादेशेन परस्य नित्येन यस्येति लोपेनाप्रहारात् । न च परादिवद्भावेनैकादेशविशिष्टस्योत्तरपदत्वमेवास्त्विति वाच्यम् ।

'नन्वेवम्' इति । समकालप्राप्तबहिरङ्गासिद्धत्वे इत्यर्थः । 'पूर्वपदात्परेन्द्रशब्दाभावेन' इति । 'नेन्द्रस्य परस्य' (७.३.२२) इत्यत्र परत्वस्य सावधिकत्वेन प्रत्यासत्त्या पूर्वपदावधिकस्यैव तस्य ग्रहणादिदं फलतीति

भाव: । 'उभयत आश्रयणे निषिद्ध:' इति । ननु कथमयं निषेध: । न च युगपदेकस्य कोटिद्वयघटकतया निमित्तत्वनिमित्तित्वयोर्विरोधादतिदेशाप्रवृत्तिरिति वाच्यम् । अतिदेशानामाहार्यारोपरूपतया परस्परविरुद्धयोरपि धर्मयोर्योगपद्येनातिदेशसम्भवात् । न च तादृशधर्मद्वयारोपेऽपि तद्धर्मविशिष्टव्यक्तितद्वयपौर्वापर्यलक्षणो व्यपवर्गो दुर्लभ: । तदुक्तम्—'उपसर्गा दूध्रस्व' (७.४.२३) इति सूत्रे भाष्ये । इह कस्मान्न भवति—प्रोह्यते, उपोह्यते । 'एकादेशे कृते व्यपवर्गाभावात्' इति । ततश्च व्यपवर्गाभावप्रयुक्तकार्यनिर्वाहाभावेन फलाभावादतिदेशाप्रवृत्तिरेतन्न्यायबीजमिति वाच्यम् । व्यपवर्गस्याप्याहार्यारोपे बाधकाभावात् । न च पूर्वापरव्यक्तिभेदप्रयोज्यस्यास्मात् 'अयं पर:' तस्मात् 'अयं पूर्व:' इत्येव व्यपवर्गस्यैकस्यामादेशव्यक्तौ दुर्ज्ञेयत्वादतिदेशासम्भव इति भाष्यतात्पर्यमिति वाच्यम् । तथा सति 'प्लायते' इत्यादावेकादेशोत्तरं लत्वसमर्थनायोपसर्गायत्यो: पौर्वापर्यलक्षणस्य व्यपवर्गस्य 'अच: परस्मिन्' (१.१.५७) इत्यनेनाप्यतिदेशासम्भवात् 'उपसर्गस्यायतौ' (८.२.१९) इति सूत्रस्थभाष्यविरोधापत्ते: । तस्मादयुक्त एवायमुभयत आश्रयणे निषेध इति चेत् ? तर्हि शास्त्रीयत्वाभावाद्व्यपवर्गस्यान्तादिवद्भावादलाभ: । शास्त्रीयस्यैव शास्त्रेणातिदेष्टुमुचितत्वात् । अतो नैष्फल्यादुभयत आश्रयणे तदप्रवृत्ति: । 'अच: परस्मिन्' (१.१.५७) इत्यनेन त्वशास्त्रीयस्याप्यतिदेश: स्वरविधौ निषेधारम्भादेवञ्च न पूर्वोक्तयोर्ह्रस्वलत्वप्रकरणस्थयोर्भाष्ययो: परस्परविरोध इत्याहु: ।

नन्वेवमप्येकदेशविकृतन्यायेन पूर्वपदत्वमेकादेशविशिष्टस्य परादिवद्भावेनेन्द्रशब्दात्मकोत्तरपदत्वमिति निषेधोपपत्तौ कथं वैयर्थ्यम् ? न च शास्त्रीयत्वाद्व्यपवर्गस्यानेनापि न्यायेनातिदेष्टुमशक्यत्वादनुपपत्तिरेवेति वाच्यम् । अशास्त्रीयस्याप्यनेन न्यायेनातिदेष्टुमिष्टत्वात् । ध्वनितञ्चेदं 'अन्तादिवत' (६.१.८५) सूत्रे भाष्ये । तत्र हि एकादेशविशिष्टस्य पूर्वपदत्वे दकशब्दस्यानेन न्यायेनोदकशब्दत्वात् 'उदकेऽकेवले' (६.२.९६) इति पूर्वपदान्तोदात्तत्वसिद्धिरन्तवद्भावस्य प्रयोजनमित्युक्तम् । यद्यनेन न्यायेन व्यपवर्गस्याशास्त्रीयस्यानतिदेश: तदा गुडशब्दोदकशब्दयो: पौर्वा-

पदनिमित्तकः पूर्वपदान्तोदात्तस्वरो न प्रवर्तत एवेति तदनुपपत्तिः स्पष्टैव । अत एव 'रामौ' इत्यत्र मान्तस्यैकदेशविकृतन्यायेन प्रकृतित्वात् 'औ' इत्यस्य परादिवत्त्वेन सुप्त्वाच्च कार्यकालपक्षे पदत्वमिति सिद्धान्तः । स्वनिष्ठविधेयतानिरूपितोद्देश्यत्वस्वनिष्ठपरत्वापरत्वान्यतरावधित्वैतदुभयसम्बन्धेन प्रत्ययविशिष्टत्वरूपप्रकृतित्वस्याशास्त्रीयत्वादेतन्न्यायगोचरत्वाभावे तदनुपपत्तिरेव । न चैवं 'प्रोह्यते' इत्यादौ प्रकृतन्यायेनोपसर्गत्वं व्यपवर्गञ्चाश्रित्य ह्रस्वप्रवृत्तिर्दुर्वारेति वाच्यम् । परिच्छिन्नपरिमाणधर्मतया विकृतव्यक्तावनेन लोकन्यायेनोपसर्गत्वस्यातिदेष्टुमशक्यत्वेनादोषात् । स्पष्टञ्चेदं 'इर्णधातौ' शेखरे । यत्तु तादृशस्थले प्रकृतन्यायप्रसक्तह्रस्ववारणोपायतया न्यायस्यान्यायीरोपबोधकत्वाद्वस्तु भूतपूर्वापरभेदप्रयुक्तो व्यपवर्गो दुर्निरूप इत्यशास्त्रीयस्यानेन न्यायेनातिदेशाभाव इत्यभिप्रायेण 'उपसर्गाद्ध्रस्व' (७.४.२३) इति सूत्रे विवरणकारैरुक्तं तत्प्रागुपपादित 'अन्तादिवत्' (६.१.८५) सूत्रभाष्येण विरोधादुपेक्ष्यम् । तस्मादयुक्तमेवेदं वैयर्थ्यापादनमित्यरुचेराह—'किञ्च' इति । 'न प्राप्नोति' इति । एवञ्च न साक्षात्स्वप्रवृत्त्यसम्भवमूलकं निषेधस्य वैयर्थ्यं, किन्तु स्वप्रवृत्तिप्रयोजकप्रतियोगिप्रवृत्तिसम्भवाभावमूलकमित्याशयः । एकदेशविकृतन्यायेनेत्यस्य उत्तरपदत्वेऽपीत्यनेनान्वयः ।

'निषेधाभावेन' इति । देवतावाचकद्वन्द्वघटकयोः पूर्वोत्तरपदयोर्वृद्धिरित्येव 'देवताद्वन्द्वे च' (७.३.२१) इति वृद्धिबोधकानुशासनार्थ इति व्यपवर्गस्य निमित्तत्वेनानुपादानात् उभयत आश्रयणे बाधकाभाव इत्याशयः । [1]'तदाश्रयणे च' इति । उभयत आश्रयणेनेत्यर्थः । 'अनच्कत्वात्' इति । नन्वेकदेशविकृतन्यायपक्षे तस्यानच्कत्वेऽपि उभयत आश्रयणपक्षे एकादेशविशिष्टस्यैवोत्तरपदत्वात्कथमनच्कत्वमित्याशयेन शङ्कते—'न च इति । 'उत्तरपदत्वम्' इति । एकदेशविकृतन्यायादुभयत आश्रयणाद्वा पूर्वपदत्वमित्यपि बोध्यम् ।

---

१. नास्ति—मूले ।

उत्तरपदाद्यच्स्थानिकत्वाद्वृद्धेस्तदभावेनाप्राप्तेः । तादूप्यानतिदेशात् । अन्यथा 'खद्वाभिः' इत्यादावपि पूर्वान्तवच्चेन अदन्तत्वे भिस ऐसापत्तिरिति भाष्ये स्पष्टम् । अत एव 'पूर्वेषुकामशमी' इत्यादावन्तरङ्गत्वाद्गुणे, वृद्धिर्न स्यादित्याशङ्कितम् । तदेकदेशमात्रस्य विकाराभावाच्च । तदुक्तं भाष्ये—'इन्द्रे द्वावचौ एको 'यस्येति' लोपेनापहृतः, पर एकादेशेन ततोऽनच्क इन्द्रः सम्पन्नस्तत्र कः प्रसङ्गो वृद्धेः' इति । मरुदादिभिरिन्द्रस्य द्वन्द्वे इन्द्रस्यैव पूर्वनिपातः । अत आह —

५३. पूर्वोत्तरपदनिमित्तककार्यात्पूर्वमन्तरङ्गोऽप्येकादेशो न ।

अत्र 'नेन्द्रस्य' (७.३.२२) इति निषेध एव ज्ञापक इति 'अन्तादिवच्च' (६.१.८५), 'विप्रतिषेधे परम्' (१.४.२) इति सूत्रयोर्भाष्ये स्पष्टम् ।

'तदभावेन' इति । अयं भावः—'देवताद्वन्द्वे च' (७.३.२१) इत्यत्र प्रत्यासत्त्या देवतावाचकयोरेव पूर्वोत्तरपदयोर्वृद्धिरित्यर्थोऽवश्यमभ्युपेयः । अन्यथा 'इन्द्रश्च पर्वतश्च, तयोरयं ऐन्द्रपर्वतः' इत्यत्राप्युत्तरपदवृद्धिप्रसङ्गात् । एवञ्च देवतावाचकोत्तरपदादिर्य इकारो वृद्धेर्हेतुः स एकादेशेनापहृतः । यश्चैकादेशो नासौ देवतावाचकोत्तरपदादिः । न ह्यशास्त्रीयस्य देवतावाचकत्वस्यान्तादिवद्भावादतिदेशः सम्भवति । न वा तादृशानुपूर्वीविशिष्टस्य त्यज्यमानद्रव्योद्देश्यमन्त्रस्तुल्याऽन्यतररूपदेवतावाचकतया क्वचित्प्रसिद्धिरस्ति ।

न चैवं 'आग्निवारुणम्' इत्यादौ 'यस्येति' (६.४.४९) लोपेऽपि देवतावाचकत्वाभावाद्वृद्धेरप्रसङ्ग इति वाच्यम् । एकदेशविकृतन्यायेनाशास्त्रीयस्याप्यतिदेष्टुमिष्टतया लोपानन्तरमप्युत्तरपदे देवतावाचकत्वस्य

सुवचत्वात् । ततश्च विशेषणाभावप्रयुक्तविशिष्टाभावविधया देवतावाचकोत्तरपदाद्यवयवत्वमेकादेशस्य नास्तीति । नन्वेकादेशविशिष्टे देवतावाचकत्वाभावस्तद्वाचकेकाराद्यात्मकेन्द्रशब्दानुपूर्व्यभावप्रयुक्तस्तादृशानुपूर्व्यभावश्चेकारवैकल्यमूलक इतीकारत्वमेवातिदिश्यतामेकादेशे विशिष्टस्य देवतावाचकत्वमार्थसमाजग्रस्तम् ।

अतः कुतो न वृद्धिस्तत्राह—'तादृप्यानतिदेशात्' इति । तयोरेकादेशस्थानिनोर्यद्रूपमकारत्वेकारत्वाद्यात्मको धर्मस्तदेव तादृप्यम् । स्वार्थे ष्यञ् । ततश्च वर्णमात्रवृत्तिधर्मस्यातिदेशाभावादिति तदर्थः । तदुक्तं 'अन्तादिवत्' (६.१.८५) सूत्रे भाष्ये 'वर्णाश्रयेऽन्तादिवद्भावप्रतिषेधो न वाऽतादृप्यातिदेशात्' इति । तुक्यसिद्धवचनेनायमर्थः सिद्धः । अन्यथा 'अधीत्य' इत्यादावेकादेशस्य परादिवद्भावेन ह्रस्वत्वात्तुक्सिद्धेः तद्वैयर्थ्यमेवेति तदभिप्रायं कैयटः । तदाह 'भाष्ये स्पष्टम्' इति । अन्तादिवत्सूत्रे इति शेषः । अन्तादिशब्दयोस्तद्वल्लक्षकतया समुदायधर्मस्यैव तेनातिदेश इति तत्त्वम् ।

'अत एव' इति । ईदृशेत्वन्तादिवद्भावेन कार्यनिर्वाहाभावादेवेत्यर्थः । 'आशङ्कितम्' इति । दिग्वाचकात्परेषां ग्रामनगरान्यतरवाचकानामुत्तरपदानामादेरचो वृद्धिरिति 'प्राचां ग्रामनगराणाम्' (७.३.१४) इत्यस्यार्थः । ततश्च पूर्वशब्दैषुकामशमीशब्दावयवयोरादगुणोत्तरमेकादेशविहीनस्यैकदेशविकृतन्यायेन पूर्वपदत्वदिग्वाचकत्वयोराश्रयणे तद्विशिष्टस्य परादिवद्भावादुत्तरपदत्वेऽपि ग्रामवाचकत्वं दुर्लभमशास्त्रीयत्वेनातिदेष्टुमशक्यत्वात् । यद्येकदेशविकृतन्यायेनैकादेशविहीनस्य ग्रामवाचकत्वमुत्तरपदत्वं चाभ्युपेयते, तदा पूर्वान्तवत्त्वेनैकादेशविशिष्टस्य पूर्वपदत्वलाभेऽपि दिग्वाचकत्वं दुर्लभम्, अशास्त्रीयत्वात् । उभयत आश्रयणे तु व्यपवर्गो दुर्लभ इत्यतो वृद्धेरप्राप्तिरित्याशङ्काभिप्रायः ।

नन्वेकादेशविशिष्टस्य मा भूत्परादिवद्भावेन देवतावाचकत्वादिकमेकदेशविकृतन्यायेन तु सूपपादमत आह—'तदेकदेशमात्रस्य' इति । तदेक-

परि. ५३. पूर्वोत्तरपदनिमित्तैकादेशकार्यात्पूर्वमन्तरङ्गेऽपेकादेशो न ।

५४. अन्तरङ्गानपि विधीन्

देशमात्रसम्बन्धिविकारप्रयोज्यविकारविशिष्टम् । तदन्यवन्नेति न्यायेशरीरमिति तात्पर्यम् । उक्तमर्थं प्रमाणयति 'तदुक्तम्' इति । विप्रतिषेधसूत्रे, अन्तादिवत्सूत्रे चेति भावः ।

'इन्द्रस्यैव' इति । अजाद्यदन्तत्वात्, अभ्यर्हितत्वाच्चेति भावः । सोमशब्देन समासे तु महाप्रलयपर्यन्तस्थायित्वेन शिवेशिरोभूषणत्वेन चेन्द्रापेक्षया सोमस्याभ्यर्हितत्वात्, सोमशब्दस्यैव पूर्वनिपात इत्याशयः । अत्रेदं बोध्यम्— वस्तुभूतं पूर्वपदमुत्तरपदञ्च यत्र शब्दतो निमित्तं तथाविधं कार्यमस्याः परिभाषाया विषयः । न तु धर्मिग्राहकसाजात्यात्पूर्वपदत्वमुत्तरपदत्वं च यत्र कार्ये निमित्तं तादृशमेवेत्याग्रहः । अत एव 'परमाहम्' इत्यादौ सवर्णदीर्घात्पूर्वमनया परिभाषया मपर्यन्तस्यादेशसमर्थनपरं 'अदस औ सुलोपश्च' (७.२.१०७) इति सूत्रस्थं सङ्गच्छते । अन्यथा 'त्वाहौ सौ' (७.२.९४) इत्यादौ पूर्वपदत्वोत्तरपदत्वयोरनिमित्तत्वेन तदसङ्गतिरेव । शब्दत इत्युक्तेश्च भावेन 'लाक्षः' इत्यादौ गुणात्पूर्वं यणादेशो न भवति । अस्ति हि यणादेशेऽपि तद्भावभावित्वेन निमित्तत्वं पूर्वोत्तरपदयोः । किञ्च परिभाषायामेकादेशपदं सन्धिकार्योपलक्षणम् । तेन 'रात्रिमट' इत्यादौ रात्रेः 'कृति' (६.३.७२) इति मुमः पूर्वमन्तरङ्गो यणादेशो नेति सर्वेष्टसिद्धिरित्याहुः ॥९३॥ –

नन्वेवमपि 'प्रधाय, प्रस्थाय' इत्यादावन्तरङ्गत्वाद्धित्वादिषु कृतेषु, ल्यप् स्यादित्यत आह—

५४. अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते ।

'अदो जग्धि' (२.४.३६) इति सूत्रे 'ति किति' इत्येव सिद्धे, ल्यब्ग्रहणमस्या ज्ञापकमिति 'अदो जग्धि' (२.४.३६) इत्यत्र भाष्ये स्पष्टम् ।

'अन्तरङ्गत्वात्' इति । विष्टसमासापेक्षल्यबपेक्षया प्रकृतिप्रत्ययोभयसापेक्षकार्याणामन्तरङ्गत्वमित्याशयः । 'ल्यब्ग्रहणं ज्ञापकम्' इति । नन्वनेन ज्ञापकेन ल्यब्विषये सामान्यतः प्रकृतिप्रत्ययोभयमात्रनिमित्तकानामन्तरङ्गकार्याणामप्रवृत्तिरित्येव ज्ञाप्यतां 'न ल्यपि' (६.४.६९) इति सूत्रञ्च न कर्तव्यमित्यपरमनुकूलमिति चेत् ? न; 'अधीत्य' इत्यादौ तुगागमस्याप्यप्रवृत्तिप्रसङ्गात् । न च क्त्वाश्रयानुबन्धकार्याणां ल्यब्विषये प्रवृत्त्यभावो ज्ञाप्यतां तुगागमस्तु न तथाभूत इति नानुपपत्तिरिति वाच्यम् । तथा सति 'प्रष्ठ्य' इत्यादौ गुणनिषेधस्यापि दौर्लभ्यापत्तेः ।

न च भावकार्याणामेव तथाभूतानां ल्यब्विषये धर्मिग्राहकसाजात्यादप्रवृत्तिः कल्प्यतामिति वाच्यम् । 'प्रोह्य गतः' इत्यादौ सम्प्रसारणस्य 'प्रमथ्य गतः' इत्यादौ नलोपस्य चानुपपत्तिप्रसङ्गात् । तस्मात्परिभाषाज्ञापनमेव युक्तमित्याशयः । 'भाष्ये स्पष्टम्' इति । तत्र जग्धौ सिद्धेऽन्तरङ्गत्वात् 'ति किति' इति ल्यबुच्यते । ज्ञापकं त्वन्तरङ्गाणां ल्यपा भवति बाधनमित्ययुक्तम् ।

इदन्तु बोध्यम्—धर्मिग्राहकसाजात्याद्यादृशान्तरङ्गनिमित्तविनाशकत्वं ल्यपस्तादृशान्तरङ्गबाधकत्वमेव प्रकृतपरिभाषया बोध्यते । अत एव 'प्रेष्य गतः' इत्यादाविच्छत्यादेर्ण्यन्तात् क्त्वो ल्यपि, लघूपधगुणे, पश्चाल्ल्यपि लघुपूर्वत्वाभावात् 'ल्यपि लघुपूर्वात्' (६.४.५६) इति णेरयादेशो न भवति । अन्यथा प्रकृतपरिभाषया गुणात्पूर्वं ल्यबुत्पत्तौ पश्चाद्गुणायादेशयोः प्रतिपदोक्तत्वेन गुणात्पूर्वमयादेशो दुर्वारः । परिभाषाफलन्तु 'परिधाय' इत्यादौ 'दधातेर्हिः (६.४.४२) इति न हिभावप्रवृत्तिः । 'प्रदाय' इत्यादौ 'दो ददघोः' (७.४.४६) इति ददादेशाप्रवृत्तिः । 'प्रस्थाय' इत्यादौ 'घतिस्यति' (७.४.४०) इतीत्वाप्रवृत्तिश्चेत्यादि स्वयमूहनीयमित्याहुः ॥९४॥

नन्वेवं 'इयाय' इत्यादौ द्वित्वे कृतेऽन्तरङ्गत्वात्सवर्णदीर्घे तदसिद्धिरत आह—

५५. वार्णादाङ्गं बलीयो भवति ।

तेनान्तरङ्गमपि सवर्णदीर्घं बाधित्वा वृद्धिरिति तत्सिद्धिः । 'अभ्यासस्यासवर्णे' (६.४.७८) इतीयङ्विधायकसूत्रस्थमसवर्णग्रहणमस्या ज्ञापकम् । तद्धि 'ईषतुः' इत्यादौ इयङ्व्यावृत्त्यर्थम् । एतत्परिभाषाभावे तु 'ईषतुः' इत्यादावन्तरङ्गेण सवर्णदीर्घेण बाधात्तद्व्यर्थम् । इयङुवङौ अभ्याससम्बन्धनिमित्तकत्वाद्बहिरङ्गौ । न चेयङुपवाद इति वाच्यम् । येन नाप्राप्तिन्यायेन (व्या. प. ४९) 'इयर्ति' इत्यादिसकललक्ष्यप्राप्तयणपवादत्वस्यैव निर्णयादिति प्राञ्चः । परे त्वेतत्परिभाषाभावे 'अभ्यासस्य' (६.४.७८) इति सूत्रमेव व्यर्थम् । न च 'इयाय', 'इयेष' इत्यादौ चरितार्थम्, तयोरपि पूर्वप्रवृत्तगुणस्य पूर्वप्रवृत्तवृद्धेश्च 'द्विर्वचनेऽचि' (१.१.५९) इति स्थानिवद्देशेनापहारे द्वित्वे कृते पुनः प्राप्ते गुणवृद्धी बाधित्वा, अन्तरङ्गत्वात्सवर्णदीर्घापत्तेः ।

'असवर्णग्रहणं ज्ञापकम्' इति । अंशान्तरन्तु 'इयर्ति' इत्याद्यर्थमावश्यकमित्यभिमानः । 'तद्व्यर्थम्' इति । ननु 'ईयतुः' इत्यादौ 'दीर्घ इणः किति' (७.४.६९) 'इणो यण्' (६.४.८१) इत्येतत्सूत्रविधेयाभ्यां दीर्घयणादेशाभ्यां प्रतिपदोक्तत्वेन बाधात्, सवर्णदीर्घाप्रवृत्त्या यणः स्थानिवत्त्वेन प्राप्तस्येयङो वारणायावश्यकत्वात्कथं तद्वैयर्थ्यमिति चेत् ? सत्यम् ; अस्यामवस्थायां सवर्णदीर्घसमानकालिकत्वेन प्रसक्तस्येयङादेशस्य तक्रकौण्डिन्यन्यायमूलकचारितार्थ्योपहितबाधकत्वेनैवाभ्यासदीर्घेण प्रथमतो बाधनीतया बाधकप्रवृत्त्युत्तरमीदृशेषु पुनरुत्सर्गाप्रवृत्त्या नास्त्यसवर्णग्रहणस्य सार्थक्यसम्भव इत्याहुः ।

'बहिरङ्गौ' इति । अभ्याससम्बन्धिसमुदायभूताङ्गनिमित्तकत्वेन घटितनिमित्तैकत्वरूपमत्र बहिरङ्गत्वं द्रष्टव्यम् । यत्तु अभ्यासेसंज्ञोत्तरकालप्राप्तिकत्वादियङुवङोर्बहिरङ्गत्वं सवर्णदीर्घस्य तु ततः प्राक्कालप्राप्तिकत्वेन पूर्वो-

पस्थितनिमित्तकत्वादन्तरङ्गत्वमिति ; तदसत् ; 'इयेष, ईषतुः' इत्यादौ सर्वेषामेव हलादिशेषोत्तरकालप्राप्तिकतया पौर्वापर्यविशिष्टोपस्थितिप्रयुक्तान्तरङ्गबहिरङ्गभावस्य दुर्वचत्वात् । वस्तुतोऽस्य ग्रन्थस्य प्राचीनमतानुवादरूपत्वात् , तन्मते संज्ञाकृतबहिरङ्गत्वस्यायासेन स्वरूपव्याक्रियैव पराक्रियेत्यभिप्रेत्य तदभिप्रायेणैवायमुल्लेख इत्याहुः ।

'यणपवादत्वस्य' इति । यद्यपि 'ऋऋति' इति स्थिते, यणं बाधित्वा, तैक्रकौण्डिन्यन्यायेन 'आर्तिपिपर्त्योश्च' (७.४.७७) इतीत्वं तन्निराकृत्य लघूपधगुणः परबलीयस्त्वात् , तमपसार्यान्तरङ्गत्वाद्यणादेशः, तदपवादत्वादित्वमित्येवं चक्रकेण निरुक्तस्थले यणो दुर्लभत्वात् , इयङ्यणोरपवाद्यापवादकभावो दुर्निरूपः, तथापि इष्टतो व्यवस्थामाश्रित्य गुणोत्तरमित्वे तत्सम्भव इत्याशयः ।

न च 'ईषतुः' इत्यादावियङादेशस्य यणपवादत्वनिर्णयेन सवर्णदीर्घेणान्तरङ्गेण बाधादसवर्णग्रहणस्य वैयर्थ्यमियङंशे; 'ऊखतुः' इत्यादावुवङः सवर्णदीर्घस्याप्यपवादतया, तद्विषये सवर्णदीर्घाप्रवृत्त्या, प्रसक्तेस्योवङो निवृत्तये चरितार्थत्वादसवर्णग्रहणस्य कथं ज्ञापकतासम्भव इति वाच्यम् । 'अभ्यासस्यानौ' इति न्यासेनोकारपरपर्युदासेनैव सिद्धौ, अतिरिच्यमानमसवर्णग्रहणमुक्तार्थज्ञापकमित्याशयात् । नन्वेतत्परिभाषाज्ञापनपरतत्सूत्रस्थभाष्यकारीयोपक्रमोपसंहाराभ्यां विशिष्टस्यैव सूत्रस्य ज्ञापकतालाभात्कथमसवर्णग्रहणस्यैव ज्ञापकत्वमिति प्राचीनोद्घोषो दोषाय न भवेदित्याशयेन सिद्धान्तमाह—'परे तु' इति । 'द्विर्वचनेऽचि' इति । ननु यन्निमित्तवैकल्यप्रयुक्तो विधीनामप्रवृत्तिः, तन्निमित्तसम्पादनार्थमतिदेशानां प्रवृत्तिः । 'चक्रे' इत्यादौ च यणादेशोत्तरमेकाच्त्वस्य द्वित्वनिमित्तभूतस्याभावात् , द्वित्वप्रवृत्तये युक्तमतिदेशविषयत्वम् । 'इयेष' इत्यादौ सत्स्वपि गुणादिष्वेकाच्त्वस्याव्याघातात्कथमतिदेशप्रवृत्तिरिति चेत् ? सत्यम् ; द्वित्वविधावेकाच्त्वमेव न निमित्तं, किन्तु धातुत्वमपि । तस्य च गुणवृद्ध्यादिभिरन्यथाभूतेष्वतिदेशमन्तरा दुर्लभत्वात् , तद्वैकल्यप्रयुक्तायां द्वित्वशास्त्राप्रवृत्तावतिदेशोऽयमाश्रीयते । न ह्यत्रैकदेशविकृतन्यायेन निर्वाहः । धातुत्वस्यापि द्रोणत्वादिवत् परिच्छिन्नपरिमाणधर्मतया, तादृशेन लोकन्यायेनाति-

देष्टुमशक्यत्वात्। नाप्यानुमानिकेन स्थानिवद्भावेन तदतिदेशोऽत्र युक्तः। श्रुतत्वात्प्रतिपदोक्तत्वाच्च रूपातिदेशस्यैव न्याय्यत्वादित्याहुः।

'पुनः प्राप्ते' इति। न च द्वित्वे कर्तव्ये इत्यतिदेशविधौ कालावधारणात् द्वित्वकर्तव्यतायामेव तत्प्रवृत्त्या कृते द्वित्वे, तादृशरूपनिवृत्तेः स्वत एव सिद्धत्वात्किमर्थं गुणवृद्ध्यादीनां पुनः प्रवृत्त्याश्रयणमिति वाच्यम्। तत्प्रवृत्तिमन्तरेण अतिदिष्टरूपनिवृत्तेरयोगात्। कालावधारणन्तु न तादृशरूपनिवर्तकं 'जग्मतुः' इत्यादावभ्यासखण्डेऽप्यकारश्रवणानापत्तेः। किन्तु कृतद्वित्वानां ये गुणवृद्ध्यादय आदेशाः, तेषां कार्यान्तरं प्रत्यतिदेशनिवर्तकम्। अत एव द्वित्वोत्तरं गुणवृद्ध्योः स्थानिरूपातिदेशात् 'इयाय' इत्यादौ 'इणो यण्' (६.४.८१) 'एरनेकाचः' (६.४.८२) इत्यादीनामप्रवृत्तिः।

न च 'इयर्ति' इत्यादौ तच्चरितार्थं तावन्मात्रप्रयोजनकत्वे 'उः' इत्येव ब्रूयात। 'ग्वोः' (६.४.७७) इत्यनुवर्तते। 'इणो यण्' (६.४.८१) इति साहचर्यात्, व्याख्यानाच्च ऋधातोरेव ग्रहणम्। 'अर्तेः' इवर्णस्य इयङित्यर्थः। 'अभ्यासस्यातौ, अभ्यासस्यार्तेः' इति वा गुरुत्वान्न युक्तम्। न च ए ऐ ओ औ शब्देभ्यः, आचारक्विबन्तेभ्य लिटि इयङाद्यर्थं तत्सूत्रमावश्यकम्। तथा ओणृधातोर्णुलन्तादिच्छाक्यजन्तात्सनि उवोणकीयषतीत्याद्यर्थमावश्यकमिति वाच्यम्। षाष्ठप्रथमाह्निकान्तस्थभाष्यप्रामाण्येन तेषामनभिधानात्। अन्त्ये द्वितीयद्विर्वचनस्य सत्त्वेन त्वदुक्तप्रयोगस्य दुर्लभत्वात्। एवं सम्पूर्णसूत्रस्य ज्ञापकता युक्ता।

न च 'लक्ष्ये लक्षणस्य' इति न्यायात्कथं गुणवृद्ध्योः पुनः प्रवृत्तिरिति वाच्यम्, 'आगन्तूनामन्ते निवेशः' इति न्यायेनोत्तरखण्डस्य षाष्ठद्वित्वनिष्पन्नत्वादतिरिक्तत्वेनादोषात्। न च द्वित्वनिष्पन्नस्यातिरिक्तत्वे 'प्रतीषिषति' इत्यादावुत्तरखण्डस्य प्रत्ययत्वाभावादित्वषत्वादीनामनुपपत्तिरिति

वाच्यम् । स्वरूपतो भेदेऽपि पूर्वखण्डीयतत्तद्धर्मविशिष्टस्यैव सजातीयस्योत्तरखण्डस्य द्वित्वनिष्पन्नत्वाभ्युपगमेनादोषादिति दिक् ।

'अन्तरङ्गत्वात्' इति । यद्यपि प्रयोगक्रमाधीनपूर्वोपस्थितनिमित्तकत्वरूपमन्तरङ्गत्वं यथा सवर्णदीर्घस्य तथा द्वित्वप्रवृत्तिप्राक्कालिकनिमित्तोपस्थितिमादाय गुणवृद्धयोरपि प्रक्रियाक्रमाधीनपूर्वोपस्थितनिमित्तकत्वरूपमन्तरङ्गत्वं सुवचम्, तथापि वटकनिमित्तकत्वरूपमन्तरङ्गत्वं सवर्णदीर्घस्यैव । तच्च पूर्वोपस्थितनिमित्तकत्वरूपादन्तरङ्गत्वात्प्रबलमित्यभिप्रायः ।

'उः' इत्येव ब्रूयात्' इति । ननु 'कटीवी' इत्यत्र प्रश्लिष्टादिण्धातोर्वा थलि 'इयेथ' इत्यत्रेयङ्विधानाय सूत्रस्यावश्यकतया, निरुक्तन्यासेन तदसङ्ग्रहात्कथं सूत्रवैयर्थ्यमिति चेत् ? न; 'अत्यर्थमेतत् स्यात्' इति सूत्रसार्थक्यमाशङ्क्य 'नह्येकमुदाहरणम्' इति न्यायेन सम्पूर्णसूत्रस्य वैयर्थ्योपपादनपरं 'दाश्वान्' (६.१.१२) इति सूत्रस्थभाष्यग्राम्ाण्येन तादृशप्रयोगाणामनभिधानमित्याशयात् । केचित्तु लादेशानामपरनिमित्तकत्वप्रयुक्तादन्तरङ्गत्वात् 'द्विर्वचनेऽचि' (१.१.५९) इत्यस्यारम्भाच्च, प्रथमतः प्रवृत्तौ द्वित्वात्परत्वादिगन्तलक्षणे गुणे द्वित्वप्रवृत्तौ, ह्रस्वापेक्षयाऽन्तरङ्गत्वादयादेशे, तादृशप्रयोगस्यैवासम्भवः, वार्णपरिभाषा तु नेदानीमस्तीत्याहुः ।

ननु 'उः' इति न्यासे 'अङ्गस्य' (६.४.१), इत्यनेन लक्ष्यानुरोधाद्वैयधिकरण्यमाश्रित्य कथञ्चिदङ्गावयवस्य ऋकारस्याच्परकस्येयङित्यर्थाभ्युपगमेऽपि 'अर्तिपिपर्त्योश्च' (७.४.७७) इतीत्वे, ऋकाराभावात् 'इयर्ति' इत्यादावियङादेशो न स्यात् । 'कर्त्रा' इत्यादौ च तत्प्रवृत्तिः स्यादत आह—'य्वोरित्यनुवर्तते' इति । उकारानुवृत्तेरनुपयोगादेकादेशे स्वरितत्वप्रतिज्ञानाच्चेकारोऽनुवर्तत इत्याशयः ।

नन्वङ्गावयवस्य ऋकारस्य य इकारः इत्यर्थे सम्बन्धान्तरस्यासत्त्वात्, स्थानसम्बन्धस्य न्याय्यत्वाच्च ऋकारस्थानिकस्येकारस्यैत्यर्थस्य पर्यवसन्नतया 'इयर्ति' इत्यादेः सिद्धावपि 'अरियर्ति' इत्यादेरसिद्धिरत आह—'साहचर्यात्' इत्यादि । 'व्याख्यानाच्च' इति । सूत्रान्तरसाहचर्यस्या-

समञ्चसत्वमभिप्रेत्य हेत्वन्तरोल्लेखः। व्याख्यानञ्च 'अचि श्नुधातुभ्रु-वाम्' (६.४.७७) इत्यतोऽनुवर्तमानधातुग्रहणमूलकं द्रष्टव्यम्।

[1]'अर्तेरिकारस्य' इति। धातुसंज्ञावता ऋकारस्येत्यर्थे हि 'उः' इत्यवयवषष्ठी सम्पद्यत इति भावः। 'षाष्ठप्रथमाह्निकान्तस्थभाष्य' इति। इदमधस्तादुक्तं 'दाश्वान्' (६.१.१२) इति सूत्रस्थमित्यनुसन्धेयम्। 'अनभिधानात्' इति। ए ऐ ओ औ शब्देभ्य आचारक्विपोऽनभिधानं 'वदव्रज' (७.२.३) इति सूत्रभाष्ये स्पष्टम्। तत्र हि—'अतो लरान्तस्य' (७.२.२) इति सूत्राददृग्रहणमनुवर्त्य, वदव्रज्योरकारस्य अचश्च वृद्धिरित्येव सिद्धे, हल्ग्रहणं जाग्निग्रहणार्थम्। तेन 'अराड्क्षीत्' इत्यादिसिद्धिरित्युक्त्वा तत्राजन्तस्येत्यर्थवारणाय हल्ग्रहणमित्याशङ्क्य अदन्ते लोपेन दीर्घान्ते फलाभावेन इगन्ते सिचि वृद्धिरित्यतः सिद्धत्वेन सन्व्यक्षरान्तस्य धातोरभावेन च, फलाभावादजन्तस्येति नार्थ इत्युक्तम्।

यद्यपि भाष्ये यदयम् 'अभ्यासस्यासवर्णं (६.४.७८) इत्यसवर्णग्रहणं करोतीति ग्रन्थेन, असवर्णग्रहणस्यैव ज्ञापकता लभ्यते, तथापि 'न ह्यन्तरेण गुणवृद्धी असवर्णपरोऽभ्यासो भवति' इति तदुपपादनग्रन्थेन सम्पूर्णसूत्रस्यैव ज्ञापकता लभ्यते। अग्रेऽपि नैतदस्ति ज्ञापकम्, अर्त्यर्थमेतत्स्यादित्यनेन सूत्रसार्थक्यमेव दर्शितम्। असवर्णग्रहणस्यैव ज्ञापकत्वे तद्व्याचृत्तिप्रदर्शनेन तत्सार्थक्यमेव दर्शितं स्यात्।

न च 'अकृतव्यूह' (प. ५६) परिभाषया 'इयाय' 'इयेष' इत्यादौ सवर्णदीर्घाप्तिः, यदि दीर्घो न स्यात्तर्हि गुणः स्यादिति सम्भावनायाः सत्त्वेन परिभाषाप्रवृत्तेः सूपपादत्वात्, कथं सम्पूर्णसूत्रस्य ज्ञापकतेति वाच्यम्। तस्या असत्त्वात्; सत्त्वे वा

---

१. अर्तेरिवर्णस्य—मूलम्।

एतद्भाष्यप्रामाण्येन यत्रान्तरङ्गकार्यप्रवृत्तियोग्यकालोत्तरमेव तन्निमित्तविनाशकबहिरङ्गविधेः प्राप्तिः, तत्रैवैतत्परिभाषाप्रवृत्तिस्वीकाराच्च ।

न चान्तरङ्गत्वाद्दीर्घऽपि 'इयाय' इत्यादौ पूर्वान्तत्वेनाभ्यासत्वादिवर्णत्वाच्च, णल्यसवर्णे इयङ्विधानेन सूत्रं चरितार्थम् । न च 'अचि श्नु' (६.४.७७) इत्यनेन सिद्धिः, वृद्धिबाधनार्थत्वादिति वाच्यम् । प्रत्यासत्त्या असवर्णपदेन अभ्यासोत्तरखण्डसम्बन्ध्यसवर्णाच एव ग्रहणात्, शास्त्रबाधकल्पनापेक्षया परिभाषाज्ञापकत्वस्यैवौचित्याच्चेत्याहुः ।

लक्षणैकचक्षुष्काणामनभिधानं न सदुत्तरमत आह—'अन्त्ये' इति । 'दुर्लभत्वात्' इति । 'यथेष्टं नामधातुषु' (वा. ६९९) इत्यनेन प्रथमस्य, द्वितीयस्य, तृतीयस्य वा शास्त्रेण द्विर्वचनं प्रति कार्यित्वेनोद्दिष्टानामेकाचामन्यतमस्य द्विर्वचनमैच्छिकमिति प्रतिपाद्यते, न त्वजादेरपि प्रथमस्यैकाचो द्विर्वचनमपूर्वतया प्रतिपाद्यत इत्याशयः । आद्येऽपि । 'अनृच्छः' (३.१.३६) इति पर्युदासेनेजादेरित्यस्यौपदेशिकधातुविषयत्वेऽपि 'कास्प्रत्ययात्' (३.१.३९) इत्याम् दुर्वारः ।

'कास्यनेकाज्ग्रहणं कर्तव्यम्' (वा. २०५) इत्यस्योपक्रमस्वारस्येन न प्रत्ययग्रहणापनयने तात्पर्यं, किन्तु सत्येव प्रत्ययग्रहणे अनेकाज्ग्रहणं-कर्तव्यमित्यभिप्राय इति नव्यमतसिद्धत्वादित्याहुः । ओणतेः 'उवोण' इति तु छान्दसमन्त्रत्वादामभावः । 'तन्वादीनां बहुलं छन्दसि' इत्येव तत्रोवङ् सिद्ध इति न तदर्थमपीदं सूत्रमिति स्पष्टं 'दाश्वान्' (६.१.१२) इति सूत्रे भाष्यकैयटयोः ।

'प्रवृत्तियोग्यकालोत्तरम्' इति । अन्तरङ्गकार्यप्रवृत्त्युत्तरमिति तु नोक्तम् । अकृतव्यूहपरिभाषाया अन्तरङ्गकार्यप्रवृत्तिप्रतिबन्धकतया तद्विषये प्रथममन्तरङ्गकार्यप्रवृत्तेरयुक्तत्वात् । 'शास्त्रबाधकल्पना' इति । णलकारा-

त्मकासवर्णाज्ग्रहणे हि 'अचो ञ्णिति' (७.२.११५) इत्येतच्छास्त्रबाधकल्पना गले पतीति भावः।

'आहुः' इति। केचित्तु सवर्णदीर्घोत्तरमेकादेशस्थानिवद्भावादभ्यासेकारस्य णलकारात्मकासवर्णाच्परत्वाभावेनैव तत्रेयङादेशस्याप्रवृत्तिः। 'अचः परस्मिन्' (१.१.५७) इति हि यत्किञ्चित्स्थान्यपेक्षया पूर्वत्वेन दृष्टस्यापि विधौ प्रवर्तते। अत एव 'कृदतिङ' (३.१.९३) इति सूत्रे भाष्ये अतिङ्ग्रहणाभावे धातुग्रहणानुवृत्त्या शबन्तस्य धातुत्वाभावात्तुगागमनिवृत्तावपि 'चिकीर्षति' इत्यादौ शबेकादेशस्य पूर्वान्तवत्त्वेन धातुत्वस्य सुवचतया तुगागमो दुर्वार इत्याशङ्क्य एकादेशस्य 'अचः परस्मिन्' (१.१.५७) इति स्थानिवद्भावेन शपा व्यवधानात्तिङ्रूपकृत्प्रत्ययपरत्वाभावात्तदप्रवृत्तिरिति समाहितम्। परत्वादन्तवद्भावः स्थानिवद्भावस्य प्रतिबन्धकः स्यादिति तु न शङ्क्यम्। भाष्यप्रामाण्यदेतद्विषये पूर्वविप्रतिषेधस्याभीष्टत्वादिति स्पष्टं कैयट इति वदन्ति।

ननु सत्यामस्यां परिभाषायां 'गाङ् गतौ' (धा. पा. १५०) इत्यस्माल्लटश्शातामादौ शपि सवर्णदीर्घात्पूर्वं 'आतो ङितः' (७.२.८१) इत्यस्य प्रवृत्तौ 'गाते' इत्याद्यसिद्धिः। ततश्चास्य धातोरादादिकत्वे, भौवादिकत्वे वा नास्ति फलविशेष इति सिद्धान्तव्याकोपः। तथा 'यया तया' इत्यादौ त्यादाद्यत्वोत्तरं टापः पूर्वमिनाद्यादेशापत्तिरत आह—

सा चेयं धर्मिग्राहकमानादाङ्णवार्णयोः समानकार्यित्वे एव। यत्तु समाननिमित्तकत्वरूपसमानाश्रय एवैषेति, तन्न; ज्ञापितेऽपि 'इयाय, इयेष' इत्याद्यसिद्धेः सूत्रे वैयर्थ्यस्य तदवस्थत्वाच्च। 'स्योनः' इत्यत्र तु वक्ष्यमाणरीत्या अनित्यत्वादप्रवृत्तौ गुणादन्तरङ्गत्वाद्यणादेशः। न चैवमपि 'इयाय' इत्यादौ इयङ् दुर्लभः। तत्र कर्त्तव्ये वृद्ध्यादेः स्थानिवत्त्वेन असवर्ण इति प्रतिषेधादिति वाच्यम्। सूत्रारम्भसामर्थ्यादेव स्थानिवत्त्वाप्रवृत्तेः।

'सा चेयम्' इति । 'समानकार्यित्व एव' इति । कार्यित्वमागमादेशसाधारणम् । समानस्थानिकत्व एवेत्यन्यत्रापि स्थानिपदं कार्यिमात्रोपलक्षणम् । अतो न 'वारिणी' इत्यादौ सवर्णदीर्घात्पूर्वं नुम्प्रवृत्तेर्बाधो, नापि ग्रन्थकर्तुः परस्परविरोध इति बोध्यम् । अत एव 'च्छ्वोः' (६.४.१९) इति सुतङ्निर्देशस्य प्रकृतपरिभाषानित्यत्वज्ञापकतापरवक्ष्यमाणग्रन्थसङ्गतिः । नन्वेवं गाङो भौवादिकत्वे लटः शानचि शवेकादेशात्पूर्वं 'आने मुक्' (७.२.८२) इत्यस्य प्रवृत्तौ 'गामान' इति स्यात् । आदादिकत्वे तु शपो लुकि तदप्रवृत्त्या 'गान' इत्येव भविष्यतीति फलवैलक्षण्यापत्तिरिति चेत् ? न; वक्ष्यमाणेन परिभाषाया अनित्यत्वेन प्रकृतविषये तदप्रवृत्तौ मुगागमात्पूर्वमन्तरङ्गत्वादेकादेशे वैलक्षण्यस्य दुर्वचत्वात् ।

नं चैवमावश्यकेन वक्ष्यमाणपरिभाषाया अनित्यत्वेनैव निर्वाहे समानकार्यितामात्रविषयत्वकल्पनाप्रयासो विफल एवेति वाच्यम् । तादृशीकल्पनाया अप्यनित्यत्वमूलकतयैवाभ्युपगमेनादोषात् । 'षड्भिश्चिति' (९.१.९९) इतिसूत्रभाष्यबलेनानुगमसम्भवे तत्परित्यागस्यानौचित्याच्च । किञ्च भावकार्यविषयकत्वमप्यस्याः परिभाषाया अभ्येयेपेयम् । अत एव 'मघोनः' इत्यादौ 'सम्प्रसारणाच्च' (६.१.१०८) इति पूर्वरूपात्पूर्वं 'अल्लोपोऽनः' (६.४.१३४) इत्यस्याप्रवृत्तिः । अन्यथा विभक्तेरुदात्तनिवृत्तिस्वरापत्तिरित्यादिं स्वयमूहनीयमिति दिक् ।

'वृद्धयादेः स्थानिवत्त्वेन' इति । ननु 'इयाय' इत्यादाविकारादेशभूते वृद्धयादौ स्थानिवद्भावेनेकारबुद्धौ भवतु सवर्णत्वम्, आयादौ वृद्धयाद्यादेशे तस्य दुर्निरूपतया कथं 'असवर्णे' (६.४.७८) इति प्रतिषेधः । न च वृद्धयादौ स्थानिनि 'अचः परस्मिन्' (१.१.५७) इति शास्त्रेणातिदिष्टस्य सवर्णत्वस्यं पुनरायादौ तदादेशे तेनैवातिदेशे इति वाच्यम् । 'लक्ष्ये लक्षणस्य' इति न्यायेनैकस्मिन् लक्ष्ये पुनः पुनरतिदेशशास्त्रस्यैकस्य प्रवृत्तेरयोगात् ।

अत एव 'एतिका' इत्यादौ 'प्रत्ययस्थात्' (७.३.४४) इतीत्वं सिद्ध्यति । अन्यथा टावेकादेशस्य स्थानिवद्भावेन त्यदाद्यकारनिष्पन्नपर-

रूपात्मकस्य पुनः स्थानिवद्भावेनाकारद्वयव्यवधानादाप्परकत्वाभाव इति तदनापत्तिर्दुर्वारा। सूत्रन्तु 'सर्विका' इत्यादौ चरितार्थमिति स्पष्टमुद्योतशेखरयोरिति चेत्? न; स्थानिवद्भावप्रकरणे स्थानिस्थानिनोऽपि स्थानित्वेन ग्रहणात् स्वस्थानिभूतवृद्ध्यादिस्थानिगतस्य सवर्णत्वस्य वृद्ध्याद्यादेशे आयादावतिदेश इत्याशयात्।

'एतिका' इत्यत्रा तु टाबेकादेशे स्थानिभूतपररूपस्थानिन्यकारे पूर्वस्मिन् परस्मिन्वा विद्यमानस्यैकवर्णव्यवधानस्यैवातिदेश इति न क्षतिः। अतिदेशस्य पुनः प्रवृत्तौ टाबेकादेशस्थानिवत्त्वेनैकं, पररूपस्यानिवत्त्वेनान्यदिति वर्णद्वयव्यवधानं स्पष्टमेव। अत एव 'यूनः' इत्यादौ सवर्णदीर्घोत्तरं 'न सम्प्रसारणे' (६.१.३७) इति निषेधप्रवृत्तिः। अन्यथा सम्प्रसारणस्थानिकपूर्वरूपादेशस्य सवर्णदीर्घस्य स्थानिवत्त्वेन सम्प्रसारणत्वायोगान्निषेधप्रवृत्तेर्दौर्लभ्यमेव। 'यूनस्तिः' (४.१.७७) इति निर्देशश्चात्रार्थे बीजमिति वदन्ति। केचित्तु निर्देशादस्मादतिदेशविषये 'लक्ष्ये लक्षणस्य' इति न्यायस्याप्रवृत्तिरित्येव ज्ञाप्यताम्। 'एतिका' इत्यादौ तु 'न यासयोः' (७.३.४९) इति निषेधात्, इत्वविधावविशेषेणैकादेशस्य स्थानिवत्त्वाभावकल्पनेनैव निर्वाहः। अत एव यन्निमित्तवैकल्यादुपदेशाप्रवृत्तिस्तादृशनिमित्ताभावेऽपि कार्यमतिदिश्यते प्राधान्यादित्येवमात्मकं कार्यातिदेशपक्षमभ्युपेत्याभावातिदेशेऽपि न क्षतिः। अन्यथा टाबेकादेशस्थानिभूतपररूपस्थानिन्यकारे सत्यकारान्तरस्यापि सद्भावाद्वर्णद्वयव्यवधानेनाप्रवर्तमानस्येत्वविधेः 'अचः परस्मिन्' (१.१.५७) इत्यनेन तत्र निवृत्तौ स्यादेव दोष इत्याहुः।

अथायं स्थानिवद्भावो निमित्तादेशादियङादेर्निवर्तकः? उत कार्यातिदेशाद्वा? नाद्यः; आयादौ विशिष्टे सवर्णत्वातिदेशेऽपि तदवयवीभूतावर्णगतमसवर्णत्वमाश्रित्य, इयङादेशस्य सुवचत्वात्। अतिदिश्यमानधर्मो हि स्वसामानाधिकरण्येनैव स्वविरुद्धधर्मनिवर्तकः, न त्वन्यथा। अत एव 'अचः परस्मिन्' (१.१.५७) इति सूत्रे भाष्ये 'परस्मिन्' इत्यस्य 'युवज्ञानिः' इत्यत्र यलोपोपपत्तिः प्रयोजनमित्युपन्यस्य, स्वाश्रयमत्र बलत्वं भविष्यतीत्यनेन निङादेशसम्बन्धिनकारनिबन्धनो लोपः सत्यपि स्थानिवत्त्वे

निर्बाध इति नेदं प्रयोजनमित्युक्तम् । नान्त्यः; अभावात्मकोऽपि कार्यादेशः स्थानिनिमित्तकत्वेन यन्न भवति, तदादेशनिमित्तकत्वेनापि न भवतीत्येवंरूपतया विशिष्टादेशनिमित्तकत्वेन प्राप्तस्यैव निवर्तको न तु तदवयवनिमित्तकत्वेन प्रसक्तस्य । अत एव 'युवजानिः' इत्यादावभावादेशपक्षेऽपि न प्रयोजनमित्याशयेन योऽत्रादेशो नासावाश्रीयते यश्चाश्रीयते नासावादेश इत्युक्तं तत्रैव भाष्ये । तस्मादयुक्तमेवेदं स्थानिवत्त्वापादनमिति चेदत्राहुः—इयङादिविधौ 'असवर्णे' (६.४.७८) इति प्रसज्यप्रतिषेधः, न तु पर्युदासः; लक्ष्यानुरोधात् । अत एव 'इयेष' इत्यादावियङ्सिद्धिः । अन्यथा 'इयाय' इत्यादौ चरितार्थस्येयङादेशस्य स्थानिवद्भावेन सवर्णत्वातिदेशादप्रवृत्तिरेव स्यात् । वक्ष्यमाणरीत्या स्थानिवत्त्वनिषेधज्ञापने तु न कश्चिद्दोष इति ।

एतच्च सामान्यापेक्षम् । अभ्यासकार्ये तदुत्तरखण्डादेशस्य तत्कार्यप्रतिबन्धकीभूतं स्थानिवत्त्वं नेति । अत एव 'अरति' इत्यादौ यणादेशस्य स्थानिवत्त्वात् अभ्यासस्य 'ढ्रलोपे' (६.३.१११) इति दीर्घो दुर्लभ इत्यपास्तम् । दीर्घविधौ तन्निषेधाच्च ।

'एतच्च सामान्यापेक्षम्' इति । असति बाधके प्रमाणानां सामान्ये पक्षपातादिति भावः । 'तदुत्तरखण्डादेशस्य' इति । एतत्फल 'वव्रश्च' इत्यत्र स्थानिवद्भावेनोरदृत्वस्य सम्प्रसारणतया वकारस्य सम्प्रसारणाभावः । यदि तु 'न सम्प्रसारणे' (६.१.३७) इति निषेधोऽपि शास्त्रबोधितत्वात्कार्यमेवेत्युच्यते, तदा प्रयोजनान्तरमन्वेष्यम् । 'तत्कार्यप्रतिबन्धकीभूतम्' इति । कार्यञ्चोत्तरखण्डनिमित्तकमेव, प्रत्यासत्तेः । तेन 'यातिः' इत्यत्राभ्यासखण्डीयातो लोपे यङ्निमित्तके तदुत्तरखण्डादेशस्यातो लोपस्य स्थानिवद्भावसिद्धिः ।

'दीर्घविधौ तन्निषेधाच्च' इति । ननु स्वरदीर्घयलोपेषु लोपाजादेश एव, न स्थानिवदिति नियमात्कथमिह स्थानिवत्त्वनिषेधः ? न च फलाभावात् दीर्घविषयतादृशनियमस्यानाश्रयणमिति वाच्यम् । 'विव्यतुः'

इत्यादौ 'उपधायाञ्च' (८.२.७८) इति प्राप्तदीर्घनिवर्त्तकस्थानिवद्भाव-सम्पादकतया फलस्य सुवचत्वादिति चेत्? न; द्विरुक्तेषूत्तरखण्डस्यैव धातुत्वेन प्रत्यासत्त्या हेलपरकधातूपधाभूतरेफवकारपूर्वस्य धातोरवयवस्येको विधीयमानस्य दीर्घस्य 'विव्यतुः' इत्यादावभ्यासखण्डीयेकारे धात्ववयव-त्वाभाववति सत्यपि स्थानिवद्भावनिषेधे प्रवृत्त्ययोगेन दीर्घांशे तादृशनियम-स्यानुपयोगादनाश्रयणमित्याशयात्। युक्तञ्चैतत्; अन्यथा न पदान्त (१.१.५८) सूत्रप्राप्तस्थानिवद्भावनिषेधनस्य तेन नियमेन वारणेऽपि 'पूर्वत्रासिद्धीये न स्थानिवत्' (जै. प. वृ. ४८) इत्यनेन प्राप्तस्य निषेधस्य दुर्वारतया स्यादेव 'विव्यतुः' इत्यादावनिष्टप्रसङ्गः।

'अरिरियात्' इत्यत्रा स्थानिवत्त्वेन इयङ् भवत्येव, तस्य स्था-निवत्त्वस्याभ्यासकार्यमतिबन्धकत्वाभावात्। इयञ्च 'अङ्गसंबन्धि-न्याङ्ग एव' इति 'स्वरितो वा' (८.२.६) इति सूत्रे भाष्ये। तत्र हि 'कुमार्यै' इत्यादौ यणुत्तरमाङुक्तः। इयञ्चानित्यो 'च्छ्वोः' (६.३.१९) इति सतुकनिर्देशात्। अन्यथोऽन्तरङ्गत्वात्पूर्वं तुक-शादेशे, तुकोऽप्राप्त्या तद्वैयर्थ्यं स्पष्टमेवेत्यन्यत्र विस्तरः ॥५५॥

न च सामर्थ्यादस्यापि निषेधस्य तादृशनियमो निवर्त्तक इति वाच्यम्। तदपेक्षया प्रत्यासत्तिमूलकेन निरुक्तव्याख्यानेन दीर्घाप्रवृत्तिकल्प-नायां एव संमञ्जसत्वात्। अभ्यासावयवस्य परम्परया धातुसम्बन्धित्वेऽपि न धात्ववयवत्वमिति स्पष्टमुद्योतशेखरयोः। प्रत्यासत्तिवशादेव परिपूर्वाद्विधेः कविधौ सर्वत्र 'प्रसारणिभ्यो डः' (३.२.३ वा. १) इति डप्रत्ययेन टिलोपे दीर्घपरिहारः परिव्य इत्यादाविति प्राहुः। प्रतिबध्यमानकार्यकुक्षावभ्यास-निवेशप्रयोजनन्तु 'निन्यतुः' इत्यादावुत्तरखण्डीयनकारस्य 'अनिदिताम्' (६.४.२४) इति लोपाभाव इति बोध्यम्।

'अरिरियात्' इति। अत्र परत्वाद्रिङादेशे पुनःप्रसङ्गविज्ञानादि-यङादेशः। यद्यपि क्रमिकान्वाख्याने पूर्वोपस्थितनिमित्तकत्वलक्षणमन्त-

रङ्गत्वमियङादेशस्य सुवचम्, तथापि पदावधिकेऽन्वाख्याने रिङ एव तथाविधमन्तरङ्गत्वमिति पक्षयोरवैलक्षण्यायानित्या बहिरङ्गपरिभाषाऽत्र न प्रवर्तत इति शब्देन्दुशेखरस्वरसः। वस्तुतः पदावधिकमेवान्वाख्यानमाश्रित्य प्रागुक्तेनान्तरङ्गत्वेन पूर्वं रिङादेशः, पश्चादियङादेश इत्याशयः।

यदि च पक्षयोर्लक्ष्यानुरोधेन व्यवस्थितत्वादिह क्रमिकमेवान्वाख्यानमाश्रित्य, कालिकेन च तथाविधेनान्तरङ्गत्वेन प्रथममियङादेश इत्युच्यते, तदा ज्ञाप्याभावीयप्रतियोगिन्यभ्यासकार्यप्रतिबन्धकतानिवेशस्य प्रयोजनमरिष्यतीति बोध्यम्। न च वर्णमात्राश्रयत्वेन यणादेशस्येव प्रागुक्तप्रकारेणेयङादेशस्याप्यन्तरङ्गत्वादुभयोरन्तरङ्गयोः परत्वेन व्यवस्थाया औचित्यात्प्रथममियङादेशे तत्रापि फलं दुर्निरूपमिति वाच्यम्। परत्वापेक्षया बलीयसा नित्यत्वेन पूर्वं यण एव प्रवृत्त्या फलस्य सुवचत्वात्। रिङो बहिरङ्गासिद्धत्वेन वलपरत्वाभावान्नैतादृशेषु यलोपप्रसक्तिरिति स्पष्टमन्यत्र।

यत्तु ज्ञाप्यकोटावत्र प्रतिबन्धकतानिवेशे 'कटीवी' इत्यत्र प्रश्लिष्टादिधातोर्लुटपतुसादिषूत्तरखण्डीयस्य 'एरनेकाचः' (६.४.८२) इति यणः स्थानिवत्त्वेन अच्त्वमाश्रित्य, पूर्वखण्डसम्बन्धिन इकारस्य 'इको यणचि' (६.१.७७) इति यणादेशप्रसङ्ग इत्याहुः, तदसत्; केचित्कारीयमतसिद्धस्य तादृशप्रश्लेषस्योपाध्यायानां मते स्वीकाराभावेनादोषात्। किञ्च 'ऋति ऋ वा' 'ऌति ऌ वा' (वा. ६९०, ६९१) इति वार्तिकविधेययोः सामानाधिकरण्येन दृष्टाया ईषत्स्पृष्टतायाः स्थानिवत्त्वेनातिदिष्टेनाच्त्वेन निवर्तयितुमशक्यतया सावर्ण्याभावादियङादेशस्यैव प्रसक्त्या यणापादनमयुक्तम्।

यदि च वक्ष्यमाणेन वार्णपरिभाषानित्यत्वेन यणापादनमित्युच्यते, तदा तथाविधेनानित्यत्वेन यणादेशं निवर्त्य, सवर्णदीर्घ, तत इयङादेश इत्यभ्युपगमे स्थानिवद्भावस्यैवाप्रसङ्ग इति कुतो नोच्यते। अतो नायमापत्तिविषय इति दिक्।

'अङ्गसम्बन्धिन्याङ्गः' इति। धर्मिग्राहकसाजात्यमत्र बीजम्। अङ्गसम्बन्धित्वमत्राङ्गोद्देश्यकत्वम्। उद्देश्यता चावयवद्वारा साक्षाद्वा,

ततो न ज्ञापकभूमिविरोधः । 'सतुककनिर्देशात्' इति । अङ्गकार्यप्रवृत्तिविषयतासम्भावनायामपि वार्णकार्यस्य पूर्वमप्रवृत्तिरित्यप्यनया परिभाषया बोध्यते । अत एव 'अध्यैयाताम्' इत्यादौ लावस्थायामटि लादेशोत्तरमियङादेशं प्रवर्तिष्यमाणमपेक्षते, न तु ततः पूर्वं 'आटश्च' (६.१.९०) इति वृद्धिरिति भावः । 'अन्यत्र विस्तरः' इति । सामान्यतोऽनेनानित्यत्वं ज्ञाप्यत इत्येव युक्तं समानस्थानिककार्यमात्रविषयकत्वमिति तु न युक्तं 'चञ्छम्यते' इत्यादौ तुकः पूर्वं नुगागमानापत्तेः । 'स्योनः' इत्यत्र लघूपधगुणात्पूर्वमन्तरङ्गयणादेशानापत्तेश्च । 'अङ्गसम्बान्धिन्याङ्गः' इत्यप्ययुक्तं 'कुले, दधिनी' इत्यादौ इयादेशात्पूर्वं वृद्धिसवर्णदीर्घयोरापत्तेः । इयादेशस्तु हलन्तेषु चरितार्थः । अनित्यत्वेनैवानिष्टवारणं युक्तमित्याहुः ॥९९॥

नन्वेवं 'सेदुषः' इत्यादौ क्वसोरन्तरङ्गत्वादिटि ततः सम्प्रसारणेऽपीटः श्रवणापत्तिरिति चेत् ? अत्र केचित् :

५६. अकृतव्यूहाः पाणिनीयाः ।

न कृतो व्यूहो विशिष्टनिश्चयः शास्त्रप्रवृत्तिविषयो यैरित्यर्थः । भाविनि निमित्तविनाशे इत्यध्याहारः । बहिरङ्गेणान्तरङ्गस्य निमित्तविनाशे पश्चात्सम्भावितेऽन्तरङ्गे नेति यावत् । अत्र च ज्ञापकं 'समर्थानां प्रथमाद्वा' (४.१.८२) इति सूत्रे 'समर्थानाम्' इति । तद्धि सूत्थितादिभ्यः कृतदीर्घेभ्यः प्रत्ययोत्पत्त्यर्थम् । अन्यथाऽन्तरङ्गत्वादीर्घे कृते एव प्रत्ययप्राप्त्या तद्व्यर्थता स्पष्टैव । तत्रा हि भाविन्याऽऽदिवृद्ध्या सवर्णाच्त्वविनाशः स्पष्ट एव । न चात्रैकादेशप्रवृत्तिसमये वृद्ध्यप्राप्त्या एकादेशे कृते आदेशे वृद्धेः प्राप्तावपि तन्निमित्तविनाशाभाव इति वाच्यम् । तद्द्वारैव निमित्तविनाशसत्त्वेनाक्षतेः ।

'नन्वेवम्' इति । यथा 'इयाय' इत्यादावन्तरङ्गत्वात्सवर्णदीर्घे

दोषः, तथा 'सेदुषः' इत्यादावन्तरङ्गत्वादिडागमे दोष इति दोषयोर्दृष्टान्त-दार्ष्टान्तिभावबोधनद्वारा तन्निवर्तकयोः परिभाषयोरपि सादृश्यबोधनेन सङ्गतिप्रदर्शनार्थमेवमित्युक्तिः। यत्तु 'एवम्' इत्यस्यान्तरङ्गपरिभाषायां सत्यामित्यर्थ इति, तच्चिन्त्यम्; सम्प्रसारणप्रवृत्तिप्रयोजकश्रसादुत्पत्तेः पूर्वमेव कालिकेनान्तरङ्गत्वेन प्रवर्त्तमानस्य क्वसोरिडागमस्यान्तरङ्गपरिभाषाविषयत्वाभावेनासत्यामपि तस्यां दोषघौव्यात्। अन्तरङ्गं हि समकालप्राप्तमुत्तरकालप्राप्तमेव वा तद्विषयः। पदावधिकेऽन्वाख्याने प्रतिपदोक्तत्वलक्षणमन्तरङ्गत्वं सम्प्रसारणस्यैव स्वीकृत्य परिभाषेषा प्रत्याख्यास्यते, ततो न तदनुरोधेनाप्यव्रतरणग्रन्थस्योक्तार्थवर्णनं युज्यत इति विभावनीयम्।

'अध्याहारः' इति। अयञ्च सामर्थ्यालभ्यते। अन्यथा ह्येनामाश्रित्य शास्त्रवैयर्थ्यप्रसङ्गः। 'पश्चात्' इति। समानाधिकरणं विशेषणमिदमुत्तरकालिके इति तदर्थः। 'अच्त्वविनाशः' इति। 'अल्पाच्तरम्' (२.२.३४) इति निर्देशेन वृत्तिघटकाच्पदीयचकारगतचुत्वप्रयुक्तकार्याभावो ज्ञाप्यते। एकशेषस्य वृत्तित्वाभावाच्च न 'पस्पशास्थेनाक्षु' इति भाष्यप्रयोगेण विरोधः। यद्वा निरुक्तनिर्देशेन प्रत्यहारात्मकाच्पदीयचकारस्य सामान्यत एव चुत्वप्रयुक्तकार्यसमर्पकत्वाभावो ज्ञाप्यते। अत एव 'अज्झरव्यवहिताः' इति संयोगसंज्ञासूत्रस्थसकलग्रन्थकृद्व्यवहारोपपत्तिः। पस्पशास्थे भाष्यप्रयोगे तु भाष्यकाराणमैच्छिकं कुत्वम्।

यत्तु प्रकृतनिर्देशबलात् 'न पदान्तात्' (८.४.४२) इत्यत्र चोरित्यनुवर्त्तनेनाच्पदस्थचकारगतचुत्वनिमित्तकोऽन्यस्य श्चुत्वाभाव इति; तदयुक्तम्; 'प्रश्च' इति सूत्रे 'धातोः' इत्यनुवर्तनेन छशान्त्योरपि धात्वोरेव षत्वमिति मते 'निच्छ्रु' इत्यत्राभीष्टस्य श्चुत्वस्य दौर्लभ्यापत्तेरिति वदन्ति।

'तद्द्वारैव' इति। यथा 'श्रीपाय' इत्यत्र 'सुपि च' (७.३.१०२) इति दीर्घप्रवृत्तौ निमित्तस्यावर्णत्वस्यादेशेऽनुवर्तमानस्यातो लोपप्रयुक्तो विघातः सन्निपातपरिभाषाप्रवृत्तिनिमित्तं तद्वद्दीर्घनिमित्तस्याक्त्वस्यादेशेऽनुवर्त्तमानस्य बहिरङ्गत्वबुद्धिप्रयुक्तो विनाशः प्रकृतपरिभाषाप्रवृत्तौ निमित्तं स्यादतो न 'समर्थानां'ग्रहणस्य स्वांशे चारितार्थ्यविरहशङ्केत्याशयः।

न च सौत्थितौ बहिरङ्गाया वृद्धेरसिद्धत्वान्न तन्निमित्त-विनाश इति वाच्यम्। समर्थग्रहणेनैतद्विषये तस्या अप्रवृत्तेरपि ज्ञापनात्। यत्तु समर्थग्रहणेनान्तरङ्गपरिभाषाया अनित्यत्वमेव ज्ञाप्यत इति, तन्न ; असिद्धपरिभाषाया समकालप्राप्तबहिरङ्गस्य पूर्वं जातबहिरङ्गस्य वा अन्तरङ्गे कार्ये कर्तव्येऽसिद्धत्वं बोध्यते, न तु जातेऽन्तरङ्गे तस्य तत्त्वं बोध्यते, मानाभावात्फलाभावाच्च। एवञ्च सौत्थितावेकादेशस्य परिभाषासाध्यत्वाभावेन तदनित्य-त्वज्ञापनासम्भवात्। 'अन्तरङ्गानपि विधीन्' (प. ५२) इत्यादेर-प्यस्यामेवान्तर्भावः।

'बहिरङ्गाया वृद्धेरसिद्धत्वात्' इति। ननु जातस्य समकालाप्राप्तस्य वा बहिरङ्गस्यासिद्धत्वं बहिरङ्गपरिभाषया बोध्यते इत्यनुपदमेव वक्ष्यमाण-त्वात्कथमिह वृद्धेरसिद्धत्वमिति चेत्? अत्राहुः; 'जातस्य समकालप्राप्तस्यैव वा' इति नापूर्वोऽर्थः। किन्त्वन्तरङ्गप्रवृत्तिवेलायां प्रापकतया प्रतिबन्ध-कतया वा यदुपस्थितं बहिरङ्गं तस्यैवासिद्धत्वं, नानुपस्थितस्य मानाभावा-दिति न्यायलब्धोऽयमर्थः। ततश्चान्तरङ्गनिमित्तविनाशलक्षणस्य प्रकृत-परिभाषाप्रवृत्तिकारणस्य निष्पादकत्वादिह परिभाषाद्वारेणान्तरङ्गप्रवृत्तिवेलायां बहिरङ्गा वृद्धिरुपस्थितैवेति युक्तमन्तरङ्गदृष्ट्या तदसिद्धत्वम्।

यद्वा प्रकृतपरिभाषायाः प्रवृत्तिहेतोरन्तरङ्गविनाशस्य निष्पादकत्वात्त-त्प्रयोजकत्वेनोपस्थिताया बहिरङ्गवृद्धेः परिभाषामपेक्ष्यासिद्धत्वमिहाभिधि-त्सितम्। परिभाषा ह्यन्तरङ्गस्य निवर्तकत्वात्तन्निमित्तकत्वेनान्तरङ्गा। एतेन स्वकीयबुद्धिगोचरस्यैव बहिरङ्गप्रयुक्तान्तरङ्गनिमित्तविनाशस्य परिभा-षाप्रवृत्तिप्रयोजकत्वाभ्युपगमादन्तरङ्गदृष्ट्या बहिरङ्गस्यासिद्धत्वेऽपि स्वदृष्ट्या-ऽसिद्धत्वात्प्रवर्त्तत एव परिभाषेति नायमाशङ्काविषय इति निरस्तमित्युपा-ध्यायानुयायिनः।

'न तु जाते' इति। एतत्परिभाषाया अभावे जनिष्यमाणबहिरङ्ग-प्रवृत्तिवेलायां कथमप्यनुपस्थितत्वादित्याशयः। 'मानाभावात्' इति। ननु समर्थानांग्रहणेनैव जनिष्यमाणबहिरङ्गस्यासिद्धत्वं ज्ञाप्यते परिभाषानित्यत्व-ज्ञापनेऽप्युक्तार्थज्ञापनमन्तरेण ज्ञापकसार्थक्यायोगात् प्रकृतपरिभाषाज्ञापकता-वादिनामपि जातसमकालप्राप्तयोरेव बहिरङ्गयोरसिद्धत्वमित्यंशः, स्वांशे चारितार्थ्याय ज्ञापनीय एवेति न विशेषः। अयमंशः प्रत्यासत्तिन्यायानु-गृहीत इति चेत्? सोऽपि व्याप्तिन्यायानुगृहीत एवेति कुतो विशेष इत्यत आह—'फलाभावात्' इति। न च 'उभये देवमनुष्याः' इत्यत्र निमित्ता-न्तरानपेक्षणेन प्रथमं प्रवर्तमानां नित्यसर्वनामसंज्ञामाश्रीय तयबन्तत्वप्रयुक्त-जस्निमित्तकवैकल्पिकसर्वनामसंज्ञायाः पश्चात्प्रवर्तमानाया बहिरङ्गत्वादप्रवृत्तिः प्रयोजनमिति वाच्यम्। तयादेशे उभयप्रतिषेध इति स्थानिवत्सूत्रस्थवार्ति-कप्रत्याख्यानपरभाष्यकारोक्तिमनुसृत्य उभयशब्दप्रवृत्तिकस्यायचः प्रत्यया-न्तरत्वकल्पनयैव वैकल्पिकसर्वनामसंज्ञावारणसम्भवेन जनिष्यमाणबहिरङ्गा-सिद्धत्वप्रयोजनस्य तत्र दुर्वचत्वात्। किञ्च नात्र बहिरङ्गत्वेन निर्वाहः। विकल्पस्योभयशब्दांशे पाक्षिकनिषेधमात्रसम्पादकतया 'निषेधाश्च बलीयांसः' इति न्यायेन नित्यापेक्षया बहिरङ्गस्यापि विकल्पस्यैव प्राबल्यात्।

अस्तु वा 'प्रथमचरम' (१.१.३३) इत्यत्र 'जसि' इत्यस्य विषय-सप्तम्यन्ततया प्रातिपदिकसंज्ञासमनन्तरमेव तदीयविषयतायाः सुवचत्वेन यथोद्देशेऽपि नित्यवैकल्पिकसंज्ञयोर्युगपदेव प्राप्तिरिति समकालप्राप्तबहिरङ्गा-सिद्धत्वेनोपपत्तौ विफल एवायमुपजनिष्यमाणबहिरङ्गासिद्धत्वकल्पनाप्रयास इति दिक्। 'ज्ञापनासम्भवात्' इति। अन्तरङ्गपरिभाषाः (प. ९०) अनि-त्यत्वे ज्ञापिते तदनित्यत्वेन 'सेदुषः' इत्यादौ कालिकान्तरङ्गत्वमाश्रित्य प्रथमं प्रवर्तमानस्येडागमादेर्वारयितुमशक्यत्वात्तत्प्रवृत्तिप्रयुक्तो दुर्वारः।

परिभाषाज्ञापने तु तयैव पूर्वं प्रसज्यमानस्येडागमादेर्निवृत्तिरिति न दोष इत्याहुः। नन्वन्तरङ्गपरिभाषाया नित्यत्वं ज्ञापयतां तेनैव 'अन्तरङ्गा-नपि' इत्यादीनां क्रोडीकारसम्भवाल्लाघवं परिभाषाज्ञापकतावादिनान्तु तदसम्भवादगौरवमिति शङ्कां निराकर्तुमाह—'अन्तरङ्गानपि' इत्यादि।

आदिपदेनान्तरङ्गानपि विधीन् बहिरङ्गो ल्यबित्यस्य संग्रहः । वार्णपरिभाषायाः पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमित्यस्याश्च नास्यामन्तर्भावः । तद्विषये 'ऊचे, ऊचाते, आग्नेन्द्रः, सौमेन्द्रः' इत्यादौ बहिरङ्गभूतोवङानङ्भ्यामन्तरङ्गनिमित्तनाशस्य दुर्निरूपत्वात् ।

एतत्प्रवृत्तौ निमित्तविनाशसम्भावनाऽपि निमित्तम् । अत एव 'गोमद्दण्डी' इत्यादौ हल्ङ्यादिलोपो न । अन्यथा हल्ङ्यादिलोपकाले सामासिकलुकोऽप्राप्त्या तदुत्तरश्चापहार्याभावादप्राप्त्या लोपस्यैवापत्तेः । अस्ति चात्रापि यदि लोपो न स्यात्तर्हि लुक्स्यादिति सम्भावना ।

नन्वन्तरङ्गानपि विधीन् बहिरङ्गो ल्यबित्येतद्विषये 'प्रदाय' इत्यादौ बहिरङ्गेण ल्यबादेशेन घुमास्थादेशरूपान्तरङ्गनिमित्तभूततकारादित्वादेर्विनाशस्य स्पष्टतया भवतु तस्याः परिभाषायाः प्रकृतपरिभाषायामन्तर्भावः । 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुक्' इत्यस्यास्तु कथमन्तर्भावः ? तद्विषये 'गोमद्दण्डी' इत्यादौ अन्तरङ्गत्वाद्धल्ङ्यादिलोपे विषयाभावेन बहिरङ्गस्य लुकोऽप्राप्त्या तत्कृतनिमित्तविनाशस्य दुर्वचत्वात् । अत आह— 'एतत्प्रवृत्तौ' इति । 'सम्भावनाऽपि' इति । यद्यप्यन्तरङ्गप्रवृत्तेः पूर्वमेव तत्प्रतिबन्धाय परिभाषाप्रवृत्तेरावश्यकतया तत्काले बहिरङ्गकृतान्तरङ्गीयनिमित्तविनाशस्य दुर्लभत्वादन्तरङ्गप्रवृत्तिप्रयुक्ता निमित्तविनाशसम्भावनैव निमित्तम्, तथापि सङ्कोचे मानाभावादन्तरङ्गप्रवृत्त्यभावसम्भावनाप्रयुक्ताऽपि निमित्तविज्ञानसम्भावना, तत्प्रवृत्तौ निमित्तमिति प्रतिपादनार्थमेतत् ।

'अन्तरङ्गानपि विधीन् बहिरङ्गो लुक' इत्यस्याः परिभाषायाः 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) इत्यत्र भाष्यकारीयं मपर्यन्तग्रहणानुवर्त्तनं लाघवादीदृशसम्भावनायाः प्रकृतपरिभाषाप्रवृत्तिप्रयोजकतायामेव ज्ञापकमित्याशयः ।

नन्वेतादृशसम्भावनायाः प्रकृतपरिभाषाप्रवृत्तिहेतुत्वावश्यंभावे व्याप-

कत्वादियमेव सर्वत्र परिभाषाप्रवृत्तौ हेतुत्वेन स्वीक्रियतां किमन्तरङ्गप्रवृत्ति-विनाशसम्भावनाया अतिरिक्तहेतुताकल्पनेन ? ततश्च व्यर्थ एवायमपिशब्द-घटितः सम्भावनापीत्युल्लेख इति चेत् ? अत्राहुः; विशिष्य तत्र तत्र परि-भाषाप्रवृत्तये विशेषेण कार्यकारणभावस्यावश्यकतया निमित्तविनाशसम्भाव-नायास्तत्तदन्तरङ्गप्रवृत्त्यभावविषयकत्वविशिष्टसम्भावनाप्रयुक्तत्वेन निमित्तवि-नाशसम्भावनायाः कारणताकल्पनायामभवस्याधिकस्य सर्वत्र कारणतावच्छेदक कोटिप्रवेशे गौरवात्तदविषयकसम्भावनाप्रयुक्तनिमित्तविनाशसम्भावनाया यत्रा-सम्भवस्तत्रैव 'गुरुभूततादृशसम्भावनाप्रयुक्तनिमित्तविनाशसम्भावनायाः प्रमा-णबलात्प्रकृतपरिभाषाप्रवृत्तिहेतुत्वमन्यत्र त्वभावाविषयकसम्भावनाप्रयुक्ताया एव तस्यास्तत्त्वं सम्भवति, लघौ गुरोरन्याय्यत्वात् । किञ्च अभावविषय-कसम्भावनाप्रयुक्ताया एव तस्याः प्रत्यासत्त्या परिभाषाप्रवृत्तिहेतुत्वकल्पनायां ज्ञापकानुरोधेन तादृशी सम्भावना परिभाषाया लुङ्मात्रविषयकतामेव किं न सम्भावयेत् ? तस्मादन्तरङ्गप्रवृत्त्यभावविषयकत्वविशिष्टसम्भावना-प्रयुक्तत्वेन 'तदविषयकसम्भावनाप्रयुक्तत्वेन बहिरङ्गकृतान्तरङ्गनिमित्तविनाश-सम्भावनायाः 'परिभाषाप्रवृत्तिं प्रति हेतुत्वकल्पनमावश्यकमिति सार्थक एवायमपिशब्दः । एतेन 'सौत्थितिः' इत्यादावप्यभावविषयकसम्भावना-प्रयुक्तनिमित्तविनाशसम्भावनामाश्रित्य परिभाषाप्रवृत्तिसौलभ्यादादेशद्वारक-निमित्तविनाशसम्भावनापरिग्रहपरिक्लेशो मूलकृतामयुक्त इत्यपास्तमिति ।

केचित्तु 'गोमत्प्रियः' इत्यादौ अन्तरङ्गभूतहल्ङ्यादिलोपप्रवृत्त्यभाव-विषयकसम्भावनाप्रयुक्तबहिरङ्गसामासिकलुक्कृतान्तरङ्गनिमित्तविनाशसम्भा-वनामाश्रित्य, प्रकृतपरिभाषया हल्ङ्यादिलोपप्रतिबन्धेनाभीष्टसिद्धावपि 'तत्कुलम्' इत्यादौ त्यदाद्यत्वापेक्षया नपुंसकलुको बहिरङ्गत्वाभावेन तत्कृत-निमित्तविनाशसम्भावनामाश्रित्य परिभाषाप्रवृत्तेरयोगाल्लुकः पूर्वं त्यदाद्यत्व-प्रतिबन्धो दुर्वचः ।

सम्भावनायामन्तरङ्गबहिरङ्गयोरनिवेशे तु पदाधिकेऽन्वाख्याने 'गोमत्प्रियः' इत्यादौ हल्ङ्यादिलोपकृतनिमित्तविनाशसम्भावनामाश्रित्य लुक एवाप्रवृत्तिः प्रसज्येत । 'तत्कुलम्' इत्यादावपि विनिगमनाविरहात्त्यदाद्य-त्वकृतनिमित्तविनाशसम्भावनामादाय लुक एव निवृत्तिः स्यात् । ततश्च

नपुंसकलुग्विषये त्यदाद्यत्वादिकार्यनिवृत्त्यर्थमावश्यक्येव 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुक्' (प. ५२) इति परिभाषेति, नास्यां परिभाषायामन्तर्भावो युज्यते। यदि तु 'अन्तरङ्गानपि' (प. ५२) इति परिभाषा परांशे विप्रतिषेधसूत्रस्थपरशब्दस्येष्टवाचकतालब्धार्थानुवाद एषेति तदंशे नास्यामन्तर्भावोपयोग इत्युच्यते तर्हन्तरङ्गांशेऽपि 'तुह्योस्तातङ' (७.१.३५) इति सूत्रस्थशब्देन्दुशेखरोक्तरीत्या बहिरङ्गपरिभाषानित्यत्वसिद्धार्थानुवाद एव सा परिभाषेति क उपयोगोऽन्तर्भावस्येति सुधीभिर्विभावनीयमित्याहुः।

'अल्लोपोऽनः' (६.४.१३४) इति सूत्रस्थतपरकरणन्तु परिभाषानित्यत्वज्ञापनेन चरितार्थम्। तद्धि 'आनः' इत्यादौ लोपवारणाय। अन्यथा दीर्घाभावे लोपसम्भावनया एतत्परिभाषाबलाद्दीर्घाप्तौ तद्वैयर्थ्यं स्पष्टमेवेत्याहुः। 'समर्थानाम्' (४.१.८२) इति सूत्रे कैयटस्तु समर्थवचनेनेयं परिभाषा ज्ञाप्यते 'अकृतव्यूहाः पाणिनीयाः' (प. ५६) इति, तेन 'पपुषः' इत्यादावन्तरङ्गत्वात्पूर्वं कृतोऽपीडागमो निवर्त्तत इति वदन् 'न कृतो व्यूहो विशिष्टस्तर्को, निमित्तकारणनाशेऽपि कार्यस्थितिरूपो यैः' इत्यर्थमभिप्रैति। निमित्तापाये नैमित्तिकस्याप्यपाय इति यावत्। सुस्थितादिस्थि वृद्धौ दीर्घनिवृत्तौ सावुत्थितिर्मा भूदिति 'समर्थानाम्' इति। लोकन्यायसिद्धश्चायमर्थः। लोके हि निमित्तं द्विविधं दृष्टं कार्यस्थितिनियामकं, तदनियामकञ्चेति। आद्यं यथा न्यायनये अपेक्षाबुद्धिः, तन्नाशे द्वित्वनाशाभ्युपगमात्। वेदान्तिनये च प्रारब्धस्य विक्षेपस्थितिनियामकत्वञ्च प्रसिद्धमेव। द्वितीयं यथा—दण्डादि। तन्नाशेऽपि कार्यनाशादर्शनात्। शास्त्रे लक्ष्यानुरोधाद्व्यवस्था।

ननु ज्ञापितायामस्यां परिभाषायां 'अल्लोपोऽनः' (६.४.१३४) इति सूत्रस्थं तपरकरणमनर्थकं स्यादत आह—'अल्लोपोऽनः' इत्यादि। 'अनित्य—

त्वज्ञापनेन' इति । एतत्फलमतिभवकान्नित्यादावकृत्प्रवृत्तिः । अन्यथा समासप्रयुक्तेनोपसर्जनत्वेन भाविना निमित्तभूतसर्वनामसंज्ञाविनाशसम्भावनया प्रकृतपरिभाषाप्रवृत्तौ तदनुपपत्तिः स्पष्टैव । प्रकृतिप्रत्यासत्तिवचनमप्यत्रार्थे प्रमाणमिति वदन्ति ।

इत्थमस्याः परिभाषाया दीक्षिताद्यभिप्रेतं वाक्यार्थं निरूप्य, कैयटाभिप्रेतमर्थमाह—'समर्थानामिति सूत्रे कैयटः' इति । 'दीर्घनिवृत्तौ' इति । प्रकृतपरिभाषयेति शेषः । ननु 'सौत्थितिः' इत्यादौ सवर्णदीर्घनिमित्तस्यादेशद्वाराऽनुवर्तमानस्याक्त्वस्येव तद्वतो दीर्घस्यापि वृद्ध्यादेशेनैव निवृत्तेर्निवर्त्तनीयाभावात्कथं परिभाषाप्रवृत्तिः स्यात् । ततश्च स्वांशे चारितार्थ्यं दुर्निरूपमेवेति चेत् ? सत्यम् ; निमित्तविनाशे तत्प्रयुक्तविशेषविशिष्टस्य तद्रहितशब्दस्वरूपमादेशत्वेन प्रकृतपरिभाषया बोध्यते प्रवृत्तनैमित्तिकस्य प्रकारान्तरेण निवर्त्तयितुमशक्यत्वात् । ततश्च सवर्णदीर्घनिमित्तविनाशे तत्प्रयुक्तविशेषविशिष्टस्य 'सौत्थितिः' इत्यादेरनया तद्रहितः 'सावुत्थितिः' इत्येवमादेश आपद्येतेत्याशयाददोषः । समर्थनांग्रहणे तु सामर्थ्यादप्रवृत्तिरेवैतद्विषये परिभाषाया इत्यभीष्टसिद्धिरित्याहुः ।

ज्ञापकसिद्धत्वस्योभयवादिसाधारणत्वेऽपि दीक्षिताद्यभिप्रेतमेव युक्तं 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' (म. भारतम् . ३.९५) इति न्यायादत आह— 'लोकन्यायसिद्धः' इति । वक्ष्यमाणलौकिकदृष्टान्तसिद्ध इत्यर्थः ।

भाविनि निमित्तनाशे पूर्वमनुत्पत्तौ तु न कश्चिन्न्यायः, नापि सम्प्रतिपन्नो दृष्टान्तः, 'समर्थानाम्' इत्यस्यापि लोकसिद्धार्थज्ञापनेन चारितार्थ्यसम्भवे लोकसिद्धापूर्वतादृशार्थज्ञापकत्वे मानाभाव इति तदाशय इति । परे तु 'सेदुषः' इत्यादौ पदावधिकेऽन्वाख्याने 'सेदुस् अस्' इति स्थिते इदसम्प्रसारणयोः प्राप्तौ

प्रतिपदविधित्वात्पूर्वं सम्प्रसारणे वलादित्वाभावादिटः प्राप्तिरेव नेति तत्सिद्धिरिति स्पष्टं 'समर्थनाम्' (४.१.८२) इति सूत्रे कैयटे ।

'तदाशयः' इति । केचित्तु लोके दण्डनाशघटनाशयोर्व्यभिचारादवच्छेदकावच्छेदेन निमित्तकारणनाशकार्यनाशयोर्निमित्तनिमित्तिभावस्यानुपपन्नत्वेऽपि प्रातिस्विकतया प्रारब्धविक्षेपयोरपेक्षाबुद्धिद्वित्वाद्योश्च यथा, तथैव तद्विनाशयोरप्यन्वयव्यतिरेकाभ्यामेव निमित्तनिमित्तिभावः क्लृप्तः । शास्त्रे हि उपरागस्नानयोरिव अज्यणाद्योर्वाचनिको निमित्तनिमित्तिभावः, न त्वन्वयव्यतिरेकस्यार्थः । व्यतिरेकासम्भवात् । ततश्च शास्त्रीयनिमित्तनिमित्तिविनाशयोरपि अपूर्वतया कल्पनीये निमित्तनिमित्तिभावे तथाविधस्य लोकदृष्टान्तस्याननुगुणतया ज्ञापकाश्रयणस्यावश्यकत्वाद्दीक्षितायुक्तमेव युक्तं न्यायोपहितत्वादित्याहुः ।

सर्वथा वचनकल्पनायां क्लेश एवेत्याशयेनाह-- 'परे तु' इति 'प्रतिपदविधित्वात्' इति । ततश्च शीघ्रोपस्थितिकत्वेनान्तरङ्गत्वं सम्प्रसारणस्येति भावः । ननु क्रादिनियमस्य नेड्वशीत्यस्याप्यविशेषान्निवर्त्तकतया 'वस्वेकाच्' (७.२.६७) इत्यस्य 'क्वस्प्रत्ययांशे तादृशनियमप्रापितेडागमस्य नियामकत्वेऽपि नियमशास्त्राणां विधिमुखेनैव प्रवृत्तिरिति सिद्धान्तात्, इडागमस्यापि पदविधित्वं वक्तुं युक्तम्, किञ्च क्रादिनियमस्य 'नेडवशि' (७.२.८) इत्येतन्निवर्त्तकत्वे फलाभावात् अप्राप्तस्येडागमस्य विधायकमेव प्रति 'वस्वेकाच्' इति सूत्रमिति न्याय्यम् । अन्यथा 'नेड्वशि' इत्यस्य क्रादिनियमेन सङ्कोचः, तस्य च 'वस्वेकाच्' (७.२.६७) इत्यनेन सङ्कोच इति शास्त्रद्वयसङ्कोचकल्पनायां गौरवात् । ततो निर्विवादमेवास्यापि प्रतिपदविधित्वमित्युभयोस्तुल्यबलतया परत्वात्प्रथममिडागमे रूपासिद्धिरिति चेत्? न; परत्वापेक्षया प्राबल्यसम्पादकेन नित्यत्वेन पूर्वं सम्प्रसारणे रूपसिद्धेरव्याहतिरित्याशयात् ।

न च बहिर्भूतयजादिसर्वनामस्थानविभक्तिनिमित्तकाङ्गसंज्ञासापेक्ष-सम्प्रसारणापेक्षया प्रयोगीयोच्चारणक्रमाधीनपूर्वोपस्थितिविषयनिमित्तकत्व-रूपमन्तरङ्गत्वमाश्रित्य, प्रथममिडागमे रूपासिद्धिरेवेति वाच्यम् । आतिदेशिकलिट्त्वप्रयुक्तद्वित्वाभ्यासलोपनिमित्तकेडागमापेक्षया प्रक्रियाक्रमानुरोधेन सम्प्रसारणेऽपि पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वस्य सुवचतया तुल्यत्वेन परिभाषाप्रवृत्तिप्रयोजकान्तरङ्गत्वस्यान्यतरस्मिन्नुपपादयितुमशक्यत्वात् ।

केचित्तु इडागमगतमन्तरङ्गत्वं नान्तरङ्गपरिभाषाप्रवृत्तिप्रयोजकम् । 'तासि च क्लृपः' (७.२.६०) इति तासेरिट्प्रतिषेधात् । अन्यथा तासि-निमित्तकेडागमकर्तव्यतायां बहिर्भूतलुङ्निमित्तकस्य तासेर्बहिरङ्गासिद्धत्वेनैव तदप्रवृत्तौ निषेधो व्यर्थ एव स्यात् । अत एव 'भविता भविष्यति' इत्यादि-सिद्धिः । इत्थञ्च प्रतिपदविधित्वादिलक्षणस्य इडागमगतान्तरङ्गत्वस्य परिभाषाप्रवृत्तिप्रयोजकत्वाभावेन अनुपयुक्तत्वात्सम्प्रसारणगतमेव तथाविध-मन्तरङ्गत्वमादायान्तरङ्गपरिभाषया निर्वाह इति मूलकाराशयमुद्भावयन्ति ।

अथ क्रमिकान्वाख्यानेऽपि पूर्वमिडागमे सम्प्रसारणोत्तरं यणि सम्प्रसारणस्य बहिरङ्गासिद्धत्वाद्यलोपे रूपसिद्धिः । यणि तु नासिद्धत्वं 'नाजानन्तर्ये' (प. ९१) इति निषेधात् । एवञ्च परिभाषानुपयोगाय विभज्यान्वाख्यानपक्षाश्रयणमिह व्यर्थमिति चेत् ? न; 'अक्षण्वूः' इत्यादौ यलोपवारणाय ''नाजानन्तर्ये'(प. ९१)परिभाषाया अजानन्तर्यनिमित्तके-ऽन्तरङ्गे कर्तव्ये कृते च तस्मिन् यदन्तरङ्गं प्राप्नोति, तत्र च कर्तव्ये बहिरङ्गासिद्धत्वं नेत्यर्थस्यावश्यकतया यलोपस्य दुर्लभत्वात् ।

न च सिद्धान्ते 'नाजानन्तर्ये' (प.९१) परिभाषाया अनाश्रयणादनित्याया अन्तरङ्गपरिभाषाया लक्ष्यानुरोधेन व्यवस्थितत्वाच्च प्रकृते बहिरङ्गासिद्धत्व-प्रवृत्त्यप्रवृत्तिभ्यामिष्टसिद्धिरिति वाच्यम् । यणि बहिरङ्गासिद्धत्वस्यानित्य-त्वादप्रवृत्तिः,, यलोपे तु तत्प्रवृत्तिरित्येकस्मिन्नेव लक्ष्ये कार्यभेदेन असिद्ध-त्वस्य प्रवृत्त्यप्रवृत्त्योः कल्पनायां 'अक्षण्वूः' इत्यादौ बहिरङ्गासिद्धत्वस्यानित्वा-दप्रवृत्तिः, इह तु तत्सम्पादनायासिद्धत्वस्य प्रवृत्तिरित्येवमेकस्मिन्नेव कार्ये

लक्ष्यभेदेन तत्प्रवृत्त्यप्रवृत्त्योः कल्पनायाञ्च क्रमिकान्वाख्याने क्लेशबाहुल्यमित्याशयात् ।

'असिद्धवत्'(६.४.२२)सूत्रे कैयटे स्पष्टमेव तत् । यद्यपि प्रतिपदविधित्वमनवकाशत्वे सत्येव बाधकत्वे बीजम् । तथापि पूर्वप्रवृत्तौ सावकाशत्वेऽपि नियामकं भवत्येवेति तदाशयः; निरूपितश्चैतद्बहुशः शब्देन्दुशेखरे । 'समर्थानाम्' (४.१.८२) इतिसूत्रस्थसमर्थग्रहणन्तु 'विष्णुः' इत्यादावकृतसन्धेः प्रत्ययदर्शनेन सर्वत्र तथा भ्रमवारणाय न्यायसिद्धार्थानुवाद एव । ध्वनितञ्चेदं विप्रतिषेध(१.४.२)सूत्रे भाष्ये । तत्र हि 'वैक्षमाणिः' इत्यन्तरङ्गपरिभाषोदाहरणमुक्तम् ।

किञ्च विभज्यान्वाख्याने "सु+उत्थित+अस्+इ' इति स्थिते, 'वार्णादाङ्गं बलीयः' (प. ५५) इति प्राप्तवृद्धिवारणाय समर्थग्रहणमित्यत्रैव सूत्रे कैयटे स्पष्टम् । अत एव 'असिद्धवत्' (६.४.२२)सूत्रे वसुसम्प्रसारणमज्विधौ सिद्धं वक्तव्यम् । 'पपुषः' इत्यादौ वसोः सम्प्रसारणे कृते आतो लोपो यथा स्यादिति भाष्ये उक्तम् । पदस्य विभज्यान्वाख्याने पूर्वोक्तकैयटरीत्या पूर्वं सम्प्रसारणे इटोऽप्राप्त्या उस्निमित्तक एवातो लोप इति तदाशयः । अन्यथा अन्तरङ्गत्वादिदि तन्निमित्तक एव 'आतो लोपः' इति तदसङ्गतिः ।

'नियामकम्' इति । अन्तरङ्गत्वादिति शेषः । ननु परिभाषानभ्युपगमे 'सौत्थित्तिः' इत्यादावन्तरङ्गत्वादेव सन्धिकार्यप्रवृत्तेः, व्यर्थं 'समर्थानाम्' (४.१.८२) इति सूत्रे समर्थग्रहणमत आह—'समर्थानामित्याद्युदाहरणमुक्तम्' इति । तत्र हि विभज्यान्वाख्याने अित्स्वरसवर्णदीर्घयोः प्राप्तौ,

१. सु उत्थित इति स्थिते मुद्रितः पाठः

सवर्णदीर्घोऽन्तरङ्गत्वाद्भवति । अन्यथा पूर्वमुपसर्गौकारस्य ञित्स्वरे पश्चात्सवर्णदीर्घे 'स्वरितो वानुदात्ते पदादौ' (८.२.६) इति पाक्षिकस्वरितत्वप्रसङ्गः । इष्यते तु सवर्णदीर्घस्य नित्यमाद्युदात्तत्वमिति परिभाषोदाहरणत्वं तस्य । समर्थग्रहणस्यापूर्वतया सन्धिकार्यनिर्वर्त्तकत्वे हि तदसङ्गतिरेवेत्याशयः । इदमीदृशेषु विभज्यान्वाख्यानेऽपि प्रमाणीभवितुमर्हति ।

ननु विभज्यान्वाख्यानेऽपि समर्थग्रहणस्य प्रकृतपरिभाषाज्ञापनद्वारेणापूर्वार्थबोधकत्वे सम्भवत्यन्यथा सिद्धार्थानुवादकत्वकल्पनमयुक्तं स्वरांशे निमित्ताभावादेव परिभाषाया अप्रवृत्तेर्युक्तमेव भाष्यकारोक्तमन्तरङ्गपरिभाषोदाहरणत्वं 'वैक्षमाणिः' इत्यादेरत आह—'किञ्च' इति । 'वृद्धिवारणाय' इति । एवञ्च समर्थग्रहणस्य साफल्यान्न ज्ञापकासम्भव इत्याशयः । विभज्यान्वाख्यानेन परिभाषाप्रत्याख्यानं भाष्यानुरोधादेव, न तु स्वच्छन्दादत आह—'अत एवासिद्धवत्सूत्रे' इति । 'तदसङ्गतिः' इति । ननु 'पपुषः' इत्यादौ सम्प्रसारणोत्तरं वलादित्वरूपनिमित्तविनाशादिडागमनिवृत्तौ तत्प्रयुक्तस्यातोलोपस्यापि कैयटोक्तदिशा प्रकृतपरिभाषया निवृत्त्या सम्प्रसारणनिमित्तकत्वेन पुनरातोलोपप्रवृत्तये वचनारम्भ इत्येवंपरतया भाष्यस्य सुयोजत्वात्कथं प्रत्याख्याने प्रमाणं स्यात् ।

न च वचनारम्भस्येड्निमित्तकातोलोपनिवृत्तिप्रयुक्तवस्निमित्तकातोलोपप्रवृत्तिमात्रफलकतया पुनस्तदप्रवर्त्तनलाववानुरोधादातोलोपस्यानिवृत्तिः 'वसुसम्प्रसारणे' इत्येव वक्तव्ये तथाविधवचनस्यास्वारसिकत्वापत्तिरितिवाच्यम् ।

अत एव 'चौ प्रत्यङ्गस्य प्रतिषेधः' इति वचनं वार्तिककृताऽऽरब्धम्, भाष्यकृता च न [1]प्रत्याख्यातम् । प्रत्यङ्गमन्तरङ्गम् । अस्यां परिभाषायां सत्यान्तु तद्वैयर्थ्यं स्पष्टमेव । अत एव 'च्छ्वोः' (६.३.१७) इति सूत्रे अवश्यं तुगभावार्थं यत्नः कार्योऽन्तरङ्गत्वात्ततप्राप्नोतीति भाष्ये उक्तम् । एतत्सत्त्वे [2]तु

१. 'प्रत्याख्यातम्'—नास्ति प्रा. मुद्रिते । २. 'तु'—नास्ति प्रा. मुद्रिते ।

तुकोऽप्राप्त्या यत्नावश्यकत्वकथनमसङ्गतमिति स्पष्टमेव। न च तदनित्यत्वज्ञापनार्थमेतदिति तदाशयः। 'अवश्यमत्र' इत्यक्षरस्वारस्यभङ्गापत्तेः। किञ्चानयैव 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) 'अदो जग्धिर्ल्यप्' (२.४.३६) इत्यनयोश्चारितार्थ्येन तज्ज्ञापकताबलाल्लुक्ल्यपोरन्तरङ्गबाधकता भाष्योक्ता भज्येत। किञ्चैषा भाष्ये न दृश्यते, तदुक्तं 'असिद्धवत्'(६.४.२२)सूत्रे कैयटे। 'निमित्तापाये नैमित्तिकस्याप्यायः' इति (व्या.प ४०) परिभाषाया भाष्यकृताऽनाश्रयणादिति। पदसंस्कारपक्षे 'हरिः' इत्यादौ विसर्गादौ कृते ततो 'गच्छति' इत्यादिसम्बन्धे, 'हरिः गच्छति' इत्याद्येव साधु, तत्तद्विषये पदसंस्कारपक्षानाश्रयणमेव वेति दिक् ॥५६॥

'चिच्युषः' इत्यादौ यणादीनामुपपत्त्यर्थमाभीयासिद्धत्वस्याप्यनेन वचनेन निवर्त्तयितुं तादृशवचनारम्भस्यावश्यकत्वात्। किञ्च दीक्षितादिमते प्रकृतपरिभाषया बहिरङ्गसम्प्रसारणप्रयुक्तनिमित्तविनाशसम्भावनामाश्रित्य, पूर्वमिडागमाप्रवृत्तौ सम्प्रसारणनिमित्तकत्वेनैव तत्रातोलोपस्योपपादनीयतया युक्तमेव यथाश्रुतं वचनं भाष्यस्येति न प्रकृतपरिभाषाप्रत्याख्यानसम्भव इत्यत आह—'अत एव चौ प्रत्यङ्गस्य' इति। 'न [1]प्रत्याख्यातम्' इति। ननु 'प्रतीचः' इत्यादौ यणाद्यादेशवारणाय प्राचीनैराचार्यैरारब्धमिदं वचनमनूद्य भाष्यकारैः, दीर्घारम्भज्ञापकादेव तत्र यणाद्यप्रवृत्तिमास्थाय प्रत्याख्यातम्। तदुक्तं भाष्ये। इहान्ये आचार्याश्चौ प्रत्यङ्गस्य प्रतिषेधमाहुः (इति)। तदिहापि साध्यम्। नैष दोषः। एतदेव ज्ञापयत्याचार्यः। न चौ प्रत्यङ्गं भवतीति यदयं चौ दीर्घत्वं शास्तीति। ततश्च कुतो न प्रत्याख्यातम्।

न च प्रकृतपरिभाषया सिद्धे ज्ञापकाश्रयणं निष्फलमिति वाच्यम्। तेन ज्ञापकेन प्रकृतपरिभाषाज्ञापनद्वारेण तत्सिद्धिरित्याशयात्। अत एव

१. प्रत्याख्यानम्–प्रा.पू.पाठः

ज्ञापयतीत्युक्तम्। अन्यथा हि वचनाद्दीर्घ इत्येव वदेत्। तस्मात्परिभाषा-प्रत्याख्यानं निर्युक्तिकमेवेत्यत आह—'अत एव च्छ्वोः' इति। 'अक्षर-स्वारस्यभङ्गापत्तिः' इति। अन्तरङ्गनिवर्त्तकोपायस्य सुतरामभावे हि तथा कथनमिति भावः।

ननु वञ्छतेरप्रत्यये 'वान्, वाञ्छौ, वाञ्छः' इत्यादौ शादेशाप्रवृत्तये सतुकनिर्देशरूपयत्नस्यावश्यकतां भाष्यकारो मन्यते, न तु प्रकृतपरिभाषाया अभावादिति चेत्? न; तथा सति तद्विषये यथालक्षणमप्रयुक्त इति भाष्यकारोक्तेरस्वारसिकत्वापत्तेः। अन्यथा हि तत्र शादेशाभावमुद्भाव्य 'वाञ्छौ, वाञ्छः' इत्येवेष्यत इत्येव वदेदित्याशयः।

'भाष्योक्ता भज्येत' इति। यद्यपि प्रकृतपरिभाषाया अभ्युपगमे तयैव सर्वनिर्वाहलाघवम्। अनभ्युपगमे च लुग्लयपोः पृथगन्तरङ्गबाधकता-बोधकवचनद्वयाश्रयणे 'सेदुषः' इत्यादावन्तरङ्गनिवृत्तये विभज्यान्वाख्या-पक्षावलम्बने च गौरवम्, तथाऽपि अन्तरङ्गप्रवृत्तिसम्भावनाप्रयुक्तत्वेन तदभावसम्भावनाप्रयुक्तत्वेन च निमित्तविनाशसम्भावनायाः परिभाषा-प्रवृत्तिप्रयोजकताकल्पनायामपि 'भवकान्' इत्यादेः समर्थनायानित्यत्वकल्प-नायाश्च परिभाषाङ्गीकारेऽपि तुल्यमेव गौरवम्। अथ वा प्रामाणिकं गौरवं न दोषावहमित्याशयः।

इत्थमेनां परिभाषां दूषयित्वा पदसंस्कारे प्राचीनप्रदर्शितं परिभाषा-फलं दूषयति 'पदसंस्कार' इत्यादि। 'हरिः गच्छतीत्यादेव' इति। न तु भाविन्यवसानभङ्गे विसर्जनीयस्य पूर्वमप्रवृत्तिः। अवसानभङ्गे वा तन्निवृत्ति-रिति मन्यते। इदन्तु चिन्त्यम्, 'विसर्जनीयस्य सः' (८.३.३४) इति सूत्रभाष्यविरोधात्। तत्र हि 'खरि' इत्यस्यानुवृत्त्यभावेऽपि 'खर्येव विसर्गः' इति प्रतिपादनाय खरवसानयोर्विसर्जनीयं (८.३.१५) विधाय तस्यानेन सत्वविधानादन्यतरस्मिन्सत्वं यदि च खरवसानयोरुभयोरपि सत्वं स्यात्तर्हि विसर्जनीयविधानं व्यर्थं स्यात्। इत्युपक्रम्य 'शर्परे विसर्जनीयः' इति ज्ञापकात् खर्येव 'विसर्जनीयस्य सः' (८.३.३४) इत्यस्य प्रवृत्तिः। विपर्यये तु

स्वरि विसर्जनीयस्य सिद्धतया पुनर्विधानमनर्थकं स्यादित्युक्तम्। यद्यवसान-निमित्तकस्य विसर्जनीयस्य पदान्तरसमभिव्याहारेणावसानभङ्गसम्भावनायामपि विसर्जनीयस्य पूर्वं प्रवृत्तिः। प्रवृत्तस्य निमित्तविनाशे निवृत्त्यभावस्तदा तादृशविसर्जनीयघटितेकः 'त्सरुः' इत्यादौ सत्वनिवृत्तये विसर्जनीयविधानेन सार्थकस्य 'शर्परे' इत्यस्य भाष्यकारोक्तता ज्ञापकता भज्येत, तस्मादिह विसर्जनीयरहितस्य 'हरिर्गच्छति' इत्यादेरेव साधुत्वम्। तच्च परिभाषैकसाध्यं पदसंस्कार इत्यवश्यस्वीकरणीया परिभाषेत्यत आह—'तद्विषये' इत्यादि। 'अनाश्रयणम्' इति। पक्षयोर्लक्ष्यानुरोधेन व्यवस्थितत्वात् 'सेदुषः' इत्यादौ पदावधिकमेवान्वाख्यानमुक्तविषये तु क्रमिकान्वाख्यानमेवेत्याश्रयणेन सर्वनिर्वाहात्परिभाषाश्रयणं व्यर्थम्। 'हरिः ओं' इत्यस्य वैदिकसम्प्रदायसिद्धस्य शिक्षाकारवचनबलादेवास्तु कथञ्चित्साधुत्वम्। 'वागाशीर्दत्तो वाचिकः' इत्यादौ तु सपादसप्ताध्यायीस्थकार्यप्रवृत्तियोग्यतायां त्रैपादिकस्य पूर्वमप्रवृत्त्या कुत्वाद्यभावस्तद्विषये पदावधिकमेव वाऽन्वाख्यानमिति परमार्थः।

अथास्याः परिभाषाया अभावे 'वृक्षो वृक्षः' इत्यादौ पूर्वत्रासिद्धीयमद्विर्वचने (प. ११७) इति विसर्जनीयान्तेषु कार्येषु प्रवृत्तेषु द्विर्वचने पूर्वखण्डे रोरभावादुत्वाप्रवृत्त्या रूपासिद्धिरिति चेत्? न; 'पूर्वत्रासिद्धीयमद्विर्वचने' (प. ११७) इत्यस्यानित्यत्वादनाश्रयणेन सान्त एवेतादृशेषु द्वित्वप्रवृत्तावभीष्टसिद्धेः। न च 'निमित्तापाये नैमित्तिकस्याप्यपायः (व्या. प. ४०) इत्यर्थकतया कैयटोक्तरीत्या प्रकृतपरिभाषाया अभावे धातुपाठपठितानां ष्टादीनां 'धात्वादेः' इति सत्वेऽपि प्रवृत्ते तत्समभिव्याहृते श्रूयमाणस्य ष्टुत्वस्य 'स्थाता, स्थानम्' इत्यादौ निवृत्त्युपायाभाव इति वाच्यम्। संज्ञाशास्त्रदृष्ट्या लक्षणवशसम्पन्नस्य ष्टुत्वस्यासिद्धत्वेन तद्विरहितस्यैव धातुसंज्ञाप्रवृत्त्या ष्टुत्वसहितस्य प्रयोगविषयतायां दौर्लभ्यादिति सकलेष्टसिद्धिः ॥९६॥

अन्तरङ्गादप्यपवादो बलवान्, तत्रापवादपदार्थमाह—

५७. येन नाप्राप्ते यो विधिरारभ्यते, स तस्य बाधको भवति ।

प्राप्ते इति भावेक्तः । येन नाप्राप्ते इत्यस्य यत्कर्तृकावश्यकप्राप्तावित्यर्थः । नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वात् । एवञ्च विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नोद्देश्यकशास्त्रस्य विशेषशास्त्रेण बाधः । तदप्राप्तियोग्येऽचारितार्थ्यं हि तस्य बाधकत्वे बीजम् ।

'तत्रापवादपदार्थम्' इति । प्रागुपदर्शितपरनित्येतिपरिभाषावटकापवादपदप्रतिपाद्यकर्मकं वर्तमानकालिकं कथनमिति तदर्थः । लोकन्याय एवापवादस्यान्तरङ्गादिबाधकत्वं साधयतीति न तदर्थं वचनापेक्षा, किन्त्वपवादपदार्थनिर्णयार्थमेव बाधको भवतीत्यस्यापवादो भवतीत्येवार्थः । ततश्च 'पूर्वपरनित्यान्तरङ्गापवादानाम्' (प.३८) इति परिभाषोद्दिष्टक्रमप्रसक्तस्यापवादबलवत्त्वावोधनस्योपजीव्यत्वमिहास्याः परिभाषायाः सन्दर्भ इत्याशयः ।

'भावे क्तः' इति । 'नपुंसके भावे क्तः' (३.३.११४) इत्यनेनेति बोध्यम् । न चैवं 'नपुंसके भावे क्तस्य योगे षष्ठ्या उपसंख्यानम्' (वा. १४९) इति वार्तिकबलात्तद्योगे कर्तृतृतीयाया अनुपपत्तिरिति वाच्यम् । शेषत्वविवक्षया 'षष्ठी शेषे' (२.३.५०) इत्यनेनैव 'सतां गतम्' इत्यादौ षष्ठीप्रवृत्तिमास्थाय वार्तिकस्य प्रत्याख्यातत्वात्तथा कर्तृत्वविवक्षायां तृतीयाया निर्बाधत्वात् । 'कर्तृकर्मणोः' (२.३.६५) इति तु न प्रवर्त्तते 'न लोक' (२.३.६९) इति निषेधात् । 'नञ्द्वयस्य' इति । प्राथमिकस्य नञो नलोपाभावः पृषोदरादित्वात् । नञर्थकनशब्दो माङर्थकमाशब्दवदप्रामाणिक इति स्पष्टमन्यत्र ।

'दार्ढ्यबोधकत्वात्' इति । अवश्यम्भाव एवेह दार्ढ्यम् । प्राप्तावावश्यकत्वं चोद्देश्यतावच्छेदकव्यापकत्वम् । सिद्धसाध्यसमभिव्याहारन्यायाद-

त्सतिसप्तम्या निमित्तनिमित्तिभावो बोध्यते। ततश्च स्वादेश्यतावच्छेदक-व्यापकप्राप्तिनिमित्तको यत्कर्मकः प्रारम्भः स तस्यापवाद इत्यक्षरार्थः। तादृशी च प्राप्तिर्व्यापकधर्मावच्छिन्नोद्देशकस्यैवेति व्यापकधर्मावच्छिन्नोद्देश्यकस्य व्याप्यधर्मावच्छिन्नोद्देश्यकं बाधकमिति फलति। तदाह—'एवञ्च' इति। विशेषधर्मावच्छिन्नोद्देश्यकस्यैव विशेषशास्त्रतया पुनर्विशेषधर्मावच्छिन्नेति व्यर्थम्। विशेषशास्त्रशब्दस्य तत्त्वेनाभिमतपरतया कथञ्चित्सार्थक्यसम्पादनेऽपि विशेषणतया तस्य पूर्वनिपातो न युक्त इत्याहुः। 'बाधः' इति। यथा 'आदृगुणः' (६.१.८७) इत्यस्य 'वृद्धिरेचि' (६.१.८८) इत्यनेन। तत्र हि 'वृद्धिरेचि' (६.१.८८) इत्येतच्छास्त्रीयमेच्परकाकारत्वरूपविशेषधर्मावच्छिन्नं यदुद्देश्यं तद्वृत्यच्परकाकारत्वरूपसामान्यधर्मावच्छिन्नोद्देश्यकत्वं 'आदृगुणः' (६.१.८८) इत्यस्येति स्पष्टमेव।

ननु विषयभेदेन बाधस्थलेनेदं सम्भवति। तथा च प्रथमद्विर्वचनस्य द्वितीयद्विर्वचनेन बाध इष्टो न सिद्धयेत्। न हि तत्र द्वितीयद्विर्वचनोद्देश्यभूताजादिधात्ववयद्वितीयैकाच्खण्डवृत्तिसामान्यधर्मावच्छिन्नोद्देश्यकं प्रथमद्विर्वचनं भवतीति चेत्; सत्यम्। अत्र साक्षाद्विशेषणद्वारेण वा तयोरुद्देश्ययोः सामान्यविशेषभावोपहिततत्तद्धर्मावच्छिन्नत्वं विवक्षितम्, ततश्च द्वितीयद्विर्वचनोद्देश्यभूताजादिधात्ववयवद्वितीयैकाच्खण्डीयविशेषणगताजादिधातुत्वापेक्षया सामान्यभूतो धातुत्वरूपो यो धर्मस्तदवच्छिन्नप्रकारतानिरूपितोद्देश्यताकस्य प्रथमद्विर्वचनस्य अजादिधातुत्वरूपविशेषधर्मावच्छिन्नप्रकारतानिरूपितोद्देश्यताकद्वितीयद्विर्वचनेन बाध इत्येवमुपपद्यत एव विषयभेदेऽप्यपवाद्यापवादकभावः। 'अलोऽन्त्यस्य (१.१.५२) 'अनेकालशित्' (१.१.५५) इत्यनयोरपि अपवाद्यापवादकभावो निर्विवादः। आदेशानुवादेन स्थानषष्ठ्यन्तपदबोध्यसमुदायचरमावयवीभूतात्वावच्छिन्ननिवर्तकत्वतथाविधसकलावयवावच्छिन्नसमुदायनिवर्तकत्वयोरेव विधेयत्वेनोद्देश्यगतसामान्यविशेषभावस्य सुवचत्वात्। एवमन्यात्राप्यूह्यम्।

केचित्तु यौगपद्यासम्भवरूपविरोधे सत्येव बाधकत्वमभ्युपगच्छतः

कात्यायनस्य मते विषयैक्य एव बाध्यबाधकभाव इति युज्यते, तत्र सामान्यविशेषभावस्योद्देश्यगतस्य तदुपयोगित्वोपवर्णनं विषयभेदेन सम्भवे सत्यपि बाधकत्वमभीप्सतो भगवतो भाष्यकारस्य मते तु नोद्देश्यगतसामान्यविशेषभावस्य सम्भवो नाप्युपयोगः। परन्तूद्देश्यनिमित्तघटितसमुदायात्मकलक्ष्यगतयदीयप्राप्तिविषयताव्यापकप्राप्तविषयताको यः स तस्य बाध्यः, तथाविधलक्ष्यगतप्राप्तिविषयताव्याप्यप्राप्तिविषयताको यः स तस्य बाधक इत्येतावानेवात्र विवक्षितोऽर्थः। अचिरादेशस्य नुडपवादत्वमुद्भाव्य 'न तिसृ' (६.४.४) इति ज्ञापनान्नुट्समर्थनपरं 'तृज्वत्' (७.१.९९) सूत्रस्थं भाष्यमप्यत्रैवार्थे गमकम्, अतः सर्वत्रोद्देश्यगतसामान्यविशेषभावसमर्थनपरिक्लेशो व्यर्थ इत्याहुः।

उक्तार्थस्योपपत्तिं दर्शयति—'तदप्राप्ति' इति। यत उत्सर्गशास्त्रीयोद्देश्यतावच्छेदकानाक्रान्ते तदीयोद्देश्यविशेषणतावच्छेदकानाक्रान्तविशेषणताविशिष्टोद्देश्यतावच्छेदकाक्रान्ते वा चरितार्थ्याभावो बाधबीजम्। अत उक्तरीत्या विशेषशास्त्रेण सामान्यशास्त्रस्य बाधो विभिन्नविषयेऽपीति निष्कर्षः। उत्सर्गप्राप्तियोग्यताविरहविशिष्टे लक्ष्ये सार्थक्याभाव इत्यादि यथाश्रुतन्तु न युक्तम्। 'दिग्यः' इत्यादावुत्सर्गप्रवृत्त्युत्तरं तदीयप्राप्तियोग्यताविरहवति द्वितीयखण्डे प्रवृत्त्या सार्थकस्य दिग्यादेशस्य द्विवचनबाधकतायां बीजदौर्लभ्यापत्तेः। उत्तरग्रन्थस्वारस्यभङ्गापत्तेश्च।

अत एव 'आयादयः' (३.१.३१) इति सूत्रे 'गोपायिष्यति' इत्यादावायादीन् बाधित्वा, परत्वात्स्यादयः प्राप्नुवन्तीत्याशङ्क्य, अनवकाशा आयादयः गोपायतीत्यादावपि शप्स्यादिः प्राप्नोति। न च शपि सत्यसति वा न विशेषः। अन्यादिदमुच्यते 'नास्ति विशेषः' इति।

यदुक्तमायादीनां स्यादिभिरव्याप्तोऽवकाश इति सः नास्त्यवकाश इति भाष्ये उक्तम्। एवमत्र तत्प्रवृत्त्युत्तरं चारि-

ताथ्यैंऽपि तदव्याप्तोऽवकाशो नास्तीति समभेव। किञ्चानेन न्यायेन तत्प्रवृत्त्युत्तरं चारितार्थ्येऽपि बाधबोधनम्। अन्यथा अनवकाशत्वेनैव बाधे सिद्धे तत्कथनवैयर्थ्यापत्तेः तक्रकौण्डिन्य-न्यायप्रदर्शनवैयर्थ्यापत्तेश्च। यथा प्रथमद्विवचनस्य तदुत्तरं सावकाशेनापि द्वितीयद्विवचनेन बाधः। यथा वा आदेरपि प्रवृत्त्या चरितार्थेन 'आदेः परस्य' (१.१.५४) इत्यनेन 'अलोऽन्त्यस्य' (१.१.५२) बाधः। तदुक्तं 'मिदचोऽन्त्यात्' (१.१.४७) इति सूत्रे भाष्ये सत्यपि सम्भवे बाधनं भवतीति।

ननु यत्र सामान्यशास्त्रस्य प्रवृत्त्युत्तरं प्रवृत्तियोग्यलक्ष्याभावस्तत्र शास्त्रवैयर्थ्यभयाद्भवतु तत्र सामान्यशास्त्रस्य विशेषशास्त्रेण बाधः। यत्र तु सामान्यशास्त्रप्रवृत्त्युत्तरं विशेषशास्त्रस्य कथञ्चित्सार्थक्यसम्भवस्तत्र शास्त्रवैयर्थ्याभावात्कथम्बाध इत्यत आह—'अत एव' इति। तत्र हि भाष्ये, 'आर्धधातुके वा प्रवृत्तिर्निवृत्तिर्वेति' पक्षद्वयमुपक्रम्य, आद्ये 'गोपाया, गोपायाञ्चकार' इति न प्राप्नोति, प्रत्ययान्तत्वाभावादकारप्रत्ययस्याम्प्रत्ययस्य चानुपपत्तेः। न च लिटि तिबादेशे आयप्रत्यये तदन्तादामिति द्वितीये न दोष इति वाच्यम्। प्रकृतिप्रत्ययसन्निपातेन कृतस्यायप्रत्ययस्य तादृश-सन्निपातविघातुकमायप्रत्ययं प्रति निमित्तत्वायोगात्। अन्त्ये 'जुगोप' इति न प्राप्नोति। आयस्य निवृत्तावव्यामो निवृत्त्युपायाभावात्।

न च 'निमित्तापाये नैमित्तकस्याप्यपायः' (व्या. प. ४०) इति स्यादेवामो निवृत्तिरिति वाच्यम्। आम्प्रत्ययनिमित्तकस्यायप्रत्ययापायस्य तदपायस्य निमित्तत्वायोगात्। एवं 'गुप्तिः' इत्यपि न प्राप्नोति, अकार-प्रत्ययोत्पत्तौ वा प्रत्ययनिवृत्तावपि क्तिन्प्रत्ययस्याप्राप्तेरित्येवम्प्रश्लेषद्वयेऽपि दोषोद्भावनेन। 'आयादयो वा सार्वधातुके नित्यम्' इति न्यासान्तरमाश्रित्योक्तम्, स्यादिबलीयस्त्वन्तु तुल्यनिमित्तत्वादिति प्रतिप्रादितम्। तदाह—'इत्याशङ्क्य' इति। 'स्यादिभिरव्याप्तोऽवकाशः' इति।, स्यादिवि-

व्युदेइयतावच्छेदकानाक्रान्ताप्रवर्त्तनभूमिरित्यर्थः। अत्र शपि कृते चरितार्थानामप्यायादीनामनवकाशत्वप्रतिपादनपरभाष्यप्रामाण्यात्, उत्सर्गशास्त्रप्रवृत्तिकालिकस्वप्राप्तियोग्यलक्ष्यशून्यत्वलक्षणमप्यनवकाशत्वं बाधकताबीजमिति सूचितम्।

तदाह 'एवमत्र' इति। 'चरितार्थेऽपि' इत्यपिरुत्सर्गशास्त्रप्रवृत्तिनिमित्तकस्वप्रवृत्तियोग्यलक्ष्यशून्यत्वरूपस्य सर्वथा निरवकाशत्वस्य समुच्चायकः। वस्तुतः सर्वथा निरवकाशत्वस्यैव बाधप्रयोजकत्वे न्यायवैफल्यमेवेत्याह—'किञ्च' इति। 'चारितार्थ्येऽपि' इति। अपिः अवधारणे। निपातानामनेकार्थत्वात्। 'द्वितीयद्विर्वचनेन' इति। इदमनभ्यासग्रहणं प्रत्याचक्षाणस्य भगवतो भाष्यकारस्य मतेन। सूत्रवार्त्तिककारयोस्तु मते सर्वथा निरवकाशत्वमेव द्वितीयद्विर्वचनस्य। इत एवारुचेरुदाहरणान्तरमाश्रितम्।

'यथा वा' इति। न केवलमार्थिक एवायमर्थो भाष्ये यच्चारितार्थ्येऽपि सामान्यविहितस्य विशेषविहितं बाधकमिति। किन्तु वाचनिकोऽपीत्याह—'तदुक्तम्' इति। 'मिदचोऽन्त्यात्सूत्रे' इति। तत्र हि 'पयांसि, यशांसि' इत्यादौ झलन्तलक्षणस्य नुगागमस्य अन्त्याजवधिकपरत्वचरमावयवीभूतव्यञ्जननिवर्त्तकत्वयोर्योगपद्यसम्भवेन निरवकाशत्वरूपविरोधहेत्वभावादन्त्याच्चः परत्वेन स्थाने योगत्वस्य बाधो न स्यादित्याशङ्क्य—नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति—'अपवादैरुत्सर्गा बाध्यन्ताम्' इति। किं तर्हि? लौकिकोऽयं दृष्टान्तः। 'सत्यपि सम्भवे बाधनं भवति' इति।

अन्यथा 'ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय' इत्यत्र तक्रदानेन दधिदानस्य बाधो न स्यात्। तदानोत्तरं तत्पूर्वं वा तद्दानस्य चारितार्थ्यसम्भवात्। अत एव विषयभेदेऽप्यपवादत्वम्। अत एवाचिरादेशेन सुटोऽप्यपवादत्वाद्बाधमाशङ्क्य 'न तिसृ' (६.४.४) इति ज्ञापकेन समाहितं 'तृज्वत्क्रोष्टुः'

(७.१.९९) इति सूत्रे भाष्ये। तेन निषेधेन विषयभेदेऽप्यपवादाभाव एव बोध्यत इति कश्चित्।

तद्यथा 'सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय' इति सत्यपि सम्भवे, तक्रदानं दधिदानस्य निवर्त्तकं भवतीत्युक्तम्। 'अन्यथा' इत्यस्य चारितार्थ्यमूलकबाधकत्वानभ्युपगमे इत्यर्थः। नन्वेतादृशलोकदृष्टान्तबलात्कथञ्चिच्चरितार्थानामपवादानां निरवकाशत्वप्रयुक्तविरोधाभावेऽप्युत्सर्गप्राप्तिकालिकप्राप्तियोग्यलक्ष्यविरहप्रयुक्तेन विरोधेनोत्सर्गनिवर्त्तकत्वमिति लभ्यते। तत्र यत्र 'गोपायिष्यति' इत्यादौ स्यादीनामाद्यादीनाञ्च यौगपद्येन प्रवृत्तौ घात्वानन्तर्यासम्भवप्रयुक्तो विरोधः, यत्र वा 'दिग्यः' इत्यादौ दयते-र्द्विष्प्रयोगरूपद्विवचनस्य दिग्यादेशनिवर्त्त्यत्वयोर्यौगपद्यासम्भवप्रयुक्तो विरोधस्तत्र सामान्यविहितस्य विशेषविहितेन निवृत्तिः। यत्र तु विषयभेदेन प्रवृत्तिः, 'आदेः परस्य' (१.१.५४) इत्यादौ तत्र युगपत्प्रवृत्तौ सर्वथा विरोधाभावात्कथं सामान्यविहितस्य विशेषविहितं निवर्त्तकं स्यात्।

न हि सुतरां विरोधाभावे बाधकत्वं युज्यते। अन्यथा 'ब्राह्मणेभ्यो दधि दीयतां, कम्बलः कौण्डिन्याय' इति कम्बलदानमपि दधिदानस्य निवर्त्तकं स्यात्। किञ्च 'लिङो यासुट्' 'तकारथकारयोस्सुट्' इति विषयभेदाद्बाध्यबाधकभावो नेत्यादिप्रवादोऽपि व्याकुप्येत, तस्मादुक्तयुमेव विषयभेदे बाधकत्वमत आह—'अत एव' इति। विषयभेदे प्रकृतन्यायप्रदर्शनपरात् 'मिदचोन्त्यात्परः' (१.१.४७) इति सूत्रस्थभाष्यबलादेवानेन न्यायेन तत्र बाधकत्वमित्यर्थः। अयं भावः—वृद्धव्यवहारबलात् समावेशसम्भवेऽपि सामान्यविहितस्य विशेषविहितमविशेषाद्बाधकमिति कल्प्यते। स च समावेशः पौर्वापर्येण विषयभेदेन वेत्यन्यत्। कम्बलदानन्तु न दधिदानस्य निवर्त्तकम्। सजातीयस्यैव बाधकत्वाभ्युपगमात्। न हि कम्बलो द्रव्यः सजातीयः, विभिन्नकार्यकारित्वात्। एवं स्वसमानकालप्रसक्तिकस्यैव बाधकत्वम्।

न हि 'इदानीं ब्राह्मणेभ्यो दधि दीयतां, श्वः, परश्वो वा कौण्डिन्याय

तक्रम्' इत्युक्ते कालान्तरीयतक्रदानस्येदानीन्तनदधिदाननिवर्त्तकत्वं लोके दृश्यते। ततश्च 'यासुड्विधौ परस्मैपदेषु' (३.४,१०३) इत्यस्य विषयसप्तम्यन्ततया तदुत्पत्तेः पूर्वमेव जातस्य यासुडागमस्य, तदुत्पत्त्युत्तरकालिकप्रवृत्तिकेन सुडागमेन विशेषविहितेनापि न निवृत्तिः, एवमन्यत्रापीति न प्रागुक्तप्रवादविरोधः। एतेन लायतेर्लिटि, 'प्रिप्रये' इत्यादौ 'लिङ्घञ्डोः' (६.१.२९) इत्यस्य विषयसप्तम्यन्ततया विभिन्नकालप्रवृत्तिकेन पीभावेन द्विर्वचनस्य बाधो नेत्युक्तप्रायमिति।

उक्तमर्थं प्रमाणान्तरेण द्रढयति—'अत एव' इति। 'बाधमाशङ्क्य' इति। ननु चरितार्थविषयस्य तक्रकौण्डिन्यन्यायस्य विषयभेदेऽपि प्रवृत्तिरिति खलु प्रस्तावः। अचिरादेशस्तु सर्वथा निरवकाशो नुटं बाधते, न हि कृते नुटयचिरादेशस्य प्रसक्तिरस्ति। ततश्च कथमिदं भाष्यं न्यायस्य विषयभेदे प्रवृत्तौ गमकं स्यात्? सत्यम्; समाने विषये गुणादीर्घोत्वानां बाधनेन चरितार्थोऽयमचिरादेशो विभिन्नविषयं नुटमनेनैव न्यायेन बाधत इत्याशयः।

केचित्तु—यत्र समाने विषये, भिन्ने वा सामान्यप्रवृत्त्युत्तरं विशेषविहितस्य प्रवृत्तियोग्यता तथाभूतोऽस्य विषयः, लोके तथैव दर्शनात्। प्रकृते तु कृते नुटयचिरादेशस्य प्रवृत्तियोग्यतायां दौर्लभ्यान्न्यायविषयत्वायोगेन निरवकाशत्वप्रयुक्तस्यैव बाधकस्य विषयभेदेऽपि प्रवृत्ताविदं भाष्यं गमकमिति वक्तुं युक्तमिति वदन्ति।

यत्तु प्रकृतन्यायस्य विषयभेदेऽपि प्रवृत्तौ 'इदमो मः' (७.२.१०८) इति व्यर्थम्। 'इदोऽय् पुंसि' (७.२.१११) 'यः सौ' (७.२.११०) इत्याभ्यामपवादभूताभ्यां त्यदाद्यत्वस्य बाधेनैवोपपत्तेः। न ह्ययादेशायादेशप्रवृत्त्युत्तरमुत्सर्गस्य त्यदाद्यत्वस्य प्रवृत्तिविघातस्तत्फलमिति वक्तुं युज्यते। लोके तक्रदानोत्तरं दधिदानादर्शनेन प्रकृतविषये बाधकप्रवृत्त्युत्तरमुत्सर्गप्रवृत्तेर्न्यायेनैव निवर्त्तयितुं शक्यत्वात्।

तन्न; विन्मतोर्लुक् टिलोपमात्रस्य बाधानापत्तेः। यत्तु

'दयतेर्दिक्' (७.४.२) इति सूत्रे द्वित्वोत्तरं दिग्यादेशस्य चारितार्थ्यं कैयटेनोक्तं तत्प्रौढ्या। ध्वनितं तेनापि तस्य तथात्वं तदुत्तरग्रन्थेन असम्भव एव बाधकत्वम्, 'विरोधस्य तद्बीजत्वात्' इति वार्त्तिकमतन्तु भाष्यकृता दूषितत्वान्न लक्ष्यसिद्ध्युपयोगि। तक्रकौण्डिन्यायोऽपि तदप्राप्तियोग्येऽचारितार्थ्यविषयो विधेयविषय एवेति 'तद्धितेष्वचामादेः' (७.२.११७) 'घातोरेकाचः' (३.१.२२) इत्यादिसूत्रेषु भाष्ये स्पष्टम्। क्वचित्तु सर्वथा अनवकाशत्वादेव बाधकत्वं यथा—ङेरामो याडादिबाधकत्वम्, न हि याडादिषु कृतेषु ङेराम् प्राप्नोति।

तस्मादयुक्तैषा न्यायस्य विषयभेदे प्रवृत्तिरित्याहुः, तच्चिन्त्यम्; न्यायानित्यत्वज्ञापनेनापि तत्सार्थक्यसम्भवात्। 'अनाप्यकः' (७.२.११२) इत्यादिना त्यदाद्यत्वबाधाभावस्य स्यतासिभ्यां तिबादिबाधाभावस्य च तत्फलत्वोपपादने बाधकाभावाच्चेति दिक्।

'तदुत्तरग्रन्थेन' इति। तत्र हि दिग्यादेशमुपक्रम्य नैवमनवकाशः, कृते द्विर्वचने प्रवृत्त्यविघातात्। अथ पुनराप्येवमनवकाशं मन्यसे, तदा लक्ष्यदोषप्रसङ्ग इत्युक्तम्। तत्र 'अथ पुनः' इत्याद्युक्तग्रन्थेन चारितार्थ्यप्रतिपादनपरस्य पूर्वग्रन्थस्यारुचिग्रस्तत्वमुपाध्यायो मन्यते। 'वार्तिकमतम्' इति। असति खल्वपि सम्भवे बाधनं भवति, अस्ति च सम्भवो यदुभयं स्यादिति 'तद्धितेष्वचामादेः' (७.२.११७) इत्यत्र प्रतिपादितम्। अत्रेत्थं वार्त्तिकमतप्रपञ्चः। तक्रकौण्डिन्यायो नात्र शास्त्रे आश्रायितुं शक्यते। तक्रदानोत्तरं तस्यामेव व्यक्तौ दधिदानस्य प्रवृत्तियोग्यतायामपि विशेषविहितेन तक्रदानेन दधिदानस्य बाधो दृश्यते। शास्त्रे तु 'दिग्यः' इत्यादौ प्रवृत्ते सामान्ये व्यक्त्यन्तरे 'प्रवृत्तियोग्येन विशेषविहितेनोत्सर्गबाधनम्' इति न्यायाननुगुणत्वात्। किञ्च फलाभावोऽपि न्यायाश्रयणे। तथा हि—सामान्यशास्त्रप्रवृत्युत्तरकालिकं चारितार्थ्यमादाय विशेषविहितस्य लब्धावकाशतया प्रकृतविषये विप्रतिषेधशास्त्रबलादेवोत्सर्गनिवृत्तिसिद्धौ किमनेन

न्यायेन ? 'विप्रतिषेध' (१.४.२) सूत्रे च न केवलमेकस्य द्विकार्ययोगात्मक एव विरोधे बाधकताबीजम्, अपि तु भिन्नविषययोरपि कार्ययोर्योगपद्येन प्रवृत्त्यसम्भवरूपोऽपीति स्पष्टमन्यत्र ।

अत एव 'शिष्टात्' इत्यादौ परेण तातङादिना शानावदिर्बाध्यते । अथ परत्वाभावो यत्र बाधकस्य यथा—'परमस्रजिष्टः, सुश्रयिष्टः' इत्यादौ विन्मतोर्लुका टिलोपस्य बाधने, तत्र पूर्वविप्रतिषेधाश्रयणेन निर्वाहः । न च 'आहः, अह्नोभ्याम्' इत्यादौ रत्वरुत्वयोरसिद्धत्वात्प्राप्तस्य नलोपस्य बाधनमेतन्न्यायप्रयोजनमिति वाच्यम् । 'अहन्' (८.२.६८) इति सूत्रस्यावृत्त्या नलोपाभावनिपातनेन तदुपपत्तेः । न च 'यशांसि, पयांसि' इत्यादौ झलन्तलक्षणस्य नुमो 'मिदचोन्त्यात्' (१.१.४७) परत्वेन स्थानेयोगत्वस्य बाधनमेतन्न्यायस्यानन्यथासिद्धं प्रयोजनम्, न हि तत्र विप्रतिषेधशास्त्रेण व्यवस्था सम्भवति विरोधाभावादिति वाच्यम् । 'गुणानाञ्च परार्थत्वात्' (जै.सू. २.१.२२) इति न्यायेन परस्परमनन्विताभ्यामेव ताभ्यां पृथक् प्रधानोपकारेण लक्ष्यसंस्कारे चरमव्यञ्जनविशिष्टस्यैकया साधुत्वम्, अपरया च तद्विरहितस्येति विरोधस्य सुवचत्वात्, तस्मादिह शास्त्रे तादृशन्यायस्यानाश्रयणमेवेति ।

'भाष्यकृता दूषितत्वात्' इति । द्वित्वनिष्पन्नस्यापि सादृश्यमूलकाभेदाध्यवसायेन तद्व्यक्तित्वस्य सुवचत्वान्न लोकन्यायवैगुण्यसम्पादको व्यक्तिभेदः । अन्यथा द्विष्प्रयोगात्मके द्विर्वचने तथाविधस्य धातुत्वादिकमपि दुर्वचं स्यात् । किञ्च 'परमस्रजिष्टः' इत्यादौ टिलोपवारणाय पूर्वविप्रतिषेधाश्रयणे क्लेशः । वस्तुतष्टिलोपविन्मतुल्लोपयोर्योगपद्येन प्रवृत्तौ विरोधाभावादेतादृशे विषये विप्रतिषेधशास्त्रप्रवृत्तेरनुपपत्तिरेव । न च विरोधाभावाट्टिलोपविन्मतोर्लुको यौगपद्येन प्रवृत्तौ 'लक्ष्ये लक्षणस्य' इति न्यायेन पुनष्टिलोपाप्रवृत्त्या निर्वाहान्नैतन्न्यायोपयोग इति वाच्यम् । विन्मतुर्लुका टिभागादधिकस्यापि लुप्ततया टिलोपमाश्रकृतविकाराभावेन सल्लक्ष्यत्वस्य दुर्वचत्वेन पाश्चात्यटिलोपप्रवृत्तिवारणस्य प्रकृतन्यायैकशरणत्वात् ॥५७॥

निर्दिश्यमानस्य व्यवधानात्। तत्र 'स्वस्य पूर्वं प्रवृत्तिः' इत्येव तेषां बाधः, तत्र बाधके प्रवृत्ते यद्युत्सर्गप्रवृत्तिरस्ति, तदा भवत्येव सः। यथा तत्रैव याडादयः। अप्राप्तौ तु न। यथा—'पचेयुः' इत्यादौ दीर्घबाधके निरवकाशे, इयादौ दीर्घाभावस्तदेतत्पठ्यते।

५८. क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति। अपवादशब्दोऽत्र बाधकपरः। तदुक्तं 'गुणो यङ्लुकोः (७.४.८२) इत्यत्र भाष्ये। अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्ते। 'अजीगणत्' अत्र गणेरीत्वमपवादत्वाद्धलादिश्शेषं (७.४.६९) बाधते। न गणेरीत्वमपवादत्वात् 'हलादिश्शेषं' (७.४.६०) बाधते। किं तर्हि 'अनवकाशत्वात्' इति ग्रन्थेन। गण्रूपाभ्यासान्तस्य ईत्वमित्यर्थं हलादिश्शेषेण (७.४.६०) तन्निवृत्तौ तदनवकाशः। ईत्वे तु कृते तदप्राप्तिरन्त्यहलोऽभावात्। अभ्यासविकारेषु बाध्यबाधकभावाभावेन च साधितम्। तस्मिंश्च सति लोपे कृते सामर्थ्याच्छिष्टस्यान्त्यस्येत्वमिति न दोषः।

अपि च 'गुणानाञ्च परार्थत्वात्' (जै. सू. ३.१.२२) इति न्यायेन प्रदेशेषु परस्परमनन्वयेऽपि विध्येकवाक्यतया लक्ष्यसंस्कारकमहावाक्यार्थबोधकाले परस्परसम्बन्धे बाधकाभावः। अन्यथा तथाविधबोधकालिकस्थानेयोगत्वस्य 'इको गुणवृद्धी' (१.१.३) इत्यादिभिरप्यनन्वयप्रसङ्गः। तस्मादुक्तन्यायेनैव 'यशांसि' इत्यादौ 'मिदचोन्त्यात्परत्वं' (१.१.४७) स्थानेयोगत्वस्य निवर्त्तकम्। एवं 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' (६.६.९७) इत्यादिभिः 'द्वीपम्' इत्यादौ 'आदेः परस्य' (१.१.५४) 'अलोऽन्त्यस्य' (१.१.५२) इत्याभ्यामाद्यन्तयोरादेशद्वयप्रसङ्गोऽप्यनेनैव न्यायेन वारणीय

इत्यवश्याश्रयितव्योऽयं न्यायः । अतिप्रसङ्गस्त्वनित्यत्वेन परिहरणीय इति भाष्यकाराणामाशयः ।

'न लक्ष्यसिद्ध्युपयोगि' इति । यथोत्तरं हि मुनीनां प्रामाण्यमिति भावः । 'भाष्ये स्पष्टम्' इति । अनवकाशविषयत्वं 'तद्धितेष्वचाम्' (७.२.११७) इत्यत्र, विधेयविषयत्वन्तु 'धातोरेकाच' (३.१.२२) इत्यत्रास्य न्यायस्य भाष्ये प्रतिपादितमित्यर्थः । नन्वपवादेन बधितस्योत्सर्गस्य पुनरप्रवृत्तिः । अन्यथा द्वितीयद्विर्वचनविषयेऽपि प्रथमद्विर्वचनस्य प्रवृत्तिः स्यादिति खलु व्यवस्था, ततश्च 'अपवादविषयेऽप्युत्सर्गोऽभिनिविशते' इति प्रवादस्य का गतिरत आह—'क्वचित्' इत्यादि । 'बाधकपरः' इति । विशेषविहितत्वाविषेऽपि यश्च प्रकृतन्यायबलाच्चारितार्थ्यमूलकत्वेनान्यं बाधते सोऽपवादः । यस्तु 'सर्वे ब्राह्मणा भोज्यन्तां, माठरकौण्डिन्यौ परिवेविष्टाम्' इति न्यायमूलकतया सर्वथा निरवकाशत्वेनान्यं बाधते स बाधक एव नापवादः । यद्यपि बाधकत्वं परनित्यादिसाधारणं तथापि निरवकाशत्वेन बाधके बाधकशब्दस्य योगरूढिरिति भावः । 'तदुक्तम्' इति । क्वचिदपवादशब्दस्य लक्षणया बाधकपरत्वं सर्वथा निरवकाशत्वेन बाधकेनापवादपदशक्यत्वमिति यत्तदित्यर्थः । तत्राद्यम् 'अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्ते' (व्या. प. २३) इत्यनेन । द्वितीयन्तु न गणेरीत्वमपवादत्वाद्धल दिश्शेषं बाधत इत्यनेनेति विवेकः ।

'तदनवकाशे' इति । न च स्थानिवद्भावेन गणरूपत्वं सुलभमिति वाच्यम् । अभ्यासत्वेनानर्थक्यादर्थवत्येव स्थान्यादेशभावविश्रान्तेः । एकदेशविकृतन्यायेनापि न तद्रूपलाभः । अक्तपरिमाणधर्मत्वादित्याशयः । 'सामर्थ्याच्छिष्टस्य' इति । सामर्थ्याद्भूतपूर्वगत्या स्थानिवद्भावेन, लोकन्यायेन वा निर्वाह इति भावः । यद्यपि 'गणो योऽभ्यासः' इत्युक्ते हलादिशेषोत्तरं सामर्थ्याश्रयणमन्तराऽप्यादेशप्रवृत्तिस्सुवचा, तथापि निरवकाशत्वप्रतिपादनपरभाष्यबलात् 'गणरूपस्याभ्यासस्य' इति सामानाधिकरण्यमाश्रयणीयमित्याशयेनैवमुक्तम् । फलन्तु मृग्यम् । एवञ्च उत्सर्गप्रवृत्तिप्रतिबद्धप्रवृत्तिको बाधकस्तत्प्रवृत्त्यप्रतिबद्धप्रवृत्तिकस्त्वपवाद इति निष्कर्षः ।

न च 'येन नाप्राप्ति' (प. ५७) न्यायेन अपवादत्वमप्यस्य सुवचम्। तस्य चरितार्थविषयताया उक्तत्वात्। 'इको झल्' (१.२.९) इति सूत्रे भाष्ये ध्वनितमेतत्। तत्रा हि 'अञ्चेः' (६.४.१३९) इति दीर्घेण गुणोत्तरं फलाभावेन अनवकाशत्वाद्गुणे बाधिते, दीर्घोत्तरं गुणः स्यात्। दीर्घविधानन्तु मिनोतेर्दीर्घे कृते 'सनि मीमा' (७.४.५४) इत्यत्र मीग्रहणेन ग्रहणेऽर्थवत्। अत्रा पश्चात्प्राप्तगुणबाधनार्थं 'इको झल्' (१.२.९) इति कित्त्वमित्युक्तम्। अन्यथा अपवादत्वेन बाधे, तद्विषये उत्सर्गाप्रवृत्तौ भाष्यस्य सूत्रस्य चासङ्गतिः स्पष्टैव।

यत्तु 'काञ्चनी' इत्यादावपवादमयड्विषयेऽप्यण् भवति, क्वचिदपवादविषयेऽपि' इति न्यायादिति? तन्न; 'अण् कर्मणि च' इति सूत्रस्थभाष्यविरोधात्। तत्रा ह्यणः पुनर्वचनमपवादविषयेऽनिवृत्त्यर्थं 'गोदायो व्रजति' इत्युक्तम्। 'काञ्चनी' इत्यादौ काञ्चनेन निर्मितेत्यर्थे शैषिकोऽण् बोध्यः। अत्रेदं बोध्यम्—'येन नाप्राप्ते' (प. ५७) इत्यत्र 'येन' इत्यस्य यदि स्वेतरेणेत्यर्थः। तदा स्वविषये 'स्वेतरद्यदप्राप्नोति तत्तद्बाध्यम्'। विध्यन्तराप्राप्तविषयाभावात्।

अथ सर्वथा निरवकाशविषयेऽप्युत्सर्गकर्तृकावश्यकप्राप्तिरेव बाधकत्वोपजीव्यतया प्रकृतन्यायः, तदंशेऽप्यपवादत्वं कुतो न साधयतीत्याशयेन शङ्कते—'न च' इति। 'दीर्घविधानम्' इति। 'अज्ग्रहणमजादेर्द्वितीयस्यैवेत्यस्य' इत्युभयविधार्थलाभायेति भावः। 'मीग्रहणेन' इति। ननु दीर्घान्तस्य मिनोतेर्लाक्षणिकत्वान्मीनातिग्रहणेन कृतार्थेन मिग्रहणेन कथं ग्रहणं स्यात्? सत्यम्; 'गामादाग्रहणेष्वविशेषः' (प. १०६) इति मीग्रहण-

विषये लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्त्या तत्साहचर्यान्मीग्रहणेऽप्यनित्या सा न प्रवर्त्तत इत्याहुः ।

न च दीर्घप्रवृत्तावप्रवृत्तौ वा कित्त्वाभावादस्यामवस्थायामेज्विषयत्वेन 'मीनाति, मिनोति' इत्यात्वे मात्रहणेन ग्रहणादिस्भावोपपत्त्या व्यर्थमेव दीर्घविधानमिति सामर्थ्यादेव गुणनिवृत्तौ निरर्थकमेव कित्त्वमिति वाच्यम् । 'सनि मीमा' (७.४.५४) इत्यत्र मीग्रहणादस्यामप्यवस्थायां 'मीनाति, मिनोति' इत्यात्वस्य सन्यप्रवृत्तिकल्पनेनादोषात् । अन्यथा सामर्थ्यमूलकत्वेन गुणनिवृत्तिकल्पनायां ण्यन्तात्सनि 'ह्रीप्सति' इत्यत्र 'णेरनिटि' (६.४.५१) इति णिलोपस्यापि विनिगमनाविरहादप्रवृत्तौ महदनिष्टमापद्येतेति, णिलोपस्तु प्रयोजनमित्यादिना भाष्ये स्पष्टमिति दिक् ।

'शैषिकोऽण्' इति । शेष इति विधिसूत्रविहितोऽणित्यर्थः । 'वृद्धाच्छः' (४.२.११४) इति त्वधिकारविषयः, न तु विधिविषय इत्याशयः । परनित्यान्तरङ्गेभ्यः प्रकृते विशेष इत्याह —'अत्रेदं बोध्यम्' इति । 'अनवकाशत्वेन बाधेऽपि' इति । लक्ष्यानुरोध एव बाध्यसामान्यचिन्ताबाध्यविशेषचिन्तयोराश्रयणे बीप्रधानं जमतस्सत्युदाहरणे कुतो न तयोः प्रवृत्तिरनवकाशविषये स्यादित्याशयः ।

इयमेव हि बाध्यसामान्यचिन्तेति व्यवह्रियते । अनवकाशत्वेन बाधेऽप्येषा वक्तुं शक्या यद्युदाहरणमस्ति । विनिगमनाविरहात् । यदि तु 'येन' इत्यस्य 'लक्षणेन' इत्यर्थः, अथकार्येण इत्यर्थो वा तदा बाध्यविशेषचिन्ता । अनवकाशत्वेन बाधेऽपि एतद्बाधेन सार्थक्यम्, उत तद्बाधेन, एवं विशेषचिन्तासम्भवो य दाहरणमस्ति । तत्र येन कार्येणेत्यर्थे पररूपत्वावच्छिन्ने कार्ये प्राप्ते आरभ्यमाणाया वृद्धेस्तद्बाधकत्वे निर्णीते किं शास्त्रविहितस्य ? इत्येवं तद्विशेषचिन्तायामाह—

५९. पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते, नोत्तरान्।

अवश्यं स्वपरस्मिन्बाधनीये प्रथमोपस्थितानन्तरबाधेन चारितार्थ्ये पश्चादुपस्थितस्य ततः परस्य बाधे मानाभाव आकाङ्क्षानिवृत्तेः। 'विप्रतिषेधशास्त्रबाधे मानाभावाच्च' इति तस्य बीजम्।

'अबुदाहरणमस्ति' इति। नेदं सन्देहपरम्। उदाहरणास्य प्रसिद्धत्वात्। अपि तूदाहरणाभाव अत्र त्रयोरनवकाशविप्रये प्रवृत्त्यभावहेतुः। इह तूदाहरणं प्रसिद्धमस्त्येवेति तयोः प्रवृत्तिरपरिहार्या भवतीत्येवन्तात्पर्यकम्। उदाहरणन्तु गुणदीर्घौत्वानामचिरादेशेन बाधो बाध्यसामान्यचिन्तायाः। बाध्यविशेषचिन्तायास्तु 'अतो गुणे' (६.१.९७) इत्यनेन 'अकः सवर्णे दीर्घः' (६.१.१०१) इत्यस्यैव बाधः, न तु 'प्रथमयोः' (६.१.१०२) इत्यस्यापीत्यादि द्रष्टव्यम्।

'लक्षणेनेत्यर्थः' इति। अत्र पक्षे लक्ष्ये प्राप्तिः कार्यद्वारिका स्वीकारणीयेति क्लेशमुद्भाव्याह—'कार्येणेत्यर्थः' इति। अत्र पक्षे कार्याणामेवापवादापवादकभावः, शास्त्राणान्तु तद्वारक इति द्रष्टव्यम्। अथ विशेषचिन्तायां विशेषाः।

सूत्रपाठे प्रथमतः पठितानि विशेषशास्त्राणि सामान्यशास्त्रान्तरापेक्षया 'सन्निहितान्यैव तानि बाधन्ते न व्यवहितानि' इति परिभाषार्थः। 'मानाभावाच्च' इति। तेन 'अवेहि' इत्यत्र 'ओमाङोः' (६.१.९५) इति पररूपमेव साधु। न तु 'प्रतिलक्षणा' (६.१.८९) वृद्धिरिति।आशयः ॥९९॥

'नासिकोदरौष्ठजङ्घादन्त' (४.१.८५) इत्यस्य ओष्ठाद्यंशे ङीन्निषेधत्वावच्छिन्नबाधकत्वे निर्णीते, 'किंविहितस्य' इत्याकाङ्क्षायामाह—

६०. मध्येपवादाः पूर्वान् विधीन् बाधन्ते, नोत्तरान् ।

तेनौष्ठादिषु पञ्चसु 'असंयोगोपधात्' (४.१.५४) इति प्रतिषेध एव बाध्यते । न तु 'सहवविधमानलक्षणः' (४.१.५७) इति 'नासिकोदर' (४.१.५५) इत्यत्र भाष्ये स्पष्टम् । पूर्वोपस्थितबाधे नैराकाङ्क्ष्यमस्या बीजम् ।

सामान्यशास्त्राणां मध्ये पठितानि विशेषशास्त्राणि स्वापेक्षया पूर्वभूतान्येव तानि बाधन्ते, न तु पराणीत्यर्थः । 'असंयोगोपधादिति प्रतिषेधः' इति । प्रसज्यप्रतिषेध एवायं, न तु पर्युदास इति भाष्यसूत्ररसः ।

'हेरपि विकल्पः स्यात्' इति । ननु 'सेर्हिः' इत्येव सिद्धे अपिदुग्रहणात्तावत एवोत्तरत्रानुवृत्तिरिति नायं दोषः । न च 'हिः' इत्युक्ते 'ङिच्च' (१.१.५३) इत्यन्तादेशप्रसङ्ग इति वाच्यम् । तातङ्न्यायेन सर्वादेशत्वसिद्धेः । न चैवमप्यस्य सानुबन्धकत्वे 'क्रियासमभिहारे लोट्' (३.४.२) इति विहितस्य निरनुबन्धकस्यैव 'तुह्यादिभ्यः' (६.४.१०१) इत्यादौ ग्रहणं स्यान्न त्वेतस्य 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' (प. ८३) इति न्यायादिति वाच्यम् । 'लोटो हिडस्वौ' इति तस्यापि सानुबन्धकस्यैव विधाने बाधकाभावादिति चेत् ? सत्यम्; स्थानिनः सिपः पित्त्वेनानुदात्तत्वादन्तरतम्यादादेशस्य प्रसक्तस्य तादृशस्वरस्य सामर्थ्याद्धारणायापिदग्रहणस्य सार्थक्यादुक्तदोषो दुर्वार इति विभावनीयमित्याहुः ॥६०॥

ननु 'वा च्छन्दसि' (६.१.१०६) इत्यनेन 'सेर्ह्यपिच्च' (३.४.८७) इत्यनन्तरस्यापित्त्वस्येव हेरपि विकल्पः स्यात् । तथा 'नेटि' (७.२.४) इति निषेधोऽनन्तरहलन्तलक्षणाया इव सिचिवृद्धिमृजिवृद्ध्योरपि स्यादत उक्तन्यायमूलकमेवाह—

६१. अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा ।

अत एव 'संख्याव्ययादेः' (४.१.२६) इति ङीब्ग्रहणं चरितार्थम् । तद्धयनन्तरस्य ङीषो विध्यभावाय । एवं 'न क्तिचि' (६.४.३९) इति सूत्रे दीर्घग्रहणं चरितार्थम् । तद्धयनन्तरस्य 'अनुदात्तोपदेश' (६.४.५७) इत्यस्यैव निषेधाभावाय । 'मध्येऽपवादाः' (प. ६०) इति न्यायापेक्षया 'अनन्तरस्य' (प. ६१) इति न्यायः प्रबल इति 'अष्टाभ्यः' (७.१.२१) इति सूत्रे कैयटः । प्रत्यासत्तिमूलकोऽयं लक्ष्यानुरोधाच्च व्यवस्थित इत्यपि पक्षान्तरम् । तत्र तत्र स्वरितत्वप्रतिज्ञानात्सामर्थ्येन वा बाध्यतेऽयं न्यायः । यथा 'टिड्ढा' (४.१.१५) इति सूत्रेण टापा व्यवहितस्यापि ङीषो विधिः । 'न षट्' (४.१.१०) इत्यादि द्वयोरपि टाप्ङीषोः प्रतिषेधः । इयञ्च 'शि सर्वनामस्थानम्' (१.१.४२) इत्यादौ भाष्ये स्पष्टेत्यन्यत्र विस्तरः ॥६१॥

'दीर्घग्रहणञ्च' इति । अस्यां परिभाषायामंशद्वयं विधिः, प्रतिषेध इति । तत्र विध्यंशे 'संख्याव्ययादेः' (४.१.२६) इति सूत्रस्थं ङीब्ग्रहणं ज्ञापकम् । प्रतिषेधांशे चैतद्दीर्घग्रहणमिति भावः । 'अष्टाभ्यः' इति । तत्र हि औशस्तु लुक्, तत्र षड्भ्योऽप्येवं प्रसज्यते । अपवादो यस्य विषये यो वा 'तस्मादनन्तरः' इति 'अष्टपुत्रः' इत्यादावुत्तरपदपरत्वावस्थायां सामासिकलुग्बाधकतया प्रसक्तस्यौशादेशस्य वारणाय प्रवृत्तस्य भाष्यकारोपवर्णितस्य श्लोकवार्तिकस्य व्याख्यावसरे यो वा तस्मादिति प्रतीकमुपादाय कैयटेनोक्तम् ।

'ननु मध्येऽपवाद(प.६०)न्यायेन द्वितीयाध्यायविहितसामासिकलुक एव बाधः प्राप्नोति । नैष दोषः; यत्र हि द्वावपि विहितौ पूर्वोत्तरौ, तत्र पूर्वानुभवाहितसंस्कारोपजनितस्मृत्युपारूढस्य पूर्वस्य बाधो युक्तः । इह त्वनेकाध्यायव्यवहितो द्वितीयाध्यायविहितः सामासिको लुक् महता

प्रयत्नेन स्मरणीयः । अनन्तरस्त्वनुभवविषय इति स एव बाध्यते इत्युक्तम् । एवञ्च मध्येऽपवादन्यायात् (प.६०) अस्य प्राबल्यं स्पष्टमेव तेनाभिहितमिति भावः ।

'तदाह कैयटः' इति । 'पक्षान्तरम्' इति । अत्र कैयट एवाहेति शेषः । 'ङीपो विधिः' इति । ङाप एव विधाने त्वदन्तत्वाट्टापैव सिद्धे, सूत्रमेव व्यर्थं स्यादिति बोध्यम् । 'भाष्ये स्पष्टा' इति । तत्र हि 'अनपुंसकस्य' (१.१.४३) इति प्रसज्यप्रतिषेध इति 'शि सर्वनामस्थानम्' (१.१.४२) इत्यस्यापि प्रतिषेधः स्यादित्याशङ्क्य, अनेन न्यायेन समाहितमिति द्रष्टव्यम ।

ननु 'दधति' इत्यादावन्तरङ्गत्वादन्तादेशेऽल्विधौ स्थानिनित्त्वाभावाददादेशो न स्यादिति तद्वैयर्थ्यापत्तिरत आह—

६२. पूर्वं ह्यपवादा अभिनिविशन्ते, पश्चादुत्सर्गाः ।

लक्षणैकचक्षुष्को ह्यपवादविषयं पर्यालोच्य, तद्विषयत्वाभावनिश्चये उत्सर्गेण तत्तल्लक्ष्यं संस्करोति । अन्यथा विकल्पापत्तिरित्यर्थः । अभिनिविशन्तीत्यस्य बुद्ध्यारूढा भवन्तीत्यर्थः । 'अपवादो यद्यन्यत्रा चरितार्थः' इति न्यायस्य तु नात्र प्राप्तिः, अन्तादेशाप्राप्तिविषये चारितार्थ्याभावात् । लक्ष्यैकचक्षुष्कस्तु तच्छास्त्रपर्यालोचनं विनाऽपि अपवादविषयं परित्यज्य, उत्सर्गेण लक्ष्यं संस्करोति, तस्यापि शास्त्रप्रक्रियास्मरणपूर्वकमयोगे एव धर्मोत्पत्तेस्तदाह—

६३. प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते ।

अत्राभिनिवेशनक्रियायाः कर्मत्वेन लक्षणैकचक्षुष्कः सम्बध्यत इत्याशयेनाह—'लक्षणैकचक्षुष्कः' इत्यादि। लक्षणेनैव यस्य लक्ष्यपरिज्ञानं सोऽसावस्मदादिर्लक्षणैकचक्षुष्कः। अत्रायं क्रमः—प्रथमुत्सर्गशास्त्रीयसामान्यवाक्यार्थः। पदपदार्थोपस्थितौ तादृशवाक्यार्थस्यापरिहार्यत्वात्। पश्चाद्बाधकसम्भावनायां तदाकाङ्क्षया बुद्धयारूढस्यापवादशास्त्रस्य विषयविशेषपरिज्ञानोपयोगी विशेषवाक्यार्थः। ततस्तदीयविषयपरिहारेणोत्सर्गशास्त्रीयो लक्ष्यसंस्कारको महावाक्यार्थ इति। एवं च 'इको यणचि' (६.१.७७) इत्यादेरसवर्णाच्प्रत्याहारघटकवर्णाव्यवहितपूर्वत्वोपहितस्य, इकप्रत्याहारघटकवर्णस्य 'यण्' इत्यादिरर्थ इति सवर्णाज्ञ्वटिते 'श्रीशः' इत्यादौ उत्सर्गशास्त्रीयलक्षणोपप्लवाभावादपवादभूतेन सवर्णदिर्घादिना न विकल्प इति बोध्यम्।

'चारितार्थ्याभावात्' इति। 'जक्षति' इत्यादौ समकालप्राप्तान्तादेशबाधनेन चरितार्थस्यादादेशस्य 'दधति' इत्यादौ पूर्वोपस्थितनिमित्तकेनान्तरङ्गेणान्तादेशेन बाधनसम्भवाद्युक्तमेवास्यापवादोऽपि 'यद्यन्यत्र' इत्येतन्न्यायविषयत्वमिति पूर्वपक्षः। 'जक्षति' इत्यादावप्यभ्यस्तसंज्ञा प्रवृत्त्युत्तरभावी खल्वदादेशः संज्ञाप्रवृत्तिप्राग्भावी चान्तादेश इति कथं तयोः समकालप्राप्तिकत्वं लक्ष्यानुरोधाच्चात्र कार्यकालपक्षस्यैवाश्रयणमतः सर्वथाप्यचरितार्थ एवादादेश इति सिद्धान्तः।

उत्तरपरिभाषां लक्ष्यैकचक्षुष्कपरतया योजयितुमवतारयति—'लक्ष्यैकचक्षुष्कः' इति। लक्षणज्ञानानधीनलक्ष्यपरिज्ञानवान् यः स लक्ष्यैकचक्षुष्कः। 'लक्ष्यं संस्करोति' इति। ननु लक्ष्यपरिज्ञानार्थत्वाल्लक्षणस्य यस्य स्वत एव लक्ष्यपरिज्ञानं लक्ष्यैकचक्षुष्कस्य योगिनस्तस्य किं शास्त्रेण ? इत्यत आह—'तस्यापि' इति। 'धर्मोत्पत्तेः' इति। 'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति' इति श्रुतिरिह प्रमाणम्। अवयवार्थपूर्वकं ज्ञातार्थः, शास्त्रेण संस्कृतः। शिक्षोक्तविधिना प्रयुक्तः। एकोऽपि शब्दः स्वर्गे कामितफलप्रदो भवतीति तदर्थः। कार्यमात्र-

स्य योगिभिर्धर्मबुद्ध्यैवाचरणाच्छब्दःप्रयोगानुष्ठानुष्ठानस्यापि धर्मार्थित्वान्यथानुपपत्त्या तेषां शास्त्रीयप्रक्रियास्मरणमावश्यकमित्याशयः ।

तत इत्यस्यापवादशास्त्रपर्यालोचनात्प्रागपीत्यर्थः । 'प्रकल्प्य' इत्यस्य परित्यज्येत्यर्थः । अत एव प्रातिपदिकार्थसूत्रे भाष्ये इदं द्वयमप्युक्त्वा न कदाचित्तावदुत्सर्गो भवत्यपवादं तावत्प्रतीक्षते इत्यर्थकमुक्तम् । एतन्मूलकमेव नवीनाः पठन्ति ॥६३॥

६४. उपजनिष्यमाणनिमित्तोऽप्यपवाद उपसंज्ञातनिमित्तमप्युत्सर्गं बाधते इति ।

यत्तु अभ्यस्तसंज्ञा(६.१.५)सूत्रे कैयटेन 'प्रकल्प्य' इति प्रतीकमुपादाय, यथा 'न सम्प्रसारणे' (६.१.३७) इति परस्य यणः पूर्वं सम्प्रसारणं पूर्वस्य तु तन्निमित्तः प्रतिषेध इत्युक्तम् । तत्तु 'ततः' इत्याद्यक्षरार्थाननुगुणम् ।

अत्र लक्ष्यैकचक्षुष्कः कर्म । ननु 'ततः' इत्यस्य अपवादशास्त्रपर्यालोचनानन्तरमित्यर्थस्य, पुरस्फूर्तिकतया पूर्वपरिभाषापेक्षया न वैलक्षण्यं, लक्ष्यैकचक्षुष्कविषयकत्वमप्यस्या असङ्गतं अपवादविषयपरिज्ञानाय तेषां लक्षणानपेक्षणादत आह—'प्रागपीत्यर्थः' इति । ननु तथा सति प्रकल्प्येत्यसम्बद्धम् । तस्य परिकल्पानर्थकत्वात्, तस्याश्च लक्षणैकचक्षुष्कानुरोधिशास्त्रपर्यालोचनापूर्वकत्वादत आह—'परित्यज्येत्यर्थः' इति । इत्थं पूर्वपरिभाषां लक्षणैकचक्षुष्कविषयतया, प्रकृतपरिभाषां लक्ष्यैकचक्षुष्कपरतया च व्यवस्थाप्य, तत्र भाष्यप्रमाण्यं दर्शयति—'अत एव' इति । अधिकारिभेदेन व्यवस्थापनादेवेत्यर्थः । 'इत्यर्थकमुक्तम्' इति । तत्र हि भाष्ये तिङ्कृत्तद्धितसमासैरभिहिते कर्त्रादौ प्रथमेत्यर्थकं 'अभिहिते प्रथमा'

इति कात्यायनोक्तं लक्षणमुपक्रम्य 'देवदत्तः पचति' इत्यादौ तिङुत्पत्तेः पूर्वं तिङभिहितकर्त्रादेरभावात्प्रथमैवेति नियमाभावो न सामान्यशास्त्रप्राप्तानां द्वितीयादीनामनिवृत्तत्वादप्रथमासामानाधिकरण्यलक्षणयोरपवादभूतयोः शतृशानचोः प्रवृत्तिविषयतया तिङामनुत्पत्तौ तदभिहितकर्त्रादिनिबन्धनायाः अप्रवृत्तिरित्याशङ्कां समर्थयितु न चापवादविषये उत्सर्गोऽभिनिविशते, पूर्वं ह्यपवादा अभिनिविशन्ते, पश्चादुत्सर्गाः। प्रकल्प्य चापवादविषयं, तत उत्सर्गोऽभिनिविशते, न तावदत्र कदाचित्तिङादेशो भवति, अपवादौ शतृशानचौ तावत्प्रतीक्षत इत्युक्तम्, तत्र 'कदाचित्' इत्यस्य लक्ष्यैकचक्षुष्कस्य, लक्षणैकचक्षुष्कस्य वा लक्ष्यसंस्कारकाले इत्यर्थ इत्याशयः।

नन्वेताभ्यामेव परिभाषाभ्यां निर्वाहादुपजनिष्यमाणनिमित्तोऽप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधत इति परिभाषान्तरं किमित्याश्रीयते, तत्राह—'एतन्मूलकमेव' इति। 'अभ्यस्तसंज्ञासूत्रे कैयटेन' इति। अयमत्र कैयटाशयः—व्यक्तिपक्षे प्रतिलक्ष्यं लक्षणोपप्लवेन संस्कारादपवादशास्त्रीयलक्ष्यविषयकत्वेन विनिगमनाविरहादुपप्लुतस्य सामान्यशास्त्रीयस्यापि लक्षणस्य निरवकाशत्वादुत्सर्गापवादयोस्तदंशे पर्यायताप्रसक्तौ वासरूपसूत्राद्यारम्भबलेन तन्निवारणोपायतया प्रथममपवादशास्त्रीयो लक्ष्यसंस्कारः, पश्चादपवादेन व्याप्ते लक्ष्ये स्वविषयत्वाभावात्तद्व्यतिरिक्तलक्ष्यविषयकत्वेन उपप्लुतैर्लक्षणैरुत्सर्गशास्त्रीयो लक्ष्यसंस्कार इति, 'पूर्वं ह्यपवादाः'—(प.६२) इत्ययं न्यायः।

जातिपक्षे तु एकेनैव लक्षणेन निखिलक्ष्यव्यक्तीनां संस्कारात्, तस्य च तज्जात्यवच्छिन्नेषु कतिपयलक्ष्येषु प्रवृत्त्या चारितार्थ्यादपवादशास्त्रारम्भबलात्, तदीयं विषयं परिकल्प्यैव उत्सर्गस्य प्रवृत्तिरिति प्रकल्प्येत्ययं न्यायः। न्यायद्वयेऽपि अभिनिवेशक्रियायाः कर्मत्वेनाधिकरणत्वेन वा लक्ष्यमेवाभिसम्बध्यते प्रवृत्तिरेव चात्राभिनिवेश इति। तदेतत्प्रातिपदिकार्थसूत्रे कैयटे स्पष्टम्। तत्र हि—इह दर्शनद्वयं सर्वविशेषस्वीकारेण वा उत्सर्गप्रवृत्तिः। कतिपयविशेषावगाहनेन वा। पूर्वस्मिन्दर्शने उत्सर्गस्य विषयविभागाय पूर्वमपवादः प्रवर्त्तते, पश्चात्तद्विमुक्ते विषये उत्सर्गः प्रवर्त्तते। द्वितीये तु दर्शने अपवादविषयं परिकल्प्योत्सर्गः प्रवर्तते इत्युक्तम्।

यत्तु 'अपवादवाक्यार्थं विना नोत्सर्गवाक्यार्थः' इति तदर्थ इति ? तन्न; 'अभिनिविशते, अपवादविषयम्' इत्यादिपदस्वारस्यभङ्गापत्तेः। पदजन्यपदार्थोपस्थितौ वाक्यार्थबोधाभावे कारणाभावाच्च। यत्र त्वपवादो निषिद्धस्तत्रापवादविषयेऽप्युत्सर्गः प्रवर्त्तत एव। यथा—'दृक्षौ' इत्यत्र 'नादिचि' (६.१.१०४) इति पूर्वसवर्णदीर्घनिषेधादप्रवर्त्तमानस्य वृद्धिबाधकत्वाभावाद्वृद्धिः प्रवर्त्तते। अत एव 'तौ सत्' (३.२.१२७) इत्यादि सङ्गच्छते।

'अक्षरार्थाननुगुणम्' इति। 'अपवादविषयं परिकल्प्य, उत्सर्गः प्रवर्त्तते' इत्यर्थे ल्यपैवाभिनिवेशस्योत्तरकालिकत्वलाभात् 'ततः' इत्यनर्थकमिति भावः। यदि तु ततो बाधकविषयादन्यदित्यर्थेन तदुपपत्तिरित्युच्यते, तर्हि जातिपक्षेऽपि व्यक्तावेव कार्यपर्यवसानाद्व्यक्तिभेदनिबन्धनस्य लक्षणोपप्लवस्य गलेपतितत्वालुक्षणैक्ये वा बाधकविषयत्वपरिज्ञानमन्तरेण प्रथमं तत्परिहारस्य दुर्वचत्वात्, कथमुक्तपरिभाषां जातिपक्षे व्यवस्थापयेत् ? तस्मादुक्तरीत्या लक्ष्यैकचक्षुष्कपरतयैव तद्व्यवस्थापनं युक्तं 'न सम्प्रसारणे' (६.१.३७) इति तु सामर्थ्यात्स्वविषये पूर्वस्य यणः पूर्वं सम्प्रसारणं वारयतीति स्पष्टं तत्रैव सूत्रे भाष्ये इत्याहुः।

केचित्तु लक्ष्यैकचक्षुष्कपरतया शास्त्राव्यवस्थापनमनुचितम्; तेषां शास्त्रानुपयोगात्! न हि लक्ष्यैकचक्षुष्कानधिकृत्य शास्त्रस्य प्रवृत्तिः शब्दतत्त्वविदां तेषां जिज्ञासानुपपत्तेः। शास्त्रप्रक्रियास्मरणपूर्वके साधुशब्दप्रयोगे धर्माभ्युच्चय इत्यप्ययुक्तं साधुशब्दप्रयोगे प्रयोक्तृणामभ्युदयः, साधुत्वज्ञानपूर्वके तत्प्रयोगे महानभ्युदय इत्येव पस्पशाह्निकान्तस्थभाष्यमर्यादया लाभात्। एतद्भाष्यबलात् 'एकः शब्दः' इत्यादिश्रुतौ 'शास्त्रान्वितः' इत्यस्यापि साधुत्वज्ञानविषय इत्येवार्थो न्याय्यः।

किञ्चाङ्गानां प्रधानभूतवेदोपकारकत्वेनैव पारायणादिभिर्धर्मसाधनत्वम्, न तु वेदवत्स्वरूपतः, व्याकरणस्य हि साधुत्वबोधनमुपकारः। यत्र तु साधुत्वज्ञानं प्रकारान्तरेण सिद्धं तत्र शास्त्रवैयर्थ्यमेवेति तथाभूतस्य पारा-

यणे स्मरणे वा न कश्चिद्विशेषः। तत्र तत्र प्रत्याख्यानभाष्यमप्यत एव सङ्गच्छते। शास्त्रप्रक्रियास्मरणपूर्वके साधुशब्दप्रयोगे क्लेशाधिक्याद्धर्मातिशय इत्यप्ययुक्तम्। विहितस्यैव क्लेशस्य धर्मसाधनत्वात्। अन्यथा उत्सर्गशास्त्रीयवाक्यार्थस्मरणमपेक्ष्य, बाधकशास्त्रीयवाक्यार्थस्मरणप्रयुक्ततदीयविषयपर्यालोचनापूर्वकोत्सर्गवाक्यार्थस्मरणस्य क्लिष्टत्वादपवादशास्त्रीयविषयपर्यालोचनमपि लक्ष्यैकचक्षुष्काणामावश्यकं स्यात्। ततो नायमनयोः परिभाषयोर्व्यवस्थापनप्रकारो युक्तः। किन्तु सामान्यशास्त्राणामपवादशास्त्रीयारम्भप्रयुक्तस्तदीयविषयपरिहारो द्वेधा, प्रथममपवादशास्त्रस्य लक्ष्ये प्रवृत्तौ स्वविषयत्वाभावेन तत्र प्रवृत्तेः पूर्वमेव विशिष्टवाक्यार्थबोधप्रयुक्तेन अपवादविषयत्वज्ञानेन वा।

तत्राद्ये प्रथममपवादशास्त्रीयो लक्ष्यसंस्कारः पश्चादुत्सर्गशास्त्रीयः। द्वितीये तु अपवादविषयं परित्यज्य प्रथममेव उत्सर्गशास्त्रीयलक्ष्यसंस्कारः, पश्चादपवादशास्त्रस्येत्येवमनयोः परिभाषाशास्त्रयोर्व्यवस्था। अत एव 'न कदाचित्तावदुत्सर्गोऽभिनिविशते' इत्यादि भाष्यं स्वरसत उपपद्यते। 'कदाचित्' इत्यस्य हि पूर्वं समकालं वेत्येव हि पूर्वस्फूर्तिकोऽर्थः। तत्र समकालप्राप्तोत्सर्गविषयकः प्रथमः। पूर्वकालप्राप्तिकोत्सर्गविषयको द्वितीयः। तस्य च 'न सम्प्रसारणे' (६.१.३७) इत्येव मूर्द्धाभिषिक्तमुदाहरणम्। तद्विषये ज्ञापकेन प्रथमं पूर्वस्य सम्प्रसारणवारणमपि भाष्ये प्रकृतन्यायबोधनद्वारकमेव लाघवादतो न तद्विरोध इति सुधीभिराकलनीयमित्याहुः।

'नोत्सर्गवाक्यार्थः' इति। मूकवाक्यार्थोऽपि नेति तदाशय इति मन्यते। यदि च अपवादशास्त्रीयलक्ष्यसंस्कारकवाक्यार्थात्पूर्वमुत्सर्गशास्त्रीयस्तथाभूतो वाक्यार्थो नेत्येव तदाशय इत्युच्यते, तदा नात्र वक्ष्यमाणदूषणावकाश इति ध्येयम्।

अत एव निर्देशात् भ्रष्टावसरन्यायस्यात्र शास्त्रेऽनाश्रयणम्। ध्वनितश्चेदम्—'इको गुण' (१.१.३) इति सूत्रे भाष्ये इति

भाष्यप्रदीपोद्योते निरूपितम्। अत्र देवदत्तस्य हन्तरि हते देवदत्तस्योन्मज्जनं नेति न्यायस्य विषय एव नास्ति, हते देवदत्त उन्मज्जनं न। देवदत्तहननोद्यतस्य हनेन तु भवत्येवोन्मज्जनम्। प्रकृतेऽपि न पूर्वसवर्णदीर्घण वृद्धेर्हननं, किन्तु हननोद्यमसजातीयप्रसक्तिमात्रं, प्रसक्तस्यैव निषेधात्। प्रतिपदविधित्वमपि निरवकाशत्वे सत्येव बाधप्रयोजकम्। 'स्पष्टश्चेदं शेषाद्विभाषा' (५.४.१५४) इति सूत्रे भाष्ये। तत्र हि शेषग्रहणमनर्थकम्। ये प्रतिपदं विधीयन्ते, ते बाधका भविष्यन्तीत्याशङ्क्य 'अनवकाशा विधयो बाधका भवन्ति, समासान्ताश्च कबभावे सावकाशाः' इत्युक्तम्।

'भ्रष्टावसरन्यायस्य' इति। भ्रष्टावसरो न प्रवर्तत इति न्यायः। 'अनाश्रयणम्' इति। ननु लक्षणैकचक्षुष्काणां न्यायाश्रयणं, तदनाश्रयणं वा लक्षणैकसमधिगम्यम्। अतो विना प्रमाणं नेदं युज्यते, तत्राह — 'ध्वनितञ्चेदम्' इत्यादि। 'इको गुण' (१.१.३) इति सूत्रे इत्यस्य भाष्यप्रदीपोद्योते इत्यनेनान्वयः। 'भाष्ये' इत्यस्य च 'नान्तःपादम्' (६.१.११९) इति सूत्रे इत्यादिः। एवञ्च 'नान्तःपादम्' (६.१.११९) इति सूत्रे ध्वनितमिति 'इको गुण' (१.१.३) इति सूत्रे भाष्यप्रदीपोद्योते निरूपितमित्यर्थः। 'नान्तःपदम्' (६.१.११९) इत्यत्र हि भाष्ये 'सुजाते अवश्वसूनृतः' इत्यादौ पररूपनिषेधोत्तरमुत्सर्गस्यायादेशस्य प्रसक्तिमाशङ्क्य एङोति यदत्प्राप्तं तन्नेति व्याख्यानेन बाध्यसामान्यचिन्तामूलकेन समाहितम्। प्रकृतन्यायसत्त्वे चानेनैव सिद्धौ किं तथाविधेन व्याख्यानेनेति तेनैतन्न्यायानाश्रयणं सम्यगेव। एतेन परिभाषायां वृद्धिग्रहणाभावे 'सिचि वृद्धिः' (७.२.१) इत्यनेन 'अभैत्सीत्' इत्यादौ व्यञ्जनस्यं वृद्ध्यापत्तिशङ्कायां, हलन्तलक्षणाया 'नेटि' (७.२.४) इति निषेधे, प्रकृतन्यायेनोत्सर्गभूतसिचिवृद्धिवारणपरेण तत्सूत्रभाष्येण न्यायानाश्रयणध्वननासम्भवात्तादृशभाष्यध्वनितत्वेन, तत्रत्योद्द्योते निरूपणाभावाच्च

चिन्त्यमिदमिति केषाञ्चिदुक्तिः परास्ता। 'सङ्घोदघौ' इत्यादिनिर्देशोऽपि न्यायानाश्रयणस्यैव बीजमिति तत्त्वम्।

केचित्तु कालविशेषपुरस्कारेण विहितानां क्रमप्राप्तानां वा कार्याणां मध्ये यस्यावसरो भ्रष्टः स पुनर्न प्रवर्त्तते, यथा वसन्ते विहितस्याधानादेस्तत्कालातिपत्तावनुष्ठानाभावः। यथा वा क्रमप्राप्तानामवहननादीनां स्वकालपरिभ्रंशे प्रवृत्त्यभाव इति न्यायशरीरम्। 'वृद्धिरेचि' (६.१.८८) इत्यादेश्चात्र शास्त्र ऐच्परकाकारोच्चारणकालः प्राप्त्यवसरः, स च पूर्वसवर्णदीर्घस्य 'वृक्षौ' इत्यादौ 'नादिचि' (६.१.१०४) इत्यनेन निषेधोत्तरमप्यव्याहत एवेति कथं न्यायप्रवृत्त्या वृद्धिवारणं स्यात्। 'सकृद्वसरभ्रंशे पुनरप्रवृत्तिः' इति न्यायशरीरमिति तु न युक्तम्, प्रथमे वसन्ते कस्याश्चिदनुपपत्तेरप्रवर्तमानस्याधानादेर्वसन्तान्तरे प्रवृत्तिविरोधात्। क्रमभ्रष्टानामवहननादीनां पुनः क्रमेणानुष्ठानविरोधाच्च। तस्मादत्र शास्त्रे स्वत एवाप्रवर्त्तमानस्य तादृशन्यायस्य निवर्त्तनोपयान्वेषणप्रयासो व्यर्थ एव। 'इको गुण' (१.१.३) इति सूत्रभाष्यमेकदेशिन एव सर्वेषामित्यादीत्याहुः।

नन्वेवं देवदत्तहन्तृहतन्यायेन 'वृक्षौ' इत्यादौ पूर्वसवर्णदीर्घविधिना बाधितायां वृद्धेः पुनः प्रवृत्तिर्दुर्वचा। 'अत्र देवदत्तस्य' इत्यादि। 'न्यायस्य विषय एव न' इति। उत्सर्गापवादभावमूलके सामान्यशास्त्रबाधे न्यायस्य विषयता नेत्यर्थः। यत्र त्वादेशस्य लोपः; यथा—'भवसुनु' इत्यादौ लोटस्सेर्ह्यादेशस्य लुक् तत्र न्यायविषयताऽस्त्येवेति सेरनुन्मज्जनमनेन न्यायेनेति द्रष्टव्यम्। प्रसङ्गादाह—'प्रतिपदविधित्वम्' इति। निरवकाशत्वानुपहितस्यापि तस्य बाधप्रयोजकत्वे, येन नाप्राप्तिन्यायविरोध इति तत्त्वम्। कैयटे 'विरोधिसन्निपाते' इत्यस्य बलीयांस इति शेषः। अपवादशब्दं विहाय प्रतिपदशब्दघटितत्वेन पाठादमुमेवार्थं कैयटो मन्यत इत्याशयः।

क्वचित्तु अनवकाशत्वाभावेऽपि परनित्यादिसमवधाने शीघ्रोपस्थितिनिमित्तकत्वेन पूर्वमप्रवृत्तिप्रयोजकं बलवत्त्वं प्रतिपदविधित्वेनापि। परनित्यान्तरङ्गप्रतिपदविधयो 'विरोधसन्निपाते

तेषां मिथः प्रसङ्गे परवलीस्त्वम्, इति 'प्रत्ययोत्तरपदयोश्च' (७.२.९८) इति सूत्रे कैयटेन पाठात्। अत एव 'रमे' इत्यादौ प्रतिपदोक्तत्वात्पूर्वमेवेत्वे आकारश्लेषाद्धल्ङ्यादिलोपो न प्राप्नोतीत्याशङ्क्य 'एङ् ह्रस्वात्' (६.१.६९) इति लोपेन समाहितम्।

'लोपेन समाहितम्' इति। नव्यैरिति शेषः। सन्निपातपरिभाषा (प. ८६) चानित्यत्वादिह नाश्रीयत इति तदाशयः। केचित्तु नात्र प्रतिपदोक्तत्वप्रयुक्तं हल्ङ्यादिलोपापेक्षमन्तरङ्गत्वमेत्वस्य वक्तुं युक्तम्। तस्य सावकाशविषयत्वात्। एत्वविधिश्च निरवकाशः। न हि हल्ङ्यादिलोपाप्राप्तिविषये सम्बुद्धिनिमित्तकस्य एत्वस्य क्वचिच्चारितार्थ्यं सम्भवति, ततश्च सत्यपि सम्भवे बाधनं भवतीति न्यायेन अपवादत्वात्प्रथममेत्वे, हल्ङ्यादिलोपाप्रवृत्तिरित्येव वक्तुमुचितमिति नव्यानामयं प्रमाद एवेत्याहुः। प्रतिपदोक्तत्वप्रयुक्तस्यान्तरङ्गत्वस्य फलं स्वाम्पीति। तत्र हि स्त्रीपुंसयोश्चरितार्थस्य 'अप्तृन्' (६.४.११) इति दीर्घस्य झलन्तलक्षणान्नुमः पूर्वं प्रवृत्तौ उक्तविधमेवान्तरङ्गत्वं शरणमिति ध्येयम् ॥६४॥

ननु 'अजये इन्द्रम्' इत्यादावन्तरङ्गस्यापि गुणस्यापवादेन सवर्णदीर्घेण बाधः स्यादत आह—

६५. अपवादोऽपि यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते।

निरवकाशत्वरूपबाधकत्वबीजस्याभावात्। एवञ्च प्रकृतेऽन्तरङ्गेण गुणेन सवर्णदीर्घः समानाश्रये चरितार्थो यण्गुणयोरपवादोऽपि बाध्यते। पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गविषये इदम्।

यत्तु आगमादेशयोर्न बाध्यबाधकभावः, भिन्नपलकत्वात्; अत एव 'ब्राह्मणेभ्यो दधि दीयतां, कम्बलः कौण्डिन्याय'

इत्यादौ कम्बलेन न दधिदानबाध इति 'च्छ्वोः' (६.३.१९) इति सूत्रे कैयटः, तन्नः अपवादो नुक् दीर्घत्वस्येति 'दीर्घोऽकितः' (७.४.८२) इति सूत्रस्थभाष्यविरोधात् ।

अन्तरङ्गादपवादस्य बलीयस्त्वे प्रसक्तस्यानिष्टस्य वारकत्वेन पूर्वापवादत्वादिहास्याः सन्दर्भः । एवमुत्तरत्रापि । 'अपवादोऽपि बाध्यते' इति । तथा च 'विप्रतिषेध' (१.४.२) सूत्रे वार्त्तिकम्—'इण्कृशीनामादृगुणः सवर्णदीर्घत्वात्' इति । कात्यायनोक्तलक्ष्यसाधर्म्यादन्तरङ्गविशेषविषयकत्वमेवास्य न्यायस्य कल्पयितुमुचितमित्याशयेनाह—'पूर्वोपस्थितनिमित्तकत्वरूप' इति । तेन वरुणवाचिनो वशब्दादाचारकिबन्तात्कर्तरि क्विपि, 'ऊः' इत्यत्र समानाश्रये चरितार्थस्याप्यूठो 'हिरण्यद्युः' इत्यादौ वर्णमात्राश्रयेण वलिलोपेन अन्तरङ्गेणोठो बाधाभाव इत्याशयः ।

केचित्तु 'इण्कृशीनाम्' इत्यादिकात्यायनोक्तवचनानुरोधादनुमीयमानायाः प्रकृतपरिभाषाया इडादिस्थानिकादृगुणमात्रविषयकत्वमेव युक्तम्, यत्राचार्यैः फलानि परिगणितानि, तत्रास्मदादीनां तदतिरिक्तफलकल्पनाभिनिवेशस्यायुक्तत्वात् । अत एव 'न लोक' (२.३.६७) इति सूत्रे भाष्यकारोक्तोकारप्रश्लेषः सङ्गच्छते । एवञ्च 'अध+ई, ईहत इत्यत्र 'अधेहत' इत्येव साध्वित्याहुः ।

'कैयटः' इति । विजातीययोरप्यागमादेशयोरपवाद्यापवादकभावाभ्युपगमे 'च्छ्वोः' (६.३.१९) इति सतुक्निर्देशस्य वैयर्थ्यं स्यात् । अपवादभूतेन शादेशेन तुके बाधनेनैवोपपत्तेरिति तदाशयः । 'भाष्यविरोधात्' इति । ननु नुग्विधौ 'अतः' इति तपरकरणादुत्सर्गभूतदीर्घप्रवृत्त्यनन्तरकालिकचारितार्थ्यविरहात्सर्वथा निरवकाशो नुगित्यपवादशब्दो भाष्ये बाधकपर इत्यवश्यमभ्युपेयम् । कैयटस्तु लोकदृष्टान्तबलात्सतुक्कग्रहणाच्च येन नाप्राप्तिन्यायप्रयुक्तश्चारितार्थ्यमूलकबाध्यबाधकभावात्मकापवाद्यापवादकभावो विजातीययोर्नेत्येवम्पर इति कथमुक्तभाष्येण कैयटस्य विरोधः स्यादिति चेत् ? न; तपरसूत्रे फलाभावाद्गौरवाच्च, तत्र तकारस्योच्चारणमात्रफल-

तया चारितार्थ्यमूलकबाधकत्वरूपापवादत्वस्य नुग्विधेः सूपपादत्वेन यथाश्रुतभाष्यस्यैव सामञ्जस्ये सर्वथा निरवकाशत्वरूपबाधपरत्वकल्पनाया अयुक्तत्वेन विरोधस्य दुर्वारत्वात् ।

अत एव नुको दीर्घापवादत्वप्रयुक्तमकिद्ग्रहणस्योत्तरपरिभाषाज्ञापकत्वं भाष्यकारोक्तं सङ्गच्छते । अन्यथा सर्वथा निरवकाशत्वेन बाधे बाधकप्रवृत्त्युत्तरमुत्सर्गप्रवृत्तेर्निर्विवादतया नुगुत्तरं प्रवर्त्तमानस्य दीर्घस्य वारणायाकिद्ग्रहणस्य सार्थकतया तदसङ्गतिः स्पष्टैव । तस्मादत्र शास्त्रे विजातीययोरप्यपवाद्यापवादकभावः प्रकृतबलाद्दुर्वार एव, अतिप्रसङ्गस्त्वनित्यत्वेन परिहरणीयः । सतुक्कग्रहणञ्चानित्यत्वस्यैवोपोद्बलकमित्युपाध्यायो मन्यत इत्याहुः ॥६५॥

ननु 'अजीगणत्' इत्यादौ गणेरीत्वं निरवकाशत्वद्धलादिशेषं बाधेत तत्राह—

६६. अभ्यासविकारेषु बाध्यबाधकभावो नास्ति ।

'दीर्घोऽकितः' (७.४.८२) इत्यत्राकिद्ग्रहणमस्या ज्ञापकम् । अन्यथा 'यंयम्यते' इत्यत्र नुकि कृतेऽनजन्तत्वादीर्घाप्राप्तौ तद्वैयर्थ्यं स्पष्टमेव । इयञ्च परान्तरङ्गादिबाधकानामप्यबाधकत्वबोधिका । तेन 'अचीकरत्, मीमांसते' इत्यादि सिद्धम् ।

अत्र लोपोऽपि विकारो व्याख्यानात् । तेन 'अजीगणत्' इत्यादौ दीर्घस्य हलादिशेषबाधकत्वाभावसिद्धिः । 'अकिद्ग्रहणमस्यां ज्ञापकम्' इति । ननु ज्ञापितेऽपि स्वांशे चारितार्थ्याभावादिदमयुक्तम् । न हि कृते किंत्यजन्तोऽभ्यासः सम्भवति । येन दीर्घविधावकिद्ग्रहणं परिभाषाज्ञापनोत्तरं स्वांशे चरितार्थं स्यात् । न च वैयधिकरण्येनाभ्यासस्याचो दीर्घ इति सम्बन्धात्तत्सार्थक्यमिति वाच्यम् । ज्ञापनात्पूर्वमपि तथाविधान्वयसम्भवाद्वैयर्थ्याभावेन ज्ञापकताया दुर्वचत्वादिति चेत् ? सत्यम् ; वैयधि-

करण्यान्वयोऽप्यकिदृग्रहणेन ज्ञाप्यते, यावता 'विनाऽनुपपत्तिस्तावत्सर्वं ज्ञाप्यते' इति न्यायात्। अन्यथा सामानाधिकरण्ये सम्भवति वैयधिकरण्यं कथं स्यात्।

न चैवमावश्यकस्य वैयधिकरण्यान्वयस्य ज्ञापनेन कृतार्थत्वात्कथं परिभाषाज्ञापकत्वमकिदृग्रहणस्येति वाच्यम्। वैयधिकरण्यान्वयज्ञापनेऽपि नुका दीर्घापवादतया तद्विषये दीर्घस्य प्रवृत्त्ययोगादकिदृग्रहणवैयर्थ्यस्य तदवस्थत्वात्। इदमेवाभिसन्धाय भाष्ये नुको दीर्घापवादमूलकतयैव अकिदृग्रहणस्य प्रकृतपरिभाषाज्ञापकत्वं समर्थितम्। न च 'चर्कर्तीति' इत्यादौ रुकि दीर्घवारणायाकिदृग्रहणस्य सार्थकतया, नुग्पापवादविषये तदप्रवृत्तिमात्रेण वैयर्थ्यायोगात्परिभाषाज्ञापकत्वानुपपत्तिरिति वाच्यम्। नुक इव रुकोऽपि तदपवादत्वस्य सुवचत्वेन ज्ञापकत्वानपायादतो न काप्यनुपपत्तिरिति विभाव्यताम्।

यत्तु 'वरीवर्त्ति' इत्यादौ रिगागमे सत्यप्यजन्तत्वाक्षतेस्तत्र दीर्घनिवर्त्तनेन चरितार्थत्वादकिदृग्रहणस्य वैयधिकरण्यान्वयज्ञापकत्वानुपपत्तिरित्याहुः, तदसत्; दीर्घान्तस्य रीगागमस्य पृथग्विधानसामर्थ्येनैव दीर्घनिवृत्तेरकिदृग्रहणस्य तदंशे फलाभावेन निरुक्तान्वयज्ञापनस्य निर्बाधत्वात्। इदञ्च वैयधिकरण्यान्वयज्ञापनमभ्यासविकारमात्रविषयं प्रमाणानां सामान्ये पक्षपातात्। तेन 'चिच्छासति' इत्यादावन्तरङ्गत्वात्तुगागमे सत्यपि अभ्यासस्य 'सन्यतः' (७.४.७९) इत्तित्वं सिद्ध्यति।

आद्ये सन्वद्भावस्य परत्वादीर्घेण बाधः प्राप्नोति। अन्त्ये 'मानबध' (३.१.६) इति दीर्घेणान्तरङ्गत्वादित्वस्य बाधः प्राप्तः। यत्तु यत्रैकैकप्रवृत्त्युत्तरमपि सर्वेषां प्रवृत्तिस्तत्रैव प्रवृत्तिरिति 'अत एकः' (६.४.१२०) इति सूत्रे कैयटः, तन्न। नुकि कृते दीर्घाप्राप्त्या धर्मिग्राहकमानविरोधात्। मानबधादीनां दीर्घे कृते इत्वाप्राप्त्या 'गुणो यङ्लुकोः' (७.४.८२) इति सूत्रे भाष्योक्ततदुदाहरणासङ्गतेश्चेत्यन्यत्र विस्तरः।

न च तुको हलादिश्शेषेण (७.४.६०) निवृत्तावदन्तोऽभ्यासः सम्भवतीति सामानाधिकरण्यान्वयेऽपि न क्षतिरिति वाच्यम्। प्रत्यासत्त्या तदक्षादादेशद्वारेण वाऽभ्याससंज्ञाप्रवृत्तिकाले सन्निहितानामेव हलां तेन निवृत्तिस्वीकारेण तुको हलादिःशेषनिवर्त्यत्वायोगात्। तदेतत्सकलमभिप्रेत्याह—'तुकि कृतेऽनजन्तत्वात्' इत्यादि। 'अबाधकत्वबोधिका' इति। ननु यत्रैकैकप्रवृत्युत्तरमन्योन्यस्य प्रवृत्तियोग्यता तत्रैवैतत्परिभाषाप्रवृत्तिरिति कैयटाशयः। एवञ्च किद्विषये 'यंयम्यते' इत्यादौ मुगादिप्रवृत्त्युत्तरं 'अकितः' (७.४.८३) इति प्रतिषेधाद्प्रवर्त्तमानस्यापि दीर्घस्य प्रवृत्तियोग्यताया अव्याघातकथं धर्मिग्राहकमानविरोध इत्यत आह—'मान्बधादीनाम्' इत्यादि। 'अन्यत्र विस्तरः' इति। अभ्यासविकाराणां परस्परविरोधनिरहपूर्वकः सम्भावेश इति प्रकृतपरिभाषायाः प्रतिपाद्यांशः। तेन सति सम्भवे यौगपद्येनैव तेषां प्रवृत्तिर्यथा 'यंयम्यते' इत्यादौ मुगागमहलादिश्शेषयोः। यत्र तु यौगपद्येन प्रवृत्त्यसम्भवः, तत्र क्रमेणैव, यथा—'मीमांसते' इत्यादावित्वप्रवृत्युत्तरं दीर्घः। यत्र तु बाध्यप्रवृत्युत्तरं बाधकप्रवृत्त्या तत्समावेशः तत्र बाध्यप्रवृत्युत्तरमेव बाधकप्रवृत्तिर्यथा 'अर्जीगणत्' इत्यत्र हलादिश्शेषोत्तरमीत्वम्।

सम्प्रसारणाभ्यासलोपयोस्तु नायं न्यायः 'लिटयभ्यासस्योभयेषाम्' (६.१.१७) इत्येतत्सूत्रस्थेनोभयेषांग्रहणेन तद्विषये प्रकृतन्यायाप्रवृत्तेः सामान्येन ज्ञापनात्। तेन 'विव्यर्थे, विव्याधे' इत्यादौ यकारस्य सम्प्रसारणसिद्धिः। 'पापच्यते' इत्यादौ परत्वाद्दीर्घेण बाधादेत्वाभ्यासलोपौ न भवेत इति 'अत एक' (६.४.१२०) इति सूत्रस्थभाष्यस्योपपत्तिरिति स्पष्टमुद्योतशेखरयोः।

केचित्तु—विकारो नाम रूपान्तरप्राप्तिः, सा चावयवानामन्यथाभाव इव अवयवनाशावयवान्तरोत्पत्तिभ्यामपि भवत्येव समुदायस्येति युक्तमभ्यासविकारशब्देन ग्रहणं हलादिःशेषस्य आगमत्वाच्च विकारसम्पादकत्वात्। यच्च सर्वलोपोऽभ्यासस्य नायं तद्विकारत्वेन युज्यते ग्रहीतुमभावात्मकत्वात्।

अत एव पस्पशायां 'लोपागमवर्णविकारज्ञः' इत्यत्र विकाराल्लोपस्य पृथगुपादानम्। 'दीर्घोऽकितः' (७.४.८२) इत्यत्र हलादिश्शेषप्रयुक्ताभ्यासावयवलोपस्य विकारत्वप्रतिपादनञ्च भाष्यकारस्य न परस्परं विरुध्यते, एवञ्चाभ्यासलोपे प्रकृतपरिभाषायाः प्रवृत्तियोग्यताविरहात्तद्विषये परिभाषाप्रवृत्त्यभावसाधकप्रयत्नान्तरान्वेषणं वृथैवेत्याहुः ॥६६॥

ननु तच्छीलादितृन्विषये ण्वुलपि स्यात्। न च तृन्नपवादः असरूपापवादस्य विकल्पेन बाधकत्वादत आह—

६७. ताच्छीलिकेषु वासरूपविधिर्नास्ति।

ण्वुला सिद्धे 'निन्दहिंसादि'(३.२.१४६)सूत्रेण एकाज्भ्यो वुञ्विधानमस्या ज्ञापकम्। तत्र ण्वुल्वुञोः स्वरे विशेषाभावात्। 'ताच्छीलकेषु' इति विषयसप्तमी। तेन ताच्छीलिकैरताच्छीलिकैश्च वासरूपविधिर्नास्तीति बोध्यम्।

अपवादप्रस्तावोऽत्र सङ्गतिः। 'ण्वुलपि स्यात्' इति। कर्तृसामान्ये विधीयमानस्य ताच्छील्यादिविशेषविशिष्टे कर्त्तरि प्रवृत्तौ बाधकाभाव इत्याशयः। 'स्वरे विशेषाभावात्' इति। 'निन्दकः' इत्यादौ 'ञ्निन्यादिर्नित्यम्' (६.१.१९७) इत्याद्युदात्तत्वे 'लिति' (६.१.१९३) इति प्रत्ययात्पूर्वस्योदात्तत्वे वा विशेषाभावादित्यर्थः।

ननु ताच्छिलिकेषु वासरूपविध्यभावे 'निराकर्ता, निराकरिष्णुः' इत्यादौ तृनिष्णुचोः पर्यायता न सिद्धयेदत आह—'विषयसप्तमी' इति। न तु निर्धारणसप्तमी कारकविभक्तेर्न्याय्यत्वात्। एवञ्च ताच्छीलिकविषयः; तदितरसम्बन्धी वासरूपविधिर्नेति परिभाषार्थ इति तत्त्वम् ॥६७॥

नन्वेवं 'कम्रा, कमना' इत्यसिद्धिः, 'नमिकम्पि' (३.२.१३७) इति रेण 'अनुदात्तेतश्च हलादेः (३.२.१४९) इति युचो णादिति चेत्, न; 'सृददीपदीक्षश्च' (३.२.१५३) इत्यनेन पर्युदिनषेधेनोक्तार्थस्यानित्यत्वात्। नन्वेवं ननु 'हसितं, छात्रास्य शयनम्' इत्यादौ घञ्, 'इच्छति भोक्तुम्' इत्यत्र लिङ्लोटौ, 'ईषत्पानः सोमो भवता' इत्यत्र खल् प्राप्नोतीत्यत आह—

६८. क्तल्युट्तुमन्खलर्थेषु वासरूपविधिर्नास्ति।

इदं वासरूपविधेरनित्यत्वात्सिद्धम्। तदनित्यत्वे ज्ञापकञ्च 'आहें कृत्यतृचश्च' (३.३.१६९) इति। तत्र चकारेण समुच्चीयमानलिङ् कृत्यतृचोर्बाधा मा भूदिति कृत्यतृज्ग्रहणं क्रियत इत्यन्यत्र विस्तरः। वासरूपसूत्रे (३.१.९४) भाष्ये स्पष्टैषा।

'नन्वेवम्' इत्यस्य यथा तच्छीलादितृन्विषये ण्वुलाद्यापत्तिः, एवं नपुंसकत्वविशिष्टभावादिरूपक्तल्युडादिविषये घञाद्यापत्तिरित्यर्थः। यद्वा ताच्छीलिकानामतीच्छीलिकानां च प्रत्येकं वासरूपविधिस्वीकरे इत्यादितदर्थः। यस्त्वत्र साहचर्याद्भावार्थकस्यैव ल्युटो ग्रहणं, तेन करणाधिकरणयोर्ल्युटि नायं निषेध' इति? तदसत्; 'ईषत्पानः सोमो भवता' इत्यत्र कर्मण्यनेन न्यायेन खलिनषेधप्रतिपादनपरेण भाष्येणास्यां परिभाषायां साहचर्यानाश्रयणबोधनात्तदेतद्ध्वनयन्नाह—'ईषत्पानः' इत्यादि। नन्वस्तु फलम्। किमस्यां परिभाषायां प्रमाणमत आह—'इदञ्च' इति। 'अनित्यत्वात्' इति। अनेनैव पूर्वोत्तरपरिभाषयोः सिद्धौ पृथक् ज्ञापकान्तरोपादानं प्रपञ्चार्थमिति द्रष्टव्यम् ॥६८॥

ननु 'श्वः पक्ता' इत्यत्र वासरूपविधिना लृडपि प्राप्नोति, कृते आदेशे वैरूप्यादत आह—

६९. लादेशेषु वासरूपविधिर्नास्ति।

आदेशकृतवैरूप्यवत्सु लकारेषु स नास्तीत्यर्थः। अत्र च 'हशश्वतोर्लङ् च' (३.२.११६) इति लङ्विधानं ज्ञापकम्। अन्यथा 'परोक्षे' (३.२.११५) इति लिटा लङः समावेशेऽसाप्यात्सिद्ध इति किं लङ्विधानेन? शत्रादिभिस्तिङां समावेशार्थं शतृविधायके विभाषाग्रहणानुवृत्तिः 'लिटः कानज्वा' (३.२.१०६) इत्यत्रा वाग्रहणं च कृतम्। तज्ज्ञापयति—वासरूपसूत्रे अपवाद आदेशत्वानाक्रान्तः प्रत्यय एव गृह्यत इति कैयटादौ ध्वनितम्। तत्फलन्तु सदादिभ्यः भूतसामान्ये लिटः क्वसुरेव, न तु पक्षे तिङिति बोध्यम्।

'ज्ञापकम्' इति। भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्हशश्वतोरेव लङिति नियमार्थत्वं तु न। ज्ञापनोत्तरं विधायकत्वलाभात्। विधायकत्वे सम्भवति नियामकताया अन्याय्यत्वादिति भावः। ननु स्वतस्सिद्धवैरूप्ययुक्तेषु तृजादिषु चरितार्थस्य वासरूपविधेरादेशगतारोपितवैरूप्यवत्सु लकारेषु प्रवृत्तौ मानाभावः, न ह्यादेशे स्थानिधर्मस्येव स्थानिन्यादेशधर्मस्याप्यतिदेशश्शास्त्रसिद्धः। येन तत्र तादृशविधेः प्रवृत्तिः स्यात्। एवञ्च न्यायसिद्ध एव लादेशेषु वासरूपविध्यभाव इति व्यर्थं तत्र ज्ञापकानुसरणमिति चेत्? अत्र केचित्; 'नानुबन्धकृतमसारूप्यम्' (प. ८) इत्यनया प्रत्ययानामौपदेशिकस्य वैरूप्यस्य वासरूपविधिप्रवृत्तिप्रयोजकत्वाभावबोधनात्प्रायोगिकस्यैव तस्य तादृशविधिप्रवृत्तिप्रयोजकताया आवश्यकतया लकाराणां सर्वत्रैवादेशैरपहार्यत्वादादेशद्वारकस्य वैरूप्यस्य ण्वुलादाविव लकारेष्वपि तादृशविधिप्रवृत्तिप्रयोजकत्वं न्यायप्राप्तम्। प्रायोगिकवैरूप्यग्रहणे क्विबादिषु सर्वापहारिणा लोपेन प्रयोगे रूपाप्रसिद्धेस्तथाविधवैरूप्यनिबन्धनस्य वासरूपविधेरप्रवृत्तिरिति तु न शङ्क्यम्। विशेषणाभावप्रयुक्तविशिष्टाभावविधया बाध्यसम्बन्धिरूपप्रतियोगिकसादृश्यविशिष्टरूपाभावात्मकस्य प्रायोगिकवैरूप्यस्य

...लोपे रूपाभावेऽपि सुवचतया तत्प्रवृत्तेरव्याघातात्। एवञ्चानारोपितमेव ...प्यपादेशकृतं लकारेषु वासरूपविधेः प्रवर्त्तकमिति युक्तमेतन्निवर्त्तक-...परिभाषासमर्थनाय ज्ञापकानुसरणमित्याहुः। 'सदादिभ्यः' इति सदेर्लृङि ...स्य हेतुहेतुमद्भावादौ लिङि फलं द्रष्टव्यम्। 'अद्य, श्वो वा भविष्यति' इत्यादावनद्यतनत्वाविवक्षया भविष्यत्सामान्ये लृडिति वदन्ति ॥६९॥

ननु 'ङ्यो ह्स्वात्' (८.३.३२) इत्यादौ ङ्यः परस्याऽचि परतः ङ्यो वेति सन्देहः स्यादत आह—

७०. उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्।

'अचि' इति निर्देशस्य 'मय उञः' (८.३.३३) इयुत्तरत्र चारितार्थ्यं, पञ्चमीनिर्देशोऽनवकाश इति 'तस्मादित्युत्तरस्य' (१.१.६७) इत्यस्यैव प्रवृत्तिः। यत्र तु 'ङस्सि घुट्' (८.३.२९) इत्यादावुभयोरप्यचारितार्थ्यम्, तत्र 'तस्मिन्' (१.१.६६) इति सूत्रापेक्षया 'तस्मादित्युत्तरस्य' (१.१.६७) इत्यस्यैव परत्वात्तेनैव व्यवस्था। एवमुभयोश्चारितार्थ्येऽपि यथा 'आमि सर्वनाम्नः' (७.१.५२) इत्यादौ, तत्र 'आमि' इति सप्तमी 'त्रेस्त्रयः' (६.३.४८) इत्यत्र कृतार्था। 'आत्' इति पञ्चमी 'आज्जसेरसुक्' (७.१.५०) इत्यत्र चरितार्थेति स्पष्टं 'तस्मिन्' (१.१.६६) इति सूत्रे भाष्ये कैयटे च।

इत्थं सपरिकारायां 'पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परिभाषायां निरूपितायां बलीयश्शब्दघटितत्वेन साधर्म्यादुपस्थिताया अस्याः परिभाषाया उपेक्षानर्हत्वादुचित एवेदानीमस्या उल्लेख इत्याहुः। 'सन्देहः स्यात्' इति। ततश्च वाक्यभेदकल्पनया द्वयोरपि पर्यायेण कार्य-

प्रसङ्ग: । युगपदुभयोरपि प्रत्येकं कार्यप्रवृत्तिरिति तु न युक्तम् । निमित्तत्व-निमित्तित्वयोर्योगपद्यविरोधात् 'एकः पूर्वपरयोः' (६.१.८४) इति ज्ञापकाद्वेत्याशयः । परत्वानवकाशत्वाभ्यां पञ्चमीनिर्देशस्य सिद्धे बलवत्त्वमनया परिभाषयाऽऽनूद्यते, न त्वियमपूर्वा । तदाह—'अनवकाशः' इति । ङमो ङमुटि 'कुर्वन्नास्ते' इत्यादौ णत्वं दुर्वारमिति भावः । 'परत्वात्तेनैव' इति । अन्यत्र लब्धावकाशयोरिव निरवकाशयोरपि तुल्यबलत्वमक्षतमेवेत्याशयः ।

ननु 'तस्मिन्' (१.१.६६) इति परिभाषाया अप्रवृत्तावपि 'सि' (८.३.२९) इति सप्तम्या औपश्लेषिकाधिकरणबोधकतया ङकाराव्यवहित-परस्य सकारोऽपि श्लिष्टस्यान्यस्येव कार्यं स्यात्, न तु सकारस्येत्यनिष्ट-प्रसङ्ग इति चेत्? अत्र केचित्; ईदृशेषु 'तस्मात्' (१.१.६७) इति परिभाषाप्रवृत्तिप्रयोजकेन दिग्योगपञ्चमीनिर्देशेन 'तस्मिन्' (१.१.६६) इति परिभाषाप्रवृत्तिप्रयोजकमौपश्लेषिकाधिकरणबोधकत्वमेव बाध्यते, भाष्य-प्रामाण्यात् । ततश्च षष्ठ्यर्थिकेयं पञ्चमी सम्पद्यते । लाघवेन कृतार्थत्वा-त्सप्तमीनिर्देशस्यापि न वैयर्थ्यं, षष्ठीनिर्देशे हि मात्रागौरवं स्पष्टमेवेति न दोष इत्याहुः । यत्तु सप्तमीनिर्देशस्य लाघवेन चरितार्थत्वादनवकाशत्वेनैव पञ्चमीनिर्देशस्य बाधकताया औचित्यात्परत्वादित्ययुक्तमिति वदन्ति, तदसत्; सप्तमीनिर्देशस्याधिकरणातिरिक्तार्थबोधकतायाः पञ्चमीनिर्देश-गतपरत्वप्रयुक्तबाधाधीनत्वेन, ततः पूर्वं षष्ठ्यर्थत्वानिश्चयेन लाघवस्य दुर्वचत्वात् ।

यदपि धुटो धकारस्य चर्त्वासिद्धत्वेन द्वितीयादेशाप्रवर्त्तनार्थकतया ङकारस्य तत्प्रवृत्तौ तुडागमेनापि निर्वाह इति सामर्थ्यादेव पञ्चमीनिर्देशस्य बलवत्त्वमिति नात्र प्रयत्नान्तराश्रयणोपयोग इत्याहुः, तदप्ययुक्तम्; 'नश्च' (८.३.३०) इत्युत्तरसूत्रविषये 'सन्+त्सीदति' इत्यादौ नकारस्य चर्त्वा-प्राप्त्या रूपवैजात्यसम्भवेन सामर्थ्यायोगादिति दिक् । 'आदिति पञ्चमी' इति । 'भवताम्' इत्यत्र सुडनिवृत्तये तदनुवृत्तिरिति बोध्यम् । 'कैयटे च' इति । 'दीर्घात्', (६.१.७१) 'पदान्ताद्वा' (६.१.७६) इत्यत्र तु पञ्चमी-

[illegible]: षष्ठ्यर्थे 'सेनासुराच्छाया (२.४.२९) इति ङ्यामकादित्यपि तत्रैव स्पष्टम् ॥७१॥

ननु 'अतः कृकमि' (८.३.४६) इति सत्वं 'अयस्कुम्भी' इत्यत्र न स्यात्, कुम्भशब्दस्यैवोपादानादत्र आह—

७१. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ।

सामान्यरूपेण, विशेषरूपेण वा प्रातिपदिकबोधकशब्दग्रहणे सति लिङ्गबोधकप्रत्ययविशिष्टस्यापि तेन ग्रहणं बोध्यम् । अपिना केवलस्यापीत्यर्थः । अस्याश्च ज्ञापकं समानाधिकरणाधिकारस्थ 'कुमारश्रमणादिभिः' (२.१.७०) इति सूत्रे स्त्रीलिङ्गश्रमणादिपाठः । स्त्रीप्रत्ययविशिष्टश्रमणादिभिश्च कुमारीशब्दस्यैव सामानाधिकरण्यं, न कुमारशब्दस्येति तज्ज्ञापकम् । इयञ्च 'द्विप्तत्परयोः' (३.२.६२) इत्याद्युपपदविधौ समासान्तविधौ महदात्वे ञिन्नित्स्वरविधौ राज्ञः स्वरे ब्राह्मणकुमारयोः 'बहोर्नञ्वदुत्तरपदभूम्नि' (६.२.१७५) इत्यादौ समाससङ्घातग्रहणेषु च न प्रवर्त्तत इति 'ङ्याप्' (४.१.१) सूत्रे भाष्ये स्पष्टम् ।

सिंहावलोकन्यायादतिदेशस्मृत्या तत्फलायाः प्रकृतपरिभाषायाः प्रकाशः 'सामान्यरूपेण विशेषरूपेण वा' इति । उभयविषयेऽपि भाष्ये परिभाषायाः प्रवर्त्तितत्वादित्याशयः । 'श्रमणादिपाठः' इति । 'युवा खलति' (२.१.६७) इति सूत्रे भाष्ये तु तत्रत्यजरतीशब्दपठ्यैतत्परिभाषाग्राह्याप्रकृतत्वं दृश्यते । अतिव्याप्तिं वारयन्नाह— 'इयञ्च' इति । 'उपपदविधिसमासान्तमहदात्वेष्वेतत्परिभाषाप्रवृत्त्यभावात् 'द्विप्ततीतापः, महद्राज्ञी, महतीप्रियः' इत्यादिषु खञ्प्रत्ययसमा-

सान्तपुंवद्भावा न प्रवर्त्तन्ते। ञित्स्वरविधावेतदप्रवृत्तेः, 'दाक्षी' इत्यादा-विञन्तात् 'इतो मनुष्य' (४.१.६९) इति ङीपि, सौवरीणां सप्तमीनान्त-दन्तसप्तमीत्वेन विशिष्टस्य ञिदन्तत्वात्प्राप्तमाद्युदात्तत्वं न भवेति। राज्ञः स्वरे तदप्रवृत्त्या 'राजा च' (६.२.९९) इति सूत्रेण राजन्शब्दस्य ब्राह्मण-कुमारयोरुत्तरपदयोर्विधीयमानः पूर्वपदप्रकृतिस्वरो ब्राह्मणीकुमारीशब्दयो-रुत्तरपदयोर्न प्रवर्त्तते। 'बहोर्नञ्वत्' (६.२.१७५) इत्यनेन बहुशब्दपूर्व-पदसमासस्य उत्तरपदार्थबाहुल्ये 'नञ्सुभ्याञ्च' (६.२.१७२) इत्यनेन नञ्पूर्वपदकसमासस्य विधीयमानमन्तोदात्तत्वमतिदिश्यते। ततश्च 'बहु-गोमान्' इत्यादाविव 'बहुगोमती' इत्यादौ प्रकृतपरिभाषया प्रसक्तमनिष्टम्।

विभक्तिनिमित्तककार्ये च नेत्यपि तत्रैव। तत्र समासान्त-विधाववयवग्रहणे एव न। समाससङ्घातग्रहणे तु प्रवर्त्तत एव। स्वरविधावेव समाससङ्घातग्रहणे तत्र दोषोक्तेः। 'बहुव्रीहेरूधसः' (४.१.२५) इति सूत्रे भाष्याच्च। एतावत्स्वेवानित्यत्वादप्रवृत्तिः। 'दोषाः खल्वपि साकल्येन परिगणिताः' इति भाष्योक्तेः। नन्वेवं 'बहुव्रीहेरूधसो ङीष्' (४.१.२५) इति सूत्रस्थभाष्या-सङ्गतिः; तत्र हि 'कुण्डोघ्नी' इत्यत्र 'नद्यृतश्च' (५.४.१५३) इति कबापादितो नद्यन्तस्य, बहुव्रीहेरित्यर्थान्नद्यन्तस्य बहुव्रीहि-त्वाभावात्तदसङ्गतिः। 'नद्यन्तानां यः समासः' इत्यर्थेन परि-हृतम्। नद्यन्तप्रकृतिकसमासोत्तरपदकः समास इतीति चेत्? न; अनया परिभाषया स्त्रीप्रत्ययसमभिव्याहारे तद्रहिते दृष्टानां प्रातिपदिकतद्धाप्यधर्माणां विशिष्टेऽपि पर्याप्तत्वमतिदिश्यत इत्या-शयात्।

'समाससङ्घातग्रहणेषु' इति। अवयवीभूतपूर्वोत्तरपदग्रहणे तु राज-स्वरव्यतिरिक्ते प्रवर्त्तत एव परिभाषा। तेन 'कुसूलकूपकुम्भशालम्बिले' (६.२.१०२) इत्यादिना विधीयमानः पूर्वपदप्रकृतिस्वरः 'कुसूलीबिलम्'

इत्यादावपि निर्विवाद इति स्पष्टं भाष्ये । 'भाष्याच्च' इति । इदमग्रे स्फुटीभविष्यति । 'अप्रवृत्तिः' इति । सति फले भाष्यकारोपदर्शितोदाहरणातिरिक्तेऽपि प्रवृत्तिर्भवत्येव दिङ्मात्रत्वादुदाहरणानामित्याशयः । 'नन्वेवम्' इति । अयं भावः—सामान्यरूपेण विशेषरूपेण वा यत्र यादृशं प्रातिपदिकमुपादीयते, तत्र तद्रूपानुपहितस्य लिङ्गबोधकप्रत्ययविशिष्टस्य वाच्यवृत्त्या तथाविधेन प्रातिपदिकेन प्रत्यायने शास्त्रसहस्रेणाप्यशक्यम् । तस्मात्प्रकृतपरिभाषया तत्र तत्र लिङ्गबोधकप्रत्ययविशिष्टस्याप्यध्याहारो बोध्यते इत्यवश्यमभ्युपेयम् । एवञ्च लिङ्गबोधकप्रत्ययविशिष्टे प्रातिपदिकपर्याप्ततत्तद्धर्मप्रयुक्तकार्याणामनुपपत्तिरिति । तदाह—'बहुव्रीहित्वाभावात्' इति । 'अतिदिश्यते' इति । इदमेव युक्तम् । अन्यथा हि वाक्यभेदकल्पनापत्तौ गौरवं स्पष्टमेव ।

इदन्त्ववधेयम्—लिङ्गबोधकप्रत्ययविशिष्टे तत्प्रकृतिभूतप्रातिपदिकपर्याप्तधर्माणामेवातिदेश इत्यत्र नाग्रहः । किन्तु तदेकदेशभूतप्रातिपदिकपर्याप्तानामपि । अत एव 'दर्शनीयमानी' इत्यादौ 'क्यङ्मानिनोश्च' (६.३.३६) इति पुंवद्भावः प्रकृतपरिभाषायाः प्रयोजनमित्युक्तं भाष्ये । प्रकृत्येकदेशगतधर्माणामनतिदेशे हि सुबुत्पत्तेः पूर्वं समासे विशेष्टादेव नान्तलक्षणो ङीब्रिति मानिनीशब्दस्योत्तरपदत्वाभावात्तदसङ्गतिरेव, तेन 'अयस्कर्णी' इत्यत्र 'पाकर्ण' (४.१.६४) इति विहितङीषन्तैकदेशस्य उत्तरपदत्वमादाय 'अतः कृकमि' (८.३.४६) इति सत्वमपि युक्तमस्याः परिभाषायाः प्रयोजनम् । स्पष्टञ्चेदं 'स्वाङ्गाच्चेत' (६.३.४०) इत्यत्र शेखरे । 'नादिन्याक्रोशे पुत्रस्य' (८.४.४८) इत्यत्र तु नास्याः परिभाषायाः प्रवृत्तिः । आदिन्शब्दस्य प्राधान्याद्यविशेषणतायां एव न्याय्यतया 'पुत्रादिनी' इत्यादावेकवर्णव्यवधाने नान्तरीयके चरितार्थस्य तादृशनिषेधस्य 'पुत्र्यादिनी' इत्यादावनेकवर्णव्यवधाने प्रवृत्त्यनौचित्येन नैष्फल्यात् । 'वा हतजग्धयोः' (वा. ९६०) इत्यत्र तु प्रवर्त्तत एव, तदीयोदाहरणेषु व्यवधानकृतविशेषाभावादिति वदन्ति ॥७१॥

नन्वेवं 'यूनः पश्य' इत्यत्रेव, 'युवतीः पश्य' इत्यत्रापि 'श्वयुवा' (६.४.१३३) इति सम्प्रसारणं स्यादत आह—

७२. विभक्तौ लिङ्गविशिष्टाग्रहणम् ।

स्पष्टा चेयं 'युवोरनाकौ' (७.१.१) इत्यत्र भाष्ये । घट-घटीग्रहणेन लिङ्गविशिष्टपरिभाषाया अनित्यत्वात्तन्मूलैषेत्यन्ये ।

इह निषेधस्य सन्दर्भः स्पष्ट एव । विभक्तिनिमित्तके कार्ये प्रातिपदिकेन लिङ्गबोधकप्रत्ययविशिष्टस्य ग्रहणं नेति परिभाषार्थः । अत्र विभक्तेर्निमित्तत्वं यथाकथाञ्चित्, न तु विभक्तित्वतद्वयाप्यधर्मपुरस्कारेणैवेत्याग्रहो मानाभावात् । अत एव सम्प्रसारणविधौ तद्धितभिन्नत्वेनोपादीयमानाया विभक्तेर्वस्तुभूतनिमित्तत्वमादाय विभक्तिनिमित्तकतया 'युवतीः पश्य' इत्यादौ लिङ्गबोधकप्रत्ययविशिष्टस्य सम्प्रसारणे प्रकृतनिषेधप्रवृत्तिसौलभ्यन्नावतरणग्रन्थविरोधः । न च 'श्वयुवमघोनाम्' (६.४.१३३) इति सूत्रे भाष्ये नकारान्तग्रहणमनकारान्तप्रतिषेधार्थमिति वार्त्तिकप्रत्याख्यानप्रशंसायां 'अल्लोपोऽनः' (६.४.१३४) इति सूत्रादन्ग्रहणमपकृष्य 'श्वादीनामन्नन्तानाम्' इति व्याख्यानेन 'युवतीः पश्य, मघवतीः पश्य' इत्यादौ सम्प्रसारणं निराकृतमिति प्रकृतपरिभाषाया अनुपयोगादयुक्तमेवेदमवतरणमिति वाच्यम् । 'सुपथी, सखी' इत्यादावात्वणिट्ङावप्रभृत्यनिष्टवारणार्थमवश्याभ्युपगन्तव्यया प्रकृतपरिभाषयैव निर्वाहादनुपयुक्त एवान्ग्रहणापकर्षप्रयुक्तो व्याख्यानपरिक्लेश इत्याशयात् ।

न च 'मघवता' इत्यादौ चादेशविशिष्टे सम्प्रसारणाभावाय तथाविधव्याख्यानक्लेशोऽप्यावश्यक इति वाच्यम् । छान्दसत्वादेव ङाद्यादेशेषु सम्प्रसारणाभावस्य भाष्यकृता समर्थितत्वात् । यत्तु अन्नन्तत्वातिदेशादिदमवतरणमिति; तदसत्; अन्नन्तत्वस्य प्रातिपदिकत्वव्याप्यत्वाभावेन अतिदेशानर्हत्वात् । अन्यथा तटीशब्दादेर्लिङ्गबोधकप्रत्ययविशिष्टाददन्तत्वातिदेशेन 'आप्त, इन्धनौ' इत्याद्यापत्तेरिति दिक् । किञ्चात्र 'कार्येणोऽपि

निमित्तत्वेन ग्रहणं, न हि कार्यी' इति न्यायस्य तु नात्र प्रवृत्तिः । 'गुणानाञ्च परार्थत्वात्' (जै. सू. १.२.३) इति न्यायात् । अत एव 'शुन्या, शुन्यै' इत्यादौ गौरादिङीषः स्थाने प्रवृत्तं यणमाश्रित्य 'उदात्तयणो हल्पूर्वात्' (६.१.१७४) इत्यनेन प्राप्तस्य विभक्त्युदात्तत्वस्य लिङ्गविशिष्टपरिभाषया प्रसक्तस्य 'न गोऽश्वन्' (६.१.१८२) इति निषेधस्य बाधनमेतत्परिभाषायाः प्रयोजनमिति 'युवोरनाकौ' (७.१.१) इति सूत्रस्थं भाष्यमुपपद्यते । अन्यथा स्वरविधौ विभक्तेः कार्यित्वेन निमित्तत्वायोगात्तदसङ्गतिरेव ।

नन्वेवं 'चित्रगवीणाम्' इत्याद्यसिद्धिः । 'कुमति च' (८.४.१२) इत्यस्य हि प्रत्यासत्त्या कवर्गवदुत्तरपदघटितसमासप्रकृतिकविभक्तिनकार एव प्रवृत्तिः । अत एवं 'षष्ठ्या आक्रोशे' (६.३.२१) इत्यलुकि 'पूर्वपापानां विपाकः' इत्यादौ विभक्तिनकारस्य णत्वाभावः, एवञ्च ङीषन्ते लिङ्गविशिष्टपरिभाषालभ्यस्य समासत्वस्य प्रकृतपरिभाषाया निषेधे णत्वाप्राप्त्या तथाविधरूपदौर्लभ्यादिति चेत् ? अत्र केचित् ; यत्र विभक्तेः सक्षात्कार्यित्वं, निमित्तत्वं वा तत्रैवास्याः परिभाषायाः प्रवृत्तिः । न तु परम्परया, मानाभावात् । णत्वविधौ च विभक्तेर्न साक्षात्कार्यित्वं, किन्तु नकारद्वारकमिति न 'चित्रगवीणाम्' इत्यादौ प्रकृतपरिभाषया णत्वप्रतिबन्ध इत्याहुः । 'स्पष्टा चेयम्' इति । वचनरूपेणेति भावः । 'घटघटीग्रहणेन' इति । 'शक्तिलाङ्गलाङ्कुशतोमरयष्टिघटघटीधनुःषु ग्रहेरुपसंख्यानम्' (३.२.९. वा.१.) इति वार्तिकस्येनेत्यर्थः । लिङ्गबोधकतिप्रत्ययान्तस्य युवतिशब्दस्य प्रातिपदिकत्वसम्पत्तये 'यूनस्तिः' (४.१.७७) इत्यतः प्रागुपक्रान्तेन तद्धिताधिकारेणास्याः परिभाषाया अनित्यत्वमिति केचित् ।

'अन्ये' इति । अत्रासचेर्ज्ञापकस्य भाष्याविचारितत्वमेव हेतुः । अथ 'यूनस्तिः' (४.१.७७) इत्यस्य लिङ्गविशिष्टपरिभाषादोषेषु भाष्यकारैरपरिगणानाद्यूनीशब्दात्तिप्रत्ययप्रसङ्ग इति चेत् ? सत्यम् ; 'ङ्याब्ग्रहणप्रत्याख्याने येन नाप्राप्तिन्यायेन तिप्रत्ययस्य ङीबपवादतया तद्विषये ङीप्प्रत्ययस्याप्रसङ्गः । तत्सत्त्वे वा 'ङ्याबन्तादेव तद्धितोत्पत्तिः' इति नियमो यत्र परत्वादन्तरङ्गत्वाद्वा ङ्याभ्यां प्राक्तद्धितप्रसङ्गस्तद्विषय इत्यपवादविषये प्रकृते

तादृशनियमस्याप्रसक्त्या 'न ङीबन्तात्तिप्रत्ययप्रवृत्तिरिति विभावनीयमित्याहुः। केचित्तु भाष्ये लिङ्गविशिष्टपरिभाषाविषये दोषाणामप्युदाहरणमेव, न तु परिगणनम्। तत्र 'साकल्येन परिगणिताः' इत्युक्तिस्तु सर्वेषामेव दोषाणां परिगणनेऽपि प्रवृत्तिविषयापेक्षया तेषामल्पत्वमेव, न तु परिभाषानारम्भापादकं तेषामाधिक्यमिति प्रतिपादयितुमतः परिभाषाप्रवृत्त्यभावादेव यूनीशब्दात्तिप्रत्ययाप्रवृत्तिः।' इत्यच्च 'दीर्घाह्नी प्रावृट्' इत्यत्र प्रकृतपरिभाषया पसक्तं 'अहन्' इति रुत्वमपि सुपरिहारमिति सकलेष्टसिद्धिरित्याहुः ॥७२॥

ननु 'तस्यापत्यम्' (४.१.९२) इत्येकवचननपुंसकाभ्यां निर्देशात् 'गार्ग्यः, गार्ग्यौ' इत्याद्ययुक्तमत आह—

७३. सूत्रे लिङ्गवचनमतन्त्रम्।

'अर्धं नपुंसकम्' (२.२.२) इत्यत्र नपुंसकग्रहणमस्या ज्ञापकम्। नित्यनपुंसकत्वार्थन्तु न तदित्यन्यत्र निरूपितम्। धान्यपलालन्यायेन नान्तरीयकतया तयोरुपादानमिति 'तस्यापत्यम्' (४.१.९२) इत्यत्र भाष्ये स्पष्टम्। अत एव 'आकडारात्' (१.४.१) इत्यत्र एकेति चरितार्थमित्यन्यत्र विस्तरः।

लिङ्गपदवत्त्वेन साधर्म्यात्तत्रास्याः परिभाषाया आरम्भः। परिभाषायां 'लिङ्गवचनम्' इति समाहारद्वन्द्वः। सौत्रनिर्देशेषु धर्मिण एव वाक्यार्थकोटिप्रवेशः, न तु विशेषणत्वेनोपस्थितयोर्लिङ्गसंख्ययोरित्यर्थः। 'नित्यनपुंसकत्वार्थम्' इति। 'अर्धं समेंशके' इति कोशबलात्समांशवाचिनस्तस्य नित्यनपुंसकत्वमिति दीक्षितादयः। 'अन्यत्र निरूपितम्' इति। 'एओङ्' (मा.सू.३) 'एच इक्' (१.१.४८) इति सूत्रयोरर्धं एकारः, अर्धं ओकार इति समांशवाचिनोऽपि भाष्ये पुंस्त्वाभिधानेन नित्यनपुंसकत्वस्याप्रामाणिकतया न तत्परिग्रहणार्थं नपुंसकग्रहणमिति नत्रैव सूत्रे प्रतिपादितमित्यर्थः।

भाष्ये तु न्यायसिद्धत्वमेवास्याः परिभाषाया उपदर्शितमित्याह—'धान्यपलालन्यायेन' इत्यादि। एवं तत्र भाष्यम्—यथा कश्चिद्धान्यार्थी शालिकलापं सतुषं सपलालमाहरति, नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चिन्मांसार्थी मत्स्यान् सशल्कान् सकण्टकानाहरति, नान्तरीयकत्वात्। स यावदादेयं तावदादाय, शल्ककण्टकान्युत्सृजति। एवमिहापि नान्तरीयकत्वात्पुलिङ्गेन निर्देशः क्रियते, एकवचनान्तेन च।

'न ह्यत्र निर्देशस्तन्त्रम्' इति। अयं भावः—लिङ्गसंख्यासम्बन्धमन्तरेण केवलस्य धर्मिणः सुबन्तेन निर्देशासम्भवादपदस्य निर्देशानर्हत्वाद्यावल्लिङ्गसम्बन्धेन निर्देष्टुमशक्यत्वाच्च तत्र तत्र शास्त्रे निर्देशोपपत्तये नान्तरीयकत्वात्प्रसक्तयोर्लिङ्गसंख्ययोरसति यत्ने लोकदृष्टान्तेनैव परित्यागः सिद्ध इति नात्र वचनापेक्षा। यत्ने तु सति भवत्येव तद्विवक्षा, यथा—'सुप्सुपा' (२.१.४) इत्यत्र एकत्वसङ्ख्यायाः। तत्र ह्यनेकैः सुबन्तैरनेकेषां सुबन्तानां यौगपद्येन समासवारणार्थमावश्यकी तद्विवक्षा। यत्नश्च तत्र बहुव्रीहिसूत्रस्थमनेकग्रहणं स्वरितत्वं वा। तथा 'पदास्वैः' (३.१.११९) इति सूत्रे लिङ्गसर्वनामनपुंसकनिर्देशेन सिद्धौ स्त्रीलिङ्गनिर्देशो विवक्षार्थ इति पुनर्पुंसकयोस्तत्रार्थे क्यबभावः। उद्देश्यांशे संख्याया अविवक्षितत्वं तन्त्रान्तेऽपि प्रसिद्धमेव 'अहं सम्मार्ष्टि' इत्यादौ। प्रकृतशास्त्रे तु विधेयांशे तदविवक्षा लक्ष्यानुरोधादिति विशेषः। एवमेव 'तदधीते तद्वेद' (४.२.९९) इत्यादौ क्रियाविशेषविशिष्टे कर्तरि निर्देष्टव्ये नान्तरीयकतया प्रसक्तस्य कालस्य 'तत्करोति तदाचष्टे' (वा.२००,२०१) इत्यादौ क्रियाविशेषस्यैवासत्त्वभूतस्य निर्देशे प्रसक्त्योश्च कालकारकयोः परित्यागो न्यायसिद्ध एवेति सर्वमुपपद्यत इति। नान्तरीयकत्वञ्चाविनाभावः। विनार्थकादन्तराशब्दाद्रान्हादित्वाच्छप्रत्यये नञ्तत्पुरुषे भाष्यप्रयोगान्नलोपाभावे स्वार्थिके च कन्प्रत्यये नान्तरीयकशब्द इति कैयटेन व्युत्पादनात्।

ननु ज्ञापकसिद्धत्ववादिनां भवतु लिङ्गविषये नपुंसकग्रहणमविवक्षायां प्रमाणं, वचनांशे त्वविवक्षायां प्रमाणाभाव इत्यत आह—'अत एव' इत्यादि।

'अन्यत्र विस्तरः' इति। भाव इति सूत्रस्थोद्द्योत इत्यर्थः। एतेन यत्र यत्र अस्माभिर्विशेषो वक्तव्यस्तत्र तत्रास्मदीयैर्ग्रन्थान्तरैर्विशेषोऽवगम्यताम्। वक्तव्यांशस्तु न क्वचिदुपेक्षित इत्यभिप्रायो ध्वन्यत इत्यलम् ॥७३॥

ननु 'भृशादिभ्यो भुव्यच्वेः (३.१.१२) इति विधीयमानः क्यङ् 'क दिवा भृशा भवन्ति' इत्यत्रापि स्यादत आह—

७४. नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थावगतिः।

नञ्युक्तमिव युक्तञ्च यत्किञ्चिद्दृश्यते, तत्र तस्माद्भिन्ने तत्सदृशे अधिकरणे द्रव्ये कार्यं विज्ञायते, हि यतस्तथाऽर्थावगतिरस्ति। न हि 'अब्राह्मणमानय' इत्युक्ते लोष्टमानीय कृती भवति। अतः च्व्यन्तभिन्ने च्व्यन्तसदृशे अभूततद्भावविषये क्यङिति नोक्तदोषः। ओषधेश्च 'विभक्तावप्रथमायाम्' (६.३.१३२) इत्यादौ विभक्तिग्रहणं त्वेतन्न्यायसिद्धार्थानुवाद एव। एतेन विभक्ताविति सूत्रस्य अनित्यत्वे ज्ञापकमिति वदन्तः परास्ताः। अनित्यत्वे भाष्यसम्मतफलाभावात्। अत एव 'अकर्तरि च' (३.३.१९) इति सूत्रे कारकग्रहणं भाष्ये प्रत्याख्यातमिति बोध्यम्। स्पष्टा चेयं 'भृशादिभ्यः' (३.१.१२) इति सूत्रे भाष्ये। अत्र 'अन्यसदृश' इत्युक्त्या सादृश्यस्य भेदाघटितत्वं सूचयतीति निरूपितं चैतन्मञ्जूषायाम्।

सौत्रनिर्देशेषु विशेषणीभूतलिङ्गसंख्याविशेषप्रतीतिनिर्णायकपरिभाषानिरूपणे तदाश्रयद्रव्यविशेषबोधकपरिभाषोपस्थितेर्न्याय्यत्वादत्रैतस्याः परिभाषायाः प्रतिपादनमित्याहुः। 'तथार्थावगतिरस्ति' इति। 'अब्राह्मणः'

इत्युक्ते ब्राह्मणप्रतियोगिकसादृश्यसामानाधिकरण्येन भेदप्रतीतिः, 'चन्द्र इव' इत्युक्ते चन्द्रप्रतियोगिकभेदसामानाधिकरण्येन सादृश्यप्रतीतिश्च लोके प्रसिद्धेत्यर्थः। न चैवं —

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥"

इत्यभियुक्तवचने सादृश्यभेदयोः पार्थक्येन नञर्थत्वकथनमनुपपन्नमिति वाच्यम्। भेदविशिष्टे सादृश्ये, सादृश्यविशिष्टे भेदे च नञो वृत्तिकल्पनायां प्रधानाप्रधानभावमूलकेन भेदेन तथा कथने बाधकाभावात्भेदविशिष्टसादृश्यबोधकत्वं 'नञौ मृगो, न भीमः' इत्यादौ वेदे प्रसिद्धम्।

ननु परिभाषायां अनित्यत्वे द्वित्वविधावेतदप्रवृत्तौ 'अनचि' (८.४.४७) इत्यस्य सादृश्यवैकल्येन भेदमात्रप्रत्यायकत्वसम्भवादवसानस्यापि ततो बोधे पर्युदासेनैवोपपत्तौ प्रसज्यप्रतिषेधो गुरुभूतो नाश्रयणीय इति फलमस्त्येवेत्यत आह—'भाष्यसम्मतफलाभावात्' इति। अवसाने द्वित्वसिद्धये भाष्ये प्रसज्यप्रतिषेध एवाश्रितः, न त्वेतदनित्यत्वमिति भावः। 'भेदावटितत्वम्' इति। अखण्डत्वमपि तस्येति केचित्॥७४॥

ननु 'व्याघ्री, कच्छपी' इत्यादौ सुबन्तेन समासात्ततोऽप्यन्तरङ्गत्वात्, टाप्यदन्तत्वाभावात् जातिलक्षणो ङीष् न स्यादत आह—

७५. गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः।

'उपपदम्' (२.२.१९) इति सूत्रे 'अतिङ्' ग्रहणेन 'कुगति' (२.२.१८) इत्यत्र तदपकर्षणेन 'अतिङन्तश्च समासः'

इत्यर्थात् तयोः सूत्रयोः 'सुप्सुपा' (२.१.४) इत्यस्य निवृत्त्या एकदेशानुमत्या कारकांशे च सिद्धेयम् । तेन 'अश्वक्रीती' सिद्धा ।

नव्यटितप्रस्तावात्तथाविधेनातिङ्ग्रहणेन बोधितायाः प्रकृतपरिभाषायाः प्रारम्भः । 'अतिङन्तश्च' इति । अतिङन्तोत्तरपदक इत्यर्थः । 'सुप्सुपेत्यस्य निवृत्त्या' इति । अत्र तृतीयान्तस्यैव निवृत्तिः न तु प्रथमान्तस्य । अन्यथा 'पाचको व्रजति' इत्यादौ 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (३.३.१०) इत्युपपदसंज्ञकस्य 'व्रजति' इत्यादेः समासवारणाय अतिङन्तपूर्वपदकः समास इत्यर्थकतया, तस्यावश्यकत्वेन प्रकृतपरिभाषाज्ञापनानुपपत्तेः । न च 'मा भूत्तराम्' इत्यादौ 'सुपा' इत्यस्यानुवृत्तावपि तिङन्तरहितः समास इत्यर्थकतया समासवारणार्थमावश्यकस्यातिङ्ग्रहणस्य तन्निवृत्तिबोधनद्वारा परिभाषाज्ञापकत्वमनुपपन्नमेवेति वाच्यम् । सुपेत्यनुवृत्तौ प्रत्यासत्त्या उपपदनिमित्तकप्रत्ययचरमावयवकप्रातिपदिकप्रकृतिकसुबन्तेन समास इत्यर्थसम्पत्त्या निरुक्तस्थले समासाप्रवृत्तेरतिङ्ग्रहणवैयर्थ्यस्य सुवचतया ज्ञापकताया निर्बाधत्वात् ।

'अश्वक्रीती सिद्धा' इति । अन्यथा ह्यन्तरङ्गत्वाट्टाप्यदन्तत्वाभावात् ङीपोऽप्राप्त्या तदसिद्धिः । ननु व्याघ्रश्वक्रीत्यादिष्वन्तरङ्गभूतटापा समासबाधनं नोपपद्यते । 'लुक्प्रयोजकसमासादीनामप्यन्तरङ्गानपि' इति न्यायेन प्राबल्यबोधनात् । अत एव 'गोमत्प्रियः' इत्यादौ समासात्प्रागन्तरङ्गत्वान्मादयो न प्रवर्त्तन्ते । अत एव च मपर्यन्तानुवृत्तेस्तत्परिभाषाज्ञापनोत्तरं चारितार्थ्यम् । अन्यथा 'त्वत्पुत्रः, मत्पुत्रः' इत्यादौ समासात्प्रागन्तरङ्गत्वात्तवमादेशयोः प्रवृत्तौ तदीयं चारितार्थ्यं दुर्निरूपमेव स्यात् । एवञ्च 'समासात्प्रागन्तरङ्गानपि' इति न्यायबलात्समासोत्तरमपवादविषयत्वाच्च टापोऽप्रवृत्त्या सिद्धमिष्टमिति व्यर्थैवैषा परिभाषा, ज्ञापनक्लेशोऽप्यप्रयोजक इति चेत् ? अत्राहुः; यत्रान्तरङ्गनिमित्तविनाशकत्वं लुकस्तत्रैव तस्य तत्प्रयोजकसमासादीनां च प्राबल्यं तया परिभाषया बोध्यते, धर्मिग्राहकमानसाजात्यात् सामान्यतो बाधकल्पनायां मानाभावाच्च । प्रकृते तु लुका टापो निमित्तस्यादन्तत्वस्य विघाताभावात्तत्प्रयोजकसमासस्य प्राबल्यायोगेन टाप्प्रवृत्त्या प्रसक्तस्यानिष्टस्य वारणार्थमियमवश्याभ्युपेया परिभाषेति ।

अथ कृते लुकि अपवादविषयत्वाट्टापोऽप्रवृत्त्या वर्तत एवान्तरङ्ग-निमित्तविनाशः। अपवादविषयत्वाभावोऽपि हि तस्य निमित्तम्। किञ्चा-न्तरङ्गाप्रवर्त्तकलुक एव प्राबल्यमित्यवश्यमभ्युपेयम्। अन्या 'गोमतिप्रियः' इत्यादौ हल्ङ्यादिलोपे सोः कार्यित्वेन निमित्तत्वायोगात्तं प्रति लुकः प्राबल्यानापत्तेः। न च विशिष्टस्य जातिवाचकत्वादपवादविषयत्वेऽपि तदेकदेशस्य तथात्वाभावाल्लुगुत्तरमपि टापः सम्भवत्येव प्रवृत्तिरिति वाच्यम्। जहत्स्वार्थायां वृत्तौ समासघटकानामानर्थक्येन तदर्थसमवेतस्त्री-त्वाभावात् पक्षान्तरेऽपि स्वार्थविशेषितरूढ्यर्थबोधकतदवयवार्थगतस्त्रीत्व-स्याप्राधान्याच्च टाप्प्रवृत्तेर्दुर्वचत्वात्। अत एव सिद्धान्तेपि व्यघ्रयादि-सिद्धिः। अन्यथा सत्यामप्यस्यां परिभाषयां समाने विषये 'तटी' इत्यादौ टापो बाधनेन कृतार्थस्य जातिलक्षणस्य ङीपो विभिन्नविषये अन्तरङ्गेण टापो बाधे तदसिद्धिरेव।

एवञ्च 'अन्तरङ्गानपि' (प. ९४) इति न्यायेनैव व्याघ्रयादौ लुक्स-मासाभ्यां प्राक्टापोऽप्रवृत्त्या प्रकृतपरिभाषावैयर्थ्यं तदवस्थमेवेति चेत्? अत्र केचित्; अन्तरङ्गनिमित्तविनाशकलुक, एव प्राबल्यमुचितम्। अन्यथा 'सुतटीको ह्रदः, बहुघटीकः कुलालः' इत्यादावपि लुक्समासाभ्यां प्राक्तथा-विधस्य ङीषो दौर्लभ्यापत्तेः। तच्च निमित्तं सप्तम्याद्यन्तोपात्तशब्दस्वरूप-मेव, न त्वन्यत्। तत्रान्तरङ्गबहिरङ्गशब्दाभ्यां तथाविधस्यैवोपस्थितेः। अत एवोक्तोदाहरणे ङीषो निमित्तभूतस्यानुपसर्जनत्वस्य समासद्वारा विनाशकस्यापि लुको न प्राबल्यम्। किञ्च प्रकृतविषये कार्यिणो निमित्तत्वं न ग्रहणे प्रतिबन्धकाभावः।

अन्यथा पूर्वं टाप्यदन्तत्वाभावात् 'क्रीतात्करण' (४.१.५०) इति ङीष् न स्यात्। अस्या अनित्यत्वात्क्वचित्सु-बुत्पत्त्यनन्तरमपि समासः। यथा 'सा हि तस्य धनक्रीता' इति। अन्ये त्वनित्यत्वे न मानं, तत्राजादित्वात् टाबित्याहुः। अत एव 'कुम्भकारः' इत्यत्र षष्ठीसमासोऽपि सुबुत्पत्तेः पूर्वमेव। षष्ठी-

समासाभावे च उपपदसमासकृत एकार्थीभाव इति, न तत्र वाक्यमिति 'उपपदम्' (२.२.१९) इति सूत्रे भाष्ये स्पष्टम्। तत्र हि षष्ठीसमासादुपपदसमासो विप्रतिषेधेन (२.२.१९.वा.३) इति वार्त्तिकम्। अथ वा षष्ठीसमासः। यदा न षष्ठीसमासः, तदा उपपदसमास इति तत्प्रत्याख्यानेऽपि यद्यप्युपपदसमासस्यान्तरङ्गाभिप्रायकं, "न वा षष्ठीसमासादुपपदसमासः" (२.२.१९.-वा. ४) इति वार्त्तिककृतोक्तम्। तथाऽपि तदुभयप्रत्याख्यानपरम् 'अथ वा' इति भाष्यम्। परिभाषायां सामान्यतः कारकोपादानेन कारकविभक्त्यन्तेन कृद्भिः समासमात्रस्य सुबुत्पत्तेः पूर्वमेव लाभात्। एतेन कारकतद्विशेषयोरुपादाने एवेति परास्तम्। अस्या विध्येकवाक्यत्वाभावेन विप्रतिषेधादिशास्त्रवत्कार्यव्यवस्थापकत्वेन 'उपादाने एव' इत्यर्थालाभाच्च।

'न हि कार्यी' इति न्यायस्य 'गुणानाञ्च परार्थत्वात्' (जै. सू. १.१.८) इति न्यायेन परिभाषासु प्रवृत्त्ययोगात्। अन्तरङ्गपरिभाषायां षष्ठ्यन्तोपात्तस्यापि निमित्तत्वेन ग्रहणेन तदपवादभूतायां 'अन्तरङ्गानपि' इत्यस्यामपि तथा न्याय्यत्वाच्च। अतो हल्ङ्यादिलोपं प्रति न लुक्: प्राबल्यहानिः। तस्माद्धेयाघयश्चेत्यादिषु समासात्पूर्वभवयोर्ह्रस्वाद्योर्वारणस्य 'अन्तरङ्गानपि' इत्येतन्न्यायानधीनत्वात्तन्निवृत्तिः प्रकृतपरिभाषैकसाध्येति युक्तमेव यथोक्तमित्याहुः।

'अदन्तत्वाभावात्' इति। 'अतः' इत्यधिकारबाधे ह्युत्तरत्रापि तदसम्बन्धप्रसक्तिः, धनक्रीतादेरसिद्धिश्चेति भावः। तदुच्चनयन्नाह— 'अनित्यत्वात्' इति। एतच्च 'कर्तृकरणे कृता बहुलम्' (२.१.३२) इति

१. 'न वा षष्ठी समासस्याभावादुपपदसमासः'-वार्त्तिकपाठः

सूत्रस्थाद्बहुलग्रहणाल्लभ्यत इति 'उपपदमतिङ्' (२.२.१९) इति सूत्रे कैयटः। कारकांशेऽप्येकदेशानुमत्या सामान्येन प्रकृतपरिभाषायाः साधितत्वादेव 'उपपदमतिङ्' (२.२.१९) इति सूत्रभाष्योपपत्तिरिति तदेव तत्र प्रमाणमित्याह—'अत एव' इत्यादि। 'षष्ठीसमासोऽपि' इति। एतेन प्रागुक्तबहुलग्रहणबलात्तृतीयान्तस्य सुबुत्पत्तेः पूर्वमपि समास इत्यभ्युपगमात् कारकांशे प्रकृतार्थसिद्धिरिति परास्तम्। तृतीयातिरिक्तविषये कृदन्तैः समासानापत्तेः।

'यथा न षष्ठीसमासः' इति। षष्ठीसमासस्य सुबन्तेनैवं प्रवृत्तौ तद्भावपक्षे सुबुत्पत्तेः पूर्वं प्रवर्त्तमानस्य उपपदसमासस्य दौर्लभ्याद्भाष्यासङ्गतिरिति भावः। 'अन्तरङ्गत्वाभिप्रायकम्' इति। सुबन्तेन षष्ठीसमासः कृदन्तेन उपपदसमास इत्येव तदाशयः। उभयप्रत्याख्यानपरत्वञ्च तत्सङ्गोचकप्रमाणान्तराभावात्सिद्धम्। 'एतेन' इति। षष्ठीसमासविषयकत्वेनापि प्रकृतन्यायस्य भाष्यकारैरभ्युपगतत्वेनेत्यर्थः। [1]'कारकतद्विशेषोपादान एव' इति। कारकविशेषोपादान एव प्रवृत्तिः। सामान्यतः कारकोपादानेन समासविधानस्याप्रसिद्धेः। एवञ्च 'कर्तृकरणे कृता बहुलम्' (२.१.३२) इत्यनेन सुबुत्पत्तेः पूर्वं समासप्रवृत्तिः कारकांशे प्रकृतपरिभाषायाः प्रयोजनमिति तदाशयः। 'अलोमार्थे च' इति। चकारः प्रागुक्तभाष्यविरोधसमुच्चायकः। ततश्च 'कथञ्चित्कारकग्रहणेऽप्यस्याः परिभाषायाः प्रवृत्तिः, सम्बन्धसामान्यविवक्षायां कथञ्चित्कारकत्वमाश्रित्याप्येषा प्रवर्त्तते। अत एव 'पालकान्तान' इति वार्तिकस्थभाष्यकारोदाहरणे 'गोपालिका' इत्यादौ 'तृजकाभ्याम्' (२.२.१९) इति निषेधेन कारकषष्ठीसमासस्याप्रवृत्तौ स्वीक्रियमाणे सम्बन्धसामान्यषष्ठीसमासोऽपि सुबुत्पत्तेः पूर्वमेव प्रवर्त्तत इति न तत्रेत्वानुपपत्तिः। अन्यथा समासोत्तरं जायमानस्य टापः सुपः परत्वात्तदनुपपत्तिः स्पष्टैव। निरूपितञ्चैतत्प्रकृतवार्तिकस्थयोरुद्द्योतशेखरयोरिति दिक्।

'केचित्तु विशेषरूपेण यत्र कारकमुपादीयते, तत्रैवास्याः परिभाषायाः

१. 'कारकतद्विशेषयोरुपादाने'—मूलपाठः

प्रवृत्तिः, न तु षष्ठीत्यादौ कथञ्चित्कारकग्रहणे, 'कारकाणां कृदन्तेन समासः' इत्युक्ते, प्रत्यासत्त्या कारकोपादानेन विधीयमानसमासविषयतायाः औचित्येन, तद्व्यतिरिक्ते तत्प्रवृत्तौ मानाभावात्। अत एव 'ङ्याप्' (४.१.१) सूत्रे भाष्ये लिङ्गविशिष्टपरिभाषावलम्बेन 'अपां स्रष्ट्री' इत्यादौ 'तृजकाभ्याम्' (२.२.१६) इति षष्ठीसमासनिषेधसाधनोद्योगः सङ्गच्छते। अन्यथा जीवन्तेन समासाप्रसक्त्या तदसङ्गतिरेव। एवं 'द्वितीया श्रिता' (२.१.२४) इत्यादिना श्रितादिभिष्टाबन्तैः समाससम्पत्तये पूर्वान्तवद्भावं अस्थितः, तत्रैव सूत्रे भाष्ये कृदन्तेनैव समासे तुकस्तस्योपयोगः स्यात्।

किञ्च 'षष्ठी' इत्यादौ 'सुपा' इत्यस्य क्लृप्तसम्बन्धतया कथं परित्यागः प्रकृतपरिभाषया तदसम्बन्ध इति चेत्? 'नटस्य शृणोति' इत्यादौ तिङन्तेनापि समासः स्यात्। कृदन्तविषये सम्बन्धोऽन्यत्रासम्बन्ध इति चेत्? वैरूप्यलक्षणवाक्यभेदप्रसङ्गः। तस्मात् 'उपपदमतिङ्' (२.२.१९) इति सूत्रस्थं भाष्यं प्रागुपदर्शित 'ङ्याप्' (४.१.१) सूत्रभाष्यतात्पर्यविरोधान्न्यायविरोधाच्चैकदेशिनः।

उपपदसमासविषये षष्ठीसमासस्य बहिरङ्गत्वादप्रवृत्तिरिति वार्तिककारोक्तमेव युक्तमुत्तरम्। अपि च कथञ्चित्कारकत्वमाश्रित्य सम्बन्धसामान्यषष्ठीविषये प्रकृतपरिभाषया सुबुत्पत्तेः पूर्वं समासव्यवस्थापनमयुक्तमेव। उपपदांशे परिभाषोदाहरणत्वेन सकलग्रन्थकारोपदर्शितस्य 'कच्छपी' इत्यस्यासाङ्गत्यापत्तेः। तत्र ह्यधिकरणस्य सम्बन्धसामान्यविवक्षया कारकत्वाभावात्तस्य तदुदाहरणत्वम्। उक्तरीत्या कारकत्वमादायैतत्परिभाषाप्रवृत्तौ च तदसङ्गतिरेव। तथा 'दधिसेचौ' इत्यादौ सम्बन्धसामान्यषष्ठ्यन्तसमासस्यापि सुबुत्पत्तेः पूर्वं प्रवृत्तावुत्तरपदे प्रत्ययलक्षणेन पदत्वायोगात्, 'सात्पदाद्योः' (८.३.१०९) इति षत्वनिषेधानापत्तिः। 'रामभामिनी' इत्यादौ प्रातिपदिकान्तत्वलक्षणस्य णत्वस्य प्रसङ्गः। 'गोपालिका' इत्यत्र अणन्तात्स्वार्थिकः कप्रत्यय इति तदन्ताट्टापि तस्य सुपः परत्वाभावाद्युक्तमेवेत्वमिति सुधीभिराकलनीयमित्याहुः ॥७९॥

ननु 'उगिदचाम्' (७.१.७०) इति सूत्रे 'धातोश्चेदुगित्कार्यं, तर्ह्यञ्चतेरेव' इति नियमेन अधातोरेव नुमि सिद्धे किमर्थमधातुग्रहणम् ? अत आह—

७६. साम्प्रतिकाभावे भूतपूर्वगतिः ।

तत्तद्वचनसामर्थ्यान्न्यायसिद्धेयम् । तत्सामर्थ्यादभूतपूर्वस्यापीत्यर्थेन गोमत्यतेः क्विपि 'गोमान्' इत्यादौ नुमसिद्धिः । 'नामि' (६.४.३) इत्यादिसूत्रेषु भाष्ये स्पष्टा ।

अत्रापि पूर्ववत्सन्दर्भः । सम्प्रति भवं साम्प्रतिकं कालादठञ् । 'असाम्प्रतिक' इति निर्देशोऽत्र मूलम् । साम्प्रतिकस्य विशेषणस्याभावे भूतपूर्वस्य उपलक्षणस्य गतिर्ज्ञानं भवतीत्यर्थः । 'तत्सामर्थ्यात्' इति । कार्यप्रवृत्तिवेलायां शास्त्रगृहीतनिमित्तभूतधर्मस्याभावे तत्तद्वचनसामर्थ्यादभूतपूर्वं तथाविधं धर्ममादाय कार्यप्रवृत्तिरिति भावः । प्रकृते च गोमत्यतेः क्विपि नुम्विधानकाले धातुत्वेऽपि पूर्वं विद्यमानमधातुत्वमादाय नुम्प्रवृत्तिः । तत्तद्वचनसामर्थ्यादेवेयं सिद्धेति नापूर्वा । ननु 'धातुश्चेदुगित्कार्यं, तर्ह्यञ्चतेरेव' इति नियमाश्रयणेनाधातुग्रहणस्य सार्थक्यासम्भवेऽपि 'अञ्चन्तश्चेनलोपिन एव' इति नियमाभ्युपगमेसम्भवत्येव सार्थक्यमिति कथं सामर्थ्यमिति चेत् ? न; नकारविशिष्टस्याञ्चतेः सत्यपि नुमि, वर्णग्रहणे जातिग्रहणाद्द्वयोरपि नकारयोरनुस्वरे विशेषाभावात् 'नपुंसकस्य झलचः' (७.१.७२) इत्यस्मात् 'झलचः' इत्यनुवर्त्य, अचः परो यो झल् तदन्तस्य नुमित्यर्थाच्च फलाभावेनोक्तनियमानुपपत्तेः ।

'नुमसिद्धिः' इति । एवं 'छेत्य' इत्यादौ क्नोः कित्त्वसामर्थ्यादभूतपूर्वलघूपधत्वमादाय 'पुगन्त' (७.३.८३) इति गुणः । 'अवगल्भाञ्चक्रे' इत्यादावाचारेऽवगल्भेति क्विप्यन्याकारस्यानुनासिकत्वप्रतिज्ञानेनेत्संज्ञालोपयोरुपसर्गविनिर्मुक्तस्य 'गल्भ' इत्यस्योत्तरयोश्च भूतपूर्वानेकाच्त्वमादाय,

नुम्प्रत्यय इत्यपि बोध्यम्। 'नामीत्यादिसूत्रेषु' इति। 'नामि' (६.४.३) इति सूत्रे हि भाष्ये किमर्थं सनकारग्रहणं क्रियते, 'आमि दीर्घः' इत्येवोच्येत, यदागमन्यायेन (प.११) नकारविशिष्टस्य आमो ग्रहणेन ग्रहणं भविष्यति। 'अग्नीनाम्, इन्दूनाम्' इत्यादौ नित्यत्वात्प्रथमं दीर्घे ह्रस्वान्तत्वप्रयुक्तस्य नुटः प्रवृत्तिभूतपूर्वह्रस्वान्तत्वमादाय वचनसामर्थ्याद्विधास्यति। ततश्च 'नोपधायाः' (६.४.७) इत्युत्तरार्थं सनकारग्रहणं 'चर्मणाम्' इत्यत्र दीर्घनिवृत्तिफलकमित्युक्तम् ॥७६॥

७७. बहुव्रीहौ तद्गुणसंविज्ञानमपि।

अपिना अतद्गुणसंविज्ञानम्। तेषां गुणानामवयवपदार्थानां संविज्ञानं विशेष्यान्वयेनाऽन्वयित्वमिति तदर्थः। यत्र समवायसम्बन्धेन [1]सम्बन्ध्यन्यदार्थः तत्र तद्गुणसंविज्ञानम्। अन्यत्र प्रायोऽन्यत्। 'लम्बकर्णचित्रागू' उदाहरणे। 'सर्वादीनि सर्वनामानि' इति त्रोदाहरणे। सर्वनामसंज्ञासूत्रे भाष्ये स्पष्टा॥

विशेषणप्रशंसावशादत्रैषा परिभाषा प्रदर्श्या। संविज्ञानं सम्यक्त्वेन ज्ञानम्। सम्यक्त्वञ्च धर्मिपारतन्त्र्येण प्रधानविशेष्यान्वय्यवयवार्थकत्वम्। तदाह—'विशेष्यान्वयित्वम्' इति। प्रधानविशेष्यभूतक्रियान्वयित्वमित्यर्थः। 'समवायसम्बन्धेन' इति। संयोगसमवायान्यतरसम्बन्धेनेति क्वचित्पाठः। कैयटोऽप्येवम्। 'प्रायस्तद्गुणसंविज्ञानम्' इति। 'लम्बकर्णमानय, 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यादौ विशेष्यभूतान्यपदार्थे समवेतानां संयुक्तानां वा वर्त्तिपदार्थानां प्रधानविशेष्यान्वय्यात्मन्यानयनादौ अविनाभावात्तद्गुणसंविज्ञानम्, क्वचिदुक्तसम्बन्धेन सम्बन्धित्वेऽप्यन्यपदार्थस्य तद्भावः। यथा—'लम्बकर्णो भोज्यताम्, चित्रवासा बोध्यताम्' इत्यादौ।

---

१. सम्बन्ध्यन्यपदार्थः—मुद्रितः पाठः।

न हि तत्र कर्णप्रभृतीनां भुजिक्रियासम्बन्धः, वासःप्रभृतीनां वा बोधनक्रियासम्बन्धः सम्भवति। क्वचिदुक्तातिरिक्तसम्बन्धेन सम्बन्धित्वेऽप्यन्यपदार्थस्य तद्गुणसंविज्ञानम्। वृत्तिपदार्थानां प्रधानविशेष्यान्वयसम्भवात्; यथा—'तरुणवत्सो गां ददाति, दृढसेनो राजा युध्यते' इत्यादौ। तत्र हि जन्यजनकभावेन सम्बन्धेन सम्बन्धित्वेऽप्यन्यपदार्थस्य दानक्रियायां वत्सान्वयः। स्वस्वामिभावेन तत्त्वेऽपि राज्ञो युद्धक्रियायां सेनान्वयः सर्वानुभवसिद्धः। तदाह—'प्रायोऽन्यत्' इति। 'लम्बकर्णचित्रगु' इति। 'लम्बकर्णमानय, चित्रगुमानय' इति वाक्यघटकावेतौ। तत्र कर्णयोरानयनक्रियान्वयसम्भवो गवाश्च तदसम्भव इति युक्तमनयोरुदाहरणत्वम्। बहुव्रीहावुपसर्जनानां विशिष्टक्रियान्वययोग्यविशेष्यसमवधाने विशेषणत्वमन्यथा चोपलक्षणत्वं सम्बन्धनियमस्त्वकिञ्चित्कर इति परमार्थः। इदं मत्वर्थीयेऽपि न्यायसाम्यात् 'दण्डी, विषाणी चानीयताम्' इत्यादौ संयुक्तदण्डस्य समवेतस्य विषाणस्य च विशेषणत्वम्। 'गोमानानीयताम्' इत्यादौ स्वामित्वनिरूपकाणां गवां प्रधानविशेष्यान्वयाभावादुपलक्षणत्वमेवेत्यन्यत्र विस्तरः ॥७७॥

ननु 'वदः सुपि क्यप् च' (३.१.१०६) इत्यत्र चेनानुकृष्टस्य यतो 'भुवो भावे' (३.१.१०७) इत्यत्राप्यन्यनुवृत्तिः स्यादित्यत आह—

७८. चानुकृष्टं नोत्तरत्र।

णमुल्यनुवर्तमाने 'अव्ययेऽयथाभिप्रेत' (३.४.५९) इति सूत्रे पुनर्णमुल्ग्रहणमस्या ज्ञापकम्। अन्यथा 'क्त्वा च' इति वदेत्। तद्व्युत्तरत्रोभयोः सम्बन्धार्थम्। उदाहरणानि स्पष्टानि। इदमनित्यम्। अत एव 'तृतीया चहोः' (२.३.३) इत्यत्र चानुकृष्टाया अपि द्वितीयायाः 'अन्तरान्तरेण' (२.३.४) इत्यत्र सम्बन्धः। 'लुटि च क्लृपः' (१.३.९३) इति सूत्रस्थेनानुवृत्त्यर्थ-

सकृच्चकारप्रत्याख्यानेन विरुद्धेयम्। 'व्याख्यानादेवानुवृत्ति-निवृत्त्योर्निर्वाह' इति तदाशयात्। 'कुलिजाल्लुक्खौ च' (५.१.५५) इति सूत्रस्थभाष्यविरुद्धा च। तत्र हि 'द्विगोष्ठश्च' (५.१.५४) इति सूत्रात् ष्ठनस्तत्र चेनानुकृष्टस्य 'खोऽन्यतरस्याम्' (५.१.५३) इत्यस्य चानुवृत्तिं स्वीकृत्य 'लुक्खौ च' (५.१.५५) इति भाष्ये प्रत्याख्यातम्।

नन्वुक्तपदप्रशंसायां तदघटितायाः सूत्रघटितपदविशेषज्ञापिताया अपि कथञ्चिदुपस्थितेरत्रैतस्याः परिभाषाया उपन्यासः। चकारेणानुवर्त्तमानस्य परत्र सम्बन्धो नेति परिभाषार्थः। नन्वेवं 'षष्ठी चानादरे' (२.३.३८) इत्यत्र चकारेणानुकृष्टायाः सप्तम्याः 'स्वामीश्वर' (२.३.३९) इत्यत्र सम्बन्धो न स्यादत आह—'इदमनित्यम्' इति। 'अन्तरान्तरेण' इति। ननु विधेया-श्रवणादाकाङ्क्षापूरणाय स्यादेव तत्र द्वितीयायाः सम्बन्ध इति नेदं फलम्। न च तत्राकाङ्क्षावशात्तृतीयाया एव सम्बन्धः स्यादिति वाच्यम्। तथा सति 'अपवर्गे तृतीया'' (२.३.६) इत्यस्य वैयर्थ्यापत्तेरिति चेत्। तर्हि तदेव सूक्ष्ममेतदनित्यत्वे प्रमाणमित्याशयः। 'व्याख्यानात्' इति। अन्यथा 'गुदभ्यो लुङि' (१.३.९१) इत्यत्र विभाषाग्रहणानुवृत्तये चकारः कर्त्तव्यः स्यादिति भाष्ये उक्तम्। 'लुक्खौ च' इति। ठन्खञोर्विकल्पेन विधाने पक्षे प्राप्तस्यौत्सर्गिकस्य ठञः 'अध्यर्ध' (५.१.२८) इति लुक्यभीष्टं रूपत्रयं सिद्ध्यतीति वार्त्तिककृता प्रत्याख्यातमेतत् ॥७८॥

नन्वनुदात्तादेरन्तोदात्ताच्च यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्ताच्च न प्राप्नोतीत्यत आह—

७९. स्वरविधौ व्यञ्जनमविद्यमानवत्।

स्वरोद्देश्यके विधावित्यर्थः। 'नोत्तरपदेऽनुदात्तादावपृथिवी'

रुद्रपूषमन्थिषु' (६.२.१४२) इति सूत्रे पृथिव्यादिपर्युदासोऽस्या ज्ञापकः। अन्यथा पृथिव्यादीनामनुदात्तादित्वाभावादप्राप्तौ तद्वैयर्थ्यं स्पष्टमेव। धर्मिग्राहकमानादेव च स्वरोद्देश्यकविधिविषयमिदम्। अत एव 'शतुरनुमो नद्यजादी' (६.१.१७३) 'अचः कर्तृयकि' (६.१.१९७) इत्यादौ 'अजादी, अचः' इत्यादेश्चारितार्थ्यम्। अत एव 'राजवती' इत्यादौ नलोपस्यासिद्धत्वात् अन्वतीशब्दत्वात् 'अन्तोऽवत्याः' (६.१.२२०) इति स्वरो न, 'उदश्वित्वान्' इत्यत्र 'ह्रस्वानुड्भ्याम्' (६.१.१७६) इति मतुबुदात्तत्वञ्च नेत्याकरः। स्पष्टञ्चेदं 'समासस्य' (६.१.२२३) इति सूत्रे भाष्ये। 'उच्चैरुदात्तः' (१.२.२९) इति सूत्रे कैयटस्तु इयमनावश्यकी समभिव्याहृताजुपरागेण हलोऽप्युदात्तादिवदवभासात्तदुपपत्तेरित्याह। तत्र भाष्येऽपि ध्वनितमेतत्।

नन्युक्तपदबोधितपरिभाषाप्रस्तावादत्रैतस्याः परिभाषायाः प्रतिपादनम्। एवमुत्तरपरिभाषाया अपीति बोध्यम्। 'पृथिव्यादिपर्युदासः' इति। स हि 'द्यावापृथिवी' इत्यादौ 'देवताद्वन्द्वे च' (६.२.१४१) इत्यनेन प्राप्तस्य पूर्वोत्तरपदोभयोदात्तत्वस्य निषेधं बाधयितुम्। 'स्वरोद्देश्यकविधिविषयम्' इति। उदात्तत्वादिगुणविशिष्टोद्देश्यकविधिविषयकमित्यर्थः। अत्रार्थे सूत्रकारसम्मतिमाह—'अत एव' इति। 'शतुरनुमो नद्यजादी' इत्यस्य 'अनुम्को यश्शता तदन्तात्परा नदी अजादिविभक्तिश्चोदात्तेत्यर्थः। ननु 'दधती, दधते' इत्यादौ नद्यजादिविभक्त्योरुदात्तताव्यावृत्त्यर्थमत्र 'अन्तोदात्तात्' (६.१.१९९) इत्यनुवृत्तेराकरसम्मतत्वात्स्वरोद्देश्यक एवायं विधिरिति कथमजादिग्रहणमुक्तकल्पनया सार्थकं स्यात्? कथं वा 'तुदभ्याम्' इत्यादौ विभक्त्युदात्तत्वव्यावृत्तिः।

यदि तु स्वरोद्देश्यक एव यो विधिः, न तु स्वरप्रापकस्तस्याभूतोऽस्याः

प्रवृत्तिविषय इत्युच्यते, तर्हि प्रकृतसूत्रविषये सर्वथैव तदप्रवृत्त्यापत्त्या 'तुवती, तुदसा' इत्यादावन्तोदात्तत्वस्य शत्रन्ते ह्रस्वचत्वेन द्विवेचिविषयत्वप्रसङ्ग इति चेत्, न। उद्देश्यकोटिप्रविष्टोदात्तादिसम्बन्धितावयवत्वाद्विधिवैयर्थ्यविरोधित्यञ्जनविषयकत्वकल्पनेनादोषात्। अत एव 'समासस्य' (६.१.२२३) इति सूत्रे भाष्येऽप्यनुदात्तादेरन्तोदात्तात्त्वं विधीयमानस्य व्यञ्जनादेर्व्यञ्जनान्तात्त्वं च प्रवृत्तौ पृथिव्यादिपर्युदासः प्रमाणमित्येवोक्तम्। 'ऊडिदम्' (६.१.१७१) इति सूत्रेऽपि भाष्ये स्फुटमेतत्। 'उदात्तवदनुदात्तस्य स्वरितः' (८.४.६६) इत्यत्राविद्यमानोदात्तस्यज्झल्सञ्ज्ञातस्यानुदात्तशब्देन ग्रहणात् 'नब्विषयस्य' (फि. सू. २,२६) इत्यामुदात्ते 'दधि मधु' इत्यादौ स्वरितत्वप्रवृत्तये प्रकृतपरिभाषाया अनुपयोग इति तत्रैव भाष्ये स्पष्टमिति दिक्।

'अच्' कर्तृयकि' इति। उपदेशे अजन्तात्परो यो यक् तदन्तस्यादिरुदात्तो वेत्यर्थः। तत्र हि 'पच्यते स्वयमेव' इत्यादौ प्रकृतस्वरव्यावृत्तये क्रियमाणमज्ग्रहणमेतत्परिभाषाप्रवृत्तावनर्थकमेव स्यादिति भावः। 'मतुबुदात्तत्वञ्च' इति। ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुबुदात्त इति 'ह्रस्वनुड्भ्याम्' (६.१.१७६) इत्यस्यार्थः। 'स्पष्टञ्चेदम्' इति। कृत्करीत्या स्वरोद्देश्यकविधिविषयत्वमित्यर्थः। अत एवोत्तरपरिभाषारम्भश्चरितार्थः। अन्यथा सम्बन्धसामान्यषष्ठ्या समासेन स्वरोद्देश्यके तद्विधायके चास्याः प्रवृत्तौ तद्वैयर्थ्यं स्पष्टमेव।

'कैयटस्तु' इति। अज्झलनुदात्तत्वादीनामज्धर्मत्वादज्परायेण व्यञ्जनेष्वप्यज्धर्मावभासेऽप्यवास्तविकत्वादनुदात्तादिशब्दैस्तेषां ग्रहणे मानाभाव इत्युक्तं एवायं कैयट इत्यत आह—'भाष्येऽपि' इति। तत्र ह्यनुदात्तत्वादीनामज्धर्मत्वं व्यञ्जनेषु तु 'सामीप्यमूलकमवयवसमवायमित्येवं व्यवस्थाप्य व्यञ्जनादेर्व्यञ्जनान्तात्त्वं च स्वरोद्देश्यकस्यानुदात्तादेरित्यादेः' प्रवृत्तये न कश्चिदुपायः प्रदर्शितः। तेन च प्रातिभासिकानुदात्तत्वादिधर्मवतां व्यञ्जनानामप्यनुदात्तादिशब्दैर्ग्रहणमिति भाष्यकारः सूचयतीत्याशयः॥७९॥

नन्वेवमपि 'राजदन्त' इत्यादौ 'समासस्य' (६.१.२२३) इत्यन्तोदात्तत्वं षकारस्य न स्यादत आह—

५०। हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत्।

अस्याश्च 'यतोऽनावः' (६.१.२१३) इति सूत्रे नौप्रतिषेधो ज्ञापकः। 'नाव्यम्' इत्यत्रादिर्नकारो न स्वरयोग्यः, यथाकारः स्वरयोग्यो नासावादिरिति प्रतिषेधोऽनर्थकः। न चादिरेव नकारः उदात्तगुणविशिष्टान्तरतमाकारूपोऽस्त्विति वाच्यम्। तथा सति निमित्तभूतद्वयच्कत्वस्य विनाशादुपजीव्यविरोधेन आद्यदात्तापत्तिरित्यन्यत्र विस्तरः। स्पष्टा चेयं 'समासस्य' (६.१.२२३) इति सूत्रे भाष्ये।

'न स्वरयोग्यः' इति उदात्तत्वादीनां स्वतो व्यञ्जनधर्मत्वाभावात्तथोच्चारणासम्भवात्। 'अन्तरतमाकारूपः' इति। नकारस्थाने दन्त्यत्वादिसाम्यादलकारो विधीयतामित्यर्थः। 'उपजीव्यविरोधेन' इति। ननु लक्ष्यागत एव हि उपजीव्योपजीवकभावो न्यायविषयः। स च कार्यप्रवृत्त्यनन्तरमेव, न तु ततः प्राक्। प्राक् तत्प्रवृत्तौ च भवत्येवोपजीव्यविरोध इति कथमिह तथाविधो न्याय इति चेत्? सत्यम्; उपजीव्यस्य निरुद्धं नोपादयतीति न्यायशरीरम्। ततश्च द्वयच्कत्वरूपमुपजीव्यं नकारस्यालकारप्रापणेन नोत्पादयतीति वक्तुं युक्तत्वात् सम्भवत्येवायं न्यायः। निमित्तवारणस्यैवोपजीव्यत्वेन ग्रहणात् 'इको यणचि' (६.१.७७) इत्यादौ कार्यित्वेन गृहीतस्यौकारादेः स्वविरुद्धयकाद्युत्पादनेऽपि न प्रवृत्तिरित्याहुः॥

अथ नौप्रतिषेधस्य प्रकृतन्यायानाश्रयणबोधनेनापि चरितार्थत्वात्कथमेतत्परिभाषाज्ञापनमिति चेत्? मैवम्; परिभाषाया अभावे 'वधिका' इत्यादौ 'इवे प्रतिकृतौ' (५.३.९६) इति कनि निमित्तप्रयुक्तमाद्युदात्तत्वमादाय शेषनिघातेन सर्वेषामेव हलां निवृत्त्यापरया कनः ककारवैयर्थ्यापत्तेः।

न च 'केणः' (७.४.१३) इत्यत्र विशेषणार्थं तदुच्चारणमिति वाच्यम्। शेषनिघातेन ककारस्यान्तरतमानुदात्ताकारे मसंज्ञाप्रयुक्तकार्यापत्त्या तदंशे ह्रस्वविधानानुपयोगात्। ततश्च नौप्रतिषेधेन अवश्यज्ञापनीयायां परिभाषायां ज्ञापनोपायतया न्यायोऽप्ययमभ्यनुज्ञात इति न काप्यनुपपत्तिरिति दिक्।

केचित्तु परिभाषाया अभावे शेषनिघातेन सर्वत्रैव ककारस्याकारादेशापत्तौ पूर्वस्याणस्तत्प्रयुक्तलोपादिप्रवृत्त्या निरर्थकात् 'केणः' (७.४.१३) इति ह्रस्वारम्भात्केनः ककारोच्चारणाद्वा परिभाषैषा ज्ञाप्यताम्, नौप्रतिषेधेनैतज्ज्ञापनन्तु न युक्तम्। तदुपायत्वेन न्यायाश्रयणे गौरवात्फलाभावाच्चेत्याहुः।

ननु 'पूरणगुण' (२.२.११)' इति निषेधस्तव्यत्यपि स्यात्, 'दिव औत्' (७.१.८९) इत्यौत्त्वं दिवेः क्विप्यपि स्यात्। तथा 'यतोऽनावः' (६.१.२१३) इति स्वरोऽप्यत्यपि स्यात्। 'ऋदृशोऽङि गुणः' (७.१.१६) इति चङ्यपि स्यादत आह—

८१. निरनुबन्धकग्रहणे न सानुबन्धकस्य।

८२. तदनुबन्धकग्रहणे नातदनुबन्धकस्य।

'वामदेवात् ङ्यड्ड्यौ' (४.२.९) इति सूत्रे ङ्यङ्ड्यतोर्ङित्त्वमनयोर्ज्ञापकम्। तद्धि 'यतोऽनावः' (६.१.२१३) इत्यत्रा तयोरग्रहणार्थम्। नावः परस्य यतदन्तस्योत्तरपदस्यान्त उदात्त इति तदर्थः। एवञ्चावामदेव्येऽव्ययपूर्वपदप्रकृतिस्वर एव भवति। तन्मात्रानुबन्धकग्रहणे स चान्यश्चानुबन्धो यस्य तद्ग्रहणं

नेत्यर्थः । एते च प्रत्ययाप्रत्ययसाधारणे । 'दिव औत्' (७.१.८४) इत्यादौ सञ्चारितत्वात् । वर्णग्रहणे चानयोरप्रवृत्तिरिति स्पष्टं 'औङ आपः' (७.१.१८) इत्यत्र भाष्ये । येनानुबन्धेन सानुबन्धकत्वं द्व्यनुबन्धकत्वादि वा तदनुच्चारण एवैषां धर्मिग्राहकमानात् । तेन 'जश्शसोः' (७.१.२०) इत्यत्र नैषेति निरनुबन्धकत्वात् , तद्धितश्चास एवात्र ग्रहणं स्यादिति न शङ्क्यम् । एवमन्त्या अन्यतरानुबन्धोच्चाण एव । तेन 'वनो र च' (४.१.७) इत्यादौ ङ्वनिष्कनिपोर्ग्रहणसिद्धिः । एकानुबन्धकग्रहणे सम्भवतीति त्वर्थो न भाष्यादिसम्मतं इत्यन्यत्र विस्तरः ।

नन्पूर्वपदकसमासीयस्वरविशेषव्यवस्थापकविधिघटकीभूतपदार्थनिर्णायकत्वादत्रैतयोः परिभाषयोरुल्लेखः । 'पूर्वपदप्रकृतिस्वर एव' इति । तदुक्तं भाष्ये —

'सिद्धे यस्येति लोपेन किमर्थौ ययतौ डितौ ।
ग्रहणं माऽतदर्थे भूद्वामदेव्यस्य नञ्स्वरे ॥' इति ।

तत्र दिव औत्त्वे धातुप्रतिषेध इति वार्त्तिकं प्रथमपरिभाषया प्रत्याख्यातम् । क्विबन्तो दिव्धातुरुदित्त्वात्सानुबन्धकः । प्रातिपदिकं त्वव्युत्पन्नत्वान्निरनुबन्धकमित्याशयः । 'दिवेर्डिविः' (?) इत्यौणादिकेन व्युत्पन्नत्वाङ्गीकारे द्वितीयपरिभाषया धातोरेव ग्रहणं स्यादिति न शङ्क्यम् । अनुबन्धविशिष्टोच्चारण एव द्वितीयपरिभाषाप्रवृत्तेर्वक्ष्यमाणत्वात् ।

न च व्युत्पत्तिपक्षे 'उत्सृष्टानुबन्धग्रहणे सामान्यग्रहणम्' इति धातुग्रहणं दुर्वारमिति वाच्यम् । धातुप्रतिषेधवार्त्तिकप्रत्याख्यानभाष्यप्रामाण्येनैतद्विषये व्यवस्थितस्याव्युत्पत्तिपक्षस्यैवाभ्युपगमात् । 'औङ आप इत्यत्र' इति । तत्र हि भाष्ये ङकारस्तूच्चारणार्थो वर्णग्रहणमिति श्लोकवार्तिक-

कारोपदर्शिते पक्षे निरनुबन्धकपरिभाषाया अपि प्रथमाद्विवचनस्यैव ग्रहणं स्याद्रिन्त्युद्भाव्य नैषा वर्णग्रहणेषु प्रवर्त्तत इत्युक्तम् । 'न भाष्यादिसम्मतः' इति । 'उत्सृष्टानुबन्धग्रहणे सामान्यग्रहणम्' इति तत्र तत्र व्यवस्थापितत्वादित्याशयः ॥८२॥

ननु 'कुटीरः' इत्यादौ स्वार्थिकत्वात्, स्वार्थिकानां प्रकृतितो लिङ्गवचनानुवृत्तेर्न्यायप्राप्तत्वात् पुंस्त्वानुपपत्तिः । 'अप्कल्पम्' इत्यत्र नपुंसकत्वैकवचनयोरनुपपत्तिश्चेत्यत आह —

८३. क्वचित्स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ।

'णचः स्त्रियाम्' (५.४.१४) इति सूत्रे 'स्त्रियाम्' इत्युत्तिरस्यां ज्ञापिका । अन्यथा 'कर्मव्यतिहारे णच् स्त्रियाम्' (३.३.४३) इति स्त्रियामेव विधानात्किं तेन ? स्पष्टा चेयं बहुज्विधायके भाष्ये ।

पूर्वपरिभाषाज्ञापकभूततद्धितप्रशंसावशादत्रैतस्याः परिभाषायाः प्रतिपादनम् । एवं समासान्तानां तद्धितत्वाविशेषादुत्तरपरिभाषाया अपि । 'प्रकृतितः' इति सार्वविभक्तिकः षष्ठ्यर्थे तसिः । 'क्वचित्' इत्युक्त्या स्वार्थिकानां प्रकृतिसम्बन्धिलिङ्गसंख्यानुवृत्तिरौत्सर्गिकीत्युक्तम् । अयं भावः—महासंज्ञाकरणेन प्रत्ययानामर्थवत्तानियत्यादनिर्दिष्टार्थानां तेषामर्थान्वेषणे पुरःस्फूर्त्तिकेन प्रकृत्यर्थेन तत्कल्पनायां प्रकारतया भासमानयोर्लिङ्गसंख्ययोः परित्यागायोगात्तदनुवृत्तिर्न्याय्या । वैपरीत्यन्तु प्रमाणापेक्षमिति । तदाह—'स्त्रियामित्युक्तिरस्यां ज्ञापिका' इति । 'बहुज्विधायके' इति । तत्रत्येन तुशब्देनैवायमर्थो निरूपितो भाष्ये ॥८३॥

ननु 'सुपथी नगरी' इति 'युवोरनाकौ' (७.१.१) इति सूत्रभाष्योदाहृत 'इनः स्त्रियाम्' (५.४.१५२) इति कप् स्यादत आह—

८४. समासान्तविधिरनित्यः ।

'प्रतेरंश्वादयस्तत्पुरुषे' (६.२.१९३) इत्यन्तोदात्तत्वायांश्वादिषु राजन्शब्दपाठोऽस्यां ज्ञापकः । अन्यथा टचैवान्तोदात्तत्वे सिद्धे किं तेन ? 'द्वित्रिभ्यां पादन्मूर्धसु' (६.२.११७) इति स्वरविधायके भाष्ये स्पष्टीयम् ।

'टचैव' इति । 'प्रतिकूलो राजा, प्रतिराजः' इत्यादौ 'राजाहस्सखिभ्यः' (५.४.९१) इत्येतद्विहितेनेत्यर्थः । "किं तेन" इति । ननु 'प्रतेरंश्वादयः (६.२.१९३) इत्यस्य प्रतेः परास्तत्पुरुषघटका उत्तरभूता अंश्वादयोऽन्तोदात्ता इति हि वाक्यार्थः । ततश्च टिलोपोत्तरमवशिष्टस्य जान्तसङ्घातस्यैकदेशविकृतन्यायेन राजन्शब्दतया सतिशिष्टत्वेन रेफाकारस्योदात्तविधानाय सार्थक्यात्कथं वैयर्थ्यम् । न च तक्रकौण्डिन्यन्यायेन टिलोपात्पूर्वं जकाराकारस्योदात्तत्वे शेषनिघातेनानुदात्तस्य टजकारस्यैव टिलोपोत्तरमुदात्तनिवृत्तिस्वरेणोदात्ततया भवितव्यमतो दुर्वचमेव रेफाकारस्योदात्तत्वमिति वाच्यम् । टिलोपस्य तक्रकौण्डिन्यन्यायेन स्वरात्पूर्वं प्रवृत्तिविघाते पश्चादपि तदप्रवृत्त्या रूपासिद्धिप्रसङ्गेनानित्यस्य तादृशन्यायस्यैतद्विषये प्रवृत्त्ययोगात् ।

'बहिरङ्गत्वन्तूभयोरपि' विशिष्टनिमित्तकत्वादविशिष्टम् । अनित्यत्वमपि शब्दान्तरप्राप्त्या स्वरस्य स्वरभिन्नस्य प्राप्त्या टिलोपस्य च तुल्यमेव । परत्वन्तु टिलोपस्यैवेति नास्ति ज्ञापकतासम्भव इति चेत् ? अत्राहुः; सौवरीणां सप्तमीनां षष्ठ्यर्थकत्वादंश्याद्युत्तरपदकस्य तत्पुरुषस्यान्त उदात्त इत्यर्थं टचो नित्यत्वे तदैयर्थ्येन ज्ञापकत्वमित्याशयः । यद्वा 'जटाया जरस्' (९.२.१०१) इति सूत्रस्थशेखरीत्या परिच्छिन्नपरिमाणधर्मस्य राजन्शब्दत्वस्य टिलोपोत्तरमवशिष्टे लोकन्यायेनातिदेशो दुर्लभः । आनुमानिकष्टिलोपप्रयुक्तस्थानिस्थानिवद्भावोऽपि विशिष्टे 'प्रतिराजा' इत्यत्र स्थानिधर्मसम्पादकः, न तु तदेकदेशे स्थान्येकदेशधर्मसम्पादक इति यथाश्रुतेऽपि रेफाकारे स्वरप्रवृत्तिदौर्लभ्यान्न ज्ञापकताविरोध इत्युपाध्यायानुयायिनः ।

'भाष्ये स्पष्टा' इति। इदं परिभाषायां भाष्यकृत्सम्मतिप्रदर्शनाय। भाष्ये तु 'द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ' (६.२.१९७) इत्यत्र 'मूर्धसु' इति नकारान्तनिर्देशो ज्ञापकः। अन्यथा प्रक्रमाभेदाय 'मूर्धेषु' इति निर्देष्टव्ये तथा निर्देशस्यानुपपत्तिरेवेत्युक्तम्। केचित्तु 'ऋक्पूरब्धूः पथाम्' (५.४.७४) इत्यकृतसमासान्तनिर्देशः प्रकृतार्थं ज्ञापक इत्याहुः ॥८४॥

ननु 'शतानि' इत्यादौ नुमि कृते षट्संज्ञा प्राप्नोति, ततश्च लुक् स्यात्। तथा 'उपादास्त' इत्यत्रात्वे कृते 'स्थाघ्वोरिच्च' (१.२.१७) इतीत्त्वं प्राप्नोतीत्यत आह—

८५. सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य।

सन्निपातो द्वयोस्सम्बन्धस्तन्निमित्तो विधिस्तं सन्निपातं यो विहन्ति स तस्यानिमित्तम्। उपजीव्यविरोधस्यायुक्तत्वमिति न्यायमूलैषा। अत एवात्र सन्निपातशब्देन न पूर्वपरयोः सम्बन्ध एव किन्तु विशेषणसन्निपातोऽपि गृह्यते; अत एव 'ग्रामणि कुलम्' इत्यादौ नपुंसकह्रस्वत्वेऽपि 'पिति कृति' (६.१.७१) इति तुग्न।

'षट्संज्ञा प्राप्नोति' इति। ननु बहिर्भूतसर्वनामस्थाननिमित्तकस्य नुमो बहिरङ्गतया षट्संज्ञादृष्ट्या नान्तत्वाभावात्कथं तत्प्राप्तिरिति चेत्? न; संज्ञानां विधिनिमित्तनिमित्तकत्वेन लुगर्थायाः संज्ञाया अपि जस्निमित्तकतया नुमो बहिरङ्गत्वायोगात्। न च 'अकृतव्यूह' (प.९६) परिभाषया प्रकृते नुमागमाप्राप्तेरापादनीयतया नेदं युक्तमिति वाच्यम्। सिद्धान्ते तत्परिभाषाया अभावात्। सत्त्वे वा दूषणान्तरत्वेनादोषादुच्चेत्याहुः। 'इत्त्वं प्राप्नोति' इति। ननु किच्चमेवात्वनिमित्तभूतैज्विषयत्वसन्निपातविघातकं न त्वित्त्वमतो मास्तु कित्त्वमित्त्वन्तु स्यादेवेति कथमनया परिभाषया तन्निवृत्तिरिति चेत्? न; किच्चसन्नियोगशिष्टत्वेनेत्त्वस्य प्रकृतपरिभाषया किच्चनिवृत्तावुत्तरपरिभाषया तन्निवृत्तिरित्याशयात्। पौर्वापर्यलक्षण

एव सम्बन्धः सन्निपात इति प्राचीनोक्तेरयुक्ततां ध्वनयन्नाह—'द्वयोः सम्बन्धः' इति। विशेष्यविशेषणभावोऽपीत्यर्थः।

'ते विहन्ति' इति। 'कर्मण्यण्' (३.२.१) इत्यण्प्रत्ययः। आवश्यन्तेन षष्ठीसमासे तु स्वस्यापि तद्विघातकत्वानापत्तिरित्याशयः। ननु किमेतस्यां परिभाषायां प्रमाणमित्यत आह—'उपजीव्यविरोधस्यायुक्तत्वम्' इति। एतेनात्र प्रकरणे प्रकृतपरिभाषानिरूपणे सङ्गतिरपि प्रदर्शिता। उपजीव्यविरोधन्यायसहायोज्जीविताया: खलु 'हलस्वराप्तौ' (प. ८०) इत्येतत्परिभाषानिरूपणोत्तरमस्याः परिभाषायां निरूपणं न्यायप्राप्तमित्याहुः। 'अत एव' इति। न्यायमूलकत्वादेवेत्यर्थः।

ननु विशेषणविशेष्यभावरूपसम्बन्धस्य सन्निपातशब्देन परिभाषायां ग्रहणे क उपयोगस्तत्राह—'अत एव' इति। ईदृशसम्बन्धस्यापि सन्निपातशब्देन ग्रहणादेवेत्यर्थः।

प्रातिपदिकाजन्तत्वसन्निपातेन जातस्य ह्रस्वस्य तदविघातकत्वात्। तुक्यजन्तत्वविघातः स्पष्ट एव। न चार्थाश्रयत्वेन ह्रस्वस्य बहिरङ्गतयाऽसिद्धत्वम्। अर्थकृतबहिरङ्गत्वानाश्रयणस्योक्तत्वात्। किञ्च 'षत्वतुकोरसिद्धः' (६.१.८६) इत्येतद्बलात्कृति तुग्ग्रहणाच्च तुग्विधौ बहिरङ्गपरिभाषाया अप्रवृत्तेः। सर्वविधसन्निपातग्रहणादेव 'वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यादित्येतत्परिभाषादोषनिरूपणावसरे वार्तिककृतोक्तम्। न हि 'प्रत्ययः पूर्वसन्निपातनिमित्तकः' स एव च सन्निपातशब्देन गृह्यत इति मत्वा 'न प्रत्ययः सन्निपातनिमित्तकः' इति शङ्कायां तदभ्युपेत्यैवाङ्गसंज्ञा, तन्निमित्तं स्यादित्येकदेशिनोक्तमिति न तद्ग्राह्यविरोधः। किञ्चैवं 'शैवो, गार्ग्यो, वैनतेयः'

इत्यादावव्यङ्गसंज्ञाया लोपनिमित्तत्वानाश्रयेण वर्णाश्रय इत्यस्य वैयर्थ्यम् ।

'विघातः स्पष्ट एव' इति । इदं ह्रस्वस्यैव तुगागम इत्यभिप्रायेण । तत्पक्षे ह्यागमसन्निधाने विशिष्ट एवाच्त्वं तकारस्य 'समुदायावयवत्वमवयवावयवव्यायगम्यं पाश्चात्यम्' इत्यागमविधानकालिकाजन्तत्वविघातो दुर्वारः । ह्रस्वान्तस्य तुगागमे तु यदागमन्यायेन विधानवेलायामेवावयवत्वग्रह इति नान्त्यजन्तत्वविघात इति बोध्यम् । यत्तु 'वाऽचि ह्रस्वश्च' (?) इत्येव सिद्धे 'वाऽऽमि' (१.४.९) इति पृथक् नदीसञ्ज्ञाविकल्पारम्भोऽस्यां ज्ञापकः । स हि 'श्रीणां, भ्रूणाम्' इत्यादावजादिप्रत्ययानन्तर्यनिमित्तस्य नदीत्वस्य तदीयसन्निपातविघातकनुडागमं प्रति निमित्तत्वायोगादप्राप्तस्य तस्य विधानाय । प्रकृतपरिभाषाया अभावे तु तद्वैयर्थ्यं स्पष्टमेवेत्यस्यां ज्ञापकसिद्धत्वमिच्छन्ति; तदनेन प्रत्युक्तम् । ज्ञापकसाजात्येन पौन्रापर्यलक्षणस्यैव सन्निपातस्य परिभाषायां ग्रहणापत्तेः । यदागमन्यायेन विधानकाल एवावयवत्वबोधनेन सन्निपातविघातकत्वाभावात्तदारम्भस्य वैचित्र्यमात्रफलकत्वाया एव युक्तत्वाच्चेत्याहुः ।

नन्वर्थकृतबहिरङ्गत्वाश्रयणेनापि 'ग्रामणि कुलम्' इत्यादौ ग्राम्यादिभिन्नसम्भवाद्विशेषणविशेष्यभावसन्निपातस्यैतत्परिभाषाविषयत्वकल्पनं नातीवोपयुज्यते । तत्राह—'किञ्च षत्वतुकोः' इति । 'परिभाषाया अप्रवृत्तेः' इति । नाज्ञानान्तर्यपरिभाषया निषेधेन बहिरङ्गपरिभाषाया बलिष्ठत्वेन चेति भावः । विशेषणविशेष्यभावरूपसन्निपातस्याज्ञ ग्रहणे प्रमाणमप्यस्तीत्यत आह 'सन्निधिसन्निपातग्रहणादेव' इति ।

ननु वार्त्तिककृत्सम्मतोऽप्ययमर्थो भाष्यकृद्भिरेव प्रत्याख्यातेः प्रामाण्यमाशङ्क्याह—'एकदेशिनोक्तम्' इति । सिद्धान्तिनस्तु तथाविधं प्रामाण्यमिति भावः । तस्यैकदेश्युक्तित्वं साधयति—'किञ्चैवम्' इति । 'वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यात्' (१.१.३९. वा.१०) इति कात्यायनवचनस्य प्रत्ययसन्निपातप्रयुक्ताङ्गसंज्ञा प्रकृतिसम्बन्धिवर्णविनाशकं यस्येति-

क्तोः (६.४.१४८) इति निमित्तं न हृयादित्याख्यायकत्वे प्रत्ययाङ्गो वर्णाश्रय-त्वविशेषेणासत्यर्थकल्पित्यत्वनानोऽसावेकदेशमेवेति भावः। यदि विशेषणविशेष्य-भावोऽप्यत्र सन्निपातो यदि वा तुल्यविषये बहिरङ्गपरिभाषायाः सूत्रस्यान्त-प्रवृत्तिः, तदा 'ग्रामणि कुलम्' इत्यादौ 'इको ह्रस्वः' (६.३.६१) इति प्राप्तं ह्रस्वमुत्पादयतः प्रसक्तस्य तुगागमस्य, बहिरङ्गपरिभाषया नाम्नः 'कृन्मेजन्तः' (१.१.३९) इतिसूत्रस्थं भाष्यकृतोक्तमसङ्गतं स्यात्।

'ग्रामणि कुलम्, ग्रामणिपुत्रः' इत्यादावाबुत्तरपदनिमित्तके ह्रस्वत्वे। यथाकथञ्चिद्बहिरङ्गपरिभाषयाऽपि नाम्नः सन्निमवतीति 'कृन्मेजन्तः' (१.१.३९) इत्यत्र 'ह्रस्वस्य पिति' (६.१.७१) इत्यत्र चैकदेशिना तया परिभाषया दुष्परिहरो भाष्ये। अत एव परिभाषाफलत्वेनेदमुक्तं 'कृन्मेजन्तः' (१.१.३९) इतिसूत्रे वार्त्तिककृतेति कैश्चित्। सन्निपातलक्षणविधित्वमस्या लिङ्गम्। स्वप्रवृत्तेः। प्राक् स्वनिमित्तभूतो यः सन्निपातस्तद्विघातकस्य स्वातिरिक्तशास्त्रस्य स्वयमनिमित्तमिति फलति।

ननु एवं 'रामाय' इत्यादौ 'सुपि च' (७.३.१०२) इति दीर्घानापत्तिः। अदन्ताङ्गेऽसन्निपातेन जातस्य यादेशस्य तद्-विघातकत्वात्। न च यञादित्वसापेक्षदीर्घस्य बहिरङ्गतयाऽसिद्धत्वान्नात्र सन्निपातविघात इति वाच्यम्। आसेधितासिद्धत्वेऽपि वस्तुतस्तद्विघातस्य जायमानत्वेनैतत्प्रवृत्तेः। किञ्चान्तरङ्गे कृतेऽपि बहिरङ्गस्यासिद्धत्वेऽपि तत्र कृते तदसिद्धत्वे मानाभावः। किञ्चातिदेशिकसन्निपातविघाताभावमादाय एतत्प्रवृत्तौ 'गौरी' इत्यादौ सम्बुद्धिलोपेऽपि स्थानिवत्त्वेन ह्रस्वनिमित्तसन्नि-पातविघाताभावात्तत्रैतस्यातिव्याप्तिपरं 'कृन्मेजन्तः' (१.१.३९) इतिसूत्रस्थभाष्यासङ्गतिः।

तत्राह—'ग्रामणि कुलम्' इत्यादि । 'एकदेशिना' इति । नासौ सिद्धान्ती । तुग्विधावुक्तरीत्या बहिरङ्गपरिभाषायाः (प. ९०) प्रवर्त्तयितुमशक्यत्वात् । 'ईङ् गतौ' (धा. पा. ११४३) इत्यतः क्विपि, नपुंसके 'इ कुलम्' इत्यादावर्थैकृतबहिरङ्गत्वानाश्रयणात्तुगपेक्षया विशिष्टनिमित्तकत्वाभावाच्च परिभाषेयं दोषेष्वपरिगणितत्वाच्च कृन्निमित्तकतुग्निवृत्तये प्रकृतपरिभाषाया अवश्यमाश्रयितव्यत्वेन बहिरङ्गपरिभाषया तुग्विषयैतत्प्रयोजनखण्डनायोगाच्चेत्याशयः । तदाह—'अत एव' इति । अस्य केचिदित्यनेनान्वयः । 'सन्निपातलक्षणविधित्वम्' इति । तद्विघातकविधित्वं तु न तथा । तथा हि सति स्वविनाश्यसन्निपातनिमित्तको विधिः स्वप्रवृत्तौ निमित्तं न भवतीत्यर्थः स्यात् । स च लोकन्यायाननुगुण इति भावः । 'फलति' इति । ततश्च सन्निपातनिमित्तकतत्तच्छास्त्रीयवाक्यशेषरूपेणैतन्निमित्तभूतसन्निपातविघातकविधेरिदमनिमित्तमित्येवमनया परिभाषया निमित्तत्वाभावबोधनादेतद्विषये तथाविधसन्निपातविघातकविधेरप्रवृत्तिरिति तत्त्वम् ।

'यङादित्वसापेक्षत्वात्' इति । ननु बह्वपेक्षत्वलक्षणं बहिरङ्गत्वमधस्तान्निराकृतमेवेति कथमिदमाशङ्क्यते ? सत्यम् । तादृशबहिरङ्गत्वाश्रयणेऽप्यत्र न निर्वाह इत्याशयेनैतद्ग्रन्थप्रवृत्तिरित्याहुः । 'आरोपितासिद्धत्वेऽपि' इति । प्रवृत्तस्यैव विघातस्यारोपितमसिद्धत्वं, न त्वप्रवृत्तस्येति भावः । नन्वारोपस्यापि शास्त्रविहितस्य कार्यप्रवृत्त्यभावनियामकत्वं दृष्टम् । अन्यथा ह्यारोपबोधकशास्त्रवैयर्थ्यप्रसङ्ग इत्यत आह—'किञ्चान्तरङ्गे' इति । अत एव 'पट्व्या' 'मृद्वया' इत्यादौ पूर्वयणादेशप्रवृत्त्यवस्थायामसिद्धोऽपि यणादेशः पश्चात्प्रवर्त्तत इति बोध्यम् ॥

ननु सन्निपातलक्षणविध्येकवाक्यता ह्यस्याः प्रवृत्तिबीजं, तत्तश्च लक्ष्यप्रवृत्तेः पूर्वं वाक्यार्थबोधकाल एव 'ङेर्यः' (६.१.११३) इत्येतच्छास्त्रैकवाक्यतया परिभाषायाः यादेशस्य तदीयसन्निपातविघातकविधिं प्रति निमित्तत्वाभावस्य बोधनीयतया तदानीमन्तरङ्गभूतयादेशदृष्ट्या तदेकवाक्यतापन्नपरिभाषादृष्ट्या च बहिरङ्गत्वेन यत्र सन्निपातविघाताभावबुद्धिः, तत्र तथा बोधयितुमशक्यतया दीर्घविधावप्रवृत्तया तया परिभाषया पश्चादसिद्धत्वाभाववतोऽपि तस्य निवृत्त्ययोगादिदमयुक्तमेवेत्यत आह—'किञ्चैवम्'

इति । आहार्यारोपस्याप्यन्यत्र शास्त्रवैयर्थ्यान्यथानुपपत्त्या भवतु कार्यकारित्वम्, इह तु प्रमाणान्तरविरोधात्तदभाव इति भावः ।

'भाष्यासङ्गतिः' इति । यदि तु स्थानिवद्भावेन सन्निपातविघातभाव-बुद्धिरादेशस्य लक्ष्यप्रवृत्त्यनन्तरमेवेति प्रवृत्तिकालिकं तद्विघातमादाय तदंशे परिभाषाप्रवृत्तिर्दुर्वारा, बहिरङ्गांशे तु लक्ष्ये प्रवृत्तिमन्तरैव बहिरङ्गत्वेन ज्ञातस्याविद्यमानतावुद्धौ कथमपि तद्विघातामावादप्रवृत्तिरेव तस्या इति वैजात्येनैतद्भाष्योपपत्तेरातिदेशिकसन्निपातविघातामावेऽपि परिभाषाप्रवृत्तिरित्यर्थे प्रामाण्यासम्भव इति मन्यते, तदा यादेशः, 'सुपि च' (७.३.१०२) इति दीर्घस्येति प्रकृतविषये परिभाषाया अतिव्याप्तिप्रदर्शनपरमेव भाष्यमुक्तार्थे गमकमिति बोध्यम् । केचित्तु तद्भाष्यबलाद्बह्वपेक्षत्वेन बहिरङ्गत्वं नाश्रीयत इत्येव युक्तम्, उक्तकल्पनायामन्यत्र फलाभावादित्याहुः ।

सन्निपातस्याशास्त्रीयत्वान्नात्र स्थानिवत्त्वमिति चेत्, तर्ह्यसिद्धत्वमपि कथमिति विभावय । अशास्त्रीयेऽसिद्धत्वाप्रवृत्तेः 'ईदूदेत्' (१.१.११) इतिसूत्रे कैयटे स्पष्टमुक्तत्वात्। एवञ्च पूर्वत्रासिद्धीयेऽपि कार्ये एतत्परिभाषाया अप्रवृत्तिर्भवत्येवेति चेत् ? न; 'कष्टाय' (३.१.१४) इति निर्देशेनास्या अनित्यत्वात् । ययोः सन्निपातविघातकं शास्त्रं तयोः सन्निपातनिमित्तकविधौ उपादानमपेक्षितमिति तु नाग्रहः ।

'पूर्वत्रासिद्धीयेऽपि' इति । इदं तु चिन्त्यम् ; फलाभावात् । 'दुग्धं, दोग्धा' इत्यादौ धत्वनिमित्तकस्य 'झषस्तथोः' (८.२.४०) इति धत्वस्य प्रकृतपरिभाषया जश्त्वं प्रति निमित्तत्वानुपपत्तौ रूपासिद्धिप्रसङ्गाच्च । 'इको यणचि' (६.१.७७) इत्युत्तरं 'मय उञो वा' (८.३.३३) इति न्यासेन वकारादेशेऽपि 'किम्वुक्तम्' इत्यादौ प्रकृतपरिभाषया मकारस्यानुस्वारनिवृत्तौ, त्रिपाद्यां तन्निवृत्तये गुरुभूतस्य 'मय उञो वा' इत्यस्य वैयर्थ्याच्च । न च त्रिपाद्यां तादृशगुरुभूतन्यासेन परिभाषाया अनित्यत्वं ज्ञाप्यतां

तथा च 'दुग्धं दोग्ध्या' इत्यादौ जश्त्वस्य परिभाषाया अनित्यत्वमूलकेन प्रवृत्त्यभावेन सुवचतया न काऽप्यनुपपत्तिरिति वाच्यम् । परिभाषादोषेषु त्रैपादिकानामेषां भाष्यकारैरपरिगणनेन निरुक्तानित्यत्वज्ञापनमाश्रित्य तत्समर्थनस्यास्वारसिकत्वात् ।

न च 'दधि मधु' इत्यादौ 'निष्विषयस्यानिष्टस्य' (फि.सू. २.२६) इत्यनेन प्रवृत्तमाद्युदात्तत्वमाश्रित्य 'विधीमात्तस्य उदात्तादनुदात्तस्य स्वरितः' (८.४.६६) इत्यस्य शेषनिघातप्रयोजकत्वाभावात्तस्यां परिभाषाप्रवृत्तेः प्रयोजनमिति वाच्यम् । सन्निपातनिमित्तकविधित्वरूपलिङ्गेनोपलिष्टमानेयां प्रकृतपरिभाषया तत्तच्छास्त्रीयविशिष्टवाक्यार्थबोधोत्तरं वाक्यैकवाक्यतया स्वनिमित्तभूतसन्निपातविघातकविधिं प्रतीदं निमित्तं न भवतीत्येवं विघातकविधेर्निमित्तत्वाभावस्य बोधनीयतया परिभाषादृष्ट्या प्रकृते सन्निपातनिमित्तकविधेरसिद्धत्वेन लिङ्गपरिज्ञानाभावात्परिभाषाया अप्रवृत्तेः । प्रवृत्तावप्यनया वाक्यान्तरेण निमित्तत्वाभावबोधनात्पूर्वमेव सन्निपातनिमित्तकविध्येकवाक्यतापन्नपूर्वत्रासिद्धशास्त्रेण (८.२.१) प्रत्यक्षसिद्धेनासिद्धत्वेन प्रतिपादने पश्चात्सन्निपातनिमित्तकविधित्वस्य दुर्ज्ञेयतया तद्विघातकविध्यन्तरनिरूपितनिमित्ततासमर्पकत्वाभावस्य तद्गतस्य प्रतिपादयितुमशक्यत्वाच्च । न चास्याः परिभाषायाः उपजीव्यविरोधन्यायमूलकत्वेन लोकन्यायतया सुबपाठात्सन्निपातापेक्षापूर्वत्वोपहितशास्त्रासमर्पकेण तत्तच्छास्त्रैकवाक्यतापन्नपूर्वत्रासिद्धशास्त्रघटकपूर्वपदेन ग्रहीतुमशक्यतया परिभाषादृष्ट्या त्रिपाद्या असिद्धत्वं दुर्वचमिति वाच्यम् । पुरुषाकारमसहायेनैव भगवता भाष्यकृता तत्र तत्र लोकन्यायानां शास्त्रव्यवस्थापकत्वोपवर्णनेन शास्त्रविषयतासम्पत्त्यर्थं धर्मिग्राहकसाजात्ये विशेषविषयतालाभार्थञ्च ज्ञापकापेक्षाया आवश्यकत्वात् ।

न चात्रार्थे ज्ञापकासम्भव इति वाच्यम् । 'न तिसृ चतसृ' (६.४.४) इति निषेधस्य ज्ञापकत्वात् । अन्यथा 'तिसृणाम्, चतसृणाम्' इत्यत्र ऋदन्तलक्षणे ङीपि दीर्घस्यानुपयोगेन तद्वैयर्थ्यस्य दुर्वारत्वात् । ज्ञापितायान्तु प्रकृतपरिभाषायां विभक्त्यानन्तर्यनिमित्तकस्य तिसृचतसृभावस्य तत्सन्निपातविघातकङीबुत्पत्तिं प्रति निमित्ततायोगव्यवच्छेदकारान्तयो-

स्तयोर्दीर्घनिवारणाय निषेधसामर्थ्यात्। न च तिसृचतसृशब्दयोः स्वस्रादिपाठेन 'न षट्' (४.१.१०) इति निषेधादेव ङीपोऽप्राप्त्या निषेधसामर्थ्यकल्पनसम्भवात्कथं ज्ञापकत्वमिति वाच्यम्। 'कृन्मेजन्तः' (१.१.३९) इति सूत्रस्थभाष्यप्रामाण्येन तयोः स्वस्रादिपाठस्यानार्षत्वात्। तत्र हि 'तिस्रः, चतस्रः' इत्यत्र ङीप्प्रत्ययमुद्घाट्य आचार्यप्रवृत्तिर्ज्ञापयति न तिसृचतसृभावे ङीब्भवतीति, यदयं 'न तिसृचतसृ' इति सूत्रे दीर्घत्वप्रतिषेधं शास्तीत्युक्तम्। तयोः स्वस्रादिपाठस्य प्रामाणिकत्वे तद्व्यक्तिः स्पष्टैव। किञ्च 'अनुदात्तं पदमेकवर्जम्' (६.१.१५८) इत्यपि परिभाषा, साऽपि वाक्यैकवाक्यतया स्वकार्यनिर्वाहिका, ततः कथं त्रिपाद्यां प्रवर्तेत? तस्मादस्याः परिभाषायास्त्रिपाद्यामप्रवृत्तिरेव युक्तेति सुधीभिराकलनीयमित्याहुः।

अत एव 'दक्षिः' इत्यत्र अकारान्तप्रकृतेरसन्निपातनिमित्ताङ्गसंज्ञाऽनया परिभाषया अल्लोपस्य निमित्तं न स्यादित्याशङ्क्यानित्यत्वेन समाहितं 'कृन्मेजन्तः' (१.१.३९) इतिसूत्रे भाष्ये। न चाङ्गसंज्ञायामदन्तस्याङ्गसंज्ञेत्युक्तमस्ति। न च 'कुम्भकारेभ्य आश्रयः' इत्यादावव्ययसंज्ञाया अनया परिभाषया वारणपरभाष्यासङ्गतिः। अनया परिभाषया लुङ् मा भूत्। अव्ययत्वन्तु स्यादेव। लुका हि तदीयसन्निपातस्य विघातो नाव्ययसंज्ञायाः, संज्ञाफलन्त्वकच् स्यादिति वाच्यम्। एतदुदाहरणपरभाष्यप्रामाण्येन साक्षात्परम्परया वा स्वनिमित्तसन्निपातविघातकस्य स्वयमनिमित्तमित्यर्थेनादोषात्। एतेनात्राकच् स्यादित्यपास्तम्।

न च कार्यकालपक्षे लुगेकवाक्यतापन्नसंज्ञाबाधेऽप्यकजेकवाक्यतापन्ना स्यादिति वाच्यम्। अन्तरङ्गायां तदेकवाक्यतापन्नसंज्ञायां बहिरङ्गगुणादेरसिद्धत्वात्। लुगेकवाक्यतापन्ना तु न

गुणादितोऽन्तरङ्गा, उभयोरपि शब्दतः सुबाश्रयत्वात् । 'न यासयोः' (७.३.४५) इति निर्देशाच्चैषाऽनित्या, तेन नाति-प्रसङ्गः । स्पष्टा चेयं 'कृन्मेजन्तः' (१.१.३९) इतिसूत्रे भाष्ये । अस्या अनित्यत्वे फलानि भाष्ये परिगणितानि । वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तम् । दाक्षिः । आत्वं पुग्विधेः । क्रापयति । पुग्ग्रस्त्वस्य । अदीदपत् । त्यदाद्यकारष्टाब्विधेः । यासेति । इड्विधिकारलोपस्य । पपिवान् ह्रस्वनुड्भ्यां मतुप् । 'अन्तोदात्तादुत्तरपदात्' (६.१.१६९) इति मुतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्य । अग्निमान् । परमवाचा । नदीह्रस्वत्वं सम्बुद्धि-लोपस्य । 'नदि कुमारि' इत्यादि । यादेशः, 'सुपि च' (७.३.१०२) इति दीर्घत्वस्य । कण्ठाय । 'इतोऽन्यत्र प्रवृत्तिरेव दोषाः खल्वपि साकल्येन परिगणिता' इति भाष्योक्तिरित्यन्यत्र विस्तरः ।

'नाप्रहः' इति । अतिप्रसङ्गस्त्वनित्यत्वेन परिहर्तुं शक्यत इत्याशयः । 'परम्परया' इति । अत एव 'शतानि' इत्यादौ लुकप्रवृत्तिद्वारा नुगागमनि-मित्तभूतसन्निपातविघातकाया: षट्संज्ञाया अनया परिभाषया निवृत्तिरित्याहुः । 'शब्दतः' इति । अकच्तु सुबुत्पत्त्यनन्तरं प्रवर्त्तमानोऽपि न तत्रा सुबाश्रय इत्यभिप्रायः । 'न यासयोः' इति । 'कण्ठाय' इति निर्देशः 'सुपि च' (७.३.१०२) इति दीर्घत्व एव परिभाषाया अप्रवृत्तौ निमित्तं स्यादित्यभिमानः । 'आत्वं पुग्विधेः' इति । 'इदमाकारस्यैव, पुमित्यभिप्रायेण । विशिष्टस्यैव तद्विधाने तु विधानकाल एव यदागमन्यायेन तस्य प्रकृतिघटकत्वनिश्चया-त्क्व सन्निपातविघात इति स्पष्टं प्रदीपोद्द्योतयोः । 'यादेशः सुपि च' इति दीर्घत्वस्य इति । 'श्रीपाय' इत्यादावतो लोपे प्रकृतपरिभाषा प्रवर्तत एव । तत्र हि यादेशनिमित्तभूतह्रस्वत्वस्याकारगतस्य दीर्घेण निवृत्तावप्यकार-त्वंरूपसामान्यमादेशेऽप्यनुवर्त्तत एवेति लोपे सन्निपातविघातः स्पष्ट इति वदन्ति ॥८५॥

ननु 'पञ्चेद्राण्यो देवता अस्य पञ्चेन्द्राः' इत्यादौ 'द्विगोर्लुक्' (४.१.८८) इत्यणो लुकि, 'लुक्तद्धिते' (१.२.४९) इति स्त्रीप्रत्ययलुवयानुकः श्रवणापत्तिरत आह—

८६. सन्निपातनिमित्तानामन्यतरापाये उभयोरप्यपायः ।

अत्र 'बिल्वकादिभ्यश्छस्य लुक्' (६.४.१७४) इति सूत्रस्थं छग्रहणं ज्ञापकम्। तद्धि छमात्रस्य लुग्बोधनद्वारा कुको निवृत्तिर्यथा स्यादित्यर्थम्। कृतकुगागमा तदाद्यन्तर्गणबिल्वादय एव तत्र निर्दिष्टा बिल्वकादिशब्देन ।

न्यायसिद्धत्वमप्यस्याः परिभाषायाः सम्भवतीति तत्प्रयुक्तेन सौदर्श्येन, सन्निपातपरिभाषानिरूपणानन्तरमेतन्निरूपणमिति वदन्ति। समुच्चयेन विहितानां प्राप्ते द्वयोरन्यतरस्य निवृत्तौ सम्भवत्यायमुभयोरपि निवृत्तिरिति परिभाषायः। सम्भवनानिवेशाच्च 'पञ्चेद्राण्यो देवता अस्य पञ्चेन्द्रः' इत्यत्रेन्द्रशब्दान्तस्याकारस्य न निवृत्तिः। अन्यथा तत्रान्तिरङ्गत्वात्सवर्णदीर्घोत्तरमागमनिवृत्तौ तस्यापि निवृत्तिः प्रसज्येत।

ननु सर्वविधिभ्यो लुग्विधेर्बलवत्त्वात् 'लुक्तद्धितलुकि' (१.२.४९) इत्यस्य प्रथमं प्रवृत्तौ तत्सन्निपातानुगमनिवृत्तेरपि सवर्णदीर्घादिपूर्वमेव सुलभत्वाद्यथा, एवं सम्भवनानिवेशः इति चेत्? तर्हि 'पञ्चभिर्नीतः क्रीतः पञ्चैतः' इत्यत्र तकारश्रवणं तत्फलम्। अन्यथा देवदत्त हन्तूहतन्यायेन नकारनिवृत्युत्तरं तन्निवर्तकस्य तकारस्योन्मज्जनायोगात्कथं तकारः श्रूयेत? तत्सत्त्वे तु प्रसक्तस्यैव नकारस्य निवृत्त्या न दोष इत्याहुः। अपायस्वालुप्तिकी निवृत्तिः। तेन 'ध्येन्या अपत्यं ध्यैनेयः' इत्यत्र स्थानिवद्भावेन स्त्रीप्रत्ययबुद्धेः सौलभ्यान्नास्त्यात्यन्तिकी निवृत्तिरिति, प्रकृतपरिभाषाविषयस्वाभावान्नकारनिवर्त्यभावः।

अथेह कथं स्थानिवद्भावः? न हि किञ्चिदत्र स्थानिभूतादचः पूर्वं-

तेन, वैयर्थ्ये भावरूपमभावरूपं वा शास्त्रेण कर्तव्यं कार्यमस्ति, येन स्थानिवत्त्वस्यावकाशः स्यात्? सत्यम्। 'पूर्वविधौ' इत्यस्य स्थित्यर्थकत्वे भावसाधनविधिशब्दघटितस्यापि तत्र तत्त्वेन निर्देशात्प्रत्ययग्रहणात्पूर्वस्य स्थित्वात्रपि स्थानिवत्त्वस्य सुवचत्वे नेष्टसिद्धयविरोधः। स्पष्टञ्चेदं तत्रैवाकरे। तदेतद्वक्ष्यति—'स्थानिवत्त्वेन सिद्धम्' इति। 'छमात्रहणम्' इति। लुग्विधानबलात्प्रत्ययस्याक्षेपे कृतकुमागमेभ्यो बिल्वकादिभ्य इतरस्यासम्भवेन सामर्थ्यात्छग्रहणं सावधारणमित्याशयः।

ननु बिल्वादिशब्दप्रकृतिकेकप्रत्ययान्तस्यानुकरणे छप्रत्ययव्यतिरिक्तस्यापि तैर्म्यः सम्भवात्सार्थके छग्रहणमिति प्रत्यर्थमुक्तार्थसिद्धिरत आह—'कृतकुमागमाः' इति। कप्रत्ययान्तानां गणे पाठाभावाद्दाकुत्रिगणत्वस्वीकारे गौरवाच्चेति भावः।

न चैवमपि छग्रहणं व्यर्थम्। कृतकुमागमानुवादसामर्थ्यादेव तदनिवृत्तिसिद्धेः। अन्यथा 'बिल्वादिभ्यः' इत्येव वदेत्। लक्षणप्रतिपदोक्तपरिभाषया (प. १०५) बिल्वादिपुरस्कारेण विहितप्रत्ययस्यैव लुग्विधानान्नातिप्रसङ्ग इति वाच्यम्। ततोऽपि प्रतिपदोक्तत्वेन 'बिल्वादिभ्योऽण्' (४.३.१३५) इति विकारार्थस्य लुगापत्तिवारणार्थं कृगनुवादचारितार्थ्यात्। समुच्चयार्थकचशब्दप्रयोगे तु विधेययोरेककालिकत्वैकदेशत्वनियमान्न न्यायसिद्धाऽपीयम्।

यत्तु 'णाविष्ठवत्' (वा. ८१३) इत्यनेन पुंवत्त्वविधानमेतदनित्यत्वज्ञापनार्थम्। अन्यथा 'एतयति' इत्यादौ टिलोपेनैव ङीपि निवृत्ते सन्नियोगशिष्टपरिभाषया (प. ८६) नस्यापि निवृत्त्या 'एतयति' इत्यादिसिद्धौ पुंवत्त्ववैयर्थ्यं स्पष्टमेवेति 'टेः' (६.४.१४३) इति सूत्रे कैयटः, तन्न; 'इडबिडमाचष्टे ऐडबियति' इत्यादौ

पुंवत्त्वस्यावश्यकत्वात्। 'ऐनेयः, शैनेयः' इत्यादिं तु स्थानिवत्त्वेन सिद्धमित्यन्यत्रा विस्तरः।

'छग्रहणं व्यर्थम्' इति। पूर्वत्र स्वांशे चारितार्थ्याभावात् ज्ञापकत्वानुपपत्तिरित्याशङ्क्याभिप्रायः। 'चारितार्थ्यात्' इति। ननु लुग्ग्रहणबलादेव प्रतिपदोक्तानां ग्रहणं सिद्धम्। अन्यथा लोपानुवृत्त्यैव निर्वाहे किं तेन? न हि विकारार्थस्याणो लुकि लोपे वा विशेषोऽस्तीति व्यर्थमेव छग्रहणमिति चेत्? न; लोपे वृद्धियस्येति लोपयोः प्रवृत्तिः, लुकि तु स्थानिवत्त्वनिषेधादप्रवृत्तिरिति वैजात्येन लुग्ग्रहणसामर्थ्यस्योपक्षीणत्वात्।

अन्त्रेवमपि कुडागमे कर्तव्ये प्रकृतेः कुड्यागमविधानबलादेव कुकौ निवृत्त्यभावसिद्धौ व्यर्थमेव छग्रहणम्। न च कुडागमे छस्य प्रत्ययादित्वाभावाद्यादेशानापत्तिरिति वाच्यम्। आयनादिषु स्वरसिद्ध्यर्थमावश्यकेनोपदेशिवद्भावेन कुटः पूर्वमादेशप्रवृत्त्या निर्वाहादिति चेत्? न; स्वविधेयस्य स्वस्मिन्नुद्देश्यत्वासम्भवेन कुड्विधाने वाक्यभेदप्रसक्त्या लाघवार्थं कुग्विधानस्यावश्यकतया सामर्थ्योपक्षयात्। कुग्विधाने हि समुच्चयेनैकवाक्यतया विधानसम्भव इत्याहुः। केचिदत्र कृतकुगागमनिर्देशो व्यर्थः, न चैवं प्रतिपदोक्तविलेवाद्यण्वारणायावश्यकस्य छग्रहणस्य प्रकृतार्थज्ञापकत्वानुपपत्तिरिति वाच्यम्। तावन्मात्रफलकत्वे सकृन्निर्देशेनैव सिद्धौ व्यर्थस्य छग्रहणस्य प्रकृतार्थज्ञापकताया अपि सुवचत्वादित्याहुः।

'न्यायसिद्धापि' इति। केचित्तु 'दण्डिना, कुण्डलिना च देवदत्तेन भवितव्यम्' इत्येवं समुच्चीयमानयोर्दण्डकुण्डलाद्योर्विधाने यौगपद्यस्यानुभविकत्वेऽपि विहितयोस्तयोरन्यतरस्यापायसम्भावनया तदुभयापायस्यानुभवविरुद्धत्वादयुक्तं न्यायसिद्धत्वमस्याः परिभाषाया इति वदन्ति।

'स्थानिवत्त्वेन' इति। पूर्वस्य स्थितावपि स्थानिवत्त्वाङ्गीकारेणेत्यर्थः। न च प्रसक्तस्यैव नकारस्य लोपनिवृत्तौ सम्भावितायामनया परिभाषया निवृत्तिः स्वीक्रियत इति पूर्वत्वेनं स्थितेर्दुर्वचत्वात्कथं स्थानिवत्त्वमिति

वाच्यम्। विधिशब्दस्य प्रवृत्त्यर्थकतामाश्रित्य प्रवृत्तावेव स्थानिवत्त्वाङ्गीकारेणादोषात्। अत एव विधिशब्दस्य भावसाधनतायां 'आयन्नासन्' इत्युदाहृतं भाष्ये। न हि तत्र स्थानिवद्भावमन्तरेणेडागमः सम्भवति। येन स्थितौ स्थानिवत्त्वे तद्उपपत्तिः स्यात्। न च स्थितावपि स्थानिवद्भावो वक्तव्यः। अन्यथा 'गणयति' इत्यादौ वृद्ध्यापत्तेरिति वाच्यम्। स्वरे निषेधात् 'अचः परस्मिन्' (१.१.५७) इत्यनेन अभावस्यापि प्रतिदेष्टव्यत्वेनादोषात्।

यत्तु सत्यामस्यां परिभाषायां 'पञ्चेन्द्रः' इत्यादौ लुका ङीष्निवृत्तिसम्भावनामाश्रित्य आनुगागमनिवृत्तौ तत्सन्नियुक्तो ङीषपि न स्यादित्यानुगागमनिवृत्त्यभावमुपजीव्य प्रवर्त्तनीयस्य ङीषः सम्भावनाद्वारेणानुगागमनिवर्त्तकं लुकं प्रति निमित्तत्वायोगात्सन्निपातपरिभाषया लुगेव न स्यादिति वदन्ति, तदसत्; 'बिल्वकादिभ्यः' (४.३.१३६) लुग्विधानमहिम्ना प्रकृतपरिभाषाविषये सन्निपातपरिभाषाया अनित्याया अप्रवृत्तिज्ञापनेनादोषात्। अन्यथा 'वैकल्पकः' इत्यादौ कुगनिवृत्त्युपजीवकस्य तत्सन्नियुक्तस्य छस्य स्वोपजीव्यकुगनिवृत्तिविघातकं लुकं प्रति तया परिभाषया निमित्तत्वायोगेन तद्विधानमनर्थकमेव स्यादित्याहुः।

केचित्तु धर्मिग्राहकसाजात्यादियं लुड्मात्रविषया, तेन 'ऐनेयः, ह्येनेयः' इत्यादौ लोपेनैतस्याः प्रवृत्तिः। एवं प्रवृत्तौ स्थानिवद्भावो नाश्रयणीयः। 'पञ्चेन्द्रः' इत्यादौ लुकि तदप्रवृत्तये 'क्विलिगुपधा' (१.१.५८ वा.२) इति वार्तिके लुग्ग्रहणमपि न कर्तव्यं भवतीति महल्लाघवम्। ध्वनितश्चायमर्थः प्रवृत्तौ 'स्थानिवत्' इत्यस्य लावस्थायमडागमविधानेनाभीयांसिद्धत्वेनैव वा अन्यथासिद्धं 'आयन्नासन्' इत्युदाहरणमुपदर्शयता भगवता भाष्यकारेण। तादृशस्थानिवद्भावस्यानन्यथासिद्धस्यैवेयादुदाहरणसत्त्वे हि तदप्रदर्शनादसामञ्जस्यमेव तद्भाष्यस्येति युक्तमुत्पश्यन्तु सुधियः इत्याहुः।

यद्यपि लुका अनुत्पत्तिरेवेत्यभ्युपगम्य 'पञ्चेन्द्रः' इत्यादौ ङीष्प्रत्ययानुत्पत्तौ तत्सन्नियोगशिष्टस्यानुगागमस्याप्यप्रवृत्तिरेव। 'सन्नियोगशिष्टानां सह वा' इति न्यायात्। तादृशन्यायस्यानुवृत्तिनिवृत्तिमात्रविषयकत्वन्तु न

युक्तं, मानाभावात्। अत एव, औत्वप्रतिषेधसन्नियोगशिष्टमुत्वं, तदभावे न प्रवर्त्तत इति, सिद्धान्तः। न च 'लुका अनुत्पत्तिः' इति पक्षे लोपेनाप्यनुत्पत्तिरित्येवाभ्युपगन्तव्यम्। अन्यथा, प्रत्ययलक्षणसूत्रे (१.१.६२) वैरूप्यापत्तेः। ततश्च 'ऐनेयः, शैनेयः' इत्यादौ नकारस्यानुत्पत्तिरुक्तन्यायादिति वक्तव्यम्। 'स्थानिवत्त्वे ङीबुत्पत्तिबुद्ध्या तदुत्पत्तेः। लुकि तु स्थानिवद्भावो निषिद्ध एव। लुग्विधौ छप्रहणन्तु तेनैव न्यायेन, द्वयोरप्यनुत्पत्तौ छस्यैवानुत्पत्तिः, न तु कुगागमस्येति नियमार्थम्, न तु प्रकृतपरिभाषाज्ञापनार्थम्।

न च कुगनुवादमहिम्ना तदंशे उत्पत्तिबोधनादुक्तन्यायाप्रवृत्तिबोधनाद्वा छस्यैवानुत्पत्तिर्भविष्यतीति व्यर्थमेवात्र पक्षे छप्रहणमिति वाच्यम्। बिल्वादिगणो वारणाय तदनुवाद इति प्रागावेदितत्वात्। एवञ्चैषा परिभाषा निष्फला। तथापि लुका अनुत्पत्तिरिति पक्षे 'दाक्षिः' इत्यादौ प्रत्ययोत्पत्तिकाले प्रकृतेरदन्तत्वाभावाद्ङीनापत्तिः। न च भूतपूर्वगत्या परिक्लृप्तमदन्तत्वमादाय तदुपपत्तिरिति वाच्यम्। हरितयतेः क्विपि निष्पन्नहरिच्छब्दादपि तदापत्तेः। तद्वारणाय प्रत्ययोत्पत्त्यव्यवहितपूर्वकालिकादन्तत्वमाश्रीयत इति चेत्? गौरवम्। एवं 'यस्सः' इत्यादौ हलन्त्यादिना त्यदादित्वात्पूर्वं सुबनुत्पत्तिवारणाय 'त्यदादीनामः' (७.२.१०२) इत्यत्र 'विभक्तौ' इत्यस्य विषयसप्तमीत्वे क्लेशः। किञ्च 'अतो हेः' (६.४.१०५) इति लुका 'भव' इत्यादौ हेरनुत्पत्तौ स्थानिभूतसिबाद्युत्पत्तिपरिहाराय यत्नः कार्यः। अपि च बुद्धिविपरिणामकल्पनावशेन ह्यसौ पक्षः। सा च 'इको यणचि' (६.१.७७) इत्यादिभावादेशविषयेऽपि तुल्यैवेति को विशेषो लुकैवानुत्पत्तिरिति। तस्मान्नासौ समञ्जसः पक्ष इति परिभाषा स्वीकृतेत्यलम्॥८६॥

ननु 'चुरा शीलमस्याः सा चौरी' इत्यादौ शीलं, 'छत्रादिभ्यो णः' (४.४.६२) इति णे, ङीबन प्राप्नोतीत्यत आह—

८७. ताच्छीलिके णेऽण्कृतानि भवन्ति।

'अन्' (६.४.१६७) इत्यणि विहितप्रकृतिभावबाधनार्थं 'कार्मस्ताच्छील्ये' (६.४.१७२) इति निपातनमस्या ज्ञापकम्। ताच्छीलिकणान्तादणो 'द्व्यचः' (४.१.१२१) इति फिञ्सिद्धिरप्यस्याः प्रयोजनमिति नव्याः। 'ताच्छील्क' इत्युक्तेस्तदस्य प्रहरणमिति णे 'दाण्डा' इत्येव। 'कार्मे' (६.४.१७२) इतिसूत्रे भाष्ये स्पष्टा।

तद्धितप्रत्ययप्रशंसावशादत्रैतस्याः परिभाषाया उपन्यासः। 'फिञ्-सिद्धिः' इति। अन्यथा च 'अण्कृतानि' इति बहुवचनमनर्थकमेव स्यादिति भावः। 'नव्याः' इति। एतेनैतद्भाष्यकारानुगृहीतं फलमिति सूचितम् ॥८७॥

ननु 'कंसपरिमृड्भ्याम्' इत्यादौ मृजेर्वृद्धिर्दुर्वारेत्यत आह—

८८. धातोः कार्यमुच्यमानं तत्प्रत्यये भवति।

भ्रौणहत्ये तत्वनिपातनमस्या ज्ञापकम्। 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' इति पाठस्तु 'प्रमृड्भिः' इत्यादौ 'अनुदात्तस्य चर्दुपधस्य' (६.१.५९) इत्यमापादनेन भाष्ये दूषितः। यत्कार्यं प्रत्ययनिमित्तं तत्रेयं व्यवस्थापिका। तेन पदान्तत्वनिबन्धनं 'नशेर्वा' (८.२.६३) इति कुत्वं 'प्रनड्भ्याम्' इत्यादौ भवत्येव। इयङादिविधौ तु नैषा। 'न भूसुधियोः' (६.४.८५) इति निषेधेनानित्यत्वात्। 'मृजेर्वृद्धिः' (७.२.११४) इत्यत्र भाष्ये स्पष्टा।

निपातनज्ञाप्यत्वसाधर्म्यादत्रैतस्याः परिभाषाया उल्लेखः। धातूद्देश्यकं कार्यं धातुप्रकृतिके धात्वधिकारीयप्रत्यये भवति नान्यस्मिन्निति परिभाषाया अर्थः। 'तत्वेनिपातनम्' इति। 'अन्यथा हनेस्तोऽचिण्णलोः'

(७.३.३२) इत्येव सिद्धे तदानर्थक्यं स्पष्टमेवेति भावः। ननु 'हो हन्तेः' (७.३.५४) इति कुत्वाभावाय तत्वनिपातनमस्तु; न च तावन्मात्रफलकत्वे कुत्वप्रकरणे 'न यि' इत्येव ब्रूयादिति वाच्यम्। तथा सति वार्त्रघ्न्यम्' इत्यादावपि कुत्वाभावप्रसङ्गादिति चेत्? न; एकैकप्रयोजनसम्पादकत्वे तत्तत्प्रकरणे एव निपातनौचित्यतया प्रकरणविशेषानादरेण तन्निपातनमनेकप्रयोजनसम्पादकं सत्, तकारनिपातनार्थमपीति ज्ञापकत्वाक्षतेः। तदेतत्कैयटेनोक्तमनेकप्रयोजनत्वान्निपातानमिति एतेन टिलोपाभावार्थं निपातनमिति न प्रकृतार्थज्ञापकतासम्भव इति केषाञ्चिदुक्तिः प्रत्युक्ता।

केचित्तु तादेशस्य कृताकृतप्रसङ्गित्वेन नित्यत्वात्तद्विषये टिलोपस्याप्राप्तिरेव। 'न यि' इति न्यासेऽपि यादिप्रत्ययनिमित्तकस्यैव प्रत्यासत्त्या तेन निषेधस्वीकारान्नकारनिमित्तकस्य 'वार्त्रघ्न्यम्' इत्यादावभीष्टस्य कुत्वस्य तेन निवृत्त्ययोगाद् भ्रौणहत्ये कुत्वाभावसिद्धिरिति तादेशमात्रप्रयोजनकत्वान्निपातनस्य ज्ञापकत्वं सुवचमित्याहुः। तदसत्; 'न यि' इति न्यासे हन्तेर्ण्यति 'घात्यः' इत्येसिद्ध्यापत्तेः। यत्तु 'हो हन्तेः' (७.३.५४) इत्यत्र विहितविशेषणाश्रयणात्कुत्वाभावसिद्धिरिति ज्ञापनाभिप्रायमाहुः; तदप्यसत्; 'हनस्तः' (७.३.३२) इत्यत्रापि तुल्यत्वात्। 'स्वरूपग्रहणे' इत्यस्य स्वानुपूर्व्युपस्थापकधातुग्रहणे इत्यर्थः। 'यत्कार्यम्' इत्यादि। धर्मिग्राहकप्रमाणसाजात्यात्प्रत्ययस्य यत्र निमित्तत्वेनाश्रयणं तत्रैवेयं नियामिकेत्यर्थः। 'मृजेर्वृद्धिः' (७.२.११४) इत्यादौ त्वङ्गाक्षिप्तस्तद्द्वारको वा प्रत्ययो निमित्तत्वेनाश्रीयत एवेति भावः। 'नशेर्वेति' कुत्वम्' इति। कुत्वविधेः प्रयोजनं तु यङ्लुकि 'अनानक्' इत्यादावित्याशयः।

न च यथा यङ्लुकि हल्ङ्यादिलोपेन लुप्तस्य तिपो धातुप्रत्ययस्य प्रत्ययलक्षणेन कुत्वनिमित्तता, तथा 'प्रणम्भ्याम्' इत्यादौ वेरपृक्तलोपेन (६.१.६७) लुप्तस्य क्विनो निमित्तत्वे प्रातिपदिकसञ्ज्ञाद्वारा वर्त्तत एवेति कथमुक्तकल्पनाया उपयोग इति वाच्यम्। प्रत्यासत्त्या धातुविहितप्रत्यय-

निमित्तकपदत्वप्रयुक्तमेव पदान्तत्वं कुत्वनिमित्तं स्यादित्यभिमानात् । 'निषेधेन' इति । निर्देशेनेति वक्तुं युक्तं प्रकृतपरिभाषया 'न भूसुधियोः' (६.४.८५) इत्योसीयङादेशस्य दुर्लभत्वात् । निषेधस्तु कथञ्चित् 'इको यणचि' (६.१.७७) इत्यस्य निवर्त्तनेनापि कृतार्थः स्यादिति दिक् ॥८८॥

ननु 'सर्वकः, उच्चकैः' इत्यादौ सर्वनामाव्ययसंज्ञे न स्यातामत आह—

८९. तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ।

'नेदमदसोरकोः' (७.१.११) इतिसूत्रे 'अकोः' इति निषेधोऽस्या ज्ञापकः । 'तदेकदेशभूतं तद्ग्रहणेन गृह्यते इति 'येन विधिः' (१.१.७२) इतिसूत्रे पाठः ।

तद्धितविषयकत्वाविशेषादत्रोपन्यासः । यद्घटकपूर्वोत्तरावयवावधिक-मध्यत्वोपहितदेशावच्छिन्नविधेयताश्रयो यः स तद्बोधकशब्देन बोध्य इति परिभाषार्थः । 'ज्ञापकः' इति । गङ्गाप्रविष्टनदीदृष्टान्तेन तु नैतस्याः परि-भाषायाः सिद्धिः । परिच्छिन्नपरिमाणवस्तुविशेषधर्माणां द्रोणत्वादीनामिव तत्तदानुपूर्वीविशेषपरिच्छिन्नशब्दधर्माणां सर्वनामत्वादीनामपि न्यूनाधिक-भावेनान्यथात्वे शास्त्रव्यापारमन्तरेण प्रवृत्त्यसम्भवात् । अतो ज्ञापकसाध्य एवायमर्थ इति 'येन विधिः' (१.१.७२) इतिसूत्रे भाष्ये स्पष्टम् । यदि तु 'नेदमदसोः' (७.१.११) इतिसूत्रे भाष्ये इमौ द्वौ प्रतिषेधावुच्येते । इमौ शक्यावकर्तुं कथमेवं वक्ष्यामि 'इदमदसोः कात्' इति । 'अतो भिस' (७.१.९) इत्येव सिद्धे नियमार्थं भविष्यति । इदमदसोर्भिसो यथैस् स्या-त्तर्हि कादेव नान्यत्रेत्यकोरिति प्रत्याख्यातमित्युच्यते, तदा 'एतत्तदोः सुलोपोऽ कोरनञ्समासे हलि' (६.१.१३२) इत्यत्रत्यमकोरित्युक्तार्थे ज्ञापकम् । विप्रति-षेधसूत्रभाष्ये 'नेदमदसोः' (७.१.११) इत्यत्रत्यस्य 'अकोः' इत्यस्य ज्ञापकत्वोपवर्णनन्तु सूत्ररीत्येति द्रष्टव्यम् ॥८९॥

ननु 'गातिस्थाघुपाभूभ्यः' (२.४.७७) इति सिचो लुक् । 'अपासीत्' इत्यादौ पातेरपि स्यादत आह—

९०. लुग्विकरणाल्लुग्विकरणयोर्लुग्विकरणस्य ।

अस्याश्च ज्ञापकः 'स्वरतिसूति' (७.२.४४) इतिसूत्रे 'सूङ्' इति वक्तव्ये सूतिसूयत्योः पृथङ्निर्देश इति कैयटः, तत्र साहचर्याद्लुग्विकरणस्यैव ग्रहणे प्राप्ते पृथङ्निर्देशस्य तज्ज्ञापकत्वासम्भवात् । ध्वनिता चेयं परिभाषा 'यस्य विभाषा' (७.२.१५) इत्यत्र भाष्ये । तत्र 'विदितः' इति प्रयोगे निषेधमाशङ्क्य यदुपाधेर्विभाषा, तदुपाधेर्निषेधो विभाषा 'गमहनविदविशाम्' (६.४.९८) इतिसूत्रे शविकरणस्य ग्रहणम् । लुग्विकरणश्चायमित्युक्तम् । तत्र 'चः' हेतौ । यतोऽयं लुग्विकरणोऽतो विशिसाहचर्याच्छविकरणस्य ग्रहणम्, न तु हनिसाहचर्याद्स्यापि, एतत्परिभाषाविरोधादिति तदाशयः । अत एव परिभाषायां लुग्विकरणस्यैवेति नोक्तम् । कण्ठतस्तु भाष्ये एषा न क्वापि पठिता । 'गातिस्था' (२.४.७७) इतिसूत्रे पिबतेर्ग्रहणं कर्तव्यमिति वार्तिककृता सर्वत्रैव पाग्रहणे लुग्विकरणस्य ग्रहणमिति भाष्यकृता चोक्तम् । 'स्वरतिसूति' (७.२.४४) इतिसूत्रे कैयटेन च स्पष्टमुक्ता ।

गृह्यमाणस्य यत्किञ्चिदर्थाभिधायकत्वमूलकं साधर्म्यमिह सङ्गतेर्बीजम् । एवमुत्तरपरिभाषायामपि द्रष्टव्यम् । लुग्विकरणाल्लुग्विकरणयोरुभयोरपि ग्रहणप्रसक्तावलुग्विकरणस्य ग्रहणम्, न तु लुग्विकरणस्येति परिभाषार्थः । 'षूङिति वक्तव्ये' इति । 'षू'इत्यननुबन्धकस्योक्तौ तु तौदादिक '[1]षू प्रसवे'

१. 'षू प्रेरणे' इत्येव तौदादिकेषु षूधातुर्दृश्यते ।

(धा. प्रा.-१४०८) इत्यस्यैव सानुबन्धकस्य ग्रहणं स्यात्। न तु दैवादिकादादिकयोः सानुबन्धकयोः। 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' (प. ८१) इति न्यायादिति भावः। 'तत्र साहचर्यात्' इति। पूर्वोत्तरसाहचर्यादित्यर्थः।

'चिन्त्यम्' इति। यद्यु हदन्ति 'दिवादाबूषुङ्' (धा.पा.११३२) इति ऊदित्पाठेनैव सिद्धौ ङकारग्रहणमत्र साहचर्यं न स्यात्तस्यापकर्षमिति बोधनार्थं स्यादिति पृथङ्निर्देशः परिभाषायां ज्ञापकमित्याशयात्तत्र एवायं केचिदु इति। तदासाततः। ज्ञापितायामपि परिभाषायां पृथङ्निर्देशमन्तरेण सामर्थ्यादुभयोरपि तयोर्ग्रहणसिद्धौ स्वांशे चरितार्थ्यायोगेन ज्ञापकत्वानुपपत्तेः। 'अस्यापि' इति। लुग्विकरणस्य वेत्यपीत्यर्थः।

तन्न, परसाहचर्यापेक्षया पूर्वसाहचर्यस्यान्तरङ्गत्वेन प्राबल्यात्लुग्विकरणस्य प्रकृतपरिभाषाबलाद्लुग्विकरणस्येत्येवमुभयोः परस्परविरोधेन 'श्ना पाके' (धा.पा.८१०) इत्यत्र लाक्षणिकलुग्विकरणयोरिव प्रकृते लुग्विकरणालुग्विकरणयोरुभयोरपि ग्रहणं दुर्वारमिति चेत्? सत्यम्; भाष्यप्रामाण्यात्साहचर्यस्य साहचर्यान्तरनिरूपितबलवत्तोधायकन्यायविशेषाणामीदृशे विषये प्रवृत्त्यभावोऽभ्युपगम्यते इत्यदोषः। यदि च 'पूर्वं पूर्वमन्तरङ्गं परं परं बहिरङ्गम्' इत्यन्यभाष्यप्रामाण्यादत्रोनाश्रयणमिति कल्प्यते; तदा लक्ष्यगतपरत्वमूलकेन बलवत्त्वेन परसाहचर्यादलुग्विकरणस्यैव ग्रहणं स्यादिति परिभाषाया प्रयोजनमन्वेषणीयं प्राचीनानुयायिनः।

'अत एव' इति। प्रमाणान्तरसिद्धत्वाभावादेवेत्यर्थः। न हि प्रमाणान्तरसिद्धायां लक्षणप्रतिपदोक्तपरिभाषायामिव निर्दिष्टपरिभाषायामपूर्वायामेवकारो दृश्यत इति भावः। 'भाष्यकृता चोक्तम्' इति। एतत्परिभाषायाः प्रकारान्तरेण सिद्धत्वेनामाश्रित्य वार्त्तिकं प्रत्याख्यातं स्यादिति भावः। एवञ्चैषा ध्वनिवाचनिकीति बोध्यम् ॥९०॥

ननु 'अजिघाययिषति' इत्यादौ 'हेरचङि' (७.३.५५) इति विधीयमानं कुत्वं न स्यादत आह—

९१. प्रकृतिग्रहणे प्यधिकस्यापि ग्रहणम्।

'अचक्ङि' इति प्रतिषेध एवास्या ज्ञापकः। इयञ्च कुत्व-विषयैव। 'हेरचक्ङि' (७.३.५५) इतिसूत्रे भाष्ये स्पष्टेयम्।

'अचक्ङि' इति प्रतिषेधा' इति। ननु हिनोतेरभ्यासात्परस्य कुत्व-मिति खलु सूत्रार्थः। ततश्च ण्यन्तेऽपि 'अजीहयत्' इत्यत्र हिनोतेरभ्यासो नान्त्यस्य। चङ्प्रत्ययाभावव्यवस्थकाच्च एत्र द्वित्वविधानात्। एवञ्च कुत्वप्रतिषेधो व्यर्थ इति चेत्? न; ण्वुलन्त-प्रकृतिकार्चक्षाणप्रयन्तात्सनि 'जिहायकयिषति' इत्यत्र कुत्वनिवारणाय हि धातुनिष्ठाङ्गसंज्ञानिमित्तभूतप्रत्ययप्रयुक्तद्वित्वनिमित्तकाभ्यासात्परस्य कुत्व-मित्यर्थस्य प्रत्यासत्तिमूलकस्य अवश्यमभ्युपेयतया प्रकृते द्वित्वनिमित्तभूतस्य चङ्प्रत्ययस्य, णिजन्तनिष्ठाङ्गसंज्ञानिमित्तत्वेऽपि हि धातुनिष्ठाङ्गसंज्ञानिमित्त-त्वाभावेन कुत्वाप्राप्तेः प्रतिषेधानर्थक्यमित्याशयात्।

'कुत्वविषयैव' इति। तदुक्तं भाष्ये—हेरचङि प्रतिषेधोऽनर्थकोऽङ्गसंज्ञा-न्यत्वात्। ज्ञापकन्तु चङोऽन्यत्र ण्यन्तेऽपि कुत्वभावस्येति। तदाह—'न 'भाष्ये स्पष्टा' इति। परिभाषाफलं तु 'प्रजिघाययिषति' इत्यत्र ण्यन्तत्सनि कुत्वमिति बोध्यम्॥९१॥

ननु 'युष्मभ्यम्' इत्यादौ 'भ्यसः' इत्यत्र 'भ्यम्' इति च्छेदे, भ्यसो भ्यमि कृतेऽन्त्यलोप एत्वे स्यादत आह—

९२. अङ्गवृत्ते पुनर्वृत्तावविधिः।

अङ्गे अङ्गाधिकारे वृत्तं निष्पन्नं यत्कार्यं तस्मिन् सति पुनरन्यस्माङ्गकार्यस्य वृत्तौ भवृत्तावविधानं भवतीत्यर्थः। एषा च ज्ञ्याद्वादीयसः' (१.४.१७१) इत्याद्विधानेन ज्ञापिता। अन्यथा

इकारलोपेन 'अकृत्सार्व' (७.२.४५) इति दीर्घण च सिद्धे तद्वैयर्थ्यं स्पष्टमेव। अत एव भिन्नस्थानिकाङ्गकार्यविषयाप्येषा। 'इयङ्वानित्या द्वयोः' इति निर्देशात्। अनित्यत्वबललभ्यार्थमादायैव 'भ्यसो भ्यम्' (७.१.३०) इतिसूत्रे भाष्ये 'निष्ठितस्य' इति पठितम्। केचित्त्वनया परिभाषया न किञ्चिल्लक्ष्यं साध्यते। अत एव 'ज्ञाजनोर्जा' (७.३.७९) 'ज्यादादीयसः' (६.४.१६०) इति सूत्रायोरेना ज्ञापयित्वा किं प्रयोजनमिति प्रश्नेऽपि पित्रतेर्गुणप्रतिषेध उक्तः। 'स न वक्तव्यः' इत्येव प्रयोजनमुक्तम्। न तु लक्ष्यसिद्धिरूपम्। तदुक्तं 'भ्यसो भ्यम्' (७.१.३०) इत्यत्र 'अभ्यम्' इति च्छेदः। शेषे लोपश्चान्त्यलोप एव। 'अतो गुणे' (६.१.९७) इति पररूपेण सिद्धं 'युष्मभ्यम्' इत्यन्यत्र निरूपितम्। एवञ्च सूत्राद्वयस्थमेरञ्ज्ञापनपरं भाष्यं 'भ्यसो भ्यम्' (७.१.३०) इति सूत्रस्थञ्च भाष्यमेकदेशयुक्तिरित्याहुः।

यत्तु 'ओरोत्' इति वाच्ये 'ओर्गुणः' (६.४.१४६) इति गुणग्रहणात्।

१३. संज्ञापूर्वकविधेरनित्यत्वम्।

इयञ्च विधेयकोटौ संज्ञापूर्वकत्व एव। तेन 'स्वायम्भुवम्' इत्यादि सिद्धम्।

अङ्गाधिकारीयकार्यविशेषनिर्णायकपूर्वपरिभाषानिरूपणे तथाविधकार्यविषयकत्वेन प्रकृतपरिभाषाया अप्युपस्थितिरत्रोपन्यासहेतुः। 'दीर्घण सिद्धे' इति। 'उरुया, धृष्णुया' इत्यादौ छान्दसत्वादेव दीर्घनिवृत्तेः, दीर्घविधौ

'क्ङिति' (१.१.५) इत्यस्यानुवृत्तेरुपयोगाभाव इत्याशयः। 'अत एव' इति [illegible] आदेर्ग्रहणज्ञाप्यत्वादेवेत्यर्थः। एवञ्च ज्ञापकभूम्यनुरोधाद् भिन्नस्थानिकाङ्गकार्यविषयकत्वमप्यस्याः सिद्ध्यतीति भावः। ननु सत्यामस्यां परिभाषायां 'येषां' तेषां इत्यादौ त्यदाद्यत्वोत्तरं 'बहुवचने झल्येत्' (७.३.१०३) इत्येत्वं नास्यादत आह 'इयञ्चानित्या' इति। [illegible]

अथ किमेतस्याः परिभाषायाः 'प्रयोजनम्'? नैतत् यूयं, वयम् इत्यत्र अमादेशस्य स्थानिवत्त्वेन जश्त्वमाश्रित्य प्रसक्तस्य शीभावस्याभावः प्रयोजनमिति वाच्यम्; 'जेप्रथमयोः' (७.१.२८) इत्यत्र मकारान्तरप्रश्लेषेण 'आम्' मान्त एवावतिष्ठत इति व्याख्यानेनादोषात्। 'जसः शी' (७.१.१७) इत्यत्र सकारप्रश्लेषेण सान्तस्यैव जसः शीभावविधानाच्च। न च 'पिबेति' इत्यत्र 'पाघ्रा' (७.३.७८) इति पिबादेशे गुणाभावः प्रयोजनमिति वाच्यम्। पिबादेशस्यादन्तत्वाभ्युपगमेनादोषात्। न च 'युष्मभ्यं, अस्मभ्यम्' इत्यत्र 'शेषे लोपोऽन्त्यलोपः' इति पक्षे भ्यमिति च्छेदे, भ्यमादेशोत्तरं 'बहुवचने झल्येत्' (७.३.१०३) इत्यस्याप्रवृत्तिः प्रयोजनमिति वाच्यम्। 'अभ्यम्' इति च्छेदमाश्रित्य अभ्यमादेशविधानेन तदप्राप्तेः। न च 'क्रियात्, क्रियास्ताम्' इत्यादौ रिङादेशोत्तरं 'अकृत्सार्वधातुकयोः' (७.४.२५) इति दीर्घाभावः प्रयोजनमिति वाच्यम्। रीङि प्रकृते रिङ्विधिसामर्थ्यादेव तदप्राप्तेः।

न च 'श्रीपाय' इत्यत्र 'सुपि च' (७.३.१०२) इति दीर्घोत्तरमातो लोपाभावः प्रयोजनमिति वाच्यम्। सन्निपातपरिभाषया निर्वाहात्। तस्मादन्यथासिद्धप्रयोजनरहित्यादयुक्तत्वेयं परिभाषेति प्रत्याचष्टे 'केचित्तु' इति।

'एकदेशयुक्तिः' इति। 'ज्ञाजनोः' (७.३.७९) इत्यत्र 'ज' इत्युक्तावपि 'अतो दीर्घो यञि' (७.३.१०१) इति दीर्घः सिद्ध्यत्यभीष्टमिति दीर्घोच्चारणमेतत्परिभाषाज्ञापकमित्युक्तम्। फलान्तराभावात् 'प्वादीनाम्' (७.३.८०) इति ह्रस्वनिवृत्तये दीर्घनिर्देशस्यासाफल्याच्च ज्ञापनपरं भाष्यमेकदेशिनः। 'भ्यसो भ्यम्' (७.१.३०) इत्यत्र भाष्ये भ्यम्, अभ्यम् वा आदेश इति विकल्प्य यथेच्छसि तथाऽस्तु 'युष्मभ्यम्' इत्यादौ भ्यमादेशेत्

प्रत्ययलोपे प्रकृतपरिभाषया 'बहुवचने झल्येत्' (७.३.१०३) इत्यस्य प्रवृत्तिरित्युक्तम्। न्यमादेशे तिलोपपक्षे कृञ्सिद्धिप्रसङ्गे क्लेशग्रहणप्रत्याख्यानेन तत्पक्षाभावेऽपि न न्यादेशो हलादिरस्तीति, 'युष्मदस्मदोरनादेशे' (७.२.८६) इति सिद्धान्तिसम्मतभाष्यविरोधात्तदप्येकदेशिनो पूर्व। 'क्र्यादिभ्यः श्ना' (३.१.८१) इत्यनेन ज्यात्परस्यात्वविधानं 'उरुणा, घृष्णुणा' इत्यादौ दीर्घवारणार्थं, 'अकृत्सार्व' (७.४.२५) इत्यत्र किदग्रहणानुवृत्तावेव गमकं न लृक्परिभाषायाम्।

छान्दसत्वेनोक्तोदाहरणे दीर्घस्याप्ये क्लेशात्; चछन्दोऽर्थमपि बहुशस्सूत्रकारप्रवृत्तिदर्शनाच्च। ज्ञापनोपपत्तये लोप्रवृत्तिकल्पनायां तत्सन्नियुक्तस्थिटो निष्टानिविषयकयत्नान्तरानपेक्षणे क्लेशाच्च। किञ्चासाधारणप्रयोजननिरहीनतया प्रकृतपरिभाषायाः स्वीकारे प्रसक्तस्य निष्टस्य लक्षणान्तरेणानित्यत्वेन ज्ञापने कृषा प्रसाद इति; तत्सूत्रस्थस्यापि भाष्यस्यैकदेशयुक्तित्वं न्यायप्राप्तमित्याशयः। इत उत्तरम्—नित्यतासाधर्म्येण परिभाषापाठे निबद्धा अपि परिभाषाः काश्चिद्भाष्यकृदसम्मत्या प्रत्याचष्टे 'यत्तु' इत्यादिना।

ननु सत्यामस्यां परिभाषायां शास्त्रमात्रस्य संज्ञापूर्वकत्वात्सर्वत्रैवा-निष्टप्रसङ्ग इत्यत आह — 'इयङ्च' इति। 'स्वायम्भुवम्' इति। संज्ञा-पूर्वत्वेन गुणस्याप्रवृत्तेरुवङ्।।९३।।

तथा 'निलोढ' इत्येव सिद्धे आनि (८.४.१८) ग्रहणात्।

१४. आगमशास्त्रमनित्यम्।

तेन 'सागरं तर्त्तुकामस्य' इत्यादि सिद्धम्। तथा तनादिपाठादेव सिद्धे 'तनादिकृञ्भ्यः' (३.१.७९) इति सूत्रे कृञ्ग्रहणात्।

शास्त्रं शासनम्। एतच्छास्त्रमुणादिषु इत्यादौ तथा दर्शनात्। एवञ्चागमविधानार्थमनित्यमिति तदर्थः ॥९४॥

१५. गणकार्यमनित्यम्।

तेन 'न विश्वसेदविश्वस्तम्' इत्यादि सिद्धम्। तथा विनाधनवा समासेनानुदात्ते पदमनेकमित्येव सिद्धे वचग्रहणात्।

१६. अनुदात्तेङित्त्वलक्षणमात्मनेपदमनित्यम्।

१७. नञ्घटितमनित्यम्।

तेन 'नेयङुवङ्' (१.१.४) इत्यस्यानित्यत्वात् 'हे सुभ्रु' इति सिद्धमिति। तत्तु भाष्येऽदर्शनात्। भाष्यानुक्तज्ञापितार्थस्य साधुताया नियामकत्वे मानाभावात्।

गणादिनिर्देशप्रयुक्तं कार्यमनित्यम्। 'न विश्वसेत्' इति। अदादिकत्वप्रयुक्तस्य शब्लुकः प्रवृत्त्यभावः ॥९५॥

एवञ्च 'युद्धयति' इत्यादौ प्रदव्यत्ययसाधुत्वसमर्थनाय प्रयत्नान्तरं नाश्रयणीयम् ॥९६॥

नञ्घटितशास्त्रबोधितः पर्युदासे फलितः प्रसज्यप्रतिषेधे वाच्यश्च योऽनिष्टप्रसङ्गस्तन्निवृत्त्यर्थमनित्यमित्यर्थः। भाष्ये 'अदर्शनात्' इति। ननु भाष्यानुक्तत्वेऽपि शिष्टप्रयोगसमर्थनाय सूत्राक्षरवैयर्थ्यान्यथानुपपत्त्या स्त्रीक्रियन्तामेताः परिभाषाः, को दोषस्तत्राह—'भाष्यानुक्त' इति। सकलसाधुप्रयोगसमर्थनचातुर्यनिवेः पतञ्जलेरज्ञानकल्पनापेक्षया तथाविधप्रयोगाणामसाधुत्वमेव न्याय्यमित्याशयः। नन्वेतादृशपरिभाषाणामनभ्युपगमे तत्तत्परिभाषाज्ञापकभूतानां सूत्राक्षराणामानर्थक्यपरिहारो दुर्वच इत्यत आह—

९८. आतिदेशिकमनित्यम्

९९. सर्वविधिभ्यो लोपविधिः, इट्विधिश्च बलवान्

'अदृष्टमात्रार्थकत्वकल्पनाया' इति। भाष्यकृत्प्रत्याख्यातेऽपि सूत्राक्षरेष्वेषैव कल्पना, लौकिकफलाभावेन हि प्रत्याख्यानमित्याहुः॥१७॥

भाष्याविचारितप्रयोजनानां सौत्राक्षराणां पारायणादावदृष्टमात्रार्थकत्वकल्पनाया एवौचित्यात्। किञ्च ज्ञापितेऽपि 'आनि' इत्यस्य न सार्थक्यमाडागमशून्यप्रयोगस्याप्रसिद्धेः। आड्ग्रहणन्तु लोड्ग्रहणवदिति बोध्यम्। अत एव 'घ्वसोरेद्धौ लोपश्च हेर्वा' (७.३.७८) इति सूत्रे 'वा' इति प्रत्याख्यातम्। लोपेऽप्यादपक्षे आटः श्रवणं भविष्यति 'दधात्' इति। 'अटि दधत्' इति। आगमशास्त्रस्यानित्यत्वे त्वाट्यसति 'दधात्' इत्यसिद्ध्या वाग्रहणस्यावश्यकत्वेन तत्प्रत्याख्यानासङ्गतिः स्पष्टैव। एतेन यत्कैयटे 'केचित्' इत्यादिना अस्यैक वाग्रहणस्य तदनित्यत्वे ज्ञापकतोक्ता सापि चिन्त्या। प्रत्याख्यानपरभाष्यविरोधात्। तनादिसूत्रे कृञ्ग्रहणस्य भाष्ये प्रत्याख्यानाच्च। चक्षिङो ङकारस्यान्तेदित्त्वाभावसम्पादनेन ज्ञापितार्थ्याच्च। एवमेव—

९८. आतिदेशिकमनित्यम्।

९९. सर्वविधिभ्यो लोपविधिः, इट्विधिश्च बलवान्।

इत्यादि भाष्यानुक्तं बोध्यम्। 'स्वायम्भुवम्' इत्यादौ लोकेऽसाध्वेवेत्यन्यत्र विस्तरः।

इदमभ्युपगम्योक्तम्। वस्तुतो ज्ञापकत्वमेव न सम्भवतीत्याह—'किञ्च' इति। 'न सार्थक्यम्' इति। एवञ्च स्वांशे ज्ञापितार्थ्याभावेन ज्ञापकत्वानुपपत्तिरिति भावः। 'लोड्ग्रहणवत्' इति। एवञ्च व्यर्थमेव तयोः

रुभयोर्ग्रहणमिति भावः। यत्तु लोड्ग्रहणमाड्ग्रहणे यथा व्यर्थं, तथा लोड्-ग्रहणे आड्ग्रहणमित्यर्थः। उभयोरपि वैयर्थ्यमिति तु न युक्तम्। 'प्रपूर्वात्पुनातेः क्तिनि 'ऋत्वादिभ्यः क्तिन्निघावत्' (वा. ९१९) इति नित्वे 'प्रपूनिः' इत्यत्रापि णत्वापत्तेः। 'कृत्यचः' (८.४.२९) इति तु नात्र प्रवर्त्तते। 'न भाभाषू' (८.४.३४) इति निषेधादित्याहुः, तच्चिन्त्यम्; लक्षणप्रतिपदोक्तपरिभाषया तत्र णत्वनिवृत्तेः सुत्रचत्वात्।

न केवलं भाष्यानुक्तत्वमेवैतासु परिभाषासु, किन्तु भाष्यविरोधोऽपीत्याह— अत एव' इति। वसंज्ञकानामन्तस्य वा लोपो लेटि परे इति सूत्रार्थः। 'दधद्रत्नानि' (मै.सं ४.११.४) इत्यादावडागमपक्षे दीर्घाभावः प्रयोजनम्। 'प्रत्याख्यातम्' इति। 'लेटोऽडाटौ' (३.४.९४) इति विधीयमानयोरडाटोः पर्यायेण प्रवृत्तौ लोपस्य नित्यत्वेऽपि, आट्पक्षे 'यदग्निरग्नये दधात्' (?) इत्यादौ दीर्घश्रवणं निर्बाधमिति व्यर्थं वाग्रहणमिति भावः। तदाह — 'लोपेऽपि' इति। 'तदनित्यत्वज्ञापकता' इति। आगमविधानानित्यत्वज्ञापकतेत्यर्थः। एवमन्यत्रापि ज्ञापकत्वासम्भव एवेत्यभिसन्धायाह—'चक्षिङः' इत्यादि। 'चारितार्थ्यात्' इति। अन्यथा नुन् दुर्वार इति भावः। न च ङित्त्वादेवात्मनेपदसिद्धेरस्यानुदात्तेत्त्वं व्यर्थमिति वाच्यम्। 'विचक्षणः प्रथयन्' इत्यत्र 'अनुदात्तेतश्च हलादेः' (३.२.१४९) इति युजर्थमावश्यकत्वात्। अन्यदप्येवंजातीयकमयुक्तमेवेत्याह—'एवम्' इति। 'आतिदेशिकमनित्यम्' इति। अत्र च 'लोटो लङ्वत्' (३.४.८९) इत्यतिदेशो ज्ञापकः। अन्यथा 'ङलोट्' इत्युक्तावपि ङित्कार्यनिर्वाहे तद्वैयर्थ्यं स्पष्टमेव। तेन 'जुह्वतु' इत्यादौ 'सिजभ्यस्त' (३.४.१०९) इति जुसोऽप्रवृत्तिरिति प्राञ्चः। सिञ्साहचर्यादभ्यस्तविधिभ्यामप्यनतिदिष्टङित्त्ववतो लकारस्य 'झेर्जुस्' (३.४.१०८) इत्यर्थादुक्तोदाहरणे जुस्निवारणादनर्थकं भाष्यानुक्तत्वेत्ययुक्तमेतदित्युपाध्यायो मन्यते। युक्तश्चैतत्। 'लोटो लङ्वत्' (३.४.८९) इत्यत्र भाष्ये यान्तु वान्तुप्रभृतिष्वतिदेशेन जुसमापाद्य 'लङः शाकटायनस्यैव' (३.४.१११) इत्यत्र 'ङितः' (३.४.९९) इत्यनुवर्त्तनेऽप्यदन्तात्परस्य ङितो लङ एव सम्भवेनातिरिक्तस्य लङ्ग्रहणस्यानतिदिष्टलङ्ग्रहणार्थत्वमा-

श्रित्य समाहितत्वेन 'सिजभ्यस्त' (३.४.१०२) इत्यत्रापि तथाविधरीतेरेव सूचनात्। एतेन 'लोटो लङ्वत्' (३.४.८५) इत्यत्र 'विदो लटो वा' (३.४.८३) इत्यतो वाग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणादीङ्शेषु जुस्निवृत्तिरित्यपि निरस्तम्। भाष्यकृत्परिगणितातिरिक्तानां व्यवस्थितविभाषाणां लक्ष्यनिर्णायकत्वायोगाच्चेत्याहुः।

'लोपविधिरिङ्विधिः' इति। अत्र मूलं मृग्यम्। यत्तु 'नाग्लोपि' (७.४.२) इत्यत्र प्रत्याहारग्रहणं सर्वविधिभ्यो लोपविधेर्बलवत्त्वे ज्ञापकम्। तद्धि 'वारि, आख्यत्, अनवारत्' इत्यादौ ह्रस्वागावाय, पारत्वाद्वृद्धौ सत्यां ङिलोपे हि तदानर्थक्यं स्पष्टमेव। तेन 'पटुमाख्यात्, अपीपटत्' इत्यादौ सन्वद्भावः सिद्ध इत्याहुः, तन्न; सप्तमे भाष्ये तादृशप्रत्याहारणग्रहणस्य 'वृद्धेर्लोपो बलीयान्' इत्येतावन्मात्रज्ञापकताया एव व्यवस्थापितत्वेन तद्वैजात्येनोक्तार्थज्ञापकत्वायोगात्तावता चरितार्थस्याधिकार्थकल्पकत्वायोगाच्च।

यद्यपि 'नेड्वशि' (७.२.८) इत्यतः 'इट्' इत्यनुवृत्तौ 'आर्धधातुकस्येट्' (७.२.३५) इत्यत्र पुनरिड्ग्रहणादिङ्विधेः सर्वतो बलवत्त्वमिति, तदप्ययुक्तम्; 'आर्धधातुकस्येड्वलादेः' (७.२.३५) इतिसूत्रस्थस्य तस्य 'नेड्वशि' (७.२.८) इतिसूत्रे भाष्ये प्रत्याख्यातत्वात्। सत्त्वे वा 'दीधीवेवीटाम्' (१.१.६) इति सूत्रस्थेड्ग्रहणप्रत्याख्यानोपायतया तस्य गुणरूपविकारनिवृत्त्यर्थकत्वेन भाष्ये समर्थितत्वादुक्तार्थासिद्धेरित्यलम्। 'असाध्वेव' इति।

केचित्तु इदं चिन्त्यम्। संज्ञापूर्वकविधेरनित्यत्वेन समर्थनीयानामभियुक्तव्यवहारसिद्धानामनेकेषामुदाहरणानामुपालम्भात्। तथा हि स्पशधातोर्यङन्तादकारप्रत्यये पस्पशाशब्दः साधुत्वेन सकलसम्मतः। तत्र 'दीर्घोऽकितः' (७.४.८३) इति दीर्घः प्रकृतपरिभाषया वारणीयः। एवं 'अहितुण्डेन चरति' इत्यर्थे प्राग्वहतीये ठकि 'आहितुण्डिकः' इत्यत्र 'तद्धितेष्वचाम्' (७.२.११७) इत्यादिवृद्ध्यभावः। तथा उरुशब्दात्

परि. ९८. आतिदेशिकमनित्यम्
९९. सर्वविधिष्वयोलोऽविधिः
१००. प्रकृतिग्रहणे

आत्मक्षाणणिचीष्टवद्भावेन वादेशो 'ब्रवयति' इत्यत्र हरदत्तादिसकलग्रन्थकारसम्मत उपपादवृद्धमावश्च । एतेषामेवज्ञातीयकानामन्येषाञ्च यदि पूर्वोदरादित्वेन बाहुलकेन च समर्थनमुच्यते, तर्हि परिभाषाश्रयणे को भारः ? न चेयं भाष्यकारेणाननुगृहीतेति भ्रमितव्यम् । 'श्वादेरिञि' (७.३.८) इतिसूत्रे भाष्ये 'शौवादंष्ट्रो मणिः' इति प्रयुञ्जानेन भगवता प्रकृतपरिभाषायाः सूचनात् ।

अन्यथा 'श्वोदंष्ट्रायां भवः' इत्यर्थे 'वृद्धाच्छः' (४.२.११४) इत्यस्य प्रसक्तेरण्प्रत्ययान्तप्रयोगस्यासाङ्गत्यं स्पष्टमेव । तद्भाष्यबलात्तत्र छप्रत्ययनिवर्त्तकपूर्ववचनकल्पनापेक्षया प्रमाणान्तरसिद्धप्रकृतपरिभाषाश्रयणस्य समुचितत्वात् । एतेन विधेयकोटौ संज्ञापूर्वकत्व एवैषा परिभाषेति निरस्तम् । अतिप्रसङ्गस्तु ज्ञापकसिद्धस्यासार्वत्रिकत्वात्सुपरिहरः । तस्मादाश्रयणीयैषा परिभाषा, भाषायामपि साधुरेव स्वायम्भुवशब्द इति वदन्ति ॥९८,९९॥

यदपि नन्वन्तेर्यङ्लुकि आशीर्लिङि वधादेशो न स्यादत आह—

१००. प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ।

षाष्ठद्वित्वस्य द्विप्रयोगत्वसिद्धान्तेन प्रयोगद्वयरूपे समुदाये प्रकृतिरूपत्वबोधनेनेदं न्यायसिद्धम् । अत एव 'जुहुधि' इत्यादौ द्वित्वे कृते धित्वसिद्धिरिति, तदपि न; भाष्येऽदर्शनात् । किञ्च तेन सिद्धान्तेन प्रत्येकं द्वयोस्तत्त्वबोधनेऽपि समुदायस्य तत्त्वबोधने मानाभावः ।

अत एव 'दयतेर्दिगि' (७.४.९) इतिसूत्रेऽस्तेः परत्वाद्द्वित्वे कृते परस्यास्तेर्भूभावे कृते पूर्वस्य श्नसूत्रं प्राप्नोतीत्याशङ्क्य विषयसप्तम्याश्रयणेन परिहृतं भाष्ये । अन्यथा त्वदुक्तरीत्या

एकाजुद्दिर्वचनन्यायेन समुदायस्यैवादेशापत्तौ तदसङ्गतिः स्पष्टैव। तस्मादुत्तरखण्डमादायैव यथायोगं तत्तत्कार्ये प्रवृत्तिर्वोच्या। 'भूसुवोः' (७.३.८८) इत्यस्य तदन्ताङ्गस्येत्यर्थात् प्राप्तस्य गुणनिषेधे 'बोभूतु' इति नियम इति न तद्विरोधः। तस्मात् हन्तेर्यङ्लुकि 'वध्यात्' इत्यादि माघवाद्युदाहृतं चिन्त्यमेवेत्यन्यत्राविस्तरः।

'धित्वसिद्धिः' इति। अन्यथा प्रत्येकमानर्थक्यात्समुदायस्य हुधातुत्वाभावाच्च तदप्राप्तिरेवेति भावः। 'उत्तरखण्डमादायैव' इति। द्विरुक्तेषु समुदायस्यैवार्थवत्त्वे खण्डद्वयात्मकस्य तस्य धातुपाठे पाठाभावादवयवयोश्चानर्थक्याद्धातुसंज्ञाप्रयुक्तकार्याणामप्रसङ्गः। द्वयोरपि खण्डयोरर्थवत्त्वे बोधावृत्तिप्रसङ्गः। तस्मादुत्तरखण्डस्यैव अर्थवत्त्वं धातुत्वञ्चेति भावः।

ननूत्तरखण्डस्यैवार्थवत्त्वं धातुत्वञ्चेत्युक्तौ 'प्रणिजगाद' इत्यादौ अभ्यासस्यानर्थक्यादुत्तरखण्डस्याभ्यासेन व्यवधानाच्च गदादिपरत्वाभावेन 'नेगद' (८.४.१७) इति णत्वं न स्यात्। न च 'पूर्वत्रासिद्धीयमद्विर्वचने' (जै.सू. ७०) इति णत्वोत्तरं द्वित्वमिति नायं दोष इति वाच्यम्। पूर्वं धातुः साधनेन युज्यत इति सिद्धान्तात्साधनबोधकप्रत्ययप्रयुक्तस्य द्वित्वस्यान्तरङ्गत्वात्परस्याप्युपसर्गनिमित्तकार्यस्य णत्वस्य प्रथमं प्रवृत्त्ययोगादिति चेत्? न; 'नेगद' (८.४.१७) इत्यत्र षष्ठ्यर्थकत्वात्सप्तम्याः क्रियाविशेषविषयकस्वनिष्ठशक्त्यभिव्यञ्जकत्वेन गदादिसम्बन्धिनो नकारस्योपसर्गस्थानिमित्तोत्परस्य णत्वमित्यर्थेनादोषात्। अत एव 'प्रणयगदत्' इत्यादावडागमव्यवधानेऽपि णत्वसिद्धिरिति स्पष्टमाकरे। 'चिन्त्यम्' इति। 'आर्धधातुके' इत्यस्यान्यत्र विषयसप्तम्यन्ततया प्रकृतेऽप्यर्थाधिकारात्तथात्वे तदनुरोधिनो 'लिङि' इत्यस्य परसप्तम्यन्तत्वायोगात्प्रथमं वाधादेशे ततो द्वित्वे 'दीर्घोऽकितः' (७.४.८२) इति दीर्घे 'वावध्यात्' इत्येव सत्यभिधाने रूपमित्याहुः ॥१००॥

यदपि ननु 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' (१.१.७३) इत्यत्रैकपरिभाषोपस्थितौ शालीयार्थसिद्धिरत आह—

१०१. विधौ परिभाषोपतिष्ठते नानुवादे।

अनूद्यमानविशेषणेषु तन्नियामकपरिभाषा नोपतिष्ठत इति तदर्थः। विध्यङ्गभूतानां परिभाषाणां विधेयेनासिद्धतया सम्बन्धासम्भवेऽपि तद्विशेषणे व्यवस्थापकत्वेन चरितार्थानां तद्विशेषणव्यवस्थापकत्वे मानाभाव इति तर्कमूलेयम्। किञ्च 'उदीचामातः स्थाने' (७.१.४६) इतिसूत्रे स्थानेग्रहणमस्या लिङ्गम्। अन्यथा 'षष्ठी स्थाने' (१.१.४९) इति परिभाषयैव तल्लाभे तद्वैयर्थ्यं स्पष्टमेवेति। तन्न; 'उदात्तस्वरितयोर्यणः' (८.२.४) इत्यादौ 'व्यङः सम्प्रसारणम्' (६.१.१६) इतिसूत्रभाष्योक्तरीत्या 'अल्लोपोऽनः' (६.४.१३४) इत्यादौ चैतस्या व्यभिचरितत्वात्; भाष्यानुक्तत्वाच्च। स्थानसम्बन्धो न परिभाषालभ्य इत्यर्थस्य 'षष्ठी स्थाने' (१.१.४९) इतिसूत्रे भाष्ये स्पष्टमुक्तत्वेन त्वदुक्तज्ञापकासम्भवाच्च। तत्र स्थानेग्रहणन्तु स्पष्टार्थमेव। किञ्च 'विधौ परिभाषा' (प.१०१) इति मवादः 'इकी गुणवृद्धी' (१.१.३) 'अचश्च' (१.२.२८) इत्यनयोर्विधीयत इत्यध्याहारमूलकः। अन्यत्र तु नास्याः फलमित्यन्यत्र विस्तरः।

अनूद्यमानविशेषणमुद्देश्यविशेषणम्। 'एतस्या व्यभिचरितत्वात्' इति। 'विधौ परिभाषोपतिष्ठते' (प. १०१) इत्यस्यास्तत्र तत्र व्यभिचरितत्वादित्यर्थः। व्यभिचारश्च 'उदात्तस्वरितयोः' (८.२.४) इत्यत्रानूद्यमानविशेषणे 'षष्ठी स्थानेयोगा' (१.१.४९) इत्यस्य प्रवृत्तिः। 'अचो

रहाभ्याम्' (८.४.४६) इत्यत्र तथाभूते 'रहाभ्याम्' इत्यंशे 'अचः' इति पञ्चमीमादय 'तस्मादित्युत्तरस्य' (१.१.६७) इति परिभाषया परत्वा-व्यवहितत्वांशयोः सम्बन्ध इत्येवं दिष्टक्रम; । 'विधीयत इत्यध्याहारमूलकः' इति । न च तदाध्याहारोऽप्येतत्परिभाषामूलक इति वाच्यम् । गुणवृद्धि-शब्दयोरनुवृत्त्यैव सिद्धे, पुनर्गुणवृद्धिग्रहणमहिम्ना 'ह्रस्वदीर्घप्लुतः' (१.२.२७) इत्यस्य 'ऊकाऽऽलोच्' (१.२.२७) इत्यतोऽनुवृत्तस्याप्रवृत्तिबलेन च तदध्या-हारस्य सुवचत्वात् । 'नास्याः फलम्' इति । किन्तु दोषा एवेत्याशयः ।
॥१०१॥

ननु 'नमस्करोति देवान्, नमस्यति देवान्' इत्यादौ 'नमःस्वस्ति' (२.३.१६) इति चतुर्थी दुर्वारेत्यत आह—

१०२. उपपदविभक्तेः कारकविभक्तिर्बलीयसी ।

कारकविभक्तित्वञ्च क्रियाजनकार्थकविभक्तित्वम् । तच्च प्रथमाया अप्यस्तीति साऽपि कारकविभक्तिरिति 'सहयुक्ते' (२.३.१९) इत्यादिसूत्रे भाष्ये ध्वनितम् । इयञ्च वाचनिक्येव । अत एव 'यस्य च भावेन' (२.३.३७) इति सप्तम्यपेक्षया अधिक-रणसप्तम्या बलवत्त्वमनेन न्यायेन 'तत्र च दीयते' (५.१.९६) इतिसूत्रे भाष्ये ध्वनितं कैयटेन स्पष्टमुक्तम् ।

अनित्यपक्षकनिरूपणानन्तरं भाष्यानुक्तत्वप्रयुक्तेन साधर्म्येण प्रसक्तेः पूर्वपरिभाषाद्वयं निरूपितम् । इयन्तु निमक्त्यर्थविशेषनिर्णायकस्थानेग्रहण-ज्ञाप्यपूर्वपरिभाषानिरूपणे विभक्तिविशेषनियामकत्वेनोपस्थित्या निरूप्यते । अत्र प्राञ्चः—कारकत्वं क्रियान्वयित्वम्। तदर्थकविभक्तिः कारकविभक्तिः । उपपदविभक्तिस्तु तद्व्यतिरिक्ता । न्यायसिद्धा चेयं परिभाषा । सर्वं वाक्यं क्रियया परिसमाप्यते क्रियायाः प्राधान्येन प्रधानकार्याणां बलवत्त्वात् ।

विशेष्यभूतायास्तस्याः प्राथमिकोपस्थितिविषयत्वेन तन्निमित्तककार्याणामन्तरङ्गत्वाच्च क्रियान्वय्यर्थकविभक्तेर्बलवत्त्वसिद्धेः। अतो नापूर्वेत्याहुः। तत्र वक्ष्यमाणदूषणैरसाङ्गत्यमालोच्यान्यथा व्याचष्टे—'क्रियाजनकार्थक-विभक्तित्वम्' इति। 'क्रियाजनकत्वं कारकत्वम्।' कारकाणां क्रियान्वय-नियमस्तु जनकस्य जन्यं प्रति नियताकाङ्क्षत्वादिति भावः।

'ध्वनितम्' इति। भाष्ये इति शेषः। 'तत्र हि' प्रकृतपरिभाषया तृतीयातः प्रथमायाः प्राबल्यमास्थायाप्रधानेग्रहणं प्रत्याख्यातम्। यदि च क्रियान्वयित्वमेव कारकत्वं, तदा प्रथमाप्रतिपाद्यस्य प्रातिपदिकार्थस्य तिङर्थान्वयित्वेऽपि क्रियान्वयाभावात्कारकविभक्तित्वाभावेन तदसञ्ज्ञातिरेव। 'वाचनिकी' इति। यतः प्रथमाया अपि कारकविभक्तित्वेनेतया परिभाषया प्राबल्यमभ्युपेयम्, अत इयं वाचनिकी। न हि 'पुत्रेण सहागतः पिता' इत्यादौ तृतीयापेक्षया प्रधानकार्यत्वमन्तरङ्गत्वं वा सम्भवति, येनेयं न्यायसिद्धा स्यादित्याशयः। ननु प्रातिपदिकार्थ एव विधीयमानत्वादन्तरङ्गा, तृतीया तु बहिर्भूतसहशब्दार्थसम्बन्धे विधीयमाना बहिरङ्गा' इति न्यायेनैव प्रथमायाः प्राबल्यम्। किञ्च 'सहयुक्ते' (२.३.१९) इत्यस्य सहार्थसम्बन्ध-प्रतियोगिवाचकात्तृतीयेत्यर्थः। उपपदविभक्तयः सम्बन्धप्रतियोगिवाचका-त्सम्बन्धे' इति सिद्धान्तात्। एवञ्च पित्रादिभ्यः प्रधानवाचिभ्यस्तृतीयाया अप्रवृत्तिरेव। अपि च यादृशविभक्त्यर्थस्य यादृशविभक्त्यर्थापेक्षया साक्षात्क्रियान्वयः, सा तदपेक्षया कारकविभक्तिरित्यभ्युपेयम्। अत एव 'नमोऽस्तु दारैस्तासाभिः सह सोमाय वाजिने' इत्यादौ प्रत्याख्यानेऽप्य-प्रधानग्रहणस्य, न प्रधाने तृतीया।

ततो वाचनिकत्वमप्रयोजकमत आह—'अत एव' इति। 'ध्वनितम्' इति। तत्र हि भाष्ये 'कार्यग्रहणमनर्थकं भवेन कृतत्वात्' इति कात्या-यनेन कार्यग्रहणे प्रत्याख्याते, भाष्यकृता कार्यग्रहणमेव भवान् प्रत्याचष्टे, न पुनर्दीयतेग्रहणमपि। यथैव यन्मासे कार्यं तन्मासे भवं भवति। एवं यदपि मासे दीयते, तदपि मासे भवं भवति। तत्र तत्र 'भवः' इत्येव सिद्धम्। न सिध्यति। नैतन्मासे दीयते, किन्तर्हि मासे गते। एवं तर्ह्यपश्लेषिकमधिकरणं विज्ञास्यते इति बोध्यपरिहाराभ्यां दीयतेग्रहणं

प्रत्याख्यातम्। तत्र कैयटः—'मासे दीयते' इति नैषाऽधिकरणसप्तमी, किन्तर्हि 'यस्य च भावेन' (२.३.३७) इति। तत्र भव इत्यत्र चाधिकरणसप्तम्याश्रिता। 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' (प. १०२) इति न्यायात्। इह त्वतिदेशसामर्थ्याद्भावलक्षणसप्तम्याश्रयणमित्यवान्तरपूर्वपक्षाशयमुपवर्ण्य, मासेऽतिक्रान्ते यदीयते तस्य मासः औपश्लेषिकमधिकरणमिति 'तत्र भवः' (४.३.५३) इत्येव सिद्धम्। कारकप्रकरणे च गौणस्याधि संज्ञा भवतीति चरमसिद्धान्ताशयमवोचत्।

एतेन 'क्रियान्वयित्वं कारकत्वम्' इत्यपास्तम्। 'यस्य च भावेन' (२.३.३७) इति सप्तम्या अपि क्रियान्वयित्वात्। ये तु प्रधानीभूतक्रियासम्बन्धनिमित्तककार्यत्वेन कारकविभक्तीनां बलवत्त्वं वदन्ति, तेषामुभयोरपि क्रियासम्बन्धनिमित्तकत्वेन तदसङ्गतिः स्पष्टैव। 'नमो वरिव' (३.१.१९) इतिसूत्रे 'नमस्यति देवान्' इत्यादौ चतुर्थीवारणाय भाष्ये उपन्यासश्चासङ्गतिश्च। एतेन 'क्रियाकारकसम्बन्धोऽन्तरङ्गः' इति तन्निमित्ता विभक्तिरन्तरङ्गोपपदार्थेन तु 'यत्किञ्चित्क्रियाकारकभावमूलकः सम्बन्धः' इति तन्निमित्ता बहिरङ्गेत्यपास्तम्।

ननु 'नमस्यति' इत्यत्र नमःपदार्थेऽपि क्रियाकारकभावेनैवान्वयात् अत्र च नमःपदार्थस्यापि क्रियात्वं मुण्डयतौ मुण्डस्येव। 'सहयुक्ते' (२.३.१९) इत्यादौ च प्रधाने प्रथमासाधनार्थमिदं भाष्ये उपन्यस्तेत्यत्यन्तं विस्तरः।

'तदाह कैयटेन' इति। एवञ्च भावलक्षणसप्तम्यपेक्षया भाष्यकैयटाभ्युपगतमधिकरणसप्तम्याः कारकविभक्तित्वेन प्राबल्यं निर्वोढुं वाचनिकत्वमस्याः परिभाषायाः क्रियाजनकत्वमिति भावः। ननु दानक्रियासम्बन्धोभयसाधारणत्वेऽप्यधिकरणसप्तमीनिमित्तभूतः क्रियाकारकभावोऽन्तरङ्गः

शीघ्रोपस्थितिकत्वात् । भावलक्षणसप्तमीप्रवृत्तिहेतुज्ञाप्यज्ञापकभावस्तु बहिरङ्गः, क्रियाकारकभावसम्बन्धमूलकत्वेन विलम्बोपस्थितिकत्वात् । न हि ज्ञापनक्रियासम्बन्धमन्तरेण सम्बन्धिनो ज्ञाप्यज्ञापकभावः सम्भवति । किञ्च ज्ञाप्यज्ञापकभावोऽपि न साक्षात् । न हि मानेन दानक्रिया ज्ञाप्यते, किन्तु तत्कर्तृकातिक्रमणक्रियया, तदपि कालद्वारकमिति पारम्परिकः ।

ततश्च न्यायेनैव प्राबल्यमधिकरणसप्तम्या उपपद्यत इति वाचनिकत्वमनुपयुक्तमेवास्याः परिभाषाया इत्यत आह—'नमो वरिवः इतिसूत्रे' इति । 'नमस्यति' इत्यादौ उत्कृष्टत्वत्वबोधनं नमःपदार्थः । तदनुकूलश्च व्यापारो विशिष्टार्थः । एवञ्च क्रियाजन्यफलाश्रयत्वलक्षणकर्मत्वनिमित्तकद्वितीयापेक्षया विशेषणीभूतनमःपदार्थसम्बन्धनिबन्धनायाश्चतुर्थ्या एवान्तरङ्गत्वाद्वचनमन्तरेण तन्निवर्तनायोगाद्वाचनिकत्वमस्याः परिभाषायाः इति भावः । नन्वन्तरङ्गादपि प्रधानकार्यस्य बलवत्त्वेन प्रधानीभूतविशिष्टक्रियानिरूपितकर्मत्वप्रयुक्ता द्वितीयैव प्रवर्तते, न त्वप्रधानभूतनमःपदार्थसम्बन्धनिबन्धना चतुर्थी । अत एव 'मूलकेनोपदंशम्' इत्यादौ प्रधानभुजिक्रियानिरूपितकरणत्वप्रयुक्ता तृतीयैव; न त्वप्रधानभूतोपदंशनक्रियानिरूपितकर्मत्वप्रयुक्ता द्वितीयेति सिद्धान्तः । इत्थञ्च वाचनिकत्वे प्रकृतपरिभाषायाः प्रयोजनं मृग्यमेवेत्यत आह—'सहयुक्ते इत्यादौ' इति । न्यायेनैव निर्वहे तत्र तत्र भाष्यकारीयप्रकृतपरिभाषाप्रदर्शनवैफल्यप्रसङ्गादर्थद्वारकस्यान्तरङ्गबहिरङ्गभावस्याश्रयणं न युज्यत इत्यभिमानः ॥१०२॥

ननु 'अदसुयङ्' इत्यादौ पूर्वस्यापि सुत्वापत्तिरत आह—

१०३. अनन्त्यविकारेऽन्त्यसदेशस्य ।

अन्त्यसदेशानन्त्यसदेशयोरेकप्रयोगे युगपत्प्राप्तावन्त्यसदेशस्यैवेति तदर्थः । अन्यथा धात्वादेर्नित्वसत्वे 'नोता सोता' इत्यादावेव स्यातां, न तु 'नमति सिञ्चति' इत्यादौ । 'अनन्त्यविकारे'

इति च लिङ्गम् । अन्त्येन समानो देशो यस्य सोऽन्त्यसदेशः । तेन च अन्त्यवर्णतद्वर्णयोरितराव्यवधानेन बोध्यम् । अत एव 'विद्धः' इत्यार्धधातुकार्थं 'न सम्प्रसारणे' (६.१.३७) इति चरितार्थम् । अल्लोपोऽनः' (६.४.१३४) इत्यादेरनः 'तक्ष्णा' इत्यादावाकारादावप्रवृत्तिरप्यस्याः फलम् । यजादिस्वादिपरानन्ताङ्गस्याकारस्य लोप इत्यर्थस्यैवाङ्गांशे प्रत्ययस्थीत्थिताकांक्षतया औचित्यादङ्गावयवयजोदिस्वादिपरस्यान इत्यादिक्रमेणानेकत्रानेकक्लिष्टकल्पनापेक्षयाऽस्या उचितत्वात् । न चैषा 'व्यङः सम्प्रसारणम्' (६.१.१३) इतिसूत्रे भाष्ये प्रत्याख्यातेति भ्रमितव्यम् । वार्त्तिकोक्तफलानामनेकक्लिष्टकल्पनाभिरन्यथासिद्धिं प्रदर्श्यापि यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा कर्तव्या प्रतिविधेयं दोषेषु प्रतिविधानं चोदात्तनिर्देशात्सिद्धमित्युपसंहारात् । 'मिमर्जिषति' इत्यर्थश्च । तत्र वृद्धेः पूर्वमन्तरङ्गत्वादित्वे परत्वादभ्यासकार्ये तेतीऽभ्यासैकारस्य वृद्धिवारणायावश्यकी ।

न च वृद्धौ पुनरभ्यासह्रस्वत्वेन सिद्धिः लक्ष्ये लक्षणस्य इति न्यायेन पुनरप्रवृत्तेः । यत्तु 'न सम्प्रसारणे' (६.१.३७) इतिसूत्रे भाष्ये नैतस्याः परिभाषायाः प्रयोजनानीत्युक्तं तस्यायमर्थः । एतत्सूत्रप्रयोजनान्येतत्परिभाषायाः प्रयोजनानि न भवन्ति व्यथादावन्त्यसमानदेशयणोऽभावादिति । नैतान्येतस्याः प्रयोजनानीति पाठोऽपि क्वचिद् दृश्यते । वाचनिक्येषा स्पष्टा च 'व्यङः' (६.१.१३) इतिसूत्रे 'अदेर्ङोऽसेः' (८.२.४०) इतिसूत्रे केचिदन्त्यसदेशस्येत्यनेन भाष्ये इत्यन्यत्र विस्तरः ।

वाचनिकत्वप्रयुक्तं साधर्म्यमिह सङ्गतेर्हेतुः । 'इतराव्यवधाने' इति । इतरत्वञ्च चरमवर्णवृत्तिवर्णविभाजकधर्मपुरस्कारेण । एवञ्च चरमवर्णवृत्तिवर्णविभाजकधर्मविरुद्धतादृशधर्मवद्वर्णकृतं व्यवधानं यत्रान्त्ये तद्वर्णयोस्तत्रायं न्यायो न प्रवर्तत इति निष्कर्षः । तेन 'नदमुयङ्' इत्यत्र रेफेणान्त्यवर्णतद्वर्णयोर्व्यवधानेऽपि न क्षतिः । 'चरितार्थम्' इति । अन्यथा प्रकृतपरिभाषया पूर्वस्य यणः सम्प्रसारणाप्रसक्त्या तद्वैयर्थ्यं स्पष्टमेव । अत एव 'एधते' इत्यादौ 'लिङः सलोपः' (७.२.७९) इति सकारद्वयस्यापि निवृत्तिरिति बोध्यम् ।

'उत्थिताकाङ्क्षतया' इति । प्रधानान्वयापेक्षयाऽप्युत्थिताकाङ्क्षान्वयः प्रबलः । अत एव 'नोपधायाः' (६.४.७) इत्युपधाग्रहणं चरितार्थम् । अन्यथा दीर्घश्रवणाद्विपस्थितस्याचः इत्यस्याङ्गांशे विशेष्यत्वाभ्युपगमेन नान्त्यस्याचो नामि दीर्घ इत्यर्थे येन नाव्यवधानन्यायेनोपधायां एव दीर्घप्रवृत्त्या तद्वैयर्थ्यं स्पष्टमेव । 'उदात्तनिर्देशात्' इति । 'स्वरितेनाधिकारः' (१.३.११) इति शास्त्रबलात्स्वरितत्वनिर्देशे सङ्ख्यातानुदेशस्य प्रवृत्तिरन्यत्राप्रवृत्तिरिति यथा व्यवस्था, तथा प्रकृतेऽपि 'न सम्प्रसारणे' (६.१.३७) इति निषेधबलादुदात्तनिर्देशे परिभाषाया अप्रवृत्तिः; अन्यत्र प्रवृत्तिरिति व्यवस्था स्वीक्रियत इति भावः । युक्तञ्चैतत् ; अन्यथा भसंज्ञाविषये यणोऽप्रवृत्त्या चरमवर्णवृत्यृत्वविरुद्धहल्त्वाक्रान्तेन रेफेणान्त्यवर्णतद्वर्णयोर्व्यवधानादेतत्परिभाषायां अप्रवृत्तौ 'अदमुईत्रः' इत्याद्यसिद्धिप्रसङ्गात् । उदात्तनिर्देशेन परिभाषाव्यवस्थापने तु सकलेष्टसिद्धिः ।

'अन्तरङ्गत्वात्' इति । अपरनिमित्तकत्वेनेति भावः । यद्यपि प्रतिपदविधित्वलक्षणमन्तरङ्गत्वं वृद्धेरप्यस्तीति द्वयोरन्तरङ्गयोः परत्वाद्वृद्धौ नेदमस्याः परिभाषायाः प्रयोजनमिति वक्तुं शक्यम् । तथापि प्रकृतपरिभाषाप्रयोजनप्रतिपादनावसरे भाष्ये वृद्धेरेतद्विषये तथाविधमन्तरङ्गमनादृतमिति तदनुसारिणेयमुक्तिः । यदि वर्णैकदेशा वर्णग्रहणेन न गृह्यन्ते, तदा लक्षणमेदात् 'चलीक्लृप्यते' इत्यत्र रीकोरेफस्य लत्वेनायं न्यायः प्रवर्तते । अन्यदा तु लक्षणैक्यादुदात्तनिर्देशेनैव तत्रास्य न्यायप्रवृत्तिरिति बोध्यम् ।

'कुर्यात्' इत्यादावनया परिभाषया कस्यचित्सकारस्य लोपे तदवयविशिष्टस्य 'स्कोः' (८.२.२९) इति लोप इति नास्ति दूषणावकाश इत्यलम् ॥१०३॥

ननु 'अव्यक्तानुकरणस्यातः' (६.१.९८) इति पररूपं 'पटत्' इति 'पटिति' इत्यादौ—'अलोऽन्त्यस्य' (१.१.५२) इत्यन्त्यस्य प्राप्नोतीत्यत आह—

१०४. नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ।

'अनभ्यास' इत्युक्तेः 'विभक्ति' इत्यादौ 'भृञामित्' (७.४.७६) इत्याद्यन्तस्यैव । अभ्यासोऽनर्थकोऽर्थावृत्त्यभावात् । किन्तूत्तरखण्ड एवार्थवानित्यन्यत्र निरूपितम् । एषा 'अलोऽन्त्यात्' (१.१.५२) सूत्रे भाष्ये स्पष्टा । कलानामन्यथासिद्धिकरणेन प्रत्याख्याता चेति तत एवावधार्यताम् ।

विकारपदवत्तासाधर्म्यमाश्रित्य अत्रास्याः परिभाषायाः उपन्यासः । यद्वा अनन्त्यविकारव्यवस्थापकपरिभाषानिरूपणे तत्परिपन्थित्वेनान्त्यविकारव्यवस्थापिकाया अस्या अप्युपस्थितेरुपन्यासः । अस्यां 'नाम्रेडितस्यान्त्यस्य तु वा' (६.१.९९) इति सूत्रं ज्ञापकम् । अन्यथा 'त्राम्रेडितस्य' इत्येव सिद्धे निषेधकरणमन्त्यग्रहणञ्च निरर्थकं स्यात् । 'अनभ्यासविकारे' इति तु वाचनिकम्, 'आर्तिपिपर्त्योश्च' (७.४.७७) इति निर्देशसिद्धं वेत्यन्यत् । 'अभ्यासोऽनर्थकः' इति । अनभ्यासविकार इति भाष्यकृतः पशुदासोऽप्यत्रार्थे प्रमाणमिति बोध्यम् ।

'आवृत्त्यभावात्' इति । तदुक्तं कैयटे 'शब्दस्यावृत्तिर्नार्थस्य' इति । अत्र विकारशब्देन भावादेश एव गृह्यते । तेन 'अत्र लोपोऽभ्यासस्य' (७.४.५८) इति 'घ्वसोरेद्धौ' (६.४.११९) इति लोपः सर्वस्यैवाभ्यासस्य भवति ।

'भाष्ये स्पष्टा' इति । वचनरूपेणेति शेषः । 'फलानामन्यथासिद्धिकारणेन' इति । तथा हि, 'अन्यस्यानुकरणस्यात इतौ' (८.४.६७) इति विधीयमानस्य षत्वस्यादेशत्वाभावः प्रकृतपरिभाषायाः प्रयोजनम् । तच्च 'नाम्रेडितस्य' (६.१.९९) इति ज्ञापकात्तस्यान्त्यादेशत्वानुपपत्त्या सिद्धम् । तथा 'ध्वसोरद्धौ' (६.४.११९) इति लोपस्यान्त्यादेशत्वाभावः प्रयोजनम् । तच्च 'लोपश्च' (६.४.१०७) इति द्विशकारकनिर्देशेन लोपस्य शित्वसम्पादनात्सिद्धम् । तथा 'हलि लोपः' (७.२.११३) इति विधीयमानस्य लोपस्यान्त्यादेशत्वाभावः प्रयोजनम् । तदपि 'अनाप्यकः' (७.२.११२) इत्यनेन सर्वत्रैवानादेशं विधाय हलादावनो नकारस्य लोपे परूपे च सिद्धमिष्टमिति न प्रयोजनम् । तथा 'सनि मीमा' (७.४.५४) इति मीमादीनां 'अत्र लोपोऽभ्यासस्य' (७.४.५८) इति विधीयमानलोपस्यान्त्यादेशत्वाभावः प्रयोजनम् । तत्तु मीमादीनामनुवृत्त्यैव सिद्धे पुनरत्रग्रहणात्सम्प्रत्याभ्यासस्य लोपविधानात्सिद्धमित्येवं भाष्ये उक्तम् ।

नन्वसत्यामस्यां परिभाषायां 'आदिर्ञिटुडवः' (१.३.५) इति विधीयमानमित्त्वमाश्रित्य जायमानो लोपोऽन्त्यस्यैव स्यात्, इष्यते तु सर्वस्येति चेत् ? सत्यम् ; इत्त्वमनुवृत्त्यैव सिद्धे तस्यग्रहणात्सर्वादेशो भविष्यति । न च 'श्वेताश्वाश्वतरगालोडितादिकणामश्वतरेतकलोमश्च' इति विधीयमानो लोपो विना प्रकृतपरिभाषाममीष्टः सर्वादेशी न स्यादिति वाच्यम् । 'श्वेताश्वादीनां लोप इत्येव सिद्धावश्वतरादीनां पृथग्ग्रहणबलेन् सर्वादेशत्वाक्षतेः । 'कथमन्यथा सत्यामप्यस्यां परिभाषायामश्वतरयोरर्थवत्त्वादलोन्त्यविधेर्निवृत्तिः । नचैवमपि 'चतुरश्छयतोर्वाक्षरलोपश्च' (वा. ९७१) इति विधीयमानः सर्वादेशो न स्यादिति वाच्यम् । आदिग्रहणेनैव सिद्धावक्षरग्रहणमतिरिच्यमानं 'सर्वादेशत्वं साधयतीत्यदोषात् । विभषा भवदिति वार्त्तिकविहित ओकारोऽपि न वकारस्यावग्रहणसामर्थ्यात्, अन्यथा हि 'वस्य' इत्येव ब्रूयादिति सकलेष्टसिद्धिरतो नास्ति परिभाषायाः प्रयोजनमित्याहुः ॥१०४॥

ननु 'ब्राह्मणेवत्सा च, ब्राह्मणीवत्सश्च' इत्यादौ पुमान् स्त्रिया' (१.२.६७) इत्येकशेषापत्तिः। स्त्रीत्वपुंस्त्वातिरिक्तकृत क्रियेवामावादत आह—

१०९. प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः।

तेन प्रधानस्त्रीत्वपुंस्त्वातिरिक्ताप्रधानस्त्रीत्वपुंस्त्वकृत विशेषस्यापि सत्त्वेन न दोषः। स्पष्टा चेयं 'पुमांस्त्रीया' (१.२.६७) नपुंसकमनपुंसकेन' (१.२.६९) इत्यनयोर्माष्ये। 'अन्तरङ्गोप जीब्यादपि प्रधानं प्रबलम्' इति हेतुमत्ति च' (३.१.२९) इत्यत्र भाष्यकैयटयोः।

अनर्थकप्रक्षसायामर्थवद्विषयककार्यविशेषनिर्णायिकाया अपि परि माषायाः कल्पिन्दुपस्थितेरुपन्यासः। अत्र 'प्राधान्यमन्येनिरूपितविशेषणो तारादिस्थः' तच्च 'लिङ्गसंख्यायीः स्वाश्रयद्वारकम्। 'तयोर्धर्मिविशेषणत्व नियमात्। न तु यत्किञ्चिन्निरूपितविशेष्यतारूपम्। 'परमब्राह्मणवत्सा परमब्राह्मणीवत्सश्च' इत्यत्रैकशेषप्रसङ्गात्। 'भाष्यकैयटयोः' इति। त अन्तरङ्गमुपजीव्यञ्च प्रयोज्यक्रियानिरूपितं कर्तृत्वं बाधित्वा प्रधानभूत प्रयोजककर्तृयापेक्षं कर्मत्वं प्रबर्तत इति गत्यादिसूत्रे (६.२.१४९) नियाम कर्मित्युक्तमित्यन्यत्र विस्तरः ॥१०९॥

ननु स्त्रीत्वमधुक्तो मातृशब्दस्य क्रीन्निषेधः परि मातृवाचकमातृशब्देऽपि स्यादत आह—

१०६. अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी।

तेन शुद्धरूढस्य जननीवाचकस्यैव ग्रहणम्। न परिच्येतृ-
वाचकस्य, योगजबोधे तदनालिङ्गितशुद्धरूढिजोपस्थितिः प्रति-
बन्धिकेति व्युत्पत्तिरेव तंदनीजम्। रथकाराधिकरणन्यायसिद्धो ऽ
यमर्थः। कश्चित्तु 'दीधीवेवीटाम्' (१.१.६) इत्यत्रानया परि-
भाषया दीधीङ्वेवीङोरेव ग्रहणं न दीङ् धीङ् वेञ् वीनामिति ?
तन्न, तथा सति 'दीवेधीवीटाम्' (१.१.६) इत्येव वदेदित्यन्ये।

अवयवशक्तेरा भवतीत्यवादेतत्याः परिभाषाया उपन्यासः। अवयव-
शक्तिजन्यपदार्थोपस्थित्यपेक्षया समुदायशक्तिजन्यतदुपस्थितिः प्रबला
वाक्यार्थबोधनिर्वाहिकेति परिभाषार्थः। 'तदनालिङ्गित' इति। तेन केवल-
रूढिविषयमिदम्। योगरूढिविषये पङ्कजादौ तु योगार्थस्यापि पङ्कजनिक-
र्तृत्वादेः पद्मादौ रूढ्यर्थे विशेषणतया बोधविषयत्वं भवत्येव।

'व्युत्पत्तिः' इति। वैशेषिकादिसम्मतेति शेषः। 'रथकाराधिकरण'
इत्यादि। रथकारशब्देन जातिविशेषविशिष्टस्य —

'मौहिल्येण कर्णयान्तु रथकारः प्रजायते'

इत्यादि मन्त्रादिप्रसिद्धस्य बोधने रूढियोगमपहरतीति यो जैमिनीयानां न्याय-
स्तेनेतस्याः परिभाषायाः सिद्धित्वर्थः। एतेन सकलतन्त्रप्रसिद्धोऽयं न्यायो
नास्त्यपूर्वः, प्रकृतशास्त्रैकोत्तर इति सूचितम्। 'इत्येव वदेत्' इति।
असन्देहार्थमेव पठितव्ये। तथाविधपाठबलेनापूर्वकल्पनापेक्षया सकलतन्त्र-
प्रसिद्धेनेन न्यायेन समुदायग्रहणमीदृशविषये समञ्जसमिति केचित्।
कन्ये तु; अवयवार्थापेक्षया समुदायार्थस्य शीघ्रोपस्थितिकत्वेनानन्तरत्वा-
दन्तरङ्गन्यायसिद्धमिदम्; जैमिनीयानामप्ययमेवाशय इत्याहुः ॥१०६॥

ननु वातायनार्थं गावलेऽवङो वैकल्पिकत्वात् 'गोसः'
इत्यादापि स्यादत आह—

१०७. व्यवस्थितविभाषयाऽपि कार्याणि क्रियन्ते ।

लक्ष्यानुसारादव्यवस्था बोध्या । 'शाच्छा' (७.३.७) इतिसूत्रे 'लटः शतृ' (३.२.१२४) इत्यादिसूत्रेषु च भाष्ये स्पष्टा ।

लृदित्शब्दे गवाक्षादौ कार्यव्यवस्थापकत्वादवेतद्यत्नः । व्यवस्थिता नियता, व्यवपूर्वात्तिष्ठतेः कर्तरि क्तः । परिभाषायां क्रियन्ते इत्यस्य क्वचिदिति पूरणीयम् । विकल्पेषु सर्वत्र स्वविषये भावाभावयोः पर्यायेण प्रवृत्तिर्युक्ता द्वयोरप्युद्देश्यतावच्छेदकावच्छेदेन विधानात् । क्वचित्तु तयोरन्यतरस्य लक्ष्यानुरोधात्सङ्कोचः स्वीक्रियत इति तदर्थः । तदुक्तमन्यत्राह— 'लक्ष्यानुरोधाद्व्यवस्था' इति । 'भाष्यसम्मतैव' इति ।

"देवत्रातो गलो ग्राह इति योगे च सद्विधिः ।
मिथस्तेन विभाष्यन्ते गवाक्षः संशितव्रतः ॥"

इति व्यवस्थितविभाषाविषयाणामुदाहरणानां भाष्ये परिगणितत्वादिति भावः । 'देवत्रातः' इत्यत्र राजविशेषे वाच्ये 'नुदविदं' (८.२.५६) इति प्राप्तस्य पाक्षिकस्य नत्वस्याभावः । 'गलः' इत्यत्र प्राण्यवयवे वाच्ये पाक्षिकस्य 'अचि विभाषा' (८.२.२१) इति प्रसक्तस्य लत्वाभावस्य निवृत्तिः । 'ग्राहः' इत्यत्र जलचरे 'विभाषा ग्रहः' (३.१.१४३) इति प्राप्तस्य पाक्षिकस्य णप्रत्ययाभावस्य निवृत्तिः । 'हन्ति' इति 'पलायते' इत्यादाविति शब्दयोगे 'लक्षणहेत्वोः क्रियायाः' (३.३.१२६) इति प्राप्तयोः शतृशानचोः पाक्षिकयोरभावः । 'वाता यत्र गवाक्षे' इत्यत्र 'अवङ् स्फोटायनस्य' (६.१.१२३) इति विहितस्य पाक्षिकस्यावङादेशस्य निवृत्तिः । 'संशितः' इत्यत्र व्रते वाच्ये 'शाच्छोरन्यतरस्याम्' (७.४.४१) इति प्राप्तस्य पाक्षिकस्येत्वाभावस्य निवृत्तिः । एतावन्ति व्यवस्थितविभाषायाः प्रयोजनानीति तदर्थः ।

एवञ्च यदुक्तं दीक्षितादिभिः 'अभिनिविशश्च' (१.४.४७) इत्यत्र

'परिक्रयणे सम्प्रदानम्' (१.४.४४) इत्यतोऽनुवृत्तस्यान्यतरस्यांग्रहणस्य 'इको ह्रस्वः' (६.३.६१) इत्यत्र गालवग्रहणस्य च व्यवस्थितविभाषात्वमुक्तं तदप्रामाणिकमिति द्रष्टव्यम् । एष्वर्थेषु 'अभिनिविष्टानाम्' इति समर्थसूत्रस्थभाष्यप्रयोगबलात् 'अभिनिविशश्च' (१.४.४७) इत्यत्राविकृतानुपूर्वीविवक्षणात् 'पापे अभिनिवेशः' इत्यत्राधारस्य कर्मत्वाभावः । 'अभिनिवेशः' इत्यत्राधारस्य कर्मत्वाभावः । 'कारीषगन्ध्यापुत्रः' इत्यादौ च ह्रस्वदीर्घयोर्योगपद्येन प्रसक्तौ परत्वाद्दीर्घ एकदेशिन्यायेन पुनर्ह्रस्वाप्रवृत्तिरित्यतो न कश्चिद्दोष इत्याहुः ॥१०७॥

॥ ७० ॥

१०८. विधिनियमसम्भवे विधिरेव ज्यायान् ।

नियमे ह्यश्रुताया अन्यनिवृत्तेः सामर्थ्यात्परिकल्पनमुक्तानुवाददोषश्चेति लाघवाद्विधिरेवेति वोध्यम् । 'यस्य हलः' (६.४.४९) इत्यत्र भाष्ये स्पष्टेयम् ।

पूर्वपरिभाषायां नियमप्रशंसनादत्रैतन्निरूपणमिति द्रष्टव्यम् । अपूर्वविधित्वनियमविधित्वयोर्यत्र सम्भवः, तत्रापूर्वविधित्वमेव, न तु नियमविधित्वमिति परिभाषार्थः । यद्यपीष्टानिष्टसाधारण्येन सामान्यशास्त्रप्रवृत्तौ समारभ्यमाणानां 'धातोस्तन्निमित्तस्य' (६.१.८०) इत्यादीनां 'पञ्च पञ्चनखा भक्ष्याः' इत्यादेरिव परिसंख्याविधित्वमेव, न तु नियमविधित्वमत्र शास्त्रे; तस्य 'व्रीहीनवहन्ति' इत्यादौ यत्रेष्टप्राप्तिः प्राक्षिकी तथाविधविषयत्वात् ; उक्तञ्च जैमिनीयैः—

"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥" इति ।

तथाप्यन्यनिवृत्तिसाम्यर्येण परिसंख्यापि नियम इति भाष्यकारादिभिर्व्यवह्रियत इत्यदोषः ।

अश्रुताया अन्यनिवृत्तेः इति । विरुद्धलक्षणया निषेधमुखेन प्रवृत्तावितोऽपि गौरवमिति बोध्यम् । 'यस्य हलः' इत्यादि । तत्र हि भाष्ये 'यस्य' (६.४.१४८) इत सङ्घातग्रहणे सामर्थ्यात्सवस्य लोपः । उत हलः परस्यैव यस्येत्येव नियमो वेति विचारे, कमथक्यान्नियमो भविष्यति; विधेय नास्तीति कृत्वा । इहास्ति विधेयम् । किं ? अन्त्यस्य लोपः प्राप्तः सवस्य विधेयः । तत्र पूर्वो विधिरस्तु नियमो वेति ? अपूर्वविधिरविष्यति न नियम इत्युक्तम् । एवमिजादेरित्यत्रापीति स्पष्टमेव भाष्यकारैरियमभ्युपगता परिभाषेत्याशयः ॥१०९॥

ननु 'आशिषीया भूतवच्च' (३.३.१३२) इत्येनेन लुङ्वदिव लङ्लिटोरप्यतिदेशः स्यादत आह—

१०९. सामान्यातिदेशे विशेषानतिदेशः ।

सामान्योपस्थितिकाले नियमेन विशेषोपस्थितिजनकसामग्र्यभावोऽस्या बीजम् । तेनानद्यतनभूतरूपे विशेषे विहितयोस्तयोर्नातिदेशः । इयमनित्या 'न ल्यपि' (६.४.६९) इति लिङ्गात् । तेन 'स्थानिवत्' (१.१.५६) सूत्रेण विशेषातिदेशोऽपि । स्पष्टं चैतत्सर्वं 'स्थानिवत्' (१.१.५६) सूत्रे भाष्ये ।

न्यायसिद्धत्वप्रयुक्तं साधर्म्यमेवात्र सङ्गतेर्बीजम्, नत्वन्यत् । न ल्यपि' इति । स्थानिवद्भावेन कित्वमाश्रित्य प्राप्तस्य 'घुमास्था' (६.४.६६) इतीत्वस्य ह्यनेन प्रतिषेधः क्रियते । क्त्वात्वस्य किदकित्सधारणत्वेन विशेषधर्मस्य कित्वस्यातिदेशाभावे प्रतिषेधवयर्थ्या क्त्वाश्रयस्यानित्यत्वे प्रमाणमिति भावः । 'स्थानिवत्सूत्रे भाष्ये' इति । तत्र हि सामान्यातिदेशे विशेषानतिदेशः । सामान्येऽतिदिश्यमाने विशेषो नातिदिष्टो भवति । तद्यथा— 'ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यम्' इति सामान्य यद् ब्राह्मणकार्यं, तत् क्षत्रियेऽतिदिश्यते । यद्विशिष्टे माठरे कौण्डिन्ये वा न तदतिदिश्यते ।

एवमिहापीति 'अनालिबधौ' (१.१.५६) इत्यस्य विशेषातिदेशनिषेधार्थस्य वैयर्थ्यापादनमिषेणोक्तार्थस्य तद्विषये प्रवृत्त्यभावः प्रदर्शित इत्यवधेयम् ।

ननु 'तित्स्वरितम्' (६.१.१८५) इति स्वरितत्वं 'किरति' इत्यादावपि स्यादत आह—

११०. प्रत्ययाप्रत्ययोः प्रत्ययस्य ग्रहणम् ।

इयञ्च 'अङ्गस्य' (६.४.१) इति सूत्रे भाष्ये पठिता । 'वर्णग्रहणे न्न न प्रवर्त्तते' इति तत्रैव कैयटे स्पष्टम् । अत एव 'सनोशसमिक्ष उः, (३.१.१६८) वलि' (६.३.११८) इत्यत्र सन्वलयोः प्रत्ययग्रहणम् । परे तु 'तित्स्वरितम्' (६.१.८५) इति सूत्रे एषा परिभाषा लक्ष्यसंस्काराय भाष्ये क्वापि नाश्रितेति कैयटेनोक्तम् । 'अङ्गस्य' (६.४.१) इति सूत्रे तत्प्रत्याख्यायैषा भाष्ये एकदेशिनोक्ता । अत एव 'तिति प्रत्ययग्रहणं कर्तव्यम्' इति वार्त्तिककृतोक्तम् । उक्तसूत्रयोर्व्याख्यानात्प्रत्ययग्रहणमित्याहुः ।

नियमप्रसङ्गानियमबोधकपरिभाषायां उपन्यासः । एवमुत्तरपरिभाषणाप्यूह्यं तृतीयकानामिति द्रष्टव्यम् । 'भाष्ये पठिता' इति । एतेनेयं वाचनिकीत्युक्तम् । 'वर्णग्रहणे न्न न प्रवर्त्तते' इति । अत एव 'अस्य च्वौ' (७.४.३२) इतीत्वं 'शुक्लीकरोति' इत्यादावकारस्य प्रवर्त्तते । 'अत एव' इत्यस्य परिभाषाभ्युपगमादेवेत्यर्थः । फलाभावं पर्यालोच्य परिभाषां प्रत्याचष्टे—'परे तु' इति । 'एकदेशिना' इति—वर्णग्रहणेऽनेतत्परिभाषायाः प्रवृत्त्यभावेन 'अभ्यश' इत्यादौ 'अपो भि' (७.४.४८) इत्यादेः प्रसक्तेन एनामाश्रित्य अङ्गाधिकारप्रत्याख्यानानुपपत्तेरस्यैकदेश्युक्तित्वमित्याशयः । 'वार्त्तिककृतोक्तम्' इति । भाष्यकृता च 'दिव उत्' (६.१.१३१) इत्यादा-

वादेशेषु दित्त्वमभ्युपगम्य प्रकृतवार्त्तिकं प्रत्याख्यातम्। न त्वेनां परिभाषाम्माश्रित्येत्यपि बोध्यम्।

'व्याख्यानात्' इति। 'वले' इत्यत्र 'संज्ञायाम्' (६.३.११७) इत्यनुवर्तनात् 'सनाशंस' (३.१.१६८) इत्यत्र प्रतिपदोक्तपरिभाषाबलाच्चेत्यर्थः। नन्वसत्यां परिभाषायां 'वसु स्रंसु' (८.२.७२) इत्यत्र प्रतिपदोक्तपरिभाषया वसुशब्दस्य वारणेऽपि स्रंस्वादिसाहचर्यात् 'वसु स्तम्भे' (धा.प. १२१४) इति पठितस्य देवादिकस्य धातोर्ग्रहणं दुर्वारम्। न च 'वसोः सम्प्रसारणम्' (६.४.१३१) इत्यत्र व्यनुबन्धकस्य क्वसोर्ग्रहणविघातायं 'विदेः शतुः' (७.१.३६) इति विहितस्य वसोः सकारानुबन्धासङ्गस्य भाष्यारूढत्वाद्दत्वविधौ 'वसुस्' (८.२.७२) इति निर्देशाद्धातोरेव ग्रहणमिति वाच्यम्। तथा सति क्वसोर्ग्रहणस्य दुर्लभतया 'सेदिवभ्वाम्' इत्यादौ दत्वानापत्तेः। न च 'क्वसुश्च' (३.२.१०७) इति विहितस्य क्वसोरपि सकारानुबन्ध आसज्यते, ततश्च दत्वविधावुभयोर्ग्रहणं सुलभमिति वाच्यम्। तदनुबन्धकपरिभाषया वसुस्ग्रहणे क्वसुसो ग्रहणस्य दुर्वचत्वात्। न च वसुसः सकारानुबन्धासञ्जनसामर्थ्येन प्रकृते तदनुबन्धकपरिभाषा बाध्यत इति वाच्यम्। एवमपि सम्प्रसारणविधौ तत्परिभाषया क्वसुसो ग्रहणस्य दुर्लभत्वात्।

न च 'विदेः शतुः' (७.१.३६) इत्यनेन निरनुबन्धकक्वसादेशविधानेऽपि स्थानिवद्भावेन ङित्त्ववदुगित्त्वस्यापि सिद्धावुकारानुबन्धकरणादेव क्वसोः सम्प्रसारणविधौ ग्रहणाविघात इति वाच्यम्। उकाराभावे दत्वविधौ क्वसोर्ग्रहणाविघातायं 'वसुस्' इति सान्तनिर्देशायोगात्। न चोच्चारणार्थोकारकरणेनापि कथञ्चिद्दत्वविधौ सग्रहणसिद्धौ तत्रेत्संज्ञायोग्यानुनासिकत्ववदुकारकरणेन तदुच्चारणे क्वसोरपि सम्प्रसारणविधौ ग्रहणार्थमेवेति वाच्यम्। उच्चारणार्थानामपि विनेत्संज्ञां निवृत्युपायाभावेनेत्संज्ञाया आवश्यकतया विशेषस्य दुर्वचत्वात्। क्वसोः सित्वे 'सिति च' (१.४.१६) इति पदत्वमादाय वसेः क्वसौ 'ऊषिवान्' इत्यादौ दीर्घत्वापत्तेश्चेति चेत्? न; 'विदेः शतुः' (७.१.३६) इति सूत्रस्थे भाष्यप्रामाण्येन वसोः क्विबन्तस्या-

नभिधानमित्याशयात् । तत्र हि भाष्ये 'विदेः शतुः' (७.१.३६) इति विहितस्य सम्प्रसारणविधौ क्वसोः सहग्रहणाविघातायै सकारानुबन्धासङ्गं आस्थितः । वसुधातोः क्विबन्तस्य सतश्च हि सम्प्रसारणविधौ तदनुबन्धकपरिभाषया वसुसः क्वसोर्वा ग्रहणस्य दुर्वचतया तदसङ्गतिः स्पष्टैव । एतेन 'मतुवसोरुः' (८.३.१) इत्यत्रापि धातोर्ग्रहणं स्यादित्यपि निरस्तमिति दिक् ।

केचित्तु प्रकृतभाष्यबलात्परिभाषास्वीकार एव युक्तः । अनभिधानब्रह्मास्त्रमादाय धातुग्रहणवारणे क्लेशात् । 'प्रेतचीवरवसास्वनोप्रया' इति कालिदासप्रयोगासङ्गतेश्च । एवञ्च 'वनो र च' (४.१.७) इत्यत्रापि न विवादः । तिति 'प्रत्ययग्रहणं कर्तव्यम्' इति वार्त्तिकन्तु 'गातिस्था' (२.४.७७) इतिसूत्रे पिबतेर्ग्रहणं कर्तव्यमिति लुग्विकरणपरिभाषाया इव प्रकृतपरिभाषाया अवयुत्यानुवादः । तत्प्रत्याख्यानपरञ्च भाष्यं तत्सूत्रे प्रकृतपरिभाषायाः प्रयोजनाभाव इत्यभिप्रायकमिति नास्ति कश्चिद्विरोध इत्याहुः ॥११०॥

ननु 'विपराभ्यां जेः' (१.३.१९) इत्यात्मनेपदं 'परा सेनां जयति' इत्यर्थके 'पराजयति सेनां' इत्यत्र प्राप्नोतीत्यत आह—

१११. सहचरितासहचरितयोस्सहचरितस्यैव ग्रहणम् ।

तेन विशब्दसाहचर्यादुपसर्गस्यैव पराशब्दस्य ग्रहणमिति तत्रैव भाष्ये स्पष्टम् । सहचरणञ्च सदृशयोरेवेति सहचरितशब्देन सादृश्यवानुच्यते । 'रामलक्ष्मणौ' इत्यादावपि सादृश्यमेव नियामकम् । सदृशयोरेव सहविवक्षा, तयोरेव सहप्रयोग इत्युत्सर्गाच्च । ध्वनितश्चेदं 'कर्मप्रवचनीययुक्ते द्वितीया' (२.३.८) इतिसूत्रे भाष्ये । तत्र हि 'पञ्चम्यपाङ्परिभिः' (२.३.१०) इतिसूत्रेण

लक्षणादिद्योतकपरियोगे पञ्चमीमाशङ्क्य, यद्यप्ययं परिर्दृष्टापचारो वर्जने चावर्जने चायं रवल्वपशब्दोऽदृष्टापचारो वर्जनार्थ एव कर्म-प्रवचनीयः। तस्य कोऽन्यः सहायो भवितुमर्हति, अन्यो वर्जनार्थात्। यथाऽस्य गोः सहायेनार्थ इति गौरेवानीयतें नाश्वो न गर्दभ इत्युक्तम्। तेन हि सदृशानामेव प्रयोगे सहायभावो बोधितः। 'द्वित्रिभ्यतुः' (८.३.४३) इतिसूत्रे साहचर्येणैव कृत्वोर्थस्य ग्रहणे सिद्धे कृत्वोर्थग्रहणादेषाऽनित्या। तेन 'दीधीवेवीटाम्' (१.१.६) इत्यत्र धातुसाहचर्येऽपि, आगमस्य इटो ग्रहणमित्यन्यत्र विस्तरः।

'विशब्दसाहचर्यात्' इति। यद्यप्यनुपसर्गोऽपि विशब्दः पक्ष्यादिवाची वर्तते, तथापि तस्य नियतपुल्लिङ्गतया सुप्रत्ययेन व्यवधानात्ततः परो जिघातुर्न सम्भवतीत्युपसर्गस्यैव तस्य ग्रहणमित्याशयः। यदि तु लक्षणप्रतिपदोक्तपरिभाषया टाबन्तस्य लाक्षणिकत्वादुपसर्गस्यैव 'पराशब्दस्य ग्रहणमित्युच्यते, तदा नास्तीह प्रकृतपरिभाषायाः प्रयोजनमिति फलान्तरमन्वेष्टव्यं, परन्तु भाष्यानुसारादेवमुक्तम्।

तदूच्चनयन्नाह—'भाष्ये स्पष्टम्' इति। ननु साहचर्यस्याभिधानियामकत्वादेतत्परिभाषायास्सिद्धिः। तस्याभिधानियामकत्वञ्चाभियुक्तैरुक्तम्—

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः[1]॥" इति।

---

१. वाक्यपदीयम्।

साहचर्यं = सहचरणम् । तच्च प्रसिद्धमेव लोके अभिधानियामकत्वेन दृश्यते, यथा 'रामलक्ष्मणौ' इत्यादौ । विपराशब्दयोस्तूपसर्गयोर्न क्वचिदन्यत्र सहचरणं दृष्टम् । 'अतः' कथमनया परिभाषया व्यवस्था स्यात्तत्राह—'सहचरणम्' इत्यादि । 'सादृश्यमेव' इति । समभिव्याहृतपदार्थनिरूपितं सादृश्यमेवानेकार्थेषु अर्थविशेषप्रतीतिनियामकं, न तु सहचरणमिति भावः । अभियुक्तकारिकायामपि साहचर्यशब्देन सादृश्यमेव विवक्षितमिति न क्षतिः । युक्तिसिद्धत्वेऽपि प्रमाणविरुद्धत्वादयुक्तोऽयमर्थ इत्यत आह—'ध्वनिश्चेदम्' इति । 'परिर्दृष्टापचारः' इति । परिशब्दः वर्जनावर्जनयोरुभयोरपि दृष्टव्यवहारः । अपशब्दस्तु वर्जनार्थ एव दृष्टव्यवहार इत्यर्थः ।

'बोधितः' इति । एवञ्च विशब्दसादृश्यात्परशब्दोऽपि प्रकृतपरिभाषयाऽत्रोपसर्ग एव प्रत्याय्यत इति न काऽप्यनुपपत्तिरित्याशयः । 'कृत्वोर्थग्रहणात्' इति । 'द्वौ त्रीन्वा सुनोति' इति 'द्विसुती, त्रिसुती' ताभ्यामाचक्षाणण्यन्ताभ्यां क्विपि कृत्वे 'वोः' (८.२.७६) इति दीर्घे विसर्गे च न 'द्विस्त्रिः' इति रूपसम्भव इत्याशयः ॥१११॥

नतु 'अस्थिदधि' (७.१.७५) इत्यनङ् 'प्रियसक्थ्ना ब्राह्मणेन' इत्यत्र न स्यात् ; अङ्गस्य नपुंसकत्वाभावादत आह—

११२. श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान् ।

श्रुतेनैव सम्बन्धो नानुमितेन प्रकरणादिप्राप्तेनेत्यर्थः । प्रकरणादितः श्रुतेर्बलवत्त्वादिति भावः । एवञ्च तत्र लिङ्गमस्यादीनामेव विशेषणं, नाङ्गस्य । शिशीनुम्विधिषु तु गृह्यमाणस्याभावात्प्रकरणप्राप्ताङ्गस्यैव विशेषणम् । अत एव 'वा नपुंसकस्य' (७.१.७९) इतिसूत्रे 'वा शौ' इति न कृतम् । तत्रा नपुंसकग्रहणं हि गृह्यमाणस्य शत्रन्तस्यैव नपुंसकत्वे यथा स्यात्, 'बहवो ददतो येषु तानि कुलानि 'बहुददती' इत्यत्र मा भूत्, बहूनि

ददन्ति येषु ते 'बहुददन्तः' इत्यत्र यथा स्यादित्येवमर्थम्। स्पष्टश्चेदं 'स्वमोर्नपुंसकात्' (७.१.२३) इत्यत्र भाष्ये। केचित्तु 'अचो रहाभ्यां द्वे' (८.४.४६) इत्यत्र श्रुतेन रेफस्य निमित्तत्वेन यरन्तर्भावादनुमितं कार्यित्वं बाध्यत इत्येतदुदाहरणमाहुः तन्न; तक्रकौण्डिन्यन्यायेन सिद्धेरित्यन्यत्र विस्तरः।

यद्यप्यस्यां परिभाषायां वाच्यवृत्त्या नियमो न प्रतीयते तथापि कथञ्चित्फलविधया प्रतीयत इति नियमप्रतिपादिकानां परिभाषाणां मध्ये उपन्यासः। तदभ्युपगमयन्नाह—'श्रुतेनैव' इति। श्रुत्यपेक्षया लिङ्गस्य दुर्बलत्वान्न्यायसिद्धेयम्। तदुक्तं जैमिनीये—श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्' इति। 'लिङ्गमस्थ्यादीनाम्' इति। तत्फलमाह गमहन इति किप्रत्ययान्तत्वेन व्युत्पादिते विशेष्यनिघ्ने दधिशब्दे स्त्रीपुंसयोरनङादेशाप्रवृत्त्यभावः। यदि तु 'योगाद्रूढिर्बलीयसी' इति नियतनपुंसकस्य क्षीरविकारवाचिन एव ग्रहणमित्युच्यते तदा स्त्रीपुंसयोः क्वचित्सङ्केतितानां तेषामनङ्निवृत्तिरुत्तरत्रानुवृत्तिरेव वा तत्फलमिति बोध्यम्। न्यायसिद्धस्याप्यर्थस्य न केवलं लक्ष्यानुरोधादेवात्र शास्त्रे स्वीकारः, किन्तु प्रमाणबलादपीत्याह—'अत एव' इति। अनुवर्तमानः ज्ञाता सूत्रशेषभूतत्वाच्छ्रुतः अधिकारस्तु प्रकरणप्राप्तत्वादनुमित इत्यभिसन्धिः। 'भाष्ये' इति। तत्र हि शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं नपुंसकान्तादङ्गात् इति शब्दग्रहणमुत नपुंसकत्वविशिष्टबोधकादङ्गादित्यर्थग्रहणमित्येवं विकल्प्य, उभयथा दोषे प्रदर्श्य व्यवस्थापितम्। नन्वनेनासन्निधानेनार्थग्रहणेन भवितव्यम्। न हि नपुंसकं नाम शब्दोऽस्ति, किन्तर्हि ? लक्ष्यते अस्थ्यादिषु शब्दग्रहणमिति। अत्रापि अर्थग्रहणमेव तन्त्रितावान्सन्देहः। क्व प्रकृतस्यार्थो विशेष्यते क्व गृह्यमाणस्य ? इति। शिशीलुङ्नुम्विधिषु प्रकृतस्यार्थो विशेष्यते। 'अस्थ्यादिषु गृह्यमाणस्य' इति। तेनैषा परिभाषा ध्वन्यत इत्याशयः।

यद्यपि विशेषणविशेष्यभावे कामचारात् 'शिशीलुङ्नुम्विधिषु नपुंसकग्रहणमङ्गविशेषणमस्थ्यादिषु गृह्यमाणस्येति चेदन् इयं परिभाषा कैयटो नापेक्षत।

तथापि कामचारस्य लक्ष्यानुरोधे पर्यवसन्नतया, ततो वा परिभाषाश्रयण-मित्युपाध्यायाशयः। नन्वेवंतत्परिभाषाश्रयणे 'मिदेर्गुणः' (७.३.८२) इत्यादौ लिङ्गेनानुमितस्य इक इत्यस्य गुणादिना सम्बन्धायोगाद्विधेयस्यान्यादेश-त्वप्रसङ्ग इति चेत्? न; 'मिद इर्मिदिस्तस्य मिदेः' इति तच्छेषपक्ष-समर्थनपरभाष्यकारीयव्याख्यानेनादोषात्। न च 'सार्वधातुकार्धधातुकयोः' (७.३.८४) इत्यत्रानेन न्यायेन प्रकरणप्राप्ताङ्गापेक्षया प्रबलस्य लिङ्गप्राप्तस्यैव क इत्यस्य विधेयनिमित्ताभ्यां सम्बन्धः स्यात्। 'अङ्गस्य' इत्यस्य च वैयाधिकरण्येन श्रुताभ्यां निमित्तभूतसार्वधातुकार्धधातुकाभ्यामेव सम्बन्धः स्यात्, इत्थञ्च अङ्गावयवसार्वधातुकाव्यवहितपूर्वस्य 'इको गुण' (१.१.३) इत्यर्थे 'भवति' इत्यादौ शबादिनिमित्तकत्वेन गुणप्रवृत्तावपि 'करोति, सुनोति' इत्यादौ तिङ्प्रत्ययस्याङ्गावयवत्वाभावाद् गुणो दुर्लभ इति वाच्यम्। 'नित्यं करोतेः' (६.४.१०८), 'उरुप्रसर्गात्सुनोति' (८.३.६५) इत्यादिनिर्देशबलेन तदंशे प्रकृतपरिभाषाया अप्रवृत्तिकल्पनेनादोषात्। यत्र तूभयं श्रुयते, तत्र प्राधान्येन व्यवस्था, यथा—'विभाषा सपूर्वस्य' (४.१.३४) इत्यत्र 'अनुप-सर्जनात्' (४.१.१४) इति 'सपूर्वस्य' इत्यनेन सम्बध्यते, न तु पतिशब्दे-नेति। पतिशब्दस्योपसर्जनत्वेऽपि दृढपत्नीत्यादावादेशसिद्धिरिति दिक्।

'तक्रकौण्डिन्यायेन' इति। किञ्चैतादृशे विषये प्रकृतन्यायस्याप्रवृत्ति-रेव युक्ता। अन्यथा 'लोपः शाकल्यस्य' (८.३.१९) इत्यत्र यकारवकारयोः साक्षाच्छ्रुतेन कार्यित्वेन प्रत्याहारादनुमितस्य निमित्तत्वस्य बाधे 'देवा यन्ति' इत्यादौ लोपानापत्तिः। 'ऊर्णायाः युस्' (५.२.१२३) इति निर्देशात्, ज्ञापकसाजात्याच्च प्रकृतशास्त्रे तादृशन्यायस्य विशेषणविशेष्यभावमात्र-विषयकताया एवौचित्याच्चेत्यलम् ॥११२॥

ननु 'तत्पुरुषे तुल्यार्थ' (६.२.२) इति स्वरः, 'परमेण कारकेण, परमकारकेण' इत्यादौ स्यात्; तथा 'गातिस्थाघुपा-भूभ्यः' (२.४.७७) इति लुक्, पै ओ वैशोषणः' इत्यतः कृतत्वा-त्परस्यापि स्यादत आह—

१११. लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ।

लक्षणं लाक्षणिकमुपचारात् । तत्तद्विभक्तिविशेषाद्यनुवादेन विहितो हि समासादिः प्रतिपदोक्तः, तस्यैव ग्रहणं शीघ्रोपस्थितिकत्वात् । द्वितीयो वा विलम्बोपस्थितिकः । 'पै' इत्यस्य 'पा' इति रूपं लक्षणानुसन्धानपूर्वकं विलम्बोपस्थितिकम् । पिबतेस्तु तच्छीघ्रोपस्थितिकम् । इदमेव हर्यतत्परिभाषाबीजम् । इयञ्च वर्णग्रहणेऽपि 'ओतः' (१.१.१८) सूत्रे भाष्ये सञ्चारितत्वात् । यत्तु वर्णग्रहणे नेषा 'आदेचः' (६.१.४५) इत्यत्रोपदेशग्रहणादिति । तत्त तस्मिन्नेव सूत्रे शब्देन्दुशेखरे दूषितमिति तत एव द्रष्टव्यम् । अनित्या चेयं 'भुवश्च महाव्याहृतेः' (८.२.७१) इति महाव्याहृतिग्रहणादित्यन्यत्र विस्तरः ।

लक्षणशब्दस्याशआदित्वकल्पनेऽपि लक्षणापेक्षया लाघवं दुर्निरूपमित्यशयेनाह—'उपचारात्' इति । यत्र शास्त्रे विशिष्यनिमित्तत्वेनोपादीयते यो विभक्त्यादिस्तद्बोधकपदघटितशास्त्रबोधितः समासादिः तत्र प्रतिपदोक्तः । यथा 'तत्पुरुषे तुल्यार्थ' (६.२.२) इत्यत्र निमित्तत्वेन गृह्यतेतृतीयादिविभक्तिर्बोधकतृतीयादिपदघटितसूत्रविहितस्तृतीयातत्पुरुषादिः प्रतिपदोक्तस्ततोऽन्यः कर्मधारयादिर्लाक्षणिकः । तथा यस्य स्वरूपनिष्पत्तिर्लक्षणान्तरं नापेक्षते, तत्प्रतिपदोक्तं, यथा पानार्थकः पाधातुः । शोषणार्थकस्तु 'आदेचः' (६.१.४५) इत्यात्वेन निष्पन्नत्वात्तद्विपरीत इति लाक्षणिकः । एवमुभयथा प्रत्येकं प्रतिपदोक्तं लाक्षणिकञ्च । विनिगमनाविरहाच्च परिभाषायामुभयविधमप्युभयं गृह्यते । शीघ्रोपस्थितिकत्वविलम्बोपस्थितिकत्वयोः परिभाषानिदानभूतयोरुभयत्र तुल्यत्वात् । तदेतत्सकलमभिप्रेत्याह—'तत्तद्विभक्ति' इत्यादि । अवतारितञ्च प्रागुभयथा ।

वर्णग्रहणेष्वस्या: परिभाषाया अप्रवृत्तिमभीप्सतां प्राचां मतं दूषयितुमाह—'वर्णग्रहणेऽपि' इति। 'ओत्सूत्रे भाष्ये' इति। तत्र हि 'अदोमवत्', 'पुरोभवत्' इत्यत्र 'ओत्' (१.१.१९) सूत्रेण प्राप्ता प्रगृह्यसंज्ञा प्रकृतपरिभाषया परिहृता। वर्णग्रहणेष्वस्या अप्रवृत्तौ हि तदसङ्गतिरेव। किञ्चास्य प्राचीनापन्नादृस्य प्रमाणमेव दुर्लभमित्याह—'यत्तु' इत्यादि। 'उपदेशग्रहणात्' इति। अयमत्र प्राचीनानामाशयः। 'लिटि धातोः' (६.१.८) इत्यतो धातुग्रहणमनुवर्त्य धातोरेजन्तस्यात्वमित्यर्थेन 'गोभ्यां, नौभ्याम्' इत्यादिवित्वव्यावृत्तेरुपदेशग्रहणं 'अचैषीत्, अस्तौषीत्' इत्यादाघात्ववारणाय लाक्षणिकत्वेन तत्र तद्वारणवैयर्थ्याद्वर्णग्रहणेष्वस्या अप्रवृत्तौ ज्ञापकमिति।

'दूषितम्' इति। धातुग्रहणानुवृत्तेः 'अणिञोः' (४.१.७८) इति सूत्रस्थभाष्यकारानभिप्रेतत्वात्, तदनुवृत्तौ चानुबन्धविनिर्मुक्तस्यैव धातुसंज्ञेति 'न धातुलोप:' (१.१.४) इति सूत्रभाष्यारूढत्वात् 'उदीचामाङ:' (३.४.१९) इति निर्देशानुपपत्तेश्च 'गोभ्याम्' इत्यादावात्ववारणायावश्यकस्योपदेशग्रहणस्य निरुक्तार्थज्ञापकत्वानुपपत्तिरूपदूषणेनेत्यर्थ:। नन्वेवं घेट आत्वस्य लाक्षणिकत्वात् 'स्थापयति' इत्यादौ पुगागमो न स्यादत आह—'अनित्या चेयम्' इति। 'महाव्याहृतिग्रहणम्' इति। तच्च 'भुव:' इति निपातस्य निरूढं नाम। मूशब्दप्रकृतिकञ्चबन्तस्य ङबन्तस्य च लाक्षणिकस्य व्यावृत्तये क्रियमाणम्, तदस्या: परिभाषाया अनित्यत्वे प्रमाणमित्याशय:। लक्ष्यानुरोधादस्या: परिभाषाया: प्रवृत्तितदभावौ वर्णग्रहणे विशिष्टग्रहणे च, न तु विशिष्टग्रहणे वृत्तिर्वर्णग्रहणे प्रवृत्त्यभाव इत्यनुगमसम्भव:। प्रमाणविरोधादिति तत्त्वम् ॥११३॥

नन्वेवं देङो दोधातोश्च कृतात्वस्य घुसंज्ञा न स्यात्, तथा मेङ आत्वे 'प्रणिमाता' इत्यादौ 'नेर्गदनद' (८.४.१७) इति णत्वं न स्यात्, तथा 'गै' इत्यस्यात्वे 'घुमास्था' (६.४.६६) इतीत्वं न स्यादत आह—

११४. गामादाग्रहणेष्वविशेषः ।

अत्र ज्ञापकं दैपः पित्वम्, तद्धि 'आदाप्' (१.१.२०) इति सामान्यग्रहणार्थम्। अन्यथा लाक्षणिकत्वादेव विधौ तदग्रहणे सिद्धे किं निषेधे सामान्यग्रहणार्थेन पित्त्वेन ? तेन चैकदेशानुमतिद्वारा सम्पूर्णपरिभाषा ज्ञाप्यते। इयञ्च लक्षणप्रतिपदोक्तपरिभाषानिरनुबन्धकपरिभाषालुग्विकरणपरिभाषाणां बाधिका 'दाधघ्व' (१.१.२०) इतिसूत्रे भाष्ये स्पष्टा। 'गातिस्था' (२.४.७७) इतिसूत्रे इणादेशगाग्रहणमेवेष्यत इत्यन्यत्र विस्तरः।

अपवादत्वादत्रैतस्याः परिभाषायाः उपन्यासः गामादाग्रहणेषु सामान्यमेव गृह्यते, न तु विशेषोपस्थापकपरिभाषाभिर्विशेष इत्यर्थः। 'इयञ्च' इत्यादि। तत्र घुसंज्ञायां दाग्रहणे लक्षणप्रतिपदोक्तपरिभाषायास्तदनुबन्धकपरिभाषायाश्च बाधनम्। तेन दीङ् देङ् दो दाजां चतुर्णां ग्रहणम्। 'नेर्गदे' (८.४.१७) इत्यत्र लक्षणप्रतिपदोक्तपरिभाषाया एव बाधनं मेङो ग्रहणाय, न तु लुग्विकरणपरिभाषायाः 'मा माने' (धा. पा. १०६२) इत्यस्य तत्र 'माङ्' इति पठित्वा व्यावर्तनीयत्वात्। 'घुमास्था' (६.४.६६) इत्यत्र गाग्रहणे तिसृणामपि परिभाषाणां बाधनाल्लाक्षणिकस्य गैधातोरिङो गाङः सानुबन्धकस्य लुग्विकरणस्य च ग्रहणमित्यादि स्वयमूहनीयम्। नन्वेवं 'गातिस्था' (२.४.७७) इत्यत्र गैधातोः कृतात्वस्य ग्रहणं दुर्वारम्। अत आह—'गातिस्था' इति। 'गास्था' इति पठितव्ये 'गाति' इति लुग्विकरणनिर्देशात्तस्यैव ग्रहणमित्याशयः।

ननु वृद्ध्यादिसंज्ञाः समुदाये स्युरत आह—

११५. प्रत्येकं वाक्यपरिसमाप्तिः ।

'देवदत्तादयो भोज्यन्ताम्' इत्यत्र भुजिवत्। नन्वेवं संयोगसंज्ञा, समाससंज्ञा, अभ्यस्तसंज्ञापि प्रत्येकं स्युरत आह—

११६. क्वचित्समुदायेऽपि।

'गर्गाः शतं दण्ड्यन्ताम्, अर्थिनश्च राजानो हिरण्येन भवन्ति' इत्यादौ दण्डनवत्। लक्ष्यानुरोधेन च व्यवस्था।

'लक्षणप्रतिपदोक्तयोः' (प. ११३) इत्यस्य न्यायसिद्धतया तत्साधर्म्यादत्रैतस्या उपन्यासः। वाक्यपरिसमाप्तिर्वाक्यजन्यबोधीयोद्देश्यताविश्रान्तिः; 'भुजिवत्' इति षष्ठ्यन्ताद्वतिः। तथा च लोके विधेयभूतभुजिक्रियानिरूपितोद्देश्यतापरिसमाप्तिर्यथा प्रत्येकं देवदत्तादिषु, तथा प्रकृतशास्त्रे वृद्ध्यादिसंज्ञानिरूपितोद्देश्यताया अप्यादैजादिषु प्रत्येकमेव परिसमाप्तिः। अभ्यस्तसंज्ञादौ तु समुदाये तत्परिसमाप्तिर्गर्गदण्डनन्यायात्। 'गर्गाः शतं दण्डयन्ताम्' इत्यत्र हि वाक्यशेषबोधितप्राधान्यवृत्तेः शतस्याप्रधानगर्गानुरोधेनावृत्त्ययोगात्समुदाय एव दण्डनक्रियानिरूपितोद्देश्यताविश्रान्तिः। लक्ष्यानुरोधादनयोर्व्यवस्था। संयोगसमाससंज्ञयोस्तु 'संयुज्यन्ते वर्णा अत्र संयोगः', 'समस्यन्ते पदान्यत्र समासः' इत्येवमन्वर्थसंज्ञानादव्युत्क्रार्थलाभ इति सर्वमनवद्यम् ॥११५, ११६॥

ननु 'यू स्त्याख्यौ' (१.४.३) इत्यत्र व्यक्तिपक्षे दीर्घनिर्देशादनण्त्वेन ग्राहकसूत्राप्राप्तोदात्ताद्यन्यतमोच्चारणेऽन्यस्वरैकस्य संज्ञा न स्यादत आह—

११७. अभेदका गुणाः।

असति यत्ने स्वरूपेणोच्चारितो गुणोऽभेदको न विव-

क्षित इत्यर्थः । अत्र च 'अस्थिदधि' (७.१.७५) इत्यादावनाङ्देरुदात्तस्यैवोच्चारणेन सिद्धे उदात्तग्रहणं ज्ञापकम् । 'स्वरूपेणोच्चारितः' इत्युक्तेरनुदात्तादेः 'अन्तोदात्तात्' (६.१.१६१) इत्युदात्तादिशब्दोच्चारणे विवक्षैव । 'ऊष्माः, ऊं' इत्यत्र निरनुनासिक एवोच्चारणीये यत्नाधिक्येनानुनासिकोच्चारणाद्विवक्षा बोध्या । 'पथिमथ्यृभुक्षाम्' (७.१.८५) इत्यादौ स्थान्यनुरूपतयाऽनुनासिक एवोच्चारणीये निरनुनासिकोच्चारणात्तद्विवक्षा ।

संज्ञाविषयकविशेषनिर्णायकत्वमिह सन्दर्भहेतुः । 'असति यत्ने' इति । गुणराहित्येनोच्चारणायोगाद्धान्यपलालन्यायेन केनचिद्गुणेनोच्चारितोर्थो वर्णव्यक्तावुपलभ्यमानो गुणः, तद्व्याप्यकोटौ न प्रविशतीति पर्यवसितोऽर्थः । स्वरूपेणोच्चारितत्वञ्च श्रावणज्ञानविषयवर्णवृत्तित्वम् । गुणत्वञ्च सजातीयवर्णनिष्ठभेदप्रतियोगितावच्छेदकत्वे सति विजातीयवर्णवृत्तित्वम् । साजात्यमुच्चारणकालेन । वैजात्यन्तु स्थानेनेति बोध्यम् । यथा अनुनासिकह्रस्वाकारसजातीयनिरनुनासिकतादृशाकारनिष्ठो यो भेदस्तत्प्रतियोगितावच्छेदकत्वं विभिन्नस्थानकेकारादिवर्णवृत्तित्वं चास्तीत्यानुनासिक्यं गुणः । विभिन्नस्थानजन्येकारादिवृत्तिह्रस्वत्वादेर्गुणत्ववारणाय सत्यन्तम् । परस्परवृत्तिसमानकालैवदेकारादिभेदीयप्रतियोगितावच्छेदकीभूतानामत्वादीनां गुणत्ववारणाय विशेष्यदलम् ।

'यत्नाधिक्येन' इति । एकस्थानसाध्यवर्णोच्चारणादनेकस्थानसाध्यवर्णोच्चारणे क्लेशजनकं यत्नाधिक्यमनुभवसिद्धमित्याशयः । 'अनुदात्त एवोच्चारणीये' इति । ननूदात्तानुदात्तयोरुच्चारणे को विशेषः । न च 'स्थानेऽन्तरतम'(१.१.५०)परिभाषाप्रवृत्तिप्रवृत्तिभ्यां विशेष इति वाच्यम् । अनुदात्तस्य स्थान्यनुरूपस्योच्चारणेऽप्यनया परिभाषया तद्विवक्षणे सर्वेषामेव प्रसक्तौ 'स्थानेन्तरतम'(१.१.५०)परिभाषाप्रवृत्तिमन्तरा निर्वाहाभावादिति चेत् ? न; ईदृशविषये 'स्थानेन्तरतम'(१.१.५०)परिभाषाप्रवृत्तिप्रयुक्तफलाभावसम्भावनया प्रकृतपरिभाषाया अप्रवृत्तौ फलाभावादेव, पक्षात्तस्या अप्रवृत्तेर्नियामकत्वेन लाघवात् ।

एतदर्थमेव 'अस्ति यत्ने' इत्युक्तम्। न चैवं अस्ध्यादीनां 'नब्विषयस्य' (फि.सू.२.२६) इत्याद्युदात्ततयान्त्यादेशस्यानङः स्थान्यनुरूपे अनुदात्त एवोच्चारणीये उदात्तोच्चारणं विवक्षार्थं भविष्यतीति, कथमस्य ज्ञापकत्वमिति वाच्यम्। परमास्थि-शब्दादावन्तोदात्त उदात्तगुणकस्यापि स्थानित्वेन विवक्षायां मानाभावात्। , चतसर्यादावुदात्तनिपातनं करिष्यते, वदादेश्च आद्युदात्तनिपातनं करिष्यते 'पदाद्वयोऽन्तोदात्ता निपात्यन्ते, 'सहस्य सः' (६.३.७८) उदात्तो निपात्यते इत्यादि. सांप्रतिक-कश्चित्या अष्टाध्यायीपाठे क्वचिदाद्युच्चारणं विवक्षार्थमित्याशयेन। 'नैस्वर्येण पाठः' इति पक्षे तु ज्ञापकपरं भाष्यमिति कैयटादयः।

'परमास्थिशब्दादौ' इति। तत्र सप्तमिशिष्टं समासान्तोदात्तत्वम्। 'नब्विषयस्य' (फि.सू. २.२६) इति चाखण्डप्रातिपदिकविषयं ज्ञापन-परभाष्यप्रामाण्यादित्याशयः। ननु ज्ञापनोपपत्त्यर्थमष्टाध्याय्यास्त्रैस्वर्येण पाठ इत्यवश्यमभ्युपेयम्। अन्यथा ह्यकश्रुत्या पाठेन सिद्धावुदात्तोच्चारणं विवक्षार्थं सम्पद्यत इत्युदात्तग्रहणस्य स्वांशे चारितार्थ्यायोगात्तदनुपपत्तिरेव। एवञ्च तत्र यदुच्यते, भाष्यकारैरुदात्तनिपातनं करिष्यत इत्यादि, तद्विरुद्धं स्यादत आह—'चतसर्यादावुदात्तनिपातनम्' इत्यादि। 'इति पक्षे तु' इति। एवञ्च ज्ञापनपरभाष्येऽप्रामाण्यादुदात्तनिपातनपरभाष्यप्रामाण्याच्च। पक्षद्वयमपीदं भाष्यकाराभिमतमिति भावः। 'इदमन्ये तु' इत्यादिना वृद्धिसूत्रे कैयटे स्पष्टम्। तदाह 'कैयटादयः' इति।

परे तु निपातनं नामान्यादृशे प्रयोगे प्राप्तेऽन्यादृशप्रयोग-करणं, तद्रूपाद्यत्तात्तत्र तत्रोदात्तत्वादिविवक्षा। 'तिसृचतसृ' (७.२.९९) इत्यत्र द्वन्द्वप्रयुक्तेऽन्तोदात्ते उच्चारणीये आद्युदात्तो-

च्चारणमन्यत्र स्थान्यनुरूपे स्वर उच्चारणीये तत्तदुच्चारणं विवक्षार्थम्। सम्पूर्णाष्टाध्याय्याचार्यणैकश्रुत्या पठितेत्यत्र न मानम्। क्वचित्पदस्यैकश्रुत्यापि पाठो यथा 'दाण्डिनायना'दि(६.४.७४) सूत्रे 'ऐक्ष्वाक' इति। यद्यप्यध्येतार एकश्रुत्यैवाङ्गानि पठन्ति ब्राह्मणवत्, तथापि व्याख्यानतोऽनुनासिकत्वादिवदुदात्तनिपादनादिज्ञानमित्याहुः। विधेयविषये त्वप्रत्यय इति निषेधान्न गुणभेदकत्वेन सवर्णग्रहणम्। अत एव 'घटवत्' इत्यादौ मतोर्मस्य नानुनासिको वकारः। अत एव 'तद्वानासाम्' (४.४.१२५) इति सूत्रनिर्देशः। अन्यथा 'प्रत्यये भाषायाम्' (वा. ९५५.८.४.४५) इति नित्यमनुनासिकः स्यात्। जातिपक्षे तु नास्योपयोग इति बोध्यम्। 'यू' इत्यादौ दीर्घमात्रावृत्तिजातिनिर्देशान्न क्षतिरित्यन्यत्र विस्तरः॥

'परे तु' इति। इदमपि तत्रैव सूत्रे कैयटे स्पष्टम्। 'अन्यत्र स्थान्यनुरूपे' इति। 'वध' इत्यत्र स्थान्यनुसारेण प्रातिपदिकस्वरेण च अन्तोदात्ततया निर्देष्टव्ये आद्युदात्तनिर्देशो विवक्षार्थः। ननु 'सहस्य सः' (६.३.७८) इत्यत्र प्रातिपदिकस्वरेणोदात्तत्वस्य न्याय्यतया कथं विवक्षार्थं स्यादिति चेत्? न; 'तिरसस्तिर्यलोपे' (६.३.९४) इत्यादाविव अनुकार्यानुकरणयोरभेदविवक्षया प्रातिपदिकत्वाभावेन निर्देशे फिट्स्वराप्राप्त्या स्थान्यनुरूपस्वरितनिर्देशेनापि सिद्धौ भेदविवक्षामूलकोदात्तनिर्देशो विवक्षार्थ इत्याशयात्। 'न मानम्' इति। 'अनुदात्त'(७.१.७९) इति उदात्तग्रहणं तथा पाठे व्यर्थमित्यपि बोध्यम्। 'क्वचित्' इति। भाष्यकारैरुक्त इति शेषः।

'ऐक्ष्वाक' इति। क्षत्रियवाचकादपत्यार्थे 'जनपदशब्दात् क्षत्रियात्' (४.१.१६८) इत्यञि, आद्युदात्तस्य देशवाचकात् जातार्थे (?कोपधात्

(४.२.१३२) इत्यणि, अन्तोदात्तस्य च स्वरभेदादेकोक्त्या तयोरुकार-लोपार्थं निपातनासम्भवादुभयसङ्ग्रहार्थमेकश्रुत्या निपातनमाश्रितं भाष्य-कारैरुपायान्तरत्वेन। प्रकृतपरिभाषयाऽपि सिद्धेः। एवञ्च सर्वत्रैकश्रुत्या पाठे विशेषेण तत्र तथाभिधानमसम्बद्धं स्यादिति भावः। यत्तु स्वरस्य रूपत्वाभावो भाष्यारूढ इति स्वरभेदस्य सारूप्यविघटकत्वाभावादेकशेषेण द्वयोर्निपातनं सम्भवतीति व्यर्थमेकश्रुत्याश्रयणमित्याहुः? तदसत्; एकशेषे सत्येव द्वयोरप्युकारलोपनिपातनम्। तस्मिंश्च सत्येव सारूप्या-देकशेषप्रवृत्तिरित्यन्योन्याश्रयात्। 'अप्तृन्' (६.४.११) इत्यत्र तु तृशब्दे तृनतृचोर्भिन्नस्वरयोर्ग्रहणमेकशेषेण एकश्रुत्या प्रकृतपरिभाषया वेति नास्ति कश्चिद्विशेषः।

'विधेयविषये' इति। अत्र यदुक्तव्यं तद्भाव्यमानपरिभाषायामुक्तम्। 'नास्योपयोगः' इति। गुणाभेदकत्वस्य वर्णग्रहणेष्वनुपयोग इत्यर्थः। ननु जातिपक्षे 'यूस्त्याख्यौ' (१.४.३) इत्यादौ ह्रस्वस्यापि ग्रहणं स्यादत आह—'दीर्घमात्रवृत्ति' इति। दीर्घनिर्देशबलात्तन्मात्रपर्याप्तैव तत्तज्जाति-राश्रीयत इत्यभिसन्धिः ॥११७॥

ननु 'सर्वनामानि' (१.१.२७) इत्यत्र णत्वाभावनिपा-तनेऽपि लोके सणत्वप्रयोगस्य साधुत्वं स्यादत आह—

११८. बाधकान्येव निपातनानि।

तत्तत्कार्यं नाप्ते निपातनारम्भात्। 'पुराणप्रोक्तेषु' (४.३.१०५) इति निपातितपुराणशब्देन पुरातनशब्दस्य बाधः प्राप्तोऽपि पृषोदरादित्वान्नेति बोध्यम्। पुराणेति पृषोदरादिः, 'पुरातन' इति चेत्यन्ये। इयं 'सर्वादि' (१.१.२७) सूत्रे भाष्ये स्पष्टा। 'अबाधकान्यपि निपातनानि' (पु.प.वृ.९९) इति भाष्यविरुद्धम्।

संज्ञाप्रवृत्तिविषयकविशेषनिर्णायकपरिभाषानिरूपणप्रस्तावे तथाभूतशब्दस्वरूपगतसाधुत्वनियामकपरिभाषाया अप्युपस्थितेर्न्याय्यत्वादत्रैतत्परिभाषाया उपन्यासः। 'नाप्राप्ते' इति। यथा कप्रत्यये नाप्राप्ते 'विशेषणाव्ययसर्वनाम्नाम्' (५.३.७१) इत्यकच्प्रत्ययारम्भः, तथा 'सर्वनामानि' (१.१.२७) इत्यत्र 'पूर्वपदात्संज्ञायामगः' (८.४.३) इति णत्वे नाप्राप्ते तदभावनिपातनारम्भः। एतच्च निपातनमपि वचनवदपवाद एवेत्युत्सर्गस्य नित्यबाधक एवेत्याशयः।

परिभाषादोषं परिहरति—'पुराणप्रोक्तेषु' इति। 'पृषोदरादित्वात्' इति। पुरातनशब्दे निपातनात्प्राप्तस्तकारलोपः पृषोदरादिपाठबलात्पक्षे न भवतीत्यर्थः। 'अन्ये' इति। पृषोदरादिषु पुराणपुरातनशब्दयोः पृथक्पाठेनोभयसिद्धयाऽन्यत्र निपातनक्लेशो नास्तीत्यत्र पक्षे लाघवं बोध्यम्। 'अबाधकान्यपि निपातनानि' इति। इदमेतादृशप्रयोगसंरक्षणार्थं वृत्तिकारादिभिरभ्युपगतम्। 'भाष्यविरुद्धम्' इति। 'सर्वादि'(१.१.२७)सूत्रस्थभाष्यविरुद्धमित्यर्थः। तत्र हि 'बाधकान्येव निपातनानि' इत्युपक्रम्य व्यवस्थापितम्। इहान्ये वैयाकरणाः समस्तते विभाषा लोपमारभन्ते 'समो वा हितततयोर्वा' इति। सहितं, संहितम्, सततं, सन्ततम्। इह भवान्निपातनाल्लोपमिच्छति। 'अपरस्परा: क्रियासातत्ये' (६.१.१४४) इति यथाप्राप्तश्च 'सन्ततम्' इति चेन सिद्ध्यति। कर्तव्योऽत्र यत्नः 'बाधकान्येव निपातनानि भवन्ति (प. ११८) इति।

'लुम्पेदवश्यमः कृत्ये तुङ्कामम्मनसोरपि' इति पृषोदरादिश्लोके 'समो वा हिततततयोः' इति पठनीयम्। तेनवात्र मकारलोपः, न तु निपातनादिति तदाशयः। इत्थं स्पष्ट एव भाष्यविरोधो वृत्तिकारादीनाम्। 'लुबविशेषे' (४.२.४) इत्यनेन प्राप्तस्य लुपो विभाषा 'फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः' (५.२.६०) इति निर्देशबलात्पौर्णमास्यां ज्ञाप्यमानो निषेधः, तत्रैव सूत्रे 'श्रवण' इति निर्देशबलादनित्य इति ज्ञाप्यते। तेन श्रावणीसिद्धिर्निर्बाधा। 'अतिशायने तमबिष्ठनौ' (५.३.५५) इति सूत्रे दीर्घनिपातनबलादतिशयनशब्दस्य तदर्थे साधुत्वाभाव एवेत्याहुः ॥११८॥

ननु उखधातोर्दित्वे स्वत एव ह्रस्वत्वात्पूर्वमभ्यासह्रस्वात्वाप्रवृत्तौ हलादिशेषे सवर्णदीर्घे ह्रस्वापत्तिरत आह—

११९. पर्जन्यवल्लक्षणप्रवृत्तिः ।

एवञ्च ह्रस्वस्यापि ह्रस्वत्वे कृते लक्ष्ये लक्षणन्यायेन न पुनर्ह्रस्वः; तदुक्तं 'इको झल्' (१।२।९) इतिसूत्रे भाष्ये—'कृतकारिरवल्वपि शास्त्रं पर्जन्यवत्' इति, सिद्धेऽपि ह्रस्वादि करोतीत्यर्थः ।

यद्यपीयं न संज्ञाप्रवृत्तावुपकारिका, नापि संज्ञास्वरूपव्यवस्थापिका । तथापि संज्ञापूर्वकस्य ह्रस्वत्वादेः प्रवृत्तिं व्यवस्थापयतीति कथञ्चित्सन्देहमालोच्यात्रास्याः परिभाषायाः उल्लेख इत्याहुः । असति बाधके लक्ष्यतावच्छेदकावच्छेदेन लक्षणप्रवृत्तिर्न्याय्यतया जलमिति, तच्छून्ये च यथा पर्जन्यो वर्षति, तथा सत्यसति वा स्वरूपगते विशेषे सर्वत्रैव स्वविषये लक्षणं संस्कारः प्रवर्तत इत्यर्थः । नन्वपूर्वकारित्वं हि शास्त्रस्य स्वरूपम्, तथा च यत्र प्रवृत्तिनिवृत्ती वा विशेषाभावस्तत्र स्वरूपविघातादयोग्यत्वेन तस्या प्रवृत्तिरेव युक्ता । तदुक्तं भाष्ये—अकृतकारि खल्वपि शास्त्रं मेघनिवत्' । तद्यथा अग्निर्यदेदग्धं तद्दहति, यत्तु दग्धं पुनर्न दहति । तस्मात्किमत्र पर्जन्यवच्छास्त्रप्रवृत्तिरिति चेत् ? अत्राहुः । अपूर्वकारित्वञ्च शास्त्राणां न केवलं 'इको यणचि' (६.१.७७) इत्यादिवद्रूपान्तरसम्पादकत्वमेव । किन्तु तन्निवर्तकत्वमपि, विनिगमनाविरहात् । ततश्च 'मो राजि समः क्वौ' (८.३.२५) इत्यादेः यथा स्वरूपावस्थापनेन रूपान्तरनिवर्तकत्वं, तथा 'ह्रस्वः' (७.४.५९) इत्यादेरपि स्वविषये प्रथमं प्रवृत्तस्य पश्चादप्रवृत्त्या स्पष्टमेव रूपान्तरनिवर्तकत्वम् ।

किञ्च शास्त्राणामसति निषेधे प्रयोजनमेव प्रधानं प्रवृत्तिबीजं, ततश्च यत्र 'खट्वानाम्' इत्यादौ दीर्घादिप्रवृत्तेः सुतरां प्रयोजनाभावः, तत्र

मास्तु 'नामि' (६.४.३) इत्यादेः प्रवृत्तिः, यत्र तु पूर्वं प्रवृत्तस्य ह्रस्वादेः पश्चादप्रवृत्तिलक्षणं 'ऊखतुः' इत्यादौ प्रयोजनं सम्भवति, तत्र 'ह्रस्वः' (७.४.९९) इत्यादेः प्रवृत्तिः केन वार्यते ? तस्माद्युक्तमेव सति प्रयोजने प्रवृत्तिकालिकस्वरूपविशेषाभावेऽपि पर्जन्यवल्लक्षणप्रवर्त्तनमिति । तदेतदभिसन्धायाह—'एवञ्च' इत्यादि । 'ह्रस्वे कृते' इति । दीर्घात्पूर्वमाङ्गत्वादिति भावः ।

न च 'लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः' इत्यत्र न मानमिति वाच्यम् । 'समो वा लोपमेके' इति लोपेन एकैसकारस्य द्वित्वे, द्विसकारस्य पुनर्द्वित्वेन, त्रिसकारस्य च सिद्धौ 'समः सुटि' (८.३.५) इति सूत्रस्यैव मानत्वात् । 'सम्प्रसारणाच्च' (६.१.१०८) 'सिचि वृद्धिः' (७.२.१) इत्यादौ भाष्ये स्पष्टमुक्तत्वाच्च । अत्र विकारकृतो लक्ष्यभेदो नेति 'सिचि वृद्धिः' (७.२.१) इतिभाष्यात्प्रतीयत इत्यन्यत्र विस्तरः ।

सङ्गतिप्रदर्शनाय नञ्चगर्भवाक्यघटकत्वेन प्रकृतयाः परिभाषायाः निर्देशः । सङ्गतिरत्रोपजीव्यत्वम् । पूर्वपरिभाषाप्रयोजनस्यैतदधीनत्वादिति द्रष्टव्यम् । 'सूत्रस्यैव मानत्वात्' इति । वार्त्तिकमपि सूत्रकाराभिमतमेव । "सूत्रेष्वेव हि तत्सर्वं यदवृत्तौ यच्च वार्त्तिके" । इत्यभियुक्तोक्तेरिति वदन्ति । यत्तु प्राञ्चः 'इरयोरे' (६.४.७६) इति सूत्रस्थं द्विवचनग्रहणमत्र प्रमाणम् । तद्धि 'दध्रे' इत्यादाविरयो रेभावे क्रादिनियमप्रापितेडागमविशिष्टस्य तस्य पुना रेभावार्थम् । एतत्परिभाषाया अभावे रेभावस्येडागमोत्तरं पुनः प्रवृत्तेरयत्नत एव सिद्धौ तद्वैयर्थ्यं स्पष्टमेव । न च रेभावोत्तरमिडागमे रेभावविधानवैयर्थ्यादिटोऽप्रवृत्त्या द्विवचनस्य चारितार्थ्यायोगात्कथमुक्तार्थज्ञापकत्वमिति वाच्यम् । इडागमाप्रवृत्तिविषये 'चक्रे' इत्यादौ चरितार्थत्वेन क्रादिनियमप्रापितेडागमविषये 'दध्रे' इत्यादौ प्रसक्तस्य तस्य निवृत्त्युपायाभावेन द्विवचननिर्देशस्य सार्थक्यसम्भवात् ।

न च द्विवचनाभावे रेभावोत्तरमिडागम: इडागमोत्तरं रेभाव इत्येव-चक्रकेणाव्यवस्था स्यात्। द्विवचने तु इरयो रेभावस्यापीडागमविशिष्टस्य प्रसङ्गे रेभाव इत्यर्थादिडागमाप्रवृत्त्या चक्रकनिवर्तनेन सामर्थ्यादेवायं कथ-मुक्तार्थज्ञापकत्वमिति वाच्यम्। शास्त्राणां व्यवस्थाकारित्वनियमसिद्धात् 'चक्रकेऽपि दृष्टेतरा व्यवस्था' इति भाष्यकारीयसिद्धान्तादिडागमनिवृत्ते: सत्या पुन: प्रवृत्तौ द्विवचनमस्तीरणाप्यभीष्टसिद्धेरित्याहु:, तदसत्; स्वविधेयस्य स्वकीयवाक्यार्थबोधवेलायामसिद्धत्वेन सिद्धधर्मस्योद्देश्यतायास्तत्र बाधिततया सामर्थ्यात्सङ्ग्रहार्थमावश्यकस्य द्विवचनग्रहणस्य निरुक्तार्थज्ञापकत्वा-सम्भवात्।

न च स्वविधेयस्य स्वस्मिन्नुद्देश्यत्वाभावे 'षट्सन्त:' इत्यादौ चर्त्वनिष्पन्नं तकारमादाय डकारस्य चर्त्वानापत्तिरिति वाच्यम्। डकारस्य चर्त्वार्थमुपप्लुते लक्षणे तकारस्य विधेयत्वाभावेनोद्देश्यत्वाक्षते:। किञ्च रेभावस्येडागमविशिष्टस्य लाक्षणिकत्वेन पुनश्च रेभावस्य दौर्लभ्यादावश्यकं द्विवचनमिति ज्ञापकत्वमयुक्तमेव। यदप्यनित्यापत्तिरेव प्रकृतपरिभाषायां मानम्, अन्यथा शास्त्रमव्यवस्थापकमेव स्यादिति ? तदपि न; 'उदवीढाम्' इत्यादौ प्रकृतपरिभाषया वृद्धिनिवारणपरभाष्यविरोधापत्ते:। तत्र 'वह्सूताम्' इति स्थिते ढत्वेदरसिद्धत्वाद्वृद्धौ ढत्वढलोपयो: 'सहिवहो:' (६.३.११२) इत्योत्वे, तस्य सत्यामपि पौन:पुन्येन वृद्धौ रूपानन्त्यभाव:। यदि तु रूपानन्त्यापत्तिरपरिनिष्ठितत्वापत्तिरित्युच्यते, तदा द्वित्वस्य वैकल्पिकत्वेन यावच्छक्ति द्वित्वघटितप्रयोगस्य परिनिष्ठितत्वसम्भवेन तद्विषये परिभाषाया अप्रवृत्तिप्रसङ्ग इति युक्तमेव मूलोक्तमित्यलम्।

'सम्प्रसारणाच्च' इति। तत्र हि भाष्ये 'शकद्धर्यम्' इत्यादौ 'पूर्वरूपवारणार्थं सम्प्रसारणपूर्वत्वे समानाङ्ग्रहणम्' इति वार्तिककृदारब्ध वचनमेनां परिभाषामाश्रित्य प्रत्याख्यातम्। 'लक्ष्यमेवेदं न' इति। किन्तु तल्लक्ष्यत्वमेवेति भाव:। तत्त्वञ्च स्वप्रथमप्राप्तावुद्देश्यत्वेन गृहीतसमुदाय-घटकविधेयमानेतदुभयीघटितत्वे सति स्वप्रथमप्राप्तिकालिकप्राप्तियोग्यता-भाववत्त्वम्। 'पथ' इत्यादौ प्रथमप्राप्तावुद्देश्यत्वेन गृहीतसमुदायघटकवर्ण-

विधीयमानैतयुभयावदित्तत्वं प्रथमप्राप्तिकालिकप्राप्तियोग्यत्वाभावश्चास्तीति लक्षणसमन्वयः। 'एधेत' इत्यादौ प्रथमप्राप्तावुद्देश्यत्वेन गृहीतसार्वधातुक-लिङ्प्रत्ययघटकवर्णातिरिक्ताघटितत्वेन द्वितीयसकारलोपे तल्लक्ष्यत्ववारणाय विशेष्यदलम्। 'परमराजपुरुषः' इत्यादाववान्तरसमासप्रयुक्तान्तोदात्तप्रवृत्तिः वेलायां विशिष्टसमासप्रयुक्तस्यान्तोदात्तस्य प्रवृत्तियोग्यताया अभावेन तत्प्रवृत्तौ तल्लक्ष्यत्ववारणाय सत्यन्तम्। 'उदवोढाम्' इत्यादावादेशविशिष्टस्य तल्लक्ष्यत्वसिद्धये सत्यन्तघटकपर्युदस्यमानकोटौ विधीयमाननिवेशः। 'भूयात्' इत्यादौ झलपरसंयोगादिलोपपदान्तसंयोगादिलोपयोः प्रवृत्त्यापि निर्वाहः। एवं 'अपाचितराम्' 'एधाञ्चक्रार' इत्यादावपि तल्लक्ष्यत्वतदभावाभ्यां चिणो लुकूप्रवृत्त्यभावः, सुपो लुक् च सिद्धयतीति तदर्थमाभीयासिद्धत्वमव्ययत्वं भाष्यकारोपवर्णितमुपायान्तरं बोध्यम्।

ननु 'सिचि वृद्धिः' (७.२.१) इति सूत्रस्थभाष्यप्रमाण्यात्तत्स्थानिकविकारविशिष्टस्य तल्लक्ष्यत्वेऽपि तस्य तदन्यस्य च स्थाने यो विकारस्तद्विशिष्टस्य तल्लक्ष्यत्वे मानाभाव इति चेत्? न; 'शकलार्थम्' इत्यादौ प्रकृतपरिभाषया पूर्वरूपनिवारणपर 'संप्रसारणाच्च' (६.१.१०८) इतिसूत्रस्थभाष्यप्रामाण्येन तथाभूतस्यापि तल्लक्ष्यताया आवश्यकत्वात्। न चैवं 'ग्लाङ् गतौ' (धा.पा. १९०) इत्यस्य भौवादिकतायां ग्लातांग्लायोर्ग्लाते इत्यत्र शपा सवर्णदीर्घोत्तरं पुनः सवर्णदीर्घो न स्यात्, तथा 'चिकीर्षन्ति' इत्यत्र शबकारेण पररूपोत्तरमन्त्याकारेण तन्न स्यादिति वाच्यम्। 'ऊकोलोऽच्' (१.२.२७) इति निर्देशबलात्परिभाषाया अनित्यत्वज्ञापनेन क्वचिदप्रवृत्त्या निर्वाहादिति दिक् ॥११९॥

ननु स्यन्दूधातोः (धा. पा. ७६१) 'स्यन्त्स्यति' इत्यादावात्मनेपदनिमित्तत्वाभावनिमित्तकत्वात् 'न वृद्भ्यश्चतुर्भ्यः' (७.२.५९) इति निषेधस्य बहिरङ्गत्वेनान्तरङ्गत्वादूदिल्लक्षणस्येह विकल्पस्यापत्तिरत आह—

१२०. निषेधाश्च बलीयांसः ।

अन्तरङ्गादुपजीव्यादपि बलीयांस इति भावः । 'चतुर्भ्यः' इति तु स्पष्टार्थमेव । अत एव तत्प्रत्याख्यानं भाष्योक्तं सङ्गच्छते । अत एव सवर्णसंज्ञादेर्निषेधविषये न विकल्पः । अन्यथा मीमांसकरीत्या विधेरुपजीव्यत्वेन प्राबल्यात्, तस्य सर्वथा बाधानुपपत्त्या 'दुर्वारः सः' इति मञ्जुषायां विस्तरः । अत एव 'द्वन्द्वे च विभाषा जसि' (१.१.३१) इति चरितार्थम् । 'विध्युन्मूलनाय प्रवृत्तिरस्या बीजम् । 'न लुमता' (१.१.६३) 'कर्मेर्णिङ्' (३.१.३०) इत्यनयोर्भाष्ये स्पष्टैषा ॥

इत्थं 'श्रुतानुमितयोः' (प. ११२) इतिपरिभाषानिरूपणोत्तरं प्रसक्तानुप्रसक्त्या परिभाषान्तराण्युपन्यस्य, इदानीं सिंहावलोकनन्यायेन बलवत्ताबोधकपरिभाषाप्रस्तावमपेक्ष्य प्रकृतपरिभाषाया आरम्भः । कस्मात् ? इति नियताकांक्षायामध्याहारेण पूरयति—'अन्तरङ्गादुपजीव्यादपि' इति । ननु सत्यामस्यां परिभाषायां 'न वृद्भ्यः' (७.२.५९) इत्यत्र 'चतुर्भ्यः' इति व्यर्थम् । तद्धि स्यन्देरूदित्लक्षणविकल्पान्निषेधस्य प्राबल्यबोधनाय । अन्यथा गणान्तस्य कृपेः 'तासि च क्लृपः' (७.२.६०) इति विशिष्य निषेधात्तदसङ्गतिरेवेत्यत आह—'चतुर्भ्यः' इति । ननु 'चतुर्भ्यः' इत्येवाश्रित्य परिभाषा प्रत्याख्यायताम्, तत्राह—'अत एव सवर्णसंज्ञा' इति । 'चरितार्थम्' इति । अन्यथा 'द्वन्द्वे च' (१.१.३१) इति निषेधस्य स्वोपजीव्यसवर्णनामसंज्ञाविषयसर्वथाबाधानुपपत्त्या विकल्पसिद्धौ 'विभाषा जसि' (१.३.३२) इत्यस्यारम्भो विफल एव स्यादित्याशयः ।

'विध्युन्मूलनाय' इति । अयं भावः—यत्र निषेधविषयादन्यत्र विधेश्चारितार्थ्यं, निषेधस्य च तदभावस्तत्र निरवकाशत्वेनापवादत्वादेव स्वविषये निषेधो विधेः सर्वथा बाधकः । यत्र तु विधिनिषेधयोर्द्वयोरपि

परस्परविषयपरिहारेण चारितार्थ्यं, तेन परत्वादिबाधकतावीजासम्भवेऽपि विध्युन्मूलनस्वाभाव्यान्निषेध एव विधेर्निवर्तक इति। 'भाष्ये स्पष्टा' इति। 'न लुमता' (१.१.६३) इत्यत्र हि भाष्ये 'उत्तरपदत्वे चापदादिविधौ' (१.१.६३. वा. ६) इत्येतद्वार्त्तिकप्रत्याख्यानप्रशंसायां 'परमवाक्' इत्यत्र समुदायप्रकृतिकामन्तवतीं वा विभक्तिमाश्रित्य प्राप्ता पदसंज्ञा प्रकृतेपरिभाषावशात् 'अमवतोरस्यान' (१.४.१७) इत्यनेन बाध्यत इत्युक्तम्। 'कमेर्णिङ्' (३.१.३०) इत्यत्र च क्ङिद्द्विधाविग्रहणाननुवृत्तिमते णिङो णकारस्य णिलोपविधौ सामान्यग्रहणाविघातार्थत्वात्, ङकारस्य आत्मनेपदार्थत्वाच्च द्वयोरपि सावकाशतया 'कामयते' इत्यादौ प्रकृतपरिभाषावशाद्बलीयस्त्वेन वृद्धेर्निषेधः प्राप्नोतीत्युक्तम्। यद्यपीदं भाष्यद्वयमेकदेशिन एव, तथापि भाष्यकाराव्यवहृतत्वशङ्काव्युदासार्थमिदमुक्तमित्याहुः ॥१२०॥

नन्वस्यन्तरङ्गार्थिकानामर्थप्रत्यायकत्वरूपप्रत्ययत्वानुपपत्तिरत आह—

१२१. अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थं।

यः स्वार्थः प्रकृत्या प्रत्याय्यते, सोऽपि प्रत्यय इत्यस्याप्यङ्गीकारात्तस्य प्रत्ययत्वमिति न दोषः। 'स्वार्थ' इत्यस्य स्वीयप्रकृत्यर्थ इत्यर्थः। महासंज्ञाबलात्तदर्थाकाङ्क्षायामन्यानुपस्थितिरस्या बीजम्। 'सुपि स्थः' (३.२.४) इत्यादिसूत्रेषु भाष्ये स्पष्टा।

१२२. योगविभागादिष्टसिद्धिः।

इष्टसिद्धिरेव, नत्वेनिष्टापादनं कार्यमित्यर्थः। तत्तत्समानविधिकद्वितीययोगेन विभक्तेस्तत्तत्त्वज्ञापनमेतद्बीजम्।

न्यायसिद्धत्वप्रयुक्तेन साधर्म्येणात्रास्याः परिभाषायाः उल्लेखः। प्रतिपूर्वादिणधातोरन्तर्भावितण्यर्थादिच्प्रत्ययः, कर्माकांक्षायां च स्वस्वप्रकृत्यर्थयोः सम्बन्धः। ततश्च स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकत्वं प्रत्ययत्वमिति सिद्धम्। तदेतद्—'प्रत्याय्यते योऽपि' इति। 'भाष्ये स्पष्टा' इति। इयमामादेशयोः प्रत्ययत्ववारणाय महासंज्ञाबलाद्भाष्यकारैराश्रिता ॥१२१॥

पूर्वपरिभाषाया प्रकृतिप्रत्ययोर्द्वयोरपि एकार्थकत्वं बोध्यते। योगविभागेऽपि प्रायश एकविषयकत्वमेवेति कथञ्चित्साधर्म्यमाश्रित्येतस्याः परिभाषाया उपन्यासः। विश्वतोमुखत्वात्सूत्राणां योगविभागेऽप्याचार्यतात्पर्यकल्पनमविरुद्धम्। तदुक्तमभियुक्तैः—

"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥" इति।

तत्र प्रतिपिपादयिषितार्थविषयकप्रतिपत्तिजनकप्रकारान्तरापेक्षया न्यूनवर्णकत्वमल्पाक्षरत्वम्। स्वगतसन्देहनिवर्तकप्रमाणान्तरानपेक्षत्वमसन्दिग्धत्वम्। साक्षात्प्रवर्तकत्वे सारवत्त्वम्। योगविभागादिभिरनेकार्थबोधकत्वं विश्वतोमुखत्वम्। अनर्थकपदरहितत्वमस्तोभत्वम्। अनवद्यत्वञ्च पारायणेनापि फलजनकत्वमिति वदन्ति। 'एतद्बीजम्' इति। 'सुपि स्थः' (३.२.४) इत्यत्र भाष्ये ध्वनितमेतत्। तत्र हि 'स्थः' इति योगविभागेन विधीयमानस्य क्प्रत्ययस्य भावार्थकत्वमेव न त्वन्यार्थकत्वमित्युक्तम् ॥१२२॥

१२१. पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते।

तत्र तत्र 'अन्यतरस्याम्', 'विभाषा' 'वा' इति सूत्रानिर्देशज्ञापितमिदम्॥

सजातीयवैयर्थ्यमूलकज्ञापनेविषयत्वमत्राप्यस्त्येवेति सन्दर्भः। चर्चा विभागः। न केवलं 'चर्चा प्रदानि' इति पस्पशास्थमाष्यव्याख्यावसरे

कैयटेन तथैवाभिहितत्वात्। एवञ्च पर्यायशब्देषूच्चारणगौरवेणार्थान्तरसाधनाभिनिवेशो न युक्त इति भावः। बहुलग्रहणन्तु न वाशब्दपर्यायः। किन्तु बहूनर्थाल्लाति गृह्णातीति व्युत्पत्तिवशप्रवृत्तेकार्थसंग्राहकं सत्कार्यं भवतीत्यर्थे विकल्पस्यापि पर्यवसानमिति 'उणादयो बहुलम्' (३.३.१) इति सूत्रस्थभाष्यस्वरसः। ततश्च 'मघवा बहुलम्' (६.४.१२८) इत्यत्र वाऽ इति वक्तव्ये बहुलग्रहणात् 'मघवान्' इत्यत्र दीर्घे संयोगान्तलोपस्यासिद्धत्वाभाव इति सिद्धान्तो न विरुद्ध्यतीति ध्येयम् ॥१२३॥

१२४. ज्ञापकसिद्धं न सर्वत्र।

स्पष्टमेव पठितव्येऽनुमानाद्बोधनमसार्वत्रिकत्वार्थमित्यर्थः। तेन ज्ञापकसिद्धपरिभाषायाऽनिष्टं नापादनीयमिति तात्पर्यम्। भाष्येऽपि ध्वनितमेतत् 'ङ्याप्' (४.१.१) सूत्रादौ। 'ज्ञापक' इति न्यायस्योपलक्षणम्। न्यायज्ञापकसिद्धानामपि केषाञ्चित्कथनमन्येषामनित्यत्वबोधनायेति भावः। यथा 'तस्थानापन्ने तद्धर्मलाभः' इति न्यायसिद्धम् 'स्थानिवत्' (१.१.५६) सूत्रं ज्ञापकसिद्धञ्च तत्र 'अनल्विधौ' (१.१.५६) इति।

आद्रियत 'इत्येतत्पदानुवृत्तिलाभार्थमत्रैतस्या उपन्यासः। ज्ञापकसिद्धं सर्वत्र नाद्रियते, किन्त्विष्टस्थल एवेति भावः। तदाह—'अनिष्टं नापादनीयम्' इति। ननु स्पष्टतया पाठे गौरवमिति लाघवार्थमनुमानाद्बोधनमस्तु। कथमुक्तार्थलाभ इति चेत्? न। गौरवस्य क्लेशसम्पादकत्वाददुष्टता। क्लेशश्च शब्दोच्चारणप्रयोजककण्ठताल्वोष्ठपुटव्यापारेणैव। न तु ज्ञानजनकमनोव्यापारेणेत्यनुशासनमनुभवो वा दृश्यत इत्यतो ज्ञानगौरवपराहतस्यानुमानिकबोधनस्यापि शब्दोच्चारणादविशिष्टता। किन्तूच्चारणे स्पष्टप्रतीतिर्गुण इत्याशयात्। भाष्यानुगृहीतत्वाच्चैतत्

युक्तैवैषा कल्पनेत्याह—भाष्ये ध्वनिलम् इति। तत्र तत्र प्रमाणमनपेक्ष्यापि पस्मिषाणामनित्यत्ववादनिष्ठेष्वप्रवृत्तिमभ्युपगच्छता भाष्यकारेणायमर्थो ध्वन्यत इत्युपाध्यायो मन्यते। उपलक्षणम् इति। प्रमाणसाम्यादिति बोध्यम्। 'न्यायसिद्धं स्थानिवत्सूत्रम्' इति। इदं स्वरूपम् (१.१.६८) इत्यस्य प्रत्याख्याने। तत्सत्त्वे तु न्यायेन शास्त्रबाधनौचित्यादपूर्वमेव स्थानिवत्सूत्रमित्याहुः—न ज्ञापकसिद्धम् इति। जग्धिर्विधौ ल्यब्ग्रहणमत्र ज्ञापकम्, अन्यथा स्थानिवद्बोधनेन तादित्वमादाय ल्यप्यपि जग्धिभावसिद्धौ किं तेन? एवञ्च ज्ञापकन्यायसिद्धानां केषाञ्चित्पुनः पाठ एव अन्येषां तथाविधानामनित्यत्वबोधनद्वारेणोक्तार्थे निर्विचिकित्सं प्रमाणम्। ज्ञापकसिद्धानां 'असिद्धं बहिरङ्गम्' (प. ५८) इत्यादीनां न्यायसिद्धानां 'सन्निपातलक्षणो विधिरनिमित्तं तद्घातस्य' (पा. ६) इत्यादीनाञ्च नापूर्वमेनित्यत्वमित्याहुः ॥१२४॥

ननु 'द्रोग्धा द्रोग्धा, द्रोढा द्रोढा' इत्यादौ घत्वादीनामसिद्धत्वात्पूर्वं द्वित्वे, एकत्र घत्वम्, अपरत्र ढत्वमित्यस्याप्यापत्तेरत आह—

१२५. पूर्वत्रासिद्धीयमद्वित्वे।

द्वित्वभिन्ने पूर्वत्र कर्त्तव्ये परमसिद्धमित्यर्थः। 'पूर्वत्रासिद्धम्' (८.२.१) इत्यधिकारभावं शास्त्रमस्या लिङ्गम्। यत्र च सिद्धत्वासिद्धत्वयोः फले विशेषस्तत्रैवेयम्। 'कृष्णर्द्धिः' इत्यादौ जश्त्वात्पूर्वमनन्तरं वा द्वित्वे रूपे विशेषाभावेन नास्याः प्रवृत्तिरित्यन्यत्र विस्तरः। 'सर्वस्य द्वे' (८.१.१) इतिसूत्रे भाष्ये स्पष्टेयम्।

नात्रानित्यानामसार्वत्रिकत्वे वचनैकमाश्रयमिति सञ्ज्ञाधिकारेतस्य॥

उपन्यासः । पूर्वत्रासिद्धशब्दो अधिकारपरः । ततो गहादेराकृतिगणत्वाद्भवार्थे छप्रत्ययः । ततश्च 'पूर्वत्रासिद्धम्' (८.२.१) इत्यधिकारे 'यच्छास्त्रं तत्रा-द्वित्वं इत्युपतिष्ठते' इत्यक्षरार्थः । प्रदेशेषु तादृशाधिकारे चैकवाक्यतया लाघवमर्थमाह—'द्वित्वभिन्ने' इत्यादि । द्वित्वे कर्तव्ये त्रैपादिकासिद्धत्वं नेति तु नार्थः । तथा सति द्वित्वस्यापि शास्त्रान्तरं प्रत्यसिद्धत्वानापत्तौ दीर्घात्पूर्वं नकारस्य द्वित्वे प्राग्वदुपधाभूतस्याच्चो दीर्घत्वेन दीर्घानापत्तेः । 'घुभ्याम्' इत्यादौ वकारद्वित्वोत्तरमुत्वे पूर्वत्र वकारश्रवणापत्तेश्च । प्रकृते हि षाष्ठं धातु-द्वित्वं, आङ्गमिकं पदद्वित्वं, वर्णद्वित्वञ्च गृह्यते विनिगमनाविरहादिति स्पष्टं प्रदीपोद्योतयोः ।

अत एव 'वाक्क वाक्' इति भाष्योक्तं द्वित्वोदाहरणं सङ्गच्छते । अन्यथा तत्रस्यासिद्धत्वाद्गकारस्य द्वित्वे परस्यावसानिकचर्त्वेन ककारेऽपि पूर्वत्र गकारश्रवणापत्त्या तदसङ्गतिरेव । 'खरि च' (८.४.५५) इत्यतेन तु न निर्वाहः । तदृष्ट्या 'वावसाने' (८.४.५६) इत्यस्यासिद्धत्वात् । न च 'वावसाने' (८.४.५६) इत्यस्य अपवादत्वया तद्विषये जश्त्वाप्रवृत्त्या ककारस्यैव द्वित्वमिति न प्रागुक्तभाष्यासङ्गतिरिति वाच्यम् । द्वित्वप्रवृत्तिवेलायां त्रैपादिकासिद्धत्वेन निवृत्तस्य 'वावसाने' (८.४.५६) इत्यस्य अपवादभूत-स्यापि जश्त्वनिवर्तकत्वायोगात् । न च वर्णद्वित्वस्य त्रैपादिकत्वेनासिद्धतया कथं प्रकृतपरिभाषायां ग्रहणमिति वाच्यम् । 'पूर्वत्रासिद्धम्' (८.२.१) इत्य-स्याधिकारत्वेन तत्तच्छास्त्रैकवाक्यतापन्नस्य तस्य तदंशीयतया द्वित्वविध्ये-कवाक्यतापन्नतत्तद्विधिपूर्वत्रासिद्धशास्त्रं प्रतीव तच्छेषभूतां प्रकृतपरिभाषां प्रत्यपि द्वित्वासिद्धत्वस्य दुर्वचत्वात् ।

न च 'वर्णद्वित्वस्यैतत्परिभाषाविषयत्वे 'सेव्यन्ता' इत्यादावनुनासिक-यकाराद्यघटितरूपसम्पत्तये द्वित्वे परसवर्णस्य सिद्धत्वं वाच्यमिति पूर्वत्रा-सिद्धसूत्रस्थवार्त्तिकारम्भवैफल्यमिति वाच्यम् । तादृशवार्त्तिकस्यापूर्वत्व-कल्पनापेक्षया प्रकृतपरिभाषीयांशविशेषानुवादरूपत्वे लघवात् ।

अथ वर्णद्वित्वस्यापि प्रकृतपरिभाषाविषयत्वे 'कृष्णर्धिः' इत्यत्र द्वित्वात्पूर्वं जश्त्वस्य प्रवर्तनीयतया तद्घटयत्ययप्रतिपादनपरे दीक्षितादीनां

ग्रन्थो विरुध्येतेत्यत आह—'यत्र च' इत्यादि। 'कृष्णर्धिः' इति। ननु द्वित्वापूर्वं जश्त्वाभ्युपगमे सकृदेव तत्प्रवृत्तिः। द्वित्वोत्तरन्तु द्विवारमिति प्रक्रियायामस्ति विशेष इत्याह—'रूपे' इति। 'नास्याः प्रवृत्तिः' इति। अनित्यमे नियमकारिणी परिभाषा, नियमानियमौ च कार्यगतावेव, प्राधान्यादिति भावः।

नन्वेवं सन्नन्तप्रघट्टके प्रकृतपरिभाषावशात् 'ईर्त्सति' इत्यत्र चर्त्वोत्तरं द्वित्वोपपादनं दीक्षितादीनामसम्बद्धं स्यादिति चेत्? नः पूर्वं चर्त्वं द्वित्वनिष्पन्नोत्तरखण्डीयतत्कारस्य चर्त्वनिष्पन्नसजातीयत्वेऽप्यतिरिक्तत्वेनासिद्धत्वायोगात् 'चयो द्वितीयाः' (वा. ९६१) इत्यस्य प्रवृत्त्या रूपवैजात्यसम्भवेन प्रकृतपरिभाषाप्रवृत्तेरव्याघातात्। अत एव 'वाक्क्' इति भाष्योदाहरणे चरमककारगतचर्त्वासिद्धत्वमाश्रित्य पूर्वस्य 'झलां जश् झशि' (८.४.५३) इति गकारो न प्रवर्त्तत इत्याहुः। स्यादेतत्; द्वित्वनिष्पन्नस्यातिरिक्तत्वे धुषाघातोक्तप्रदेशे नान्तत्वेऽपि प्रकृतपरिभाषया णत्वोत्तरं द्वित्वे णकारस्यासिद्धत्वाभावेन यङ्लुकि 'दाध्नित्' इत्यादावभीष्टयोरनुस्वारपरसवर्णयोरनुपपत्तिरिति चेत्? तर्हि प्रकृतपरिभाषाया अनित्यत्वेन णत्वात्पूर्वमेव तत्र द्वित्वप्रवृत्तिस्वीकाराददोषः। अनित्यत्वे प्रमाणन्तु 'उभौ साभ्यासस्य' (८.४.२१) इति सूत्रम्। तद्धि 'प्राणिणत्' इत्यादावुभयोरपि नकारयोर्णत्वार्थं प्रकृतपरिभाषावशात् 'अनितेः' इत्यस्य प्रवृत्युत्तरमेव द्वित्वे व्यर्थमेवेति तदेतदनित्यत्वं ज्ञापयति।

न च ज्ञापितेऽप्यनित्यत्वे व्यर्थं तत्र 'उभौ'ग्रहणम्। आरम्भसामर्थ्यादेव द्वयोर्नकारयोर्णसिद्धेरिति वाच्यम्। अभ्यासस्यानर्थक्यादुत्तरखण्डस्य च सुतरामप्राप्तस्य 'प्राणिणत्' इत्यादौ क्वचित्समर्पणे कृतार्थस्य उभयत्र तत्सम्पादने सामर्थ्ययोगेनोभौग्रहणस्यावश्यकत्वात्। न च 'परिषष्वज' इत्यादावभ्यासस्कारस्यार्थवत्सुनोत्यादिधातुसम्बन्धित्ववदभ्यासनकारेऽपि अनुधातुसम्बन्धित्वस्य पारम्परिकस्य सुवचतया पूर्वसूत्रेण सिद्धावुत्तरखण्डनकारस्य व्यवहितस्य णत्वसम्पत्तये वचनारम्भो भविष्यतीति व्यर्थमेवोभौग्रहणमिति वाच्यम्।

एवमपि व्यवहितस्योत्तरखण्डनकारस्यैव णत्वार्थं वचनाम्भः स्यादि-

त्यावश्यकमुभौग्रहणमित्याशयात्। इदमसिद्धत्वं णत्वमात्रविषयम्, ज्ञापकस्य विशेषापेक्षत्वादिति प्राञ्चः। नव्यास्तु सामान्यापेक्षमेव ज्ञापकम्, प्रमाणानां समान्यपक्षपातात्। तेन 'ऊढमाख्यत् जौजढत्' इत्यत्र ढत्वादेरसिद्धत्वमाश्रित्य पूर्वं द्वित्वमित्याहुः।

'भाष्ये स्पष्टा' इति। अस्याञ्च परिभाषायां ग्राहकसूत्रस्थमण्ग्रहणं ज्ञापकम्। परंणकारेण प्रत्याहाराश्रयणं हि 'सप्यन्ता', विद्वाँल्लिखति' इत्यादावनुनासिकयर्वलानां यस्वेन द्वित्वार्थं प्रकृतपरिभाषाया अभावे द्वित्वात्पूर्वं परसवर्णस्य दौर्लभ्यात्तद्वैयर्थ्यमेवेति ज्ञापकत्वसम्भवः। यदि तु जातिपक्षावलम्बेन ग्राहकसूत्रस्थमण्ग्रहणं भगवता भाष्यकारेण प्रत्याख्यायत इत्युच्यते, तदा वाचनिक्येवैषा परिभाषेति निष्कर्षः॥१२५॥

ननु 'गोष्वश्वेषु च स्वामी' इत्यादिवत् 'गोष्वश्वानाञ्च स्वामी' इत्यपि स्यात्, 'स्वामीश्वर' (२.३.३९) इति सूत्रेण षष्ठीसप्तम्योर्विधानादत आह—

१२६. एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्च न भविष्यति।

यत्रान्याकृतिकरणे भिन्नार्थत्वसम्भावना, तद्विषयोऽयं न्याय इत्यन्यत्र विस्तरः। 'कृञ्चानुप्रयुज्यते' (३.१.४०) इति सूत्रे भाष्ये स्पष्टेयम्।

'द्रोग्धा द्रोग्धा, द्रोढा द्रोढा' इत्यादावनया परिभाषया घत्वढत्वयोर्व्यवस्थामाश्रित्य पूर्वपरिभाषाविषयत्वनिराकरणं पुराणवैयाकरणानामयुक्तमिति द्योतयितुमत्रैतस्याः परिभाषाया आरम्भः। तदाह—'भिन्नार्थत्वसम्भावना' इति। यत्र समुच्चयादिना यादृशार्थलाभाय शब्दाकृतेरेकस्याः प्रयोगः प्रक्रान्तः, तत्र तादृशार्थबोधिकायास्तदन्यस्याः शब्दाकृतेः प्रयोगो

न भविष्यति, किन्तु तस्या एवाकृतेरिति परिभाषार्थः । यथा गवामश्वानां च पुरुषविशेषे स्वस्वामिभावं प्रतिपादयितुं गोशब्दात् षष्ठ्याकृतेरुपक्रमेऽस्यैवाश्वशब्दादपि, "न तु तदर्थबोधकत्वाविशेषेऽपि सप्तम्याकृतिः । सत्यान्तु तस्यां यत्किञ्चित्क्रियानिरूपितमधिकरणत्वं प्रतीयेतेति तन्निवारणाय प्रकरणाद्यन्वेषणे गौरवम् । षष्ठ्याकृतौ तु तदनपेक्षणाल्लाघवम्, एवमन्यत्रापीति तदेव लाघवमस्यां परिभाषायां बीजम् ।

'द्रोग्धा द्रोग्धा' इत्यादौ प्रथममुपक्रान्तायाः एव धात्वाकृतेः प्रत्ययाकृतेश्च द्विर्वचनेन परत्र बोधनाद्घत्वढत्वाभ्यामर्थविशेषापरिस्फुरणाच्च न तत्रैषा परिभाषेत्याशयः । नन्वयं जैमिनीयतन्त्रप्रसिद्धो न्यायः; तथा हि—'खादिरे वा बध्नाति, पालाशे वा' इत्यादिवाजसनेयश्रुतिविकल्पितेषु येनैव साधनेन क्रतोरुपक्रमः, तेनैवासौ निर्वाह्यः न तु तदन्येन साधनभेदेन कर्मवैगुण्यादपूर्वानुत्पत्तिप्रसक्तेरिति यूपाधिकरणे प्रकृतन्यायमूलकस्तदीयो राद्धान्तः । ततश्च यूपांशे प्रवर्तमानस्यास्य न्यायस्य शब्दप्रयोगानपेक्षणात्कथं भिन्नार्थत्वसम्भावनाविषयत्वमिति स्यादेव 'द्रोग्धा द्रोग्धा' इत्यादावनेन न्यायेन घत्वढत्वयोर्व्यवस्था । किञ्च यत्रोपक्रान्तंस्य खादिरस्य भ्रंशः, तत्र तत्साधर्म्यात् बर्बुरः प्रतिनिधित्वेन ग्राह्य इत्यपि तत्रैव व्यवस्थापितम् । तथा चावयवसंस्थानविशेषात्मक आकारविशेष एवात्राकृतिपदार्थ इति 'गवोश्वयोश्च स्वामी' इत्यादौ समानाकारतया षष्ठीद्विवचनसप्तमीद्विवचनयोरपि इह प्रयोगप्रसङ्ग इति चेत् ? तत्र केचित्—प्रयोगश्चानुष्ठानम्, तच्च यूपादौ संस्कारः, तत्फलमपूर्वोत्पत्तिः । यूपभेदे च स्यादेवापूर्वोत्पत्तौ भेद इति युक्तमस्य फलभेदसम्भावनाविषयत्वं न्यायस्य ।

प्रकृते त्वनुष्ठानं शब्दप्रयोगः । तत्फलमर्थप्रतिपत्तिरेव । तस्य तदुद्देश्यकतयैव प्रवृत्तेः । तथा च भिन्नार्थप्रत्याय्यकत्वसम्भावनाविषयत्वं शब्दप्रयोगांशे निर्विवादमेवोक्तन्यायस्य । 'द्रोग्धा द्रोग्धा' इत्यादेः समर्थनोपायतया पूर्वपरिभाषावलम्बोऽपि भाष्यकृतामत्रानुकूलः । अत एव 'यवाग्वा अग्निहोत्रं जुहोति' इत्यत्र द्वितीयातृतीययोरेकार्थयोः सहप्रयोगः । न हि जुहोतिसमवादने तयोर्भिन्नार्थकत्वसम्भवः । 'तृतीय च होश्छन्दसि'

(२,३.३) इत्यनुशासनात्। तृतश्च पूर्वोक्तस्थले खदवदत्वयोर्यत्वप्रसङ्गापत्त्या पूर्वपरिभाषैव शरणम्। अतो न, प्राचीनोक्तं युक्तम्। किञ्च खादिरश्चेषे बहुव्रीतिनिषानं क्रियते खदिरादक्षयप्रयुक्तेन खदिरत्वज्ञानेन प्रमाणान्तरेण वा, न तु तदाकारविशिष्टज्ञानमात्रेण। अन्यथा जातिविशेषावच्छेदेन नियमितस्य पशुबन्धनसाधनत्वस्य ज्ञात्यन्तरे प्रवृत्तौ तद्गतस्य एवापूर्वभङ्गप्रसङ्गः। तस्माज्जातिरेवात्र आकृतिरिति, न विजातीययोष्पष्ठीद्विवचनसप्तमीद्विवचनयोः समानार्थकयोरपि सह प्रयोग इति न काऽप्यनुपपत्तिरित्याहुः। तदाह- 'अन्यत्र विस्तरः' इति। 'कृच्चानुप्रयुज्यत इति सूत्रे' इति। तत्र ह्यामन्तस्य लिङन्ततया प्रकृतन्यायेनानुप्रयुज्यमानाः कुम्बस्तयो लिङ्परा एव भवन्तीति स्वार्थबोधनप्रयोगसूत्रे लिङ्ग्रहणमित्युक्तं भाष्ये ॥१२६॥

ननु 'विव्याध' इत्यादौ परत्वाद्धलादिशेषे यस्य संप्रसारणं स्यादत आह—

१२७. सम्प्रसारणं तदाश्रयञ्च कार्यं बलवत्।

तदाश्रयं 'सम्प्रसारणाच्च' (६.१.१०८) इति पूर्वरूपम्। तदुक्तं 'लिट्यभ्यासस्य' (६.१.१७) इतिसूत्रे उभयेषांग्रहणस्योभयेषां सम्प्रसारणमेव यथा स्यादित्यर्थकत्वेनेदं सिद्धमित्येषा व्यर्थेति 'लिट्यभ्यासस्य' (६.१.१७) इतिसूत्रे भाष्ये स्पष्टम्। फलान्तरान्यथासिद्धिरपि तत्रैव भाष्ये स्पष्टा। "णौ च संश्चङोः' (६.१.३१) इत्यादौ संश्चङोरित्यादि विषयसप्तमीति तत्रापि न दोष इत्यन्यत्र विस्तरः।

द्विर्वचनप्रस्तावेन द्विरुक्तेषु विशेषबोधकत्वादत्रैवा परिभाषा निरूप्यते। सम्प्रसारणं तन्निमित्तञ्च पूर्वरूपञ्च परापेक्षया प्रबलमिति परिभाषार्थः। वाचनिकीयं परिभाषा। अथैतस्याः प्रयोजनानि। 'भृष्टो, भृष्टवान्'।

अत्र परत्वात्प्राप्तं रमागमं बाधित्वा प्रकृतपरिभाषया सम्प्रसारणं प्रवर्तते । न च सम्प्रसारणस्य नित्यत्वादेवेष्टसिद्धिरिति वाच्यम् । कृतेऽपि सम्प्रसारणे 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते' (शाक. प. ३०) इति ऋकारान्तर्गत रेफमादाय रामागमप्रसक्त्या नित्यस्वाभयसाधारणत्वात् । तथा जुहुवुः, जुहुवुः, अत्र परत्वात्प्रसक्तमातो लोपं बाधित्वा हुवेः सम्प्रसारणं पूर्वरूपञ्च प्रथमतः प्रवर्तते । न च पूर्वमातो लोपे पूर्वरूपे वा विशेषाभाव इति वाच्यम् । प्रथमत आतो लोपे तस्य स्थानिवत्त्वेन उवङादेशानाप्तेः । तथा शुशुवुः, शुशुवुः, अत्र परत्वात्प्राप्तमिग्रहादेशं श्वयतेः सम्प्रसारणं, तत 'एरनेकाचः' (६.४.८२) इति यणं बाधित्वा पूर्वरूपञ्च प्रवर्तते । तथा 'व्रश्च' विव्याध', अत्र परत्वात्प्रसक्तं हलादिशेषं बाधित्वा रेफयकारयोः सम्प्रसारणम् । अन्यथा वकारस्य सम्प्रसारणप्रसङ्गः । सिद्धान्ते तु 'न सम्प्रसारणे सम्प्रसारणम्' (६.१.३७) इति निषेधात्तदप्रवृत्तिरिति दिक् ।

फलान्यथासिद्धिमूलकं भाष्यकारोक्तं परिभाषाप्रत्याख्यानमारभते–'वस्तुतः' इति । 'उभयेषां सम्प्रसारणमेव' इति । अन्यथा वच्यादीना ग्रह्यादीनाञ्चानुवृत्त्यैव सिद्धेरुभयेषांग्रहणं व्यर्थमेवेत्याशयः । 'तेनेदं सिद्धम्' इति । 'विव्याध वव्रश्च' इत्यादौ हलादिशेषात्पूर्वं सम्प्रसारणप्रवृत्त्या परिभाषाप्रयोजनं सिद्धमिति तदर्थः । 'व्यर्था' इति । ननु 'भूष्टो, भृष्टवान्' इत्यादीनां फलन्तराणां सम्भवात् कथं परिभाषावैयर्थ्यमत आह—'फलान्तरान्यथासिद्धिः' इति । 'वरीभृज्यते' इत्यादावागमसम्बन्धिने रेफमादाय प्रसक्तातिप्रसङ्गवारणाय 'अस्जोरोपधायोः' (६.४.४७) इत्यत्र 'अनुदात्तोपदेश' (६.४.३७) इतिसूत्राद्नुपदेशग्रहणसम्बन्धस्यावश्यकतया कृते सम्प्रसारणे वर्णैकदेशानां वर्णग्रहणेन ग्रहणेऽपि तदन्तर्गतं रेफमाश्रित्य रमागमप्रवृत्त्ययोगेन 'भृष्टो, भृष्टवान्' इत्यत्र नित्यत्वादेव रमागमात्पूर्वं सम्प्रसारणसिद्धिः । 'जुहुवतुः जुहुवुः, शुशुवतुः शुशुवुः' इत्यादावप्यातो लोपे यङादेशाभ्यां पूर्वं नित्यत्वात्सम्प्रसारणम् । आतो लोपयणादेशाभ्यां प्रागन्तरङ्गत्वात्परत्वं प्रवर्तत इति नात्र परिभाषायाः प्रयोजनमिति स्पष्टं भाष्ये इत्यर्थः ।

ननु प्रकृतपरिभाषाया अभावे 'णौ च संश्चङोः' (६.१.३१) इति इवयतेर्विधीयमानात्सम्प्रसारणात्पूर्वं णिङ्माङ्निमित्तकत्वेनान्तरङ्गत्वाद्वृद्धयादेशयोः 'अशूशवत्' इति न सिद्धेयेदत आह—'णौ संश्चङोः' (६.१.३१) इत्यादि । एवञ्च तयोर्विवक्षितयोः प्रथमं सम्प्रसारणं प्रवर्त्तत इति, नाऽत्र वृद्धयादेशयोरन्तरङ्गत्वं प्रथमप्रवृत्तिनियामकमित्याशयः । आदिशब्देन 'स्वपिस्यमिव्येयां यङि' (६.१.१९) इत्यस्य संग्रहः । अन्यथा सम्प्रसारणात्पूर्वमपरनिमित्तकत्वेनान्तरङ्गत्वाद्वृद्धित्वे 'वेवीयते' इत्यादावुत्तरखण्डे सम्प्रसारणे पूर्वस्य 'न सम्प्रसारणे' (६.१.३७) इति निषेधप्रसङ्गः । स हि निषेधो 'यूनस्तिः' (४.१.७७) इति निर्देशाद्वृद्धवचानेऽपि प्रवर्त्तत इत्यन्यत्र विस्तरः ॥१२७॥

यत्तु—

१२८. क्वचिद्विकृतिः प्रकृतिं गृह्णाति ।

तेन 'निसमुपविभ्यो ह्वः' (१.३.३०) इत्यत्र ह्वाग्रहणेन ह्वेञो ग्रहणसिद्धिः ।

१२९. औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ।

तेन 'दादेर्धातोः' (८.२.३२) इत्यौपदेशिकधातोरेव ग्रहणमिति । तन्न; तयोर्निमूलत्वाद्भाष्याव्यवहृतत्वाच्च । न च 'विकृतिः प्रकृतिं गृह्णाति' इति 'ग्रहिज्या' (६.१.१६) इति सूत्रस्थभाष्येणाद्याया अस्तिरस्कारात् । 'निसमुपविभ्यो ह्वः' (१.३.३०) इत्यादौ ह्वेञोऽनुकरणे सौत्रः प्रयोगः, आत्मविषय एवात्मनेपदम् । प्रयोगस्थानामेवानुकरणस्य घुसंज्ञासूत्रे भाष्ये

स्पष्टमुक्तत्वादित्यन्ये। अन्त्यापि तत्र तत्रोपदेशग्रहणं कुर्वतः सूत्रकृतो वार्तिककृतश्च असम्मता। इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते। तत्राप्येतद्रूपमिति रूपनिर्देशश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम्। तस्मिंश्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगे नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते। क उपदेशो नामेति घुसंज्ञासूत्रस्थभाष्येण प्रायोगिकासम्मवे तद्ग्रहणमित्यर्थस्य लाभेन भाष्यासम्मता च। भाष्ये 'सानुबन्धक' इत्यादि प्रकृताभिप्रायेण। 'दादेः' (८.२.३२) इतिसूत्रे दादिपदस्यौपदेशिकदादित्ववति लक्षणेति न दोष इत्यन्यत्र विस्तरः।

इदं परिभाषाद्वयं वाचनिकं प्राचीनसम्मतञ्च भाष्यकारानिष्टत्वाद्दुष्पाध्यायः प्रत्याचष्टे। 'यत्तु' इत्यादि। 'निर्मूलत्वात्' इति। तस्यैव तदुपष्टम्भकज्ञापकन्यायस्यैवाभावादिति बोध्यम्। ननु वाचनिकमेवेदं परिभाषाद्वयं फलानुरोधात्स्वीक्रियते, तत्राह—'भाष्यकाराख्यबहुतत्वाच्च' इति। न केवलमव्यबहुतत्वमेव किन्तु दूषितत्वादाद्यायास्तद्विरोधोऽपीत्याह—'न चैं कृतिः' इत्यादि। 'ग्रहिज्या' इति। तत्र वयिग्रहणेन व्येञो ग्रहणाभावार्थमिदमुक्तं भाष्ये। नन्वेवं 'निसमुपविभ्यो ह्वः' (१.३.३०) इत्यत्र ह्वेञ्धिद्विषयस्य ह्वेञो ग्रहणानुपपत्तौ क्रियाफले परागामिनि 'उपह्वयते' इत्यादावभीष्टस्यात्मनेपदस्यासिद्धिरत आह—'सौत्रः प्रयोगः' इति। 'अन्ये' इति। केचित्तु 'ह्वः' इति न पञ्चमी, किन्तु षष्ठी, तच्च 'धातोः' इत्यस्य व्यधिकरणं विशेषणम्। ततश्च 'ह्वा' इत्येतत्प्रकृतेर्धातोर्ह्वेञ्च आत्मनेदमित्यर्थादभीष्टसिद्धिरित्याहुः।

द्वितीयपरिभाषाया अप्यस्त्येव भविष्यविरोध इत्याह—'अन्त्याऽपि' इति। 'प्रकृताभिप्रायेण' इति। एवञ्च स्वरूपनिर्देशेष्वयमेव निर्णय इत्याशयः। 'लक्षणा' इति। इदमेव युक्तम्। औपदेशिकधातुग्रहणे हि दामालिङादावतिव्याप्तिवारणेऽपि अधोगित्यादावव्याप्तिर्दुर्वारेत्याहुः॥१२८, १२९॥

यदपि ननु 'अजर्धा, वेमिदीति' इत्यादौ तत्तद्गणप्रयुक्ता विकरणा यङ्लुकि स्युः, तथा यङ्लुकि 'बेभिदिता' इत्यादौ 'एकाच' (७.२.१०) इतीण्निषेधः स्यादत्र आह—

१३०. स्तिपा शपानुबन्धेन निर्दिष्टं यद्गणे न च ।
यत्रैकाज्ग्रहणञ्चैव पञ्चैतानि न यङ्लुकि ।

अनुबन्धनिर्देशो द्विधा । स्वरूपेण, ङित इत्यादिपदेन च । हन्ति याति वाति । 'सनीवन्त' (७.२.४९) इतिसूत्रे 'भर' इति 'दीङो युडचि' (६.४.६३) 'अनुदात्तङितः' (१.३.१२) 'दिवादिभ्यश्श्यन्' (३.१.६९) 'एकाच उपदेशे' (७.२.१०) इत्यादीत्युदाहरणानि । द्वित्वम् । 'सनाद्यन्ता' (३.१.३२) इति । 'भूवादयः' (१.३.१) इति धातुत्वञ्च भवत्येव । 'गुणे यङ्लुकोः' (७.४.८२) इत्यादिभिर्निषेधानित्यत्वकल्पनात् । तेन 'भण्भवोऽपि 'अजर्धा' इत्यादौ भवः ।

अत एव 'श्वीदित' (७.२.१४) इतिसूत्रे कैयटे यङ्लुकाज्ग्रहणं किञ्चिदिति पाठः । 'एकाच उपदेशेऽनुदात्तात्' (७.२.१०) इतिसूत्रे एकाज्ग्रहणेनैकदेशानुमत्या एषा ज्ञाप्यते । अन्यथा उपदेशे अनेकाचामुदात्तत्वस्यैव सत्त्वेन द्वैयर्थ्यं स्पष्टमेवेति, तदपि न । भाष्यानुक्तत्वात् । एकाज्ग्रहणस्य वधिव्यावृत्त्यर्थमावश्यकत्वाच्च । न च वधिः स्थान्युपदेश एकाजेवेति वाच्यम् । साक्षादुपदेशसम्भवेनैतद्विषये स्थान्युपदेशाग्रहणादुपदेशत्वावच्छेदेनैकाजित्यर्थाच्च । किञ्चोत्तरार्थमेकाज्ग्रहणम् । अत

एव 'जागरितवान्' इत्यादावुपदेश उगन्तत्वमादाय 'श्वयुकः किति' (७.२.११) इतीण्निषेधो न। तत्रोपदेश इत्यनुवृत्तिश्च 'स्तीर्णम्' इत्यादाविण्निषेधायेत्याकरे स्पष्टम्।

न केवलं पूर्वपरिभाषाद्वयमेव भाष्यकारानुगृहीतं वाचनिकमयुक्तम्, किन्तु ज्ञापकसिद्धमपि तथाभूतमयुक्तमेवेत्यावेदयितुं तद्वीत्यैवेमां परिभाषां दूषयति—"[1]यत्तु' इत्यादि। तदेतत्परिभाषात्रयमशोकवनिकान्यायादत्रोपन्यस्तम्। निर्दिष्टं निर्देशेन विहितम्। ततश्च स्तिपादिकृतनिर्देशप्रयोज्यविधिविषयीभूतमेकाच्पदघटितशास्त्रविहितं चेत्येतत्सर्वं यङ्लुकि न प्रवर्त्तत इति परिभाषार्थः। अनुबन्धनिर्देशश्च अनुबन्धकृतो निर्देशः। तत्प्रयुक्तकार्यनिर्वाहको निर्देश इति यावत्। तेन प्रत्याहारनिर्देशेषु न दोषः। 'भूवादयः' इति। यङ्लुगन्ते 'सनाद्यन्ता धातवः' (३.१.३२) इत्यस्य 'भूवादयो धातवः' (१.३.१) इत्यस्य वा प्रवृत्तौ विनिगमनाविरहः। परस्त्वन्तु न व्यवस्थापकं विरोधाभावादित्याशयः।

'अनित्यकल्पनात्' इति। तेन 'चोस्कुन्दीति' इत्यादाविदित्त्वप्रयुक्तो नुम्, 'बोभुवति' इत्यादावुवङि 'ङिच्च' (१.१.५३) इत्यान्तायेशभावश्च निर्बाधः। वस्तुतो नैतस्याः प्रमाणान्तरसिद्धत्वमित्याह—'एकाज्ग्रहणस्य' इति।

'वधिव्यावृत्त्यर्थम्' इति। 'अवधीत्' इत्यादौ वृद्धिवारणार्थं 'अदन्तो वधादेशः' इत्यनेकाच्त्वं द्रष्टव्यम्। नन्वच इत्युक्तावपि सामर्थ्यादेकत्वविशिष्टाज्विशिष्टलक्षणया सिद्धावेकग्रहणमहिम्ना सावधारणबहुव्रीहिलाभादनेकाच्कोपदेशो व्यावर्त्तत इति चेत्? न; निरुक्तलक्षणायां बीजाभावात्तदन्तविधिनिवारकतया कृतार्थस्यैव ग्रहणस्योक्तार्थसाधकत्वायोगाच्च। 'स्थान्युपदेशग्रहणात्' इति। 'उपदेशेऽत्वतः' (७.२.६२) इति सूत्रस्थकैयटस्वरसादादेशोपदेशः स्थान्युपदेशान्मुख्य इत्याशयः। मास्तु वा स्थान्युपदेशादेशोपदेशयोर्मुख्यामुख्यविचारः। तावतापि न दोष इत्याह—'उपदेशत्वावच्छेदेन' इति। अवच्छेदकावच्छेदेनान्वयस्यौत्सर्गिकत्वादिति तात्पर्यम्।

१. 'यदपि'—मूलम्।

न च भाष्ये यङ्लोपे 'बेभिदिता' इत्यादाविट्प्रतीत्यर्थमुपदेशेऽनुदात्तादेकाचः श्रूयमाणादङ्गादित्यर्थे सतीट्प्रतिषेधो वक्तव्यो 'बिभित्सति' इति दोषोपन्यासवत्, यङ्लुकि दोषानुपन्यासेन तत्रेडिष्टः। यङ्लोपेत्यादिभाष्ये तूपक्रमोपसंहारबलेन न यङ्लुग्विषयः। किञ्च तस्य तद्विषयकत्वे यङ्लोपे स्थानिवत्त्वस्यैव यङ्लुक्युपायाप्रदर्शनेन न्यूनतापत्तिरिति वाच्यम्। इड्विषये यङ्लुको लोकेऽनभिधानेन छन्दसि सर्वविधीनां वैकल्पिकत्वेन च तत्र दोषानुपन्यासेनादोषात्। अन्यथैकाञ्ग्रहणं किमर्थमिति प्रश्नस्योत्तरत्र जागर्त्यर्थमिह वध्यर्थमित्युत्तरस्य च भाष्ये निरालम्बनतापत्तेः।

न चार्धधातुकाक्षिप्त'धातोरेकाचः' (३.१.२२) इति विशेषणम्। एवञ्च 'बिभित्सति' इत्यादावुत्तरखण्डस्य धातोरेकाच्त्वमस्त्येव उत्तरखण्डेऽस्तित्ववत्। एतच्च 'दयतेः' (७.४.९) इतिसूत्रे भाष्ये स्पष्टम्। एवञ्च प्रकृतभाष्यासङ्गतिरिति वाच्यम्। आक्षेपे आक्षिप्तस्यान्वये च मानाभावात्। अङ्गत्वन्तु विशिष्ट एवेति 'एकाचो द्वे' (६.१.१) इतिसूत्रे भाष्ये स्पष्टम्। निरूपितञ्च तनादिशेषे शब्देन्दुशेखरे। धातुत्वन्तूत्तरखण्ड एव। अत एव 'एकाचो वशो मष्' (८.३.३७) इतिसूत्रे धातोरवयवस्यैकाच इति वैयधिकरण्येनान्वये गर्थप्सिद्धिः प्रयोजनमुक्तं भाष्ये, न तु 'प्रसिद्धमजर्घा' इति। 'अजर्घा, बोभिदीति' इत्यादौ श्नमुश्यनादयस्तु 'चर्करीतञ्च' (धा.पा. १०८१) इत्यस्यादादौ पाठेन यङ्लुगन्ते गणान्तरप्रयुक्तविकरणस्याप्राप्त्या

न भवन्ति। छान्दसत्वादेव कार्यान्तराणामपि छन्दसि दृष्टानामभावो बोध्यः। भाषायान्तु तादृशानामभाव एव, श्नितप्शपादिनिर्देशास्तु 'भवतेरः' (७.४.७३) इत्यादिसूत्रस्थतन्निर्देशवज्ज्ञापकाः सिद्धाः इत्यन्यत्र विस्तरः।

ननु वेवरीत्या उपदेशत्वावच्छेदेन 'अनुदात्तात्' (७.२.१०) इत्यस्यापि न्याय्यतया वधादेशस्याद्युदात्तनिपातनादेव व्यावृत्तिलाभादेकाज्ग्रहणं व्यर्थमेवेत्यत आह—'किञ्च' इति। ननु 'यङ्लोप' इत्यादिभाष्यमुपलक्षणमत आह—'किञ्च' इति। नन्वेकाज्ग्रहणमत्तरार्थमप्यत्रोपात्तमिह किञ्चित्तत्रपो 'इति' न्यायात्प्रकृतपरिभाषाज्ञापनमस्तु, प्रागुक्तविचारे यङ्लोप एव लुक्युपायाप्रदर्शनं च भाष्यकृतां तत्रेडागमस्याभीष्टत्वबोधनद्वारेण प्रकृतपरिभाषायाः सूचकमस्तु का क्षतिरतो न युक्तमनभिधानाश्रयणमिति चेत्? तत्राह—'अन्यथा' इति। इह 'वध्यर्थम्' इण्निषेधनिवर्त्तकत्वेनाद्युदात्तनिपातनमनुपयुक्तमिति तदाशयः। 'अजर्वा' इत्यस्य प्रसिद्धत्वमन्यत्रोदाहृतत्वादिति द्रष्टव्यम्। चर्करीतशब्दो यङ्लुक्यपरः। 'किरतिं चर्करीतान्तम्' इति सात्तमिकभाष्यप्रयोगस्वारस्यात्।

'अदादौ पाठेन' इति। शब्लुगर्थो हि तत्र पाठः गुणान्तरप्रयुक्तकार्यस्य श्यन्नादेरुत्पत्तौ च तदसङ्गतिरेवेत्याशयः। ननु भ्वादेरौत्सर्गिकस्य शपो निवर्त्तनेन कृतार्थस्य तादृशपाठस्य गणान्तरप्रयुक्तापवादभूतश्यन्नादिवारणे बीजाभाव इति चेत्? सत्यम्; द्वितीये 'यङोऽचि च' (२.४.७४) इत्यत्र यङ इति योगं विभज्य 'अदिप्रभृतिभ्यः' (२.४.७२) इत्यतः शप इत्यनुवर्त्त्य, यङन्ताच्छपो लुग्विधानेऽपि यङन्ताद्विशेषाभावद्यङ्लुक्येव पर्यवसानेन सिद्धावदादिषु 'चर्करीतञ्च' (धा.प. १०८१) इति पाठबलात्तस्यादादित्वमेवेति बोधनद्वारा गणान्तरप्रयुक्तानां श्यन्नादीनामपि निवृत्तिरिति विभावनीयमित्याहुः।

नन्वेवं गणकार्यस्याप्रवृत्तावपि 'पास्पर्धीति' इत्यादौ 'अनुदात्तङित' (१.३.१२) इत्यादिभिरनुबन्धप्रयुक्तमात्मनेपदादिकार्यं लोकवेदयोर्यङ्लुकि

दुर्वारमत आह—'छान्दसत्वात्' इत्यादि। 'नार्थसाधकाः' इति। भाष्यकाराविचारितप्रयोजनानां सौत्राक्षराणामदृष्टार्थकत्वमेव पारायणादिनेयसकृदावेदितत्वादिति भावः। तदाह—'अन्यत्र विस्तरः' इतीत्यलम् ॥१३०॥

ननु 'जमोऽचि' (७.२.६१) 'रघेश्च' (७.१.६२) 'नेटग्लिटि' (७.१.६३) इत्येव सूत्र्यतां किं 'द्वी रघिग्रहणेन इत्यत आह—

१३१. पदागौरवाद्योगविभागो गरीयान्।

प्रतिवाक्यं भिन्नवाक्यार्थबोधकल्पनेन गौरवं स्पष्टमेव। परन्तु भाष्यासम्मतेयम्। 'टाङसि' (७.१.१२) इति सूत्रस्थभाष्यविरुद्धा। तत्र च इनादेशे इकारप्रत्याख्यानयोगविभागेनैव कृता सेति बहवः।

प्रत्याख्याते व्याख्यातृश्रीतृणामानुषङ्गिकत्वेनाभ्युदयसम्पत्तये लाघवप्रशंसनेनोत्सवप्रतिपादिकामुत्तरपरिभाषां निरूपयिष्यन् प्रसङ्गादुरवं दूषयितुमिमां परिभाषां दर्शयति—गरीयानतिशयितगौरवविशिष्टः। प्रवृत्तिनिमित्तगतातिशय एवातिशायनिकानां प्रत्ययानां विधानात्। अतो न युक्तो योगविभाग इत्यर्थः। गौरवस्य क्लेशजनकत्वाद्धेयत्वं, लाघवस्य सुखजनकत्वादुपादेयत्वञ्च सकललोकप्रसिद्धमिति नानयोः परिभाषयोर्पूर्वता।

'बहवः' इति। केचित्तु बहुषु बहुविधैः परिक्लेशैरिनादेशसम्बन्धिनमिकारं प्रत्याचक्षाणो न सिद्धान्ती भाष्यकारः। अन्यथा महतो वंशस्तम्बाल्लट्वानुकूल्यत इति 'क्लृक्' (मा.सू. २) सूत्रस्थभाष्यकारकृते कात्यायनावहेलनमसम्बद्धं स्यात्। किञ्च पदगौरवं, पदाधिक्यं धार्मिग्राहकानुरोधात्। तच्च नेह, किन्तु पदसम्बन्धिवर्णाधिक्यमतो नास्ति परिभाषायां भाष्यविरोध इत्याहुः ॥१३१॥

३१२. अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः ।

'एओङ्', 'ऐऔच्' सूत्रयोर्ध्वनिरेषा भाष्ये । तत्रानेकपदघटितसूत्रे प्रायेण पदलाघवविचारः एवं, न तु मात्रालाघवविचारः इति 'ऊकालोऽज्' (१.२.२७) 'अपृक्त एकाल्' (१.२.४१) इत्यादिसूत्रेषु भाष्ये ध्वनितम् । तत्र हिंसूत्रे अल्ग्रहणहल्ग्रहणयोर्विशेषविचारे संज्ञायां हल्ग्रहणं 'ण्यक्षत्रिय' (२.४.५८) इतिसूत्रे 'अणिञोः' इति वाच्यमिति त्रीणि पदान्यल्ग्रहणे । तदेकं स्वादिलोपे हल्ग्रहणं 'ण्य' (२.४.५८) इतिसूत्रे 'अणिञोः' इति न वाच्यम्, 'अपृक्तस्य' इति वाच्यम्, इति त्रीण्येव पदानीति नास्ति लाघवकृतो विशेष इत्युक्तम् । 'अचि श्नु' (६.४.७७) इतिसूत्रे इण इत्येव सिद्धे 'ध्वोः' इति संमृद्य ग्रहणान्न पूर्वेणेग्ग्रहणं, तत्र विभक्तिनिर्देशे संमृद्य ग्रहणे च सार्धास्तिस्रो मात्राः इग्ग्रहणे तिस्रो मात्रा इति 'लण्' (मा.सू. ६) सूत्रे भाष्योक्तेः तथा 'ओतः श्यनि' (७.३.७१) इतिसूत्रे 'शिति' इति वक्तव्यम् । तत्रायमर्थः—'ष्ठिवुक्लमु' (७.३.७५) इतिसूत्रे 'शिति' इति न कर्तव्यं भवतीति भाष्ये । न केवलं मात्रालाघवं यावदयमप्यर्थ इति कैयटोक्तेः प्रायेणेति शिवम् ॥

इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतः परिभाषेन्दुशेखरः समाप्तः ॥

ॐ नमः पाणिनिकात्यायनपतञ्जलिभ्यः ।
शब्दविद्यासम्प्रदायकर्तृभ्यः परमऋषिभ्यः ॥

—०—

'लाघवेन' इति। हेतावेषा तृतीया। अर्धमात्रानुच्चारणप्रयुक्तलाघवजन्यमुत्सवं वैयाकरणाः पुत्रोत्सवत्वप्रकारकं जानन्तीत्यर्थः। कैमुत्येन मात्रादिलाघवस्योत्कर्षः। सर्वथा लाघवमत्र शास्त्रे श्रेयः। तदर्थमेव शास्त्रारम्भात्। अन्यथा शब्दसाधुत्वज्ञानाय पतिपदपाठ एवोपक्रान्तः स्यादिति पस्पशास्थभाष्यकारसूचितोऽभिप्रायः। 'एओङवोच्चसूत्रयोः' इति। तत्र हि भाष्ये सन्ध्यक्षरेषु तपरोपदेशाभावे एचो ह्रस्वानुशासनेषु अर्धैकारार्धौकारयोर्वारणार्थं 'एच इग्घ्रस्वादेशे' (१.१.४८) इतिसूत्रं कर्तव्यमित्युपक्रम्योक्तम्।

यदि हि तौ स्यातां तावेवायमुपदिशेदिति। एवं 'एच इक्' (१.१.४८) इतिसूत्रेऽपि भाष्ये। तथा चार्धमात्रात्मकाकारेकारसङ्घातैकरूप आद्यः, तथाविधोकारोकारसङ्घातरूपो द्वितीय इत्येवं तयोः प्रत्येकं मात्रिकत्वात्तदुपदेशे लाघवम्। उपदिष्टयोस्तु प्रत्येकं द्विमात्रिकत्वात्तदुपदेशे गौरवमिति भाष्यकाराशयमुपाध्यायो मन्यते—'नास्ति लाघवकृतो विशेषः' इति। यद्येतादृशेषु मात्राप्रयुक्तमपि लाघवं विचार्येत, तर्हि संज्ञाविधौ वलग्रहणे सार्धमात्रा, लुग्विधावपृक्तस्येति सार्धाः षण्मात्राः, स्वादिलोपे हल्ग्रहणे द्वेमात्रे, सङ्कलनया दश मात्राः। संज्ञाविधौ हलग्रहणे द्वेमात्रे। लुग्विधावणिञोरिति सार्धाः पञ्चमात्राः सङ्कलनया च सार्धाः सप्तमात्रा इति विशेषस्य विस्पष्टत्वात्तदसङ्गतिरेव।

'ऊकालोऽच्' (१.२.२७) इतिसूत्रेऽपि भाष्ये उकारो ह्रस्व इति वाक्ये ग्राहकशास्त्रबलाद्दीर्घप्लुतयोरपि ह्रस्वसंज्ञाप्रसङ्ग इत्याशङ्क्य ह्रस्वसंज्ञाविधानसामर्थ्यान्न भवति। संज्ञाया अनारम्भे त्रिह्रस्वप्रदेशेषु 'एच इक्' इति वक्तव्यमिति षड्ग्रहणानि। तदारम्भे च संज्ञाविधावेकं प्रदेशेषु त्रिह्रस्वग्रहणानि एच इगिति च वक्तव्यमिति अष्टौ ग्रहणानीत्येवं पदप्रयुक्त एव गुरुलघुभावो विचारितः, न तु मात्राप्रयुक्त इति बोध्यम्। 'संमृष्य' इति। संहितया वर्णानां संश्लेषः संमर्दः। 'इण इति तिस्रो मात्राः' इति। इदमुपलक्षणम्। संहितायां ह्रस्वयत्वयलोपेषु सार्धमात्राद्वयमित्यपि बोध्यम्। अत्रेदमवधेयम्। मात्रागौरवे तदभिव्यक्तिजनककण्ठताल्वोष्ठ-

पुटव्यापाराधिक्यात्क्लेशः। पदाधिक्ये तु तदीपदार्थोपस्थित्यादिसाधक-
मनोव्यापारप्रयुक्तोऽपीत्युभयथा परिक्लेशान्मात्रागौरवात्पदगौरवमधिको
दोषः। न हि कायिकक्लेशजनकमुच्चारणगौरवमेव दोषः, न तु मान-
सिकक्लेशजनकमनोव्यापारगौरवमित्यत्र प्रमाणमुपलभ्यते, येन तन्निरा-
करणं स्यात्। एवञ्च पदप्रयुक्त एव गुरुलघुभावो मुख्यत्वात्प्राचुर्येण
विचार्यते।

मात्राप्रयुक्तस्तु तदपेक्षया स्वल्पफलकत्वात्क्वचिद्विचार्यते, क्वचिन्न।
एवं पदलाघवानुपहितं मात्रालाघवमकिञ्चित्करम्, पदलाघवन्तु मात्रालाघ-
वानुपहितमपि श्रेय एवेति 'ओतः श्यनि' (७.३.७१) इतिसूत्रस्थयो-
र्भाष्यकैयटयोर्निष्कर्षः। तदेतत्प्रायेणेत्युपसंहरन्नुपाध्यायः सूचयतीति
सकलाभीष्टसिद्धिरित्याहुः ॥१३२॥

काशीनाथकटाक्षेन्दोरेषा वाक्यार्थचन्द्रिका।
समुल्लासयतां नित्यं सतां मानसकैरवम् ॥

यदत्र न्यूनमधिकं दुरुक्तं वाऽपि किञ्चन।
सर्वमेतत्समीक्षन्तां सन्तः सन्ति सहस्रशः ॥

इति श्रीमद्विजयराघवगजपतिराजमहाराजसंस्थानपण्डितेन काशीनाथविद्वन्म-
होपाध्यायचरणकमलसेवासम्प्राप्तविद्योपहितेन भागवतोपनामकभास्करसूरित-
नूजन्मना हरिशास्त्रिणा विचरिता वाक्यार्थचन्द्रिकाख्या परिभाषेन्दुशेखर-
व्याख्या सम्पूर्तिमगमत् ॥

ॐ नमः पाणिनिकात्यायनपतञ्जलिभ्यो महद्भ्यो गुरुभ्यः ॥



'लाघवेन' इति। हेत्वावेषा तृतीया अर्धमात्रानुच्चारणप्रयुक्तलाघवजन्यमुत्सवं वैयाकरणाः पुत्रोत्सवत्वप्रकारकं जानन्तीत्यर्थः। कैमुत्येन मात्रादिलाघवस्योत्कर्षः। सर्वथा लाघवमत्र शास्त्रे श्रेयः। तदर्थमेव शास्त्रारम्भात्। अन्यथा शब्दसाधुत्वज्ञानाय पतिपदपाठ एवोपक्रान्तः स्यादिति पस्पशास्थभाष्यकारसूचितोऽभिप्रायः। 'एओङवोच्सूत्रयोः' इति। तत्र हि भाष्ये सन्ध्यक्षरेषु तपरोपदेशाभावे एचो ह्रस्वानुशासनेषु अर्धैकारार्धौकारयोर्वारणार्थं 'एच इग्घ्रस्वादेशे' (१.१.४८) इतिसूत्रं कर्तव्यमित्युपक्रम्योक्तम्।

यदि हि तौ स्यातां तावेवायमुपदिशेदिति। एवं 'एच इक्' (१.१.४८) इतिसूत्रेऽपि भाष्ये। तथा चार्धमात्रात्मकाकारैकारसङ्घातरूप आद्यः, तथाविधाकारोकारसङ्घातरूपो द्वितीय इत्येवं तयोः प्रत्येकं मात्रिकत्वात्तदुपदेशे लाघवम्। उपदिष्टयोस्तु प्रत्येकं द्विमात्रिकत्वात्तदुपदेशे गौरवमिति भाष्यकाराशयमुपाध्यायो मन्यते—'नास्ति लाघवकृतो विशेषः' इति। यद्येताहशेषु मात्राप्रयुक्तमपि लाघवं विचार्येत, तर्हि संज्ञाविधावल्ग्रहणे सार्धमात्रा, लुग्विधावपृक्तस्येति सार्धाः षण्मात्राः, स्वादिलोपे हल्ग्रहणे द्वेमात्रे, सङ्कलनया दश मात्राः। संज्ञाविधौ हल्ग्रहणे द्वेमात्रे। लुग्विधावणिलोरिति सार्धाः पञ्चमात्राः सङ्कलनया च सार्धाः सप्तमात्रा इति विशेषस्य विस्पष्टत्वात्तदसङ्गतिरेव।

'ऊकालोऽच्' (१.२.२७) इतिसूत्रेऽपि भाष्ये उकारो ह्रस्व इति वाक्ये प्राहकशास्त्रबलादीर्घप्लुतयोरपि ह्रस्वसंज्ञाप्रसङ्ग इत्याशङ्क्य ह्रस्वसंज्ञाविधानसामर्थ्यान्न भवति। संज्ञाया अनारम्भे त्रिर्ह्रस्वप्रदेशेषु 'एच इक्' इति वक्तव्यमिति षड्ग्रहणानि। तदारम्भे च संज्ञाविधावेकं प्रदेशेषु त्रिर्ह्रस्वग्रहणानि एच इगिति च वक्तव्यमिति अष्टौ ग्रहणानीत्येवं पदप्रयुक्त एव गुरुलघुभावो विचारितः, न तु मात्राप्रयुक्त इति बोध्यम्। 'संमृद्य' इति। संहितया वर्णानां संश्लेषः संमर्दः। 'इण इति तिस्रो मात्राः' इति। इदमुपलक्षणम्। संहितायां रुत्वयत्वयलोपेषु सार्धमात्राद्वयमित्यपि बोध्यम्। अत्रेदमवधेयम्। मात्रागौरवे तदभिव्यक्तिजनककण्ठताल्वोष्ठ-

पुटव्यापाराधिक्यात्क्लेशः। पदाधिक्ये तु तदीपदार्थोपस्थित्यादिसाधकमनोव्यापारप्रयुक्तोऽपीत्युभयथा परिक्लेशान्मात्रागौरवात्पदगौरवमधिको दोषः। न हि कायिकक्लेशजनकमुच्चारणगौरवमेव दोषः, न तु मानसिकक्लेशजनकमनोव्यापारगौरवमित्यत्र प्रमाणमुपलभ्यते, येन तन्निराकरणं स्यात्। एवञ्च पदप्रयुक्त एव गुरुलघुभावो मुख्यत्वात्प्राचुर्येण विचार्यते।

मात्राप्रयुक्तस्तु तदपेक्षया स्वल्पफलकत्वात्क्वचिद्विचार्यते, क्वचिन्न। एवं पदलाघवानुपहितं मात्राङ्लाघवमकिञ्चित्करम्, पदलाघवन्तु मात्रालाघवानुपहितमपि श्रेय एवेति 'औतः श्यनि' (७.३.७१) इतिसूत्रस्थयोर्भाष्यकैयटयोर्निष्कर्षः। तदेतत्प्रायेणेत्युपसंहरन्नुपाध्यायः सूचयतीति सकलाभीष्टसिद्धिरित्याहुः ॥१३२॥

काशीनाथकटाक्षेन्दोरेषा वाक्यार्थचन्द्रिका।
समुल्लासयतां नित्यं सतां मानसकैरवम्॥

यदत्र न्यूनमधिकं दुरुक्तं वाऽपि किञ्चन।
सर्वमेतत्समीक्षन्तां सन्तः सन्ति सहस्रशः॥

इति श्रीमद्विजयरामगजपतिराजमहाराजसंस्थानपण्डितेन काशीनाथविद्वन्मौलिपाध्यायचरणकमलसेवासम्प्राप्तविद्योपहितेन भागवतोपनामकभास्करसूरितनूजन्मना हरिशास्त्रिणा विचरिता वाक्यार्थचन्द्रिकाख्या परिभाषेन्दुशेखरव्याख्या सम्पूर्तिमगमत्॥

ॐ नमः पाणिनिकात्यायनपतञ्जलिभ्यो महद्भ्यो गुरुभ्यः॥



OUR OTHER PUBLICATIONS

			Price
1.	Jnanachaturvimsi	1956	Rs. 2-00
2.	Panditarajakavyasangraha*	1958	Rs. 13-00
3.	Rigarthasara Part I	1959	Rs. 4-00
4.	Stories from Kathasaritsagara Part I	1960	Rs. 2-70
5.	Gems from Skt. Literature (2nd Edn.)*	1979	Rs. 2-00
6.	Samskrita Kavijivitam Part I*	1961	Rs. 6-00
7.	Minor Works of Kshemendra*	1961	Rs. 21-35
8.	Narakasuravijayavyayoga	1961	Rs. 4-00
9.	Sitaramavihara Kavya	1962	Rs. 5-35
10.	Danoddyota Part I	1964	Rs. 8.6
11.	Catalogue of Skt. Mss. in O.U. Library	196	
12.	Stories from Kathasaritsagara Part II	196	
13.	Aryasaptasati	196	Rs
14.	Vikramorvasiyam	1966	Rs. 10-70
15.	Danoddyota Part II	1966	Rs. 11-35
16.	Do Part III	1967	Rs. 16-65
17.	Kasika Part I	1969	Rs. 25-00
18.	Vrittaratnakara	1969	Rs. 16-00
19.	Gitagovinda*	1969	Rs. 18-70
20.	Kasika Part II	1970	Rs. 30-00
21.	Sahityaratnakara Part I	1972	Rs. 17-35
22.	Do Part II	1974	Rs. 17-35
23.	Kasika Part III (Indices) Vol. I	1976	Rs. 25-00
24.	Sahityaratnakara Part III	1981	Rs. 28-00
25.	Padamanjari Part I	1981	Rs. 25-00
26.	Do Part II	198'	
27.	Journal of Skt. Academy Vol. I	1979	
28.	Do Vol. II	1980	Rs.
29.	Koundinya Siksha	1980	Rs. 1-00
30.	Journal of Skt. Academy Vol III	1981	Rs. 15-00
31.	Do Vol. IV	1982	Rs. 15-00
32.	Samskrita Kavijivitam Part II	1982	Rs. 28-00
33.	Sangitachandra	1982	Rs. 28-00
34.	Kriya Svara Lakshanam	1983	Rs. 25-00
35.	Parasika Lokoktayah	1983	Rs. 10-00
36.	Journal of Skt. Academy Vol. V	1983	Rs. 15-00
37.	Do Vol VI	1984	Rs. 15-00
38.	Minor Works of Neelakantha Deekshita	1984	Rs. 15-00
39.	Kasika Part III (Indices) Vol. II.	1985	Rs. 35-00
40.	Kasika Vivarana Panjika (Nyasa) I	1985	Rs. 25-00
41.	Journal of Skt. Academy Vol. VII	1985	Rs. 15-00
42.	Mahisha Satakam	1985	Rs. 15-00
43.	Kasika Vivarana Panjika (Nyasa) II	1986	Rs. 25-00

* Out of Print